ंसूच

अयोध्याकांडे आरब २

1

1

श्रीगणेशाय नमः॥ अयोध्यां रक्षेतु गुरुर्वर्थे त्यक्त्वा राज्यं गिरौ वसन्॥ पादुके भरतायादात्स रामः शर
णं मम॥१॥ अथ रामस्य राज्याभिषेकार्हं गुणान्प्रतिपादयितुं राज्याभिषेकादिं च प्रतिपादयितुमेतदारं
भः मातुलकुलं॥ मातुलगृहं अनघः सोदरस्य लक्ष्मणस्य बलवद्दामाश्रयप्रयुक्तोर्थोरहितः नित्यशत्रु
वः कामादयस्तद्धंता॥ नीतः अनेन विना मातुलगृहभुज्यमानसुखमसत्कल्पमिति धियानीतइत्य
र्थः॥ प्रीत्या भरतविषयस्नेहेन पुरस्कृतो युक्तः॥ तेन भरतनिर्वंधेन गमनशंकावारिता॥ किंच भरते

श्रीगणेशाय नमः॥ गच्छता मातुलकुलं भरतेन तदानघः॥ शत्रुघ्नो नित्यशत्रुघ्नो नीतः प्रीतिपुर
स्कृतः॥१॥ स तत्र न्यवसद्भ्रात्रा सह सत्कारसत्कृतः॥ मातुलेनाश्वपतिना पुत्रस्नेहेन लालितः॥
२॥ तत्रापि निवसंतौ तौ तर्प्यमाणौ च कामतः॥ भ्रातरौ स्मरतां वीरौ वृद्धं दशरथं नृपं॥३॥

नप्रीत्या पुरस्कृतः॥ अग्रेसरः कृतः तेन परस्परानुरागसूचनं॥१॥ स भरतः तत्र मातुलकुले विशि
ष्टवस्त्राभरणभोजनादिरूपसत्कारेण सत्कृतः पुत्रस्नेहेन॥ पुत्रादप्यधिकस्नेहेन त्यर्थ इत्येके
२॥ तत्रापि तादृशसत्कारवत्यपि मातुलगृहे॥ कामतः कामैरभिमतविषयैः सार्वविभक्तिकस्त
सिः॥ तर्प्यमाणौ अनेन सार्वदिकी विषयसुखानिवृत्तिर्बोधिता॥ वृद्धं॥ अनेन शुश्रूषाकालला
त्ययेन धर्मलोपभयात्पितृस्मरणमिति सूचितं स्मरतां अस्मरतां अड भाव आर्षः॥३॥ राम

शतमनंते आत्मवत्तया स्वाधीनांतःकरणतया ॥ ११ ॥ शीलं सुचरितं ज्ञानमात्मानात्मविवेकज्ञानं वेदतदर्थज्ञानं च ॥ अस्त्रयोग्यांतरेष्वपि अस्त्रशस्त्रपरिश्रमयोग्यकालस्य यदंतरं मध्यं तेष्वपि सज्जनैरेव शास्त्ररहस्यं कथयन्नास्ते अन्यदा तु केवलं कुत्रिकन्यायसिद्धं सज्जनैकसंभाषणं ॥ १२ ॥ मधुराभाषी मधुरमाभाषितुं शीलमस्य पूर्वभाषी आगतान्प्रति प्रथमभाषणेन स्वाभिमुख्यप्रदर्शकः मधुरं शब्दतः प्रियम

स्य २

कदाचिदुपकारेण कृतेनैकेन तुष्यति ॥ न स्मरत्यपकाराणां शतमप्यात्मवत्तया ॥ ११ ॥ शीलवृद्धैर्ज्ञानवृद्धैर्वयोवृद्धैश्च सज्जनैः ॥ कथयन्नास्त वै नित्यं अस्त्रयोग्यांतरेष्वपि ॥ १२ ॥ बुद्धिमान्मधुराभाषी पूर्वभाषी प्रियंवदः ॥ वीर्यवान्न च वीर्येण महता स्वेन विस्मितः ॥ १३ ॥ न चानृतकथो विद्वान्वृद्धानां प्रतिपूजकः ॥ अनुरक्तः प्रजाभिश्च प्रजाश्चाप्यनुरज्यते ॥ १४ ॥ सानुक्रोशो जितक्रोधो ब्राह्मणप्रतिपूजकः ॥ दीनानुकंपी धर्मज्ञो नित्यं प्रग्रहवाञ्छुचिः ॥ १५ ॥ कुलोचितमतिः क्षात्रं स्वं धर्मं बहु मन्यते ॥ मन्यते परया प्रीत्या महत्स्वर्गफलं ततः ॥ १६ ॥

र्थतः न च विस्मितः अप्राप्तगर्वः ॥ १३ ॥ न चानृतकथः तेन सदा सत्यवचनायोग्यव्यवच्छेदो बोध्यते अनुरक्तोनुरंजितः अंतर्भावितण्यर्थः अनुरज्यते अनुरंजयति तेन परस्परानुरागः ॥ १४ ॥ अनुक्रोशो दया दुःखिषु तद्वान् दीनानुकंपी दीनानुकंपया तदभिलषितप्रापकः अतो नयोनरुक्तं प्रग्रहो दुष्टनिग्रहः इंद्रियनिग्रहश्च ॥ १५ ॥ कुलोचितमतिः स्वकुलोचितदयादाक्षिण्यशरणागतसंरक्षणादिधर्मैकप्रवणबुद्धिः अत एव क्षात्रं धर्मं प्रजापालनादिकं बहु मन्यते ततः क्षात्रधर्मात् प्रजापालनजन्ययाशत्रुसंहारजन्यया च

प्रोषितौ विदेशगतौ॥४॥ विनिर्वृत्ताः विनिर्गताः॥ अनेन राज्ञो विष्णुरूपकध्वनिः॥५॥ तत्रापि रामस्यात्यंताभि
मतत्वमुत्कर्षं चाह॥ तेषामिति॥ तेषामपि मध्ये पितू रामो रतिकरो बभूव। भूतानां प्राणिनां मध्ये स्व
यंभूश्चतुर्मुख इव गुणवत्तरश्च बभूव॥६॥ गुणवत्तरत्वे हेतुः॥ स हीति। उदीर्णस्य दृप्तस्य। अर्थितः

राजापि तौ महातेजाः सस्मार प्रोषितौ सुतौ॥ उभौ भरतशत्रुघ्नौ महेंद्रवरुणोपमौ॥४॥ सर्व एव
तु तस्येष्टाश्चत्वारः पुरुषर्षभाः॥ स्वशरीराद्विनिर्वृत्ताश्चत्वार इव बाहवः॥५॥ तेषामपि महाते
जा रामो रतिकरः पितुः॥ स्वयंभूरिव भूतानां बभूव गुणवत्तरः॥६॥ स हि देवैरुदीर्णस्य रावण
स्य वधार्थिभिः॥ अर्थितो मानुषे लोके जज्ञे विष्णुः सनातनः॥७॥ कौसल्या शुशुभे तेन पुत्रेणा
मिततेजसा॥ यथा वरेण देवानामदितिर्वज्रपाणिना॥८॥ स हि रूपोपपन्नश्च वीर्यवाननसू
यकः॥ भूमावनुपमः सूनुर्गुणैर्दशरथोपमः॥९॥ स च नित्यं प्रशांतात्मा मृदुपूर्वं च भाषते॥
उच्यमानोऽपि परुषं नोत्तरं प्रतिपद्यते॥१०॥

प्रार्थितः जज्ञे आविर्भूतः॥७॥ देवानां वरेणेति व
ज्रपाणिविशेषणं। वज्रपाणिना प्रार्थितेन देवानां वरेण वामनेनादितिरिवेत्यर्थ इत्यन्ये॥८॥ गु
णवत्तर इत्युक्तं गुणानेवाह स हीति रूपं लावण्यं सौंदर्यं च असूया गुणेषु दोषत्वाविष्करणं
तद्रहितः भूमावनुपमः उक्तगुणविषये॥ सूनुः कौसल्याया इति शेषः दशरथोपमत्वं वक्ष्यमाणगुणै
र्बोध्यं॥९॥ मृदुपूर्वं मृदूक्तिपूर्वं स्वजनेन परुषमुच्यमानोऽपि परुषमुत्तरं न प्रतिपद्यते न प्रयच्छति
॥१०॥

स्मृतिप्रतिभानयोर्भेदः संक्षेपेण्याकृतः ॥ लौकिके कृतकल्पः ॥ संपादितसामर्थ्यः समयाचारे धर्मे विशारदः कुशलः ॥२२॥ निभृतो विनीतः संवृताकारो गूढाभिप्रायः ॥ गुप्तमंत्र इति पाठे फलपर्यंतमन्याविदितमंत्रः गुप्तैर्मंत्रैरिति पाठः ॥ प्रचुरः गुप्तैः मित्रत्वेन सर्वाज्ञातैः ॥ तादृशा हि परराष्ट्रभेदादौ मुख्यसहायाः ॥ त्यागो

धर्मकामार्थतत्वज्ञः स्मृतिमान्प्रतिभानवान् ॥ लौकिके समयाचारे कृतकल्पो विशारदः ॥२२॥
निभृतः संवृताकारो गुप्तमंत्रः सहायवान् ॥ अमोघक्रोधहर्षश्च त्यागसंयमकालवित् ॥२३॥
दृढभक्तिः स्थिरप्रज्ञो नासद्ग्राही न दुर्वचः ॥ निस्तंद्रीरप्रमत्तश्च स्वदोषपरदोषवित् ॥२४॥
शास्त्रज्ञश्च कृतज्ञश्च पुरुषांतरकोविदः ॥ यः प्रग्रहानुग्रहयोर्यथान्यायं विचक्षणः ॥२५॥

३

वित्तादेः ॥ सत्पात्रे दानं संयमो न्यायेनार्जनं तत्समयज्ञः ॥२३॥ दृढभक्तिर्गुर्वादिषु स्थिरप्रज्ञः विस्मृतिहीनः नासत्ग्राही ॥ असद्वस्तुग्रहणशीलो न न दुर्वचः ॥ परोद्वेजकवचनहीनः निस्तंद्रीः निरालस्यः स्वीयानां दोषः स्वदोषः ॥२४॥ कृतज्ञः परेण अल्पमपि कृतमुपकारं जानाति तथा पुरुषाणामंतरं तारतम्यं तद्विवेचने कोविदः ॥ यद्वा पुरुषाणामांतरमभिप्रायस्तज्ज्ञः प्रग्रहो निग्रहः ॥ यथान्यायं यथोचितं कर्तुं विचक्षणः ॥२५॥

नाश्रेयसि॥ अश्रेयस्करे निषिद्धकर्मणीत्यर्थः॥ धर्मविरुद्धकथारुचिर्न वादादिषु बृहस्पतिरिव स्वोक्तनिर्वाह
कयुक्तिवक्ता॥१७॥ अरोग इत्यनेन सत्कर्मानुष्ठानसामर्थ्यं वपुष्मान् विपुलांसत्वादिलक्षणवपुर्विशेषव
न्॥ तत्तत्कर्मयोग्यदेशकालज्ञाता निग्रहानुग्रहाय पुरुषाणां धर्मित्वधर्मित्वरूपसारज्ञाता सएकए
व रामो लोके साधुः सर्वगुणयुक्तो ब्रह्मणा कृतः॥१८॥ एवं श्रेष्ठगुणैर्युक्तत्वोपदेशे पिदाज्ञायसत्पत्वा

नाश्रेयसिरतो यश्च न विरुद्धकथारुचिः॥ उत्तरोत्तरयुक्तीनां वक्ता वाचस्पतिर्यथा॥१७॥ अरोगस्त
रुणो वाग्मी वपुष्मान्देशकालवित्॥ लोके पुरुषसारज्ञः साधुरेको विनिर्मितः॥१८॥ स तु श्रेष्ठैर्गुणै
र्युक्तः प्रजानां पार्थिवात्मजः॥ बहिश्चर इव प्राणो बभूव गुणतः प्रियः॥१९॥ सर्वविद्याव्रतस्ना
तो यथावत्सांगवेदवित्॥ इष्वस्त्रे च पितुः श्रेष्ठो बभूव भरताग्रजः॥२०॥ कल्याणाभिजनः साधुर
दीनः सत्यवागृजुः॥ वृद्धैरभिविनीतश्च द्विजैर्धर्मार्थदर्शिभिः॥२१॥

सापनाय च पुनरुपदिशति स
त्विति॥ श्रेष्ठगुणै रुक्तैर्वक्ष्यमाणैश्च प्राणसादृश्यकथनात्प्रजानां रामाधिकमिष्टं नास्तीति सूचितं गुण
तः गुणैः॥१९॥ सर्वविद्येति। तत्तद्विद्यापेक्षितब्रह्मचर्यव्रतानंतरमेव स्नातः॥ कृतसमावर्तनः॥ अतए
व यथावदित्यादि॥ इष्ववो मंत्ररहिताः समंत्रास्त्वस्त्राणि॥ समाहारे द्वंद्वः॥ पितुः श्रेष्ठस्तदपेक्षयाश्रेष्ठः॥२०॥
कल्याणानामभिजनो जन्मभूमिः॥ अदीनः क्षोभहेतावपि अक्षुब्धांतःकरणः॥ ऋजुः पिसत्यवक्ता॥ अभिविनीतः॥ शिक्षि

मत्सरः परसंद्वेषः ॥ ३० ॥ भूतानां प्राणिनां सिद्धानामिति पाठे सिद्धादेवभेदा इति कतक कृत् । कालवशः कालपार
तंत्र्यं प्राकृतवत्तदनुसारी न ॥ स्वापत्तसर्वपरिकर इति यावत् ॥ ३१ ॥ एवं द्विवारं गुणश्रेष्ठसमुपपाद्य पुन
रतिदार्ढ्याय तदुपपादयति । संमत इत्यादि । क्षमाप्रधानैर्गुणैर्वसुधायास्तुल्य इति परेणान्वयः ॥ ३२ ॥

अप्रधृष्यश्च संग्रामे क्रुद्धैरपि सुरासुरैः ॥ अनसूयो जितक्रोधो न दृप्तो न च मत्सरी ॥ ३० ॥ न चावज्ञे
यश्च भूतानां न च कालवशानुगः ॥ एवं श्रेष्ठैर्गुणैर्युक्तः प्रजानां पार्थिवात्मजः ॥ ३१ ॥ संमतस्त्रिषु
लोकेषु वसुधायाः क्षमागुणैः ॥ बुध्या बृहस्पतेस्तुल्यो वीर्ये चापि शचीपतेः ॥ ३२ ॥ तथा सर्वप्रजा
कान्तैः प्रीतिसंजननैः पितुः ॥ गुणैर्विरुरुचे रामो दीप्तः सूर्य इवांशुभिः ॥ ३३ ॥ तमेवं वृत्तसंपन्नम
प्रधृष्यपराक्रमं ॥ लोकनाथोपमं नाथमकामयत मेदिनी ॥ ३४ ॥ एतैस्तु बहुभिर्युक्तं गुणैरनुपमैः
सुतं ॥ दृष्ट्वा दशरथो राजा चक्रे चिंतां परंतपः ॥ ३५ ॥ अथ राज्ञो बभूवैवं वृद्धस्य चिरजीविनः ॥
प्रीतिरेषा कथं रामो राजा स्यान्मयि जीवति ॥ ३६ ॥

य

तथेति । कान्तैरिष्टैः तथा पितुः प्रीतिसंजननैर्गुणैः करणैः विरुरुचे इत्यन्वयः ॥ ३३ ॥ एवमभिषेकोपयोगिगु
णश्रेष्ठसमुत्कारा राज्ञोऽभिषेके छंदं दर्शयति । तमेवमिति । मेदिनी । तद्देवताः तद्वर्त्तिप्रजाश्च ॥ ३४ ॥ ३५ ॥
चिंताप्रकारमाह । अथेति । मयि जीवति रामो राजा कथं भवेत् तादृशस्य तस्य दर्शनजा एषा अत्र सु
खं ऽवाऽनिर्वचनीया प्रीतिर्मे कथं स्यादिति चिंता बभूवेत्यन्वयः ॥ ३६ ॥

राम

क्तमर्थमेव विवृणोति· सत्संग्रहश्च ग्रहणे॥ संग्रहः स्वीकारस्ततोनुग्रहणं सपरिवारस्य पालनं। निग्रहणोऽइति
पाठेप्ययमेवार्थः॥ तत्र निग्रहस्य· दुष्ट निग्रहस्य चकरणे स्थानवित्· देशकालज्ञः। आयकर्मणि उपायज्ञः
पुष्पेभ्यो मधुकर इव प्रजाभ्यः करेण धनग्रहणकर्मणि चतुर इत्यर्थः॥ कश्चिदायस्य चार्धेन चतुर्भागेन वा
पुनः पादभागैस्त्रिभिर्वापि व्ययः कार्यो न पैरिहे ति शास्त्र सदृशव्यय कर्मज्ञः॥ २६॥ व्यामिश्रकेषु प्रकृतादिभा

सत्संग्रहाऽनुग्रहणे स्थानवित्निग्रहस्य च॥ आयकर्मण्युपायज्ञः संदृष्टव्ययकर्मवित्॥ २६॥
श्रेष्ठः शास्त्रसमूहेषु प्राप्तो व्यामिश्रकेषु च॥ अर्थधर्मौ च संगत्य सुखतंत्रो न चालसः॥ २७॥ वै
हारिकाणां शिल्पानां विज्ञातार्थविभागवित्॥ आरोहे विनये चैव युक्तो वारण वाजिनां॥ २८॥
धनुर्वेद विदां श्रेष्ठो लोकेतिरथ संमतः॥ अभियाताप्रहर्त्ता च सेनानय विशारदः॥ २९॥

षामिश्रितनाटकादिषु· श्रेष्ठः निपुणतां· अर्थधर्मौ संगत्य तद विरोधेन सुखतंत्रः कामसेवीत्य
र्थः· कर्त्तव्येष्वालस्यरहितः॥ २७॥ वैहारिकाणां क्रीडाप्रयोजनानां शिल्पानां गीतवाद्यचित्रकर्मादीनां
विज्ञाता॥ अर्थविभागवित् धर्माय यशसेर्थाय आत्मने स्वजनाय च· पंचधा विभजन् वित्तमिहामु
त्र च शोभत इत्युक्तरीत्या तद्विभजनज्ञः॥ विनयो विविध गत्यानयनं· शिक्षणं वा॥ २८॥ अभियातापरसे
नाभिमुखं याता प्रहर्त्ता शत्रुणां सेनानयः· चक्रादि व्यूहेन सेनान्यासस्तत्र विशारदो निपुणः॥ २९॥

अथात्मनः शोकापनुदं शोकहन्तृ पूर्णचंद्रमुखस्य महात्मनो रामस्य संप्रियत्वं राज्याभिषेकेण सर्वानंदकरत्वं बुबुधे ज्ञातवान् ॥४४॥ अत आत्मनश्च श्रेयसे प्रजानां च श्रेयसे प्रियेण च प्रजानिष्ठरामविषयप्रीतिरूपहेतुना च भक्त्या च रामपालनेन प्रजा धन्या भवत्विति प्रजाविषयस्नेहेन च स नृपोत्तमः त्रिभिः ॥ रामाभिषेकाय त्वरितवान् ॥४५॥ त्वरयित्वा च नानानगरवासिनस्तत्राधिकृतान् भिन्नभिन्नजनपदस्वामिनः

पूर्णचंद्राननस्याथ शोकापनुदमात्मनः ॥ लोके रामस्य बुबुधे संप्रियत्वं महात्मनः ॥४४॥
आत्मनश्च प्रजानां च श्रेयसे च प्रियेण च ॥ प्राप्ते काले स धर्मात्मा भक्त्या त्वरितवान् नृपः ॥४५॥
नानानगरवास्तव्यान् पृथग्जानपदानपि ॥ समानिनाय मेदिन्याः प्रधानान् पृथिवीपतिः ॥४६॥
तान्वेश्मनानाभरणैर्यथार्हं प्रतिपूजितान् ॥ ददर्शालंकृतो राजा प्रजापतिरिव प्रजाः ॥४७॥
न तु केकयराजानं जनकं वा नराधिपः ॥ त्वरया चानयामास पश्चात्तौ श्रोष्यतः प्रियं ॥४८॥
अथोपविष्टे नृपतौ तस्मिन् परपुरार्दने ॥ ततः प्रविविशुः शेषा राजानो लोकसंमताः ॥४९॥

श्चमं त्रिद्वारा समानिनिनाय ॥४६॥ वेश्मनानाभरणैः स्वदानैः प्रजापतिर्ब्रह्मा ॥४७॥ केकयाद्यनानयने हेतुस्त्वरया चेति च स्त्वर्थे ऽभिषेकविषयत्वरयाभित्यर्थः प्रियरामाभिषेकं श्रोष्यत इति विचार्येति शेषः अत्र भरतजनकयो रामेने विघ्नभियादेवास्तथा बुद्धिं राज्ञोदत्तवंत इति तात्पर्यं ॥४८॥ शेषाः केकयाजनकव्यतिरिक्ताः सन्नाः ॥४९॥

प्रीतिरभिलाषः॥ अभिलाषाकारमाह कदानामेति पूर्वपद्ये प्रीतिरानंदः॥३७॥पर्जन्यो मेघः॥३८॥३९॥ अनेनवय
सावार्धकेन तथाभूतमात्मजं दृष्ट्वा यथास्वर्गं यथाकालं यथायोगं वास्वर्गमवाप्नुयामितिचिंतां चक्रे इ
त्यनुकर्षणान्वयः॥४०॥ नैस्तैरुक्तैः एतैरितिपाठेप्येवमेव शिष्टैरुक्तादन्यैश्चापरिछिन्नैर्लोके लोकोत्तमः

एषान्यस्यपराप्रीतिर्हृदिसंपरिवर्तते॥ कदानामसुतंद्रक्ष्याम्यभिषिक्तमहंप्रियं॥३७॥वृद्धिका
मोहिलोकस्यसर्वभूतानुकंपकः॥मत्तःप्रियतरोलोके पर्जन्यइववर्षिमान्॥३८॥यमशक्रसमोवी
र्येबृहस्पतिसमोमतौ॥महीधरसमोधृत्यामत्तश्चगुणवत्तरः॥३९॥महीमहमिमांकृत्स्नामधि
तिष्ठंतमात्मजं॥ अनेनवयसादृष्ट्वा यथास्वर्गमवाप्नुयां॥४०॥इत्येवंविविधैस्तैस्तैरन्यपार्थिवदु
र्लभैः॥शिष्टैरपरिमेयैश्चलोके लोकोत्तमैर्गुणैः॥४१॥तंसमीक्ष्यतदाराजायुक्तंसमुदितैर्गुणैः
निश्चित्यसचिवैः सार्धंयौवराज्यममन्यत॥४२॥दिव्यंतरिक्षेभूमौचघोरमुत्पातजंभयं॥संचचक्षे
थमेधावीशरीरेचात्मनोजरां॥४३॥

त्वेन॥प्रसिद्धैर्गुणैरुपलक्षितं॥४१॥तंउक्तानुक्तैः समुदितै
र्गुणैर्युक्तंपुत्रंसमीक्ष्यदृष्ट्वासचिवैः सार्धंनिश्चित्यतादृशगुणवत्त्वेनपुत्रस्ययौवराज्यं अमन्तवि
चारितवान्॥४२॥दिव्युत्पाताग्रहनक्षत्रादिवैकृतं॥अंतरिक्षे महावातदिग्दाहादयः॥भूम्युत्पाताः
भूकंपादयः॥तज्जंतत्सूचितंभयमात्मानिष्टंमंत्रिभ्यःसंचचक्षेउक्तवान्॥तथारामाभिषेककारणांतर
मात्मनःशरीरेजरांचावोचत अनेनोत्पातसूचितानिष्टयोगप्रतिबंधनं॥४३॥ ॥

मेराज्यंमयासंप्रतिपाल्यमानं॰ममपूर्वैर्मन्वादिभिः॥पालितमितिविदितमित्यन्वयः ४॥ततःकिंतत्राह सो
हमितिश्रेयसा॰सरामज्याभिषेकद्वाराविशिष्टेनसुखेनयतइक्ष्वाकुभिःप्रतिपालितमतएवसुखार्हं ५
पूर्वैर्मन्वादिभिःपंथानंप्रजापालनमार्गंअनिद्रेण॥स्वसुखनिरपेक्षेण॰यथाशक्तीतिविनयप्रद

विदितंभवतामेतद्यथामेराज्यमुत्तमं॥पूर्वकैर्ममराजेंद्रैःसुतवत्परिपालितं॥४॥सोह
मिक्ष्वाकुभिःसर्वैर्नरेंद्रैःप्रतिपालितं॥श्रेयसायोक्तुमिच्छामिसुखार्हमखिलंजगत्॥५॥म
याप्याचरितंपूर्वैःपंथानमनुगच्छता॥प्रजानित्यमनिद्रेणयथाशक्त्याभिरक्षिताः॥६॥इदंश
रीरंकृत्स्नस्यलोकस्यचरिताहितं॥पांडुरस्यातपत्रस्यछायायांजरितंमया॥७॥प्राप्यवर्षसह
स्राणिबहून्यायूंषिजीवतः॥जीर्णस्यास्यशरीरस्यविश्रांतिमभिरोचये॥८॥राजप्रभाव
जुष्टांचदुर्वहामजितेंद्रियैः॥परिश्रांतोस्मिलोकस्यगुर्वींधर्मधुरंवहन्॥९॥सोहंवि
श्राममिच्छामिपुत्रंकृत्वाप्रजाहिते॥संनिकृष्टानिमान्सर्वाननुमान्यद्विजर्षभान्॥१०॥

6

र्शनं॥६॥जरितंप्रापितजरंकृतं॥नकदापिप्रजापालनाविरोधेनविषयासक्तिःकृतेतिभावः॥७
वर्षसहस्राणीष्विवर्षसहस्राणि॥बहून्यायूंषिवत्सरशतरूपानेकपुरुषायूंषि विश्रां॥
तिंप्रजाचिंताराहित्यरूपिणीं॥८॥राजप्रभावाःशौर्यादयस्तैर्जुष्टांवहनितिहेतौशता
९॥प्रजाहितेपुत्रंकृत्वातंनियुज्य॰अनुमान्यकृतानुमतिकान्कृत्वा॥१०॥ ॥

राजवितीर्णेषुराजदर्शितेषु नियतानियतदेशाधिपत्यायद्वाराजमुखमात्रनिरीक्षकाः॥५०॥मानः सत्कारः पु
रालयैः राजसेवार्थंसदायोध्यास्थितैः॥जानपदैः स्वस्वदेशस्थैः उपोपविष्टैः सभायांस्वसमीपोपवि
ष्टैः सहस्रचक्षुरिंद्रः राजाविचारैस्तथातैरेवसर्वप्रजाराजचित्तस्यज्ञातं॥५१॥इतिश्रीरामायणेभू
श्रीरामीयेरामायणतिलके अयोध्याकांडे आद्यः सर्गः॥१॥अथराज्याभिषेकस्यसर्वप्रजार्थत्वात्त

अथराजवितीर्णेषुविविधेष्वासनेषुच॥राजानंमेवाभिमुखानिषेदुर्नियतानृपाः॥५०॥सल
ब्धमानैर्विनयान्वितैर्नृपैः पुरालयैर्जानपदैश्चमानवैः॥उपोपविष्टैर्नृपतिर्वृतोबभौसह
स्रचक्षुर्भगवानिवामरैः॥५१॥इत्यार्षेश्रीरामायणेवाल्मीकीयेअयोध्याकांडेप्रथमःसर्गः
॥१॥ततःपरिषदंसर्वामामंत्र्यवसुधाधिपः॥हितमुद्धर्षणंचैवमुवाचप्रथितंवचः॥१॥दुंदु
भिस्वरकल्पेनगंभीरेणानुनादिना॥स्वरेणमहताराजाजीमूतइवनादयन्॥२॥राजलक्षण
युक्तेनकांतेनानुपमेनच॥उवाचरसयुक्तेनस्वरेणनृपतिर्नृपान्॥३॥

दत्तुमतयेआहराजेत्या
हततइति आमंत्र्य अभिमुखीकृत्य हितंश्रेयस्करं अतएवोद्धर्षणंउत्कृष्टहर्षजनकं प्रथितंसर्वज्ञ
श्रव्यंयथाभवतितथोवाच॥१॥तदेवाहदुंदुभीति अनुवादः प्रतिध्वनिः नादयन् दिशइतिशेषः॥२॥स्व
रेराजलक्षणयुक्तत्वं स्निग्धगंभीरत्वादियुक्तत्वंकांतत्वंमृदुमधुरत्वादिना स्वरयुक्तेनः अद्भुतरसयुक्तेन॥३॥

नतुत्वदधिकः को हिताहितविचारसमर्थोतआह यद्यपीति॰॥ पाखिंतायद्यपिममप्रीतिस्तद्दिष्टया तथापि अन्यद्धितंयद्यस्तितदा विचिंत्यतां॥ यतोमध्यस्थानां रागद्वेषहीनानांचिंतातु विचारस्तत इत्तां चिंतापेत्तयान्या विलत्तणा॥ तदेवाह विमर्दे नपूर्वापरपत्तसंघर्षे॥ अधिकोदयाअधिकार्थ प्रादुर्भाववती॥१६॥ वर्षिमंतंमहामेघंदृष्ट्वा नर्दतोवर्हिणइवमुदितानपानपं प्रत्यनंदन् प्र

यद्यप्येषाममप्रीतिर्हितमन्यद्विचिंत्यतां॥ अन्यामध्यस्थचिंतातु विमर्दाभ्यधिकोदया ॥१६॥ इतिब्रुवंतंमुदिताःप्रत्यनंदन्नृपानृपं॥ वृष्टिमंतंमहामेघंनर्दंतइवबर्हिणः॥१७॥ स्निग्धोनुनादःसंजज्ञेततोहर्षसमीरितः॥ जनौघोद्घुष्टसंनादोमेदिनींकंपयन्निव॥१८॥ तस्यधर्मार्थविदुषोभावमाज्ञायसर्वशः॥ ब्राह्मणाबलमुख्याश्चपौरजानपदैःसह॥१९॥ समेत्यतेमंत्रयितुंसमतागतबुद्धयः॥ ऊचुश्चमनसाज्ञात्वावृद्धंदशरथंनृपं॥२०॥

शंसापूर्वमंगीचक्रुः॥१७॥ अनुनादःसामंतकृतहर्षजवाक्यप्रतिध्वनिःसंजज्ञे॰सभायामितिशेषः॥ जनोघानामुत्घुष्टेनशब्देनसंनुसंभवन्नादः प्रतिध्वनिः पृथिवींकंपयन्निवसंजज्ञेवहिरितिशेषः विमानमितिपाठेराजस्थानमित्यर्थः॥१८॥ भावंधर्मविषयमभिप्रायं॰बलं॥ सेनातपोबलंवा चात्र पाः॥१९॥ समतांएकरूपतांगताः॥ ग्रामावृद्धयो॥ येषांते॥ मंत्रयितुंप्रवृत्ताइतिशेषः मंत्रतोत्तरं ज्ञात्वा पुनःपुनःपर्यालोचनेननिश्चित्य॥२०॥

राज्यार्हत्वं पुत्रस्य दर्शयति। अनुजात इति मत्संबंधि सर्वगुणविशिष्टो जात इत्यर्थः॥ इत्थं भूताख्यानविषयेनुः कर्मप्रवचनीय इति मामिति द्वितीया स्ववृत्तिगुणाधिक्यगुणवत्तामप्याह पुरंदरेति॥११॥ पुष्येणयुक्तं चंद्रमिव सर्वकार्यसिद्धिदत्वं यौवराज्ये तत्पदे प्रातः नियोक्तास्मीति लुट् पुंगवं श्रेष्ठं॥१२॥ सर्वोयुष्माकं नाथो राजा अनुरूपो योग्यः येन राज्ञा नकेवलं स्वयमेव नाथवंतो पितु त्रैलोक्यमपि नाथवत्तरं॥ एवं

अनुजातो हि मां सर्वैर्गुणैः श्रेष्ठो ममात्मजः॥ पुरंदरसमो वीर्ये रामः परपुरंजयः॥११॥ तं चंद्रमिव पुष्येण युक्तं धर्मभृतां वरं॥ यौवराज्ये नियोक्तास्मि प्रातः पुरुषपुंगवं॥१२॥ अनुरूपः स वो नाथो लक्ष्मीवाँल्लक्ष्मणाग्रजः॥ त्रैलोक्यमपि नाथेन येन स्यान्नाथवत्तरं॥१३॥ अनेन श्रेयसा सद्यः संयोज्येह मिमां महीं॥ गतक्लेशो भविष्यामि सुते तस्मिन्निवेश्य वै॥१४॥ यदिदं मेनुरूपार्थं मया साधु सुमंत्रितं॥ भवंतो मेनुमन्यंतां कथं वा करवाण्यहं॥१५॥

प्रभावो राम इति भावः॥१३॥ श्रेयसा प्रशस्ततरेण रामेण महीं संयोज्येराज्याभिषेकद्वारेणेत्यर्थः॥ एवं सति तादृशे सुते तस्य पालनभारं निवेश्य पगतक्लेशो भविष्यामि॥१४॥ मे इदं अभिषेकरूपं कार्यं यत् यदि मया साधु सुमंत्रितं भवतामनुरूपार्थं॥ अनुकूलप्रयोजनावहं च तदा भवंतो मे मम अनुमन्यंतां अनुमतिं प्रयच्छंतु॥ हर्षयुक्तत्वाद्धत्तुरस्मच्छन्दप्रयोग न रुक्तामदोषाय इतो निरिक्तं चाकथं केन प्रकारेण किं करवाणि तद्वदंत्विति शेषः॥१५॥

द्विव्येर मानुषैः इक्ष्वाकुभ्यस्तद्वंश्येभ्यः अतिरिक्तोधिकः॥२५॥सादाज्ञामाद्वि निर्वर्त्तः रामेगौव प्रतिष्ठापितइ
त्यर्थः श्रिया अर्थेन॥२६॥सुखत्वेइत्यादेस्तत्व इत्यनेनान्वयः॥ प्रत्येकगुणेषु एकैकस्योपमानत्वद
र्शनेनरामनिष्ठगुणानामन्यत्रैकत्रवासासंभवोदर्शितः॥२७॥संधाप्रतिज्ञा अनसूयकोऽन्यविष

द्विव्येर्गुणैः शक्रसमोरामः सत्यपराक्रमः॥इक्ष्वाकुभ्योपिसर्वेभ्योत्यतिरिक्तोविशांपते॥२५॥
रामःसत्पुरुषोलोके सत्यःसत्यपरायणः॥सादाज्ञामाद्विनिर्वर्तोधर्मश्चापिश्रियासह॥२६॥
प्रजासुखत्वेचंद्रस्यव सुधायाः क्षमागुणैः॥बुध्यावृहस्पतेस्तुल्योवीर्येसाक्षाच्छचीपतेः॥२७॥ध
र्मज्ञःसत्यसंधश्चशीलवाननसूयकः॥क्षांतःसांत्वयिताश्लक्ष्णः कृतज्ञोविजितेंद्रियः॥३१॥
मृदुश्चस्थिरचित्तश्चसदाभव्योनसूयकः॥प्रियवादीचभूतानांसत्यवादीचराघवः॥३२॥
बहुश्रुतानांवृद्धानांब्राह्मणानामुपासिता॥तेनास्येहातुलाकीर्तिर्यशस्तेजश्चवर्धते॥३३॥
देवासुरमनुष्याणांसर्वास्त्रेषुविशारदः॥सम्यग्विद्याव्रतस्नातोयथावत्सांगवेदवित्॥३४॥

षयासूयारहितः॥सांतयिताद्ुःखितानांदुःखंसमयिताः श्लक्ष्णः प्रियवचनः॥३१॥मृदुः सुकरो
पासनः॥स्थिरचित्तत्वमतिसंकटेपिअंगीकृतापरित्यागः॥भव्योदृश्यः अनसूयकोन्यनिष्ठासू
यायाअविषयः॥भूतानांप्राणिनां॥३२॥तेनोक्तगुणसमूहेनः कीर्तिः शौर्यादिजा॰यशोदानादिज
प्रसिद्धिःतेजःशौर्यं॥३३॥देवासुरेत्यादिनिर्धारणेषष्ठी॥३४॥

अनेकेत्यादिपदं बहुव्रीहिः साहस्रेष्वाधिकोणः। युवराजानमिति समासांतविधेरनित्यत्वादजभावः॥२१॥ इ
च्छामः कृताभिषेकं द्रष्टुमिति शेषः॥२२॥ अजानन्निव तदभिषेकस्य सर्वमनःप्रियत्वं जानन्नपि अजा
ननिव प्रजासुखात्स्यं जिज्ञासुः॥२३॥ हे राजानेमे वचनं श्रुत्वा तन्निर्विंधादेव केवलं रामं पतिमिच्छथो

अनेकवर्षसाहस्रो वृद्धस्त्वमसि पार्थिव॥ स रामं युवराजानमभिषिंचस्व पार्थिव॥२१॥ इच्छा
मो हि महाबाहुं रघुवीरं महाबलं॥ गजेन महता यांतं रामं छत्रावृताननं॥२२॥ इति तद्वचनं श्रु
त्वा राजा तेषां मनःप्रियं॥ अजानन्निव जिज्ञासुरिदं वचनमब्रवीत्॥२३॥ श्रुत्वैतद्वचनं यन्मे
राघवं पतिमिच्छथ॥ राजानः संशयोयं मे तदिदं ब्रूत तत्त्वतः॥२४॥ कथं नु मयि धर्मेण पृथिवीम
नुशासति॥ भवंतो द्रष्टुमिच्छंति युवराजं महाबलं॥२५॥ ते तमूचुर्महात्मानः पौरजानपदैः
सह॥ बहवो नृप कल्याणा गुणाः संति सुतस्य ते॥२६॥ गुणान्गुणवतो देव देवकल्पस्य धीम
तः॥ प्रियानानंदजान्कृत्स्नान्प्रवक्ष्यामोद्य तान्छृणु॥२७॥

नवस्त्वि तद्इति संशयः॥२४॥ संशयबी
जमाह। कथमिति। युवराजं तेन युवत्वात्तत्र नानाविधाऽधर्माणामपि संभव इति भावः॥२५॥ अ
स्मिन्नाधर्मलेशसंभावनापीत्याशयेनोत्तरयंति तेइति। तेनृपाः कल्याणगुणाः प्रजाकल्याणजन
कागुणाः॥२६॥ देवकल्पस्य देवतुल्यस्य रामस्य। शत्रूणामपि। आनंदनान्। अनिष्टनिवारणपू
र्वकेष्टप्रापकत्वेनानंदजनकान्॥२७॥

रामा·अ·
६

४३ शौर्यं युद्धे निर्भयप्रवेशसामर्थ्यं ॥ वीर्यं स्वस्याविकारेण परस्य विकारापादनं । पराक्रमो युद्धे लघुसंचारः
रागो विषये कः ॥ ४४ ॥ ४५ ॥ क्रोधप्रसादसार्थक्यमेवोपपादयति हंतीत्यादि · यत्र यस्मिन्विषये संतो यस्तम
र्थैः पूरयतीत्यर्थः ॥ ४६ ॥ दांतेः स्वमनोदमनैः ॥ ४७ ॥ मेदिनी तत्स्थो जनः ॥ ४८ ॥ असौ ते वत्सो दिष्ट्या ऽ स्मज्ज

उत्तरोत्तरयुक्तो च वक्ता वाचस्पतिर्यथा ॥ सुभ्रूरायतताम्राक्षः साक्षाद्विष्णुरिव स्वयं ॥ ४३ ॥ रामो
लोकाभिरामोयं शौर्यवीर्यपराक्रमैः ॥ प्रजापालनसंयुक्तो नरागोपहितेंद्रियः ॥ ४४ ॥ शक्त
स्त्रैलोक्यमप्येष भोक्तुं किं नु महीमिमां ॥ नास्य क्रोधः प्रसादश्च निरर्थोस्ति कदाचन ॥ ४५ ॥ हंत्ये
ष नियमाद्वध्यानवध्येषु न कुप्यति ॥ युनक्त्यर्थैः प्रहृष्टश्च तमसौ यत्र तुष्यति ॥ ४६ ॥ दांतैः सर्व
प्रजाकांतैः प्रीतिसंजननैर्नृणां ॥ गुणैर्विरोचते रामो दीप्तः सूर्य इवांशुभिः ॥ ४७ ॥ तमेवंगुणसं
पन्नं राममसत्यपराक्रमं ॥ लोकपालोपमं नाथमकामयत मेदिनी ॥ ४८ ॥ वत्सः श्रेयसि जातस्ते दि
ष्ट्यासौ तव राघव ॥ दिष्ट्या पुत्रगुणैर्युक्तो मारीचइव कश्यपः ॥ ४९ ॥ बलमारोग्यमायुश्च रामस्य
स्य विदितात्मनः ॥ देवासुरमनुष्येषु सगंधर्वोरगेषु च ॥ ५० ॥ ॥ राम ॥ ॥

गयेन श्रेयसि प्रजारक्षणे रूपे समर्थो जातः किं चासौ राघवस्तव दिष्ट्या भाग्येन मरीचिप्रजापतेः
पुत्रः कश्यप इव पुत्रगुणैर्युक्तो जात इत्यर्थः ॥ ४९ ॥ देवासुरादिषु राष्ट्रे पुरे बहिरे च वर्त्तमानः सर्वो
पि जनो रामस्य बलादि आशंसते · अभ्यंतरः ॥ सेवकः ॥ ५० ॥ राम

रा म
६

गांधर्वे संगीतशास्त्रे कल्याणानामभिजनो वा संस्थानं ॥ अदीनः क्षोभहेतावप्यक्षुभितआत्मा चित्तं यस्य ॥ ३५ ॥ अभि
विनीतः शिक्षितः ॥ धर्मेर्थे च नैपुणं नैपुण्यं येषां ते ॥ ग्रामेति लुप्तषष्ठीकं पृथक्पदं ग्रामस्य नगरस्य वा रक्षार्थं संग्रा
मे यदा व्रजतीत्यर्थः ॥ ३६ ॥ ३७ ॥ ३८ ॥ पिता औरसान्पुत्रानिव पौरान्कुशलं पृच्छतीत्यन्वयः ॥ शुश्रूषंते च वः शिष्याः

गांधर्वे च भुवि श्रेष्ठो बभूव भरताग्रजः ॥ कल्याणाभिजनः साधुरदीनात्मा महामतिः ॥ ३५ ॥ द्विजैरभिवि
नीतश्च श्रेष्ठैर्धर्मार्थनैपुणैः ॥ यदा व्रजति संग्रामं ग्रामार्थे नगरस्य वा ॥ ३६ ॥ गत्वा सौमित्रिसहितो नावि
जित्य निवर्तते ॥ संग्रामात्पुनरागत्य कुंजरेण रथेन वा ॥ ३७ ॥ पौरान्स्वजनवन्नित्यं कुशलं परिपृच्छति ॥ पु
त्रेष्वग्निषु दारेषु प्रेष्यशिष्यगणेषु च ॥ ३८ ॥ निखिलेनानुपूर्व्या च पिता पुत्रानिवौरसान् ॥ शुश्रूषंते व
वः शिष्याः कच्चिद्धर्मेषु दंशिताः ॥ ३९ ॥ इति वः पुरुषव्याघ्रः सदा रामोभिभाषते ॥ व्यसनेषु मनुष्याणां भृ
शं भवति दुःखितः ॥ ४० ॥ उत्सवेषु च सर्वेषु पितेव परितुष्यति ॥ सत्यवादी महेष्वासो वृद्धसेवी जितें
द्रियः ॥ ४१ ॥ स्मितपूर्वाभिभाषी च धर्मं सर्वात्मनाश्रितः ॥ सम्यग्योक्ता श्रेयसां च न विगृह्यकथारुचिः ॥ ४२

इति ब्राह्मणान्प्रति प्रश्नः वर्मसु दंशिताः अवहिताः भृत्या वः सेवंत इति क्षत्रियान्प्रति प्रश्नः कच्चिदिति
प्रश्ने कच्चिद्धर्मेषु दंसिता इति पाठः ॥ ३९ ॥ व्यसनं दुःखं ॥ ४० ॥ यथा पुत्रसुखेन पिता आनंदवान्भवति तथा प्र
जासुखेन राम इति भावः ॥ ४१ ॥ न विगृह्यकथारुचिः विग्रहो वृथाकालहरत्वं कृत्वा जल्पवितंडादिकथारु
चिर्यथा स्यात्तथा नेत्यर्थः न विगर्ह्यकथारुचिरिति पाठे निंद्यकथारुचिर्नेत्यर्थः ॥ ४२ ॥

४॥जनघोषः रामाभिषेकसंभारोपकल्पनाज्ञाश्रवणाज्जः॥वसिष्ठमितिवामदेवोपलक्षणं॥ अग्रे एवंव्यादिश्य
विप्रोत्विक्संयुक्तैः॥परिच्छदः उपकरणं॥६॥७॥युक्तान्सावधानान्मंत्रिणइतिशेषः॥बलीन्पूजाद्रव्याणि वि
घ्नशामकबल्यर्थानि॥८॥पृथक्पृथक्पात्रगतेइति॥अहतानिसदृशानितदानीमेवतंतुवायवंत्रादु

चैत्रः श्रीमानयंमासः पुण्यः पुष्पितकाननः॥यौवराज्यायरामस्यसर्वमेवोपकल्प्यतां॥४॥राज्ञ
स्तूपरतेवाक्येजनघोषोमहानभूत्॥शनैस्तस्मिन्प्रशांतेचजनघोषेजनाधिपः॥५॥वसि
ष्ठंमुनिशार्दूलंराजावचनमब्रवीत्॥अभिषेकायरामस्ययत्कर्मसपरिच्छदं॥६॥तदद्यभ
गवन्सर्वमाज्ञापयितुमर्हसि॥तच्छ्रुत्वाभूमिपालस्यवसिष्ठोमुनिसत्तमः॥७॥आदिदेशा
ग्रतोराज्ञःस्थितान्युक्तान्कृतांजलीन्॥सुवर्णादीनिरत्नानिबलीन्सर्वौषधीरपि॥८॥शुक्ल
माल्यानिलाजांश्चपृथक्चमधुसर्पिषी॥अहतानिचवासांसिरथंसर्वायुधान्यपि॥९॥चतु
रंगबलंचैवगजंचशुभलक्षणं॥चामरव्यजनेचोभेध्वजंछत्रंचपांडुरं॥१०॥शतंचशा
तकुंभानांकुंभानामग्निवर्चसां॥हिरण्यशृंगमृषभंसमग्रंव्याघ्रचर्म च॥११॥

२१
द्धृतानि॥९॥चामरव्यजने चमरैःपुच्छनिर्मितेव्यजने॥१०॥शातकुंभानांसौवर्णानां॥अग्निवर्चसा
मित्यनेनसुवर्णस्यात्युत्तमत्वंध्वनितंसमग्रं॥नखादिसहितमखंडं॥११॥ ॥

५१ रामस्यार्थे रामस्य बलादिप्रयोजनार्थे ॥ ५२ ॥ आयाचितं अभिप्रार्थितं रामाभिषेकरूपं समृध्यतां संपद्यतां ॥ ५३ राजोत्तमेति संबोधनं ॥ ५४ देवदेवो विष्णुस्तत्सदृशः अत एव सर्वलोकहितनिविष्टं ॥ उदारैर्गुणैर्युक्तं युक्तं उदारैर्महद्भिश्च परिगृहीतं ॥ ५५ इति रामाभिरामे श्रीरामीये रामव्याख्याने तिलके अयोध्याकांडे द्वितीयः सर्गः

आशंसते जनः सर्वो राष्ट्रे पुरवरे तथा ॥ आभ्यंतरश्च बाह्यश्च पौरजानपदो जनः ॥ ५१ ॥ स्त्रियो वृद्धास्तरुण्यश्च सायंप्रातः समाहिताः ॥ सर्वान्देवान्नमस्यंति रामस्यार्थे मनस्विनः ॥ ५२ ॥ तेषां तद्याचितं देव त्वत्प्रसादात्समृध्यतां ॥ राममिंदीवरश्यामं सर्वशत्रुनिबर्हणं ॥ ५३ ॥ पश्यामो यौवराज्यस्थं तव राजोत्तमात्मजं ॥ ५४ ॥ तं देवदेवोपममात्मजं ते सर्वस्य लोकस्य हिते निविष्टं ॥ हिताय नः क्षिप्रमुदारजुष्टं मुदाभिषेक्तुं वरद त्वमर्हसि ॥ ५५ ॥ इत्यार्षे श्रीरामायणे अयोध्याकांडे द्वितीयः सर्गः ॥ २ ॥ तेषामंजलिपद्मानि प्रगृहीतानि सर्वशः ॥ प्रतिगृह्याब्रवीद्राजा तेभ्यः प्रियहितं वचः ॥ १ ॥ अहोस्मि परमप्रीतः प्रभावश्चातुलो मम ॥ यन्मे ज्येष्ठं प्रियं पुत्रं यौवराज्यस्थमिच्छथ ॥ २ ॥ इति प्रत्यर्चितान्राजा ब्राह्मणानिदमब्रवीत् ॥ वसिष्ठं वामदेवं च तेषामेवोपशृण्वतां ॥ ३ ॥

२ अंजलिपद्मानि अंजलिरूपाणि पद्मानि पद्माकारा अंजलीरितियावत् प्रगृहीतानि प्रकर्षेण शिरसि बद्धानि प्रतिगृह्य वीक्षणावचनप्रत्यंजलिभिर्यथायोग्यं पतासां प्रतिग्रहः ॥ १ ॥ २ इति प्रत्यर्चितान्पौरजानपदान्कृत्वा ब्राह्मणानिदमब्रवीत् तेषां पौरादीनां शृण्वतां पुर इत्यर्थः चकारः संग्रामान्यमपेक्ष्य ब्रा

माल्ययोग्याः माला मर्हतीति माल्यमर्चनं तद्योग्याः गंधपुष्पादयः ॥ देवायतनचैत्ययोः पृथक्पृथगुपस्थापयि
तव्याः तत्तद्देवतापूजापूर्वकं तत्र तत्र ब्राह्मणतर्पणं कार्यमिति तात्पर्यं दीर्घा असयो येषां ते बद्धगोधा
चर्माणश्चेति द्वंद्वः दीर्घासिबद्धयोधा इति पाठे बद्धदीर्घासयो योधा इत्यर्थः । मृष्टवाससः सुपल
ताण मलंकाराणां ॥१८॥ महोदयं महोत्सवविशिष्टमंगणं । विप्रौ । वसिष्ठवामदेवौ । व्यादिश्य । अधि

उपस्थापयितव्याः स्रग्माल्ययोग्याः पृथक्पृथक् ॥ दीर्घासिबद्धा योधाश्च सन्नद्धा मृष्टवास
सः ॥१९॥ महाराजाङ्गणं शूराः प्रविशन्तु महोदयं ॥ एवं व्यादिश्य विप्रौ तु क्रियास्तत्र विनिष्ठि
तौ ॥२०॥ चक्रतुश्चैव यच्छेषं पार्थिवाय निवेद्य च ॥ कृतमित्येव चाब्रूतां अभिगम्य जगत्पतिं
॥२१॥ यथोक्तवचनं प्रीतो हर्षयुक्तौ द्विजर्षभौ ॥ ततः सुमंत्रं द्युतिमान्राजा वचनमब्रवीत् ॥२२॥
रामः कृतात्मा भवता शीघ्रमानीयतामिति ॥ स तथेति प्रतिज्ञाय सुमंत्रो राजशासनात् ॥२३॥
रामं तत्रानयांचक्रे रथेन रथिनां वरं ॥ अथ तत्र सहासीनास्तदा दशरथं नृपं ॥२४॥

कारणा इति शेषः । तत्र नृपवेश्मनि स्थितौ क्रियाः पुरोहितकर्तव्याश्चक्रतुरित्युत्तरेणान्वयः ॥२०॥
यच्चैव शेषं राजोक्तादन्यदवश्यकर्तव्यं तदपि पार्थिवाय निवेद्य चक्रतुः ततो जगत्पतिमभिग
म्य यथोक्तवचनं उक्तवचनमनतिक्रम्य सर्वं कृतं सिद्धं जातमित्यब्रूतां । प्री॰ तिर्मानसआनंदः त
दनुनायको मुखविकासादिर्हर्षः ॥२१॥ ॥२२॥ कृतात्मा । धर्मे कृतबुद्धिः प्रतिज्ञाय उक्त्वा ॥२३॥ तत्र प्र

अन्यत्र अनुक्तमपि लोकप्रसिद्धं गंधपुष्पादि राज्यव्यमवश्यापेक्षितं तदित्पर्यः॥ अग्न्यगारे अग्निहोत्रगृहे उपस्थापयतन्नापयत॥१२॥ अंतःपुरं राजवेश्म घ्राणहारिभिरतिसुगंधैः॥१३॥ प्रशस्तेः दृश्यैः गुणवत्त॥ युक्तसंस्कारं॥ दध्ना क्षीरेण चोपसेचनं संस्कारो यस्य तत्त्वं द्विजानां शतसाहस्रं प्रतियत्न

यच्चान्यत्किंचिदेष्टव्यं तत्सर्वमुपकल्प्यतां॥ उपस्थापयत प्रातरग्न्यगारे महीपतेः॥१२॥ अंतःपुरस्य द्वाराणि सर्वस्य नगरस्य च॥ चंदनस्रग्भिरर्च्यंतां धूपैश्च घ्राणहारिभिः॥१३॥ प्रशस्तमन्नं गुणवत्त दधिक्षीरोपसेचनं॥ द्विजानां शतसाहस्रं यत्प्रकाममलंभवेत्॥१४॥ सत्कृत्य द्विजमुख्यानां श्वः प्रभाते प्रदीयतां॥ घृतं दधि च लाजाश्च दक्षिणाश्चापि पुष्कलाः॥१५॥ सूर्येऽभ्युदितमात्रे श्वो भविता स्वस्तिवाचनं॥ ब्राह्मणाश्च निमंत्र्यंतां कल्प्यंतामासनानि च॥१६॥ आवध्यंतां पताकाश्च राजमार्गश्च सिच्यतां॥ सर्वे च तालापचरा गणिकाश्च स्वलंकृताः॥१७॥ कक्ष्यां द्वितीयामासाद्य तिष्ठंतु नृपवेश्मनः॥ देवायतनचैत्येषु सान्नभक्ष्याः सदक्षिणाः॥१८॥

काममभिमतमलं पर्याप्तं च भवेत्॥ तत्संपाद्य द्विजमुख्यानां तेभ्यः सत्कृत्य प्रातर्दीयतां॥१४॥१५॥ १६॥ तालपचाराः तालजीविनः॥१७॥ कक्ष्यां द्वितीयां॥ अंतःकक्ष्यायामभिषेकस्थाने ब्राह्मणानामेववासादिति भावः॥ चैत्याः रथ्यावृक्षाः॥ अन्नं ओदनं भक्ष्यं च तत्सहिताः दक्षिणासहिताः॥१८॥

स्वं नाम श्रावनयन्रामवर्माहमस्मीत्येवं॥ प्रणाम्य पार्श्वे वस्थानं पुत्रं धर्मः॥३३॥ अञ्जलौ अञ्जलिप्रदेशे रामं
स्वयमेव गत्वा गृहीत्वा समाकृष्य स्वसंमुखमानीय॥ अभ्युद्यतं उपस्थापितं॥३४॥ परं उत्कृष्टं व्यदीप
यत॥ अशोभयंत॥ अत्रासनं कर्म॥३५॥ स्वयैव प्रभयेति दीपनेकरणं॥ उदयकाले रविर्मेरुमिव

१२

नाम स्वं श्रावयन्रामो ववंदे चरणौ पितुः॥ तं दृष्ट्वा प्रणतं पार्श्वे कृतांजलिपुटं नृपः॥३३॥ गृह्या
जलौ समाकृष्य सस्वजे प्रियमात्मजं॥ तस्मै चाभ्युद्यतं सम्यक्मणिकांचनभूषितं॥३४॥
दिदेश राजा रुचिरं रामाय परमासनं॥ तथासनवरं प्राप्य व्यदीपयत राघवः॥३५॥ स्वयैव
प्रभया मेरुमुदये विमलो रविः॥ तेन विभ्राजिता तत्र सा सभापि व्यरोचत॥३६॥ विमलग्र
हनक्षत्रा शारदी द्यौरिवेंदुना॥ तं पश्यमानो नृपतिस्तुतोष प्रियमात्मजं॥३७॥ अलंकृतमि
वात्मानमादर्शतलसंस्थितं॥ स तं सुस्थितमाभाष्य पुत्रं पुत्रवतां वरः॥३८॥ उवाचेदं वचो रा
जा देवेंद्रमिव कश्यपः॥ ज्येष्ठायामसि मे पत्न्यां सदृशः सदृशः सुतः॥३९॥ राम

सा च सिंहं दशरथादि भ्राजिता सभापि न केवलमासनमेवेत्यपर्थः॥ व्यरोचत विशेषेण चकाशे॥
३६॥ ग्रहनक्षत्रादियुक्तमथाकाशमिंदुनेव॥३७॥ आदर्शतलप्रतिविंबितमलंकृतमात्मानं
पश्यन्निव तं पश्यन्तुतोष॥ तेन पितृसदृशावयवत्वं सूचितं रामस्य॥ आभाष्य रामेति संबोध्य॥३८
तदाह यदुवाच ज्येष्ठायामिति॥३९॥

रामः
१२

आर्यमध्यदेशवासिनः॥२५॥२६॥ गंधर्वराजप्रतिमत्वं सौंदर्येण सुस्वरत्वेन च विख्यातपौरुषत्वेन वीरत्वं॥२७॥ दीर्घबाहुत्वं महाबलत्वं च तदनुमायकं मत्तेत्यादि तेन सगर्वसलीलगमनमुक्तं॥ चंद्रकांताननमिति वाचकमात्रलुप्तोपमा अतएवातीवप्रियदर्शनं रामं जनान् रमयंतं

प्राच्योदीच्याः प्रतीच्याश्च दाक्षिणात्याश्च भूमिपाः॥ म्लेच्छाश्चार्याश्च ये चान्ये वनशैलांतवासिनः २५ उपासांचक्रिरे सर्वे तं देवा वासवं यथा॥ तेषां मध्ये स राजर्षिर्मरुतामिव वासवः २६॥ प्रासादस्थो दशरथो ददर्शायांतमात्मजं॥ गंधर्वराजप्रतिमं लोके विख्यातपौरुषं॥२७॥ दीर्घबाहुं महासत्वं मत्तमातंगगामिनं॥ चंद्रकांताननं राममतीवप्रियदर्शनं॥२८॥ रूपौदार्यगुणैः पुंसां दृष्टिचित्तापहारिणं॥ घर्माभितप्ताः पर्जन्यं ल्हादयंतमिव प्रजाः॥२९॥ न ततर्प समायांतं पश्यमानो नराधिपः॥ अवतार्य सुमंत्रस्तु राघवं स्पंदनोत्तमात्॥३०॥ पितुः समीपं गच्छंतं प्रांजलिः पृष्ठतोन्वगात्॥ स तं कैलासशृंगाभं प्रासादं रघुनंदनः॥३१॥ आरुरोह नृपं द्रष्टुं सहसा तेन राघवः॥ स प्रांजलिरभिप्रेत्य प्रणतः पितुरंतिके॥३२॥ राम

२८॥ रूपौदार्यगुणैः क्रमाद्दृष्टिचित्तहरं ग्रीष्मतप्ताः॥ प्रजा ल्हादयंतं पर्जन्यमिव स्थितं॥२९॥ पश्यमानस्य पार्श्वं न ततर्प तेनेनानुव्रतानां नवनवप्रेमास्पदत्वं॥३०॥३१॥ सहसा वेगेन तेन सुमंत्रेण सह इति शेषः स प्रांजलिः अभिप्रेत्य प्राप्य प्रणतः कृतसाष्टांगनमस्कारः॥३२॥ ॥

तेनामात्यप्रभृतीरमात्यसेनापतिपुरराष्ट्रादिरक्षकपौरजानपदसर्वप्रजाअनुरंजयच अयुतनियुताद्सिं
ख्यखर्वादिपरिच्छिन्नधान्यग्राहीणि कोष्ठरूपाण्यगाराणि आयुधागाराणि शस्त्रगृहाणि तैः सह सम्य
क्संचीयंते ऽस्मिन्निति संनिचया रत्नहेमाभरणरजतवस्त्रादिकोशगृहाणि बहून् विपुलानि

अमात्यप्रभृतीः सर्वाः प्रजाश्चैवानुरंजय ॥ कोष्ठागारायुधागारैः कृत्वा सन्निचयान्बहून् ॥४४॥
इष्टानुरक्तप्रकृतिर्यः पालयति मेदिनीं ॥ तस्य नंदंति मित्राणि लब्ध्वामृतमिवामराः ॥४५॥
तस्मात्पुत्र त्वमात्मानं नियम्यैवं समाचर ॥ तच्छ्रुत्वा सुहृदस्तस्य रामस्य प्रियकारिणः ॥४६॥
त्वरिताः शीघ्रमागत्य कौसल्यायै न्यवेदयन् ॥ सा हिरण्यं च गाश्चैव रत्नानि विविधानि च ॥४७॥
व्यादिदेश प्रियाख्येभ्यः कौसल्या प्रमदोत्तमा ॥ अथाभिवाद्य राजानं रथमारुह्य राघवः ॥४८॥
ययौ स्वं द्युतिमद्वेश्म जनौघैः प्रतिपूजितः ॥ ते चापि पौरा नृपतेर्वचस्तच्छ्रुत्वा तदा लाभमिवे
ष्टमाशु ॥ नरेंद्रमामंत्र्य गृहाणि गत्वा देवान्समानर्चुरभिप्रहृष्टाः ॥४९॥ इत्यार्षे श्रीरा० अयो
ध्या० तृतीयः सर्गः ॥३॥

13

कृत्वा संपर्यं प्रजारंजये तिपूर्वेणान्वयः ॥४४॥ इष्टाः स्वस्य अनुरक्ताः स्व
स्मिन्प्रकृतयः प्रजा यस्य तस्य मित्राणि अमृतं लब्ध्वा ऽमरा इव तं लब्ध्वा नंदंति ॥४५॥ तत्र अभिषे
कप्रयोजनं पितृ उपदेशं ॥४६॥४७॥ प्रियाख्येभ्यः रामाभिषेकरूपप्रियवक्तृभ्यः ॥४८॥ इष्टं लाभमिव
स्वेष्टवस्तुप्राप्तिरूपमिव आनर्चुः रामाभिषेकनिर्विघ्नतायै ॥४९॥ इति श्रीरा० श्रीरा० अ० तृतीयः सर्गः ॥३॥

गुणैर्ज्येष्ठोत एवममप्रियः यतस्त्वयेत्यन्वयः॥४०॥पुष्ययोगेन॥चंद्रस्यपुष्ययोगोपलक्षितकालेनअधिक
रणस्यकरणत्वविवक्षायांतृतीया॥प्रकृत्यास्वभावेन॥कामतःप्रकामंअत्यर्थमितियावत्॥४१॥गुण
वतिसत्यपिस्नेहात्तुस्नेहादेव॥विनीतएवसन्भूयोधिकंविनयमास्थाय॥४२॥कामजानि॥स्त्रीद्यू

उत्पन्नस्त्वंगुणज्येष्ठोममरामात्मजःप्रियः॥त्वयायतःप्रजाश्चेमाःस्वगुणैरनुरंजिताः॥४०॥
तस्मात्त्वंपुष्ययोगेनयौवराज्यमवाप्नुहि॥कामतस्त्वंप्रकृत्यैवनिर्णीतोगुणवानिति॥४१॥
गुणवत्यपितुस्नेहात्पुत्रवक्ष्यामितेहितं॥भूयोविनयमास्थायभवनित्यंजितेंद्रियः॥४२॥
कामक्रोधसमुत्थानित्यजस्वव्यसनानिच॥परोक्षयावर्त्तमानोवृत्त्याप्रत्यक्षयातथा॥४३॥

तमृगयामधुसेवनादीनि॥क्रोधजानि॥वाक्पारुष्योग्रदंडत्वार्थदूषणानिव्यसनानित्यजेथाः॥
तत्रार्थदूषणं॥पित्रादिसंचितार्थस्यनाशनंपरोक्षयाचारमुखतः॥परोक्षानुभवसिद्धयावृत्त्यास्वप
रराष्ट्रवृत्तांतविचारेण॥प्रत्यक्षयासदासभायांस्थित्वास्वप्रत्यक्षयावृत्त्याप्रजान्यायादिविचारेणयु
क्तोभव॥४३॥

दूरात्प्रणिपातः किं वदिष्यतीति भीत्या ॥१०॥ प्रणामंतं समुत्थाप्य तं परिष्वज्येत्यन्वयः प्रदिश्य हस्तेन दर्शयि
त्वा चाहुश्च साप्युक्ता· अस्मै रामाय· चात्सुमंत्राय· रामं च· रामं तु ॥११॥ यथा इप्सितास्तथा भुक्ताः विधि
हीनमसृष्टान्नं मंत्रहीनमदक्षिणं श्रद्धाविरहितं यज्ञं तामसं परिचक्षते इत्युक्तेरत्र वदादि विशे

प्रविशन्नेव च श्रीमान् राघवो भवनं पितुः ॥ ददर्श पितरं दूरात्प्रणिपत्य कृतांजलिः ॥१०॥ प्र
णामंतं समुत्थाप्य तं परिष्वज्य भूमिपः ॥ प्रदिश्य चासनं चास्मै रामं च पुनरब्रवीत् ॥११॥ रा
म वृद्धोऽस्मि दीर्घायुर्भुक्ता भोगा यथेप्सिताः ॥ अन्नवद्भिः क्रतुशतैर्यथेष्टं भूरिदक्षिणैः ॥१२॥
जातमिष्टमपत्यं मे त्वमद्यानुपमं भुवि ॥ दत्तमिष्टमधीतं च मया पुरुषसत्तम ॥१३॥ अनु·
भूतानि चेष्टानि मया वीर सुखान्यपि ॥ देवर्षिपितृविप्राणामनृणोऽस्मि तथात्मनः ॥१४॥
न किंचिन्मम कर्त्तव्यं तवान्यत्राभिषेचनात् ॥ अतो यत्त्वामहं ब्रूयां तन्मे त्वं कर्त्तुमर्हसि ॥१५॥
अद्य प्रकृतयः सर्वास्त्वामिच्छंति नराधिपं ॥ अतस्त्वां युवराजानं अभिषेक्ष्यामि पुत्रक ॥१६॥

षाणां· यथा यथावत्· इष्टं देवानां पूजनं कृतं ॥१२॥ इष्टं वस्तु दत्तं ॥१३॥ यागाध्ययनपुत्रदानोपभो
गैः पंचभिर्देवर्षिपितृविप्राणामात्मनश्चेत्येवं पंचानामनृणोऽस्मि· आत्मा सेंद्रियग्रामो जीवः स्त
स्य तत्तत्सुखाधिकारिणस्तद्दानेनानृणत्वमर्थसिद्धं तेन सर्वऋणाद्विनिर्मुक्तोऽस्मीति भावः ऋष्य
णो विप्रणस्य देवर्णाजीवर्णस्यांतर्भावं कृत्वा ऋणानित्रीणपयाकृतेतिस्मृतिवादः ॥१४॥ यत्तु कयांत

निश्चयज्ञः तत्तत्कार्यार्हदेशकालनियमज्ञः निश्चयं रामाभिषेककालविषयं ॥१॥ तदाह स्वएवेति युवराज इतिप्रभुरितिनिश्चयमितिपूर्वेणान्वयः उभाभ्यां प्रजानामपायदर्शनदानदंडादिविषयमेवाधिकारीतिसूचितं ॥२॥ आमंत्रयामास आनयेत्याज्ञापयामास ॥३॥ पूर्वागमनापेक्षयापूर्वानयनापेक्षया पुनस्तं ॥४॥ आवे

गतेष्वथनृपोभूयः पौरेषुसहमंत्रिभिः ॥ मंत्रयित्वाततश्चक्रे निश्चयज्ञः सनिश्चयं ॥१॥ स्वएवपु
ष्योभवितास्वोभिषेच्यस्तुमेसुतः ॥ रामोराजीवपत्राक्षोयुवराजइतिप्रभुः ॥२॥ अथांतर्गृहमा
विश्यराजादशरथस्तदा ॥ सूतमामंत्रयामासरामंपुनरिहानय ॥३॥ प्रतिगृह्यतुतद्वाक्यंसूतः
पुनरुपाययौ ॥ रामस्यभवनंशीघ्रंराममानयितुंपुनः ॥४॥ द्वास्थैरावेदितंतस्यरामायागम
नंपुनः ॥ श्रुत्वैवचापिरामस्तंप्राप्तंशंकान्वितोभवत् ॥५॥ प्रवेश्यचैनंत्वरितोरामोवचनमब्रवी
त् । यदागमनकृत्यंतेभूयस्तद्ब्रूह्यशेषतः ॥६॥ तमुवाचततःसूतोराजात्वांद्रष्टुमिच्छति ॥ श्रु
त्वाप्रमाणंतत्रत्वंगमनायेतरायच ॥७॥ इतिसूतवचःश्रुत्वारामोपित्वरयान्वितः ॥ प्रययौरा
जभवनंपुनर्द्रष्टुंनरेश्वरं ॥८॥ तंश्रुत्वासमनुप्राप्तंरामंदशरथोनृपः ॥ प्रवेशयामासगृहं।
विवक्षुःप्रियमुत्तमं ॥९॥

दितं विज्ञापितं प्राप्तंपुनरागतं शंकान्वितः राज्ञआपद्धर्कान्वितः ॥५
६॥ ततः रामोक्तिश्रवणानंतरं श्रुत्वा राजोक्तार्थानुवादिनी मदुक्तिं तत्र राजसंनिधौ इतरायाग
मनाय समर्थनामतथार्थ प्रमाणं निर्णीता ॥७॥८॥ प्रियं स्वप्रियं ॥९॥

रक्ताणो हेतुर्भवंतीत्यादि॰ एवं विधानि शुभोदर्काणि॥ बहु विघ्नानीति बहुव्रीहिः॥२४॥ इतः पुरात् अस्मात्पुरा
त्॥ तावदेव विप्रोषितस्य तस्यागमनात्पूर्वमेव प्राप्तकालः योग्यः अन्यथा भरतः प्रतिबध्नीयादिति भावः
२५॥ ननु भरते एषाशंकानयुक्तेत्यत आह॰ काममिति काममिति यद्यपीत्यर्थे॥२६॥ किंतु इति तथापीत्य
र्थे मनुष्याणां चित्तं स्नेहादिमदपि॥ अनित्यं विकारनिमित्ते सति विक्रियेतैवेत्यर्थः॥ यतः सतां धर्मनित्या

सुहृदश्चाप्रमत्तास्त्वां रक्षंत्वद्य समंततः॥ भवंति बहुविघ्नानि कार्याण्येवं विधानि हि॥२४॥ विप्रो
षितश्च भरतो यावदेव पुरादितः॥ तावदेवाभिषेकस्ते प्राप्तकालो मतो मम॥२५॥ कामं खलु
स तांवृत्ते भ्राता ते भरतः स्थितः॥ ज्येष्ठानुवर्ती धर्मात्मा सानुक्रोशो जितेंद्रियः॥२६॥ किंतु चि
त्तं मनुष्याणामनित्यमिति मे मतं॥ सतां च धर्मनित्यानां कृतशोभि च राघव॥२७॥ इत्युक्तः सो
भ्यनुज्ञातः श्वोभाविन्यभिषेचने॥ व्रजेति रामः पितरमभिवाद्याभ्ययाद्गृहं॥२८॥ प्रविश्य
चात्मनो वेश्म राज्ञादिष्टे भिषेचने॥ तत्क्षणादेव निष्क्रम्य मातुरंतः पुरं ययौ॥२९॥

नामपि चित्तं तत्तन्निमित्तकृतेन रागद्वेषादिना शोभते युज्यते तथा॥ ननु सर्वथा स्वतो नियतं किंचि
त्स्वभावमित्यर्थः॥२७॥ अभिषेचने॰ अभिषेचनविषये इत्युक्तो व्रजेत्यभ्यनुज्ञान इति संबंधः अ
भिवाद्य आमंत्र्य॥२८॥ राज्ञादिष्टे॰ आज्ञप्तेऽभिषेचने सीतायै तदपेक्षितराजोपदिष्टसभार्योपवा
सानुष्ठाननिवेदनाय स्वगृहं प्रविश्य तत्र सीतामदृष्ट्वा तत्क्षणादेव मातुरंतःपुरं ययौ॥२९॥

अविलंबकरणे हेतुं तत्र माह अपि चेति अंशुमान् अंशुभसूचकान् सनिर्घाताः अशनिपातसहिताः दि
वोल्काः दिव उल्काः संधिरार्षः दिवादिवसे इत्यन्ये उल्का ज्वालाः पतंति ॥१७॥ नक्षत्रं जन्मर्क्षं अवष्ट
ब्धमाक्रांतं ॥१८॥ घोरामापदमृच्छति प्रथमं ततो मृत्युं चाप्नोतीत्यर्थः ॥१९॥ न तस्माद्यावन्मे चेतो न विमुह्य
ति त्वदभिषेकविमुखं न भवति तावत्ततः पूर्वमेवाभिषिंचस्व कृताभिषेकमात्मानं कुरु ननु ते चेतसः के

अपि चाद्याशुभान्राम स्वप्नान्पश्यामि राघव ॥ सनिर्घाता दिवोल्काश्च पतंति हि महास्वनाः ॥१७॥
अवष्टब्धं च मे राम नक्षत्रं दारुणैर्ग्रहैः ॥ आवेदयंति दैवज्ञाः सूर्यांगारकराहुभिः ॥१८॥ प्राये
ण च निमित्तानामीदृशानां समुद्भवे ॥ राजा हि मृत्युमाप्नोति घोरां चापदमृच्छति ॥१९॥ तद्यावदे
व मे चेतो न विमुह्यति राघव ॥ तावदेवाभिषिंचस्व चला हि प्राणिनां मतिः ॥२०॥ अद्य चंद्रोऽभ्यु
पगमत्पुष्यात्पूर्वं पुनर्वसू ॥ श्वः पुष्ययोगं नियतं वक्ष्यंते दैवचिंतकाः ॥२१॥ तत्र पुष्येऽभिषिंचस्व
मनस्त्वरयतीव माम् ॥ श्वस्त्वाहमभिषेक्ष्यामि यौवराज्ये परंतप ॥२२॥ तस्मात्त्वयाद्यप्रभृति निशे
यं नियतात्मना ॥ सह वध्वोपवस्तव्या दर्भसंस्तरशायिना ॥२३॥

मदभिषेके वैमुख्यचिंता तत्राह
चला हीति त्वद्विमातृतस्तत्रोपजायस्य संभावितत्वात्तदेव वक्ष्यति विप्रोषितश्च भरत इत्यादिना ॥२०॥
पुष्ययोगं चंद्रस्य नियतं शुद्धगणितनिश्चितं अभिषेके प्रशस्तं वा दैवचिंतकाः ज्योतिर्विदः वक्ष्यंते वदं
तीत्यर्थः आर्षः ॥२१॥ अभिषिंचस्व अभिषेक्ष्यामि मनश्च मे त्वरयतीव त्वदभिषेककार्यमिति शेषः ॥२२॥ अद्य

हताः भवंत्विति शेषः मे मम सुमित्रायाश्च ज्ञातीन्वर्धनाभिनंदय ॥३९॥ कल्याणे नक्षत्रे शुभयुक्ते काले ज्ञातो जनितः येन शुभकालजननेन ॥४०॥ पुष्करनेत्र पुरुषे विस्मेयन्मेद्वांत कामं परित्यज्य तत्त्वनी तिमात्रफलकं व्रतोपवासादिकृत तं दमोघं सफलं जायते वनेति हर्षे साफल्ये हेतुर्येयमित्यादि इदमभाषतेत्यन्वयः ॥४१॥

वत्स राम चिरंजीव हतास्ते परिपंथिनः ॥ ज्ञातीन्मे त्वं श्रिया युक्तः सुमित्रायाश्च नंदय ॥३९॥
कल्याणे बत नक्षत्रे मया जातोसि पुत्रक ॥ येन त्वया दशरथो गुणैराराधितः पिता ॥४०॥ अ
मोघं बत मे क्षांतं पुरुषे पुष्करेक्षणे ॥ येयमिक्ष्वाकुराज्यश्रीः पुत्र त्वां संश्रयिष्यति ॥४१॥ इत्ये
वमुक्तो मात्रा तु रामो भ्रातरमब्रवीत् ॥ प्रांजलिं प्रह्वमासीनमभिवीक्ष्य स्मयन्निव ॥४२॥
लक्ष्मणेमां मया सार्धं प्रशाधि त्वं वसुंधरां ॥ द्वितीयं मेंतरात्मानं त्वामियं श्रीरुपस्थिता ॥४३॥
सौमित्रे भुंक्ष्व भोगांस्त्वमिष्टान्राज्यफलानि च ॥ जीवितं चापि राज्यं च त्वदर्थमभिकामये ॥४४॥
इत्युक्त्वा लक्ष्मणं रामो मातरावभिवाद्य च ॥ अभ्यनुज्ञाप्य सीतां च ययौ स्वं च निवेशनं ॥४५॥
इत्यार्षे श्रीरामायणे वाल्मीकीये अयोध्याकांडे चतुर्थः सर्गः ॥४॥ राम

18

स्मयन्निव ईषद्धसनेवेत्यर्थः ॥४२॥ स्वनिर्विष्टं राज्यं सोभ्रात्रेण साधारणं करोति लक्ष्मणेति ॥४३॥ राज्यफलरूपान् इष्टान्मनोनुकूलान्भोगान्विषयान् यद्वा राज्यफलानि धर्मार्थौ तौ च प्राप्नुहि त्वदर्थं नस्वप्रयोजनाय ॥४४॥ सीतां च स्वं च अभ्यनुज्ञाप्य सीतायै स्वस्मै च मातृभ्यामनुज्ञां दापयित्वा निवेशनं स्वगृहं ययौ च स्वत्वर्थः ॥४५॥ इति रामाभिरामे श्रीरामीये रामायणतिलके अयोध्याकांडे चतुर्थः सर्गः ॥४॥

प्रवणां देवताराधनतत्परां। आयाचतीमिति च्छेदः श्रियं रामायराज्यलक्ष्मीं॥३०॥ आनायिता कौसल्ययेति शेषः
३१॥ तस्मिन्कालेपि रामागमनविशिष्टेकालेपि आमीलितेक्षणा ध्यानवशात् अन्वास्यमानोपास्यमाना॥
३२॥ पुष्येनेतिपाठेतदुक्तकालस्याधिकरणस्यापिकरणत्वविवक्षाबोध्या॥३३॥ वरंश्रेयं अनत्यवहर्षय

तत्रतांप्रवणामेवमातरंक्षौमवासिनीं॥वाग्यतांदेवतागारेददर्शायाचतींश्रियं॥३०॥प्रागेवचागता
तत्रसुमित्रालक्ष्मणस्तथा॥सीतांचानायिताश्रुत्वाप्रियंरामाभिषेचनं॥३१॥तस्मिन्कालेपिकौसल्या
तस्थावामीलितेक्षणा॥सुमित्रयान्वास्यमानासीतयालक्ष्मणेनच॥३२॥श्रुत्वापुष्येचपुत्रस्ययौ
वराज्येभिषेचनं॥प्राणायामेनपुरुषंध्यायमानाजनार्दनं॥३३॥तथासनियमामेवसोभिगम्याभि
वाद्यच॥उवाचवचनंरामोहर्षयंस्तामिदंवरं॥३४॥अंबपित्रानियुक्तोस्मिप्रजापालनकर्मणि॥
भविताश्वोभिषेकोमेयथामेशासनंपितुः॥३५॥सीतयाप्युपवस्तव्यारजनीयंमयासह॥एवमुक्त
मुपाध्यायैःसहिमामुक्तवान्पिता॥३६॥यानियान्यत्रयोग्यानिश्वोभाविन्यभिषेचने॥तानिमेमंग
लान्यद्यवैदेह्याश्चैवकारय॥३७॥एतच्छ्रुत्वातुकौसल्याचिरकालाभिकांक्षितं॥हर्षबाष्पाकुलंवाक्य
मिदंराममभाषत॥३८॥

न॥३४॥यथामेपितुःस्वसंबंधेनराज्ञोदशरथस्यात्युत्कृष्टत्वचननं शासनमाज्ञा
तथाश्वोमेभिषेकोभवितेतिसंबंध॥३५॥ सहीतिविरप्यर्थे मपितास्मिमामेवमुक्तवानित्यर्थः॥३६॥ मंगलानि म
हार्हगंधमाल्याभरणादिरूपाणि मंगलस्नानादीनिच॥३७॥ चिरकालाभिकांक्षितमेतदभिषेकरूपं॥

राममुपवासं तत्संकल्पं कारयामासेति त्वक्रौ रिति द्विकर्मकत्वं ॥११॥ राज्ञो दशरथस्य ॥१२॥ प्रियंवदैः सुहृद्भिः
सभाजितः पूजितः ॥ विवेश स्ववेश्म तान् सुहृदः ॥१३॥१४॥ राजभवनं मल्ल राजभवनं प्ररव्यं सदृशं ॥१५॥ वृं

इत्युक्त्वा स तदा राममुपवासं यतव्रतः ॥ मंत्रवत्कारयामास वैदेह्या सहितं शुचिः ॥११॥ ततो
यथावद्रामेण स राज्ञो गुरुरर्चितः ॥ अभ्यनुज्ञाप्य काकुत्स्थं ययौ रामनिवेशनात् ॥१२॥ सुहृद्भि
स्तत्र रामोपि सहासीनः प्रियंवदैः ॥ सभाजितो विवेशाथ तान नुज्ञाप्य सर्वशः ॥१३॥ हृष्टनारीनर
युतं रामवेश्म तदा वभौ ॥ यथा मत्तद्विजगणं प्रफुल्लनलिनं सरः ॥१४॥ स राजभवनप्ररव्यात
स्माद्रामनिवेशनात् ॥ निर्गत्य ददृशे मार्गं वसिष्ठो जनसंवृतं ॥१५॥ वृंदवृंदैरयोध्यायां रा
जमार्गाः समंततः ॥ बभूवुरतिसंबाधाः कुतूहलजनैर्वृताः ॥१६॥ जनवृंदोर्मिसंघर्षहर्षस्व
नवतस्तदा ॥ बभूव राजमार्गस्य सागरस्येव निस्वनः ॥१७॥ सिक्तसंमृष्टरथ्या हि तथा च वन
मालिनी ॥ आसीदयोध्या तदहः समुच्छ्रितगृहध्वजा ॥१८॥

दानां वृंदैः अति भिसंवाधाः सम
र्दयुक्ताः कुतूहलजनैः रामाभिषेकदर्शनजकौतुकसंपन्नैर्जनैः ॥१६॥ जनवृंदान्येवोर्मयस्तेषां सं
घर्षोन्योन्य संघर्षणं तेन हर्षेण जातो यः ॥१७॥ सिक्ताः सुगंधिजलसिक्ताः संमृष्टाः शोधिता रथ्याः य
स्यां ॥ तदहस्तस्मिन्नहनि वनमालिनी तोरणमालावती समुच्छ्रिता गृहेषु ध्वजा यस्यां सा ॥१८

ब्रा

संदिश्यरामं उपवासादिकं विसृज्य॥१॥ गच्छेति उपवाससंकल्पादेः पुरोहितसाध्यत्वादितिभावः श्रेयसेविघ्न निवृत्तिरूपश्रेयोर्थं॥२॥३॥ ब्राह्मंस्यन्दनमारोहणायोग्यं युक्तं अश्वैः ययावितिपूर्वेणान्वयः॥४॥ पांडुराभ्रवत् नि

संदिश्यरामंनृपतिः श्वोभाविन्यभिषेचने॥ पुरोहितंसमाहूयवसिष्ठमिदमब्रवीत्॥१॥ गच्छोपवासंकाकुत्स्थंकारयाद्यतपोधन॥ श्रेयसेराज्यलाभायवध्वासहयतव्रतं॥२॥ तथेतिचसराजानमुक्त्वावेदविदांवरः॥ स्वयंवसिष्ठोभगवान्ययौरामनिवेशनं॥३॥ उपवासयितुंवीरंमंत्रविन्मंत्रकोविदं॥ ब्राह्मंरथवरंयुक्तमास्थायसुधृतव्रतः॥४॥ सरामभवनंप्राप्यपांडुराभ्रघनप्रभं॥ तिस्रःकक्ष्यारथेनैवविवेशमुनिसत्तमः॥५॥ तमागतमृषिंरामस्त्वरन्निवससंभ्रमं॥ मानयिष्यन्समानार्हं निश्चक्रामनिवेशनात्॥६॥ अभ्येत्यत्वरमाणोथरथाभ्याशंमनीषिणः॥ ततोवतारयामासपरिगृह्यरथात्स्वयं॥७॥ सचैनंप्रश्रितंदृष्ट्वासंभाष्याभिप्रसाद्यच॥ प्रियार्हंहर्षयन्राममित्युवाचपुरोहितः॥८॥ प्रसन्नस्तेपितारामयत्त्वंराज्यमवाप्स्यसि॥ उपवासंभवानद्यकरोतुसहसीतया॥९॥ प्रातस्त्वामभिषेक्ताहियौवराज्येनराधिपः॥ पितादशरथःप्रीत्याययातिंनहुषोयथा॥१०॥

विडप्रभं कक्ष्याः द्वारा णि॥५॥ त्वरन्निवत्वरन्नेव ससंभ्रमंसादरं॥६॥ परिगृह्य हस्तेनहस्तेधृत्वा॥७॥ संभाष्य वत्सेत्यादिसंबोध्य अभिप्रसाद्यस्तुतिभिरितिशेषः प्रियार्हे प्रियोक्त्यर्हं॥८॥९॥ अभिषेक्ता॥ लुट्॥१०॥ रामचंद्राय

आदरात्पुनरभिषेकसामग्रीवर्णनं उपागमत् उपासांचक्रे नारंजीवसमूहो ऽयनमंतर्यामितयास्थानंयस्य तेनांतर्यामिणमित्यर्थः॥१॥ शिरसापात्रीं प्रगृह्य नमस्कारपूर्वमितियावत् महतेदेवायनारायणाय॥२॥ आशास्य प्रार्थ्य आत्मनः प्रियं राज्याभिषेकाविघ्नरूपंवस्तुतोरावणवधफलकवनगमनरूपमाणास्यसंकल्प्येत्यर्थः वैदेह्यासहेत्यत्राप्यपक्रष्टव्यं न हिचतुर्दशभुवनाधिपतेरेतद्येवराज्यंप्रियं

गतेपुरोहितेरामःस्नातोनियतमानसः॥सहपत्न्याविशालाक्ष्यानारायणमुपागमत्॥१॥प्रगृह्य शिरसापात्रींहविषोविधिवत्ततः॥महतेदैवतायाज्यंजुहावज्वलितानले॥२॥शेषंचहविषस्तस्यप्राश्याशास्यात्मनः प्रियं॥ध्यायन्नारायणंदेवंस्वास्तीर्णेकुशसंस्तरे॥३॥वाग्यतः सहवैदेह्याभूत्वानियतमानसः॥श्रीमत्यायतनेविष्णोः शिश्येनरवरात्मजः॥४॥एकयामावशिष्टायांरात्र्यांप्रतिविबुध्यसः॥अलंकारविधिंसम्यक्कारयामासवेश्मनः॥५॥तत्रशृण्वन्सुखावाचःसूतमागधवंदिनां॥पूर्वांसंध्यामुपासीनोजजापसुसमाहितः॥६॥तुष्टावप्रणतश्चैवशिरसामधुसूदनं॥विमलक्षौमसंवीतोवाचयामाससद्विजान्॥७॥

भवतिसकलतद्देशमतुच्छप्रियत्वादात्मनइत्यस्यवैफल्यंचाद्यव्याख्यानेप्राप्नोतीतिदिक् कुशसंस्तरेकुशमयेशयनीये॥३॥नियतमीश्वरमात्रविषयं विष्णोरायतने निजभवनवर्त्तिनिदेवपूजालये॥४॥५॥सूताःपौराणिकाःमागधावंशावलीकीर्त्तकाः॥पूर्वांसंध्यामुपासीनस्तदुपासनंकुर्वन्॥जजापगायत्रीजपस्यैवतदुपासनरूपत्वात्॥६॥

18

स्त्रीबालैः सहितश्चासावाकुलः संतोषात्संभ्रांतचित्तः सस्त्रीबालाबल इति पाठे अबलावृद्धाः स्त्री बालवृद्ध स
हितो जन इत्यर्थः रामाभिषेकमाकांक्षन्नइत्युमिच्छन्‌रवेरुदयमाकांक्षन्‌ अभ्युदितिशेषः ॥१८॥ महोत्सवं
रामाभिषेकसंभृतं ॥२०॥ व्यूहन्निव राजमार्गव्याप्याप्यस्थितान्‌ ॥ एकतः कुर्वन्निव ॥२१॥ सितभ्रसदृश

तदा ह्ययोध्यानिलयः सस्त्रीबालाकुलो जनः ॥ रामाभिषेकमाकांक्षन्नाकांक्षन्नुदयं रवेः ॥१८॥ प्रजा
लंकारभूतं च जनस्यानंदवर्धनं । उत्सुको भूज्जनो द्रष्टुं तमयोध्यामहोत्सवं ॥२०॥ एवं तं जनसंबा
धं राजमार्गं पुरोहितः ॥ व्यूहन्निव जनौघं तं शनै राजकुलं ययौ ॥२१॥ सिताभ्रशिखरप्रख्यं प्रासा
दमधिरुह्य च ॥ समीयाय नरेंद्रेण शक्रेणेव बृहस्पतिः ॥२२॥ तमागतमभिप्रेक्ष्य हित्वा राजास
नं नृपः ॥ पप्रच्छ स्वमतं तस्मै कृतमित्यभ्यवेदयत्‌ ॥२३॥ तेन चैव तदा तुल्यं सहासीनाः सभासदः
आसनेभ्यः समुत्तस्थुः पूजयंतः पुरोहितं ॥२४॥ गुरुणा त्वभ्यनुज्ञातो मनुजौघं विसृज्य तं ॥ विवे
शांतःपुरं राजा सिंहो गिरिगुहामिव ॥२५॥ तदग्र्यवेषप्रमदाजनाकुलं महेंद्रवेश्मप्रतिमं निवेश
नं ॥ व्यदीपयंश्चारु विवेश पार्थिवः शशीव तारागणसंकुलं नभः ॥२६॥ इत्यार्षे रामायणे अयोध्या
कांडे पंचमः सर्गः ॥५॥

हिमगिरिशिखरसदृशं ॥२२॥ राजासनं हित्वा प्रत्युत्थायेत्यर्थः स्वमतं स्वानुमतं कृ
त्यं पप्रच्छ स च यदाज्ञप्तं तत्कृतमिति न्यवेदयत्‌ ॥२३॥ तुल्यं तुल्यकालं ॥२४॥ अभ्यनुज्ञातः सर्वस्य कर्त्तव्य
स्य कृतत्वादि विश्रम्यतामित्युक्तः ॥२५॥ स्वयमेव नभः ॥२६॥ इति रामाभिरामे श्रीरा० रा० अयोध्याकांडे पंचमः सर्गः ॥५॥

अभिषेकानंतरं गजस्कंधाधिरूढस्य नगरालंकारदर्शनार्थं निर्गमनात्पूर्वं यदि निशा नयाति तदा तदलंकारप्र
दशनार्थं स्वयं रामं द्रष्टुं च दीपवृक्षान् वृक्षवन्नानाशाखावान् दीप्तस्तंभान् अनु रथ्यापार्श्वयोः॥१८॥१९॥२०॥२१

प्रकाशीकरणार्थं च निशागमनशंकया॥ दीपवृक्षांस्तथा चक्रुरनुरथ्यासु सर्वशः॥१८॥ अलंका
रं पुरस्यैवं कृत्वा तत्पुरवासिनः॥ आकांक्षमाणा रामस्य यौवराज्याभिषेचनं॥१९॥ समेत्य संघशः स
र्वे चत्वरेषु सभासु च॥ कथयंतो मिथस्तत्र प्रशशंसुर्जनाधिपं॥२०॥ अहो महात्मा राजायं इक्ष्वा-
कुकुलनंदनः॥ ज्ञात्वा वृद्धं स्वमात्मानं रामं राज्येभिषेक्ष्यति॥२१॥ सर्वे ह्यनुगृहीताः स्म यन्नो रा
मो महीपतिः॥ चिराय भविता गोप्ता दृष्टलोकपरावरः॥२२॥ अनुद्धतमना विद्वान् धर्मात्मा भ्रातृव
त्सलः॥ यथा च भ्रातृषु स्निग्धस्तथास्मास्वपि राघवः॥२३॥ चिरं जीवतु धर्मात्मा राजा दशरथो
नघः॥ यत्प्रसादेनाभिषिक्तं रामं द्रक्ष्यामहे वयं॥२४॥ एवंविधं कथयतां पौराणां शुश्रुवुः परे
दिग्भ्यो विश्रुतवृत्तांताः प्राप्ता जानपदा जनाः॥२५॥ ते तु दिग्भ्यः पुरीं प्राप्ता द्रष्टुं रामाभिषेचनं
रामस्य पूरयामासुः पुरीं जानपदा जनाः॥२६॥

अनुगृहीताः ईश्वरेण। दृष्टलोकपरावरः भावप्र
धानो निर्देशः यथावदवगततत्तज्जनप्राशस्त्याप्रशस्त्य॥२२॥२३॥२४॥ शुश्रुवुः कथा इति शेषः
श्रुतवृत्तांताः श्रुतरामाभिषेकवृत्तांताः॥२५॥ ते जानपदाः रामस्य पुरीमित्यन्वयः॥२६॥

न्तूर्यघोषध्वनुनादितः तूर्यघोषेण संजातानुवादः ॥ ८ ॥ शोभयितुमलंकर्त्तुंचक्रे बुद्धिमितिशेषः ॥ १० ॥ अट्टालका
प्राकारोपरितनक्षुद्रस्थानानिइतिकेचित् ॥ ११ ॥ १२ ॥ आलक्षितेषु सर्वतोलक्षितेषुसुद्धेतियावत् ध्वजाःस

तेषांपुण्याहघोषोथगंभीरमधुरस्तथा ॥ अयोध्यांपूरयामासतूर्यघोषानुनादितः ॥ ८ ॥ कृतोप
वासंतुतदावैदेह्यासहराघवं ॥ अयोध्यानिलयःश्रुत्वासर्वःप्रमुदितोजनः ॥ ९ ॥ ततःपौरजनः
सर्वःश्रुत्वारामाभिषेचनं ॥ प्रभातांरजनींदृष्ट्वाचक्रेशोभयितुंपुरीं ॥ १० ॥ सिताभ्रशिखराभेषु
देवतायतनेषुच ॥ चतुष्पथेषुरथ्यासुचैत्येष्वट्टालकेषुच ॥ ११ ॥ नानापण्यसमृद्धेषुवणिजामा
पणेषुच ॥ कुटुंबिनांसमृद्धेषुश्रीमन्सुभवनेषुच ॥ १२ ॥ सभासुचैवसर्वासुवृक्षेष्वालक्षितेषुच
ध्वजाःसमुच्छ्रिताःसाधुपताकाश्चाभवंस्तथा ॥ १३ ॥ नटनर्तकसंघानांगायकानांचगायतां ॥ मनःक
र्णसुखावाचःशुश्रावजनतातनः ॥ १४ ॥ रामाभिषेकयुक्ताश्चकथाश्चक्रुर्मिथोजनाः ॥ रामाभिषेके
संप्राप्तेचत्वरेषुगृहेषुच ॥ १५ ॥ बालाअपिक्रीडमानागृहद्वारेषुसंघशः ॥ रामाभिषवसंयुक्ताश्चक्रु
रेवकथामिथः ॥ १६ ॥ कृतपुष्पोपहारश्चधूपगंधाधिवासितः ॥ राजमार्गःकृतःश्रीमान्पौरैरामाभिषेचने ॥ १७ ॥

चिन्हाःपताकाश्चिन्हरहिताध्वजाः ॥ १३ ॥ नटाःसूत्रधाराःजनताजनसमूहः ततस्तत्रअयोध्यायां ॥ १४ ॥ १५ ॥ रामा
भिषवःरामाभिषेकः ॥ १६ ॥ १७ ॥

प्रकीर्णानि कमलानि उत्पलानि च यस्यां तस्मात्सर्वोत्कृष्टात्प्रासादात् · प्रासादे स्थित्वेत्यर्थः ल्यब्लोपे
पंचमी ॥ २ ॥ वराहाभिः श्रेष्ठयोग्याभिः राजयोग्याभिरितियावत् । एतदुत्तरं कृतां छन्नपथैश्चापि स्व
च्छंदकपथैर्वृतामित्यर्धं पठंति · छन्नपथैः निम्नोन्नतप्रदेशमार्गैः कृतामलंकृतां · स्वच्छंदकपथैः
उत्सवादिषु जनभूयस्त्वेन स्वैरप्रवेशनिर्गमार्थं प्राकारादिभंगेन कृतैर्मार्गैरिति व्याचक्षते च

सिक्तराजपथां कृत्स्नां प्रकीर्णकमलोत्पलां ॥ अयोध्यां मंथरा तस्मात्प्रासादादन्ववैक्षत ॥ २ ॥
पताकाभिर्वराहाभिर्ध्वजैश्च समलंकृतां ॥ कृतां छन्नपथैश्चापि स्वच्छंदकपथैर्वृतां ॥ सिक्तां
चंदनतोयैश्च शिरस्नातजनैर्युतां ॥ ३ ॥ माल्यमोदकहस्तैश्च द्विजेंद्रैरभिनादितां ॥ शुक्ल
देवगृहद्वारां सर्ववादित्रनादितां ॥ ४ ॥ संप्रहृष्टजनाकीर्णां ब्रह्मघोषनिनादितां ॥ प्रहृ
ष्टवरहस्त्यश्वां संप्रणादितगोवृषां ॥ ५ ॥ हृष्टप्रमुदितैः पौरैरुच्छ्रितध्वजमालिनीं ॥ अ
योध्यां मंथरा दृष्ट्वा परं विस्मयमागता ॥ ६ ॥

। केचित् । चंदनयुक्ततोयैः सिक्तां शिरःस्नातजनैः कृताभ्यंगस्नानैः ॥ ३ ॥ माल्यमोदकहस्तैः दानप्राप्ते
त्यादि · रामोपायनमाल्यमोदकरूपमंगलद्रव्यहस्तैरित्यर्थो वा · सुधाचंदनादिलेपेन शुक्लानि
देवगृहद्वाराणि यस्यां ॥ ४ ॥ ब्रह्मघोषो वेदघोषः प्रहृष्टेत्यादिना · तिरश्चामपि रामाभिषेकाद्धर्ष
इति सूचितं ॥ ५ ॥ हृष्टैर्जातरोमांचादिभिर्मुदितैरानंदयुक्तैः पौरैरुपलक्षितां ॥ ६ ॥

विसर्पद्भिः प्रवेशार्थी ॥ २७ ॥ इंद्रक्षयः इंद्रनिवासः अमरावती आहितैरागतैरित्यर्थः आगतानां विप्रस्वरूपं समुद्रयादोभिः समुद्रतुल्यैर्महद्भिः यादोभिरित्यर्थः ॥ २८ ॥ इति रामाभिरामे श्रीरामीये रामायणतिलके अयोध्याकांडे षष्ठः सर्गः ॥ अथ सीतायाः लंकापुरप्रवेशं विना रावणवधस्याशक्यतया तन्निहृदये देवैः प्रेरितायाः कृतकुब्जावेषायाः अयरामाभिषेकविघ्नप्रवृत्तिं तद्रात्रिगतं कैकयीवृत्तांतं च वक्तुमुपचक्रमते ज्ञातीत्यादि ज्ञातिदासी यतो नित्यमिति पाठे यतः कैकेय्या ज्ञातेर्मातृकुलस्य दासी यतश्च कैकेय्या नित्यं सहोषिता अतः ॥ कुब्जा इति प्रममर्षितेत्यनेन

जनौघैस्तैर्विसर्पद्भिः शुश्रुवे तत्र निस्वनः ॥ पर्वसूदीर्णवेगस्य सागरस्येव निस्वनः ॥ २७ ॥ ततस्त दिंद्रक्षयसन्निभं पुरं दिदृक्षुभिर्जानपदैरुपाहितैः ॥ समंततः सस्वनमाकुलं बभौ समुद्रयादोभिरिवार्णवोदकं ॥ २८ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये अयोध्याकांडे षष्ठः सर्गः ॥ ६ ॥ ज्ञाति दासी यतो जाता कैकेय्यास्तु सहोषिता ॥ प्रासादं चंद्रसंकाशमारुरोह यदृच्छया ॥ १ ॥ रामाय

द्वादशश्लोकस्थपदेनान्वयः स्वीयाभ्युदयस्य सर्वेष्टत्वात् रामाभ्युदयजदुःखेन तद्विघटको मर्षः इति कतकः तन्न रामाभ्युदयस्याग्रे धात्रीमुखेन श्रवणस्य वक्ष्यमाणतया तस्यैव चामर्षहेतुत्वस्य वक्ष्यमाणतयात्रत्यस्य त त्रान्वयानौचित्यात् यतो जातेति पाठे यतो यत्र कुत्रचिज्जाता अविज्ञातवंशमातापितृकेत्यर्थः एवं च कैकेयी ज्ञातिदासीत्वमपि कार्यार्थमुदरभरणव्याजेन स्वकृतमस्या इति बोध्यं इदं तु युक्तं मंथरा नाम कार्यार्थमप्सराः प्रेषिता सुरैः दासी का च न कैकेय्यै दत्ता केकयभर्तेति पाद्मे कः कार्यार्थं रावणवधरूपकार्यार्थं दासी स्वयमाग

सुभगाकारेत्वविषयेसौभाग्यद्योतकाकारवति॰ आकारेणैवसौभाग्यदेवस्कतोतोनिश्वेऽप्रियकर्त्तरिभर्त्तरिवि
सौभाग्येनविकत्थसेमय्येवानुरक्तोमेस्वामीमदाज्ञावशंवद इत्यादिप्रकारेणवृथाश्लाघसे॰ उष्णगे॰ ग्रीष्म
ष्मगेरवौसतिनद्याःस्रोतइवसौभाग्यंचलंरामाभिषेकात्स्त्रीणांप्रायमित्याशयः॥१५॥पापदर्शिन्यापापं
दर्शयंत्याविषादमगमत्॰॥स्वस्मिन्राजवैरस्योद्भावनात्॥१६॥कच्चित्थेमंन॰ मत्यमितिशेषः॥१७॥१८॥

अनिष्टेसुभगाकारेसौभाग्येनविकत्थसे॥चलंहितवसौभाग्यंनद्याःस्रोतइवोष्णगे॥१५॥
एवमुक्तातुकैकेयीरुष्टयापरुषंवचः॥कुब्जयापापदर्शिन्याविषादमगमत्परं॥१६॥कैकेयी
त्वब्रवीत्कुब्जांकच्चित्क्षेमंनमंथरे॥विषण्णवदनांहित्वांलक्षयेभृशदुःखितां॥१७॥मंथरातु
वचःश्रुत्वाकैकेय्यामधुराक्षरं॥उवाचक्रोधसंयुक्तावाक्यंवाक्यविशारदा॥१८॥साविष
ण्णतराभूत्वाकुब्जातस्याहितैषिणी॥विषादयंतीप्रोवाचभेदयंतीचराघवं॥१९॥अक्ष
यंसुमहद्देविप्रवृत्तंत्वद्विनाशनं॥रामंदशरथोराजायौवराज्येभिषेक्ष्यति॥२०॥

विषण्णतराभूत्वातदाकारेवःभूत्वा॰ अपसरस्त्वेनसर्वज्ञत्वा॰ द्वास्तवविषादाभावात्॰ विषादयंती
ज्यश्रियोन्यगामित्वरूपानिष्टप्रकाशेनकैकेय्याविषादंजनयंतीभेदयंतीराघवंप्रतिपुत्र
त्वप्रयुक्तंतस्यास्नेहंनाशयंती॥१९॥अक्षयंक्षयःप्रतीकारोशक्यप्रतीकारमित्यर्थः त्वद्विनाशनं
त्वत्सौभाग्यनाशकारणं[illegible]॥२०॥ ॥ राम ॥

अविदूरं स्वाधिरूढहर्म्यासन्नहर्म्ये धात्री रामस्येति शेषः अत एव हर्षोत्फुल्लनयनत्वादि तस्याः वक्ष्यति च हर्षेण ॥ विदार्यमाणेत्यादि ॥ ७ ॥ अर्थपरा स्वेच्छार्थपरा स्वेच्छार्थमेवेति यावत् किं तु कस्मात् ॥ ८ ॥ किं कुतो जनस्य प्रहर्षः अभिषेकप्राग्दिनीयसायंकाले मंथरायास्तद्दर्शनेन राजा संप्रदास्यतीत्युक्तिः ॥ ९ ॥ विदीर्यमाणा अंतर्गता

सा हर्षोत्फुल्लनयनां पाण्डुरक्षौमवासिनीं ॥ अविदूरे स्थितां दृष्ट्वा धात्रीं पप्रच्छ मंथरा ॥ ७ ॥ उत्तमेनाभिसंयुक्ता हर्षेणार्थपरा सती ॥ राममाता धनं किं नु जनेभ्यः संप्रयच्छति ॥ ८ ॥ अतिमात्रप्रहर्षः किं जनस्यास्य च शंस मे ॥ कारयिष्यति किं वापि संप्रहृष्टो महीपतिः ॥ ९ ॥ विदीर्यमाणा हर्षेण धात्री तु परया मुदा ॥ आचचक्षेऽथ कुब्जायै भूयसीं राघवे श्रियं ॥ १० ॥ श्वः पुष्येण जितक्रोधं यौवराज्येन चानघं ॥ राजा दशरथो राममभिषेक्ता हि राघवं ॥ ११ ॥ धात्र्यास्तु वचनं श्रुत्वा कुब्जा क्षिप्रममर्षिता ॥ कैलासशिखराकारात्प्रासादादवरोहत ॥ १२ ॥ सा दह्यमाना क्रोधेन मंथरा पापदर्शिनी ॥ शयानामेव कैकेयीमिदं वचनमब्रवीत् ॥ १३ ॥ उत्तिष्ठ मूढे किं शेषे भयं त्वामभिवर्तते ॥ उपप्लुतमघौघेन नात्मानमवबुध्यसे ॥ १४ ॥

नंदोत्कर्षादेः पोषमुखविकासादिना तस्यानंदस्य बहिः प्रसारणाद्धि विदीर्यमाणा आचचक्षे वक्ष्यमाणां राघवे राज्यप्राप्तिरूपां भूयसीं श्रियं राजलक्ष्मीं ॥ १० ॥ अनघं पापकारणेर्ष्यादिरहितं ॥ ११ ॥ अवरोहत अवारुहत् ॥ १२ ॥ क्रोधेन दह्यमाना सैव पापदर्शिनी रामाभिषेके कैकेय्यै भरतविषयपापदर्शिका ॥ १३ ॥ अघौघेन दुःखसमूहेन उपप्लुतं पीडितं [illegible] कार्ययोः पौर्वापर्ये वि

कौसल्यार्थप्राप्णार्थमेवतेनोपायांतरमप्यनुष्ठितमित्याह· अपवाह्येति· उद्वास्येत्यर्थः काल्ये· अन्यत्रोपसंक्र
मणकालार्हे· कौल्यइतिपाठः कुलक्रमागतइत्यर्थे आर्षः ॥२६॥ प्रतिप्रवादः प्रतिव्यपदेशः आत्मनोहितेच्छया
त्वयामात्रेवभोजनदानादिनापोषित ॥ आशीविषइवक्रूरः शत्रुः प्रतिप्रवादेनप्रतिव्यपदेशेनत्वयाकेन
परिधृतइत्यन्वयः ॥२७॥ तद्वरणेनचतेनार्थः संवृत्तइत्याह· यथेतिप्रत्युपेक्षितः उपेक्षितनाशः ॥२८॥ कथं

अपवाह्यतुदुष्टात्माभरतंतवबंधुषु ॥ काल्येस्थापयितारामंराज्येनिहतकंटके ॥२६॥ शत्रुःप
तिप्रवादेनमात्रेवहितकाम्यया ॥ आशीविषइवांगेनबालेपरिधृतस्त्वया ॥२७॥ यथाहिकु
र्याच्छत्रुर्वासर्पोवाप्रत्युपेक्षितः ॥ राज्ञादशरथेनाद्यसपुत्रात्वंतथाकृता ॥२८॥ पापेनानृतसां
त्वेनबालेनित्यंसुखोचिता ॥ रामंस्थापयताराज्येसानुबंधाहृताह्यसि ॥२९॥ साप्राप्तकालं
कैकेयिक्षिप्रंकुरुहितंतव ॥ त्रायस्वपुत्रमात्मानंमांचविस्मयदर्शने ॥३०॥ मंथरायावचः
श्रुत्वाशयनात्साशुभानना ॥ उत्तस्थौहर्षसंपूर्णाचंद्रलेखेवशारदी ॥३१॥

कृतेत्यत्राहपापेनेति· अनुबंधः पुत्रादिपरिकरः ॥२९॥ सात्वंप्राप्तकालंप्राप्तानुष्ठानकालंयत्तवहितंत
त्कुरु विस्मयदर्शने· अतिदुःखजनकवार्त्ताश्रवणेपिस्वेष्टाद्भुतवार्त्ताश्रवणेनेवविस्मयसू
चकदर्शने· एवंविस्मयंहित्वास्वेष्टंविभावयेतितात्पर्यं ॥३०॥ एवंमंथरयानर्थत्वेनप्रकाशिते
रामाभिषेके महाकुलप्रसूता निसर्गकल्याणगुणा सर्वथातंस्वेष्टार्थमेवमन्यतेस्मेत्याह· मंथरायाइत्यादि ॥३१॥

शत्रोराज्यलाभात् दुःखं स्वेष्टस्य तदलाभात् शोकः शत्रुराज्यलाभत एव ततो भयं त्वद्धितार्थं त्वद्धितबोधनार्थं ॥२१॥ ननु दासस्यास्तव कुतो भयमत आह तवेत्यादि ॥२२॥ किं मे दुःखं तत्राह नराधिपेति एतद्विशेषणाद्वयमग्रे पि राजमानत्वात् प्रच्युतये पन्नावश्यकत्वद्योतनाय ननु रामराज्ये पि महिषी त्वं मे दुष्परिहरमित्यत आह उग्रत्वमिति सापत्नो हि स राज्यलाभे त्वां त्वत्पुत्रं च नाशयिष्यतीति भावः ॥२३॥ ननु राज्ञो रामस्य चात्यन्त

सा स्म्यगाधे भये मग्ना दुःखशोकसमन्विता ॥ दह्यमानानलेनेव त्वद्धितार्थमिहागता ॥२१॥ तव दुःखेन कैकेयि मम दुःखं महद्भवेत् ॥ त्वद्वृद्धौ मम वृद्धिश्च भवेदत्र न संशयः ॥२२॥ नराधिपकुले जाता महिषी त्वं महीपतेः ॥ उग्रत्वं राजधर्माणां कथं देवि न बुध्यसे ॥२३॥ धर्मवादी शठो भर्ता श्लक्ष्णवादी च दारुणः ॥ शुद्धभावेन जानीषे तेनैवमतिसंधिता ॥२४॥ उपस्थितः प्रयुंजानस्त्वयि सान्त्वमनर्थकं ॥ अर्थेनैवाद्य ते भर्ता कौसल्यां योजयिष्यति ॥२५॥

मदनुरक्तत्वात् समस्तपुत्रस्यैव राज्यलाभो तत आह धर्मवादिति बाह्यात्रेण धार्मिकः श्लक्ष्णवादी च सस्मितमधुरभाषी अन्तस्तु शठः असूयावान् अत एव दारुणः क्रूरहृदयः आन्तरक्रौर्यगोपनायैव सस्मितमृदुमधुरभाषी एवंभूतं तं शुद्धभावेनोपलक्षितं जानीषे सर्वथा निन एवं ग क्रूरीत्या अतिसंधिता वंचितासि इति शेषः ॥२४॥ उपस्थितः कौशल्यार्थं प्रायेण साध्वेनेहृदयेन सावधानः त्वत्समीपे स्थितमिति पाठे तत्कालोचितं सान्त्वमित्यर्थः ॥ अनर्थकं फलरहितं सान्त्वं प्रियवचनं त्वयि प्रयुंजानः अर्थेन राज्यरूपेण कौसल्यामेव योजयिष्यतीत्यन्वयः ॥२५॥

अथचलंचित्तंमनुष्याणामिति·न्यायेनहिस्त्रिर्मंथरायाहितव्यपदेशात्कल्याणमतेरपिकैकेय्याश्चित्तंच
लितमित्याह·मंथरात्विति अभ्यसूय· असूयाविषयांकृत्वाहिताश्रवणात्कोपःएतदहितंजायतइतिदुःख
तत्समन्वितेव॥१॥ अस्थानेतदनुचितकाले·वालिशेमूर्ख·शोककालेहर्षोदयात्॥२॥ मनसेति·अनड्
त्यादिःदुःखार्दितासतीतावकदुःखेनपीडितासतीप्रहसामीत्यन्वयः व्यसनंविपदं॥३॥ मतेर्दुष्टत्वं

मंथरात्वभ्यसूयैनामुत्सृज्याभरणंहितत॥ उवाचेदंततोवाक्यंकोपदुःखसमन्विता॥१॥ ह
र्षंकिमुर्थमस्थानेकृतवत्यसिवालिशे॥ शोकसागरमध्यस्थमात्मानमवबुध्यसे॥२॥
मनसाप्रहसामित्वांदेविदुःखार्दितासतीयच्छोचितव्येहृष्टासिप्राप्यत्वंव्यसनंमहत्॥३॥
शोचामिदुर्मतित्वंतेकाहिप्राज्ञाप्रहर्षयेत्॥ अरेःसपत्नीपुत्रस्यवृद्धिंमृत्योरिवागतां॥४॥
भरतादेवरामस्यराज्यसाधारणाद्भयं॥ तद्विचिंत्यविषण्णास्मिभयंभीताद्धिजायते॥५॥

अनर्थकरेप्रियताविषयत्वं·प्रहर्षयेत्·प्रहृष्येत्·॥ अरित्वेहेतुःसपत्नीपुत्रत्वं·मृत्योर्वृद्धिमिव
तस्यवृद्धिंदृष्ट्वेतिशेषः॥४॥ मृत्योरिवेतिव्युत्पादयति·रामस्यभरतादेवभयमस्तितत्रहेतुंराज्य
साधारणात्·राज्यरूपसाधारणभोग्यहेतोः॥ ततभरतहेतुकंरामभयं·हियतोभीताद्भयंजाय
तेयोयस्माद्भीतस्तस्मात्पदस्थात्तस्यभयंभवत्येवंएवंचराज्यस्यनिष्कंटकत्वायस्वभयहेतुं
भरतंराज्यप्राप्यरामःसर्वथानाशयिष्यतीतिभावः॥५॥

विस्मय अत्यद्भुतस्वेष्टश्रवणात् कौसल्यावदेवेतिभावः॥३२॥३३॥प्रियमाख्यातमित्यस्यपुनरुक्तिर्वर्ज्याहर्षा
तिशयवत्वान्नदोषावहा भूयोप्यधिकं किंप्रीतिदानंकरोमित्यकृवितप्रियसमाप्यधिकप्रियवस्त्वभा
वादित्यर्थः॥३४॥ननुसापत्न्यश्रेयःश्रुतिः कथंतेप्रियमित्यत्राह रामेवेतिविशेषंपुत्रत्वप्रयुक्तस्नेह
विशेषं॥३५॥प्रियार्हेप्रियदानार्हे इतउक्ताद्रामाभिषेकादुत्तमधिकंप्रियंवचोऽमृतं परमन्यत् न॥

अत्रीवसातुसंतुष्टाकैकेयीविस्मयान्विता॥दिव्यमाभरणंतस्यैकुब्जायैप्रददौशुभं॥३२॥
दत्वात्वाभरणंतस्यैकुब्जायैप्रमदोत्तमा॥कैकेयीमंथरांदृष्ट्वापुनरेवाब्रवीदिदं॥३३॥इदं
तुमंथरेमह्यमाख्यातंपरमंप्रियं॥एतन्मेप्रियमाख्यातं किंवाभूयःकरोमिते॥३४॥रामेवा
भरतेवाहंविशेषंनोपलक्षये॥तस्मात्तुष्टास्मियद्राजारामंराज्येभिषेक्ष्यति॥३५॥नमेपरं
किंचिदितोवरंपुनःप्रियंप्रियार्हेसुवचंवचोमृतं॥तथात्ववोचस्त्वमतःप्रियोत्तरंवरं
परंतेप्रददामितंवृणु॥३६॥इत्यार्षेश्रीरामायणेवाल्मीकीयेअयोध्याकांडेसप्तमःसर्गः॥७

सुवचंनादृशंहित्वमवोचःयतोधिकंप्रियंनसुवचं अतःप्रियोत्तरंप्रियाख्यानोत्तरंपारितोषिकरूपं
परंश्रेष्ठंवरंवृणु तेतवतंवरंप्रददामि मयातुस्ववुध्याराताभ्रियाख्यानपारितोषिकयोग्यंवस्त्वान
दृश्यतेऽतस्त्वयइदरयिष्यसेतत्दास्यामीत्यर्थः॥३६॥इतिश्रीरामाभिरामेश्रीरामीयेरामायणतिलके
अयोध्याकांडेसप्तमःसर्गः॥७॥

अयमनर्थो ममापीत्याह॰ एवं चेति ॥ ११ ॥ परमास्त्रिय इति बहुवचनेन सीतासख्यः भरतक्षये भरतपत्नी मा वनाशे
॥ १२ ॥ एवं द्विःकृतोऽपि जायापि कैकेयी निसर्गपुण्यस्वभावान्न चचालेत्याह तामित्यादि॰ परमप्रीतां प
रं रामेऽप्रीतामित्यर्थः ॥ देवी पुण्यस्वभावा ॥ १३ ॥ मंथरोक्तयुक्तीः प्रतिक्षिपति धर्मज्ञ इति॰ दांतः
क्षितितः ॥ कृतज्ञः तेन बाल्ये स्वकृतपालनाद्युपकारस्मरणेन स्वानिष्टशंकानिरासः ॥ ज्येष्ठ इ

एवं च त्वं सहास्माभिस्तस्याः प्रेष्या भविष्यसि ॥ पुत्रश्च तव रामस्य प्रेष्यत्वं हि गमिष्यति ॥ ११ ॥
हृष्टाः खलु भविष्यंति रामस्य परमाः स्त्रियः ॥ अप्रहृष्टा भविष्यंति स्नुषास्ते भरतक्षये ॥ १२ ॥
तां दृष्ट्वा परमप्रीतां ब्रुवंतीं मंथरां ततः ॥ रामस्यैव गुणान्देवी कैकेयी प्रशशंस ह ॥ १३ ॥ धर्म
ज्ञो गुणवान्दांतः कृतज्ञः सत्यवाक्छुचिः ॥ रामो राजसुतो ज्येष्ठो यौवराज्यमतोऽर्हति ॥ १४ ॥
भ्रातॄन्भृत्यांश्च दीर्घायुः पितृवत्पालयिष्यति ॥ संतप्यसे कथं कुब्जे श्रुत्वा रामाभिषेचनं
॥ १५ ॥ भरतश्चापि रामस्य ध्रुवं वर्षशतात्परं ॥ पितृपैतामहं राज्यमवाप्स्यति नरर्षभः ॥ १६ ॥

त्यनेन तस्यैव राज्ययोग्यतेति साधारण्यं परिहृतं ॥ १४ ॥ सरसानर्थोऽपीनेत्याह॰ भ्रातॄनिति॰ कथं व्य
र्थमेवेत्यर्थः ॥ १५ ॥ पितृवत्॰ भ्रातॄन विभागेन पालयतो रामस्य वर्षशतात्परमायियदा विभागेच्छा
तदा भरतो राज्यमवाप्स्यति॰ ध्रुवापिशब्दाभ्यां लक्ष्मणशत्रुघ्नयोरपि राज्यप्राप्तिर्ध्रुवेति सूचितं
॥ १६ ॥

24

नतु भरतादेवेत्यवधारणमयुक्तमतआह॰ लक्ष्मणो हीति सर्वात्मना गतः मनोवाक्कायव्यापारै रामेणैकसंगतो ते
न ततो भीप्रसंगः शत्रुघ्नस्यापि भरतशेषतया न ततः पृथक् भीप्रसंगस्तन्नाशेनैव तन्नाशादिति भावः॥६॥ भ
रतादेवेत्यवधारणे हेत्वंतरमाह॰ प्रत्यासन्नेति॰ प्रत्यासन्नोयं क्रमउत्पत्तिक्रमस्तेनापि हेतुना भरतस्यैव रा
ज्यक्रमस्तदाक्रमणं प्रसक्तं तयोस्तु यवीयस्त्वात्स विसृष्टो दूरत्यक्त इत्यर्थः॥७॥ पुना रामाद्भयमुप

लक्ष्मणो हि महाबाहू रामं सर्वात्मना गतः॥ शत्रुघ्नश्चापि भरतं काकुत्स्थं लक्ष्मणो यथा॥६॥
प्रत्यासन्नक्रमेणापि भरतस्यैव भामिनि॥ राज्यक्रमो विसृष्टस्तु तयोस्तावद्यवीयसोः॥७॥
विदुषः क्षत्रचारित्रे प्राज्ञस्य प्राप्तकारिणः॥ भयात्प्रवेपे रामस्य चिंतयंती तवात्मजं॥८॥
सुभगा किल कौसल्या यस्याः पुत्रोभिषेक्ष्यते॥ यौवराज्येन महता श्वः पुष्येण द्विजोत्तमैः॥९॥
प्राप्तां वसुमतीं प्रीतिं प्रतीतां हतविद्विषं॥ उपस्थास्यसि कौसल्यां दासीवत्त्वं कृतांजलिः॥१०॥

संहरति॰ विदुषः सर्वशास्त्रज्ञस्य॰ विशेष्यतः क्षत्रचारित्रे बलसंपाद्ये संधिविग्रहादिप्रयोगे च प्राज्ञस्य प्राप्त
कारिणः अविलंबेन कालोचितकर्तव्यार्थकारिणो रामस्य त्वदात्मजं प्रति भाव्यनर्थं चिंतयंती तन्निमित्ताभ
ङ्यात्प्रवेपे कंपे॥८॥ एवं पुत्रानर्थप्रदर्शितस्याः अयनर्थं दर्शयितुं कौसल्यावृद्धिमाह॰ सुभगेति॰ यौव
राज्येनेति हेतौ तृतीया॰ पुष्येण॰ पुष्ये॥९॥ वसुमतीं प्राप्तां तत्प्राप्तिनिमित्तां प्रीतिं च प्राप्तां हतयुष्मदा
दिसपत्नीरूपा विद्विषो यया ताम्॰ अत एव प्रतीतां प्रसिद्धाम्॰ उपस्थास्यसि गत्वा सेविष्यसे॥१०॥

राज्यतंत्राणि॥ राज्यनिर्वाहणादमाधिकारप्राधान्यानि सर्वनिरूपितप्राधान्याश्रयत्वमेकस्यैवेति भावः ज्येष्ठस्य
गुणवत्त्वेन गुणवत्कनीयःस्वपि॥२४॥यदेवमतो सावित्तिनिर्भग्नोहीनः सुखेभ्यो राजवंशाच्च निर्भग्नो भवि
ष्यतीत्यन्वयः॥वत्सले सर्वत्र दयाशीले॥२५॥त्वदर्थे त्वत्पुत्रराज्यभ्रंशेप्राप्ते तत्परिहारकथनार्थं सपत्नि
वृद्ध्याविस्तारोऽर्हस्वःप्रदेयं पारितोषिकं॥अतोमां त्वमलुब्धा स्वहितेतिनवुध्यसे इत्यर्थः॥२६॥नापयितालु

तस्माज्ज्येष्ठे हि कैकेयि राज्यतंत्राणि पार्थिवाः॥स्थापयंत्यनवद्यांगि गुणवत्स्वितरेष्वपि
॥२४॥असावत्यंतनिर्भग्नस्तवपुत्रो भविष्यति॥अनाथवत्सुखेभ्यश्च राजवंशाच्च वत्सले
॥२५॥साहं त्वदर्थे संप्राप्ता त्वं तु मां नावबुध्यसे॥सपत्निवृद्धौ या मे त्वं प्रदेयं दातुमर्हसि॥२६॥
ध्रुवं तु भरतं रामः प्राप्य राज्यमकंटकं॥देशांतरं नापयिता लोकांतरमथापि वा॥२७॥बा
लएव तु मातुल्यं भरतो नायितस्त्वया॥संनिकर्षाच्च सौहार्दं जायते स्थावरेष्विव॥२८॥

र॥लोकांतरमिति हनिष्यतीतियावत्॥२७॥यस्मात् रामे राज्ञः पक्षपातः॥सभरतासंनिधानतस्तच्चत्व
यैव कृतमित्याह बालएवेति॥मातुल्यं मातुलगृहं॥ननु किं तावता अत आह संनिकर्षादिति स्था
वरेषु तृणगुल्मलतावृक्षादिषु॥तत्र सौहार्दं अन्योन्याश्लेषरूपं॥एवं च भरतस्थितौ विभज्य समं
राज्यलाभः स्यादिति भावः॥२८॥

अभ्युदये रामाभिषेकरूपेउत्सवे कल्याणि भरताभिषेकरूपे कियता कालेन भविष्यति ॥१७॥ मान्यः प्रार्थनीयश्रेय
स्करः तथा तद्वत् यद्वा भूयोपि अभ्यधिकमपि तत्र हेतुः कौसल्यात इति अतिरिक्तमधिकं ॥१८॥ संप्रत्यपि भरत
स्य राज्यमस्त्येवेत्याह राज्यमिति ॥१९॥ एवं राज्यापहारं परिरत्तवंती कैकेयीं मंथरा तृतीयपर्यायेण पुनर्भेदय

सा त्वमभ्युदये प्राप्ते दह्यमानेव मंथरे ॥ भविष्यति च कल्याणि किमिदं परितप्यसे ॥१७॥ यथा वै भ
रतो मान्यः तथा भूयोपि राघवः ॥ कौसल्यातो तिरिक्तं च मम शुश्रूषते बहु ॥१८॥ राज्यं यदि हि राम
स्य भरतस्यापि तत्तदा ॥ मन्यते हि यथात्मानं तथा भ्रातॄंस्तु राघवः ॥१९॥ कैकेय्या वचनं श्रुत्वा
मंथरा भृशदुःखिता ॥ दीर्घमुष्णं विनिश्वस्य कैकेयीमिदमब्रवीत् ॥२०॥ अनर्थदर्शिनी मौ
र्ख्यान्नात्मानमवबुध्यसे ॥ शोकव्यसनविस्तीर्णे मज्जंती दुःखसागरे ॥२१॥ भविता राघवो राजा
राघवस्य च यः सुतः ॥ राजवंशात्तु भरतः कैकेयि परिहास्यते ॥२२॥ न हि राज्ञः सुताः सर्वे राज्ये
तिष्ठंति भामिनि ॥ स्थाप्यमानेषु सर्वेषु सुमहाननयो भवेत् ॥२३॥

तिकैकेय्याह इति ॥२०॥ अनर्थ
दर्शिनी अर्थस्यैवानर्थत्वेन दर्शनशीला शोकः इष्टवियोगजः अनिष्टप्राप्तिजं दुःखं व्यसनं ताभ्यां विस्ती
र्णे व्याप्ते सकलदुःखसमष्टिः दुःखसागरः तत्र मज्जंती त्वमात्मानं मग्नं नावबुध्यसे इत्यर्थः ॥२१॥ कुत एवं
वारंवारं कथयसीत्यत्राह भवितेति परिहास्यते हीनो भविष्यति भरतस्तत्सुतादेः राज्यहान्येवं दुःखं क
थयामीति भावः ॥२२॥ तत्र हेतुमाह न हीति सर्वेषां राज्ये स्थितिर्बाधकमाह स्थाप्यमानेष्विति अनयो

रामा॰अ॰
२६

एवंएवंसतिमातुलगृहागृहादेववनगमनेसतितेज्ञातिपक्षस्यास्मदादेः श्रेयश्चभविष्यत्येव श्रेयोजीवनरू
पंकल्याणं चात्सुखं भरतादिनस्थादयिभयशंकयास्मदादिपीडायाः कर्त्तुमशक्यत्वादितिभावः यदिचे
दिति यद्यपीत्यर्थः धर्मात्पितृदीयमानत्वरूपात्तदावाज्ञातिपक्षस्यश्रेयइत्यर्थः यद्वा एवमेवतेपक्ष
स्यश्रेयोभविष्यति एवमेवेत्येतदुपपादयति यदिचेदिति ॥ ३४ ॥ अन्यथादुःखमेवेत्याह सतेइति सम

एवंतेज्ञातिपक्षस्यश्रेयश्चैवभविष्यति ॥ यदिचेद्भरतोधर्मात्पित्र्यंराज्यमवाप्स्यति ॥ ३४ ॥ सते
सुखोचितोबालोरामस्यसहजोरिपुः ॥ समृद्धार्थस्यनष्टार्थोजीविष्यतिकथंवशे ॥ ३५ ॥ अ
भिद्रुतमिवारण्येसिंहेनगजयूथपं ॥ प्रच्छाद्यमानंरामेणभरतंत्रातुमर्हसि ॥ ३६ ॥ दर्पान्नि
राकृतापूर्वंत्वयासौभाग्यवत्तया ॥ राममातासपत्नीतेकथंवैरंनयापयेत् ॥ ३७ ॥ यदाचरा
मःपृथिवीमवाप्स्यतेप्रभूतरत्नाकरशैलसंयुतां ॥ तदागमिष्यस्यशुभंपराभवंसहैववदीना
भरतेनभामिनि ॥ ३८ ॥

द्धार्थस्यरामस्यवशेस्थितो ॥ नष्टार्थः कथंजीविष्यतीत्यर्थः ॥ ३५ ॥ तस्मा
दरण्येसिंहेनाभिद्रुतंगजयूथपमिवराज्यप्राप्त्याप्रबलेनरामेणप्रच्छाद्यमानमभिभूयमानंभर
तंतदाभिषेकनिरोधेनत्रातुमर्हसि ॥ ३६ ॥ अन्यथातवाप्यनर्थइत्याह दर्पादिति सौभाग्यवत्तायाः
तिवात्सल्यं वैरयापनंवैरशुद्धिंत्वयिदास्यसंपादनेनकथंनकुर्यादित्यर्थः यातयेदितिपाठेप्य
यमेवार्थः ॥ ३७ ॥ अशुभंपराभवंदास्यं ॥ ३८ ॥

राम
२६

शत्रुघ्नस्थितौवाभरतकार्यस्यननाशःस्यात्सोपिदैववशाद्गतइत्याहभरतानुगतइतिसशत्रुघ्नोपितत्समंभर
तेनसमंगतइत्यर्थः॥भरतस्याप्यनुवशात्-शत्रुघ्नोपिसमंगतइतिपाठे अनुवशात्॥अनुरोधवशादित्य
र्थः॥अद्योपिरत्रैवयोज्यः अनुवशादपि-अपिनादैववशाच्चेत्यर्थः॥गतः एकत्वदयतयेतिशेषः॥२९॥कस्य
चित्संनिकर्षात्कस्यचिदनर्थनिवृत्तिर्लोकेदृष्टेत्यतआह-श्रूयतेहीतिछेत्तव्यः प्राप्तछेदनकालः॥इषीका

भरतानुगतःसोपिशत्रुघ्नस्तत्समंगतः॥लक्ष्मणोहियथारामं तथायंभरतंगतः॥२९॥श्रूय
तेहिद्रुमःकश्चिच्छेत्तव्योवनजीवनैः॥सन्निकर्षादिषीकाभिर्मोचितःपरमाद्भयात्॥३०॥
गोप्ताहिरामंसौमित्रिर्लक्ष्मणंचापिराघवः॥अश्विनोरिवसौभ्रात्रंतयोर्लोकेषुविश्रुतं॥३१॥
तस्मान्नलक्ष्मणोरामःपापंकिंचित्करिष्यति॥रामस्तुभरतेपापंकुर्यादेवनसंशयः॥३२॥
तस्माद्राजगृहादेववनंगच्छतुराघवः॥एतद्धिरोचतेमह्यंभृशंचापिहितंतव॥३३॥

भिःकंटकवहुलगुल्मैः॥संनिकर्षात्-परिवारणरूपात्-भयात्-छेदनरूपात्स्वस्यसंदातःपुरवर्त्तित्वे
नश्रूयतेहीत्यक्तिः॥३०॥नन्वेषदोषोलक्ष्मणस्यापिसमानोतआहगोप्ताहीति॥३१॥पापंवधं॥३२॥तस्मा
त्-वधसंभावनासत्वात्-॥राजगृहात्राजगृहाख्यान्मातुलनागरात्-एतदेवमत्यंरोचतेत्वदिष्टत्वात्
एकपुत्रयाःपुत्रमरणापेक्षयावनेपुत्रजीवनंसम्यक्-॥तदेवाह-भृशंतवहितमेतत्जीवन्मद्राणापश्य

तीतिन्यायात्॥३३॥

ननु मम न प्रतिभाति तदुपाय इति तत्राह॥ किन्नेति। स्म त्वावासं मतये मन्मुखात् श्रवणाय निगूहसे यतः
आत्मार्थमात्मप्रयोजनोपायं उच्यमानं वर्तमानसामीप्ये लट्। त्वया नेकशः उक्तमपि मत्तः श्रोतुमिच्छसि॥६
कुंदः इच्छा विधीयतां विमृश्य युक्तं चेत् क्रियतां॥७॥ अवाप्ते नुष्ठाने चोत्साहं दर्शयति॥ उत्थायेत्यादि

किन्न स्मरसि कैकेयि स्मरंती वा निगूहसे॥ यदुच्यमानमात्मार्थं मत्तस्त्वं श्रोतुमिच्छसि॥६॥ म
योच्यमानं यदि ते श्रोतुं छंदो विलासिनि॥ श्रूयतामभिधास्यामि श्रुत्वा चैतद्विधीयतां॥७॥ श्रु
त्वैवं वचनं तस्या मंथरायास्तु कैकयी॥ किंचिदुत्थाय शयनात्स्वास्तीर्णादिदमब्रवीत्॥८॥
कथयस्व ममोपायं केनोपायेन मंथरे॥ भरतः प्राप्नुयाद्राज्यं न तु रामः कथंचन॥९॥ एवमु
क्ता तदा देव्या मंथरा पापदर्शिनी॥ रामार्थमुपहिंसंती कैकेयीमिदमब्रवीत्॥१०॥ पुरा देवा
सुरे युद्धे सह राजर्षिभिः पतिः॥ अगच्छत्त्वामुपादाय देवराजस्य साह्यकृत्॥११॥ दिशमा
स्थाय कैकेयि दक्षिणां दंडकान्प्रति॥ वैजयंतमिति ख्यातं पुरं यत्र तिमिध्वजः॥१२॥ स शं
बर इति ख्यातः शतमायो महासुरः॥ ददौ शक्रस्य संग्रामं देवसंघैरनिर्जितः॥१३॥

८॥९॥१०॥ दैवासुरैः देवासुरसंबंधिनि उपादाय गृहीत्वा। साह्यं सहायत्वं॥११॥ दक्षिणां दिशमास्थाय
स्थितान् दंडकान्॥ जनपदान्प्रति तत्संबंधि वैजयंतमिति पुरं ख्यातं यत्र तिमिध्वजनामा राजाभ
वत्॥१२॥ स एव लोके शंबर इति ख्यातः॥ देवसंघैः॥ सहितस्य शक्रस्य॥१३॥ ॥

एवंयतःसपुत्रायास्तेनर्थः अतएवात्मजेराज्यं राज्यप्राप्तिकारणं चिंतयशत्रुशेषोनस्थाप्यइतिन्यायेनपरस्पर-
स्परामस्यचात्वत्सुतस्यणासीत्तयोःविवासकारणं चिंतय॥२४॥इतिश्रीरामाःश्रीरा० रा० ति० अयो० अष्टमःस-
र्गः॥८॥एवंत्रिवारोपदेशेनदुःखेऽसत्येपणार्थे उपादेयत्वसत्यत्वनिश्चयात्स्वकार्यायदेवैश्चक्त्रभितचि

यदाहिरामःपृथिवीमवाप्स्यतिध्रुवंप्रणष्टोभरतोभविष्यति॥ अतोहिसंचिंतयराज्यमात्म
जेपरस्यचैवाद्यविवासकारणं॥२४॥इत्यार्षेश्रीरामा० अयो० अष्टमःसर्गः॥८॥एवमुक्तातुकैके
यीक्रोधेनज्वलिताननादीर्घमुष्णंविनिश्वस्यमंथरामिदमब्रवीत्॥१॥ अद्यराममितःक्षि
प्रंवनंप्रस्थापयाम्यहं॥यौवराज्येनभरतंक्षिप्रमद्याभिषेचये॥२॥इदंत्विदानींसंपश्यकेनोपाये
नसाधये॥भरतःप्राप्नुयाद्राज्यंनतुरामःकथंचन॥३॥एवमुक्तातुसादेव्यामंथरापापदर्शिनी
रामार्थमुपहिंसंतीकैकेयीमिदमब्रवीत्॥४॥हंतेदानींप्रपश्यत्वंकैकेयिश्रूयतांचमे॥यथा
तेभरतोराज्यंपुत्रःप्राप्स्यतिकेवलं॥५॥

तायास्तदुपायंप्रश्नमाहएवमिति॥१॥प्रस्थापयामिःप्रस्थाप
नोद्यमंकरोमिःएवमभिषेचयेइत्यपि॥२॥अथतदुपायंपृच्छतिःइदंत्विति उत्तरार्धार्थकेनोपायेन
साधयेइदमिदानींसंपश्यविचारयःउत्साहमात्रेणनेदंसाध्यमितिभावः॥३॥रामार्थंत्नोकरष्सारामं
ल्लितमभिषेकरूपमर्थं॥४॥त्वंप्रपश्यमत्सामर्थ्यमितिशेषःप्रवक्ष्यामितिपाठांतरंःश्रूयतांमद्वचइतिशेषः
चस्त्वर्थेःकेवलंभरतोनतुरामइत्यर्थःयथाहंनन्वासेवोपायंन्वमपिप्रपश्यविचारय॥५॥

चतुर्दशसंख्याफलमाह॰ चतुर्दशेति॰ प्रजानां भावेंतःकरणे गतः प्राप्तः स्नेहो यस्य तादृशस्ते पुत्रः स्थिरो रा
ज्ये भविष्यति॥२१॥ वरदानप्रवर्तनोपायमाह॰ क्रोधागारमिति॰॥ क्रोधवतीनां शयनस्थानं क्रोधागारं॰ क्रुद्धे
व इव शब्दस्त्वार्थे॰ क्रुद्धेव सतीत्युक्तं क्रोधहेतुं शत शोन्यथा तत्सांत्वनेप्रविस्मरंतीत देवविवणोति॰ शे

चतुर्दश हि वर्षाणि रामे प्रव्राजिते वनं॥ प्रजाभावगतस्नेहः स्थिरः पुत्रो भविष्यति॥२१॥ क्रोधा
गारं प्रविश्याद्य क्रुद्धेवाश्वपतेः सुते॥ शेष्वानंतर्हितायां त्वं भूमौ मलिनवासिनी॥२२॥ मास्मैनं
प्रत्युदीक्षेथा मा चैनमभिभाषथाः॥ रुदंती पार्थिवं दृष्ट्वा जगत्यां शोकलालसा॥२३॥ दयिता त्वं
सदा भर्तुरत्र मे नास्ति संशयः॥ त्वत्कृते च महाराजो विशेदपि हुताशनं॥२४॥ न त्वां क्रोधयितुं श
क्तो न क्रुद्धां प्रत्युदीक्षितुं॥ तव प्रियार्थं राजा तु प्राणानपि परित्यजेत्॥२५॥ न ह्यतिक्रमितुं शक्त
स्तव वाक्यं महीपतिः॥ मंदस्वभावे बुध्यस्व सौभाग्यबलमात्मनः॥२६॥ मणिरत्नं सुवर्णानि रत्ना
नि विविधानि च॥ दद्याद्दशरथो राजा मा स्म तेषु मनः कृथाः॥२७॥

ष्वेति॰ अनास्तृतायां भूमौ शे
ष्वेत्यर्थः॰ मलिनवासिनी॰ मलिनवस्त्रधरा सती॥२२॥ रुदंतीत्यस्य भवेतिशेषः॰ नं दृष्ट्वेति पूर्वार्धेनान्वयि॥
२३॥ एवं सति सर्वथा कार्यसिद्धिर्भवत्येवेत्याह॰ दयितेति॰ त्वत्कृते त्वत्प्रीणननिमित्तं॥२४॥२५॥ ननूक्त
मपि वाक्यं राजा चेन्न शृणुयात्तदा महती हानिः स्यात्तत्राह॰ नहीति॰ स्वसौभाग्यवैभवविस्मर
णमूलिका तेएषा मंदाशंकेति भावः॥२६॥ वरदानातिरिक्तमनुनयं मास्वीकुर्वित्याह॰ मणीत्यादि॥२७॥

28

त्तैरस्त्रशस्त्रैर्वैधैर्विक्षतान् विशेषेण विक्षतान्॥ रात्रौ प्रसुप्तान् दिनकृतयुद्धश्रान्त्या॥ अपास्य आस्तरणात् दाकृष्य॥
१४॥ तत्र तदाग्र्या शकलीकृतः सर्वांगेषु विक्षतः॥१५॥ त्वया सारथ्यं कुर्वाणया अपवाह्य संग्रामादन्यत्र नीत्वा त-
त्रापि तादृशापत्काले पि शस्त्रैर्विक्षतो ततएव नष्टचेतनो मूर्छितस्ते पतिस्त्वया रक्षित इत्यन्वयः केचित्तु संग्रा-
मादपवाह्य मूर्छितस्ते पतिस्त्वया रक्षितः तत्रापि दूरपातिभिरसुरीयैः शस्त्रैर्विक्षतस्ततोप्यन्यत्रापवाह्य रक्षित-

तस्मिन्महतिसंग्रामेपुरुषान्क्षतविक्षतान्॥ रात्रौप्रसुप्तान्घ्नंतिस्मतरसापास्यराक्षसाः॥१४॥ तत्रा-
करोन्महायुद्धंराजादशरथस्तदा॥ असुरैश्चमहाबाहुःशस्त्रैश्चशकलीकृतः॥१५॥ अपवाह्य-
त्वयादेविसंग्रामान्नष्टचेतनः॥ तत्रापिविक्षतःशस्त्रैःपतिस्तेरक्षितस्त्वया॥१६॥ तुष्टेनतेनद-
त्तौतेद्वौवरौशुभदर्शने॥ सत्वयोक्तःपतिर्देवियदिच्छेयंतदावरं॥१७॥ गृह्णीयांतुतदाभर्तस्त-
थेत्युक्तंमहात्मना॥ अनभिज्ञाह्यहंदेवित्वयैवकथितंपुरा॥१८॥ कथैषातवतुस्नेहान्मनसा
धार्यतेमया॥ रामाभिषेकसंभारान्निगृह्यविनिवर्तय॥१९॥ वरौयाचस्वभर्तारंभरतस्याभिषे-
चनं॥ प्रव्राजनंचरामस्यवर्षाणिचचतुर्दश॥२०॥

एवं द्विःप्राणरक्षणतोषेण वरद्वयदानमित्याहुः॥१६॥
तेन राज्ञा यत् यदा इच्छेयं भर्तस्तदा वरं गृह्णीयां तु इत्यन्वयः॥१७॥ तदा महात्मना राज्ञा तथेत्युक्तं अनभिज्ञा अस्याः
कथया इति शेषः॥१८॥ निगृह्य भर्तारं वरबलेन निगृह्य अभिषेकसंभारान्निवर्तय अभिषेकरूपफलादिति शेषः
१९॥ निवृत्तिप्रकारमाह वराविति तेन च [illegible] रामप्रव्राजनेन वा इति शेषः॥२०॥

अंतर्बहिश्चप्रकृतीनामितिशेषः चिरसंयोगाद्रतेप्रजानांस्नेहवद्भिश्चिर विप्रयोगतश्चरामेस्नेहनाशइतिभा
वः ॥३४॥ कृतमूलत्वमेवविवृणोति । संगृहीतेति । सम्यक्पालनेनाऽनुरंजितमनुष्यइत्यर्थः सुहृद्भिः सा
कं कृतमूलोभविष्यतीतिपूर्वेणान्वयः अभिषेकतो निवर्तनं प्राप्तकालंमन्येइत्यर्थः अभिषेक निवर्त
नस्यायमेवकालइतिभावः तस्माद्राजानंतदभिषेकान्निवर्त्तयेत्यन्वयः ॥३५॥३६॥ प्रतीतांअंगीकृतत

येनकालेनरामश्चवनात्प्रत्यागमिष्यति ॥ अंतर्बहिश्चपुत्रस्तेकृतमूलोभविष्यति ॥३४॥
संगृहीतमनुष्यश्चसुहृद्भिः साकमात्मवान् ॥ प्राप्तकालंनुमन्येहंराजानंवीतसाध्वसा
॥३५॥ रामाभिषेकसंकल्पान्निगृह्यविनिवर्तय ॥ अनर्थमर्थरूपेणग्राहितासाततस्तया ॥३६॥
हृष्टाप्रतीताकैकेयीमंथरामिदमब्रवीत् ॥ साहिवाक्येनकुब्जायाः किशोरीवोत्पथंगता ॥
॥३७॥ कैकेयीविस्मयंप्राप्यपरंपरमदर्शना ॥ कुब्जेत्वांनाभिजानामिश्रेष्ठेश्रेष्ठाभिधायिनी ॥३८

दर्था । कैकेयीकेकयराजकन्या । किशोरी । बालवत्सावडवासायथास्वकिशोरार्थेउत्पथंगच्छतिक
शाहस्तेनारूढापितथेयंराजाधीनापिभरतार्थेउन्मार्गगतेत्यर्थः ॥३७॥ परंविस्मयंप्राप्ता । परमद
र्शना । अत्यंतविशेषदर्शनवती । यद्वापरमत्यर्थंमदर्शनाविरुद्धदर्शना । मंथरामिदमब्रवीदित्य
न्वयः ॥ अत्रकैकेयीतन्नामिकाहेश्रेष्ठाभिधायिनिहितोपदेशकुशलेइतियावत् ॥ अतएवतेप्रज्ञां
नावजानामिइत्यर्थः । कुब्जेत्वांनाभिजानामीतिपाठे । श्रेष्ठाभिधायिनीत्वादिविशिष्टांनाज्ञासिषमित्यर्थः ॥३८॥

२७

सर्वांनुनयानंगीकारेतर्हिंदासेनमयाकिंकर्त्तव्यमितिराजप्रश्नेउत्तरमुपदिशति· यावितिः सोर्थः रामविवासन भरताभिषेकरूपोर्थः त्वा· त्वामित्यर्थः मात्वेतिपाठेमाऽतिक्रमेत्तमर्थमाविस्मरेत्पर्थः ॥ नातिक्रामेदितीति पाठे· सर्वथाप्रसिध्यत्येवराज्ञः सत्यप्रतिज्ञदित्याशयइतिकतकः ॥२५॥ राघवोदशरथः उत्थाप्यत्वामितिशेषः तेनुभ्यंतदात्वंमहाराजव्यवस्थाप्यसपथैः सत्येस्थापयित्वा ॥२६॥ वरमभिनयतिः रामेति ॥३०॥ सर्वथाप्रव

यौतौदेवासुरेयुद्धेवरौदशरथोददौ ॥ तौस्मारयमहाभागेसोर्थोनातिक्रमेदिति ॥२५॥ यदातुतेवरंदद्यात्स्वयमुत्थाप्यराघवः ॥ व्यवस्थाप्यमहाराजंत्वमिमंवृणुयावरं ॥२६॥ रामप्रव्राजनंदूरंनववर्षाणिपंचच ॥ भरतः क्रियतांराजापृथिव्यांपार्थिवर्षभः ॥३०॥ चतुर्दशहिवर्षाणिरामेप्रव्राजितेवनं ॥ रूढश्चकृतमूलश्चशेषंस्थास्यतितेसुतः ॥३१॥ रामप्रव्राजनंचैववदेवियाचस्वतंवरं ॥ एवंसेत्स्यतिपुत्रस्यसर्वार्थोस्तवकामिनि ॥३२॥ एवंप्रव्राजितश्चैवरामोरामोभविष्यति ॥ भरतश्चगतामित्रस्तवराजाभविष्यति ॥३३॥

जनस्यातिघोरतयालोकविरुद्धत्वं मत्वाहः ॥ चतुर्दशेतिः यथाचतुर्दशवर्षपालितः प्ररूढशाखः कृतमूलोवृक्षोदुरुन्मूलोभवतिः ॥ एवंभरतस्तावताकालेनरूढोदृढराज्यः कृतमूलोवशीकृतमूलबलः चतुर्दशोत्तरशेषायुःकालंस्थास्यत्येवननुपुनरागतेनापिरमिणाशक्योन्मूलनोभविष्यतिः नचरामस्पराज्यप्रत्पशितितात्पर्यं ॥३१॥ तंराजानं ॥३२॥ रामः अरामइतिच्छेदः अप्रियः प्रजानांभविष्यतीत्पर्थः ॥३३॥

अधस्तात्त्वद्वक्षसोधस्तात् शोभननाभिमदु दरं लज्जितमिव शांतं उरसउन्नतिं दृष्ट्वा लज्जितमिव कृश मित्यर्थः
प्रतिपूर्णं विस्तीर्णं ॥४२॥ हर्षातिशयाद्वर्णितमपि जघनं पुनर्वर्णयति । जघनमिति । निर्मृष्टं रामादिकश्म
लहीनं । निर्घुष्टमिति पाठे रशनास्थक्षुद्रघंटाभिः शब्दायमानं ॥४३॥ उपन्यस्ते जान्वोरितिशेषः यद्वालोकैः
स्तते सुंदरत्वेन सक्थिनी पक्वफलके इति कतकः ॥४४॥ राजहंसीव राजसेइति च क्वचित्पाठः स्थगुं स्तो

अधस्ताच्चोदरं शांतं सुनाभमिव लज्जितं ॥ प्रतिपूर्णं च जघनं सुपीनौ च पयोधरौ ॥४२॥ विम
लेंदुसमं वक्त्रं अहो राजसि मंथरे ॥ जघनं तव निर्मृष्टं रशनादाम भूषितं ॥४३॥ जंघे भृशमुपन्य
स्ते पादौ चव्यायतावुभौ ॥ त्वमायताभ्यां सक्थिभ्यां मंथरे क्षौमवासिनि ॥४४॥ अग्रतो मम गच्छंती
राजसेतीव शोभने ॥ आसन्याः शंवरे मायाः सहस्रमसुराधिपे ॥४५॥ हृदये ते निविष्टास्ताभू
यश्चान्याः सहस्रशः ॥ तदेव स्थगु यद्दीर्घं रथघोणमिवायतं ॥४६॥ मतयः क्षत्रविद्याश्च मा
याश्चात्र वसंति ते ॥ अत्र तेहं प्रमोक्ष्यामि मालां कुब्जे हिरण्मयीं ॥४७॥

तुमुत्प्रेक्षते । आसन्निति ॥४५
यास्तास्त्वद्धृदये निविष्टा मायास्तदेवेदयत् दीर्घं स्थगु इत्यन्वयः रथघोणं रथचक्रपिंडिका तद्व
दायतं विस्तीर्णं ॥४६॥ अतोत्र मत्यादिकं वसति यत एवमतोत्र मालां प्रमोक्ष्यामि । हृदि स्थविकृतोन्नत
मांसास्थिपिंडे । मनयोमतिस्मृतिबुद्धयः ॥ स्मृतिर्मत विषया मतिरागामिगोचरा बुद्धिस्तात्कालि
कीज्ञेयेति । क्षत्रविद्या राजनीतिः ॥ माया प्रसिद्धा अत्र स्थगुनि हृदि स्थविकृतोन्नतमांसास्थिपिंडे ॥४७

कुब्जानां कुब्जत्वविशिष्टराजदासीनां मध्ये बुद्धिनिश्चये बुद्धिविषयकार्यनिश्चये उत्तमा ईदृश्य एव दास्यो राज
पत्नीनां मिथ्याः सुरूपा सुसाप त्व्यस्फूर्त्तेः श्रेष्ठत्वमभिधाय श्रेष्ठाभिधायिनीत्वमुपपादयति त्वमेवेति हितैषि
णी इच्छापूर्वं हितवक्त्री ॥३९॥ समवबुध्येयं त्वत्कृतबोधनाभावे इति शेषः ॥ चिकीर्षितं रामाभिषेकाय भरतस्य वि
वासनादिकं कैकेय्या एवं मतिकारणं कश्चित्पृच्छते न हितद्बुध्येपापं शापदोषेणामोहिता कैकेयेषु हि सा बाल्ये
ब्राह्मणं रूक्षरूपिणं ॥ असूयितवती बलात् तेन शप्ता महात्मना ॥ यस्मादसूयसे विप्रं त्वं रूपमददर्पिता तस्मा

पृथिव्यामसि कुब्जानामुत्तमा बुद्धिनिश्चये ॥ त्वमेव तु ममार्थेषु नित्ययुक्ता हितैषिणी ॥३९॥
नाहं समवबुध्येयं कुब्जे राज्ञश्चिकीर्षितं ॥ सन्ति दुःसंस्थिताः कुब्जा वक्राः परमपापिकाः ॥४०॥
त्वं पद्ममिव वातेन सन्नता प्रियदर्शना ॥ उरस्तेऽभिनिविष्टं वै यावत्स्कन्धात्समुन्नतम् ॥४१॥

दसूयां त्वमपि लोके प्राप्स्यसि कुत्सिता इति शापसमाक्रान्ता मन्थरावशमागता इति असूयां असूया
विषयतां ॥ अथ कुब्जां कुब्जांतरवैलक्षण्येन स्तौति सन्तीत्यादि त्वद्व्यतिरिक्ता इति शेषः दुःसंस्थिता दुः
संस्थावयवसन्निवेशाः अत एव परमपापिकाः परमपापदर्शनाः ॥४०॥ नैवं त्वमित्याह त्वमिति वातेन सन्नतं
पद्ममिव त्वं सन्नतापि प्रियदर्शना तत्र हेतुः उरोऽभिनिविष्टं स्थगुराव्याप्तं अत एव यावत्स्कन्धात् स्कन्ध
पर्यन्तमुन्नतं उरः यावत् संस्थानमुन्नतमिति पाठे स्तनावधिसमस्थानरूपसर्वसाधारणसंस्थानं या
वत्समुन्नता एतेन स्थगुमत्कुब्जत्वप्रातिपादितं ॥४१॥

अनेकशतसाहस्त्रं नावत्स्वर्णमूल्यं वरार्हाणि बहुमूल्यानि॥५४॥ हेमोपमा स्वर्णवर्णा कैकेयी॥५७॥ द्रुह्नक्रोधागारे मदभीष्टासिद्धौ॥ मदुपेक्षकाय राज्ञे दशरथाय मां मृतामावेदयिष्यसि॥ तु वर्थे॥ राघ

अनेकशतसाहस्रं मुक्ताहारं वराङ्गना॥ अवमुच्य वरार्हाणि शुभान्याभरणानि च॥५४॥ तदा हेमोपमा तत्र कुब्जावाक्यवशंगता॥ संविश्य भूमौ कैकेयी मंथरामिदमब्रवीत्॥५७॥ इह वा मां मृतां कुब्जे नृपायावेदयिष्यसि॥ वनं तु राघवे प्राप्ते भरतः प्राप्स्यते क्षितिं॥५८॥ सुवर्णेन न मे ह्यर्थो न रत्नैर्न च भोजनैः॥ एष मे जीवितस्यांतो रामो यद्यभिषिच्यते॥५९॥ अथो पुनस्तां महिषीं महीक्षितो वचोभिरत्यर्थमहापराक्रमैः॥ उवाच कुब्जा भरतस्य मातरं हितं वचो राममुपेत्य चाहितं॥६०॥ प्रपत्स्यते राज्यमिदं हि राघवो यदि ध्रुवं त्वं ससुता च तप्स्यसे॥ ततो हि कल्याणि यतस्व तत्तथा यथा सुतस्ते भरतोभिषेक्ष्यते॥६१॥ राम ॥

वे वनं प्राप्ते भरतः क्षितिं प्राप्स्यते वा न तु पक्षांतरमस्तीति भावः॥५८॥५९॥ महापराक्रमैः रतिक्रूरैः भरतस्य मातरं हितां त्वय्यपि रामम् उपेत्य तं प्राप्य अहितं रामविषये लोकदृष्ट्या अहितमिति यावत्॥६०॥६१॥

जात्येनोत्तमेन सुनिष्पन्नेन संदुतेन सुवर्णेन निर्मितां हिरण्मयीं मालां मिति संबंधः॥४८॥लप्स्यार्थं लप्स्योक्तार्थं अत एव प्रतीता॥ संतुष्टा लेपयिष्यामि उत्तमचंदनेति शेषः॥ यद्वा जात्यद्रुत स्वर्णकृत भूषणेन तेस्थ गुलेपयि

अभिषिक्ते च भरते राघवे च वनं गते॥ जात्येन च सुवर्णेन सुनिष्पन्नेन सुंदरि॥४८॥लप्स्यार्थं च प्रतीताच लेपयिष्यामि ते स्थगु॥ मुखे च तिलकं चित्रं जातरूपमयं शुभं॥४९॥कारयिष्यामि ते कुब्जे शुभान्याभरणानि च॥ परिधाय शुभे वस्त्रे देवतेव चरिष्यसि॥५०॥चंद्रमाह्वयमानेन मुखेनाप्रतिमानना॥ गमिष्यसि गतिं मुख्यां गर्वयंती द्विषज्जने॥५१॥तवापि कुब्जाः कुब्जायाः सर्वाभरणभूषिताः॥ पादौ परिचरिष्यंति यथैव त्वं सदा मम॥५२॥इति प्रशस्यमाना सा कैकेयीमिदमब्रवीत्॥ शयानां शयने शुभ्रे वेद्यामग्निशिखामिव॥५३॥गतोदके सेतुबंधो न कल्याणि विधीयते॥ उत्तिष्ठ कुरु कल्याणं राजानमनुदर्शय॥५४॥तथा प्रो[illegible]त्साहिता देवी गत्वा मंथरया सह क्रोधागारं विशालाक्षी सौभाग्यमदगर्विता॥५५॥ ॥ राम ॥ ॥

ष्यामि गुप्तं करिष्यामीत्यर्थः॥४९॥५०॥आह्वयमानेन स्पर्धमानेन॥ द्विषज्जने गर्वयंती गर्वं कुर्वती॥ मुख्यां गतिं श्रैष्ठ्यं॥५१॥५२॥५३॥एवं वयावार्त्ताभिः कालात्ययो न कार्य इत्याह॥ गतेत्यादि॥ रामाभिषेके वृत्ते वरग्रहणादिव्यर्थमिति भावः॥ राजानमनुदर्शय क्रोधागारे आत्मानमिति शेषः॥५४॥५५॥

रामा·अ
३२

अथोक्तानुवादपूर्वं राज्ञः कैकेयीदर्शनायाह विदर्शितेत्यादि विपरीतं बोधिता दिग्धविद्धेव विषदिग्धबाणविद्धेव किन्नरीकामरूपप्रधानो जातिविशेषः॥१॥ मंथरोपदिष्टं निश्चित्य युक्तमेतदिति निर्धार्य यत्त्वयोक्तं तत्सर्वं सम्प गितिमंथरायै आविष्टदुःखत्वात् शनैः आचचक्षे॥२ तदेव प्रपंचयति·सादीनेत्यादि॥३॥ मार्गं मंथरोक्तमात्म

विदर्शिता यदा देवी कुब्जया पापया भृशं॥ तदा शेते स्म सा भूमौ दिग्धविद्धेव किन्नरी॥१॥ निश्चित्य मनसा कृत्यं सा सम्यगिति भामिनी॥ मंथरायै शनैः सर्वमाचचक्षे विचक्षणा॥२॥ सा दीना निश्चयं कृत्वा मंथरावाक्यमोहिता॥ नागकन्येव निश्वस्य दीर्घमुष्णं च भामिनी॥३॥ मुहूर्तं चिंतयामास मार्गमात्मसुखावहं॥ सा सुहृच्चार्थकामा च तं निशम्य विनिश्चयं॥४॥ बभूव परमप्रीता सिद्धिं प्राप्येव मंथरा॥ अथ सा रुषिता देवी सम्यक् कृत्वा विनिश्चयं॥५॥ संविवेशाबला भूमौ निवेश्य भ्रुकुटिं मुखे॥ ततश्चित्राणि माल्यानि दिव्यान्याभरणानि च॥६॥ अपविद्धानि कैकेय्या तानि भूमिं प्रपेदिरे॥ तया तान्यपविद्धानि माल्यान्याभरणानि च॥७॥ राम

सुखावहमिति चिंतयामास सा मंथरा सुहृत् कैकेय्याः तस्या एवार्थकामा च कैकेय्यास्तं निश्चयं निशम्य ज्ञात्वा॥४॥ सिद्धिं रसरसायनादिसिद्धिं निधिमिति पाठे धनं प्राप्येव परमप्रीता बभूव·वस्तुतोऽयं देवकार्यार्थं स्वयंभूलोकमागता दासी च जाता तद्विषयां सिद्धिं प्राप्येवेत्यर्थः रामगमनस्य संभावनामात्रविषयत्वादिवेति॥५॥ मुखे भ्रुकुटिनिवेशः क्रोधातिशयेन॥६॥ यानि कैकेय्या अपविद्धानि त्यक्तानि तानि

राम
३२

३२

कुब्जयासुहुर्मुहुरितिवागिषुभिः पूर्वोक्तैर्वचनरूपैर्वाणैः समाहतनाताडिताऽतिविद्धा च अतिविस्मिता च राज्ञा मामेवं प्रतीरितवानितीतिशेषः शशंसजगाद च ॥ ६२ ॥ निशाम्य दृष्ट्वा प्रतिवेदयिष्यसि दशरथायेतिशेषः ६३ नांजनपानभोजनमितिसमाहारद्वंद्वः ॥ ६४ ॥ अथ क्रोधागारप्रवेशानंतरं निधाय त्यक्त्वा ॥ पुण्यप्रदत्वयाज्ञ्मौपति

तथातिविद्धा महिषीतिकुब्जया समाहता वागिषुभिर्मुहुर्मुहुः ॥ विधाय हस्तौ हृदये तिविस्मिता शशंस कुब्जां कुपिता पुनः पुनः ॥ ६२ ॥ यमस्य वा मां विषयं गतामितो निशाम्य कुब्जे प्रतिवेदयिष्यसि वनं गते वा सुचिराय राघवे समृद्धकामो भरतो भविष्यति ॥ ६३ ॥ अहं हि नैवास्तरणानि न स्रजो न चंदनं नांजनपानभोजनं ॥ न किंचिदिच्छामि न चेह जीवनं न चेदितो गच्छति राघवो वनं ॥ ६४ ॥ अथैवमुक्त्वा वचनं सुदारुणं निधाय सर्वाभरणानि भामिनी ॥ असंस्कृतामास्तरणेन मेदिनीं तदाधिशिश्ये पतितेव किन्नरी ॥ ६५ ॥ उदीर्णसंरंभतमोवृतानना तदावमुक्तोत्तममाल्यभूषणा ॥ नरेंद्रपत्नी विमना बभूव सा तमोवृता द्यौरिव मग्नतारका ॥ ६६ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये अयोध्याकांडे नवमः सर्गः ॥ ९ ॥

रा

नाकिन्नरीव ॥ ६५ ॥ उदीर्ण उत्कटः संरंभः कोपस्तेन वृतं व्याप्तमाननं यस्याः ॥ अवमुक्तानि त्यक्तानि उत्तममाल्यभूषणानि यया सा विमना दुर्मनाः मग्नतारका अस्तमितकारका द्यौराकाशं ॥ ६६ ॥ इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके अयो० नवमः सर्गः ॥ ९ ॥

गजदंतरजतस्वर्णनिर्मितवेदिकाभिः वृक्षाणां नित्यपुष्पफलत्वं च देवराजसाहाय्यकरणेन तत्प्रसादात्
१४॥१५॥१६॥ कामबलसंयुक्तः कामबलं तदुद्रेकस्तत्संयुक्तः॥ अत एव रत्यर्थी॥१७॥ अपश्यत् रत्यर्थं
मन्विष्यापश्यन्· विषादहेतुमाह· नहीति· तां वेलां कामवशात्स्वशयनागमवेलां· नात्यवर्त्तत नाति

दांतराजतसौवर्णवेदिकाभिः समायुतं॥ नित्यपुष्पफलैर्वृक्षैर्वापीभिरुपशोभितं॥१४॥ दांत
राजतसौवर्णैः संवृतं परमासनैः॥ विविधैरन्नपानैश्च भक्ष्यैश्च विविधैरपि॥१५॥ उपपन्नं महा
र्हैश्च भूषणैस्त्रिदिवोपमं॥ स प्रविश्य महाराजः स्वमंतःपुरमृद्धिमत्॥१६॥ न ददर्श स्त्रियं रा
जा कैकेयीं शयनोत्तमे॥ स कामबलसंयुक्तो रत्यर्थी मनुजाधिपः॥१७॥ अपश्यन् दयितां भा
र्यां पप्रच्छ विषसाद च॥ न हि तस्य पुरा देवी तां वेलामत्यवर्तत॥१८॥ न च राजा गृहं शून्यं प्रविवे
श कदाचन॥ ततो गृहगतो राजा कैकेयीं पर्यपृच्छत॥१९॥ यथापुरमविज्ञाय स्वार्थलिप्सुमपं
डितां॥ प्रतीहारी त्वथोवाच संत्रस्ता तु कृतांजलिः॥२०॥ देव देवी भृशं क्रुद्धा क्रोधागारमभि
द्रुता॥ प्रतीहार्या वचः श्रुत्वा राजा परमदुर्मनाः॥२१॥ ॥ राम ॥ ॥

क्रांतवती॥ अद्य च नामतिक्रांतेति विषादः॥१८॥ गृहं कैकेयीरहितं॥१९॥ अपंडितां कार्याकार्यवि
वेकरहितां· स्वार्थलिप्सुं भरताभिषेककांक्षिणीं· अविज्ञाय यथापुरं यथापूर्वं· पूर्वमदर्शनकाले
यथापकृतं तथाऽपकृतेत्यन्वयः· प्रतीहारी दौवारिकी॥२०॥ अभिद्रुता इत्युवाचेति संबंधः॥२१॥

८॥ एकवेणी पुरोभागीयवेणीद्वयमुन्मुत्पपृष्ठैकवेणी· गतसत्वात्दीणावला· केकयीवृत्तांतं प्रदोषकालिकमुप
वर्ण्य· राजवृत्तांतमाह· आज्ञाप्येति·॥९॥ उपस्थानं कृताज्ञापनविषयस्य मंत्रिपुरोहितादेः स्वस्वगृहं प्रति
गमनमनुज्ञाप्य स्वनिवेशनं प्रविवेशः यद्वोपास्थानं सदः सभां तामनुज्ञाप्य स्वगृहगमने तदनुज्ञां गृही

त
अशोभयंव वसुधां नक्षत्राणि यथा नभः। क्रोधागारे च पतिता सा बभौ मलिनांबरा॥८॥ एकवेणीं
दृढां बध्वा गतसत्वेव किन्नरी॥ आज्ञाप्य तु महाराजो राघवस्याभिषेचनं॥९॥ उपस्थानमनुज्ञाप्य
प्रविवेश निवेशनं॥ अद्य रामाभिषेको वै प्रसिद्ध इति जज्ञिवान्॥१०॥ प्रियार्हां प्रियमाख्यातुं वि
वेशांतःपुरं वशी॥ स कैकेय्या गृहं श्रेष्ठं प्रविवेश महायशाः॥११॥ पांडुराभ्रमिवाकाशं राहु
युक्तं निशाकरं॥ शुकबर्हिसमायुक्तं क्रौंचहंसरुतायुतं॥१२॥ वादित्ररवसंघुष्टं कुब्जावा
मनिकायुतं॥ लतागृहैश्चित्रगृहैश्चंपकाशोकशोभितैः॥१३॥

त्वा अद्यैव रामाभिषेकः प्रसिद्धः
निश्चित इति· इतः पूर्वं कैकेय्यानकृतिगोचर इति जज्ञिवान् ज्ञातवान्॥१०॥ अनन्तरं प्रियमाख्या
तुं तामंतःपुरं प्रविवेश· वशी स्वस्त्रीव्यतिरिक्तविषये इति बोध्यं॥११॥ अत्र गृहस्य रूक्षकैकेयीयु
क्तनया सुधाधवलतया च राहुयुक्तपांडराभ्राकाशसादृश्यं· रुतायुतं रुतयुक्तं॥१२॥ कुब्जाभिः वामनिका
भिश्च· वामनिकाः ह्रस्वाः ताभिर्युतं· सुरूपदासीनां सापत्न्यसंभावनया अंतःपुरे वासात्· चित्रगृहैः चित्र
युक्तगृहैः॥१३॥

रामा॰ अ॰
२४

आत्मनि मयि संश्रितं नेत्क्रोधं क्रोधकारणं नाभिजानामि अभियुक्ता कृतपराभवा विमानो निंदा ॥२८॥ यत्त्वयत्तः इदं एवं प्रकारेण कल्याणि मम दुःखाय पांसुषु शेषे किंच कल्याणचेतसि अनपकारिणि मयि जीवति सति किमर्थं भूमौ शेषे ॥२९॥ भूतोपहतचित्तेव ग्रहाविष्टेव कुशलाः सर्वव्याधिनिवारणा कुशलाः अभितुष्टाः मत्कृतसत्कारैरितिशेषः ॥३०॥ व्याधिमाचक्ष्व व्याधिकृतं चेद्दुःखं नमितिशेषः प्रियं कार्यं

नतेहमभिजानामि क्रोधमात्मनि संश्रितं ॥ देविकेनाभियुक्तासि केन वासि विमानिता ॥२८॥ यदिदं मम दुःखाय शेषे कल्याणि पांसुषु ॥ भूमौ शेषे किमर्थं त्वं मयि कल्याणचेतसि ॥२९॥ भूतोपहतचित्तेव मम चित्तप्रमाथिनि ॥ संति मे कुशला वैद्यास्त्वभितुष्टाश्च सर्वशः ॥३०॥ सुखितां त्वां करिष्यंति व्याधिमाचक्ष्व भामिनि ॥ कस्य वापि प्रियं कार्यं केन वा विप्रियं कृतं ॥३१॥ कः प्रियं लभतामद्य को वा सुमहदप्रियं ॥ मा रौत्सीर्मा च कार्षीस्त्वं देवि संपरिशोषणं ॥३२॥ अवध्यो वध्यतां को वा वध्यः को वा विमुच्यतां ॥ दरिद्रः को वा भवेदाढ्यो द्रव्यवान्वाप्यकिंचनः ॥३३॥

कर्त्तव्यमिति मनसि वर्त्तते इतिशेषः ॥ विप्रियं कृतं तव यस्य अप्रियं कर्त्तव्यत्वेन तव मनसि वर्त्तते इतिशेषः ॥३१॥ पदद्वयनिमित्तोपि क्रोधो मास्त्वित्याह कः प्रियमिति त्वत्प्रियो दरिद्र इतिशेषः अप्रियं लभतां त्वद्विप्रियकारीतिशेषः मा रौत्सीः आत्मनोभिप्रायं रुद्धं गुप्तं मा कार्षीरित्यर्थः संपरिशोषणं कायस्येतिशेषः ॥३२॥ तदेव प्रपंचयति अवध्य इत्यादि ॥३३॥ राम

राम
२४

अदर्शनमात्रेणविषण्णस्यक्रोधादिश्रवणाद्भूयोधिकोविषादः इष्टादर्शनजविषादेनचक्रवादेर्लुलितत्वमति
चंचलत्वंचित्तस्यकिंनिमित्तःक्रोधइतिशंकयाव्याकुलत्वं॥तत्रक्रोधागारेअतथोचितांनयाशयनानुचितां
२२॥इत्वशब्दएवार्थे॥२३॥पापसंकल्पां-रामाभिषेकविघातादिमनोरथां।विनिष्कृतांछिन्नां॥२४॥निर्धूतांप्र

विषसादपुनर्भूयोलुलितव्याकुलेंद्रियः॥तत्रतांपतितांभूमौशयनामतथोचितां॥२२॥प्रतनप्तइ
वदुःखेनसोपश्यज्जगतीपतिः॥सवृद्धस्तरुणींभार्यांप्राणेभ्योपिगरीयसीं॥२३॥अपापःपाप
संकल्पांददर्शधरणीतले॥लतामिवविनिष्कृत्तांपतितांदेवतामिव॥२४॥किन्नरीमिवनि
र्धूतांच्युतामप्सरसंयथा॥मायामिवपरिभ्रष्टांहरिणीमिवसंयुतां॥२५॥करेणुमिवदिग्धे
नविद्धांमृगयुनावने॥महागजइवारण्येस्नेहात्परमदुःखितां॥२६॥परिमृज्यचपाणिभ्या
मभिसंत्रस्तचेतनः॥कामीकमलपत्राक्षीमुवाचवनितामिदं॥२७॥ ॥ ॥

एषत्वयेस्वर्लोकात्पातितांच्युतां॥स्वर्गात्परिभ्रष्टां-परमोहनायप्रयुक्तां।॥मध्येएवस्थितांमायामिवस्थि
ता।॥संयुतां-वागुरावद्धां॥२५॥मृगयुनाव्याधेन-दिग्धेनविषलिप्तेन-।वाणेनविद्धांकरेणुमिवस्थितां-
ददर्शेतिपूर्वेणान्वयः॥अरण्येमहागजः॥पूर्वोक्तांकरेणुमिवतां॥२६॥पाणिभ्यांपरिमृज्यस्पृष्ट्वा-
किंवक्ष्यतिकिंकरिष्यतीतिशंकयात्रस्तबुद्धिः॥उवाच॥२७॥ राम

भूयः परिपीडयितुं निजभूशयनादिना पूर्वं पीडितमेवाप्रियवचनादिना पुनः पीडयितुमित्यर्थः ॥४१॥ इति श्रीराम
भिरामे श्रीरामीये रामायणतिलके अयोध्याकांडे दशमः सर्गः ॥१०॥ तमिति ॥१॥ विप्रकृता क्रियया परा
भूता अवमानः शब्देन तिरस्कारः मे मम अभिप्रायो अभिप्रार्थनीयोस्ति त्वदेकसंपाद्यस्तं त्वया कृतं संपा
दितमिच्छामि ॥२॥ यदि त्वं कर्तुमिच्छसि मदभिप्रेतं तदा तद्विषयावश्यकर्तव्यतारूपां प्रतिज्ञां प्रतिजा ॥

परिपीडयितुं भूयो भर्तारमुपचक्रमे ॥४१॥ इत्यार्षे श्रीरामायणे अयोध्याकांडे दशमः सर्गः ॥१०॥
तं मन्मथशरैर्विद्धं कामवेगवशानुगं ॥ उवाच पृथिवीपालं कैकेयी दारुणं वचः ॥१॥ नास्मि
विप्रकृता देव केनचिन्नावमानिता ॥ अभिप्रायस्तु मे कश्चित्तमिच्छामि त्वया कृतं ॥२॥ प्रति
ज्ञां प्रतिजानीष्व यदि त्वं कर्तुमिच्छसि ॥ अथ तद्व्याहरिष्यामि यथाभिप्रार्थितं मया ॥३॥ तामु
वाच महाराजः कैकेयीमीषदुत्स्मयः ॥ कामी हस्तेन संगृह्य मूर्धजेषु सुविस्थितां ॥४॥ अव
लिप्ते न जानासि त्वत्तः प्रियतरो मम ॥ मनुजो मनुजव्याघ्राद्रामादन्यो न विद्यते ॥५॥

नीष्व कुरु ॥ अथानंतरं मयाभिप्रेतं स्वप्रार्थितं यथा यत्प्रकारं वस्तु तथा वक्ष्यामीत्यर्थः ॥३॥ आज्ञाकारिणि
मयि शपथाकांक्षा वृथेत्युत्स्मयः मूर्धजेषु संगृह्य शिरोंके कृत्वेति यावत् ॥४॥ स्त्रीणां मध्ये त्वत्तः पुंसां
मध्ये रामादन्य इति योज्यं यद्वा रामादन्यस्त्वत्तोधिकः प्रियतरो नेत्यर्थः रामेऽस्याद्वेषमजानंतः ए
वमुक्ति रामात्त्वत्तोधिकः प्रिय इत्याशयः ॥५॥

आत्मनोजीवितेनहेतुनापितेकंचिदभिप्रायंतद्विषयंव्याहर्तुंवोत्सहेनोमनसियत्स्मितंतद्विषयेइच्छास्तितद्वदि
आत्मनिस्वस्मिन्बलंमत्प्रेमरूपंजानंतीअयंमदुक्तंकरिष्यतिनवेतिमांशंकितुंनार्हसि ॥३४॥३५ सुकृते
नापिसुपुण्येनापितेतवशापथंददामि।यदित्वदुक्तंनकुर्यांतर्हिसर्वसुकृतंमेव्यर्थेतिशपथंददामीत्यर्थः

अहंचहिमदीयाश्चसर्वेतववशानुगाः॥नतेकंचिदभिप्रायंव्याहर्तुमहमुत्सहे॥३४॥आत्मनोजी
वितेनापिब्रूहियन्मनसिस्थितं॥बलमात्मनिजानंतीनमांशंकितुमर्हसि॥३५॥करिष्यामि
तवप्रीतिंसुकृतेनापितेशपे॥यावदावर्ततेचक्रंतावतीमेवसुंधरा॥३६॥द्राविडाःसिंधुसौ
वीराःसौराष्ट्रादक्षिणापथाः॥वंगांगमगधामत्स्याःसमृद्धाःकाशिकोसलाः॥३७॥तत्रजातंब
हुद्रव्यंधनधान्यमजाविकं॥ततोवृणीष्वकैकेयियद्यत्त्वंमनसेच्छसि॥३८॥किमायासेनते
भीरुउत्तिष्ठोत्तिष्ठशोभने॥तत्वंमेब्रूहिकैकेयियतस्तेभयमागतं॥३९॥तत्तेव्यपनयिष्यामि
नीहारमिवरश्मिवान्॥तथोक्तासासमाश्वस्तावक्तुकामानदप्रियं॥४०॥

आथात्मनिदुष्करसंपा
दनसामर्थ्यंदर्शयति।यावदिति।चक्रंसूर्यमंडलं।आवर्त्ततेप्रकाशयति।तावतीसर्वापिवसुं
धरामेमदधीना॥३६॥द्राविडसिंध्वादयोदेशाःसर्वेमदधीनाएव॥३७॥अतःस्तत्रेत्यादि।तत्रजा
तंद्रव्यमपिमदधीनमेव॥३८॥३९॥रश्मिवान्सूर्यः॥४०॥ ॥ ॥

तदर्थमनाः तस्मिन्निजाभिमतेर्थे मनो यस्याः सा· तदभिप्रायं स्वाभिमतार्थसंपादनाभिप्रायमागतं प्राप्तविषयं ज्ञा
त्वा निर्माध्यस्थ्यात्· माध्यस्थ्याभावमवलंब्य ल्यप्लोपो ऽव्ययीभावात्पंचमी· स्वपुत्रपक्षपातेनेति यावत्·
हर्षात्·। राज्ञः स्ववशत्वदर्शनजात्· दुर्वचं शत्रुभिरपि वक्तुमशक्यं ॥११॥ तेन वाक्येन· त्रिवाचा रामश
पथपूर्वकस्ववचनक्रियावाक्येन· अभ्यागतमंतकमिव घोरं राज्ञः प्राणहरं तमात्मनो ऽभिप्रायं व्याः

सा तदर्थमना देवी तमभिप्रायमागतं॥ निर्माध्यस्थ्याच्च हर्षाच्च बभाषे दुर्वचं वचः॥११॥ तेन
वाक्येन संहृष्टा तमभिप्रायमात्मनः॥ व्याजहार महाघोरमभ्यागतमिवांतकं॥१२॥ यथाक्र
मेण शपसे वरं मम ददासि च॥ तच्छृण्वंतु त्रयस्त्रिंशद्देवाः सेंद्रपुरोगमाः॥ चंद्रादित्यौ न
भश्चैव ग्रहा रात्र्यहनी दिशः॥ जगच्च पृथिवी चेयं सगंधर्वाः सराक्षसाः॥१४॥ निशाचराणि भू
तानि गृहेषु गृहदेवताः॥ यानि चान्यानि भूतानि जानीयुर्भाषितं तव॥१५॥ सत्यसंधो महातेजा
धर्मज्ञः सत्यवाक् शुचिः॥ वरं मम ददात्येष सर्वे शृण्वंतु देवताः॥१६॥ ॥

जहार व्याहर्तुं निश्चितवती॥१२॥ राजप्रतिज्ञाया दुष्करार्थविषयत्वेन वैपरीत्यमाशंक्य तां प्रतिज्ञामशेष
साक्षीकरणेन स्थिरयति· यथाक्रमेणेति· अतिप्रियपुत्रसुकृतादिक्रमेण शपसि शपथं करोषि
तत्पूर्वकं वरं च मम ददासि दातुं निश्चितवानसि· तच्छृण्वंत्विति वाक्यं ॥१३॥ जगत्परोक्षस्वर्गादिभुवनं दे
वता पृथिवी प्रत्यक्षभुवनदेवता॥१४॥१५॥ सर्वे देवताः देवाः देवतानि वा पुंसीति कोशः ॥१६॥

तदाहतेनेति· त्वत्तोपिप्रियतरेणेत्यर्थः अतएवसुखेनअजयेन अरीणामशक्यजयेन· जीवनार्हेण· मज्जीवनसाध
नीभूतेन· अनेनपरमप्रियत्वंदर्शयति· शपेशपथेनत्वदभिप्रेतकर्तव्यताविषयंस्वाभिप्रायंज्ञापयेतितुभ्यं
द्ध॥भावार्थंसूचयन्परमप्रियत्वमेवदर्शयति·।यमिति·।अनेनतद्विषयकदुःखप्रार्थनानकार्येतिसूचय
ति· वचनंक्रियात्वद्वचनकरणंप्रति॥७॥आत्मनास्वेन अन्यैः आत्मजैःपुत्रैरपियंरामेण असमंजानेसर्वतो

तेनैंजय्येनमुख्येनराघवेणमहात्मना॥शपेतेजीवनार्हेणब्रूहियन्मनसेप्सितं॥६॥यंमुहूर्त्तम
पश्यंस्तुनजीवेयमहंध्रुवं॥तेनरामेणकैकेयिशपेतेवचनक्रियां॥७॥आत्मनाचात्मजैश्चा
न्यैर्वृणेयंमनुजर्षभं॥तेनरामेणकैकेयिशपेतेवचनक्रियां॥८॥भद्रेहृदयमप्येतदनुमृश्यो
द्धरस्वमे॥एतत्समीक्ष्यकैकेयिब्रूहियत्साधुमन्यसे॥९॥बलमात्मनिपश्यंतीनविशंकितुमर्हसि
करिष्यामितवप्रीतिंसुकृतेनापितेशपे॥१०॥

धिक्कंप्रियंजानेइतियावत्।६।यन्मनसाध्यायतितन्
द्वाचावदतीत्युक्तेर्वागिवत्वद्धृदयमपित्वद्वचनानुष्ठानप्रवणं अनुमृश्यविचार्यस्वाभीष्टकथनेनमाम
स्मात्दुःखादुद्धर· एतत्रामस्यातिप्रियतमत्वंसमीक्ष्ययत्साधुमन्यसेतत्ब्रूहि· त्वमेवयुक्तंविचार्यवदममतु
त्वद्वचनमात्रंकर्तव्यमेवेत्याशयः॥९॥अत्रशंकानकार्येत्याह·।बलमिति· यत्प्रेमरूपं·।तथात्वयिमेप्रेमास्तियेन
त्वदुक्तंनकुर्यामित्यसंभावितंसर्वथातवप्रीतिंप्रीतिविषयंकरिष्यामियद्यन्यथयेदंतदामेधर्मोनफलदोभवेदितिभावः॥१०॥

रामा-अ-
२७

वक्ष्यामिममदातयौवराज्यमितिविभज्यवक्ष्यामि।तदुचअाह-अभिषेकेति।२४।यः कल्पितोनेनेतिया
जना।२५।२६।२७।दत्तमेववराणोनत्वपूर्वंनत्युत्तमर्णोनाधमर्णणात्स्वार्थग्रहणोतस्यपीडाभवतीतिक॥

नीतावदहमद्यैववक्ष्यामिश्रणुमेवचः॥अभिषेकसमारंभोराघवस्योपकल्पितः॥२४॥अ
नेनैवाभिषेकेणभरतोमेभिषिच्यतां॥यो हितीयोवरोदेवदत्तःप्रीतेनमेत्वया॥२५॥तदादे
वासुरेयुद्धेतस्यकालोयमागतः॥नवपंचचवर्षाणिदंडकारण्यमाश्रितः॥२६॥चीराजिनध
रोधीरोरामोभवतुतापसः॥भरतोभजतामद्ययौवराज्यमकंटकं॥२७॥एषमेपरमःकामोद
त्तमेवंवरंवृणे॥अद्यचैवहिपश्येयंप्रयांतंराघवंवने॥२८॥सराजराजोभवसत्यसंगरःकु
लंचशीलंचहिजन्मरक्षच॥परत्रवासेहिवदंत्यनुत्तमंतपोधनाःसत्यवचोहितंनृणां॥२९॥
इत्यार्षेश्रीरामायणेअयो० एकादशःसर्गः॥११॥ ॥ राम ॥ ॥

३७

त्रिदोषः॥अद्यचैवेत्यनेनकालविलंबोनिराकृतः॥२८॥ सत्यसंगरःसत्यवचाःसंपूर्वात्गिरतेःक
थनार्थात्कर्मण्यप्रत्ययेनैवहेतुनाकुलादिकंरक्षः॥जन्मात्रभावि।तदेवाह-परत्रेति॥२९॥इतिश्री
रामाभिरामेश्रीरामीयेरामायणतिलके अयोध्याकांडेएकादशःसर्गः॥११॥ ॥

राम
२७

परिगत्यपरिनिवर्तनान्निवर्त्य॥अभिशस्यसत्यसंधइत्यादिना-स्वकार्यस्थैर्यायस्त्कत्वाच॥१७॥तद्वाक्यमाह-स्मरेत्या
दि-तत्तरात्रियुद्धेशत्रुःशं बरः तवजीवितमंतरा प्राणां विनात्वामच्यावयत्-प्रच्युतवीर्यमकरोत्-अडभा
वश्चार्षः॥१८॥जाग्रत्यामयायत्-यतः स्त्वंसमभिरक्षितः।ततःस्वजीवनायय्यतमानायाममभवान्वरौप्र

इतिदेवीमद्देषासंपरिगत्याभिशस्यच॥ततःपरमुवाचेदंवरदंकाममोहितं॥१७॥स्मरराज
न्सुरावृत्तंतस्मिन्देवासुरेरणे॥तत्रत्वांच्यावयच्छत्रुस्तवजीवितमंतरा॥१८॥तत्रचापिमया
देवयत्वंसमभिरक्षितः॥जाग्रत्यायतमानायास्ततोमेप्रददौवरौ॥१९॥तौदत्तौचवरौदेवनिक्षेपौ
मृगयाम्यहं॥तथैवपृथिवीपालसकाशेरघुनंदन॥२०॥तत्प्रतिश्रुत्यधर्मेणनचेद्दास्यसिमेवरं
अद्यैवहिप्रहास्यामिजीवितंत्वद्विमानिता॥२१॥वाङ्मात्रेणतदाराजाकैकेय्यास्ववशंकृतः।
प्रचस्कंदविनाशायपाशंमृगइवात्मनः॥२२॥ततःपरमुवाचेदंवरदंकाममोहितं।वरौदयौ
त्वयादेवतदादत्तौमहीपते॥२३॥

ददौ॥१९॥तौवरौतवैवसकाशेनिक्षेपभूतौत्वय्येवस्थापितौइदानींत्व
यादत्तौस्वीकर्तुंमृगयामि-अन्वेषयामि॥२०॥धर्मेणप्रतिश्रुत्यधर्मशपथपूर्वकंदानप्रतिज्ञांकृत्वा॥२१॥कै
केय्यास्वसौंदर्यनिमित्तकाममोहेनस्ववशेकृत्वाराजावाङ्मात्रेणपूर्वकालिकवरदानप्रतिवचनमात्रेणस्ववि
नाशायमृगइवतत्प्रतिवचनदानरूपंपाशंप्रचस्कंदप्रगतवान्-प्रकृत्यादित्वात्प्रातिपदिकार्थेपित्ततीया-वा
ङ्मात्रेनेति॥२२॥२३॥

मंडले यंत्रमंडले मंत्रकृते॰ अहो धिगिति वाचमुक्त्वा भूयः पुनर्मोहमापेदिवान्॥५॥६॥ तेजसा दुःखजेन निर्द
हन्निव ज्वलन्निव॰ अनेन मम गदुःखशमन स्य व्याघ्रीदंडेनेव कैकेयीदंडेन स्व दुःखशमनस्याशक्य
ताद्धन्य पते॰ नृशंसे॰ क्रूरे॰ दुष्टचारित्रे दुष्टव्यापारे॥७॥ पापमनिष्टं॰ पापे पापमते॰ वृत्तिं प्रभुत्रू षां॰ वह

मंडले पन्नगो रुद्धो मंत्रैरिव महाविषः॥ अहो धिगिति सामर्षो वाचमुक्त्वा नराधिपः॥५॥ मोह
मापेदिवान्भूयः शोकोपहतचेतनः॥ चिरेण तु नृपः संज्ञां प्रतिलभ्य सुदुःखितः॥६॥ कैकेयीम
ब्रवीत्क्रुद्धो निर्दहन्निव तेजसा॥ नृशंसे दुष्टचारित्रे कुलस्यास्य विनाशिनि॥७॥ किं कृतं त
व रामेण पापे पापं मया पि वा॥ यदा ते जननीतुल्यां वृत्तिं वहति राघवः॥८॥ तस्यैवं त्वमन
र्थाय किन्निमित्तमिहोद्यता॥ त्वं मयात्मविनाशाय भवनं स्वं निवेशिता॥९॥ अविज्ञानान्नृ
पसुता व्याली तीक्ष्णविषा यथा॥ जीवलोको यदा सर्वो रामस्याह गुणास्तवं॥१०॥ अपराधं क
मुद्दिश्य त्यक्ष्यामीष्टमहं सुतं॥ कौसल्यां च सुमित्रां च त्यजेयमपि वा श्रियं॥११॥ जीवितं चात्म
ना रामं न त्वेव पितृवत्सलं॥ परा भवति मे प्रीतिर्दृष्ट्वा तनयमग्रजं॥१२॥ ॥

तिकरोति॥८॥ तस्यानर्थचिंतानर्हस्य एवमनर्थाय उक्तानर्थाय॰ किंनिमित्तं केन निमित्तेन॰ अयं स्व
कृतएवानर्थ इत्याह॰ त्वमिति॥९॥ अविज्ञानात्॰ इष्टसाधनत्वभ्रांत्या यदा यतः॥१०॥ उद्दिश्य व्याजीकृ
त्य त्यक्ष्यामि॰ श्रियं राज्यं॥११॥ आत्मना॰ स्वव्यापारेण जीवितं त्यजे न साधनं॰ रामं न त्वेव त्यजेयं॰ परा उत्कृष्टा
॥१२

दारुणं वज्रपाततुल्यं श्रुतार्थस्य वास्तवत्वासंभावनया भ्रमइत्येव निश्चित्य · किं दोषजोयं भ्रमइति चिंतां प्रपेदे ·॥ यु
क्त्या भ्रमत्वज्ञानेपि तदधिष्ठानापरोक्षं यावत् ॥ अहिभ्रमादेस्तत्कार्यभयादिकारितायादर्शनात्प्रतताप च ॥१॥ अ
थ भ्रमत्वनिश्चयात्पन्नतापो भ्रमहेतुत्वं चिंतयति ॥ स्वाप्नार्थस्य स्वक्रियाकरणासामर्थ्यात् भ्रमविषयत्वं ॥
स्वप्नदृष्टोयमर्थो मिथ्यैव न कदापि भावीति भावः स्वप्नोपि कदाचित्संवादीत्यतो दिवेति दिवास्वप्नो न कदा

ततः श्रुत्वा महाराजः कैकेय्या दारुणं वचः ॥ चिंतामभिसमापेदे मुहूर्तं प्रततापच ॥१॥ किन्नु मेयं
दिवास्वप्नश्चित्तमोहोपि वा मम ॥ अनुभूतोपसर्गो वा मनसो वाप्युपद्रवः ॥२॥ इति संचिंत्य तद्रा
जा नाध्यगच्छत्तदासुखं ॥ प्रतिलभ्य ततः संज्ञां कैकेयीवाक्यतापितः ॥३॥ व्यथितो विक्लवश्चैव
व्याघ्रीं दृष्ट्वा यथा मृगः ॥ असंवृतायामासीनो जगत्यां दीर्घमुच्छ्वसन् ॥४॥

पि संवादीति भावः अपि वा
अथवा मम जाग्रत्यपि दुरदृष्टजचित्तमोहो वैचित्यापरपर्यायः वस्तुतत्त्वज्ञानासामर्थ्य · अनुपश्चात् जात
सभास्थितिपर्यंतमस्तत्वात् भूतोपसर्गो वा · ग्रहाविशजश्चित्तवैकल्यं वा · यद्वा नुभूतोपसर्गोनुभूतनाशः सुषु
प्तिरित्यर्थ इति तन्न सुषुप्तौ ज्ञानाभावात् । मनस उपद्रवो वा · आधिव्याधिजनितोपप्लवो वा ॥२॥ राजा इति संचिं
त्य तत् भ्रमकारणं · नाध्यगच्छत् · अतस्तदाऽसुखं मूर्छाकरं महत् दुःखं चाध्यगच्छत् · ततः संज्ञां स्मृतिं लब्ध्वा
कैकेयीवाक्यस्मरणात्तापितः ॥३॥ अत एव व्यथितत्वादिगुणविशिष्टः विक्लवो दीनः ॥४॥

यतस्तत् रामाभिषेचनं श्रुत्वा इदानीं शोकसंतप्तासि मां च वरनिर्बंधनेन ततो निवारयंती भृशं तापयसि अ
तो मया स्वसेवाकारणाय मद्वचनार्थं एवं ते रामसाधुत्ववादद्रूपाशयः॥ अथवा एवंविधचिंतापि महा
कुलजायां त्वयि असंभाविते वा किं तर्हीदं तत्राह स्वस्त्र्येगृहे भर्त्रादिभिरविश्वासि तत्तुल्येन वा केन
चिदावेशितदुष्टमतिरसि अतः परवशंगता एवं वदसीत्यर्थः॥१८॥ तदेवाह इक्ष्वाकूणामिति यच्च

तच्छ्रुत्वा शोकसंतप्ता संतापयसि मां भृशं॥ आविश्यासि गृहे स्वस्त्र्ये सा त्वं परवशंगता॥१८॥ इक्ष्वा
कूणां कुले देवि संप्राप्तः सुमहानयं॥ अनयो नयसंपन्ने यत्र ते विकृता मतिः॥१९॥ नहि किं
चिदयुक्तं वा विप्रियं वा पुरा मम॥ अकरोस्त्वं विशालाक्षि तेन न श्रद्दधामि ते॥२०॥ ननु ते राघ
वस्तुल्यो भरतेन महात्मना॥ बहुशो हि स्म बाले त्वं कथाः कथयसे मम॥२१॥ तस्य धर्मात्मनो
देवि वनेवासं यशस्वि[illegible]नः॥ कथं रोचयसे भीरु नव वर्षाणि पंच च॥२२॥ राम

इक्ष्वाकुकुले महानयं अनयः ज्येष्ठाभिषेकनिवृत्तिरूपः संप्राप्तः हे नयसंपन्ने यत्रानये ते तव विकृ
ता मतिः कारणमिति शेषः॥ अतस्त्वं ग्रहाविष्टेति भावः॥१९॥ न त्वनाविष्टैवाहं वदामि नेत्याह नही
ति न श्रद्दधामि अस्यानयस्यानाविष्टत्वबुद्धिकृतत्वमिति शेषः॥२०॥ तदेवोपपादयति नन्विति
आमंत्रणे एतत्कथयसे वर्तमानसामीप्ये लट् अनेन यामात्पूर्वं तथा कथनं ध्वन्यते॥२१॥ तस्य
भरततुल्यप्रियस्य॥२२॥

रामा॰ अ॰
३९

३७

रामः
३९

चेतनंचैतन्यं॥१३॥यतोमद्विनाशेवैधव्यप्राप्तिस्ततस्मादेवनिश्चयोरामविवासनरूपस्त्यज्यतां॥१४॥अ
पितेचरणाविति धर्मशास्त्रतोत्यन्तुचितमपि॥कामशास्त्रमर्यादयात्वत्प्रीत्यर्थमितिशेषः॥१५॥अथेत्यादि
अथवाभरतस्यप्रियाप्रियविषयेमांत्वंजिज्ञाससे॥भरतोराज्ञःप्रियोनवेतितदासक्तराघवंभरतंप्रतिय

अपश्यतस्तमेरामंनष्टंभवतिचेतनं॥तिष्ठेल्लोकोविनासूर्यंसस्यंवासलिलंविना॥१३॥नतुरा
मंविनादेहेतिष्ठेत्तुममजीवितं॥तदलंत्यज्यतामेषनिश्चयःपापनिश्चये॥१४॥अपितेचरणौ
मूर्ध्नास्पृशाम्येषप्रसीदमे॥किमर्थंचिंतितंपापेत्वयापरमदारुणं॥१५॥अथजिज्ञाससेमांत्वंभर
तस्यप्रियाप्रिये॥अस्तुयत्तत्वयापूर्वंव्याहृतंराघवंप्रति॥१६॥सम्मेज्येष्ठसुतःश्रीमान्धर्म
ज्येष्ठइतीवमे॥तत्वयाप्रियवादिन्यासेवार्थंकथितंभवेत्॥१७॥ श्रीरुक्मशरणागत

त्वयाव्याहृतंतत्सर्वंभरतस्य।रामविवासनंत्वयोगपमेवेतिशेषः त्वयापिपूर्वंतस्यबहुशोगुणानांकथ
नादित्याशयः॥१६॥इतीवः इत्येतत्प्रकारं।यत्त्वयाकथितंपूर्वंतन्ममद्वित्तावर्जनेनसेवार्थमेव मयास्व
सेवाकरणार्थमेवभवेदितिवितर्कः संप्रत्यन्यथोक्तेरितिभावः॥१७॥ ॥

रामा॰ अ॰
४०

40

सत्यं सत्यवचः दानं पारलौकिकं त्यागः ऐहिकप्रयोजनं दानं मित्रता सत्सु शौचं बाह्यांतरशुद्धिः आर्जवं वंचनाराहित्यं ॥३०॥ पापं वनवासरूपं स्वस्य पापजनकं आशंससे प्रार्थयसे शमदमादिसंपत्या महर्षिसमतेजस्त्वं ॥३१॥ लोकस्य लोकं प्रति प्रियवादिनः स्वस्य कं प्रत्यप्युक्तमप्रियं वाक्यं न स्मरामि सोहं

सत्यं दानं तपस्त्यागो मित्रता शौचमार्जवं ॥ विद्या च गुरुशुश्रूषा ध्रुवाण्येतानि राघवे ॥३०॥ तस्मिन्नार्जवसंपन्ने देवि देवोपमे कथं ॥ पापमाशंससे रामे महर्षिसमतेजसि ॥३१॥ न स्मराम्यप्रियं वाक्यं लोकस्य प्रियवादिनः ॥ स कथं त्वत्कृते रामं वक्ष्यामि प्रियमप्रियं ॥३२॥ क्षमा यस्मिंस्तपस्त्यागः सत्यं धर्मः कृतज्ञता ॥ अप्यहिंसा च भूतानां तमृते का गतिर्मम ॥३३॥ मम वृद्धस्य कैकेयि गतांतस्य तपस्विनः ॥ दीनं लालप्यमानस्य कारुण्यं कर्तुमर्हसि ॥३४॥ पृथिव्यां सागरांतायां यत्किंचिदधिगम्यते ॥ तत्सर्वं तव दास्यामि मा च त्वं मन्युमाविश ॥३५॥ अंजलिं कुर्मि कैकेयि पादौ चापि स्पृशामि ते ॥ शरणं भव रामस्य माधर्मो मामिह स्पृशेत् ॥३६॥

त्वत्कृते त्वद्वचनक्रियासंपादननिमित्तं प्रियं राममप्रियं कथं वक्ष्यामीति संबंधः ॥ प्रियवादिनो रामस्य त्वत्कर्तृकं तद्विषयकं वेत्यर्थ इति केचित् ॥३२॥३३॥ गतांतस्य प्राप्तचरमकालस्य तपस्विनः शोचनीयावस्थस्य दीनस्य कारुण्यं दयां ॥३४॥ मन्युं मन्युसंपादकानिष्टाभिनिवेशं ॥३५॥ कुर्मि करोमि शरणं रक्षिका अधर्मो ज्येष्ठातिक्रमेण कनीयसोभिषेककृतः निरपराधस्य त्यागकृतश्च ॥३६॥

राम
४०

२३॥२४॥शुश्रूषते सेवते तस्मात् ज्ञामाङ्ज्ञाभक्रियमाणगौरवाद्भरतस्य त्वयि विशेषं अधिकं गौरवं न लक्षये॥२५
शुश्रूषां सेवां॥गौरवं बहुमानं प्रमाणं प्रतिपत्तिः॥प्रामाण्यबुद्धिरित्यर्थः वचनक्रिया उक्तकरणं पुरुषर्षभा
ज्ञामात्॥२६॥बहूनां स्त्रीसहस्राणां मध्ये एकयापि कृतः॥परिवादोऽकार्यकरणनिमित्तं समूलमयशः॥

अत्यंतसुकुमारस्य तस्य धर्मैककृतात्मनः॥कथं रोचयसे वासमरण्ये भृशदारुणे॥२३॥रोचयस्य
भिरामस्य रामस्य शुभलोचने॥तव शुश्रूषमाणस्य किमर्थं विप्रवासनं॥२४॥रामो हि भरताद्भू
यस्तव शुश्रूषते सदा॥विशेषं त्वयि तस्मात्तु भरतस्य न लक्षये॥२५॥शुश्रूषां गौरवं चैव प्रमाणं
वचनक्रियां॥कस्त्भूयस्तरं कुर्यादन्यत्र पुरुषर्षभात्॥२६॥बहूनां स्त्रीसहस्राणां बहूनां चो
पजीविनां॥परिवादोपवादो वा राघवे नोपपद्यते॥२७॥सांत्वयन्सर्वभूतानि रामः शुद्धेन चे
तसा॥गृह्णाति मनुजव्याघ्रः प्रियैर्विषयवासिनः॥२८॥सत्येन लोकान्जयति द्विजान्दा
नेन राघवः॥गुरूञ्छुश्रूषया वीरो धनुषा युधि शात्रवान्॥२९॥ ॥ राम ॥

उपजीविनां मध्ये एकेनापि कथितोपवादः असत्याकल्पितं निर्मूलमयशो राघवे नोपपद्यते
न विद्यते॥२७॥कुतस्तत्राह॥सांत्वयन्निति॥प्रियै रिष्टसंपादनैर्गृह्णाति वशीकरोति॥२८॥ज
यति॥जयोत्र स्वाधीनत्वकरणं॥२९॥

प्रतिज्ञाया अपालनस्याधर्मत्वं बोधयंती ॥ पूर्वेषां दुःकरप्रतिज्ञापालनं दर्शयति॰ शैब्य इति॰ अत्रेयं कथा॰ इंद्राग्नी श्येनकपोतरूपौ शैब्यस्यौदार्यजिज्ञासया भक्ष्यभक्षकभावापन्नौ शैब्यसमीपगतौ ततः कपोतो भयार्थी व्याकंपन् विवेश तस्मै च सोऽभयं ददौ ततः श्येनेन मत्भक्ष्यं देवविहितं त्यजेत्युक्ते नाहं तं त्यजेयं अपि तु त॰। त्प्रतिनिधिभूतं स्वमांसमेव ददामीत्युक्त्वा सर्वस्वमांसं श्येनाय दत्तवानिति ॥ अलर्कश्च राजर्षिर्ब्राह्मणा

शैब्यः श्येनकपोतीये स्वमांसं पक्षिणे ददौ ॥ अलर्कश्चक्षुषी दत्वा जगाम गतिमुत्तमां ॥ ४३ ॥
सागरः समयं कृत्वा न वेलामतिवर्तते ॥ समयं मानृतं कार्षीः पूर्ववृत्तमनुस्मरन् ॥ ४४ ॥
स त्वं धर्मं परित्यज्य रामं राज्येऽभिषिच्य च ॥ सह कौसल्यया नित्यं रंतुमिच्छसि दुर्मते ॥ ४५ ॥
भवत्वधर्मो धर्मो वा सत्यं वा यदि वानृतं ॥ यत्वयासंश्रुतं मह्यं तस्य नास्ति व्यतिक्रमः ॥ ४६ ॥

यांधायवरं प्रतिश्रुत्य तेन राजन् चक्षुषा स्वचक्षुः संधानरूपे वरे उक्ते स्वचक्षुषी दत्तवानिति ॥ ४३ ॥ सागरः समुद्रो वेलाऽनतिलंघनाय देवैः प्रार्थितस्तेभ्यस्तत्प्रतिश्रुत्य न वेलामतिवर्त्तते॰ एवं पूर्वेषां शैव्यादीनां वृत्तं स्मरन्॰ समयं प्रतिज्ञामनृतां मा कार्षीः ॥ ४४ ॥ ४५ ॥ सिद्धांतमाह॰ भवत्विति॰ मदुक्तो रामविवासनपूर्वको भरताभिषेको धर्मो वा अधर्मो वा भवतु॰ नन्वियं रत्यर्थं मिथ्यैव मे प्रतिज्ञा तत्काले मिथ्यावचनस्य शास्त्रानुमतत्वादिति चेत्तत्राह॰ ॥ त्वयायन्मह्यं सत्यमनृतं वा संश्रुतं प्रतिज्ञातं तस्य व्यतिक्रमो करणं नास्ति ॥ ४६ ॥

41

ऋचेतनंमूर्छामापन्नं घूर्णमानंघूर्णमानशरीरं ॥३७॥ पारंनिस्तारं प्रलपंतंप्रार्थयंतं रौद्रतरंदारुणतरं ॥३८॥ प्रत्यनु
तप्स्यसेउक्तकरणाशंक्या कथयिष्यसिलोकेरितिशेषः स्वार्थापंतान्हेतुमेणी रूपं ॥३९॥ यदाबहवोमिलिताराज
र्षयस्त्वयासहमद्विषयवरदानादिविषयगोष्ठींकरिष्यंतितत्रतत्प्रश्नेकिंप्रतिवक्ष्यतिकिमुत्तरंकरिष्यसि

इतिदुःखाभिसंतप्तंविलपंतमचेतनं ॥ घूर्णमाणंमहाराजंशोकेनसममभिप्लुतं ॥३७॥ पारंशोकार्ण
वस्याशुप्रलपंतंपुनः पुनः ॥ प्रत्यवाचाथकैकेयीरौद्रारौद्रतरंवचः ॥३८॥ यदिदत्वावरौराजन्पु
नःप्रत्यनुतप्यसे ॥ धार्मिकत्वंकथंवीरपृथिव्यांकथयिष्यसि ॥३९॥ यदासमेताबहवस्त्वयाराजर्ष
यःसह ॥ कथयिष्यंतिधर्मज्ञतत्रांकिंप्रतिवक्ष्यसि ॥४०॥ यस्याःप्रसादेजीवामियाचमामभ्यपालयत् ॥
तस्याःकृतामयामिथ्याकैकेय्याइतिवक्ष्यसि ॥४१॥ किल्विषंत्वंनरेंद्राणांकरिष्यसिनराधिप यो
दत्वावरमद्यैवपुनरन्यानिभाषसे ॥४२॥

॥४०॥ न किंमप्युत्तरंशक्यमित्याह यस्याइति प्रसादे शं
बरमायानिवर्तनलक्षणानुग्रहेसति प्रयत्नेइतिपाठेरथापनयनादिप्रयत्नेइत्यर्थः यामाम
भ्यपालयत् शीतोपचारादिनारक्षत् मयामिथ्याकृताप्रतिज्ञेतिशेषः इतिवक्ष्यसि किमितिसोप
हासंवाक्यं ॥४१॥ नरेंद्राणांस्ववंशानांकिल्विषमयशोरूपं मालिन्यंकरिष्यसि तत्रहेतुर्यइत्यादियद्वं
श्यस्यईदृशः पापीतद्वंशाः सर्वेपीदृशाएवेतिवदिष्यंतिलोकाइति भावः ॥४२॥ ॥

विपरीतः सन्निपातादिना विपरीतप्रकृतिः॥ आतुरो व्याधिग्रस्तः हृततेजा मंत्रेणेतिशेषः॥५५॥ उपदेशिताउपदिष्टा॥५६॥ मां नलज्जसे पतिसमक्षमीदृशव्यवहारस्य लोकविगीतत्वात् शीलव्यसनं सद्वृत्तस्य विशेषेणाऽसनं त्यागः॥ अतएवेदानीं भर्तोपघातोन्मत्ता॥५७॥ बालायाइतिबालाया अपीत्यर्थकं पूर्वान्वयि तत्तुशी

नष्टचित्तो यथोन्मत्तो विपरीतो यथातुरः॥ हृततेजा यथा सर्पो बभूव जगतीपतिः॥५५॥ दीनयातुरया वाचा इति होवाच कैकयीं॥ अनर्थमिममर्थाभं केन त्वमुपदेशिता॥५६॥ भूतोपहतचित्तेव ब्रुवंती मां न लज्जसे॥ शीलव्यसनमेतत्ते नाभिजानाम्यहं पुरा॥५७॥ वालायास्त्वत्विदानींते लक्षये विपरीतवत्॥ कुतो वा ते भयं जातं या त्वमेवंविधं वरं॥५८॥ राष्ट्रे भरतमासीनं वृणीषे राघवं वने॥ विरमैतेन भावेन त्वमेतेनानृतेन च॥५९॥ यदि भर्तुः प्रियं कार्यं लोकस्य भरतस्य च॥ नृशंसे पापसंकल्पे क्षुद्रे दुष्कृतकारिणि॥६०॥

लंतु इदानीं प्रौढत्वावस्थायामपि विपरीतवत् विपरीतार्हं दुःशीलार्हं लक्षये कुतो निमित्तात् केन निमित्तेन रामादीदृशं भयं जातमित्यर्थः॥प वरमाह राष्ट्र इति॥ राष्ट्रे भरतमासीनं वने राघवमासीनं वृणीषे एतेन निर्वृतपातिव्रत्यलक्षणेन भावेनोपलक्षिता किंच एतेनाशक्यवरद्वारकेणानृतेन ममानृततासंपादकेन कर्मणोपलक्षिता त्वमेवं वराद्विरम॥५९॥ यदि भर्तुर्मम लोकस्य भरतस्य च प्रियं कार्यं कर्तव्यं तदा विरमेति संबंधः॥६०॥

विपक्षेवाधकमाह॥ अहमित्यादि॥ पश्यतःपश्यंतंत्वामनादृत्य॥४७॥ अंजलिंप्रतिगृह्णंतीराजमातृत्वेनसर्वेर्लोकानामि
तिशेषः नन्विति॥ निश्चयेनक्रियांसमुपाददेइतिपाठेपिमरिष्यामीत्येवफलति॥४८॥ तेतवसमीपेआत्मनाम्ना

अहंहिविषमद्यैवपीत्वाबहुतवाग्रतः॥ पश्यतस्तेमरिष्यामिरामोयद्यभिषिच्यते॥४७॥ एकाहमपि
पश्येयंयद्यहंराममातरं॥ अंजलिंप्रतिगृह्णंतींश्रेयोननुमतिर्मम॥४८॥ भरतेनात्मनाचाहंशपे
तेमनुजाधिप॥ यथानान्येनतुष्येयंऋतेरामविवासनात्॥४९॥ रातावदुक्त्वावचनंकैकेयी॥
विररामह॥ विलपंतंचराजानंनप्रतिव्याजहारसा॥५०॥ श्रुत्वातुराजाकैकेय्यावाक्यंपरम
शोभनं॥ रामस्यचवनेवासमैश्वर्यंभरतस्यच॥५१॥ नाभ्यभाषतकैकेयींमुहूर्त्तंव्याकुलेंद्रियः
प्रैक्षतानिमिषोदेवींप्रियामप्रियवादिनीं॥५२॥ तांहिवज्रसमांवाचमाकर्ण्यहृदयाप्रियं॥ दुः
खशोकमयींश्रुत्वाराजानसुखितोभवत्॥५३॥ सदेव्याव्यवसायंचघोरंचशपथंकृतं॥ ध्यात्वारा
मेतिनिश्वस्यछिन्नस्तरुरिवापतत्॥५४॥

एताभूतेनभरतेनशपे॥ तच्छपथपूर्वकंकथयामि॥ रा
मविवासनादृतेन्येनरत्नादिनानतुष्येइति॥४९॥५०॥ अशोभनंपरंरामवनवासभरतैश्वर्यविषयंवा
क्यंश्रुत्वेत्यन्वयः॥५१॥ प्रैक्षतकोपादितिशेषः॥५२॥५३॥ व्यवसायंरामविवासनविषयंनिश्चयंघोरं॥
शपथंभरतशपथरूपं॥ स्वकृतंरामसुकृतादिशपथंवा॥५४॥

परिष्वक्ष्यंति। हा राम इति प्रातरिति शेषः कैकेय्या वरार्थं क्लिश्यमानेन तत्क्लेश्यमानेन तां प्रति कृतप्रतिज्ञायाः सत्यत्व
रक्षणाय प्रव्राजित इत्युत्तरं लोको न ग्रहीष्यतीत्याह कैकेय्येति। पूर्वं दत्तेनेदानीं रामप्रव्राजनपरतया तदीप्र
करीकृतेन वरेण इति शेषः ॥६६॥ यदि यद्यपि तत्तथापि एतत् असत्यं भविष्यति। तस्यां कामहतस्त्वं इह च साप्र
व्राजितवानिति लोको वदिष्यतीति भावः ॥६७॥ किं चैनामिति। मया मत्पुत्रेण वा ते किमपराद्धं मिति यदा

परिष्वक्ष्यंति काकुत्स्थं वक्ष्यामीह कथं तदा। कैकेय्या क्लिश्यमानेन पुत्रः प्रव्राजितो मया ॥६६॥
यदि सत्यं ब्रवीम्येतत्तदसत्यं भविष्यति। किं मां वक्ष्यति कौसल्या राघवे वनमास्थिते ॥६७॥ किं
चैनां प्रतिवक्ष्यामि कृत्वा विप्रियमीदृशं। यदा यदा च कौसल्या दासीवच्च सखीव च ॥६८॥
भार्यावद्भगिनीवच्च मातृवच्चोपतिष्ठति। सततं प्रियकामा मे प्रियपुत्रा प्रियंवदा ॥६९॥

43

वक्ष्यतीति दैनां प्रति निरुत्तर एवेत्यर्थः। यदा यदा च यतो यतश्चेत्यर्थः दासीवदिति व्यवहारे सखीवद्रहस्य
कथने। भार्यावद्धर्माचरणे। भगिनीवद्धिताशंसने। मातृवद्भोजनदाने उपतिष्ठति सेवते। केचित्तु दा
सीवद्गृहकार्यकरणे। सखीवत्क्रीडायां। भार्यावदुक्तेष्वेव भगिनीवत्ज्ञानयोगानुष्ठाने। मातृवत्तत्वक
थने इत्याहुः। अत उत्तरमशक्यदानमिति बोध्यं। प्रियः पुत्रो यस्या मम सा उक्तप्रकारैः सत्कारार्हापि तव
कृते त्वद्धेमनस्यपरिहारायन सत्कृता तदिदानीं रामविवासनवरे त्वयोक्ते सति। यत्त्वयि मया सुकृतं शो

दुःखं तत्साधनं अलीकं अपराधं अयं तव क्लेशः सर्वो विषये व त्वदिष्टस्य भरताभिषेकस्यासिद्धेरित्याह नेति रामं विनाराज्यं नावसेत् अनेन चतुर्णामपि यथाभागं राज्यमनुमन्यस्व यद्वास्तु भरत एव राजा रामस्तु चक्षुष्यममसमीपे तिष्ठत्विति मन्यस्व नान्यथा त्वदिष्टसिद्धिरित्युपदेशः ॥६ १॥ तत्र हेतुः रामादपीति हियतस्तं भरतं रामादपि धर्मतो बलवत्तरं अतिशयेन धर्मवंतं मन्ये। भाषिते मयोक्ते सत्यपि त्वं कथं वक्ष्यसि तव तस्याति प्रि

किन्नु दुःखमलीकं वा मयि रामे च पश्यसि ॥ न कथंचिदृते रामाद्भरतो राज्यमावसेत् ॥६ १॥ रामादपि हितं मन्ये धर्मतो बलवत्तरं ॥ कथं वक्ष्यसि रामस्य वने गच्छेति भाषिते ॥६ २॥ मुखवर्णं विवर्णं तु यथैवेंदुमुपप्लुतं ॥ तां तु मे सुकृतां बुद्धिं सुहृद्भिः सह निश्चितां ॥६ ३॥ कथं द्रक्ष्याम्यपावृत्तां परैरिव हतां चमूं ॥ किं मां वक्ष्यंति राजानो नानादिग्भ्यः समागताः ॥६ ४॥ बालो बतायमैक्ष्वाकश्चिरं राज्यमकारयत् ॥ यदा हि बहवो वृद्धा गुणवंतो बहुश्रुताः ॥६ ५॥ श्रीराम

यत्वादिति भावः ॥६ २॥ उपप्लुतं इंदुं यथा तमिव ॥ विवर्णं मुखवर्णं मा दर्शा दौ कथं द्रक्ष्यामीति संबंधः ॥ किं च सुकृतां सम्यक्प्रवर्त्तितां तां बुद्धिं रामाभिषेकविषयां तत्र हेतुः सुहृद्भिः सह निश्चितां ॥ अपावृत्तां पराभूतां ॥ नानादिग्भ्यः समागता राजानः ॥६ ४॥ अयं बाल ऐक्ष्वाकः किं कथं राज्यमकारयत् ॥ अपालयदिति मां वक्ष्यंतीति योजना बतेति खेदे ॥६ ५॥

यद्यत्वं अनंतैः सांत्वैरीखवचनैः सांत्वयंतीयन्मां भाषसे नतत् गीतशब्देन मगं संरुध्यलुब्धइव मामवधीः ॥७७॥ पुत्रविक्रायकं पुत्रेणाम् ल्पेनस्त्रीसुखक्रेतारं ॥ अनार्यः पापीतिरथ्यासु विकरिष्यंति विगर्हयिष्यंति ॥७८॥ दुःखं कष्टं कष्टं कष्टं अहोकष्टमहोकष्टमितियावत् ।यत्रवर विषये रामविवासनवरविषयास्तव

अनंतैर्बतमां सांत्वैः सांत्वयंती स्म भाषसे ॥ गीतशब्देन संरुध्य लुब्धो मृगमिवावधीः ॥७७॥ अनार्य इति मामार्याः पुत्रविक्रायकं ध्रुवं ॥ विकरिष्यंति रथ्यासु सुरापं ब्राह्मणं यथा ॥७८॥ अहो दुःखमहो कृच्छ्रं यत्र वाचः क्षमे तव ॥ दुःखमेवंविधं प्राप्तं पुराकृतमिवाशुभं ॥७९॥ चिरं खलु मया पापे त्वं पापेनाभिरक्षिता ॥ अज्ञानादुपसंपन्ना रज्जुरुद्बंधनी यथा ॥८०॥ रममाणस्त्वया सार्धं मृत्युं त्वां नाभिलक्षये ॥ बालो रहसि हस्तेन कृष्णसर्पमिवास्पृशं ॥८१॥ तं तु मां जीवलोकोयं नूनमाक्रोष्टुमर्हति ॥ मयाप्यपितृकः पुत्रः स महात्मा दुरात्मना ॥८२॥ बालिशो बत कामात्मा राजा दशरथो भृशं ॥ स्त्रीकृते यः प्रियं पुत्रं वनं प्रस्थापयिष्यति ॥८३॥ ॥ ॥

वाचः क्षमे यतोनः पुराकृतमशुभमिव तत्फलमिव ।इवशब्दएवार्थे· एवंविधं अपरिहार्यत्वेनावश्यानुभाव्यं दुःखं प्राप्तमिति संबंधः ॥७९॥ पापेन मया उपसंपन्ना कंठसंलग्नासौ· ख्यायकृतं· त्वङ्गत्राणां स्वविनाशायपरिणतमित्याशयः ॥८०॥ बालइवेतियोजना ॥८१॥ तं त्वय्यनुरक्तं जीवतापि मया स महात्मा पुत्रोऽपिपितृकः पितृप्रयुक्तराज्यरहितः कृतोयतोतआक्रोष्टुं निंदितुं ॥८२॥ निंदाप्रकारमाह· बालिशइति· प्रस्थापयिष्यतीति उपलक्षणं· विक्रोशनिंदायाः ॥८३॥

44

७०॥ किमिव· आतुरं रुग्णं· अपथ्यव्यंजनोपेतंभुक्तमन्नंयथातपति पीडयति· रामस्यविप्रकारमभिषेकनिवृत्तिवन
स्यतदुद्देश्यकंसंप्रयाणंचप्रेक्ष्येत्यन्वयः॥७१॥राज्ञोनकिंचिदकर्तव्यमस्तीतिविचार्यस्वपुत्रविषयेममविश्वा
संनकरिष्यति·॥कृपणांकष्टं॥७२॥अप्रियद्वयमेवाह· मांचेति· मेमदर्थे· उपलक्षणमेतत् रामार्थंचशोचंती

नमयासत्कृतादेवीसत्कारार्हाकृतेतव॥इदानींतत्तपतिमांयन्मयासुकृतंत्वयि॥७०॥अपथ्य
व्यंजनोपेतंभुक्तमन्नमिवातुरं॥विप्रकारंचरामस्यसंप्रयाणंवनस्यच॥७१॥सुमित्राप्रेक्ष्यवैभी
ताकथंमेविश्वसिष्यति॥कृपणंबतवैदेहीश्रोष्यतिद्वयमप्रियं॥७२॥मांचमपंचत्वमापन्नंरा
मंचवनमाश्रितं॥वैदेहीबतमेप्राणान्शोचंतीक्षपयिष्यति॥७३॥हीनाहिमवतःपार्श्वेकिन्नरे
णेवकिन्नरी॥नहिराममहंदृष्ट्वाप्रवसंतंमहावने॥७४॥चिरंजीवितुमाशंसेरुदंतींचापिमैथि
लीं॥सानूनंविधवाराज्यंसपुत्राकारयिष्यसि॥७५॥सतींत्वामहमत्यंतंव्यवस्याम्यसतींसतीं॥रू
पिणींविषसंयुक्तांपीत्वेवमदिरांनरः॥७६॥

स्वस्यप्राणान्क्षपयिष्यति॥७३॥किंनरेणश्वशुरभूते
न·भर्तृभूतेनचतवमरणंकुतस्तत्राह·॥नहीति॥७४॥नूनंध्रुवं॥७५॥असतीमेवसतींपतिमारिकांत्वां·
नअसतीत्ववतीमेवसतींसर्वदाविद्यमानांसतीं·॥आपाततःसतींव्यवस्यामिनिश्चिनोमि·॥रूपिणींदृ
ष्टिप्रियांमदिरांपीत्वापश्चाद्विकारेणविषसंयुक्तांयथाजानातितथेत्यर्थः॥७६॥ ॥

त्वयाऽकुरतरथानिराकरणात्पुत्रो दास्यतीत्युक्तं॰ तेनतस्याः क्रौर्यातिशयो व्यंग्यः राज्ञः शोकातिशयपत्वाद्विसंस्थु
लवाक्यप्रयोगोनदोषाय॥८९॥पुत्राणांनरकवासोराज्यहान्याराज्ञ्याः राज्ञश्चशोकरूपपापमत्फमरणादि
त्याह॥९०॥मयारामेणत्यादिव्यंग्योक्तिः॥आकुलंक्षुभितं॥९१॥रामप्रव्रजनस्यभरतसंमतत्वसंभवेपुत्र

मयारामेणचत्यक्तंशाश्वतंसत्कृतंगुणैः॥इक्ष्वाकुकुलमक्षोभ्यमाकुलंपालयिष्यसि॥९१॥प्रियं
चेद्भरतस्यैतद्रामप्रव्राजनंभवेत्॥मास्ममेभरतःकार्षीत्प्रेतकृत्यंगतायुषः॥९२॥मृतेमयिगते
रामेवनंपुरुषपुंगवे॥सेदानींविधवाराज्यंसपुत्राकारयिष्यसि॥९३॥त्वंराजपुत्रिदैवेनन्यव
सोममवेश्मनि॥अकीर्तिश्चातुलालोकेध्रुवःपरिभवश्चमे॥९४॥सर्वभूतेषुचावज्ञायथापा
पकृतस्तथा॥कथंरथैर्विभुर्यात्वागजाश्वैश्चमुहुर्मुहुः॥पद्भ्यांरामोमहारण्येवत्सोमेविच
रिष्यति॥९५॥यस्यचाहारसमयेसूदाःकुंडलधारिणः॥अहंपूर्वाःपचंतिस्मप्रसन्नाःपानभो
जनं॥९६॥

एवंनेत्याशयेनाह प्रियंचेत्यादि॥९२॥९३॥राजपुत्रिदैवेनमामकदुरदृष्टवशेनममवेश्मनिन्यवसः
राजपुत्रीवादेनेतिपाठेराजपुत्रीव्यपदेशमात्रेणेत्यर्थः मेअकीर्तिः परोक्षापयशो त्राकीर्तिःमहाज
नसमक्षंधिक्कारःपरिभवःसर्वभूतेष्ववज्ञातुच्छत्वेनप्रतिपत्तिःयतोन्यवसेऽतएतत्सर्वंभविष्यतीति
शेषः॥९४॥कथमिति॥९५॥यस्यचेति॥९६॥

45

उपकर्शितः कार्श्यं प्रापितः कृच्छ्रं जराभ्युपेततया वने वासक्लेशं॥८४॥ द्वितीयं वचनं परिहाररूपं वचनं अलं समर्थः अहमिव धर्मयंत्रितत्वात्॥८५॥ यदि मे राघवः प्रतिकूलं कुर्यात्तन्मे प्रियं स्यादिति संबंधः॥८६॥ ततः किमत आह राघवे हीति अक्षमणीयं दुःसहं वृत्तं मत एव सर्वलोकस्य धिक्कृतं॥८७॥ शेषेऽवशिष्टे ममेष्टे

वेदैश्च ब्रह्मचर्यैश्च गुरुभिश्चोपकर्शितः। भोगकाले महत्कृच्छ्रं पुनरेव प्रपत्स्यते॥८४॥ नालं द्वितीयं वचनं पुत्रो मां प्रतिभाषितुं॥ स वनं प्रव्रजेत्युक्तो बाढमित्येव वक्ष्यति॥८५॥ यदि मे राघवः कुर्याद्वनं गच्छेति चोदितः॥ प्रतिकूलं प्रियं मे स्यान्न तु वत्सः करिष्यति॥८६॥ राघवे हि वनं प्राप्ते सर्वलोकस्य धिक्कृतं॥ मृत्युरक्षमणीयं मां नयिष्यति यमक्षयं॥८७॥ मृते मयि गते रामे वनं मनुजपुंगवे॥ इष्टे मम जने शेषे किं पापं प्रतिपत्स्यसे॥८८॥ कौसल्यां मां च रामं च पुत्रौ च यदि हास्यति॥ दुःखान्यसहती देवी मामेवानुगमिष्यति॥८९॥ कौसल्यां च सुमित्रां च मां च पुत्रैस्त्रिभिः सह॥ प्रक्षिप्य नरके सा त्वं कैकेयि सुखिता भव॥९०॥

कौसल्यादिरूपे जने किं पापं मनोवागगोचरं दुःखसाधनं प्रतिपत्स्यसे करिष्यसि॥८८॥ यदि कौसल्यां मां रामं च हास्यति ताभ्यां हीना भविष्यति। वा न सुमित्रा यदि पुत्रौ च चाङ्ग मं मां च। एतैर्यदि हीना भविष्यति तदा दुःखान्यसहती देवी कौशल्या सुमित्रा च मामेवानुमरिष्यति। लक्ष्मणस्य रामेण सह नियतं गमनात्। शत्रुघ्नस्य भरतानुयायित्वेपि अतीव त्वदनुरंजनं कुर्वतो रामस्यैव तस्या पि

राममरण्येवासरूपेव्यसनेनिमग्नंदृष्ट्वा कृत्स्नंजगत्कुपितंस्यात्विपरीतंस्यात् कोपप्रकारमाह कृतानुरागा पितरः पुत्रान्तादृशान्विभक्तिपरिणामेनात्रापितत्संबंधात्॥ बालान पित्यजेयुः रामेण सहगमनार्थं अपिनातादृशाः पुत्राःस्तादृशान्वृद्धान्तादृश्योपिभार्यास्तादृशान्पतीन् अपिनातादृशाःपतयोतादृशीर्भार्या अपित्यजेयुः एतेनजगदनर्थसाधनभाववत्तोपपादिता॥१०२॥स्वस्यरामंविनाजीवनव्यतिरेकं दर्शयिष्यन्तदन्वयेस्वजीवनान्वयंदर्शयति अहमिति।आवृजंतंमत्समीपेआगच्छंतमस्यपुत्रत्वेतिशेषः आगच्छंतंक्ष

परित्यजेयुःपितरोपिपुत्रान् भार्याःपतींश्चापिकृतानुरागाः॥कृत्स्नंहिसर्वंकुपितंजगत्स्याद्दृष्ट्वैवरामंव्यसनेनिमग्नं॥१०२॥अहंपुनर्देवकुमाररूपमलंकृतंतंसुतमावृजंतं॥नंदामिपश्यन्निवदर्शनेनभवामिदृष्ट्वैवपुनर्युवेव॥१०३॥विनाहिसूर्येणभवेत्प्रवृत्तिरवर्षतावज्रधरेणवापि॥रामंतुगच्छंतमितःसमीक्ष्यजीवेन्नकश्चित्त्वितिचेतनामे॥१०४॥

त्वादर्शनेनचक्षुषापश्यन्निवनंदामि श्रवणमात्रेणादर्शनजन्यंसुखमुक्तं दृष्ट्वैवदृष्ट्वातुपुनःचिरवृद्धोपिपुनर्युवेवत्वष्टपुष्टांतर्बहिः।परिकरोभवामि॥१०३॥हिरपीत्यर्थे सूर्येणविनापिलोकस्यप्रवृत्तिव्यवहारः स्यात् वज्रधरेण अवर्षतापिप्रवृत्तिर्लोकस्यजीवनंस्यात्॥वाइत्यथवा इंद्रेणस्वरूपसत्तापिविनापिप्रवृत्तिः भवेत्तरामंतुविनानकस्यापिजीवनमितिमेमतिः अंतर्यामिणं विनाकस्यापिव्यवहारस्यासिद्धेः एवंचस्वाजीवनंकैमुतिकन्यायसिद्धमितिभावः॥१०४॥ ॥

46

सकथमिति कषायादीनि कंदमूलनीत्यध्याहारः तद्रूपं वन्यमाहारं वर्तयिष्यति जीविष्यति ॥९७॥ महार्हेति ॥९८॥
कस्येति इदमेवंविधं दारुणं एतदुत्तरार्धरूपं रामस्यारण्यगमनमित्यादिवाक्यं वाक्यश्रवणं कस्यापीरितं अ
निर्वचनीयस्य मम दुष्कर्मणः फलमित्यर्थः ॥९९॥ कैकेयी दौर्जन्यं दृष्ट्वा राजा शोकेन स्त्रीमात्रं निंदति ॥ धि

सकथन्नु कषायाणि तिक्तानि कटुकानि च ॥ भक्षयन्वन्यमाहारं सुतो मे वर्तयिष्यति ॥९७॥ महा
र्हवस्त्रसंवृद्धो भूत्वा चिरसुखोचितः ॥ काषायपरिधानस्तु कथं रामो भविष्यति ॥९८॥ कस्येदं
दारुणं वाक्यमेवंविधमपीरितं ॥ रामस्यारण्यगमनं भरतस्याभिषेचनं ॥९९॥ धिगस्तु योषितो
नाम शठाः स्वार्थपरायणाः ॥ न ब्रवीमि स्त्रियः सर्वा भरतस्यैव मातरं ॥१००॥ अनर्थभावेऽर्थपरे न
शंसे ममानुतापाय निवेशितासि ॥ किमप्रियं पश्यसि मन्निमित्तं हितानुकारिण्यथवापि रामे ॥१०१॥

गिति निंद्यत्वमस्त्वित्यर्थः ॥ पुनः स्वाभाविकविवेके नाह नेति कौसल्यादीनां निंदानर्हत्वादिति भावः ॥१००॥
अनर्थे जगदनर्थसाधने भावो यस्याः अर्थपरे स्वार्थसाधनपरे ममानुतापाय मदनुतापार्थं निवेशितासि
निवेशितदुर्भावासि ईश्वरेणेति शेषः मन्निमित्तमिति बहुव्रीहिः रामे वा जगद्धितानुकारिणि किमप्रियं
तत्साधनं पश्यसीत्यर्थः ॥१०१॥

प्रताप्यग्लायस्व॰ प्रज्वलअग्निप्रवेशेन। प्राणशपविषेण॰ कुद्दालप्रहारैः सहस्रशः स्फुटितां कृतगर्तांवा
महीव्रज। अथापितेवचोनकरिष्येइतिसंबंधः॥१०९॥ असत्प्रियंवदा॰ मिथ्याप्रियभाषिणी॰ प्रदुष्टभा
वांदुष्टांतःकरणां॰ अतएव अमनोरमां॰ स्वबंधनंसप्राणां हृदयं दिधक्षमाणां त्वांजीवितुंजीवयि

प्रताप्यवाप्रज्वलवाप्राणशपवासहस्रशोवास्फुटितांमहींव्रज॥ननेकरिष्यामिवचःसु
दारुणांममाहितंकेकयराजपांसने॥१०९॥ क्रूरोपमांनित्यमसत्प्रियंवदांप्रदुष्टभावां
स्वकुलोपघातिनीं॥नजीवितुंत्वांविषहेमनोरमांदिधक्षमाणांहृदयंसबंधनं॥११०॥
नजीवितंमेस्तिकुतःपुनःसुखंविनात्मजेनात्मवतांकुतोरतिः॥ममाहितंदेविनक
र्तुमर्हसिस्पृशामिपादावपितेप्रसीदमे॥१११॥

47

तुंनविषहेनोत्सहे। नवनाशमेवाशासेइत्यर्थः॥ प्राणबंधनेहिसोम्यमनइतिछांदोग्यश्रुतिः॥११०
इंडवाक्यमुक्त्वापुनःसामाह-नेति॰ आत्मवतां॰ आत्मज्ञानां। अत्रापि॰॥ प्रूरणीयः यदेवमतो॰ ममे
त्यादि॥१११॥

किंचत्वामात्मनोमत्फमिवस्वगृहेहमावासयं किंचत्वंमहाविषासर्पीमयांकेनमोहात्तत्वेनाज्ञानात् धृतासितेनां कधरणेनाहंहतोस्मि ॥१०५॥ पुरंचराष्ट्रंचेत्यस्यप्रशास्त्वित्यनेनसहान्वयः । त्वंचबाधवांन् पतिपुत्रादीन्निह त्यममाहितानांशत्रुणामभिभाषणेशीलाभव । वार्ताकरणायोग्यबांधवाभावादितिभावः ॥ अभिहर्षिणीतिपा

विनाशकामामहितामभित्रामावासयंमत्फमिवात्मनस्त्वां ॥ चिरंबतांकेनधृतासिसर्पीमहा विषातेनहतोस्मिमोहात् ॥१०५॥ मयाचरामेणसलक्ष्मणेनप्रशास्तहीनोभरतस्त्वयासह पुरंचराष्ट्रंचनिहत्यबांधवान्ममाहितानांचभवाभिहर्षिणी ॥१०६॥ नृशंसवृत्तेव्यसनप्रहा रिणिप्रसत्यवाक्यंयदिहाद्यभाषसे ॥ ननामतेतेनमुखात्पतंत्यधोविशीर्यमाणादशनाःस हस्रधा ॥१०७॥ नकिंचिदाहाहितमप्रियंवचोनवेत्तिरामःपरुषाणिभाषितुं ॥ कथन्नुरामेत्व भिरामवादिनिब्रवीषिदोषान्गुणनित्यसंमते ॥१०८॥

हेतेषांहर्षदाभव ॥१०६॥ व्यसनप्रहारिणि वार्धकरूपायदिपुत्रवियोगरूपप्रहारकारिणि । प्रसत्यपति पत्नीभावंतिरस्कृत्य । इहदेशे अद्यकालेयद्वाषसेक्रूरं ॥ अतस्तेमुखादवश्यपातादंताःकेननामहेतु नासहस्रधाविशीर्यमाणाःसंतोनपतंतीतिनजानेइतिशेषः ॥१०७॥ अप्रियवचोऽकथनेहेतुर्नवेत्तीत्यादि दोषान् । जटाचीरधारणवनवासादीनात्मनोदोषजनकान् । गुणैर्नित्यंसर्वेषांसंमते ॥१०८॥

४॥५॥रामप्रवासदुःखेनमत्वास्वर्गगतस्यापिमेसुखंनास्तीत्याह॰ स्वर्गेति॰ रामस्यकुशलंदैवतैःपश्चादहं किमु
त्तरंवदिष्यइतिशेषः वनंप्रत्यादिश्यइत्यत्तरंदेयंचेत्तत्र॰ प्रत्यादेशात्तद्रूपादुत्तरादूर्ध्वंयद्दैवैरभिहितं
भविष्यति॰ ज्येष्ठंश्रेष्ठगुणैर्युक्तं॰ कथंप्रत्याख्यातवानसीत्येवंरूपःवाक्यंतत्कथंधारयिष्येत्दृढयेइ॥

एवमुक्तस्तुकैकेय्याराजादशरथस्तदा॥ प्रत्युवाचततःक्रुद्धोमुहूर्तंविह्वलन्निव॥४॥मत्तेम
यिगतेरामेवनंमनुजपुंगवे॥हंतानार्येममामित्रेसकामासुखिनीभव॥५॥स्वर्गेपिखलुरामस्य
कुशलंदैवतैरहं॥प्रत्यादेशादभिहितंधारयिष्येकथंवत॥६॥कैकेय्याःप्रियकामेनरामःप्र
व्राजितोवनं॥यदिसत्यंब्रवीम्येतत्तदसत्यंभविष्यति॥७॥अपुत्रेणमयापुत्रःश्रमेणमहतामहा
न्॥रामोलब्धोमहातेजाःसकथंत्यज्यतेमया॥८॥शूरश्चकृतविद्यश्चजितक्रोधःक्षमापरः॥क
थंकमलपत्राक्षोमयारामोविवास्यते॥९॥कथमिंदीवरश्यामंदीर्घबाहुंमहाबलं॥अभिराममं
हंरामंस्थापयिष्यामिदंडकान्॥१०

तिशेषः॥अतस्तदप्रत्याख्यानमेववरमितिभावः॥६॥ननुसत्य
वशात्प्रत्यादिश्यइत्युत्तरंतत्राह॰ कैकेय्याइति॰ प्रियकामेनप्रियेणवरेण॰ एतत्सत्यंयदियद्यपिब्रवीमि
तत्तथापिएतन्मेवाक्यंअसत्यंभविष्यति॥असत्यंमंस्यंतीत्यर्थः॥कामुकतयाप्रत्याख्यातइत्येवमंस्य
तइत्याशयः॥७॥त्यज्यतेत्यक्ष्यते॥८॥९॥स्थापयिष्यामिप्रस्थापयिष्यामि॥१०॥ ॥

अतिमात्रया अतिक्रांतसौंदर्यपरिच्छेदया ॥ यद्वातिक्रांतमर्यादया · हृदयेमर्मणि गृहीतप्रसारिता वित्यनेन पत्यावप्यधर्मणि दृष्टिर्द्योत्यते · असंप्राप्येत्यनेन पिस्पृत्तोरपि चित्तमूर्छा जनितवैवशंपद्योतितं · तदेवाह्नय थातुर इति · आतुरो यथा किंचित्स्प्रष्टुकामोऽस्पृष्ट्वैवमध्येयथामूर्छया पततितियेत्यर्थः ॥ १२ ॥ इतिश्रीरामाभिरामेश्रीरामीयेरामायणतिलके अयोध्याकांडे द्वादशः सर्गः ॥ १२ ॥ अथसत्यपाशवद्धतयाप्राणमवा

सभूमिपालो विलपन्ननाथवत्स्त्रियागृहीतोहृदयेतिमात्रया ॥ पपातदेव्याश्चरणौप्रसारितौ तुभावसंप्राप्ययथातुरस्तथा ॥ १२ ॥ इत्यार्षेश्रीरामायणेवाल्मीकीये अयोध्याकांडे द्वादशः सर्गः ॥ १२ ॥ अतदर्हं महाराजंशयानमतथोचितं ॥ ययातिमिवपुण्यांते देवलोकात्परिच्युतं ॥ १ ॥ अनर्थरूपासिद्धार्थात्वभीताभयदर्शिनी ॥ पुनराकारयामासतमेववरमंगना ॥ २ ॥ त्वंकत्थसे महाराजसत्यवादीदृढव्रतः ॥ मम चेदं वरंकस्माद्विधारयितुमिच्छसि ॥ ३ ॥ ॥

केनचनतेवचः करिष्यामीतिवचसिदार्ढ्याभावंनिश्चित्यपुनरप्याह · अतदर्हं स्त्रीप्राणमनर्हं · अतथोचितंभूशयनानर्हं ॥ १ ॥ अनर्थरूपाकुलस्येतिशेषः असिद्धोर्थःप्रयोजनंयस्याः अभीताजनापवादादभीता · भयदर्शिनी रामाद्भरतस्येतिशेषः तमेववरंपूर्वंदत्तमेववरंतु द्विरपराजानमाकारयामास · संबोधयामास ॥ २ ॥ कत्थसेश्लाघसे · पूर्वार्धंनिद्दतिरध्याहार्यः विधारयितुंऋणत्वेनेतिशेषः ॥ ३ ॥ ॥

र्त्तवत् रोगपीडितवत् यद्वा स्वार्थे वतिः एवंतां दुःखं यथा भवति तथा विललाप यद्वा दुःखं प्राप्येति शेषः अथ दुःखवशाद्रात्रावश्रुषिं प्रार्थयते न प्रभातमिति त्वयेति पाठे त्वया गनया जायमानं प्रातःकालमित्यर्थः नवेति पाठे त्वत्संबंधि प्रातःकालमित्यर्थः ॥१७॥ मेमत्वं भद्रे निशे एवं हितस्पाः कालपाणादत्वं प्रभाते राम विवासनभयमिति भावः ॥ गम्पतां त्रिमायामया त्वया रात्र्यपगमे प्रजासन्निधानेनैतद्दर्शनाभावइति

क्रियतां मे दया भद्रे मयायं रचितो ञ्जलिः ॥ अथवा गम्पतां शीघ्रं नाहमिच्छामि निर्घृणां ॥१८॥ नशंसां कैकयीं द्रष्टुं यत्कृते व्यसनं मम ॥ एवमुक्त्वा ततो राजा कैकेयीं संयतांजलिः ॥१९॥ प्रसादयामास पुनः कैकेयीं राजधर्मवित् ॥ साधुवृत्तस्य दीनस्य त्वद्गतस्य गतायुषः ॥२०॥ प्रसादः क्रियतां भद्रे देवि राज्ञो विशेषतः ॥ अन्येन खलु सुश्रोणि मयेदं समुपाहृतं ॥२१॥ कुरु साधु प्रसादं मे बाले सहृदया ह्यसि ॥ प्रसीद देवि रामो मे त्वद्दत्तं राज्यमव्ययं ॥२२॥ ॥ ॥

भावः यद्वा प्रभाते रामगमनेन द्विरिति मरणोसत्यस्याश्चदर्शनमिति भावः नाहमिच्छामि द्रष्टुमित्यन्वयः ॥१८
१९॥ त्वद्गतस्य सत्यवशत्वात्त्वद्वशं गतस्येत्यर्थः गतायुषः अल्पावशिष्टायुषः ॥२०॥ राज्ञो विशेषतः राजत्वाद्विशेषणाप्रसादउचितः इदं पूर्वोक्तकटुकवाक्यं अन्येन दुःखवशाद्व्याकृतव्यावृत्तविवेकरहितेन यद्वा इदं रामाभिषेचनं श्रुण्वेएकांते निर्जने नोक्तं किंतु सभायामतः प्रसादं कुरु सम्पोपहासो यथा न
भवति तथेत्यर्थः ॥२१॥ सहृदया महृदं चन अन्यत्सहृदयाः तदेवाह प्रसीदेति त्वया वरबलात् गृहीतमेव रा

दुःखैरितिप्रश्नार्थे तृतीया दुःखं वनगमनरूपं दुःखसाधनं ॥११॥ सर्वथा रामस्य दुःखकरणमेव मे श्रेय इत्याह यदीति। अदुःखार्हस्य रामस्य दुःखमकृत्वा यदि मम संक्रमणं स्वर्गप्रतिगमनं भवेत् तदा स्वर्गे सुखमाप्नुयामित्यन्वयः मरणे वरप्रदानजन्यदोषो पि न जीवितो हि साम्प्रतिरेनिभावः ॥१२॥ मम प्रियं रामं विप्रियेण किं ये

सुखानामुचितस्यैव दुःखैरनुचितस्य च। दुःखं नामानुपश्येयं कथं रामस्य धीमतः ॥११॥ यदि दुःखमकृत्वा तु मम संक्रमणं भवेत्। अदुःखार्हस्य रामस्य ततः सुखमवाप्नुयां ॥१२॥ नृशंसे पापसंकल्पे रामं सत्यपराक्रमं। किं विप्रियेण कैकेयि प्रियं योजयसे मम ॥१३॥ अकीर्त्तिरतुला लोके ध्रुवं परिभविष्यति। तथा विलपतस्तस्य परिभ्रमितचेतसः ॥१४॥ अस्तमभ्यागमत्सूर्यो रजनी चाभ्यवर्त्तत सा त्रियामा तदार्त्तस्य चंद्रमंडलमंडिता ॥१५॥ राज्ञो विलपमानस्य न व्यभासत शर्वरी। सदैवोष्णं विनिश्वस्य वृद्धो दशरथो नृपः ॥१६॥ विललापार्त्तवद्दुःखं गगनासक्तलोचनः। न प्रभातं त्वयेच्छामि निशे नक्षत्रभूषिते ॥१७॥

जयस इत्यन्वयः ॥१३॥ अकीर्त्तिः स्त्रीजित इत्यकीर्त्तिर्जन्मसंपादितां कीर्त्तिं परिभविष्यति इत्यर्थः ॥१४॥ यत्संबंधिप्रदोषे स्वनिवेशप्रवेशात्पूर्वं सूर्योस्तमगमत् रजनी चाभ्यवर्त्तत सा त्रियामा चंद्रमंडलमंडितापि आर्तस्य दुःखवतः विलपमानस्य च न व्यभासत न प्रकाशेन सुखदाभूत् विलापेनैव रात्रिकालो व्यनीत इति भावः यतः सा शर्वरी हिंसिका तस्येति शेषः श्रणातीति योगात् ॥१५॥१६॥

एवंदशांप्राप्तेपिराजनिकैकेयीमन्त्रिमित्ततोराजाम्रियतेचेत्‌ म्रियतांवरदानंतुमयोक्तमन्यथाकार्यमिति
निश्चित्याह पुत्रेत्यादि पापाकैकेयी विचेष्टमानं मरणकालइवविकृतमुत्प्रेक्ष्यसम्यक्‌ दृष्ट्वापीत्यर्थः
१ ममसंश्रवं वरदानरूपंसंश्रुत्यप्रतिश्रुत्यअंगीकृत्य पापंकृत्वेवंसन्नः सन्‌ शेषेइदंकिंइदंनोचि
तमित्यर्थः अतःस्थित्यांसत्यपालनरूपायांमर्यादायां॥२॥सत्यरूपंधर्ममाश्रित्यनुद्दिश्यत्वंचत्वंतुमय

पुत्रशोकार्दितंपापाविसंज्ञंपतितंभुवि॥ विचेष्टमानमुत्प्रेक्ष्यऐक्ष्वाकमिदमब्रवीत्‌॥१॥पापंकृ
त्वेवकिमिदंममसंश्रुत्यसंश्रवं॥शेषेक्षितितलेसन्नःस्थित्यांस्थातुंत्वमर्हसि॥२॥आहुःसत्यं
हिपरमंधर्मंधर्मविदोजनाः॥सत्यमाश्रित्यचमयात्वंधर्मंप्रतिचोदितः॥३॥संश्रुत्यशैब्यःश्येना
यस्वांतनुंजगतीपतिः॥प्रदायपक्षिणोराजाजगामगतिमुत्तमां॥४॥तथाह्यलर्कस्तेजस्वीब्रा
ह्मणेवेदपारगे॥याचमानेस्वकेनेत्रेउद्धृत्याविमनाददौ॥५॥सरितांतुपतिःस्वल्पांमर्यादांस
त्यमन्वितः॥सत्यानुरोधात्समयेवेलांस्वांनातिवर्तते॥६॥

प्रतिचोदितःवरदानविषयेप्रेरित
बतः सत्यंरक्षितुमेषामेप्रेरणा अन्यथाप्रतिज्ञातवरदानंविनैवमरणेनवाधर्मःस्यादितिभावः
३ यद्यपिसत्यपालनेप्राणसंशयस्तथापितमंगीकृत्यसत्यरक्षणमेवज्यायइत्याह संश्रुत्येत्यादि
४।५॥सरितांपतिःसत्यमन्वितःसत्यंप्राप्तः सत्यानुरोधात्सत्यत्यागभयात्‌ स्वल्पांमर्यादांसुलं
घ्यामपिवेलांसमयेचंद्रोदयरूपेवृद्धिसमयेपिनातिवर्त्तते॥६॥ ॥

50

गुरूणांवसिष्ठादीनां॰ गुरुंश्रोणीतिपाठे॰ गुर्वीनितपार्गांतरं॰ गुर्वीमहतींश्रोणिर्यस्यास्तादृशि॥२३॥रोदनेनाद्गणोस्तान्नेत्रत्वा
न्नात्रस्य॰ अश्रुकलस्य अश्रुपूर्णस्य॰ हिरण्मये॥२४॥न ह्यात्रेः प्राकू॰ सदाप्रियंअनुष्ठं॰ एवंविधविनयत्वा॥
कथंनापिसंतोषमप्राप्तां॰ विवासनंप्रतियाच्यमाने॰ वरंसमीक्ष्यदुःखितः चिरपरिचितप्रेमत्वात्तांधिक्कर्तुमश

क्नभतामसितापांगेयशः परमवाप्स्यसि॥ममरामस्यलोकस्यगुरूणांभरतस्यच॥प्रियमेतद्गुरुश्रो
णिकुरु चारुमुखेक्षणे॥२३॥विशुद्धभावस्यहिदुष्टभावादीनस्यताम्राश्रुकलस्यराज्ञः॥सत्वावि
चित्रंकरुणंविलापंभर्तुर्नृशंसानचकारवाक्यं॥२४॥ततः सराजापुनरेवमूर्छितःप्रियामनुष्ठं॥
प्रतिकूलभाषिणीं॥समीक्ष्यपुत्रस्यविवासनंप्रतिक्षितौविसंज्ञोनिपपातदुःखितः॥२५॥इतीवरा
ज्ञोव्यथितस्यसानिशाजगाममघोरंश्वसतोमनस्विनः॥विबोध्यमानःप्रतिबोधनंतदानिवारया
माससराजसत्तमः॥२६॥इत्यार्षेश्रीरामायणेअयोध्याकांडेत्रयोदशः सर्गः॥१३॥

कुर्वन्॰ प्रयासत्वश्चपुत्रंचत्यक्तुमशक्नुवन्॰ कर्त्तव्यमूढतया दुःखितोविसंज्ञोमूर्छितः क्षितौपपात॥२५
घोरंदीर्घमुष्णंचश्वसतः॥सानिशाजगाम॰ प्रतिबोधनंतत्साधनमंगलगीतादिकं॥दुःखवशादितिभा
वः॥२६॥इतिश्रीरामाभिरामेश्रीरामीयेरामायणतिलके अयोध्याकांडेत्रयोदशः सर्गः॥१३॥

संस्तभ्य विकलंचितमितिशेषः॥१३॥ ईदृशपाःसपुत्रायास्माणप्रवोचित॥ इत्याशयेनाह॥ यस्तेइति॥ मंत्रकृ
तःग्रहणामीतिमंत्रेणसंस्कृतःसंत्यजामितत्प्रयुक्तंव्यवहारंत्यजामि॥ स्वजंस्वस्माज्जातंतवपुत्रंच
त्वयासहत्यजामि॥१४॥ किंचरामाभिषेकोमयाऽशक्यनिवारणइत्याह॥ प्रयातेत्यादि॥ उदयतंप्रति

विकलाभ्यांचनेत्राभ्यामपश्यन्निवभूमिपः॥ कृच्छ्राद्धैर्येणसंस्तभ्यकैकेयीमिदमब्रवीत्॥१३॥
यस्तेमंत्रकृतःपाणिर्गृहीतोपापेमयाधृतः॥ संत्यजामिस्वजंचैवतवपुत्रंसहत्वया॥१४॥
प्रयातारजनीदेवीसूर्यस्योदयनंप्रति॥ अभिषेकायहिजनस्त्वरयिष्यतिमांध्रुवं॥१५॥
रामाभिषेकसंभारैस्तदर्थमुपकल्पितैः॥ रामःकारयितव्योमेमृतस्यसलिलक्रियां॥१६॥

उदयंप्रतिलभ्य॥ तदर्थंअभिषेकार्थंकल्पितैरामाभिषेकसंभारैरभिषेकंकर्तुंगुरुजनोमांत्वर
यिष्यति॥ अतोगुरुजनानुरोधेनमयारामःकारयितव्यः॥ कृताभिषेकःकारयितव्यः एवंसतिरु
ष्टयामत्ससलिलक्रियानकार्येत्याह॥ मृतस्येत्यादि॥ माकुर्वितिशेषइति॥१५॥१६॥

प्रणवरूपैकपदवाच्यत्वाद्वाच्यवाचकयोश्चाभेदाद्यत्प्रणवरूपंब्रह्मशास्त्रेतत्सत्यवाक्यमेव: अक्षयावे
दाः अक्षयंतज्ज्ञानफलं सत्येनैवपरंपदंब्रह्मस्वरूपंप्राप्यतेचित्तशुद्धिद्वारेतिभावः॥७॥ तस्मात्त्वसत्यमि
ति॥८॥ धर्मस्यपरलोकसिद्धिफलकस्य अभिकामार्थंप्रार्थनीयफलसिध्यर्थंक्रियमाणान्मम अभिचो
दनात्प्रेरणाद्य त्वंसुतंरामंप्रव्राजय एवंत्वांत्रिर्ब्रवीमि अतोनाहमस्माद्वरग्रहणान्निवर्तयितुंशक्येतिभावः

सत्यमेकपदंब्रह्मसत्येधर्मःप्रतिष्ठितः॥ सत्यमेवाक्षयावेदाःसत्येनावाप्यतेपरं॥७॥ सत्यंसम
नुवर्तस्वयदिधर्मेधृतामतिः॥ सवरःसफलोमेस्तुवरदोह्यसिसत्तम॥८॥ धर्मस्यैवाभिका
मार्थंममचैवाभिचोदनात्॥ प्रव्राजयसुतंरामंत्रिःखलुत्वांब्रवीम्यहं॥९॥ समयंचममार्ये
मंयदित्वंनकरिष्यसि॥ अग्रतस्तेपरित्यक्ष्यामिजीवितं॥१०॥ एवंप्रचोदितोराजाकै
केय्यानिर्विशंकया॥ नाशकत्पाशमुन्मोक्तुंबलिरिंद्रकृतंयथा॥११॥ उद्भ्रांतहृदयश्चापिविव
र्णवदनोभवत्॥ सधुर्योवैपरिस्पंदन्युगचक्रांतरंयथा॥१२॥

॥९॥ विपत्तेस्त्रीवधदोषश्चाधिक
स्तेइत्याह॥ समयंचेति यद्वरविषयमर्थं परित्यक्ष्यात्वयोपेक्षितातेअग्रतोजीवितंत्यक्ष्यामि॥१०॥११॥ एवंप्र
योपेतप्रकारेण॥ पाशंसत्यपाशबंधनं इंद्रकृतंइंद्रप्रेरितोपेंद्रकृतं पदत्रयमितदेशप्रतिश्रवरूपंप
शं॥११॥ युगचक्रयोरंतरंमध्यंप्राप्यपरिस्पंदन्तिर्यक्चेष्टमानोधुर्यइवउद्भ्रांतहृदयत्वादिविशिष्टोभवत्॥१२॥

गरो विषं रुजा शूलादि तद्दुःखदं किं भाषसे मर्थमेवेति भावः वाक्यमं गररुजोपममिति पाठेऽप्यंगेति राजामंत्रणं इहा-
नाययितुमर्हणादानं विनाइतो बहिर्गमनमशक्यमिति तात्पर्यं ॥२१॥ कृतकृत्यः कृतशौचादिकृत्यः कृत्यइ
त्यावश्यके कृत्यप्रत्ययः ॥२२॥ तुन्नः व्यथां प्रापितः तुन्नइति पाठे प्रेरितः तीक्ष्णप्रतोदप्रेरितो हयो यथाश्व
रोहाधीनस्तथा तद्वाक्यप्रेरितो राजा तदधीनो भूत्वाऽहेत्यर्थः ॥२३॥ तदाहं धर्मेति एवं च ममाचेतनत्वा

किमिदं भाषसे राजन्वाक्यं गररुजोपमं ॥ आनाययितुमक्लिष्टं पुत्रं राममिहार्हसि ॥२१॥ स्थाप्य
राज्ये मम सुतं कृत्वा रामं वनेचरं ॥ निःसपत्नां च मां कृत्वा कृतकृत्यो भविष्यसि ॥२२॥ स तुन्नइ
वतीक्ष्णेन प्रतोदेन हयोत्तमः ॥ राजा प्रचोदितोभीक्ष्णं कैकेय्या वाक्यमब्रवीत् ॥२३॥ धर्मबं
धेन बद्धोस्मि नष्टा च मम चेतना ॥ ज्येष्ठं पुत्रं प्रियं रामं द्रष्टुमिच्छामि धार्मिकं ॥२४॥ ततः प्रभा
तां रजनीं उदिते च दिवाकरे ॥ पुण्ये नक्षत्रयोगे च मुहूर्ते च समागते ॥ वसिष्ठो गुणसंपन्नः शि
ष्यैः परिवृतस्तथा ॥ उपगृह्याशु संभारान्प्रविवेश पुरोत्तमं ॥२६॥

त्वमेव स्वामी इष्टं यथा सिध्य
ति तथा कुरु अहं न किमपि वक्ष्यामीति भावः सर्वथा चेतनानाशात्माकं रामं द्रष्टुं परमिच्छामि तद्यथा
संपद्यते तथा कुरु एतावद्वा मदिष्टं कुर्विति भावः ॥२४॥ प्रभातां रजनीं दृष्ट्वा सर्वां कृतस्नानादिनित्य
क्रिय इति शेषः वसिष्ठः पुरोत्तमं प्रविवेशेति उत्तरश्लोकेनान्वयः कवेरपि वर्णनीयमपीभावेन शो
कविष्टत्वान्न्यूनपदादिकमदोषः ॥२५॥ संभारान् कुशादीन् ॥२६॥ ॥

क्रोधातिशयेनोक्तमेवार्थं पुनराह॰ सपुत्रयेति॰ इतिकर्तव्यतार्थी॰ समनुभाति॰ सूर्योदयं प्रलभ्याभिषेकं कर्तुं त्वर
यिष्यति अतः स एवं मया कर्तव्य इत्याशयार्थः त्वं तु त्याज्यैवेति भावः ननु मयि जीवत्यां कथं रामाभिषेको भविष्यति
तत्राह॰ यदि गुरून् प्रवञ्च्याय रामाभिषेचनं व्याहृतासि तद्विघातं करिष्यसि॰ तदाऽभिषेकार्थं कल्पितै रामा
भिषेकसंभारैः मृतस्य मे सलिलक्रियां मया रामः कारयितव्यः क्रोधादाह॰ सपुत्रयेति॰ ॥ननु किमनेनात्म

सपुत्रया त्वया नैव कर्तव्या सलिलक्रिया॥ व्याहृतास्यशुभाचारे यदि रामाभिषेचनं॥१७॥ नश
क्तोद्यास्म्यहं द्रष्टुं दृष्ट्वा पूर्वं तथा सुखं॥ हतहर्षं निरानंदं पुनर्जनमवाङ्मुखं॥१८॥ तां तथा ब्रु
वतस्तस्य भूमिपस्य महात्मनः॥ प्रभाता शर्वरी पुण्या चंद्रनक्षत्रमालिनी॥१९॥ ततः पापस
माचारा कैकेयी पार्थिवं पुनः॥ उवाच परुषं वाक्यं वाक्यज्ञा रोषमूर्छिता॥२०॥ श्रीरामजी

वधव्यवसायेन पुत्रादप्यात्मनः प्रियत्वात् आत्मनः कामाय सर्वं प्रियं भवतीति श्रुतेरत आह॰ नशक्त इति॰ त
था सुखं तादृशसुखवंतं ऊर्ध्वविकसितमुखं दृष्ट्वा पुनरिदानीं अवाङ्मुखं म्लानं द्रष्टुं नशक्तोस्मि॰ एवंच
तादृशजीवनापेक्षया मरणं मे श्रेय इति॰ सर्वथा मया मर्तव्यमिति भाव इति॥१७॥१८॥ तां कैकेयीं॰ पुण्या
प्रभाता पुण्यैः साधनप्रभातकालावच्छिन्ना जातेत्यर्थः यद्वा निरंतर रामचिंतासमेतत्वात् पुण्या शर्वरी तथा
जातेत्यर्थः॥१९॥ रोषमूर्छिता क्रोधव्याप्ता॰ परुषं॰ मदीयं ऋणं दत्वा इत उत्तिष्ठेत्येवंरूपं॥२०॥

कन्याकुमार्यः निस्त्रिंशः खड्गः ॥३६॥ नरसंयुक्तं वाहनं शिविका भृंगारं कनकालुका स्वर्णकरकपात्रं ॥३७॥ चतु
र्दंष्ट्रत्वादेव हरिश्रेष्ठः यद्वा हरिश्रेष्ठ उत्तमाश्व ॥३८॥ व्याघ्रतनुर्व्याघ्रचर्म ॥३९॥ नैगमाः वणिजः गणाः स्वस्व

अष्टौ च कन्या रुचिरा मत्तश्च वरवारणः॥ चतुरश्वो रथः श्रीमान्निस्त्रिंशो धनुरुत्तमं ॥३६॥ वाह
नं नरसंयुक्तं छत्रं च शशिसन्निभं॥ श्वेते च वालव्यजने भृंगारं च हिरण्मयं ॥३७॥ हेमदामपि
नद्धश्च ककुद्मान् पांडुरो वृषः॥ केसरी च चतुर्दंष्ट्रो हरिश्रेष्ठो महाबलः ॥३८॥ सिंहासनं व्या
घ्रतनुः समिधश्च हुताशनः॥ सर्वे वादित्रसंघाश्च वेश्याश्चालंकृताः स्त्रियः ॥३९॥ आचार्या ब्रा
ह्मणा गावः पुण्याश्च मृगपक्षिणः॥ पौरजानपदश्रेष्ठा नैगमाश्च गणैः सह ॥४०॥ एते चान्ये च बा
हवः प्रीयमाणाः प्रियंवदाः॥ अभिषेकाय रामस्य सह तिष्ठंति पार्थिवैः ॥४१॥ त्वरयस्व महारा
जं यथा समुदितेहनि॥ पुष्येन नक्षत्रयोगे च रामो राज्यमवाप्नुयात् ॥४२॥ इति तस्य वचः श्रुत्वा
सूतपुत्रो महात्मनः॥ स्तुवन्नृपतिशार्दूलं प्रविवेश निवेशनं ॥४३॥ तं तु पूर्वोदितं वृद्धा द्वार
स्था राजसंमताः॥ न शेकुरभिसंरोद्धुं राज्ञः प्रियचिकीर्षवः ॥४४॥ राम ॥

गणैः ॥४०॥ प्रीयमाणाः प्रीतियुक्ताः पार्थिवैः सहेत्यन्वयः ॥४१॥ समुदिते मुहूर्त्तगुणैः यथा रामो राज्य
मवाप्नुयात्तथा राजानं त्वरयस्वेति संबंधः ॥४२॥४३॥ पूर्वोदितं अयं कदापि न निवारणीय इति
पूर्वमेव राज्ञाज्ञापितं एवमाज्ञायां हेतुर्वृद्ध मिति ॥४४॥

53

संमार्जनंमार्जन्याधूलिनिराकरणं॰ समद्धाविपणः क्रेयपदार्थायेषुतादृशाआपणायस्यांसा॥२७॥समुत्सुकांस
मुत्सुकजनं॥२८॥२९॥यष्टिमद्भिरितिब्राह्मणविशेषणं॰ धारयेद्वैणवींयष्टिमितिस्नातकधर्मप्रकरणोक्तेः॥य
द्वायष्टिमद्भिरित्यस्यतद्द्वारेराजसेवकैरित्यर्थः॥३०॥३१॥विनिष्क्रांतं॰ अंतःपुरात्द्वारंतःपुरद्वारे॥३२॥वसि

सिक्तसंमार्जितपथांपताकोत्तमभूषितां॥संहृष्टमनुजोपेतांसमृद्धविपणापणां॥२७॥महोत्सव
समायुक्तांराघवार्थेसमुत्सुकां॥चंदनागरुधूपैश्चसर्वतःपरिधूपितां॥२८॥तांपुरींसमतिक्रम्य
पुरंदरपुरोपमां॥ददर्शांतःपुरंश्रीमन्नानाध्वजगणायुतं॥२९॥पौरजानपदाकीर्णं ब्राह्मणोपशो
भितं॥यष्टिमद्भिःसुसंपूर्णंसदश्वैःपरमार्चितैः॥३०॥यदंतःपुरमासाद्यव्यतिचक्रामतंजनं॥
वसिष्ठःपरमप्रीतःपरमर्षिभिरावृतः॥३१॥सत्वपश्यद्विनिष्क्रांतंसुमंत्रंनामसारथिं॥द्वारेम
नुजसिंहस्यसचिवंप्रियदर्शनं॥३२॥तमुवाचमहातेजाःसूतपुत्रंविशारदं॥वसिष्ठःक्षिप्रमा
चक्ष्वनृपतेर्मामिहागतं॥३३॥इमेगंगोदकघटाःसागरेभ्यश्चकांचनाः॥औदुंबरंभद्रपीठंअ
भिषेकार्थमाहृतं॥३४॥सर्वबीजानिगंधाश्चरत्नानिविविधानिच॥क्षौद्रंदधिघृतंलाजादर्भाःसु
मनसःपयः॥३५॥

ष्ठःसूतपुत्रमुवाचकिमुवाचेत्याह॰ क्षिप्रमित्यादि॥३३॥कांचनाःसौवर्णाः॥गंगोदकघ
टाः॥तदुदकपूर्णाघटाः॥सागरेभ्यश्चतज्जलपूर्णाघटाआहृताइतिशेषः औदुंबरंभद्रपीठं॰ औदुंबर्यासं
दीतस्यैप्रादेशमात्राःपादाइतिबह्वृचब्राह्मणप्रसिद्धं॥३४॥क्षौद्रंमधु॰ सुमनसःपुष्पाणि॥३५॥

कृतकौतुकमंगलः कृतानि कौतुकानि अभिषेकोत्सवे मंगलानि विचित्रवस्त्राभरणधारणादिरूपाणि येन कौतुकं त्वभिलाषे स्यादुत्सवे नर्महर्षयोः अत एव वपुषा विराजमानस्त्वं मेरौ दिवाकर इवोत्तिष्ठ ॥ ४१ ॥ कर्तव्यं यद्यदाज्ञप्तं तत्सर्वं कृतमित्याह इदानीं स्थितेति उत्थितं संपन्नमभ्युदितं पर्यः अभिषेचनं तदुपक

उत्तिष्ठ सुमहाराज कृतकौतुकमंगलः ॥ विराजमानो वपुषा मेरोरिव दिवाकरः ॥ ५१ ॥ इदं ति
ष्ठत रामस्य समग्रमभिषेचनं ॥ पौरजानपदाश्चापि नैगमश्च कृतांजलिः ॥ ५२ ॥ अयं वसि
ष्ठो भगवान्ब्राह्मणैः सह तिष्ठति ॥ क्षिप्रमाज्ञाप्यतां राजन्राघवस्याभिषेचनं ॥ ५३ ॥ यथा ह्य
पालाः पशवो यथा सेना ह्यनायका ॥ यथा चंद्रं विना रात्रिर्यथा गावो विना वृषं ॥ ५४ ॥ एवं हि
भविता राष्ट्रं यत्र राजा न दृश्यते ॥ एवं तस्य वचः श्रुत्वा सांत्वपूर्वमिवार्थवत् ॥ ५५ ॥ अभ्या
कीर्यत शोकेन भूय एव महीपतिः ॥ ततस्तु राजा तं सूतं सन्नहर्षः सुतं प्रति ॥ ५६ ॥ शोकरक्ते
क्षणः श्रीमानुद्वीक्ष्योवाच धार्मिकः ॥ वाक्यैस्तु खलु मर्माणि मम भूयो निकृंतसि ॥ ५७ ॥ सु
मंत्रः करुणं श्रुत्वा दृष्ट्वा दीनं च पार्थिवं ॥ प्रगृहीतांजलिः किंचित्तस्माद्देशादपाक्रमत् ॥ ५८ ॥

रणां नैगमो वणिग्वर्गः ॥ ५२ ॥ ५३ ॥ ५४ ॥ भविता लुट् तस्मात् क्षिप्रमुपतिष्ठेति भावः इवशब्द एवार्थे ॥ ५५ ॥ अभ्या
कीर्यत व्याप्तोऽभवत् सन्नहर्षः नष्टहर्षः ॥ ५६ ॥ शोकरक्तेक्षणः शोकजरोदनेन रक्तनेत्रः भूयः कैकेयी
वाक्यैः कृत्तानि मर्माणि पुनरधिकं त्वं विवाक्यैरित्यर्थः अनुचितकालप्रयुज्यमानत्वादिति भावः ॥ ५७ ॥

तामवस्थां कैकेयीकृतां घोरामवस्थां आजज्ञिवान् नज्ञातवान् यतोऽनो वाग्भिरित्यादि परमतुष्टाभिः तोष्य

ताभिर्तोषजनिकाभिश्चेतियावत् ॥४५॥४६॥ भास्करोदये तत्काले प्रत्यूर्मिन्न तिफलितरवितेजसा तेजस्वी

सागरो यथा स्नातुकामान् नंदति नंदयति तथा नोस्मान् प्रीतेन तुष्टेन मनसा प्रीतोस्मद्धि षयकप्रीत्याश्रयः

सन्नंदय यत्तु भास्करेश्चंद्र इति तन्न सिद्धि विरुद्धं तथा घन इति पाठे आनंदघनः आनंदपूर्णस्त्वं नंदनं

ससमीपस्थितो राज्ञस्तामवस्थामजज्ञिवान् ॥ वाग्भिः परमतुष्टाभिरभिष्टोतुं प्रचक्रमे ॥४५॥ ततः

सूतो यथापूर्वं पार्थिवस्य निवेशने ॥ सुमंत्रः प्रांजलिर्भूत्वा तुष्टाव जगतीपतिं ॥४६॥ यथानं

दति तेजस्वी सागरो भास्करोदये ॥ प्रीतः प्रीतेन मनसा तथा नंदय नस्ततः ॥४७॥ इंद्रमस्यां तु वे

लायामभितुष्टाव मातलिः ॥ सोजयद्दानवान् सर्वास्तथा त्वां बोधयाम्यहं ॥४८॥ वेदाः सहांगा

विद्याश्च यथा ह्यात्मभवं प्रभुं ॥ ब्रह्माणं बोधयंत्यद्य तथा त्वां बोधयाम्यहं ॥४९॥ आदित्यः सह चंद्रेण

तथा भूतधरां शुभां ॥ बोधयत्यद्य पृथिवीं तथा त्वां बोधयाम्यहं ॥५०॥

दय प्रजा इति शेषः नंदानंदेति

च तंत्रेण बोध्यं ॥४७॥ अस्यां वेलायां उदयवेलायां तया स्तुत्या चोत्साहयुक्तः सन् यथा दानवान् सोजय

त् तथा रिपुजयफलकं बोधनं तेकरोमीत्यर्थः ॥४८॥ अंगैः सहिता वेदाः विद्याश्च मीमांसादय यथा ब्र

ह्माणं स्रष्टारं बोधयंति एवं त्वां बोधयामि वेदेभ्य एव भूरादीन् पदार्थान् ज्ञात्वा ब्रह्मस्तान् सृजतीति

श्रुतिस्मृतिप्रसिद्धं यथा वेद सहितो रविरुदयास्तमयाभ्यां पृथिवीं तत्स्थजनं बोधयति तत्तद्वत् ॥४९॥

॥५०॥

ततइति-महीपतेर्द्वारगतानधिकारिणो विलोकयन्-पौरान्महाजनान्पुरस्तादग्रेददर्श-ततः निर्गमनोत्तरं॥६७
इतिश्रीरामाभिरामेश्रीरामीयेरामायणतिलकेअयोध्याकांडेचतुर्दशःसर्गः॥१४॥अथकैकेय्याराज्ञाच
गुप्तत्वादयतयाप्रवर्त्तितस्यसुमंत्रस्ययथापूर्वंप्रवर्त्तिंवदन्-राजाज्ञयाराजद्वारिमिलितानांजनानांपर

ततःपुरस्तात्सहसाविनिःसृतोमहीपतेर्द्वारगतान्विलोकयन्॥ददर्शपौरान्विविधान्महाधनानुपस्थितान्द्वारमुपेत्यविष्ठितान्॥६७॥इत्यार्षेश्रीरा० अयो० चतुर्दशःसर्गः॥१४॥
तेतुतांरजनीमुष्यब्राह्मणावेदपारगाः॥उपतस्थुरुपस्थानंसहराजपुरोहिताः॥१॥अ-
मात्याबलमुख्याश्चमुख्यायेनिगमस्य च॥राघवस्याभिषेकार्थेप्रीयमाणाःसुसंगताः॥२॥
उदितेविमलेसूर्येपुष्येचाभ्यागतेऽहनि॥लग्नेकर्कटकेप्राप्तेजन्मरामस्यचस्थिते॥३॥अ-
भिषेकायरामस्यद्विजेंद्रैरुपकल्पितं॥कांचनाजलकुंभाश्चभद्रपीठंस्वलंकृतं॥४॥रथ-
श्चसम्यगास्तीर्णोभास्वताव्याघ्रचर्मणा॥गंगायमुनयोःपुण्यात्संगमादाहृतंजलं॥५॥

55

स्यरसंभाषणप्रकारमाह-तेत्वित्यादितिराजप्रेरिताःउष्यउषित्वा-उपस्थानंराजद्वारं-अधिकरणेल्यु
ट्॥१॥निगमोवणिग्[illegible]कलमहः॥२॥अहनिपुष्यनक्षत्रेआगतेरामस्यजन्मजन्मनिस्थिते-जन्म
कालस्थेकर्कटलग्नेचप्राप्तेभावितेइतिशेषः॥३॥अभिषेकायअभिषेकार्थमुपकरणमुपकल्पि
तंसिद्धंकृतमित्यर्थः कांचनाजलकुंभाआनीताःअलंकृतंभद्रपीठंस्थापितं॥४॥५॥

दिन्यंसत्ययाशवंधनजं मंत्रज्ञास्वकार्येवक्तव्यज्ञा ॥ ५९ ॥ अतएवमिथ्याप्याह रामहर्षेति रामाभिषेकहर्षेत्यर्थः ६०
६१ ॥ ६२ ॥ कल्याणंमन्यमानः कदाचिद्रामंदृष्ट्वातस्मिन्प्रीतिकरिष्यतीतिमन्यमानः यद्वा अस्मिन्नवसरेराम
दर्शनमेवकल्याणंमन्यमानः मतिसमयत्वात् यद्वादेवानां ऋषीणांचकल्याणंमन्यमानः अतएवत्दृदये

यदाचक्तुंस्वयंदैन्यान्नशशाकमहीपतिः ॥ तदासुमंत्रंमंत्रज्ञाकैकेयीप्रत्युवाचह ॥ ५९ ॥ सुमंत्ररा
जारजनींरामहर्षसमुत्सुकः ॥ प्रजागरपरिश्रांतोनिद्रावशमुपागतः ॥ ६० ॥ तद्गच्छत्वरितंसूतरा
जपुत्रंयशस्विनं ॥ राममानयभद्रंतेनात्रकार्याविचारणा ॥ ६१ ॥ अश्रुत्वाराजवचनंकथंगच्छा
मिभामिनि ॥ तच्छ्रुत्वामंत्रिणोवाक्यंराजामंत्रिणमब्रवीत् ॥ ६२ ॥ सुमंत्ररामंद्रष्टुमिच्छामिशीघ्रमा
नयसुंदरं ॥ समन्यमानः कल्याणंहृदयेननन्नंद च ॥ ६३ ॥ निर्जगामचसप्रीत्यात्वरितोराजशास
नात् ॥ सुमंत्रश्चिंतयामासत्वरितंचोदितस्तया ॥ ६४ ॥ व्यक्तंरामाभिषेकार्थेइहायस्यतिधर्मरा
इतिसूतोमतिंकृत्वाहर्षेणमहतापुनः ॥ ६५ ॥ निर्जगाममहातेजाराघवस्यदिदृक्षया ॥ सागरन्हृ
दसंकाशात्सुमंत्रोंतःपुराच्छुभात् ॥ ६६ ॥

ननंदनतुवहिस्तच्चिन्हमितिभावः ॥ ६३ ॥ निर्गमनकालेपु
नस्त्वरितमानयेतितयाकैकेय्याप्रेरितः चिंतयामासकिमित्येषाभयस्त्वरयतीतिचिंता ॥ ६४ ॥ व्यक्तंरामा
भिषेकार्थमेवएषात्वरयति इहधर्मराट्दशरथः आयस्यति आयासवान्भवतिप्रयासबाहुल्येन
प्रायोबहिर्निर्गमिष्यतीतिमतिंकृत्वेत्यन्वयः ॥ ६५ ॥ पुरांतर्वर्तित्वादंतःपुरस्यसागरांतर्वर्त्तिहृदतुल्यत्वं ६६

१४॥ सर्वान्जनान्। महीपतीश्चअब्रवीदित्यन्वयः॥१५॥ रामंआनेतुमितिशेषः॥१६॥ यद्यपिप्रस्थितस्तथा
पिभवंतोराज्ञोरामस्यचपूज्याइतिकृत्वाआयुष्मतांयुष्माकंवचनात्सर्वेराजानोब्राह्मणादयश्चमहा
राजंसुखंसुखशयनंपृच्छंतीतिविज्ञापयामिजाग्रतोपिबहिरनागमनकारणंकिमितिचपृच्छंतीति

अपश्यंतोब्रुवन्कोनुराज्ञोनःप्रतिवेदयेत्॥ नपश्यामश्चराजानमुदितश्चदिवाकरः॥१४॥
यौवराज्याभिषेकश्चसज्जोरामस्यधीमतः॥ इतितेषुब्रुवाणेषुसर्वांस्तांश्चमहीपतीन्॥१५॥
अब्रवीत्तान्निदंवाक्यंसुमंत्रोराजसत्कृतः॥ रामंराज्ञोनियोगेनत्वरयाप्रस्थितोस्म्यहं॥१६॥
पूज्याराज्ञोभवंतश्चरामस्यतुविशेषतः॥ अयंपृच्छामिवचनात्सुखमायुष्मतामहं॥१७॥ राज्ञः
संप्रतिबुद्धस्यचानागमनकारणं॥ इत्युक्त्वांतःपुरद्वारमाजगामपुराणवित्॥१८॥ सदासक्तं
चतद्वेश्मसुमंत्रःप्रविवेशह॥ तुष्टावास्यतदावंशेप्रविश्यसविशांपतेः॥१९॥ शयनीयंनरें
द्रस्यतदासाद्यव्यतिष्ठत॥ सोत्यासाद्यतुतद्वेश्मतिरस्करणिमंतरा॥२०॥ ॥ ॥

विज्ञापयामि॥१७॥ पुराणवित्- चिरकालकथाभिज्ञोतिवृद्धइतियावत्- यौवराज्याभिषेकस्तत्सामग्री
॥१८॥ सदाऽसक्तंअवारितद्वारं॥१९॥ शयनीयंशयनगृहं तिरस्करिणींजवनिकामंतराकृत्वेतिशेषः
एतेनतावत्पर्यंतंगमनंसूचितं॥ अत्यासाद्यअतिसमीपंगत्वा॥२०॥

प्राग्वहा इत्यादेर्नद्य इति शेषः पर्वतघट्टनादिनोर्ध्वप्रवाहवत्प्रदेशवत्त्यऊर्ध्ववाहाः तिर्यग्वाहाः दक्षिणोत्तरप्रवाहाः क्षीरिणः क्षीरपूर्णाः क्षीरमत्र जलं ङीवभाव आर्षः ॥६॥७॥ क्षीरिभिः क्षीरिवृक्षपल्लवैः ॥८॥९॥१०॥ अभिषे

॥ याश्चापः सरितः पुण्या ह्रदाः कूपाः सरांसि च ॥ प्राग्वहाश्चोर्ध्ववाहाश्च तिर्यग्वाहाश्च क्षीरिणः ॥६॥
ताभ्यश्चैवाहृतं तोयं समुद्रेभ्यश्च सर्वशः ॥ क्षौद्रं दधि घृतं लाजा दर्भाः सुमनसः पयः ॥७॥ अष्टौ
च कन्या रुचिरा मत्तश्च वरवारणः ॥ सजलाः क्षीरिभिश्छन्ना घटाः कांचनराजताः ॥८॥ पद्मोत्पल
युताभ्यांति पूर्णाः परमवारिणा ॥ चंद्रांशुविकचप्रख्यं पांडुरं रत्नभूषितं ॥९॥ सज्जं तिष्ठति राम
स्य बालव्यजनमुत्तमं ॥ चंद्रमंडलसंकाशमातपत्रं च पांडुरं ॥१०॥ सज्जं द्युतिकरं श्रीमदभिषे
कपुरःसरं ॥ पांडुरश्च वृषः सज्जः पांडुराश्वश्च संस्थितः ॥११॥ वादित्राणि च सर्वाणि बंदिनश्च
तथापरे ॥ इक्ष्वाकूणां यथा राज्ये संभ्रियेताभिषेचनं ॥१२॥ तथाजातीयमादाय राजपुत्राभिषेच
नं ॥ ते राजवचनात्तत्र समवेता महीपतिं ॥१३॥

कपुरःसरं अभिषेकसामग्र्यां मुख्यं ॥११॥ इक्ष्वाकूणां राज्ये अभिषेचनमुद्दिश्य यथा वस्तुजातं संभ्रियेत
संभ्रियते ॥१२॥ तथाजातीयं वस्तुजातं रामाभिषेकमुद्दिश्यादाय गृहीत्वा राजवचनात् ॥ राजद्वारे समवे
ता मिलिता ब्राह्मणादयो महीपतिमपश्यंतो नो अस्मान् राज्ञः कः प्रतिवेदयेत्यब्रुवन् ॥१३॥

दृष्टः पुलकितगात्रः प्रमुदित आनंदितचित्तः राजमार्गं विलोकयन्निति संबंधः रामाधिकरणाः रामविषयाः ॥२९॥ दृष्टवत् दृष्टानां जनानां स्वार्थवति आर्षः ॥३०॥ प्रातः समयत्वान्महाकपाटेन पिहितं स्वल्पद्वारस्य चोद्घाटितत्वात् वितर्दिर्वेदिका ॥३१॥ कांचनीभिः प्रतिमाभिर्युक्तं एकं प्रधानमग्रं पुरोभागो यस्य

दृष्टः प्रमुदितः सूतो जगामाशु विलोकयन् ॥ सस्तस्तत्र शुश्राव रामाधिकरणाः कथाः ॥२९॥
अभिषेचनसंयुक्ताः सर्वलोकस्य दृष्टवत् ॥ ततो ददर्श रुचिरं कैलाससदृशप्रभं ॥३०॥ रामवेश्म सुमंत्रस्तु शक्रवेश्मसमप्रभं ॥ महाकपाटपिहितं वितर्दिशतशोभितं ॥३१॥ कांचनप्रतिमैकाग्रं मणिविद्रुमतोरणं ॥ शारदाभ्रघनप्रख्यं दीप्तं मेरुगुहासमं ॥३२॥ मणिभिर्वरमाल्यानां सुमहद्भिरलंकृतं ॥ मुक्तामणिभिराकीर्णं चंदनागरुभूषितं ॥३३॥ गंधान्मनोज्ञान्विसृजद्दार्दुरं शिखरं यथा ॥ सारसैश्च मयूरैश्च विनदद्भिर्विराजितं ॥३४॥ सुकृतेहामृगाकीर्णं सूत्कीर्णं भक्तिभिस्तथा ॥ मनश्चक्षुश्च भूतानां आददत्तिग्मतेजसा ॥३५॥ ॥

तत् मणिविद्रुमयुक्तं तोरणं वहिर्द्वारं यस्य तत् शारदाभ्रवत् घनप्रख्यं निविडप्रभं ॥३२॥ वरमाल्यानां स्वर्णपुष्पमालानामंतरालवर्तिभिर्महद्भिर्महार्दीप्तिमद्भिर्मणिभिरलंकृतं ॥३३॥ दार्दुरं दर्दुरो मलयसन्निकृष्टश्चंदनगिरिः ॥३४॥ सुकृतैः स्वर्णादिनासुष्ठु निर्मितैरीहामृगैर्वृकैराकीर्णं व्याप्तं कोकस्त्वीहामृगो वृकः भक्तिभिः वर्धकीनां सूक्ष्मचित्रशिल्पैरुत्कीर्णं चित्रवत् तिग्मतेजसा अतिशयितशोभया यद्वाप

57

राजविज्ञापनस्य स्तुतिपूर्वकत्वात्पुनः स्तुतिप्रवृत्तिः ॥ २१ ॥ २२ ॥ निगमो वाणिज्यं तत्संबंधिनो नैगमाः ॥ २३ ॥ २४ ॥ प्रतिबुध्य । जवनिकांतर्हितमपि सुमंत्रं ध्वनिना ज्ञात्वा । यदस्य भिहितो नयेति पाठे अनयेत्युपलक्षणं । मयाचेत्यर्थः ॥ अत एव ममाज्ञेति संगच्छते । पूर्वं राज्ञा स्वयमप्युक्तेः कतकादयस्तु केके याज्ञैव अप्रतिषिद्धमनुम

आशीर्भिर्गुणयुक्ताभिरभितुष्टाव राघवं ॥ सोमसूर्यौ च काकुत्स्थ शिववैश्रवणावपि ॥ २१ ॥ वरुणश्चाग्निरिंद्रश्च विजयं प्रदिशंतु ते ॥ गता भगवती रात्रिरहः शिवमुपस्थितं ॥ २२ ॥ बुध्यस्व राजशार्दूल कुरु कार्यमनंतरं ॥ ब्राह्मणा बलमुख्याश्च नैगमाश्चागतास्त्विह ॥ २३ ॥ दर्शनं तेभिकांक्षंते प्रतिबुध्यस्व राघव ॥ स्तुवंतं तं तदा सूतं सुमंत्रं मंत्रकोविदं ॥ २४ ॥ प्रतिबुध्य ततो राजा इदं वचनमब्रवीत् ॥ राममानय सूतेति यदस्य भिहितोनया ॥ २५ ॥ किमिदं कारणं येन मम माज्ञा प्रतिवाह्यते ॥ नचैव संप्रसुप्तोहमानयेहाशु राघवं ॥ २६ ॥ इति राजा दशरथः सूतं तत्रान्वशात्पुनः ॥ स राजवचनं श्रुत्वा शिरसा प्रतिपूज्य तं ॥ २७ ॥ निर्जगाम नृपावासान्मन्यमानः प्रियं महत् ॥ प्रपन्नो राजमार्गं च पताकाध्वजशोभितं ॥ २८ ॥

तमितिन्यायेन ममाज्ञा । ननु निद्रापरवशत्वेन राज्ञोनुमतं न वेति मे संदेहस्तत्राह । नचेति । इति व्याचक्षते । तेषामिति । राजेति श्लोके पुनः पदासंगतिः ॥ स्यचैव पूर्वसर्गांते । श्रुत्वा राजवचनमित्यादिनानंदचेत्यंतश्लोकद्वयस्य सर्वपुस्तकेष्वपलंभाच्चतद्व्याख्यानमसंगतमिति ध्येयं ॥ २५ ॥ २६ ॥ २७ ॥ प्रियं मन्यमानः हार्दाभिप्रायाज्ञानात् ॥ २८ ॥ ॥ राम ॥

रामाभिषेकार्थेऽभिषेकप्रयोजनकं कर्मकुर्वतां जनानां गिरो नरेंद्रसूनोः रामस्याभितो मंगलं तत्संपादनमर्थो यासां ताः शुश्राव तथा सर्वस्य लोकस्य च गिरस्तादृशपः शुश्राव ॥४३॥४४॥ को द्यातत्संख्ययापरार्द्धैः

स तत्र शुश्राव च हर्षयुक्ता रामाभिषेकार्थकृतां जनानां ॥ नरेंद्रसूनोरभिमंगलार्थाः सर्वस्य लोकस्य गिरः प्रहृष्टाः ॥४३॥ महेंद्रसद्मप्रतिमं तु वेश्म रामस्य रम्यं मृगपक्षिजुष्टं ॥ ददर्श मेरोरिव शृंगमुच्चं विभ्राजमानं प्रभया सुमंत्रः ॥४४॥ उपस्थितैरंजलिकारिभिश्च सोपायनैः जानपदैर्जनैश्च ॥ कोट्या परार्धैश्च विमुक्तयानैः समाकुलं द्वारपदं ददर्श ॥४५॥ ततो महामेघमहीधराभं प्रभिन्नमत्यंकुशमत्यसह्यं ॥ रामोपवाह्यं रुचिरं ददर्श शत्रुंजयं नागमुदग्रकायं ॥४६॥ स्वलंकृतान्साश्वरथान्सकुंजरानमात्यमुख्यांश्च ददर्श वल्लभान् ॥ ॥ व्यपोह्य सूतः सहितान्समंततः समृद्धमंतःपुरमाविवेश ह ॥४७॥ ॥

तत्संख्ययोपलक्षितैर्जनैरनेनातिसंमर्दो दर्शितः ॥४५॥ महामेघाधिरूढपर्वतसदृशं · प्रभिन्नं मत्तं · शत्रुंजयं तद्गुणकं तन्नामानं च · रामउपवाह्यो यस्य तं ॥४६॥ वल्लभान् राज्ञ इति शेषः व्यपोह्य · रथ्यागमनेन मार्गादेकदेशे कृत्वा ॥४७॥

३६॥ उपस्थितौ रागतैः अंजलिकारिभिः नमस्कारार्थं ॥३७॥ उपादायः उपायनानीतिशेषः आगतैरितिचशेषः समाक्रांतैर्द्वारपालनिरुद्धैः ॥ उन्मुखैरुत्सुकैः ॥३८॥ उदग्रंप्रशस्तं कुब्जकैर्दासैः ॥३९॥ राजकुलंराजमार्गंवि

चंद्रभास्करसंकाशंकुवेरभवनोपमं ॥ महेंद्रधामप्रतिमंनानापक्षिसमाकुलं ॥३६॥ मेरुशृंगसमंसूतोरामवेश्मददर्शह ॥ उपस्थितैः समाकीर्णंजनैरंजलिकारिभिः ॥३७॥ उपादायसमाक्रांतैःतदाजानपदैर्जनैः ॥ रामाभिषेकसुमुखैरुन्मुखैः समलंकृतं ॥३८॥ महामेघसमप्रख्यमुदग्रंसुविराजितं ॥ नानारत्नसमाकीर्णंकुब्जकैरपिचावृतं ॥३९॥ सवाजियुक्तेनरथेनसारथिः समाकुलंराजकुलंविराजयन् ॥ वरूथिनाराजगृहाभियातिनापुरस्यसर्वस्यमनांसिहर्षयन् ॥४०॥ ततःसमासाद्यमहाधनंमहत्प्रहृष्टरोमासबभूवसारथिः ॥ मृगैर्मयूरैश्चसमाकुलोल्वणंगृहंवरार्हस्यशचीपतेरिव ॥४१॥ सतत्रकैलासनिभाःस्वलंकृताःप्रविश्यकक्ष्यास्त्रिदशालयोपमाः ॥ प्रियान्वरान्राममतेस्थितान्बहून्व्यपोह्यशुद्धांतमुपस्थितोरथी ॥४२॥ श्रीजानकीप्रियायनमः

सि

राजयन्शोभयन्वरूथोरथगुप्तिस्तद्युतेनरामगृहंसमासददितिशेषः ॥४०॥ महाधनंमहताधनेनयुक्तं समाकुलैरितस्ततःप्रसृतैरुल्वणंअधिकशोभावत् वरार्हस्यउत्तमवस्त्वर्हस्य ॥४१॥ व्यपोह्यअतिक्रम्य शुद्धांतमंतःपुरं ॥४२॥

६ प्रतिवेदितं द्वास्थैः विज्ञापितं पितुरभ्यंतरं अत्यंतमंतरंगं तत्रैव सीता ऽवस्थिति द्रष्टा एव प्रियकाम्यया पितुरि
तिशेषः ॥ ७ ॥ ८ ॥ वराहरुधिरवदतिरक्तेन परार्ध्येन श्रेष्ठेन ॥ ९ ॥ भूयो वारंवारं ददर्शेत्यन्वयः तथाभूतस्य दर्शने
तत्प्रभावात् चित्रया सहितं शशिनं यथा लोको भूयो भूयः पश्यति तथेत्यर्थः ॥ १० ॥ बंदी सुमंत्रः विनीतव

ते रामभुपसंगम्य भर्तुः प्रियचिकीर्षवः ॥ सह भार्याय रामाय क्षिप्रमेवाचचक्षिरे ॥ ६ ॥ प्रति
वेदितमाज्ञाय सूतमभ्यंतरं पितुः ॥ तत्रैवानाययामास राघवः प्रियकाम्यया ॥ ७ ॥ तं वैश्रवण
संकाशमुपविष्टं स्वलंकृतं ॥ ददर्श सूतः पर्यंके सौवर्णे सोत्तरच्छदे ॥ ८ ॥ वराहरुधिराभेन
शुचिना च सुगंधिना ॥ अनुलिप्तं परार्ध्येन चंदनेन परंतपं ॥ ९ ॥ स्थितया पार्श्वतश्चापि बाल
व्यजनहस्तया ॥ उपेतं सीतया भूयश्चित्रया शशिनं यथा ॥ १० ॥ तं तपंतमिवादित्यमुपपन्नं
स्वतेजसा ॥ ववंदे वरदं वंदी विनयज्ञो विनीतवत् ॥ ११ ॥ प्रांजलिः सुमुखं दृष्ट्वा विहारश
यनासने ॥ राजपुत्रमुवाचेदं सुमंत्रो राजसत्कृतः ॥ १२ ॥ कौसल्या सुप्रजा राम पिता त्वां द्रष्टु
मिच्छति ॥ महिष्या पि हि कैकेय्या गम्यतां तत्र माचिरं ॥ १३ ॥ राम ॥

त् विनीतः सन् ॥ ११ ॥ सुमुखं प्रसन्नवदनं विहारशयनस्थानरूपे आसने विद्यमानं राजपुत्रमित्य
न्वयः यद्वा विहारशयनासने समाहारद्वंद्वः तेषु राज्ञा सत्कृतः सुमंत्र इत्यन्वयः ॥ १२ ॥ सुप्रजा सुपुत्रे
ण त्वयेतिशेषः ॥ १३ ॥

अङ्किकूटे अङ्किशृंगे आरूढो चलोयोमहामेघस्तत्सदृशमौन्नत्येन इंद्रकूटेतिपाठेतन्नामापर्वतविशेषस्तदा
रूढेत्यादिपूर्ववत् महाविमानोपमवेश्मभिः संयुतं महाविमानानांतत्संज्ञकानामुत्तमवेश्मनांसंघोय
त्रमहाविमानेष्वप्युत्तमानंविश्मनांसंघोयत्रेतिवाविमानोत्तमवेश्मसंघवदितिपाठांतरेर्थः विमानोस्त्रीदे

ततोद्रिकूटाचलमेघसन्निभंमहाविमानोपमवेश्मसंयुतं ॥ अवार्यमाणः प्रविवेशसार
थिः प्रभूतरत्नंमकरोयथार्णवं ॥ ४५ ॥ इत्यार्षेश्रीरामायणे अयोध्याकांडे पंचदशः सर्गः ॥ १५ ॥
सतदंतःपुरद्वारंसमतीत्यजनाकुलं ॥ प्रविविक्तांततःकक्ष्यामाससादपुराणवित् ॥ १ ॥ प्रासका
र्मुकबिभ्रद्भिर्युवभिर्मृष्टकुंडलैः ॥ अप्रमादिभिरेकाग्रैःस्वनुरक्तैरधिष्ठितां ॥ २ ॥ तत्रकाषायि
णोवृद्धान्वेत्रपाणीन्स्वलंकृतान् ॥ ददर्शविष्ठितान्द्वारिस्त्र्यध्यक्षान्सुसमाहितान् ॥ ३ ॥ तेस
मीक्ष्यसमायांतंरामप्रियचिकीर्षवः ॥ सहसोत्पतिताः सर्वेत्वासनेभ्यः ससंभ्रमाः ॥ ४ ॥ तानुवाच
विनीतात्मासूतपुत्रःप्रदक्षिणः ॥ क्षिप्रमाख्यातरामायसुमंत्रोद्वारितिष्ठति ॥ ५ ॥

वयानेसप्त
भमौवसन्मुनि ॥ ४५ ॥ इतिश्रीरामाभिरामेश्रीरामीयेरामायणतिलके अयोध्याकांडे पंचदशः सर्गः ॥ १५ ॥ प्रवि
विक्तां जनासंबाधां ॥ १ ॥ प्रासकार्मुकानांबिभ्रद्भिः तेषांधारकैरित्यर्थः ॥ एकाग्रैरेकाग्रचित्तैः ॥ २ ॥ काषायिणः
कौसुंभादिकषायरक्तवस्त्रधारिण इत्यर्थः ॥ ३ ॥ ४ ॥ प्रदक्षिणः प्रकर्षेणसेवादौनिपुणः आख्यातकथयत ॥ ५ ॥

१७ कुत एवं ज्ञायते तत्राह। दिष्ट्येति॰ ममकामविषयमर्थं करोति॰ तादृशं सुमंत्रं यतो दूतं प्राहिणोद तत एवं ज्ञायत इति भावः॥१८॥ तदेव विवृणोति॰ यादृशीमदर्थपरा॰ तत्र राजांतःपुरे परिषत्सभा॥१९॥ परिवारेण॰ सखी समूहेन॥२०॥ अभिदध्युषी अभिध्यायंती त्यर्थे आर्षमिदं॥२१॥ द्विजातिभिर्जुष्टं राज्यं॰ यौवराज्याभिषे

60

सापत्न्यस्य महाराजं हितकामानुवर्त्तिनी॥ जननी चार्थकामा मे केकयाधिपतेः सुता॥१७॥ दिष्ट्या खलु महाराजो महिष्या प्रियया सह॥ सुमंत्रं प्राहिणोद् दूतमर्थकामकरं मम॥१८॥ यादृशी परिषत्तत्र तादृशो दूत आगतः॥ ध्रुवमद्यैव मां राजा यौवराज्येऽभिषेक्ष्यति॥१९॥ हंत शीघ्रमितो गत्वा द्रक्ष्यामि च महीपतिं॥ सह त्वं परिवारेण सुखमास्स्व रमस्व च॥२०॥ पतिसंमानिता सीता भर्तारमसितेक्षणा॥ आद्वारमनुवव्राज मंगलान्यभिदध्युषी॥२१॥ राज्यं द्विजातिभिर्जुष्टं राजसूयाभिषेचनं॥ कर्तुमर्हति ते राजा वासवस्येव लोककृत॥२२॥ दीक्षितं व्रतसंपन्नं वराजिनधरं शुचिं॥ कुरंगशृंगपाणिं च पश्यती त्वां भजाम्यहं॥२३॥

कं कृत्वा कालांतरेण राजसूयार्हं महाराज्याभिषेचनं कर्तुमर्हति॰ लोककृत ब्रह्मा इंद्रस्येव॥२२॥२३॥ लक्षयित्वेत्यादिभिरष्टश्लोकैरर्थांतरमपि गर्भितं तथा हि॰ अभिप्रायं मम रावणवधरूपमभिप्रायं मंतर्या मिप्रेरणया लक्षयित्वा अनेन मत्प्रेरणयैव तस्या एवं प्रवृत्तिरिति सूचितं॰ मम देवानां जगतश्च प्रियकामा॰ राज्ञश्चात्मन

संमानयामास॰ सुमंत्रवचोंगीकारेत्यर्थः॥१४॥देवश्चदेवीच मातापितरौ॰ मदंतरे मदर्थे संमागम्य मिलित्वा॥अभि
षेचनस्यसम्यक् स्थितं किंचित्॥ध्रुवं निश्चयेन मंत्रयेते विचारयतः॥अत्राभिषेचन सहितं तत्संबंद्धं अ
भिषेकद्वारकमिति यावत् किंचिद्वनगमनरूपं तद्विरुद्धं सप्रत्येवास्माभिश्चिंत्यमानं मंत्रयेतइत्यप्य
र्थोगर्भितोज्ञेयः॥१५॥तत्रतर्कयति॰ लक्षयित्वेति॰ राज्ञोभिप्रायं मदभिषेकविषयं लक्षयित्वा ज्ञात्वा सुदक्षि

एवमुक्तस्तुसंहृष्टोनरसिंहोमहाद्युतिः॥ततःसंमानयामाससीतामिदमुवाचह॥१४॥
देविदेवश्चदेवीचसमागम्यमदंतरे॥मंत्रयेते ध्रुवं किंचिदभिषेचन संहितं॥१५॥
लक्षयित्वाह्यभिप्रायंप्रियकामासुदक्षिणा॥संचोदयति राजानंमदर्थमसितेक्षणा॥१६॥

णासमर्था अतएवराज्ञःप्रियकामा अतएवप्रहृष्टा हितवचनेन कामेन च राजानमनुवर्तितुंशीलंयस्यास्ता
दृशी मेजननीमदर्थकामा महाराजं राजानं इति हर्षवशात्पुनरुक्तिरदोषाय॰ मदर्थं मदभिषेकार्थं रा
जानं संचोदयति॰ त्वरयति॰॥भरतासन्निधौ रामाभिषेकस्त्वत्संमतोनवेति राज्ञापृष्टे सर्वथा मत्संमत
स्त्वरयाक्रियतां॰ भरतःपश्चात्श्रोष्यतीतिप्रेरयतीतिमन्येइत्याशय॥१६॥ राम

२४ कृतकौतुकमंगलः अनुष्ठिताभिषेकोत्सवार्थमंगलः॥२५॥ प्रह्वं प्रांजलिपुटं प्रह्वत्वसूचकांजलिपुटवंतं॥२६॥ अर्थिनः स्वदर्शनस्वाभिषेकाद्यर्थिनः॥२७॥ वैयाघ्रं व्याघ्रचर्मपरिवृतं अतएव राजितं शोभावंतं॥२८॥ मेघनादसदृशं नादं अ संबाधं विपुलं॥ प्रभया रविकिरणसंयुक्तत्वप्रभया मेरुवर्चसमित्यनेन रथस्य

पूर्वां दिशं वज्रधरो दक्षिणां पातु ते यमः॥ वरुणः पश्चिमामाशां धनेशस्तूत्तरां दिशं॥२४॥ अथ सीतामनुज्ञाप्य कृतकौतुकमंगलः॥ निश्चक्राम सुमंत्रेण सह रामो निवेशनात्॥२५॥ पर्वतादिव निष्क्रम्य सिंहो गिरिगुहाशयः॥ लक्ष्मणं द्वारि सोपश्यत्प्रह्वं प्रांजलिपुटं स्थितं॥२६॥ अथ मध्यमकक्ष्यायां समागच्छत्सुहृज्जनैः॥ स सर्वानर्थिनो दृष्ट्वा समेत्य प्रतिनंद्य च॥२७॥ ततः पावकसंकाशमारुरोह रथोत्तमं॥ वैयाघ्रं पुरुषव्याघ्रो राजितं राजनंदनः॥ मेघनादमसंबाधं मणिहेमविभूषितं॥ मुष्णंतमिव चक्षूंषि प्रभया मेरुवर्चसं॥२९॥ करेणुशिशुकल्पैश्च युक्तं परमवाजिभिः॥ हरियुक्तं सहस्राक्षो रथमिंद्र इमिवाशुगं॥३०॥ प्रययौ तूर्णमास्थाय राघवो ज्वलितः श्रिया॥ स पर्जन्यमिवाकाशे स्वनवानभिनादयन्॥३१॥

सौवर्णत्वं बध्नत्यंते॥२९॥ करेणुशिशवः कलभाः अनेनत्व ह्रस्वपुष्टोन्नतमहाबलत्वं सूचितं॰ इंद्रः परमैश्वर्यवान् सहस्राक्षत्वं नानाविधदेहवत्पीभरण स्थैरत्नसमूहैः रामस्य सहस्राक्षत्वं बोध्यं॥३०॥ ज्वलितः दीपितः उज्ज्वलितइतिवा तदा संघिरार्षः आकाशे स्वनवान् नादवान् [illegible] न्वयः॥३१॥

पादेनेनप्रियकामा· अतएवसुदक्षिणा समर्था· राज्ञ आपाततो विपरीतत्वेपि जगतः प्रियत्वेन राज्ञोपि पर्यंतसुखद त्वेनतद्वाक्यकथनेसमर्थः अतएवप्रदृष्टा· ममहितकामेतदर्थमवतारग्रहण हितंकाम्यंचतदनुवर्तनशी ला· अतएवमेर्थकामामदवतारप्रयोजनसिद्धिकामा· महाराजंराजानंमदर्थमदवतारप्रयोजन· रा वणवधफलकवनगमनार्थंत्वरयतीत्यर्थः ॥१८॥१९॥ अर्थे कामकारं मत्कामविषयार्थीकारं यथाभवति तथाप्रहिणोत् ॥१५॥ नादृशः त्वयोद्विग्नचित्तः एतदीयेनैवत्वयोद्विग्नचित्तत्वेनतत्परिषदस्तत्वानुमा नंयौवराज्ये· देवर्षिपरिपालनफलके ॥१९॥२०॥ मंगलान्यभिदध्युषी· प्रस्थानमंगलानि अभिध्यायंती ॥२१॥ तदेवाह राज्यमिति· द्विजातिभिराश्रमस्थैर्ऋषिभिर्जुष्टं· राज्यंवनेराज्यं· तथाराजसूयाभिषे चनं· सर्वतोबलवान्· सर्वपीडकोराजासूयतेकं ह्यतेयत्रतादृशाकर्मणि अभिषेकंकर्तुमर्हति· ॥ तदेवमनसाभिलषितदीक्षितमित्यादि· तत्रराजसूयेदीक्षितत्वादिधर्मकंत्वांपश्यंती अहंत्वांभजिष्ये इत्यर्थः ॥ अनेनाहमपित्वयासहवनंयास्यामीतिसूचितं· ॥ अत्रराजसूयाभिषेचनंकर्तुमर्हतीत्यनेनसंकल्पेनदीक्षितमित्यादिसंकल्पेनमदुक्तार्थगर्भितत्वमेषांश्लोकानांसूचितं ॥ अन्यथा सत्यसंकल्पाभगवत्याः ॥ अग्रेकदापिरामेण राजसूयानुष्ठानात्· ॥ ईदृशसंकल्पविषयार्थासि ध्यास्तत्वंभज्येत· वक्तृश्रोत्रोःसीतारामयोर्वैशिष्ट्याचेदृशार्थीवगतिर्बोध्या ॥२२॥ २३॥

ह्रियतएवममंस्यंत· अतस्तयेत्यादितदुश्चरितावाचःशुश्रावेत्यन्वयः॥४१।४२॥आत्माधिकाराआत्मानमधिकृत्यप्रवृत्ताः॥४३॥श्रियंगमिष्यन्प्राप्स्यन्· गच्छतिपितृगृहमितिशेषः·सर्वेसमृद्धिकामाः॥समृद्धसर्वकामाइत्यर्थः·प्रशास्ता

अमन्यंतह्रितानार्योरामस्यहृदयप्रियं॥तयासुचरितंदेव्यापुरानूनंमहत्तपः॥४१॥रोहिणीवशशांकेनरामसंयोगमायया॥इतिप्रासादशृंगेषुप्रमदाभिर्नरोत्तमः॥४२॥शुश्रावराजमार्गस्थःप्रियावाचउदाहृताः॥४२॥सराघवस्तत्रतदाप्रलापांश्चशुश्राववलोकस्यसमागतस्य॥आत्माधिकाराविविधाश्चवाचःप्रहृष्टरूपस्यपुरेजनस्य॥४३॥एषश्रियंगच्छतिराघवोद्यराजप्रसादाद्विपुलांगमिष्यन्॥एतेवयंसर्वसमृद्धकामायेषामयंनोभवितापशास्ता॥४४॥लाभोजनस्यास्ययदेषसर्वंप्रपत्स्यतेराष्ट्रमिदंचिराय॥नह्यप्रियंकिंचनजातुकश्चित्पश्येन्नदुःखंमनुजाधिपेस्मिन्॥४५॥सघोषवद्भिश्चहयैःसनागैःपुरःसरैःस्वस्तिकसूतमागधैः॥महीयमानःप्रवरैश्चवादकैरभिष्टुतोवैश्रवणोयथाययौ॥४६॥

62

राजा॥४४॥सर्वराष्ट्रं॥एषःप्रपत्स्यतइतियत्· अयमेवलाभः अस्मिन्रामेमनुजाधिपेसतिकश्चित्कश्चिदपिकिंचनःस्वल्पमपिअप्रियंप्रियाभावं·दुःखमनिष्टप्राप्तिंजातुकदापिनपश्येत्नप्राप्नुयात्॥४५॥स्वस्तिकाजयजयेतिवादिनो·सूताद्युतरस्तुतिपाठकाः मागधाः वंशपाठकाः·एतैर्वादिकैस्तत्तच्छब्दप्रयोक्तृभिः॥४६॥

चंद्रचामरेतिपाठेचंद्रवत् श्वेतचामरेत्यर्थः चित्रचामरेतिपाठेचित्रदंडयुतचामरेत्यर्थः॥३२॥हलहलेत्यनुक
करणं॥३३॥तस्यनिष्क्रम्यमाणस्यपुरतइतिशेषः तस्मिन्निष्क्रममाणेइतियावत्॥जनौघस्यहलहलाशब्द

निकेतान्निर्ययौश्रीमान्महाभ्रादिवचंद्रमाः॥चित्रचामरपाणिस्तु लक्ष्मणोराघवानुजः॥३२॥जु
गोपभ्रातरंभ्रातारथमास्थायपृष्ठतः॥ततोहलहलाशब्दस्तुमुलः समजायत॥३३॥तस्यनिष्क्रममा
णस्यजनौघस्यसमंततः॥ततोहयवरामुख्यानागाश्चगिरिसन्निभाः॥३४॥अनुजग्मुस्तदारामंशत
शोथसहस्रशः॥अग्रतश्चास्यसन्नद्धाश्चंदनागरुभूषिताः॥३५॥खड्गचापधराःशूराजग्मुराशं
सवोजनाः॥ततोवादित्रशब्दाश्चस्तुतिशब्दाश्चबंदिनां॥३६॥सिंहनादाश्चशूराणांततःशुश्रुवि
रेपथि॥हर्म्यवातायनस्थाभिर्भूषिताभिःसमंततः॥३७॥कीर्यमाणःसुपुष्पौघैर्ययौस्त्रीभिररिंदमः
रामंसर्वानवद्यांग्योरामपिप्रीषयाततः॥३८॥वचोभिरग्र्यैर्हर्म्यस्थाःक्षितिस्थाश्चववंदिरे॥नूनंनंद
तितेमाताकौसल्यामातृनंदन॥३९॥पश्यंतीसिद्धयात्रंत्वांपित्र्यंराज्यमुपस्थितं॥सर्वसीमंतिनीभ्य
श्चसीतासीमंतिनीवरा॥४०॥

इत्यन्वयः॥३४॥३५॥आशंसवः भद्रमितिशेषः॥३६॥ततइत्यावर्तितेततस्ततःतत्र
तत्रदेशेशुश्रुविरे॥वातायनंवहिरवलोकनयोग्यानिसूक्ष्मद्वाराणि॥३७॥पिप्रीषाप्रीणनेच्छा॥३८॥ववंदिरेअ
स्तुवन् स्तुतिप्रकारमाह॥ नूनमिति॥३९॥सिद्धयात्रंसफलगमनं उपस्थितंप्राप्तवंतं॥सीतासीमंतिनीषुवराश्रे

यथार्हं दर्शनं अद्वेषपवचनादिभिर्यथायोचितमित्यर्थः। आचरितमनुष्ठितं ॥८॥ अनुपालयेत्यादिर्द्धानां वादः ॥९॥
यदि राज्ये प्रतिष्ठितं प्राप्तराज्याभिषेकं रामं यथागतं पितुर्गेहान्निर्यातं निःसरंतं पश्यामः तर्हि नोस्माकं भुक्ते
नाऐहिकविषयभोगजसुखेन तथा परमार्थैः परमार्थस्वर्गसाधनैश्वकर्मभिरलं। न किंचित्तैः फलं सर्व

यथार्हं चापि संपूज्य सर्वानेव नरान्पयौ॥ पितामहैराचरितं तथैव प्रपितामहैः ॥८॥ अद्योपादा
यतं मार्गमभिषिक्तोनुपालय॥ यथास्मयोषिताः पित्रा यथा सर्वैः पितामहैः॥ ततः सुखतरं सर्वे रा
मे वेत्स्याम राजनि ॥९॥ अलमस्माकं हि भुक्तेन परमार्थैरलं च नः॥ यदि पश्याम निर्यातं रामं राज्ये प्र
तिष्ठितं ॥१०॥ ततो हि नः प्रियतरं नान्यत्किंचिद्भविष्यति॥ यथाभिषेको रामस्य राज्येनामिततेज
सः ॥११॥ एताश्चान्याश्च सुहृदामुदासीनः शुभाः कथाः॥ आत्मसंपूजनीः शृण्वन्ययौ रामो महापथं ॥१२॥ म
न हि तस्मान्मनः कश्चिच्चक्षुषी वा नरोत्तमात्॥ नरः शक्नोत्यपाक्रष्टुमतिक्रांते पि राघवे ॥१३॥

सुखस्यैतेनैव लब्धत्वात्तयत्रपर्यंतर्भावेन विपरीतभावनासूचनं ॥१०॥ तदेवाह॰ ततो हीति॰ अमिततेजसो
रामस्य राज्येन राज्यफलको भिषेको यथा प्रियतरस्तथा ततोन्यं न किंचित्प्रियतरं प्रेमास्पदमित्यन्व
यः सद्राज्यफलकत्वात्सर्वसुखस्येति भावः ॥११॥ उदासीनः स्तुतिजहर्षविकाररहितः ॥१२॥ अतिक्रां
ते दृष्टिपथमिति शेषः॥ अत्यंतासक्त्या पुर इव परिस्फुरणात् ॥१३॥ राम

63

४७ इतिश्रीरामाभिरामेश्रीरामीयेरामायणतिलकेअयोध्याकांडेषोडशःसर्गः॥१६॥ सरामइति॥१।२॥मध्येन उभयश्रेणीमध्येन॥३॥उत्तमानांगंधवद्द्रव्याणांसंचयैः क्षौमकौशांबरस्यचसंचयैरित्यन्वयः॥क्षौममतसी

करेणुमातंगरथाश्वसंकुलंमहाजनौघैःपरिपूर्णचत्वरं॥प्रभूतरत्नंबहुपण्यसंचयंददर्शरा मोविमलंमहापथं॥४७॥इत्यार्षेश्रीरामायणेअयोध्याकांडेषोडशःसर्गः॥१६॥सरामोरथमा स्थायसंप्रहृष्टसुहृज्जनः॥पताकाध्वजसंपन्नंमहार्हागरुधूपितं॥१॥अपश्यन्नगरंश्रीमान्ना नाजनसमन्वितं॥सगृहैरभ्रसंकाशैःपांडुरैरुपशोभितं॥२॥राजमार्गंययौरामोमध्येनागरुधू पितं॥चंदनानांचमुख्यानामगरूणांचसंचयैः॥३॥उत्तमानांचगंधानांक्षौमकौशांबरस्यच॥अ विद्धाभिश्चमुक्ताभिरुत्तमैःस्फाटिकैरपि॥४॥शोभमानमसंबाधंतंराजपथमुत्तमं॥संवृतंविवि धैःपुष्पैर्भक्ष्यैरुच्चावचैरपि॥५॥ददर्शतंराजपथंदिविदेवपतिर्यथा॥दध्यक्षतहविर्लाजैर्धूपैर गरुचंदनैः॥६॥नानामाल्योपगंधैश्चसदाभ्यर्चितचत्वरं॥आशीर्वादान्बहून्शृण्वन्बहुभिःसमुदीरितान्॥७॥

जं कौशंपट्टवस्त्रं आविद्धाभिः कृतछिद्राभिः अवद्धाभिरितिपाठेअकृतछिद्राभिः॥४॥असंबाधंविस्ती र्णं संवृतंव्याप्तं अत्रतंराजपथमित्यस्यददर्शेत्यनेनान्वयः॥५॥दृष्टवान्तंराजपथंयथावितिसंबंधः॥६॥

॥७॥

पितुर्वेश्मप्रथिव्यांसर्वगृहेषुश्रेष्ठं प्रविवेशोत्पन्नवय:॥१९॥वाजिभि:रथयुक्तैः॥२०॥सर्वात्क्रम्यपंचकक्ष्या:॥२१॥अति
क्रंसमीपदेशं॥२२॥इतिश्रीरामाभिरामेश्रीरामीयेरामायणतिलकेअयोध्याकांडेसप्तदशः सर्गः॥१७॥शुभे

तत्प्रथिव्यांगृहवरंमहेंद्रसदनोपमं॥राजपुत्रः पितुर्वेश्मप्रविवेशश्रियाज्वलन्॥१९॥सकक्ष्याध
न्विभिर्गुप्तास्तिस्रोतिक्रम्यवाजिभिः॥पदातिरपरेकक्ष्येद्वेजगामनरोत्तमः॥२०॥ससर्वाः समति
क्रम्यकक्ष्यादशरथात्मजः॥सन्निवर्त्यजनंसर्वंशुद्धांतःपुरमत्यगात्॥२१॥तस्मिन्प्रविष्टेपितु
रंतिकंतदाजनः॥ससर्वोमुदितोनृपात्मजे॥प्रतीक्षतेतस्यपुनस्मनिर्गमंयथोदयंचंद्रमसःस
रित्पतिः॥२२॥इत्यार्षेश्रीरामायणेअयोध्याकांडेसप्तदशःसर्गः॥१७॥सददर्शासनेरामोविष
ण्णंपितरंशुभे॥कैकेय्यासहितंदीनंमुखेनपरिशुष्यता॥१॥सपितुश्चरणौपूर्वमभिवाद्यवि
नीतवत्॥ततोववंदेचरणौकैकेय्याःसुसमाहितः॥२॥रामेत्युक्त्वानुवचनंबाष्पपर्याकुलेक्ष
णः॥शशाकनृपतिर्दीनोनेक्षितुंनाभिभाषितुं॥३॥तदपूर्वंनरपतेर्दृष्ट्वारूपंभयावहं॥रामो
पिभयमापन्नः पदास्पृष्ट्वेवपन्नगं॥४॥

आसनेपर्यंके परिशुष्यतामुखेनोपलक्षितं॥१॥विनीत
वत् विनीतःसन्इतियावत् सुसमाहितःतस्याअतिस्वेष्टकरत्वेनजगद्धितकरणेनचतस्यांप्र
सन्नचित्तः॥२॥नाभिभाषितुंरामेत्यक्षरद्वयाधिकमितिशेषः॥३॥रामोपिभयमापन्नःदशरथ विषाद
स्यस्वापराधजन्यत्वशंकया॥४॥ ॥ राम ॥ राम ॥

64

एवंलोकानुरागेकविर्हेतुंदर्शयति॰ यश्चेति॰ रामंनपश्येत्॰ आत्मस्वरूपत्वेनांतर्यामित्वेनवानपश्येत्॰ यथास्थि
तवेषधरिणंवातद्देशस्थंनपश्येत्॰ रामोयंनपश्येत्॰ यन्निरयज्ञानविषयतांनप्राप्नुयात्॰ ज्ञानविषय॰ यत्वमपि
रत्रदृश्यपर्थः अत्यंततद्विषयज्ञानाययतमानोपियस्तन्नलभेदित्यर्थः यथास्थितवेषधारीवायंस्वदेशस्थं
नपश्येत्॰ यद्विषयकज्ञानवान्नभवेत् ससर्वलोकनिंदास्पदं॰ स्वात्मास्वांतःकरणमपि॰ एवंविगर्हतोधि
ग्मांभगवज्ज्ञानायोग्यमिति॰ रामज्ञानंविनासर्वोपिनिंद्यइतिविनोक्तिरलंकारोत्रव्यंग्यः अनेनभगवद्विष

यश्चरामंनपश्येत्तुयंचरामोनपश्यति॥ निंदितःसर्वलोकेषुस्वात्माप्येनंविगर्हते॥१४॥ सर्वेषुसहि
धर्मात्मावर्णानांकुरुतेदयां॥ चतुर्णांहिवयस्थानांतेनम तेतमनुव्रताः॥१५॥ चतुष्पथान्देवपथांश्चै
त्यांश्चायतनानिच॥ प्रदक्षिणंपरिहरन्जगामनरपतेःसुतः॥१६॥ सराजकुलमासाद्यमेघसंघोपमैः।
शुभैः॥ प्रासादशृंगैर्विविधैःकैलासशिखरोपमैः॥१७॥ आवारयद्भिर्गगनंविमानैरिवपांडुरैः।
वर्धमानगृहैश्चापिरत्नजालपरिष्कृतैः॥१८॥

यकज्ञानवानेवधन्यइतिवस्तुव्यज्यते॥१४॥ किंचहि
यतःसधर्मात्माचतुर्णांहिचतुर्णामपिवर्णानांसर्वेष्वप्याश्रमेषु॰ वयस्थानांवयोनुरूपंस्थानंयस्यास्तां
वयोनुरूपांदयांकुरुतइत्यर्थः तेननतेसर्वलोकास्तंरामंकायवाङ्मनोभिरनुव्रतास्तत्पराइत्यर्थः॥१५॥ प्रद
क्षिणंपरिहरन्निति॰ चतुष्पथाद्यपेक्षयास्वस्यदक्षिणभागगमनंपरिहरन्नित्यर्थः॥१६॥ प्रासादशृंगैःप्रा
सादस्थशृंगैः॥१७॥ आवारयद्भिः॰ आक्रमद्भिः॰ वर्धमानगृहैः॰ क्रीडागृहैः रत्नसमुदायालंकृतैरेतैःपरिवृतं॥१८

रामा-अ॰
६५

सदामांप्रतिवत्सलोपि अद्य किमप्रसन्नमनाः हियतोमांनभाषतेऽतोऽप्रसन्नमनस्त्वनिर्णयः १२ शारीरः शरीरव्या-
धिजः संतापः मानसोमनोनिष्ठाधिजोभितापः नबाधतइत्यत्रकाकुः कुतस्तत्राह दुर्लभंहीति मनुष्यशरी
रस्यपापपुण्यारब्धत्वादितिभावः ॥१३॥ भरतेशत्रुघ्नेवामातॄणांममातृषुवाकिंचिदशुभंनपश्यतिक-

अप्रसन्नमनाः किन्नु सदामां प्रतिवत्सलः। विषण्णवदनोदीनो नहिमां प्रतिभाषते ॥१२॥ शारीरो
मानसोवापि कच्चिदेनं नबाधते। संतापोवाभितापोवा दुर्लभं हि सदासुखं ॥१३॥ कच्चिन्न किंचि
द्भरते कुमारे प्रियदर्शने। शत्रुघ्नेवा महासत्वे मातॄणां वा ममाशुभं ॥१४॥ अतोषयन्महारा
जमकुर्वन्वापितुर्वचः। मुहूर्तमपिनेच्छेयं जीवितुं कुपितेनृपे ॥१५॥ यतोमूलंनरः पश्येत्प्रा
दुर्भावमिहात्मनः। कथं तस्मिन्नवर्त्तेत प्रत्यक्षे सति दैवते ॥१६॥ कच्चित्ते परुषं किंचिदभि
मानात्पिताममः। उक्तोभवत्यारोषेण येनास्यलुलितंमनः ॥१७॥ एतदाचक्ष्वमेदेवि तत्वेनपरि
पृच्छतः। किंनिमित्तमपूर्वोयंविकारोमनुजाधिपे ॥१८॥

65

च्चिदित्यन्वयः ॥१४॥ कुपिते अतोषेण
वचनाकरणाद्वा ॥१५॥ यतोमूलंयन्मूलमित्यर्थे आर्षमेतत् प्रादुर्भावंजन्मयत्कारकंपश्येत् जा
नीयात्तस्मिन्प्रत्यक्षेदैवतेसतिनास्मिन्कथमानुकूल्येननवर्त्तेतेत्यर्थः ॥१६॥ तेसंबंधसामान्येष
ष्ठी त्वयाऽभिमानात् गर्वान्ममपितापरुषमुक्तोथवाभवत्याकोपेनकिंचिन्निमित्तकोपेनपरु
षमुक्तोयेनास्यमनोलुलितंकलुषितंदुःखितोक्तित्वादधिकपदत्वादिनदोषः ॥१७॥१८॥

राम
६५

इंद्रियैरित्यादिश्लोकद्वयेदृष्ट्वाभयमापन्नइत्यनुकृष्यते॰ अप्रहृष्टैः खिन्नैः उपलक्षितंव्यथितंखिन्नंआकुलंसंभ्रां
तंचचेतोयस्यतं॥५॥ ऊर्मिमालायुतमक्षोभ्यमपिक्षुभ्यंतंसागरमिवस्थितं॥ उपप्लुतंराहुग्रस्तं॰ उक्तमनृतंयेन
तद्वन्निस्तेजस्कं॥६॥ अचिंत्यकल्पमत्यंतमसंभावितं॰ उपधारयन्॰ किंहेतुकोयंशोकइतिचिंतयन्॰ संर

इंद्रियैरप्रहृष्टैस्तंशोकसंतापकर्शितं॥ निश्वसंतंमहाराजंव्यथिताकुलचेतसं॥५॥ ऊर्मिमालिन
मक्षोभ्यंक्षुभ्यंतमिवसागरं॥ उपप्लुतमिवादित्यमुक्तानृतमृषिंयथा॥६॥ अचिंत्यकल्पंनृपतेस्तं
शोकमुपधारयन्॥ बभूवसंरब्धतरःसमुद्रइवपर्वणि॥७॥ चिंतयामासचतुरोरामःपितृः
हितेरतः॥ किंस्विदद्यैवनृपतिर्नमांप्रत्यभिनंदति॥८॥ अन्यदामांपितादृष्ट्वाकुपितोपिप्रसी
दति॥ तस्यमामद्यसंप्रेक्ष्यकिमायासःप्रवर्त्तते॥९॥ सदीनइवशोकार्त्तोविषण्णवदनद्युतिः
कैकेयीमभिवाद्यैवरामोवचनमब्रवीत्॥१०॥ कच्चिन्मयानापराद्धंअज्ञानाद्येनमेपिता।
कुपितस्तन्ममाचक्ष्वत्वमेवैनंप्रसादय॥११॥

ब्धतरोत्यंतंक्षुभितः॥ यद्यपिपर्वणिसमुद्रस्यचंद्रो
दयात्क्षोभस्तथापिक्षोभमात्रेदृष्टांतः॥७॥ किंस्वत्किंतु॥८॥ अद्यैवेत्येवकारव्यवच्छेद्यमाह॰ अन्यदेत्या
दि॰ तस्यमद्दर्शनेतिप्रीतिमतः॥ आयासःखेदः॥९॥ दीनइवविषण्णवदनद्युतिरिवसरामःशोकार्तइववच
नमब्रवीदितिसंबंधः॥१०॥ नापराद्धं॰ काकुः॰ अपराद्धं॰ अज्ञानात्॰ प्रमादात्॰ प्रसादयमत्कृत्वापराधः॰ शां

राज्ञा राजानुमतामया यदभिहितं तत्त्वपि न विपत्स्यते नमर्थेन भविष्यतितदाहं वक्ष्यामि राजैव वदतु तत्राह नहीत्यादि त्वदप्रियत्वात्त्वत्समक्षं साक्षादिति शेषः॥२६॥ रामोपि दशरथवदेव घोरत्वं ज्ञात्वापि महापुरुषत्वाद्धीरोदात्तत्वात्सर्वथैव करिष्यामीति प्रतिजानीते एनदिति व्यथितः गुरुवचनोल्लंघनमनयामपि शंकितमिति संतप्तः॥२७॥

यदित्वभिहितं राज्ञा त्वयि तन्न विपत्स्यते॥ ततोहमभिधास्यामि नह्येष त्वयि वक्ष्यति॥२६॥ एतत्तु वचनं श्रुत्वा कैकेय्या समुदाहृतं॥ उवाच व्यथितो रामस्तां देवीं नृपसन्निधौ॥२७॥ अहो धिङ्नार्हसे देवि वक्तुं मामीदृशं वचः॥ अहं हि वचनाद्राज्ञः पतेयमपि पावके॥२८॥ भक्षयेयं विषं तीक्ष्णं पतेयमपि चार्णवे॥ नियुक्तो गुरुणा पित्रा नृपेण च हितेन च॥२९॥ तद्ब्रूहि वचनं देवि राज्ञो यदभिकांक्षितं॥ करिष्ये प्रतिजाने च रामो द्विर्नाभिभाषते॥३०॥ तमार्जवसमायुक्तमनार्या सत्यवादिनं॥ उवाच रामं कैकेयी वचनं भृशदारुणं॥३१॥ पुरा देवासुरे युद्धे पित्रा ते मम राघव॥ रक्षितेन वरौ दत्तौ सशल्येन महारणे॥३२॥

ईदृशं अकरणाशंकावचनं यदितहृत्पतइत्यादिकमित्यर्थः॥२८॥ गुरुणा इहामुत्र हितोपदेष्ट्रा॥२९॥ प्रतिजाने कृतसुकृतादिसाक्षितयेति शेषः॥ तदेव स्थिरयति रामो द्विरिति यदुक्तं तदुक्तमेवत हि रुदंनपुनर्वदतीत्यर्थः॥ तत्तदभावविषयतया द्विरावर्तं भाषणं न करोतीति तियावत्॥३०॥३१॥ पूर्वं सशल्येन पश्चाद्धल्यापाकरणापूर्वं मयारक्षितेन॥३२॥ रामरामः

सुनिर्लज्जा-पत्न्यैरेवंविधक्लेशकारिणाल्लज्जारहिता-धर्षं प्रलपन्तत्तोवनंगच्छेत्येवंरूपं॥१९॥मनोगतंत्वदप्रियकर
मितिशेषः॥२०॥तदेवाह-प्रियमिति-कृतंप्रतिज्ञातं-तदप्रियमपित्वयावश्यंपकार्यं-यदिपितृभक्तोसीतिशे
षः॥२१॥किंतत्राह-एषइति-अभिपूज्यतेनैववरदानेनपश्चात्-॥प्रतिज्ञातवरदानकाले॥२२॥प्रतिसृज्य

एवमुक्तातुकैकेयीराघवेणमहात्मना॥उवाचेदंसुनिर्लज्जाधृष्टमात्महितंवचः॥१९॥नराजा
कुपितोरामव्यसनंनास्यकिंचन॥किंचिन्मनोगतंत्वस्यत्वद्भयान्नानुभाषते॥२०॥प्रियंत्वामप्रि
यंवक्तुंवाणीनास्यप्रवर्तते॥तदवश्यंत्वयाकार्यंयदनेनश्रुतंमम॥२१॥एषमह्यंवरंदत्वापु
रामामभिपूज्यच॥सपश्चात्तप्यतेराजायथान्यःप्राकृतस्तथा॥२२॥अतिसृज्यददामीति
वरंममविशांपतिः॥सनिरर्थंगतजलेसेतुंबंधितुमिच्छति॥२३॥धर्ममूलमिदंरामविदितं
चसतामपि॥तत्सत्यंनत्यजेद्राजाकुपितस्त्वत्कृतेयथा॥२४॥यदितदुक्तंराजाशुभंवाय
दिवाशुभं॥करिष्यसिपुनःसर्वमाख्यास्यामिपुनस्त्वहं॥२५॥

प्रतिज्ञाय-॥गतजलेनयादेो॥

दानस्यपूर्वमेवकृतत्वात्तद्विषयव्यवहारपरिहारचिंतावैयर्थ्यंत्यर्थः॥२३॥इदंसत्यंधर्मस्यमूलं-अपिचसता
मपिसत्यंधर्ममूलमित्येतद्विदितं-त्वत्कृतेत्वत्प्रयोजनांतरायवशेनमयिकुपितोराजाकोपदोषेणयथा
नत्यजेत्तथाकुर्विति शेषः एतेनपितुरधर्मात्त्राणंपित्राज्ञापरिपालनंचपुत्रस्यमहान्धर्मइतिसूचितं॥२४॥
दशरथमिवरामपिनिर्बंधान्निनयतीति-राजायदुक्तंतेतद्यदिकरिष्यसिततोहंसर्वंपुनर्विशिष्याख्यास्यामि॥२५॥

अथाभिषेकवनवासयोः समचित्ततयाधीरोदात्तमहापुरुषत्वंरामस्याह·न दिनि· मरणोपमंलोकदृशा॥१॥नह्यभिषतइत्यक्तत्वादेवमस्त्वित्येवंकेवलमाह·।यद्वाएवमस्तुभरताभिषेकोस्तु॥२।३॥मन्युर्नेति·राजाभिप्रायज्ञाने छयाप्रश्नेनेतिशेषः ब्रूमिब्रवीमि·एतावज्ज्ञात्वासर्वथायास्याम्येववनंत्वन्यथाशंकितव्यमितिभावः॥४॥कृत

तदप्रियममित्रघ्नोवचनंमरणोपमं॥श्रुत्वानविव्यथेरामःकैकेयींचेदमब्रवीत्॥१॥एवमस्तु गमिष्यामिवनंवस्तुमहंत्वितः॥जटाचीरधरोराज्ञःप्रतिज्ञामनुपालयन्॥२॥इदंतुज्ञातुमिच्छामि किमर्थंमांमहीपतिः॥नाभिनंदतिदुर्धर्षोयथापूर्वमरिंदमः॥३॥मन्युर्नचत्वयाकार्योदेविब्रूमित वाग्रतः॥यास्यामिभवसुप्रीतावनंचीरजटाधरः॥४॥हितेनगुरुणापित्राकृतज्ञेननृपेणच॥नियु ज्यमानोविस्रब्धःकिंनकुर्यामहंप्रियं॥५॥अलीकंमानसंत्वेकंहृदयंदहतेमम॥स्वयंयन्नाह मांराजाभरतस्याभिषेचनं॥६॥अहंहिसीतांराज्यंचप्राणानिष्टान्धनानिच॥हृष्टोभ्रात्रेस्वयंदद्यां भरतायप्रचोदितः॥७॥

हितेनत्वत्कृतस्यापत्राणहेतुना·विस्रब्धःनिर्विशंकः॥५॥किंत्विदंमानसंम नसिवर्त्तमानं॥अलीकंदुःखं·किंतत्राह·स्वयमित्यादि॥६॥अयमर्थस्त्वत्दुःखावहत्वाज्ज्ञा तवसात्राहतुमशक्यइतिचेत्तत्राह·॥अहंहीति·प्रचोदितःत्वयापीतिशेषः॥प्रतिज्ञाकारणंविनापि त्वदुक्तिमात्रेणराज्यादिदद्यां॥७॥

67

तत्रतयोर्वरयोरेकेन॥ अद्यैवएतत्सर्वं॥३३॥यदीति॥राज्ञात्वयाचमदुक्तकृतेःसशपथंप्रतिज्ञातत्वादितिभावः
३४॥संनिदेशे॥पितृप्रतिज्ञासंपादने॥३५॥अभिषेचनं अभिषेकोपकरणं॥३६॥अभिषेकंतदुपकरणं॥३७॥३८॥

तत्रमेयाचितोराजा भरतस्याभिषेचनं॥गमनंदंडकारण्येतवचाद्यैवराघव॥३३॥यदिसत्यप्रतिज्ञंत्वंपि
तरंकर्तुमिच्छसि॥आत्मानंचनरश्रेष्ठममवाक्यमिदंशृणु॥३४॥सन्निदेशेपितुस्तिष्ठयथानेनप्र
तिश्रुतं॥त्वयारण्यंप्रवेष्टव्यंनववर्षाणिपंचच॥३५॥भरतश्चाभिषिच्येतयदेतदभिषेचनं॥त्वद
र्थेविहितंराज्ञातेनसर्वेणराघव॥३६॥सप्तसप्तचवर्षाणि॥दंडकारण्यमाश्रितः॥अभिषेक
मिदंत्यक्त्वाजटाचीरधरोभव॥३७॥भरतःकोसलपतेःप्रशास्तुवसुधामिमां॥नानारत्नसमाकी
र्णांसवाजिरथसंकुलां॥३८॥एतेनत्वांनरेंद्रोयंकारुण्येनसमाप्लुतः॥शोकैःसंक्लिष्टवदनोनश
क्नोतिनिरीक्षितुं॥३९॥एतत्कुरुनरेंद्रस्यवचनंरघुनंदन॥सत्येनमहतारामतारयस्वनरेश्वरं॥४०॥इ
तीवतस्यांपरुषंवदंत्यांनचैवरामःप्रविवेशशोकं॥प्रविव्यथेचापिमहानुभावोराजाचपुत्रव्यस
नाभितप्तः॥४१॥इत्यार्षेश्रीरा॰अ॰ऽष्टादशः सर्गः॥१८॥
म॰२
तेनवरद्वयप्रदानेननिमित्तेन॥३९॥सत्येनसत्य
परिपालनेन॥४०॥शोकंतत्कृतंचित्तविकारं॥नप्रविव्यथेच॥मनसेतिशेषः॥राजाचराजातुपुत्रव्यसनाभितप्तः
भावितदुःखयोगव्यसनेनाभितप्तोबभूवेतिशेषः॥४१॥इतिश्रीरामाभिरामेश्रीरामीयेरामायणतिलकेअ॰ऽष्टादशः सर्गः॥१

रामा॰अ॰ ६८

राजाभिनंदनहेतुमाह॰ व्रीडेति॰ स्वसत्यस्य पारप्राप्त्यदर्शनजलज्ञायुक्तः चोहेतौ॰ अतस्त्वां नाभिभाषते॰ एतदनभिभाषणं न किंचित्तन्नान्यकारणकं त्वद विलंबगमनाभावरूपकारणमतएवमनुः राज्ञोदैन्यस्वाविलंबगमनेनापनीयतां त्वयेति शेषः॥१५॥ इतोपिन युक्तो विलंब इत्याह॰ यावदिति॰ मयादरिद्राधमर्णात्वेनतथाशप

व्रीडान्वितः स्वयंयच्च नपस्त्वां नाभिभाषते॥ नैतत्किंचिन्नरश्रेष्ठ मन्युरेषोपनीयतां॥१५॥ यावत्त्वं न वनं यातः पुरादस्मादतित्वरन्॥ पिता तावन्न ते राम स्नास्यते भोक्ष्यते पिवा॥१६॥ धिक्कष्टमिति निश्वस्य राजाशोकपरिप्लुतः॥ मूर्छितोन्यपतत्तस्मिन्पर्यंके हेमभूषिते॥१७॥ रामोप्युत्थाप्य राजानं कैकेय्याभिप्रचोदितः॥ कशयेव हतोवाजी वनं गंतुं कृतत्वरः॥१८॥ तदप्रियमनार्याया वचनं दारुणोदयं॥ श्रुत्वा गतव्यथो रामः कैकेयीं वाक्यमब्रवीत्॥१९॥ नाहमर्थपरो देवि लोकमावस्तुमुत्सहे॥ विद्धि मामृषिभिस्तुल्यं विमलं धर्ममास्थितं॥२०॥ यत्तत्रभवतः किंचिच्छक्यं कर्तुं प्रियं मया प्राणानपि परित्यज्य सर्वथा कृतमेव तत्॥२१॥

थैः प्रतिबंधादितिभावः॥१६॥१७॥ कृतत्वरो भूदिति शेषः॥१८॥ दारुणोदयं दारुणार्थकं प्रश्नोत्तरं॥१९॥ लोकमावस्तुं लोके वस्तुं नोत्सहे अर्थपरो धनपरः विमलं धर्ममास्थितं तत्वज्ञानरूपं धर्ममाश्रितं॰ ऋषयोत्र तत्वज्ञाः एतेन स्वस्य सुखदुःखयोः समता निवृत्तिमार्गस्थता च स्वाभाविकीति ध्वनितं॥२०॥ तत्रभवतः पूज्यस्य पितुः वनगमनं क्रियतत्ययत्किंचिदतोधिक

राम ६८

68

तत्रकिंवक्तव्यंत्वत्प्रियार्थंराज्ञाप्रेरितःस्वकृतप्रतिज्ञामनुपालयन्हेतौशता·तत्पालनाद्धेतोराज्यंददामित्यर्थः ८
मद्विषयकनियोगसंकोचेनह्रीमंतंराजानंआश्वासय·इदंकिं·किंहेतुकं·यदित्यादि ९ अनिर्वृत्तस्वका

किंपुनर्मनुजेंद्रेणस्वयंपित्राप्रचोदितः तवचप्रियकामार्थंप्रतिज्ञामनुपालयन् ॥ ८ ॥
तथाश्वासयह्रीमंतंकिंत्विदंयन्महीपतिः वसुधासक्तनयनोमंदमश्रूणिमुंचति ॥ ९ ॥
गच्छंतुचैवानयितुंदूताःशीघ्रजवैर्हयैः भरतंमातुलकुलादद्यैवनृपशासनात् ॥ १० ॥
दंडकारण्यमेषोहंगच्छाम्येवहिसत्वरः अविचार्यपितुर्वाक्यंसमावस्तुंचतुर्दश ॥ ११ ॥
साहृष्टातस्यतद्वाक्यंश्रुत्वारामस्यकैकयी प्रस्थानंश्रद्दधानासात्वरयामासराघवं ॥ १२ ॥
एवंभवतुयास्यंतिदूताःशीघ्रजवैर्हयैः भरतंमातुलकुलादिहावर्तयितुंनराः ॥ १३ ॥ तव
त्वहंक्षमंमन्येनोत्सुकस्यविलंबनं रामतस्मादितःशीघ्रंवनंत्वंगंतुमर्हसि ॥ १४ ॥

र्या·कथमाश्वासयामीत्यतआह गच्छंत्वित्यादि १० अविचार्ययुक्तायुक्तविचारमकृत्वैवेत्यर्थः ११
प्रस्थानंवनगमनंश्रद्दधानाअवश्यमयंप्रस्थानंकरिष्यतीतिनिश्चयवती १२ १३ उत्सुकस्यवन
गमनोत्सुकस्य·क्षमंयुक्तं ॥ १४ ॥

केकेयीप्रदक्षिणांसम्यगाचरितंमदीयंत्वयेत्यंतःसंतोषात्शिष्टाचाराच्चेतिबोध्यं॥२९॥बाष्पपरिपूर्णाक्षःसमीपस्थित्वावगतवृत्तांतत्वात्‌ परमक्रुद्ध इत्यनेनलक्ष्मणेऽविद्याविक्षेपशक्तिमतीदर्शिता रामेचनसाऽस्तीतिध्वनितं ३०॥आभिषेचनिकंअभिषेकप्रयोजनं भांडमुपकरणजातं॥तद्युक्ताभिषेकशालामितियावत्‌सन्निहितगंगादिषुपुण्यतीर्थकत्वात्‌ तत्रअभिषेकशालायांदृष्टिमविचालयन्॥अप्रवर्त्तयन्सापेक्षःवनं

सरामःपितरंकृत्वाकैकेयींचप्रदक्षिणां॥निष्क्रम्यांतःपुरात्तस्मात्स्वंददर्शसुहृज्जनं॥२९॥तंबाष्पपरिपूर्णाक्षःपृष्ठतोनुजगामह॥लक्ष्मणःपरमःक्रुद्धःसुमित्रानंदवर्धनः॥३०॥आभिषेचनिकंभांडंकृत्वारामःप्रदक्षिणां॥शनैर्जगामसापेक्षोदृष्टिंतत्राविचालयन्॥३१॥नचास्यमहतींलक्ष्मींराज्यनाशोपकर्षति॥लोककांतस्यकांतत्वाच्छीतरश्मेरिवक्षयः॥३२॥नवनंगंतुकामस्यत्यजतश्चवसुंधरां॥सर्वलोकातिगस्येवलक्ष्यतेचित्तविक्रिया॥३३॥ राम ॥

69

प्रतीतिशेषः॥यद्वालोकसमाधानायतदनुग्रहायनरवत्‌आत्मगोपनायलोकव्यवहारात्प्रागायचसापेक्षःसइवतत्रदृष्टिमविचालयन्‌अत्यजन्‌अतएवशनैर्जगाम॥३१॥धीरोदात्तत्वाद्व्रतद्विषितप्रयुक्तक्रोधदुःखादित्याह॥नचेति॥लक्ष्मीसहजांशोभां कांतत्वात्‌ अविनाशिकांतियुक्तत्वात्‌लोककांतस्यशीतरश्मेः॥इंदोःक्षयोयथा॥लक्ष्मीनापकर्षतितद्वत्‌॥३२॥सर्वलोकातिगस्यवजीवन्मुक्तस्येव॥३३॥

तथानिश्चयेहेतुमाह॥ नहीति॥ हि हेतौ॥ शुश्रूषापादसंवाहनादिरूपा॥ वचनक्रिया आज्ञप्तकरणं ॥२२॥ अत्रभवतापू
ज्येन पित्रा॥ भवत्यावचनात्पितृवचनवत्॥ तत्पत्नीवचनस्याप्यवश्यकर्तव्यत्वात्॥ अनेनसापत्नमातुरप्यनिष्ट
मपिवचनमेवंपरिपाल्यंकिमुतमातापित्रोरितिसूचितं॥२३॥ हेकैकेयिनूनंमयिकिंचित्कमपिगुणंनाशंसे

नह्यतोधर्मचरणंकिंचिदस्तिमहत्तरं॥ यथापितरिशुश्रूषातस्यवावचनक्रिया॥२२॥ अनुक्तोप्यत्रभ
वताभवत्यावचनादहं॥ वनेवत्स्यामिविजनेवर्षाणीहचतुर्दश॥२३॥ ननूनंमयिकैकेयिकिंचिदाशं
ससेगुणान्॥ यद्राजानमवोचस्त्वंममेश्वरतरासती॥२४॥ यावन्मातरमापृच्छेसीतांचानुनयाम्यहं
ततोद्यैववगमिष्यामिदंडकानांमहद्वनं॥२५॥ भरतःपालयेद्राज्यंशुश्रूषेच्चपितुर्यथा॥ तथाभवत्या
कर्तव्यंसहिधर्मःसनातनः॥२६॥ रामस्यतुवचःश्रुत्वाभृशंदुःखगतःपिता॥ शोकादशक्नुवन्व
क्तुंप्ररुरोदमहास्वनं॥२७॥ वंदित्वाचरणौराज्ञोविसंज्ञस्यपितुस्तदा॥ कैकेय्याश्चाप्यनार्याया नि
ष्पपातमहाद्युतिः॥२८॥

नजानासि॥ तत्रहेतुर्यदित्यादि॥ मुख्यानितिपाठे पितृपत्न्याद्याज्ञापरिपालना
दिरूपानित्यर्थः॥२४॥ यावदिति॥ पूर्वार्धेनावत्त्वमांकुर्विति शेषः॥ ततस्तदनंतरं॥ दंडकानांतन्नामक
क्षत्रियाणांतन्नामकजनपदरूपंशापवशाद्वनत्वंप्राप्तं॥२५॥ सहिपितृशुश्रूषारूपः॥२६॥ वाष्पंरोद्धु
मशक्नुवन्॥२७॥ अनार्यायाःतादृश्याअपि॥ स्वयंतद्दोषमगणयन्निति शेषः॥ निष्पपातनिश्चक्राम॥२८॥

लोकदृष्ट्या अर्थविपत्तिमर्थभ्रंशं वीक्ष्यापि रामो विक्रियां न जगाम किंतु सुहृज्जन-कौसल्यादशरथादिरूपस्यात्म
नां प्राणानां विपत्तिशंकया चिंतां जगामेति शेषः ४१ इति श्री रामाभिरामे श्री रामीये रा० ति० अ० एकोन
विंशः सर्गः ॥१९॥ तस्मिन्निति ॥१॥ यः पित्राऽचोदितोपि सर्वस्य जनस्यांतः पुरस्य च कृत्येषु प्रवर्तते इ

प्रविश्य वेश्म नातिभृशं समुदायुतं समीक्ष्य तां चार्थविपत्तिमागतां ॥ न चैव रामोऽत्र जगाम विक्रि
यां सुहृज्जनस्यात्मविपत्तिशंकया ॥४०॥ इत्यार्षे श्री रा० अयो० एकोनविंशः सर्गः ॥१९॥
तस्मिंस्तु पुरुषव्याघ्रे निष्क्रामति कृतांजलौ ॥ आर्तशब्दो महान् जज्ञे स्त्रीणामंतःपुरे तदा
॥१॥ कृत्येष्वचोदितः पित्रा सर्वस्यांतःपुरस्य च ॥ गतिश्च शरणं चासीत्स रामोद्य प्रवत्स्यति ॥२॥
कौसल्यायां यथा युक्तो जनन्यां वर्तते सदा ॥ तथैव वर्ततेऽस्मासु जन्मप्रभृति राघवः ॥३॥ न क्रु
ध्यत्यभिशप्तोपि क्रोधनीयानि वर्जयन् ॥ क्रुद्धान्प्रसादयन्सर्वान्स इतोद्य प्रवत्स्यति ॥४॥
अबुद्धिर्बत नो राजा जीवलोकं चरत्ययं ॥ यो गतिं सर्वभूतानां परित्यजति राघवं ॥५॥

ति शेषः यो गतिः प्राप्यस्य वस्तुनः प्राप्तिमार्गः शरणं रक्षणं ॥२॥ युक्तः सेवातत्परः ३ अभिशप्तोपि ।
अस्मैनकृतवाक्पारुष्येपि न क्रुध्यति क्रोधनीयानि अन्यस्य क्रोधोत्पादकानि । अननुकंपया वर्जयन्
अनेन क्रोधक्रियाकर्तृकत्वमेतत्त्वयोः प्रतिषेधः यत्र कुत्रापि क्रुद्धान्स्वयं प्रसादयन् तिष्ठतीति
शेषः ४ जीवलोकं सर्वप्रजारूपं चरति भक्षयति नाशयतीति यावत् ॥५॥ राम

छत्रादिप्रतिषेधः स्वप्रतिज्ञाविरोधात् व्यजने चामरे॥३४॥ मनसा दुःखं धारयन् इंद्रियाणि निगृह्य मनसः दुःखा-
भिव्यंजकचेष्टारहितानि कृत्वा आत्मवान् धीरोदात्तः मनसा दुःखं परमसुखं दुःखलेशेनापि रहितं वनगमन-
जं धारयन् इंद्रियाणि निगृह्य तस्य सुखस्य लोकरक्षा राज्यभंगजदुःखस्य वा यथाभिव्यक्तिर्न भवति
तथा मध्यस्थतया स्थापयित्वा आत्मवान् साक्षात्कृतनित्यनिर्दुःखस्वतत्त्व इत्यप्यर्थो तरमत्र व्यंग्य बो

प्रतिषिध्य शुभं छत्रं व्यजने च स्वलंकृते॥ विसर्जयित्वा स्वजनं रथं पौरांस्तथा जनान्॥३४॥ धार
यन् मनसा दुःखमिंद्रियाणि निगृह्य च॥ प्रविवेशात्मवान्वेश्म मातुरप्रियशंसिवान्॥३५॥ सर्वो
प्यभिजनः श्रीमान् श्रीमतः सत्यवादिनः॥ नालक्षयत रामस्य कंचिदाकारमानने॥३६॥ उचितं च म
हाबाहुर्न जहौ हर्षमात्मवान्॥ शारदः समुदीर्णांशुश्चंद्रस्तेज इवात्मजं॥३७॥ वाचा मधुरया रामः
सर्वं संमानयञ्जनं॥ मातुः समीपं धर्मात्मा प्रविवेश महायशाः॥३८॥ तं गुणैः समतां प्राप्तो भ्राता वि
पुलविक्रमः॥ सौमित्रिरनुवव्राज धारयन्दुःखमात्मजं॥३९॥

धं दुःखमित्यस्यैकैकेयात्लोकाप
वादजमित्यर्थ इति कश्चित् अप्रियशंसिवान् अप्रियं शंसिष्यन् कसुश्चार्षः॥३५॥ अभिजनोभितो वर्त्तमा
नो जनः श्रीमान् रामाभिषेकप्रसंगेन कृतैरलंकरणैः शोभावान् आकारं विकृताकारं नालक्षयत अस
त्वादेवेत्यर्थः॥३६॥ उचितं सहजसत्त्वगुणोचितं वनगमनलाभोचितं च आत्मजं हर्षं आत्मनि शरीरेणा
तं स्वभावसिद्धं हर्षचिन्हं॥३७॥

तदाह। हावयंतीमिति॥१६॥ हविषः हवींषि॥१७॥ कृसरं तिलमुद्गतंडुलौदनं॥१८॥ व्रतयोगेनः पुत्राभ्युदयकामनया तद्देवोपवासव्रतयोगेनेत्यर्थः देवतातर्पयंती। वरवर्णिनीतांददर्शेत्यन्वयः॥१९॥ अ

प्रविश्य तु तदा रामो मातुरंतःपुरं शुभं॥ ददर्श मातरं तत्र हावयंतीं हुताशनं॥१६॥ देवकार्यनिमित्तं च तत्रापश्यत्समुद्यतं॥ दध्यक्षतघृतं चैव मोदकान्हविषस्तथा॥१७॥ लाजान्माल्यानि शुक्लानि पायसं कृसरं तथा॥ समिधः पूर्णकुंभांश्च ददर्श रघुनंदनः॥१८॥ तां शुक्लक्षौमसंवीतां व्रतयोगेन कर्शितां॥ तर्पयंतीं ददर्शाद्भिर्देवतां वरवर्णिनीं॥१९॥ सा चिरस्यात्मजं दृष्ट्वा मातृनंदनमागतं॥ अभिचक्राम संहृष्टा किशोरं वडवा यथा॥२०॥ स मातरमुपक्रांतामुपसंगम्य राघवः॥ परिष्वक्तश्च बाहुभ्यामवघ्रातश्च मूर्धनि॥२१॥ तमुवाच दुराधर्षं राघवं सुतमात्मनः॥ कौसल्या पुत्रवात्सल्यादिदं प्रियहितं वचः॥२२॥ वृद्धानां धर्मशीलानां राजर्षीणां महात्मनां॥ प्राप्नुह्यायुश्च कीर्तिं च धर्मं चाप्युचितं कुले॥२३॥ सत्यप्रतिज्ञं पितरं राजानं पश्य राघव॥ अद्यैव त्वां स धर्मात्मा यौवराज्येऽभिषेक्ष्यति॥२४॥

भिचक्राम अभिमुखं जगाम। किशोऽश्वबालकः॥२०॥ उपसंगम्य अभिवाद्य। स्थितस्तया परिष्वक्त इत्यन्वयः॥२१॥२२॥ कुलेऽउचितं कुलस्योचितमिति यावत्॥२३॥ राजानं पश्य गत्वेति शेषः॥ कौसल्याया राजगृहगमनादिव्यापारापरिज्ञानादेव मुक्तिः॥२४॥ श्रीरामचंद्रजी

प्रतिमाचुक्रुशुः निनिंदुः सस्वरंचुक्रुशुः रुरुदुः ॥ ६ ॥ व्यालीयतदेहमवगुंठ्याविशुरवोविलीनइवाभूदित्यर्थः
७ ॥ आयस्तः स्वजनदुःखतः प्राप्तखेदः कुंजरइवनिःश्वसन् ॥ आयत्तइतिपाठेआयत्तः पराधीनोयः कुंज

इतिसर्वामहिष्यस्ताविवत्साइवधेनवः ॥ पतिमाचुक्रुशुश्चापिसस्वनंचापिचुक्रुशुः ॥ ६ ॥ सहिचां
तः पुरेघोरमार्त्तशब्दंमहीपतिः ॥ पुत्रशोकाभिसंतप्तः श्रुत्वाव्यालीयतासने ॥ ७ ॥ रामस्तुभ्
शमायस्तोनिश्वसन्निवकुंजरः ॥ जगामसहितोभ्रात्रामातुरंतःपुरंवशी ॥ ८ ॥ सोपश्यत्पुरुषंतत्र
वृद्धंपरमपूजितं ॥ उपविष्टंगृहद्वारितिष्ठतश्चापरान्बहून् ॥ ९ ॥ दृष्ट्वैवतुतदारामंतेसर्वेसु
मुपस्थिताः ॥ जयेनजयतांश्रेष्ठंवर्धयंतिस्मराघवं ॥ १० ॥ प्रविश्यप्रथमांकक्ष्यांद्वितीयायां
ददर्शसः ॥ ब्राह्मणान्वेदसंपन्नान्वृद्धान्राज्ञाभिसत्कृतान् ॥ ११ ॥ प्रणम्यरामस्तान्वृद्धांस्तृती
यायांददर्शसः ॥ स्त्रियोबालाश्चवृद्धाश्चद्वाररक्षणतत्पराः ॥ १२ ॥ वर्धयित्वाप्रहृष्टास्ताः ।
प्रविश्यचगृहंस्त्रियः ॥ न्यवेदयतत्वरितंराममातुःप्रियंतदा ॥ १३ ॥ कौसल्यापितदादेवीरा
त्रिंस्थित्वासमाहिता ॥ प्रभातेचाकरोत्पूजांविष्णोःपुत्रहितैषिणी ॥ १४ ॥ साक्षौमवसनाहृष्टा
नित्यंव्रतपरायणा ॥ अग्निंजुहोतिस्मतदामंत्रवत्कृतमंगला ॥ १५ ॥

रः सयथानिःश्वसितितद्व
दित्यर्थः ॥ ८ ॥ पुरुषंद्वाराध्यक्षं ॥ ९ ॥ जयेनविजयीभवेतिशब्देनेत्यर्थः जयेतीतिपाठेजयेतिशब्देनेत्यर्थः
१० ॥ ११ ॥ सरामःतृणीकृतराज्योरामः ॥ १२ ॥ वर्धयित्वाजयशब्देनेतिशेषः प्रियंरामागमनं ॥ १३ ॥ १४ ॥ अग्निं

वन्यानि वानप्रस्थयोग्यकर्माणि । आसेवमानः आचरन् । यद्वा वन्यानि वल्कलानि दधानः वर्तयन् जीवन् ॥ ३१ ॥
यष्टिः शाखा ॥ ३२ ॥ ३३ ॥ वाहितां पूर्वं वाहितभारां ततः श्रमनिवृत्तये उपावृत्तपांसुविलुण्ठनं कृत्वोत्थितां वडवा

सप्तदश चाष्टौ च वर्षाणि वत्स्यामि विजने वने ॥ आसेवमाना वन्यानि फलमूलैश्च वर्तयन् ॥ ३१ ॥
सा निकृत्तेव सालस्य यष्टिः परशुना वने ॥ पपात सहसा देवी देवतेव दिवश्च्युता ॥ ३२ ॥ ताम
दुःखोचितां दृष्ट्वा पतितां कदलीमिव ॥ रामस्तूत्थापयामास मातरं गतचेतसं ॥ ३३ ॥ उपावृ
त्योत्थितां दीनां वडवामिव वाहितां ॥ पांसुगुण्ठितसर्वांगीं विममर्श च पाणिना ॥ ३४ ॥ सा राघ
वमुपासीनमसुखार्ता सुखोचिता ॥ उवाच पुरुषव्याघ्रमुपशृण्वति लक्ष्मणे ॥ ३५ ॥ यदि पु
त्र न जायेथा मम शोकाय राघव ॥ न स्म दुःखमतो भूयः पश्येयमहमप्रजा ॥ ३६ ॥ एक एव हि
वंध्यायाः शोको भवति मानसः ॥ अप्रजास्मीति संतापो न ह्यन्यः पुत्र विद्यते ॥ ३७ ॥ राम

वामिव ॥ ३४ ॥ असुखेन सुखनशेनार्ता उपासीनं समीपे स्थितं ॥ ३५ ॥ अप्रजाः वंध्याः अतः वंध्यात्वात् भूयः
वंध्याधिकं पुत्रवियोगजं दुःखं न पश्येयं ॥ ३६ ॥ वंध्यात्वाद्दुःखमितः सुसहमित्याह एक एवेति अप्र
जास्मीति मानसशोकाभिनयः समासांताभावोऽनित्यत्वात् संधिर्वार्षत्वात् ॥ ३७ ॥ ॥

अत्रोपविश्य प्रभुक्तारा जानंद्स्युंगच्छेति भोजनेनेन फलेन निमंत्रितो राघवः केवलमासनमात्लभ्यस्य स्थानत्लपविश्यो त्री
डया किंचिदंजलिं प्रसार्य बाष्पमुख एवाब्रवीत् प्रसार्या जलिरिति पाठे प्रकर्षेण ासन्नांजलिर्विशीर्णांजलि
रित्यर्थः इति कश्चित् मातुः प्रसादनयोग्यांजलिरित्यर्थः उचितः किंचिदित्यस्य चावाङ्मुखङ्निशेषः ॥२५॥ गौ

दत्तमासनमालभ्य भोजनेन निमंत्रितः ॥ मातरं राघवः किंचित्प्रसार्यांजलिमब्रवीत् ॥२५॥ स स्वभा
वविनीतश्च गौरवाच्च तथानतः ॥ प्रस्थितो दंडकारण्यमाप्रष्टुमुपचक्रमे ॥२६॥ देवि नूनं न जानी
षे महद्भयमुपस्थितं ॥ इदं तव च दुःखाय वैदेह्या लक्ष्मणस्य च ॥२७॥ गमिष्ये दंडकारण्यं किमनेनासनेन मे ॥ विष्टरासनयोग्यो हि कालोयं मामुपस्थितः ॥२८॥ चतुर्दश हि वर्षाणि वत्स्यामि वि
जने वने ॥ कंदमूलफलैर्जीवन् हित्वा मुनिवदामिषं ॥२९॥ भरताय महाराजो यौवराज्यं प्रय
च्छति ॥ मां पुनर्दंडकारण्यं विवासयति तापसं ॥३०॥

स्वाच्च मातृत्वप्रयुक्तगौरवाच्च आनतः सन् प्रस्थि
तः प्रस्थातुमुपक्रांतः आप्रष्टुं अनुज्ञां कारयितुं उपचक्रमे ॥२६॥ न वेच्चतवैव अज्ञत्वात् लोकदृष्या
ह वैदेह्या इत्यादि ॥२७॥ विष्टरस्तपस्विनामासनविशेषः पंचाशद्भिर्भवेद्ब्रह्मा तदर्धेन तु विष्टर इत्यु
क्तेः ॥२८॥ मुनिवदामिषं सद्रव्यैर्विशिष्टसंस्कारसंस्कृतं मांसं तेनेदं मेध्यमिदं स्वादु निष्पन्नमिदमग्निने
ति वक्ष्यमाणेन न विरोधः तस्य शुद्धमांसपरत्वात् मुनिवदित्युक्त्या श्राद्धीयादिमांसपरत्वाच्च ॥२९॥३०॥

सस्सर्वोऽपि दुष्टः जनः कदाचिदागतं कैकेय्याः पुत्रमवलोकयमानो नाभिभाषते इदानीमप्येवमवस्था मम वर्तते त्वयि
गते तु किं वक्तव्यमिति भावः ॥४३॥ खरवादिनं लुगभावश्चार्षः खरवादि परुषवदनशीलं तस्या वदनं कथं द्रष्टुं
शक्ष्यामि दुर्गता त्वद्वियोगेन दुर्दशामापन्ना ॥४४॥ जातस्य उपनयनाख्याद्द्वितीयाज्जन्मनेति शेषः ॥ अनषोड
शवर्षो मे रामो राजीवलोचन इति विश्वामित्रमुद्दिश्य दशरथोक्त्या विवाहकाले पंचदशवर्षत्वोक्तेः ।
तत्र द्वादशवर्षाणि राघवः सह सीतया रमयामास धर्मात्मा नारायण इव श्रिया तस्मिन्काले महाराजः

योऽहि मां सेवते कश्चिदपि वाप्यनुवर्तते ॥ कैकेय्याः पुत्रमन्वीक्ष्य स जनो नाभिभाषते ॥४३॥ नित्य
क्रोधतया तस्याः कथं नु खरवादि तत् ॥ कैकेय्या वदनं द्रष्टुं पुत्र शक्ष्यामि दुर्गता ॥४४॥ सप्तदश च व
र्षाणि जातस्य तव राघव ॥ अतीतानि प्रकांक्षंत्या मया दुःखपरिक्षयं ॥४५॥

प्रीतो रामस्य सद्गुणैः ज्ये
ष्ठं राज्येन संयोक्तुमैच्छत्सर्वनृपाज्ञयेति पाद्मोक्तेश्च उपनयनं च गर्भैकादशे वा राजन्यमिति स्मृते द्वादश
मे वर्ष इति बोध्यं । एवमुपनयनोत्तरं सप्तदश वर्षाणि अतीतानि जातस्य तव अतः परं यौवराज्येन दुः
खपरिक्षयं प्रकांक्षंत्या मया तद्विघाते तस्या वदनं कथं नु द्रष्टुं व्यमित्यनुकर्षः वस्तुतस्तु इप्यणाद्इति सू
त्रस्य भाष्योक्तरीत्या प्रविश पिंडीमित्यादौ यथा प्रविश गृहं पिंडीं भक्षयति वाक्यार्थे प्रविशेति पिंडीमि
ति च वाक्यैकदेशस्य प्रयोगस्तथा द्विर्दर्शेति वाक्यस्यार्थे तावैकदेशप्रयोगोऽयं द्विराद्यत्तादश विंश
तिः सप्त चेत्यर्थ अत्र तात्पर्यग्राहिका विश्वामित्रं प्रति दशरथोक्तिः पाद्मोक्तिश्च तादृशप्रयोगश्च कौस

स्वस्यसदादुःखित्वमितिशोचति·नेति·पत्युःपौरुषंअनुरागकृतंरंजनंतस्मिन्सत्यपिकल्याणंप्रशस्तवस्त्राभ
रणादिजसौभाग्याधिक्यंसुखंवा· पतिसंभोगजंतन्मयानदृष्टपूर्वं॥ अपीतिलोकोक्तौपुत्रेजातेतदुभयंउक्तक
ल्याणंपुत्रदर्शनजंसुखंचपश्येयमित्याशयारामममयास्थितंजीवनंस्थापितं॥३८॥साहंअवराणांकनिष्ठानां
सपत्नीनांत्वद्बलादिदानींपरासती· हृदयच्छिदांहृदयविदारिकाणांतासाममनोज्ञानिवाक्यान्येवंजीर्णापि

नदृष्टपूर्वंकल्याणंसुखंवापतिपौरुषे॥अपिपुत्रेविपश्येयमितिरामास्थितंमया॥३८॥साबहू
न्यमनोज्ञानिवाक्यानिहृदयच्छिदां॥अहंश्रोष्येसपत्नीनामवराणांपरासती॥३९॥अतोदुःखत
रंकिंनुप्रमदानांभविष्यति॥ममशोकोविलापश्चयादृशोयमनंतकः॥४०॥त्वयिसन्निहितेप्येवम
हमासंनिराकृता॥किंपुनःप्रोषितेतातध्रुवंमरणमेवहि॥४१॥अत्यंतनिगृहीतास्मिभर्तुर्नि
त्यमसंमता॥परिवारेणकैकेय्यासमावाप्यथवावरा॥४२॥

श्रोष्ये॥३९॥अतःसपत्नीधिक्कारवा
क्यश्रवणजातंपरंदुःखंस्त्रीणांनास्ति· ममायमनंतकोऽपारःशोकोयादृशस्तादृशोवाचापिवक्तुमश
क्यइतिशेषः॥४०॥निराकृतासपत्न्येतिशेषः· ध्रुवंप्राप्तमितिशेषः· शोकग्रस्तत्वान्न्यूनपदतानदोषः॥४१॥
निगृहीताःभर्तृकृतनिग्रहप्रकारमाह· परिवारेणेति· कैकेय्यादासीजनेनसमा· अथवाऽवरातततोपि
निकृष्टाकृतास्मीतिशेषः· प्यधरावरेतिपाठे· वराश्रेष्ठापिअधरानिकृष्टाकृतास्मीत्यर्थः॥४२॥

यद्व्रतादीन्यनर्थकानि तदिदं महद्दुःखं ऊषरे उप्तम् अत एव निष्फलं बीजमिव ॥५२॥ गुरुदुःखेन कर्शितः पीडि
तः परेतसंसद्दृश्यमसभां ॥ अहं गतास्यां ततु न लभ्यत इति शेषः ॥५३॥ अथापि मरणाभावेपि त्वया विना त्व
त्संन्निधिं विना किं जीवितं कुत्सितं जीवितं व्यर्थम् अतोनुव्रजिष्यामि । अभिकांतया । वात्सल्येन ॥५४

इदं तु दुःखं यदनर्थकानि मे व्रतानि दानानि च संयमाश्च हि ॥ तपश्च तप्तं यदपत्यकाम्य
या सुनिष्फलं बीजमिवोप्तमूषरे ॥५२॥ यदि त्वकाले मरणं यदृच्छया लभेत कश्चिद्गुरुदुः
खकर्शितः ॥ गताहमद्यैव परेतसंसदं विना त्वया धेनुरिवात्मजेन वै ॥५३॥ अथापि किं ।
जीवितमद्य मे वृथा त्वया विना चंद्रनिभाननप्रभ । अनुव्रजिष्यामि वनं त्वयैव गौः सुदु
र्बलावत्समिवाभिकांतया ॥५४॥ भृशमसुखममर्षिता यदा बहु विललाप समीक्ष्य राघवं
व्यसनमुपनिशाम्य सा महत्सुतमिव बद्धमवेक्ष्य किन्नरी ॥५५॥ इत्यार्षे श्रीरामायणे वा
ल्मीकीये अयोध्याकांडे विंशः सर्गः ॥२०॥

भृशमसुखं दुःखम् अमर्षिता असहमाना । रामवियोग
मूलं सपत्न्यादिकृतं महद्व्यसनं दुःखं निशाम्य पर्यालोच्य सत्यपाशबद्धं सुतमवेक्ष्य यथोक्तनि
मित्तवती किंनरीव विललाप ॥५५॥ इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके अयोध्याकांडे विं
शः सर्गः ॥२०॥

दुःखंत्वद्वियोगजं·अद्यतयंतवराज्यनाशात्·तयस्संभावनारहितं·अपि·अपिचएवंजीर्णासपत्नीनांविप्रकारंसहितुं
सोढुंनोत्सहे॥४६॥कृपणाजीविका·शोच्यजीवना॥४७॥दुर्गतयाभाग्यहीनया·मयाबहुपरिश्रमजनकेरूपवासैर्यो
गैर्देवताध्यानैर्दुःखंयथातथामोघंवर्धितोसि·यदिविप्रत्स्यसीतिशेषः।त्वद्दर्शनजफलालाभादितिभावः॥४८

तदत्त्वयंममहृद्दुःखंनोत्सहेसहितुंचिरात्॥विप्रकारंसपत्नीनामेवंजीर्णापिराघव॥४६॥अपश्यंती
तवमुखंपरिपूर्णशशिप्रभं॥कृपणांवर्तयिष्यामिकथंकृपणजीविका॥४७॥उपवासैश्चयोगैश्च
बहुभिश्चपरिश्रमैः॥दुःखसंवर्धितोमोघंत्वंहिदुर्गतयामया॥४८॥स्थिरंतुहृदयंमन्येममे
दंयन्नदीर्यते॥प्रावृषीवमहानद्याःस्पृष्टंकूलंनवांभसा॥४९॥ममैवनूनंमरणंनविद्यतेनचा
वकाशोस्तियमक्षयेमम॥यदंतकोद्यैवनमांजिहीर्षतिप्रसह्यसिंहोरुदतींमृगीमिव॥५०॥
स्थिरंहिनूनंहृदयंममायसंनभिद्यतेयद्भुविनोविदीर्यते॥अनेनदुःखेनचदेहमर्पितंध्रुवं
ह्यकालेमरणंनविद्यते॥५१॥

नदीर्यतेत्वद्विप्रयोगश्रवणेपीतिशेषः॥४९॥ममैवेतिलौकिक्यतिवृद्धो
क्तिर्ज्ञातिरियं·मरणंनविद्यतेएवनजिहीर्षत्येवेत्यन्वयः अवकाशःअवस्थितयेस्थलं॥५०॥आयसमयसा
निर्मितं·यस्मात्यतोनभिद्यते·भुविपतित्वानोविदीयते·भेदोद्विधाभवनं·विदारणंअनेकच्छिद्रैःखण्डत्वं
अनेनदुःखेनार्पितंव्याप्तंदेहंदेहेनभिद्यतइत्याद्यन्वयःअर्धर्चादिर्देहशब्दःहियतोनभिद्यतेऽतोऽका

राम॰ अ॰
७५

बाल्यं बालभावमविमर्शपकारित्वं कामपरवशत्वं वोपेयुषः प्राप्तस्य राज्ञस्तत्पूर्वं राजाचरितं ७ अतो यावत्
इममर्थं त्वत्प्रवासनरूपं कश्चिदपि न जानाति तावत्ततः पूर्वमेव शासनं राज्यमभिषिक्तेनात्मस्थं आ
त्माधीनं कुरु शोभनमिति पाठे राज्यफलकमभिषेकं ८ कथमेवं शक्यं तत्राह मयेति अधिकं त्वदा
रोहं धनपूर्वमभिषेकविघ्नं ९ विप्रियेतत्तवविपत्तभावे १० पत्तो मातुलादिः योवान्यः कश्चिदस्य

तदिदं वचनं राज्ञः पुनर्बाल्यमुपेयुषः॥ पुत्रः को हृदये कुर्याद्राजवृत्तमनुस्मरन्॥ ७॥ याव
देव न जानाति कश्चिदर्थमिमं नरः॥ तावदेव मया सार्धमात्मस्थं कुरु शोभनं॥ ८॥ मया पार्श्वे
सधनुषा तव गुप्तस्य राघव॥ कः समर्थोधिकं कर्तुं कृतान्तस्येव तिष्ठतः॥ ९॥ निर्मनुष्या
मिमां सर्वामयोध्यां मनुजर्षभ॥ करिष्यामि शरैस्तीक्ष्णैर्यदि स्थास्यति विप्रिये॥ १०॥ भरतस्या
थ पक्ष्यो वा यो वास्य हितमिच्छति॥ सर्वांस्तांश्च वधिष्यामि मृदुर्हि परिभूयते॥ ११॥ प्रोत्साहितो
यं कैकेय्या संतुष्टो यदि नः पिता॥ अमित्रभूतो निःसंगं बध्यतां वध्यतामपि॥ १२॥

75

मिच्छति मृदुर्हीति अतो मार्दवं न युक्तं मार्दवानुचितकालत्वादिति भावः ११ ननु राज्ञा राज्यस्य भरताय दित्
सितत्वादपरिहार्योयमर्थस्तत्राह प्रेति कैकेय्या प्रोत्साहितस्तस्यां संतुष्टो यदि पिता नोस्माकं अमित्रभू
तो जायते तदासौ बध्यतां प्राप्यतां अथवास्य वध एव क्रियतां त्रेताद्वापरयोः संधावयमवतारस्तदा व किं
चिदधिकपादेनाधर्मप्रवेशादिति तदनुसारेण लक्ष्मणस्यैव मुक्तिः कैकेय्याश्च परोपदेशेनैव मतिः छलेन

वाल्मीकिरामायणव्याख्यायां तिलकाख्यायां १४८

राम
७५

तत्कालसदृशं रामवियोगहेतुकं कौसल्यादुःखप्रवृत्तिकालोचितं १ आर्यैकौसल्ये गच्छेदितियत्तन्ममापिन
रोचते २ स्त्रियाइत्याद्युत्तरान्वयि अतएवविपरीतः प्राप्तप्रकृतिवैपरीत्यः चोद्यमानः स्त्रियाक्रोधवशा
त्पुनरुक्तिर्नदोषायकिमिवनब्रूयादनुचितशतमपिब्रूयात् अतस्तद्वचोनश्रद्धेयमिति एतेनराजा
ज्ञाभंगः कथंकार्यइतिशंकासमाहिता ३ ननुरामदोषप्रयुक्तंविवासनंस्यातत्राह नास्येति रामस्य

तथातुविलपंतीतांकौसल्यांराममातरं उवाच लक्ष्मणोदीनस्तत्कालसदृशंवचः १ नरोच
तेममाप्येतदार्येयद्राघवोवनं त्यक्त्वा राज्यश्रियंगच्छेत्स्त्रियावाक्यवशंगतः २ विपरीतश्चवृ
द्धश्चविषयैश्चप्रधर्षितः नृपः किमिवनब्रूयाच्चोद्यमानःसमन्मथः ३ नास्यापराधंपश्यामि
नापिदोषंतथाविधं येननिर्वास्यतेराष्ट्राद्वनवासायराघवः ४ नतंपश्याम्यहंलोकेपरोक्षम
पियोनरः स्वमित्रोपिनिरस्तोपियोस्यदोषमुदाहरेत् ५ देवकल्पमृजुंदांतंरिपूणामपि
वत्सलं अवेक्षमाणः कोधर्मंत्यजेत्पुत्रमकारणात् ६

त्यर्थः अपराधपितृविषयकंदोषमस
मंजादेरिवप्रजावधादिपातकं ४ सुतरामभित्रोपिशत्रुरपिनिरस्तोपिमहापातकादिवशंगत्वात्यक्तो
पिपरोक्षमपिरामस्यदोषंयोवदेत्तंनपश्यामि ५ यदेवमतोदेवतुल्यंदांतंगुरुभिःशिक्षितं एवमु
क्तगुणं पुत्रंधर्ममवेक्षमाणः कस्त्यजेदित्यन्वयः रिपूणांकैकेय्यादीनांविषयेपिवत्सलंस्निग्धं ६

रामा॰अ॰
७६

अनंतरं युक्तं कार्यं तत्त्वं कुरुष्व यदि रोचते तर्हि लक्ष्मणवाक्यं कुरुष्वेति शेषः ॥ अनेन कौसल्याया इदं स्वानभिमत
त्वं लक्ष्मणोक्तस्य सूचितं ॥२१॥ पुनः रामाभिप्रायनिर्णयाय लक्ष्मणवाक्यमेवोयो इल्लयितुमेनं राजवाक्यमपि
नयेन तवदोषः स्यात् किं तु मत्सपत्न्या इत्याह· नचेति· ॥ अधर्म्यं कनिष्ठस्य राज्यरूपं· ममसपत्न्याभाषि
तं वचः श्रुत्वा मां विहायतो वनं गंतुं नार्हसि ॥२२॥ अथ यदि सापत्नमातृवाक्योल्लंघनेप्यधर्मं बुध्यात

भ्रातुस्ते वदतः पुत्र लक्ष्मणस्य श्रुतं त्वया ॥ यदत्रानंतरं तत्त्वं कुरुष्व यदि रोचते ॥२१॥ न चा
धर्म्यं वचः श्रुत्वा सपत्न्या मम भाषितं ॥ विहाय शोकसंतप्तां गंतुमर्हसि मामितः ॥२२॥ धर्मज्ञ
यदि धर्मिष्ठ धर्मं चरितुमिच्छसि ॥ शुश्रूष मामिहस्थस्त्वं चर धर्ममनुत्तमं ॥२३॥ शुश्रूषुर्जन
नीं पुत्र स्वगृहे नियतो वसन् ॥ परेण तपसा युक्तः काश्यपस्त्रिदिवं गतः ॥२४॥ यथैव रा
जा पूज्यस्ते गौरवेण तथा ह्यहं ॥ त्वां साहं नानुजानामि न गंतव्यमितो वनं ॥२५॥

76

त्राप्पादरस्तर्हि राज्यं परित्यज्यैवेह तिष्ठेत्याह· धर्मज्ञेति ॥२३॥ शुश्रूषुः शुश्रूषां कुर्वन्· पुत्रेति रामसंबो-
धनं· त्रिदिवं गतः मातृसेवया प्राजापत्यपदं प्राप्त इति भावः ॥२४॥ तथा हि ततोपि गौरवेणाहं पूज्येत्यर्थः
पितुर्दशगुणं माता गौरवेणातिरिच्यते· इति स्मृतेः नानुजानामि वनं गंतुमिति शेषः किं च प्रतिषेधामी
त्याह· नगंतव्यमित्यादि ॥२५॥

राम
७६

ननुएवंदोषःस्यात्तत्राह॰ गुरोरिति॰ एवंचशास्त्रसंमतत्वान्नात्रदोषइतिभावः॥१३॥ ननुराज्ञोबलवत्वाद्धनाद्यशक्य
मतआह॰ बलमिति॰ उपस्थितंज्येष्ठत्वेनन्यायतस्त्वैवप्राप्तंइदंराज्यं॰ एवंचबलहेत्वोरभावाद्धनादिशक्यमे
वेतिभावः॥१४॥ बलाभावमेवाह॰ त्वयेत्यादि॥१५॥ ननुत्वाप्येवंवदतोनविश्वासोज्ञातित्वाविशेषादतआह॰॥

गुरोरप्यवलिप्तस्यकार्याकार्यमजानतः॥ उत्पथंप्रतिपन्नस्यकार्यंभवतिशासनं॥१३॥ बलमेषकि
माश्रित्यहेतुंवापुरुषोत्तम॥ दातुमिच्छतिकैकेय्यैउपस्थितमिदंतव॥१४॥ त्वयाचैवमयाचैव
कृत्वावैरमनुत्तमं॥ कास्यशक्तिःश्रियंदातुंभरतायारिशासन॥१५॥ अनुरक्तोस्मिभावेनभ्रा
तरंदेवितत्त्वतः॥ सत्येनधनुषाचैवदत्तेनेष्टेनतेशपे॥१६॥ दीप्तमग्निमरण्यंवायदिरामःप्रवे
क्ष्यति॥ प्रविष्टंतत्रमांदेवित्वंपूर्वमवधारय॥१७॥ हरामिवीर्याद्दुःखंतेतमःसूर्यइवोदितः
देवीपश्यतुमेवीर्यंराघवश्चैवपश्यतु॥१८॥ हनिष्येपितरंवृद्धंकैकेय्यासक्तमानसं॥ कृ
पणंचस्थितंबाल्येवृद्धभावेनगर्हितं॥१९॥ एतत्तुवचनंश्रुत्वालक्ष्मणस्यमहात्मनः॥ उ
वाचरामंकौसल्यारुदंतीशोकलालसा॥२०॥

अनुरक्तइति॰ भावआंतरोभिप्रायः॥१६॥ संप्रत्ये
वानुरागनिर्णयइत्याह॰ दीप्तमग्निं॰ क्रोधमित्यर्थः अरण्यंवापित्राज्ञया॥१७॥ राघवश्चेतिचात्सर्वो
जनश्च॥१८॥ कैकेय्यासक्तमानसमतएवकृपणं॰ वृद्धभावेनवृद्धत्वेनगर्हितं॰ यथाभवतिंतथा
बाल्येकामुकत्वेस्थितं॥१९॥२०॥

महान्वधः ब्राह्मणसकाशादतिनिंद्योवधः अनेन प्राणत्यागेनापि पितृवाक्यं पालनीयमिति सूचितं ॥३२॥ पर
शुना स्वयं स्वहस्तेन छिन्ना अरण्ये तपोवने एवं च पित्राज्ञया मातृवधोपि यच्च धर्मो न तदा दुःखमात्रं
न तथैति किं वक्तव्यं ॥३३॥ अक्लीबं कातर्यरहितं अतः पितुर्हितं करिष्यामि ॥३४॥ ॥३५॥ ते प्रतिकूलमपू

अस्माकं तु कुले पूर्वं सगरस्याज्ञया पितुः॥ खनद्भिः सागरैर्भूमिमवाप्तः सुमहान्वधः॥३२॥
जामदग्न्येन रामेण रेणुका जननी स्वयं॥ कृत्ता परशुनारण्ये पितुर्वचनकारणात्॥३३॥
एतैरन्यैश्च बहुभिर्देवि देवसमैः कृतं॥ पितुर्वचनमक्लीबं करिष्यामि पितुर्हितं॥३४॥
न खल्वेतन्मयैकेन क्रियते पितृशासनं॥ एतैरपि कृतं देवि ये मया परिकीर्तिताः॥३५॥
नाहं धर्ममपूर्वं ते प्रतिकूलं प्रवर्तये॥ पूर्वैरयमभिप्रेतो गतो मार्गोनुगम्यते॥३६॥ तदे
तत्तु मया कार्यं क्रियते भुवि नान्यथा॥ पितुर्हि वचनं कुर्वन्न कश्चिन्नाम हीयते॥३७॥
तामेवमुक्त्वा जननीं लक्ष्मणं पुनरब्रवीत्॥ वाक्यं वाक्यविदां श्रेष्ठः श्रेष्ठः सर्वधनुष्मतां॥३८॥

र्वं पूर्वैरनाचरितं धर्मं नाहं प्रवर्तये उक्तस्यैवार्थस्यान्वयेन प्रतिपादनं पूर्वैरिति। अयमभिप्रेतः ध
र्मजनकत्वेनेष्टः पितृवाक्यपालनरूपः पूर्वैरयं मार्गो गतः प्राप्तो मयापि तेषामनुपश्चाद्गम्यते ॥३६॥
तत्तस्माद्धेतोः भुवि लोके कार्यं कर्तुं योग्यमेव तत्र एतत्र पितृवाक्यं मया क्रियते नान्यथाऽकृतं
न क्रियत इत्यर्थः नाम प्रसिद्धं कश्चिन्न हीयते मातुः किंचिद्दुःखोत्पादनेपि धर्मेणातिशेषः ॥३७॥ पुनः अनंतरं ॥३

77

अथवनगमनपर्यंतंतदाज्ञासत्वाद त्रसर्वथास्थातुमशक्यमितिचेत्तत्राप्याह· त्वद्वियोगादिति· त्वद्वियोगात्परंजी
वितादिनामेन किंचित्कार्यंअतस्त्वयेत्यादि· एवं चमामपिसहनयेतिभावः॥२६॥ प्रायं अनशनदीक्षां· चौहेतौ
यतोजीवितुंनशक्ष्यामि॥२७॥ ततः मातुर्मरणांतदुःखदानात्· समुद्रोहि कस्मिंश्चित्कल्पेमातुर्दुःखजनन
रूपाधर्मात्पिप्पलादब्रह्मर्षिकृतां कृत्यांप्राप्यनरकवासतुल्यंदुःखंप्राप्तवानिति क्वचित्पुराणेप्रसिद्ध

त्वद्वियोगान्नमेकार्यंजीवितेनसुखेनच॥ त्वयासहममश्रेयस्तृणानामपिभक्षणं॥२६॥ यदित्वं
यास्यसिवनंत्यक्त्वामांशोकलालसां॥ अहंप्रायमिहासिष्ये नचशक्ष्यामिजीवितुं॥२७॥ ततस्त्वंप्रा
प्स्यसेपुत्र निरयंलोकविश्रुतं॥ ब्रह्महत्यामिवाधर्मात्समुद्रः सरितांपतिः॥२८॥ विलपंतींतथा
दीनांकौसल्यांजननींततः॥ उवाचरामोधर्मात्मावचनंधर्मसंहितं॥२९॥ नास्तिशक्तिः पितुर्वा
क्यंसमतिक्रमितुंमम॥ प्रसादयेत्वांशिरसा गंतुमिच्छाम्यहंवनं॥३०॥ ऋषिणाचपितुर्वाक्यं
कुर्वतावनचारिणा॥ गौर्हताजानताधर्मं कंडुनाचविपश्चिता॥३१॥ राम ॥

मित्याह॥२८॥२९॥ त्वद्वचनस्यकर्तव्यत्वेपियुगपदनुष्ठानासंभवात्पितवचसः प्रथमप्राप्तत्वेनप्राब
ल्यात्तदतिक्रमोशक्यइत्याह· नास्तीति॥३०॥ किंचपितृवाक्येनगोमातृवधोपिपूर्वैर्महात्मभिः कृतः
मयातुदुःखमात्रंमातुःसंपाद्यतेइतिनकिंचिदेतदित्याह· ऋषिणेति· अधर्मंजानतापिऋषिणापि
मंत्रद्रष्ट्रापिपितृवाक्यतोगौर्हता· तस्मात्पितृवाक्याकरणेमहान् अधर्मइतिसूचितं॥३१॥

सं ४

शापितासिशपथंमापितासि॥गमननिरोधंमाकुर्वितिशेषः॥४६॥दिवहित्वाभ्रमेोपतितःपुनर्दिवंयथागतस्तथे
त्यर्थः॥४७॥पुनरेष्यामीत्यन्वयः॥४८॥पितुःराज्ञोदशरथस्य॥४९॥संभारान्अभिषेकसंभारान्निगत्य

अनुमन्यस्वमांदेविगमिष्यंतमितोवनं॥शापितासिममप्राणैःकुरुस्वस्त्ययनानिमे॥४६॥ती
र्णप्रतिज्ञश्चवनात्पुनरेष्याम्यहंपुरीं॥ययातिरिवराजर्षिःपुराहित्वापुनर्दिवं॥४७॥शोकः
संधार्यतांमातर्हृदयेसाधुमाशुचः॥वनवासादिहैष्यामिपुनःकृत्वापितुर्वचः॥४८॥त्वया
मयाचवैदेह्यालक्ष्मणेनसुमित्रया॥पितुर्नियोगेस्थातव्यमेषधर्मःसनातनः॥४९॥अंब
संहृत्यसंभारान्दुःखंहृदिनिगृह्यच॥वनवासकृताबुद्धिर्ममधर्म्यानुवर्त्यतां॥५०॥एत
द्वचस्तस्यनिशम्यमातासुधर्म्यमव्यग्रमविक्लवंच॥मृतेवसंज्ञांप्रतिलभ्यदेवीसमीक्ष्यरा
मंपुनरित्युवाच॥५१॥यथैवतेपुत्रपितातथाहंगुरुःस्वधर्मेणसुहृत्तयाच॥नत्वानुजाना
मिनमांविहायसुदुःखितामर्हसिपुत्रगंतुं॥५२॥

निवार्यअनुवर्त्यतांत्वयानुमन्यतामित्य
र्थः॥५०॥सुधर्म्यधर्मयुक्तं॥अव्यग्रंधैर्ययुक्तं॥अविक्लवंअकातरं॥मृतेवमूर्छितेतियावत्॥५१॥स्वध
र्मेणपालनादिरूपमातृधर्मेणसुहृत्तयापितुरिवस्नेहवत्तया॥५२॥ राम

78

३९॥ ममसातुर्यन्महद्दुःखंतत्स्यतत्प्रशमयोरभिप्रायंतद्विषयमदभिप्रायमज्ञात्वेत्यतस्तवेदृशंवाक्यंतत्वज्ञस्यानुचितमितिभावः॥४०॥ तदेवाह॥ धर्मइति॥ धर्मः सर्वपुरुषार्थेषूत्तमः श्रेष्ठः प्रतिष्ठितः॥ प्रशस्ततराणां॥ एतत्तदुत्तमंपितुर्वचनंधर्मसंश्रितमपिवनेनपरस्यायातपस्विरक्षणेनचधर्मत्वाभा

तवलक्ष्मणजानामिमयिस्नेहमनुत्तमं॥ विक्रमंचैवसत्वंचतेजश्चसुदुरासदं॥३९॥ ममसातुर्महद्दुःखमतुलंशुभलक्षण॥ अभिप्रायंनविज्ञायसत्यस्यचशमस्यच॥४०॥ धर्मोहिपरमोलोकेधर्मेसत्यंप्रतिष्ठितं॥ धर्मसंश्रितमप्येतत्पितुर्वचनमुत्तमं॥४१॥ संश्रुत्यचपितुर्वाक्यंमातुर्वाब्राह्मणस्यवा॥ नकर्तव्यंवृथावीरधर्ममाश्रित्यतिष्ठता॥४२॥ सोऽहंनशक्ष्यामिपुनर्नियोगमतिवर्तितुं॥ पितुर्हिवचनाद्वीरकैकेय्याहंप्रचोदितः॥४३॥ तदेतांविसृजानार्यांक्षत्रधर्माश्रितांमतिं॥ धर्ममाश्रयमातैक्ष्ण्यंमद्बुद्धिरनुगम्यतां॥४४॥ तमेवमुक्त्वासौहार्दाद्भ्रातरंलक्ष्मणाग्रजः॥ उवाचभूयःकौसल्यांप्राञ्जलिःशिरसानतः॥४५॥

न॥ अतोवश्यंकर्तव्यंतद्वचइतिभावः॥ अत्रोत्तममित्यस्यत्रैलोक्यसुखदत्वेनोत्तममितिव्यंग्यं॥४१॥ पितृवाक्यकरणप्रतिज्ञातत्वादपितद्वचनमनुचितमित्याह॥ संश्रुत्येति॥ प्रतिज्ञाय॥ वृथा॥ मोघं॥४२॥ इदंसपत्न्याःकैकेय्यावचनंनपितुस्तत्राह॥ सोऽहमित्यादि॥४३॥ अनार्यांमतिंपितरंबध्वाहत्वावाराज्यंकर्त्तव्यमित्येवमधर्मविषयामतिः॥ मद्बुद्धिः पितृवाक्यकरणरूपा॥ अनुगम्यतां॥ अनुवर्त्यतां॥४४॥४५

धर्मफलोदयेषु पूर्वकृतधर्मफलोत्पत्तिकालेषु येधर्मार्थकामास्त्रयोपिलोके समीक्षिताः दृष्टाः मन्वादिभिर्धर्मफ
लत्वेन येत्रयोपिदृष्टास्ते सर्वे तत्र धर्मे सति अवश्यं भवेयुरितिमेमतिः नतुतत्रमेकश्चित्संदेह इति
भावः एकतोनेककार्यत्वाभेदृष्टांतमाह· भार्येवेति· वश्या अनुकूला· अतिथिपूजादिधर्मसाधनं· अ
भिमताप्रियाकामसाधनं· सपुत्रा परलोकगमनरूपार्थसाधनंच भवतितद्वत्· तस्माद्धर्मएवमुख्यइ
ति· सएवस्तुइतिभावः॥५७॥ अमुमेवार्थंभंग्यंतरेणाह इति· यस्मिन्निति· यस्मिन्कर्मणि सर्वेध

२२

धर्मार्थकामाः खलुजीवलोके समीक्षिताधर्मफलोदयेषु॥ येनत्रसर्वे स्युरसंशयंमे भार्येव वश्याभिमतासपुत्रा॥५७॥ यस्मिंस्तुसर्वेस्युरसन्निविष्टाधर्मोयतः स्यात्तदुपक्रमेत॥ द्वेष्योभवत्यर्थपरोहि लोके कामात्मताखल्वतिनप्रशस्ता॥५८॥ गुरुश्चराजाचपिताचवृद्धः क्रोधात्प्रहर्षादथवापिकामात्॥ यद्व्यादिशेत्कार्यमवेक्ष्यधर्मंकस्तन्नकुर्यादनृशंसवृत्तिः॥५९॥

र्मादयोऽसंनिविष्टा असंबद्धास्तन्नोपक्रमेतनारभेतैवेतिशेषः एकैकफलकानेककर्मसंभवे
पि· यतोधर्मः स्यात्तदुपक्रमेतत्तदेवकुर्यात् नापरंकुतस्तत्राह· द्वेष्यइति· अर्थपरः धर्मविरुद्ध
केवलार्थपरः कामात्मताधर्मविरुद्धकामपरतानप्रशस्तागर्हिताराज्ञइव॥५८॥ यदेवमतोगु
रुश्चेत्यादि गुरुरुपनेता· धनुर्वेदाद्युपदेशश्चाचः सयत्कार्यंव्यादिशेत्तद्धर्ममवेक्ष्यपितवचनकर
णंधर्मइतिज्ञात्वाकोनकुर्यात्॥५९॥

79

लोकेनइतरबंधुजनेन। स्वधयापितृपूजनेन। इदमुपलक्षणं। देवपूजादेरपि। अमतेन। अमतत्वसाधनेन। तत्वज्ञानेनापि किं। कृत्स्नादपिजीवलोकात् कृत्स्नलोकसान्निध्यात्। मुहूर्त्तमपितवसन्निधानमेवश्रेयः ५३ नरैरुल्काभिरल्लातैरपोह्यमानस्ताड्यमानोनिशिध्वांतमभिप्रविष्टोगजइवभूयः प्रजज्वाल किमि

किंजीवितेनेहविनात्वयामेलोकेनवाकिंस्वधयाऽमतेन। श्रेयोमुहूर्त्तंतवसन्निधानंममैवकृत्स्नादपिजीवलोकात्॥ ५३॥ नरैरिवोल्काभिरपोह्यमानोमहागजोध्वांतमभिप्रविष्टः। भूयः प्रजज्वालविलापमेवंनिशम्यरामः करुणंजनन्याः॥ ५४॥ समातरंचैवविसंज्ञकल्पामार्त्तंचसौमित्रिमभिप्रतप्तं। धर्मेस्थितोधर्म्यमुवाचवाक्यं यथासएवार्हतितत्रवक्तुं॥ ५५॥ अहंहितेलक्ष्मणनित्यमेवजानामिभक्तिंचपराक्रमंच। ममत्वभिप्रायमसन्निरीक्ष्यमात्रासहाभ्यर्दसिमासुदुःखं॥ ५६॥

दंयन्मामधर्मेप्रवर्तयितुंविलपतीतिक्रोधः॥ ५४ तत्ररामस्यधर्मेनिष्ठांवाल्मीकिः॥ श्लाघतेयथा। सएवेति। तथाविधघोरदशायां। अनन्वयालंकारोत्र॥ ५५॥ ममाभिप्रायंधर्मैकनिष्ठत्वंरूपं। अभ्यर्दयसिपीडयसि। अभ्यर्दयसीतिपाठेप्रेरयसीत्यर्थः॥ सर्वथांतर्भाविलाप्पर्यंता। एवंसुतरांदुःखंमा। माकुर्वित्यर्थः॥ ५६॥

रामा॰अ॰
८०

पराक्रमात्धैर्यात् दर्शनं स्वसंमतं धर्मरहस्यं अनुशास्य उपदिश्य तां जननीं प्रदक्षिणं कृत्वा त्वरितं चकार गंतुं मनश्चकारेत्यर्थः॥६४॥ इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके अयोध्याकांडे एकविंशः सर्गः २१॥ अथ रामः सौमित्रेः कैकेयीविषयं रोषं शमयतीत्याह अथेति व्यथया रामस्य राज्यहानिजन्यया स विशेषं रामे अजनांतरापेक्षयेति शेषः अमर्षितं प्राप्ता सहनं विस्फारणं विस्तारः॥१॥ आसा

प्रसादयन्नरवृषभः समातरं पराक्रमाज्जिगमिषुरेव दंडकान्॥ अथानुजं भृशमनुशास्य दर्शनं चकार तां हृदि जननीं प्रदक्षिणं॥६४॥ इत्यार्षे श्रीरामायणे वाल्मीकीये अयोध्याकांडे एकविंशः सर्गः॥२१॥ अथ तं व्यथया दीनं सविशेषममर्षितं॥ सरोषमिव नागेंद्रं रोषविस्फारितेक्षणं॥१॥ आसाद्य रामः सौमित्रिं सुहृदं भ्रातरं प्रियं॥ उवाचेदं स धैर्येण धारयन्सत्वमात्मवान्॥२॥ निगृह्य रोषं शोकं च धैर्यमाक्रम्य केवलं॥ अवमानं निरस्यैनं गृहीत्वा हर्षमुत्तमं॥३॥ उपक्लृप्तं यदेतन्मे अभिषेकार्थमुत्तमं॥ सर्वं निवर्तय क्षिप्रं कुरु कार्यं निरव्ययं॥४॥

द्य अभिमुखीकृत्य धैर्येण॥ सत्वं चित्तं अविकारितया धारयन्प्रकटयन्॥२॥ किमुवाचेत्यत्राह निगृह्येति रोषं पित्रादिवधहेतुं अवमानं वनप्रवासनरूपं निरस्य शत्रुकृतत्वाभावात् उत्तमं हर्षं सत्यपालनेन पितुः पुण्यलोकसिद्धिजं हर्षं॥३॥ ताद्दशहर्षसिध्यर्थमेव हे लक्ष्मण अभिषेकप्रयोजनकं निवर्तय कार्यं वनगमनोपयुक्तं॥४॥

80

राम
८०

इमां सकलां संपूर्णां न कर्त्तुं न शक्नोमि नियोगे प्रभुरिति शेषः मातुः स्वेन सह गमननिषेधायाह देव्याश्चे
ति· भर्तृत्वात्· स एवास्या गतिर्न तु पुत्रः यदा सगतिः स धर्म इति पाठे तेन सगतिः समानगतिरेषा· सः
तच्छब्दस्य बुद्धिस्थपरामर्शकत्वात् तेन सह वासः एवास्या धर्मः न तु मया सह वासः इत्यर्थः ॥६०॥ तदेवाह
तस्मिन्निति· स्वे पथि इष्टपुत्रं परित्यज्यापि सत्यं रक्षणीयमित्येवं रूपे सत्यमार्गे· अन्येत्यस्य विवरणं· वि

न तेन शक्नोमि पितुः प्रतिज्ञामिमां न कर्त्तुं सकलां यथावत् ॥ स ह्यावयोस्तात गुरुर्नियोगे
देव्याश्च भर्ता स गतिश्च धर्मः ॥६०॥ तस्मिन्पुनर्जीवति धर्मराजे विशेषतः स्वे पथि वर्त्तमाने
देवी मया सार्धमितोऽभिगच्छेत्कथंस्विदन्या विधवेव नारी ॥६१॥ सा मानुमन्यस्व वनं व्रजंतं
कुरुष्व नः स्वस्त्ययनानि देवि यथा समाप्ते पुनराव्रजेयं यथा हि सत्येन पुनर्ययातिः ॥६२॥
यशो ह्यहं केवलराज्यकारणात् न पृष्ठतः कर्त्तुमहं महोदयं अदीर्घकाले न तु देवि·
जीविते वृणेऽवरामद्य महीमधर्मतः ॥६३॥

।धवेति ॥६१॥ मा· मामित्यर्थः पुनर्ययातिः स्वर्ग
मायेति शेषः ॥६२॥ केवलराज्यकारणात् धर्महीनराज्यहेतोः महोदयं महाफलं· यशः प्राप्तमपि
राज्यं त्यक्त्वा पितृवाक्यपालनं कृतवानित्येवं यशः पृष्ठतः कर्त्तुं नालं· ॥ जीविते मनुष्यजीवने ऽदीर्घ
काले ऽल्पकालतया निश्चिते सति तदर्थमवरां अधमप्रयोजनिकां महीमधर्मतः परमपुरुषार्थत्यागेन

रामा॰ अ
८१

अस्मिन्कर्मणि अभिषेकविषये कर्मणि· अप्रतिसंहृते अनिवर्तिते। मम वचः सत्यं न कृतमिति मनस्तापो भवेत्· तस्य च मनस्तापो मामपि तपेत्· पितृहितमकुर्वतो मम जन्म व्यर्थमिति पीडयेत्॥१०॥ यत एवमतो ऽभिषेके ऽतिसंहृत्य त्यक्त्वा अन्वगेव शीघ्रमेव इतः पुरः अस्मान्नगरात्॥११॥ नृपात्मजा कैकेयी॥ अव्यग्रं

८१

तस्यापि हि भवेदस्मिन्कर्मण्यप्रतिसंहृते॥ सत्यं नेति मनस्तापस्तस्य तापस्तपेच्च माम्॥१०॥ अभिषेकविधानं तु तस्मात्संहृत्य लक्ष्मण॥ अन्वगेवाहमिच्छामि वनं गन्तुमितः पुरः॥११॥ मम प्रव्राजनादद्य कृतकृत्या नृपात्मजा॥ सुतं भरतमव्यग्रमभिषेचयिता ततः॥१२॥ मयि चीराजिनधरे जटामण्डलधारिणि॥ गतेऽरण्यं च कैकेय्या भविष्यति मनःसुखं॥१३॥ बुद्धिः प्रणीता येनेयं मनश्चाप्यसमाहितं॥ तं तु नार्हामि संक्लेष्टुं प्रव्रजिष्यामि माचिरं॥१४॥ राम ॥

अव्याकुलं॥१२॥ गते गते एव॥१३॥ कैकेय्या अत्र नापराधः अन्यप्रेरितत्वात्· तर्हि स एवं अस्तु तत्राह· येनेश्वरेण विधात्रा इयं बुद्धिः कैकेय्याः प्रणीता मन्थराद्वारा दत्ता। मनश्च तद्बुद्धिविषयेऽर्थे सुसमाहितं स्थिरीकृतं तं संक्लेष्टुं मदिष्टमन्यथा जातमिति क्लेशयितुं नार्हामि तस्य मदधिकारित्वान्मद्रूपत्वादिति गूढ आशयः मत्संकल्पकृतमेव तदिति गूढं व्यंग्यं· अशक्यत्वादित्यापाततोऽर्थः। अतो वनं प्रव्रजिष्यामि चिरं विलंबो मा मास्त्वित्यर्थः॥१४॥

राम
८१

तदेवाह सौमित्रे इति संभारसंपादनाय यः संभ्रमस्त्वरा साभिषेकनिवृत्त्यर्थोऽस्तु वनगमनपरिकरसंपादनायास्त्विति यावत् ॥५॥ किं च यस्या मदभिषेकार्थे मदभिषेकनिवृत्तौ ॥ अर्थशब्दो निवृत्तिवचन इह अर्थोऽभिधेयरैवस्तुप्रयोजननिवृत्तिषु सविशंका कथमयं वनेस्यास्यतीति शंकया सदुःखा तथा कुरु ॥ अल्पेनैव कालेन रामं द्रक्ष्यासि पित्राज्ञाभंगश्चातिनिंद्य इत्यादिवाक्यैरितिशेषः यद्वा यस्याः कैकेय्याः नो मानाकैकेयी सशंका अयं वनं न गमिष्यतीति शंका सहिता ॥६॥ कुत एवं तत्राह तस्या इति तस्या मनसि प्र

सौमित्रे योऽभिषेकार्थे मम संभारसंभ्रमः ॥ अभिषेकनिवृत्त्यर्थे सोऽस्तु संभारसंभ्रमः ॥५॥ यस्या मदभिषेकार्थे मानसं परितप्यते ॥ माता नः सा यथा न स्यात्सविशंका तथा कुरु ॥६॥ तस्याः शंकामयं दुःखं मुहूर्तमपि नोत्सहे ॥ मनसि प्रतिसंजातं सौमित्रेऽहमुपेक्षितुं ॥७॥ न बुद्धिपूर्वं नाबुद्धं स्मरामीह कदाचन ॥ मातॄणां वा पितुर्वाहं कृतमल्पं च विप्रियं ॥८॥ सत्यः सत्याभिसंधश्च नित्यं सत्यपराक्रमः ॥ परलोकभयाद्भीतो निर्भयोऽस्तु पिता मम ॥९॥

तिसंजातं शंकामयं दुःखं मुहूर्तमपि उपेक्षितुं नोत्सहे उपेक्षितुमिति पाठे द्रष्टुमित्यर्थः ॥७॥ तदेवोपपादयति नबुद्धीति अबुद्धं अज्ञानपूर्वं वा ॥ अल्पं च अल्पमपि विप्रियं विप्रियकरं कदाचन कदापि कृतं न स्मरामीत्यन्वयः समारब्धमिति पाठे नारब्धवानस्मि इत्यर्थः ॥८॥ सत्यः सत्यवचनस्वभावः सत्याभिसंधः सत्यप्रतिज्ञः परलोकभयात् परलोकभयहेतोः असत्यात् भीतः पिता निर्भयोऽस्तु मया तत्कृतसत्यपरिपालनात् ॥९॥

ननुतद्दैवंकास्तिकीदृक्केत्यतआह॰ यदिति देशकालवृत्तितयायदचिंत्यंईदृग्विधमितिचिंतयितुमशक्यंतद्दैवं॰
यन्नतेषुभूताधिष्ठातृषुब्रह्मादिष्वपिनहन्यतेनप्रतिहतंभवति॰॥ हि अतस्तत्कृतएवतस्यांमयिचविपर्यय॰
प्रवृत्तिस्थितवात्सल्यापगमरूपः हस्तगतराज्यभ्रंशरूपश्चपत्तितः॥२०॥ ननुशौर्येणदैवंहनिष्यामीतिचेत्त
त्राह॰ कश्चेतियस्यग्रहणंज्ञानंज्ञानजनकं॰ कर्मणः फलादन्यंनदृश्यते॰ एवंचनित्यंकार्यानुमेयतयाप्राग
ज्ञानत्वात्॰ योद्धुमशक्यंजातेतुफलेविफलंयुद्धंफलेनतस्यनाशाच्चेतिभावः॥२१॥ सर्वतोदैवमेवप्रब

यदचिंत्यंतुतद्दैवंभूतेष्वपिनहन्यते॥ व्युत्क्रमंमयिचतस्याश्चपतितोहिविपर्ययः॥२०॥ कश्च
दैवेनसौमित्रेयोद्धुमुत्सहतेपुमान्॥ यस्यनग्रहणंकिंचित्कर्मणोन्यत्रदृश्यते॥२१॥ सुखदुः
खेभयक्रोधौलाभालाभौभवाभवौ॥ यस्यकिंचित्तथाभूतंननुदैवस्यकर्मतत्॥२२॥ ऋषयो
ऽप्युग्रतपसोदैवेनाभिप्रचोदिताः॥ उत्सृज्यनियमांस्तीव्रान्भ्रश्यंतेकाममन्युभिः॥२३॥ असं
कल्पितमेवेहयदकस्मात्प्रवर्तते॥ निवर्त्यारब्धमारंभैर्ननुदैवस्यकर्मतत्॥२४॥ श्रीराम

लंपौरुषंतुच्छाकाकतालीयमित्याह॰ सुखेत्यादि॰ भवाभवौबंधमोक्षौ॰ एषांमध्येयस्ययत्तथाभूतंअचिंत्य
कारणकंकिंचित्कार्यंतत्॰ नन्वनिश्चयेनदैवस्यकर्मफलं॥२२॥ दैवप्राबल्यमेवदर्शयति॰ ऋषयइति॰
विश्वामित्रादयः मन्युः क्रोधः बहुवचनंव्यक्तिबाहुल्यात्॰ तैर्भ्रश्यंतेअभिभूयंते॥२३॥ पुनरपिस्ववनवा
सस्यदैवजत्वंदृढयितुंदैवकार्यलक्षणमाह॰ असंकल्पितमिति॰ आरंभैर्यत्नैः आरब्धमुपक्रांतंकार्यं
निवर्त्ययदसंकल्पितमेवा [illegible] दैवस्यकर्मननु॥२४॥

तदेवाह सौमित्रे इति। संभारसंपादनाय यः संभ्रमस्त्वरा साभिषेकनिवृत्त्यर्थोऽस्तु वनगमनपरिकरसंपादनायास्त्विति यावत्॥५॥ किं च यस्यां मदभिषेकार्थे मदभिषेकनिवृत्तौ॥ अर्थशब्दो निवृत्तिवचन इह। अर्थोऽभिधेयरैवस्तुप्रयोजननिवृत्तिषु सविशंका कथमयं वने स्थास्यतीति शंकया सदुःखा तथा कुरु। अल्पेनैव कालेन रामं द्रष्टासि। पित्राज्ञाभंगश्चातिनिंद्य इत्यादिवाक्यैरिति शेषः। यद्वा यस्या कैकेय्याः नो माता कैकेयी सशंका अयं वनं न गमिष्यतीति शंकासहिता॥६॥ कुत एवं तत्राह तस्या इति। तस्या मनसि प्र

सौमित्रे योऽभिषेकार्थे मम संभारसंभ्रमः॥ अभिषेकनिवृत्त्यर्थे सोऽस्तु संभारसंभ्रमः॥५॥ यस्या मदभिषेकार्थे मानसं परितप्यते॥ माता नः सा यथा न स्यात्सविशंका तथा कुरु॥६॥ तस्याः शंकामयं दुःखं मुहूर्त्तमपि नोत्सहे॥ मनसि प्रतिसंजातं सौमित्रेऽहमुदीक्षितुं॥७॥ न बुद्धिपूर्वं नाबुद्धं स्मरामीह कदाचन॥ मातॄणां वा पितुर्वाहं कृतमल्पं च विप्रियं॥८॥ सत्यः सत्याभिसंधश्च नित्यं सत्यपराक्रमः॥ परलोकभयाद्भीतो निर्भयोऽस्तु पिता मम॥९॥

तिसंजातं शंकामयं दुःखं मुहूर्तमपि उपेक्षितुं नोत्सहे। उदीक्षितुमिति पाठे द्रष्टुमित्यर्थः॥७॥ तदेवोपपादयति न बुद्धीति। अबुद्धं अज्ञानपूर्वं वा। अल्पं च अल्पमपि विप्रियं विप्रियकरं कदाचन कदापि कृतं न स्मरामीत्यन्वयः। समारब्धमिति पाठे नारब्धवानस्मि इत्यर्थः॥८॥ सत्यः सत्यवचनस्वभावः सत्याभिसंधः सत्यप्रतिज्ञः परलोकभयात् परलोकभयहेतोरसत्यात् भीतः पिता निर्भयोऽस्तु। मया तत्कृतसत्यपरिपालनात्॥९॥

उपदेशस्य परमप्रयोजनमाह॰ नेति॰ नमाताभिशंकितव्या॰ नपिताभिशंकितव्यो॰ यतोदैवाभिपन्नाः॰ दैवग्रस्ताः
एवमभिशंकतइतिशेषः यद्वादैवाभिपन्नत्वंमातापित्रोर्विशेषणं॰ त्वंचदैवंतथाप्रभावमितिजानासि
अतोनातिशंकनीया॥३०॥इतिश्रीरामाभिरामेश्रीरा॰ रा॰ ति॰ अयो॰ द्वाविंशःसर्गः॥२२॥दुःखहर्ष
योर्मध्यंजगाम॥रामस्यधर्मेधैर्यदर्शनाद्धर्षः तस्यराज्यभ्रंशात्दुःखमित्येषामध्यगतिः लक्ष्मणस्य

नलक्ष्मणोस्मिन्ममराज्यविघ्नेमातायवीयस्यभिशंकितव्या॥दैवाभिपन्नानपिताकथंचि
ज्ज्ञानासिदैवंहितथाप्रभावं॥३०॥इत्यार्षेश्रीरा॰ अयो॰ द्वाविंशःसर्गः॥२२॥इतिब्रुवतिरा
मेतुलक्ष्मणोऽवाक्शिराइव॥ध्यात्वामध्यंजगामाशुसहसादैन्यहर्षयोः॥१॥तथातुबद्ध्वा
भ्रुकुटींभ्रुवोर्मध्येनरर्षभः॥निशश्वासमहासर्पोबिलस्थइवरोषितः॥२॥तस्यदुष्प्रतिवीक्ष्यं
तद्भ्रुकुटीसहितंतदा॥बभौक्रुद्धस्यसिंहस्यमुखस्यसदृशंमुखं॥३॥अग्रहस्तंविधुन्वं
स्तुहस्तीहस्तमिवात्मनः॥तिर्यगूर्ध्वंशरीरेचपातयित्वाशिरोधरां॥४॥

शेषावतारत्वेनत
मोगुणप्रधानता॰ ज्येष्ठस्यविवेकवाक्यश्रवणेनसत्वोदयश्चेतिभावः अधःशिरस्त्वेनोक्तार्थस्यार्ध्वा
गीकारध्वननं॰ इवेनतमसःस्वाभाविकत्वात्तस्यस्थिरताधन्यते॥१॥तामेवदर्शयति॰ तथात्विति॰
तथाभयंकरामित्यर्थः॥बिलमंत्रपरबिलं॥२॥दुष्प्रतिवीक्ष्यं॰ संमुखतयाद्रष्टुमशक्यंसादृश्यंदुर्द
र्शत्वेन॥३॥अग्रहस्तंहस्ताग्रं रामेणादमापनीयगर्हीतमित्यर्थः तिर्यगित्यादि॰ क्रोधातिशयेनविवि

उपसंहरति एतयेति तत्वया यथार्थया बुध्या बुद्धियोगेन आत्मनांतःकरणस्थेनात्मानमंतःकरणं संस्तभ्य यदि तिष्ठती तिशेषः तदा मे भिषेके व्याहृते पितृवपरितापो न विद्यते न भवति ॥२५॥ अथ तत्कालकर्तव्यं नियुंक्ते तस्मादिति उपदिष्टबुद्धियोगबलादित्यर्थः अपरितापः परितापहीनः सन् त्वमपि मामनुविधाय मामनुसृत्य अभिषेकनिर्वर्तनप्रयोजनिकां क्रियामलंकारं प्रतिसंहारय निवर्तय अनेनगूढं लक्ष्मणस्यापिव

एतया तत्वया बुध्या संस्तभ्यात्मानमात्मना ॥ व्याहृते प्यभिषेके मे परितापो न विद्यते ॥२५॥ तस्मादपरितापः सन्त्वमप्यनुविधाय मां ॥ प्रतिसंहारय क्षिप्रमाभिषेचनिकीं क्रियां ॥२६॥ एभिरेव घटैः सर्वैरभिषेचनसंभृतैः ॥ मम लक्ष्मण तापस्ये व्रतस्नानं भविष्यति ॥२७॥ अथवा किं ममैतेन राज्यद्रव्यमयेन तु ॥ उद्धृतं मे स्वयं तोयं व्रतादेशं करिष्यति ॥२८॥ मा च लक्ष्मण संतापं का र्षीर्लक्ष्म्या विपर्यये ॥ राज्यं वा वनवासो वा वनवासो महोदयः ॥२९॥

नगमनेस्पृचिं ॥२६॥ तापस्ये

तद्रूपव्रतस्य संकल्पे व्रतस्नानं व्रतसंकल्पायाऽपेक्षितं स्नानं व्रतस्नानं तदेभिर्भविष्यतीति योजना ॥२७ तापस्यव्रतस्नाने प्येभिः क्रियमाणे राज्यलिप्सया स्नानं कृतवानिति केकेय्याः शंका माभूदिति तन्निषेधयति अथवेति राज्यद्रव्यमयेन राज्याभिषेकसाधनमंगलद्रव्यप्रचुरेण स्वयं स्वहस्तेनोद्धृतं तोयमेव व्रतादेशं व्रतसंकल्पाधिकारं ॥२८॥ राज्यवनवासयोर्वनवासो महोदयः महाफलः प्रजानां कृत्याकृत्यचिंताव्यापारहितेन सततं तपः प्रवृत्या पितृवाक्यपरिपालनेन चेति भावः ॥२९॥ ॥

सक्तमासक्तिर्लोकप्रतारणायये षांताद्दशाव द्धिर्धर्मपरा॰ अंतः पापासक्तो॰ सं तितान् विंकथंनबुध्यसे ॥८॥
तयोर्धर्मोपधंदर्शयति॰ तयोरिति॰ स्वार्थस्वकार्यसिध्यर्थं॰ सुचरितंत्वांशाठ्यात्॰ मषाकृत्पधर्मव्य
वहारात्॥ परिजिहीर्षतोऽस्यतु मिच्छतोस्तयोः कृत्यंकिंनबुध्यसइत्यनुकर्षः अमुमर्थमर्थाप
त्यासाधयति॰ यदीति॰ यदितयोरेवंशाठ्येन त्वदर्थंप्रच्यावनंव्यवसितमभिप्रेतंनस्यात् तदा
भिषेकारंभंकृत्वातद्विघ्नकरणंनस्यादितिशेषः हि यस्मात्प्रागेवकालएवतयोः॥ दातप्रतीग

तयोःसुचरितंस्वार्थशाठ्यात्परिजिहीर्षतोः॥ यदिनैवंव्यवसितंस्याद्धिप्रागेवराघ
व॥४॥ तयोःप्रागेवदत्तश्चस्याद्वरःप्रकृतश्च सः॥ लोकविद्विष्टमारब्धंत्वद
न्यस्याभिषेचनं॥१०॥

हीतभावेनसंबद्धः सवरः प्रकृतः प्रवत्तप्रसंगस्तथ्याःस्यात्तदाप्रागेवाभिषेकारंभात्पूर्वमेव
दत्तःस्यान्त्वदभिषेकारंभंविनैवभरताभिषेकत्वद्वनवासौकृतौस्यातांतस्माद्वरप्रदानकथा
मिथ्यैवेतिभावः॥ यद्यपिदत्तोपिवरोराज्ञाविस्मृतइति॰ तेनमदभिषेकारंभः कृतइत्यादिसमा
धानंशक्यंतथापिईदृशवरदानस्यलोकविद्विष्टत्वेनानौचित्यादनुचितकर्तृत्वेनराजात्या
ज्यएवेत्याह॰ लोकेति॰ ज्येष्ठेश्रेष्ठगुणेजाग्रतिकनिष्ठविषयकत्वात्तदभिषेचनस्यलोकवि
द्विष्टत्वंप्रतपस्तव्यवहारविरोधात्शास्त्रविरोधाच्चेतिभावः॥९॥१०॥ ॥

84

अग्रात्वणा करात्तेण तिर्यकूवक्त्रं भ्रातरमीक्षमाणः। धर्मदोषोधर्मविरोधस्तत्प्रसंगेनतत्परिहारशेषतया· पितृ
वचनमकुर्वन्कथमस्मान्धर्मेण पालयिष्यतीतियाल्लोकस्यातिशंका तदभावसंपादनहेतुनामयापि
पितृवचसोकरणेऽन्योपिपितृवचोनकरिष्यतीतिलोकनाशशंकाहेतुनाचयस्यतेसुमहान् अयंवनग
मनंप्रतिसंभ्रमोजातःसोऽस्थानेऽयुक्तोभ्रांतिमूलएव। भ्रांतिमूलत्वमेवाह· कथंहीति· अशौंडीरं अस
मर्थं। दैवमितिकिंचिद्धस्तप्रबलमिति। एवंजातीयकं· यथाहि· यथैवत्वंवदसि· एतत् एतज्जाती

अग्राहणावीक्षमाणस्तु तिर्यक् भ्रातरमब्रवीत्॥ अस्थानेसंभ्रमोयस्यजातोवैसुमहानयं॥५॥
धर्मदोषप्रसंगेनलोकस्यानतिशंकया॥ कथंह्येतदसंभ्रांतस्त्वद्विधोवक्तुमर्हति॥६॥
यथाह्येवमशौंडीरंशौंडीरःक्षत्रियर्षभः॥ किंनामकृपणंदैवमशक्तमभिशंससि॥७॥
पापयोस्तेकथंनामतयोःशंकानविद्यते॥ संतिधर्मोपधासक्ताःधर्मात्मन्किंनबुध्यसे॥८॥

यंत्वद्विधःशौंडीरःदैवनिराकरणेपिसमर्थःक्षत्रियर्षभोयश्चसंभ्रांतःस्यात्कथमेतद्वक्तुमर्हतीति· नकथम
पि· अतःकृपणं· असमर्थैकपरिग्राह्यंअनयाशोच्यं· अशक्तंपौरुषसन्निधौकार्यासमर्थंदैवपदार्थं· प्राभ
कृतवत्किमभिशंससि अभिष्टौषि॥५॥६॥७॥ एवंदैवावलंबनंप्रतिक्षिप्यधर्मदोषप्रसंगंपरिहरति· पा
पयोरिति· पापात्मनोस्तयोः कैकेयीदशरथयोर्विषयेतेकथं। नाम· शंकायामात्मत्वशंकानविद्यतेनजाय
ते· ननुधर्मव्यवहारवतोः कथमेषाशंकातत्राह· संतीति· हेधर्मात्मन् धर्मैकस्वभावधर्मोपधाछलंतत्रा

तदेवाह तवेत्यादिना अयं वनवासरूपः दोषस्य दोषत्वाग्रहमेव शोचन्ति त्वां त्वां विना तत्कृते कर्मणि दैवकृतत्वदै
व्यंबुद्धिं त्वां विनान्यः॥ कामवृत्तयोरहितयोर्नित्यं पितृनामकशत्र्वोः कामं मनोरथं मनसापि कथं कुर्यात्
अनुष्ठानं तु दूरत इति भावः॥१५॥ वरस्य वास्तवं दैवकृतत्वमभ्युपेत्याप्याह यद्यपीति॥ तयोः पि
त्रोः प्रतिपत्तिस्त्वदभिषेकविघटनविषया बुद्धिरपि दैवी च दैव्येवेति॥ यद्यपि तेमतं तथापि तेत्व

न वायं धर्मसंयोगो लोकस्यास्य विगर्हितः॥ मनसापि कथं कामं कुर्यात्त्वां कामवृत्तयोः॥ तयोस्त्व
हितयोर्नित्यं शत्र्वोः पित्रभिधानयोः॥१५॥ यद्यपि प्रतिपत्तिस्ते दैवी चापि तयोर्मतं॥ तथाप्युपे
क्षणीयं ते न मे तदपि रोचते॥१६॥ विक्लवो वीर्यहीनो यः स दैवमनुवर्तते॥ वीराः संभावितात्मानो न दैवं पर्युपासते॥१७॥ दैवं पुरुषकारेण यः समर्थः प्रबाधितुं॥ न दैवेन विपन्नार्थः पु
रुषः सोवसीदति॥१८॥ द्रक्ष्यंति त्वद्य दैवस्य पौरुषं पुरुषस्य च॥ दैवमानुषयोरद्य व्यक्ता व्य
क्तिर्भविष्यति॥१९॥

यास्यमतमप्येतदुपेक्षणीयं। यतस्तदपीदृशं विरुद्धकारि दैवमपि न रोचते
एवं च प्रियभ्रातुर्ममासंमतत्वादिदं त्वयात्याज्यमिति भावः॥१६॥ किं च त्वादृशस्य दैवालंबनवादोप्ययु
क्त इत्याह विक्लव इति लोकाप्रसिद्ध इत्यर्थः संभावितात्मानः सर्वलोकश्लाघ्यशौर्यादिमंतः॥१७॥
समर्थः त्वादृशाः विपन्नार्थः हतप्रयोजनः स त्वादृशः॥१८॥ ननु दैवबाधनसामर्थ्यं न कस्यापीति
चेत्तत्राह द्रक्ष्यंतीति पौरुषं बलं। द्रक्ष्यंति लोका इति शेषः व्यक्तिः प्रबलदुर्बलत्वविवेकः अद्य मत्पौरुषेणेति शे
षः॥१९॥

मेऽपराधमितिशेषः त्वद्विषयेप्रतिवचनदानरूपंममापराधंक्षंतुमर्हसि ॥ ११ ॥ प्रतिवचनमेवाह॰ येनेत्यादि॰ य
त्प्रसंगाद्यस्यपितरवचनस्यप्रसंगात्॰ धर्मत्वप्रसंगकल्पनाद्धेतोर्विमुच्यसि॰ ॥ तदकरणेप्रत्यवायः स्यादिति
मोहंप्राप्तोसि॰ येनचमोहेनतवबुद्धिरेवंद्वैधमागता॰ ॥ पूर्वंराज्यग्रहणविषयत्वमधुनातत्यागवि
षयत्वरूपं॰ प्रकारद्वयंप्राप्तासधर्मोपिममद्वेष्यः धर्माभासत्वादितिभावः ॥ १२ ॥ तस्यधर्माभासत्वमेवा
ह॰ कथमिति॰ कर्मणाअचिंत्यवैभवस्वक्रियाशक्त्याकर्तुमकर्तुमन्यथाकर्तुंचशक्तः समर्थस्त्वं॰ के

नोत्सहेसहितुंवीरतत्रमेक्षंतुमर्हसि ॥ येनैवमागतद्वैधंतवबुद्धिर्महामते ॥ ११ ॥ सोपि
धर्मोममद्वेष्योयत्प्रसंगाद्विमुच्यसि ॥ १२ ॥ कथंत्वंकर्मणाशक्तः कैकेयीवशवर्त्तिनः ॥ क
रिष्यसिपितुर्वाक्यमधर्मिष्ठंविगर्हितं ॥ १३ ॥ यदयंकिल्विषाद्भेदः कृतोप्येवंनगत्यते ॥ जा
यतेतत्रमेदुःखंधर्मसंगस्यगर्हितः ॥ १४ ॥

कैकेयीवशवर्तिनस्त्वाजितस्य॰ अतएवगर्हितंलोकनिं
द्यं॰ अधर्मिष्ठंचवचः करिष्यसि ॥ १३ ॥ एवंस्पष्टेप्यधर्मेनवाधर्मबुद्धिर्नजायतइतिमेदुःखमित्याह॰
यदिति॰ अयंभेदोभिषेकविघटनात्माकिल्विषात्॰ मृषावरप्रकल्पनात्॰ कृतोपियत्॰ यतस्त्वयाए
वंमृषावरप्रकल्पितत्वेननगत्यतेऽतोमेतत्रतद्विषयेदुःखंजायते॰ कपटकृतमप्यधर्ममसोसाधु
तयागृह्णातीतिममव्यथेतिभावः किंचैवंविधधर्मसंगएवंविधधर्मआसक्तिर्निंद्या ॥ १४ ॥

अथवनवासोचितंकालंस्वयमेवाह· ऊर्ध्वमिति· एतद्विवरणं· वर्षसहस्रांतेइति·।तस्मिन्नतीतेत्वयिव
नवासंगतेनंतरंआर्यपुत्राः आर्यस्यतवपुत्राः प्रजापाल्यं प्रजापालनरूपंराज्यंकरिष्यंति·तदानीम
प्यन्येषांनावकाशइतिभावः॥२६॥इदमेवव्युक्तमित्याह· पूर्वैरिति· हि यतः पुत्रवत्पालननिमित्तंपुत्रेषु
प्रजानिक्षिप्यपश्चाद्वनवासः पूर्वैराजर्षिरत्यातदाचारेणअभिधीयतेविधीयतेऽविधीयतइत्ये
वकचित्पाठः॥२७॥राजनिदशरथेअनेकाग्रेकामवशाद्युक्तवानप्रस्थधर्मानुष्ठानेकाग्रताराहि

ऊर्ध्वंवर्षसहस्रांतेप्रजापाल्यमनंतरं॥आर्यपुत्राःकरिष्यंतिवनवासंगतेत्वयि॥२६॥
पूर्वैराजर्षिरित्याहिवनवासोभिधीयते॥प्रजानिक्षिप्यपुत्रेषुपुत्रवत्परिपालने॥२७॥
सचेद्राजन्यनेकाग्रेराज्यविभ्रमशंकया॥नैवमिच्छसिधर्मात्मन्राज्यंरामत्वमात्मनि॥२८॥

त्येनचलचित्ततयाप्रतिकूलेसति·॥राज्यविभ्रमशंकया· तद्वचे विरोधेनराज्यग्रहणेसकलत्लोकत्तो
भेणस्वस्विन्राज्यस्यविभ्रमशंकयाचलनशंकयाऽस्थैर्यशंकयासवनवासधर्मस्त्वयाचेदंगी
क्रियतेइतिशेषः॥किंच·हेरामएवंश्रेष्ठत्वाद्दर्मतः॥प्राप्तंराज्यंतथैवशंकयायद्यात्मनिनेच्छसितदा
नांशंकांत्यजेतिशेषः राज्यकामत्वमितिपाठे·एवंप्राप्तंराज्यभोक्तृत्वंराज्यरूपभोग्यसंबंधंवायदिनेच्छ

तदेवाह॥ अद्येति॥ येर्दैवादाहतंराज्याभिषेचनंतेद्य दृश्यंतेजनाअद्यमत्पौरुषहतंदैवंद्रक्ष्यंति॥ यद्दैवादितिपाठे॥ यस्माद्दैवादाहतंयेनदैवेनाहतमितियावत्॥ दृश्यंयैर्जनैर्दृष्टंतेजनास्तद्दैवंमत्पौरुषहतंद्रक्ष्यंतीत्यर्थः॥२०॥ अत्यंकुशं अतिक्रांतांकुशव्यापारं उद्दामं उत्कृष्टदामनिःस्पृंखलमितियावत्॥ प्रधावितं अभिमुखंधावितं॥ पौरुषेणस्वगतबलेननिवर्तये॥२१॥ दैवनिवर्तनंस्वबलस्यैषत्कर मित्याह॥ लोकेत्यादि॥२२॥ मि

अद्यमत्पौरुषहृतंदैवंद्रक्ष्यंतिवैजनाः॥ येर्दैवादाहतंतेद्यदृश्यंराज्याभिषेचनं॥२०॥ अत्यंकुशमिवोद्दामंगजंमदजलोद्धतं॥ प्रधावितमहं दैवंपौरुषेणनिवर्तये॥२१॥ लोकपालाः समस्तास्तेनाद्यरामाभिषेचनं॥ न चकृत्स्नास्त्रयोलोकाविहन्युः किंपुनः पिता॥२२॥ यैर्विवासस्तवारण्ये मिथोराजन्समर्थितः॥ अरण्येतेविवत्स्यंति चतुर्दशसमास्तथा॥२३॥ अहं तदाशांधक्ष्यामिपितुस्तस्याश्चयातव॥ अभिषेकविघातेन पुत्रराज्यायवर्तते॥२४॥ मद्बलेन विरुद्धायनस्याद्दैवबलंतथा॥ प्रभविष्यतिदुःखाययथोग्रंपौरुषंमम॥२५॥

थः परस्परैकवाक्यतया॥ स्वपौरुषेणराजत्वंसिद्धवत्॥ कृत्वाह॥ राजन्निति॥२३॥ तदाशांतमाशां॥ तांकायातवाभिषेकविघातेन॥ पुत्रराज्यायपुत्रराज्यप्रापणार्थंवर्तनेनामित्यर्थः॥२४॥ मद्बलेन त्वत्पक्षभूतेनमयाविरुद्धायजनायय्थाममग्रंपौरुष॥ दुःखायप्रभविष्यतितथादैवबलंनस्यात्॥ तन्निरासमसमर्थमितिशेषः॥२५॥

रामा·अ·
८१

हताः विछिन्नाः अग्नय इव दीप्यमानाः रक्तधारया अत एव सविद्युतो मेघा इव ॥ ३५ ॥ उक्तधर्मविशिष्टे मयि स्थिते सति पुरुषाणां मध्ये कश्चिदपि कथं पुरुषमानी आत्मानं पुरुषं मन्यमानः शूराभिमानी कथं स्यादित्यर्थः ॥ ३६ ॥ अत्यसन् पातयन् बहुभिः बाणैः एकेन बाणेन विनियोत्स्यामित्यन्वयः ॥ ३७ ॥ अस्त्र

खड्गधाराहतामेद्य दीप्यमाना इवाग्नयः ॥ पतिष्यंति द्विषो भूमौ मेघा इव सविद्युतः ॥ ३५ ॥
बद्धगोधांगुलित्राणे प्रगृहीतशरासने ॥ कथं पुरुषमानी स्यात्पुरुषाणां मयि स्थिते ॥ ३६ ॥
बहुभिश्चैकमत्यस्यन्नेकेन च बहून् जनान् ॥ विनियोत्स्याम्यहं बाणैर्नृवाजिगजमर्मसु ॥ ३७ ॥
अद्य मेऽस्त्रप्रभावस्य प्रभावः प्रभविष्यति ॥ राज्ञश्चाप्रभुतां कर्तुं प्रभुत्वं च तव प्रभो ॥ ३८ ॥ अद्य चंदनसारस्य केयूरामोक्षणस्य च ॥ वसूनां च विमोक्षस्य सुहृदां पालनस्य च ॥ ३९ ॥ अनुरूपाविमौ बाहू राम कर्म करिष्यतः ॥ अभिषेचनविघ्नस्य कर्तॄणां ते निवारणे ॥ ४० ॥ ब्रवीहि कोऽद्यैव मया वियुज्यतां तवासुहृत्प्राणयशःसुहृज्जनैः ॥ यथा तवेयं वसुधा वशा भवेत्तथैव मां शाधि तवास्मि किंकरः ॥ ४१ ॥

प्रभावस्य अस्त्रसामर्थ्यस्य प्रभावः प्रतापः राज्ञो दशरथस्य प्रभविष्यति उज्जंभितो भविष्यति ॥ ३८ ॥ चंदनसारस्य चंदनसारानुलेपनस्य केयूरामोक्षणस्य अंगदधारणस्य वसूनां मोक्षणस्य दानस्य सुहृज्जनपालनस्य ॥ अनुरूपौ अर्हौ मे इमौ पीनप्रलंबौ बाहू तेऽभिषेचनविघ्नस्य कर्तॄणां निवारणे कर्मस्वानुरूपं कर्म करिष्यतः ॥ ३९ ॥ ४० ॥ ब्रवीहीत्यादि ईदृ·

87

(वा·रा·अ·) अयोध्याकाण्ड

राम
८१

तत्र हेतुः प्रतिजाने इत्यादि ॥ अहं वेलासागरमिव तव राज्यं च त्वां च रक्षेयं अन्यथा वीरलोकभाक् माभूवमिति नेतव्या अग्रे प्रतिजाने ॥ २९ ॥ तस्मात्वं मंगलैरभिषेकसाधनैरात्मानमभिषिंच स्ववसिष्ठादिभिरिति शेषः तत्राभिषेकव्यापारे व्यापृतो व्यापृतचित्तो भव तत्प्रतिबंधकान् अहं वारयिष्यामीत्याह अहमिति अलं समर्थः ॥ ३० ॥ तदेव दर्शयति नेति आबंधनार्थाय काष्ठानां परस्परं बंधनं । हेतुच्छिद्रादिकरणाय

प्रतिजाने च ते वीर माभूवं वीरलोकभाक् ॥ राज्यं च तव रक्षेयमहं वेलेव सागरं ॥ २९ ॥ मंगलैरभिषिंचस्व तत्र त्वं व्यापृतो भव ॥ अहमेको महीपालानलं वारयितुं बलात् ॥ ३० ॥ न शोभार्थाविमौ बाहू न धनुर्भूषणाय मे ॥ नासिराबंधनार्थाय न शराः स्तंभहेतवः ॥ ३१ ॥ अमित्रमथनार्थाय सर्वमेतच्चतुष्टयं ॥ न चाहं कामयेत्यर्थं यः स्याच्छत्रुर्मतो मम ॥ ३२ ॥ असिना तीक्ष्णधारेण विद्युच्चलितवर्चसा ॥ प्रगृहीतेन वै शत्रुं वज्रिणं वा न कल्पये ॥ ३३ ॥ खड्गनिष्पेषनिष्पिष्टैर्गहना दुश्चरा च मे ॥ हस्त्यश्वरथिहस्तोरुशिरोभिर्भविता मही ॥ ३४ ॥

स्तंभः कस्यचित्काष्ठादेरधः पतनप्रतिबंधः ३१ न चेत्यादि सार्धश्लोक एकं वाक्यं योत्यर्थं मम मतः संमतः शत्रुः स्यात्तं यं कंचिच्छत्रुं वज्रिणं वा इंद्ररूपं वा प्रगृहीतेन तीक्ष्णधारत्वादिविशिष्टेनासिनान कल्पयेन खंडशः कल्पये एवमहं न कामये च एवं कामनामपि न करोमि सर्वेषां खंडयाम्येतिभावः ॥ ३२ ॥ ३३ ॥ खड्गनिष्पेषनिष्पिष्टैः खड्गकृताघातेन खंडितैः मही गहना निरंतरत्वात् अत एव दुश्चराः हस्त्यादीनां हस्त्यादिभिः क्रमात्संबंधः भवितेति लुट

सर्वमादिशन् सुखदुःखेनयोजयन् कृतांतोदैवं बलवानितिमन्ये यत्रयस्मात् हेरामअभिराम त्वंलोके कर्मलोके स्थितोवनंगमिष्यसि ॥५॥ आत्मभवः आत्मजः स्वमनः संभूतः तवादर्शनमेवबर्धक त्वान्मारुतोयस्यसः विलापदुःखैःसमिधः समिंधनं यस्यसः घजर्थेकः रुदिताश्रूण्येवहुताआहुतयो यस्मिन्सःचिंताहेतुकबाष्पमेवमहाधूमोयस्यसः त्वागमनचिंतजः चिंतजइतिबाहुलकात्हस्वःत

नूनंतुबलवान्लोके कृतांतःसर्वमादिशत् ॥ लोकेरामाभिरामस्त्वंवनंयत्रगमिष्यसि ॥५॥ अयंतुमामात्मभवस्तवादर्शनमारुतः ॥ विलापदुःखसमिधोरुदिताश्रुहुताहुतिः ॥६॥ चिंताबाष्पमहाधूमस्तवागमनचिंतजः ॥ कर्षयित्वाधिकंपुत्रनिश्वासायाससंभवः ॥७॥ त्वयाविहीनामिहमांशोकाग्निरतुलोमहान् ॥ प्रधक्ष्यतियथाकक्षंचित्रभानुर्हिमात्यये ॥८॥ कथंहिधेनुःस्वंवत्संगच्छंतमनुगच्छति ॥ अहंत्वानुगमिष्यामियत्रवत्सगमिष्यसि ॥९॥ यथानिगदितंमात्रातद्वाक्यंपुरुषर्षभः ॥ श्रुत्वारामोब्रवीद्वाक्यंमातरंभृशदुःखितां ॥१०॥

त्वया आगमनचिंतातयाजनितः अदर्शनजचिंतजइतिपाठेपि अदर्शनजातचिंताजनितइत्यर्थः परेत्वदर्शनस्यमारुतत्वेननिरूपणात्सचिंत्यइत्याहुः निश्वासरूपायासेनसंधुक्षणात्संभवोवृद्धिर्यस्यसः त्वयाविहीनांमामधिकंकर्शयित्वाकृशांकृत्वा अतुलयुक्तगुणकः शोकाग्निर्मांधक्ष्यति हिमात्यये ग्रीष्मेचित्रभानुर्वन्हिः सूर्योवा ॥६॥७॥८॥ कथमिति यथेत्यर्थः कचित्तथैवपाठः ९

एवंवादिनं लक्ष्मणं रामो नायमेतस्य काल इत्याह विसृज्येति बाष्पं लक्ष्मणानयनजं विसृज्य परिमृज्य विसृज्येति पाठे अन्तर्भावितण्यर्थतया विसर्जयित्वा चक्षुषी परिमृज्येति यावदिति कतकः ॥ पित्रोर्वचने व्यवस्थितं प्रतिष्ठितं मां निबोध हे सौम्य एष हि सत्पथः जीवतोर्वाक्यकरणात् प्रत्यब्दं भूरिभोजनात् गयायां पिंडदानाच्च त्रिभिः पुत्रस्य पुत्रतेति न्यायादिति भावः निबोधेत्यस्य नितरामतिशयेनावतरणकालिकत्वं तस्मरण

विसृज्य बाष्पं परिसांत्व्य चासकृत्स लक्ष्मणं राघववंशवर्धनः ॥ उवाच पित्रोर्वचने व्यवस्थितं निबोध मामेष हि सौम्य सत्पथः ॥४२॥ इत्यार्षे श्रीरा० अयो० त्रयोविंशः सर्गः ॥२३॥ तं समीक्ष्य व्यवसितं पितुर्निर्देशपालने ॥ कौसल्या बाष्पसंरुद्धा वचो धर्मिष्ठमब्रवीत् ॥१॥ अदृष्टदुःखो धर्मात्मा सर्वभूतप्रियंवदः ॥ मयि जातो दशरथात्कथमुंछेन वर्तयेत् ॥२॥ यस्य भृत्याश्च दासाश्च मृष्टान्यन्नानि भुंजते ॥ कथं स भोक्ष्यते रामो वने मूलफलान्ययं ॥३॥ क एतच्छ्रद्दधेच्छ्रुत्वा कस्य वा न भवेद्भयं ॥ गुणवान्दयितो राज्ञो काकुत्स्थो यद्विवास्यते ॥४॥

पूर्वकं जानीहि एष हि एष एव सत्पथः सतां रक्षकः पंथा इत्यप्यर्थो गुरुः ॥४२॥ इति श्रीरामा० त्रयोविंशः सर्गः ॥२३॥ व्यवसितं निश्चितमतिं निर्देशो निदेश आज्ञा बाष्पसंरुद्धा बाष्पसंरुद्धवाक् धर्मिष्ठं रामं ॥१॥ उंछः क्षेत्रपतितकणिशग्रहणं वर्तयेत् जीवेत् भवानिति शेषः ॥२॥ भृत्याः भर्तव्याः अयं उपस्कृतमांसादिभोजनशीलः ॥३॥ विवास्यत इति यत् एतच्छ्रुत्वा कः श्रद्दधेत सत्यं मन्वीत सत्यमिति वा ज्ञात्वा कस्य स्वपित्रादिभ्यो भयं न भवेत् ॥४

अंगीकृतभर्तृसेवापिसपत्नीदुःखस्मरणात्पुनः रामानुगमनमभिलषति॰ आसामित्यादि॰ वन्यांवनेभवां ॥ १९ ॥ य
दितेइत्यार्धपूर्वान्वयि॰ तांतथारुदंतीदृष्ट्वापिस्वयमरुदन्नवचोब्रवीत्॰ रोदनेकातर्यप्रकटनेनमातुः
पुनरप्यनुगमनप्रत्याशाप्रसंगात् ॥ २० ॥ प्रभवतिदंडादौसमर्थोभवति ॥ २१ ॥ धीमतेतिसनाथ्याइतिशेषः
अथसपत्नीमध्यवासोदुष्कर इत्यत्रपरिहारमाह भरतइति ॥ २२ ॥ भवतीमिति॰ अतःकैकेयीकोः

आसांरामसपत्नीनांवस्तुंमध्येनमेक्षमं ॥ नयमामपिकाकुत्स्थ वनंवन्यांमृगीमिव ॥ १९ ॥ यदि
तेगमनेबुद्धिः कृतापितुरपेक्षया ॥ तांतथारुदंतीरामोऽरुदन्वचनमब्रवीत् ॥ २० ॥ जीवंत्याहि
स्त्रियाभर्तादैवतंप्रभुरेवच ॥ भवत्याममचैवाद्यराजाप्रभवतिप्रभुः ॥ २१ ॥ नत्वनाथावयं
राज्ञालोकनाथेनधीमता ॥ भरतश्चापिधर्मात्मासर्वभूतप्रियंवदः ॥ २२ ॥ भवतीमनुवर्ते
तसहिधर्मरतःसदा ॥ यथामयितुनिष्क्रांतेपुत्रशोकेनपार्थिवः ॥ २३ ॥ श्रमंनावाप्नुयात्किं
चिदप्रमत्तातथाकुरु ॥ दारुणश्चाप्ययंशोकोयथैनंनविनाशयेत् ॥ २४ ॥ राज्ञोवृद्धस्यसत
तंहितंचरसमाहिता ॥ व्रतोपवासनिरतायानारीपरमोत्तमा ॥ २५ ॥

योऽकिंचित्करइतिभावः ॥ य
थामयिनिष्क्रांतेश्रमंनाप्नुयात्तथाकुरु॰ यथाचैनंराजानंशोकोनविनाशयेत्तथाचकुरु ॥ २३ ॥ २४ ॥ द्वि
जस्यगायत्रीजपवत्स्त्रियाभर्तृशुश्रूषैवपरंनित्यानान्यत्किंचित्॰ ॥ प्रत्यूतनतद्विरोधेन्यदाचर्यमाणं
प्रत्यवायजनकमपीत्याह॰ [illegible] नित्यधर्मकृतिः ॥ परिहृतु

89

वंचितः वंचनया मद्वियोजनादुःखं प्रापितः न वर्तयिष्यति न जीविष्यति॥११॥ केवलं नृशंसः क्रौर्यमेव न तु तेनेहामु
त्रसुखमित्यर्थः॥ मनसापि न कर्त्तव्यः न चिंतनीयः यतो विगर्हितः महापापहेतुत्वादतिनिंदितः॥१२॥ अतः

कैकेय्या वंचितो राजा मयि चारण्यमाश्रिते॥ भवत्या च परित्यक्तो न नूनं वर्तयिष्यति॥११॥ भर्तुः
पुनः परित्यागो नृशंसः केवलं स्त्रियः॥ स भवत्या न कर्त्तव्यो मनसापि विगर्हितः॥१२॥ यावज्जी
वति काकुत्स्थः पिता मे जगतीपतिः॥ शुश्रूषा क्रियतां तावत्स हि धर्मः सनातनः॥१३॥ एव
मुक्ता तु रामेण कौसल्या शुभदर्शना॥ तथेत्युवाच सुप्रीता राममक्लिष्टकारिणं॥१४॥ एवमु
क्तस्तु वचनं रामो धर्मभृतां वरः॥ भूयस्तामब्रवीद्वाक्यं मातरं भृशदुःखितां॥१५॥ मया चै
व भवत्या च कर्त्तव्यं वचनं पितुः॥ राजा भर्ता गुरुः श्रेष्ठः सर्वेषामीश्वरः प्रभुः॥१६॥ इमानि
तु महारण्ये विहृत्य नव पंच च॥ वर्षाणि परमप्रीत्या स्थास्यामि वचने तव॥१७॥ एवमुक्ता
प्रियं पुत्रं बाष्पपूर्णानना तदा॥ उवाच परमार्ता तु कौसल्या सुतवत्सला॥१८॥

यावदिति॥१३॥१४॥ एवं वचनमुक्तः भर्तृशुश्रुषांगीकारवचनमुक्तः श्रावितः॥१५॥ उभयोस्तद्वचनावश्य
कर्त्तव्यत्वे हेतुर्भर्ता गुरुरिति च यथायोग्यं॥१६॥ पितृवाक्यकरणानंतरं त्वच्छुश्रूषापि कार्येत्याह॥ इमानी
ति॥ विहृत्येत्यनेन वनवासस्य मृगयावद्विलासत्वं दर्शितं॥ वने स्थास्यामि वचनमनुष्ठास्यामि॥१७॥ ए

कालइत्यवियोगादिजनकः॥३३॥३४॥आनृण्यंतांस्वार्थेष्यञ्॥३५॥मेवचआविध्यआश्लिष्यत्वांसंचोदयति
वनायेतिशेषः इतियत्अतःकृतांतस्यगतिर्दुर्विभाव्या॥३६॥श्लक्ष्णेनिर्मलेनचारुणामनोहरेणसा
न्त्वांसांत्वनेवचनेनशुक्लेनेतिपाठांतरं॰ अदर्शनासहिष्णुत्वात्प्रत्यागमनकालइदानीमेवभवेदि

विनिवर्तयितुंवीरनूनंकालोदुरत्ययः॥गच्छपुत्रत्वमेकाग्रोभद्रंतेस्तुसदाविभो॥३३॥पुनस्त्व
यिनिवृत्तेतुभविष्यामिगतक्लमा॥प्रत्यागतेमहाभागेकृतार्थेचरितव्रते॥३४॥पितुरानृण्यतां
प्राप्तेस्वपिष्येपरमंसुखं॥कृतांतस्यगतिःपुत्रदुर्विभाव्यासदाभुवि॥३५॥यस्त्वांसंचोदयति
मेवचआविध्यराघव॥गच्छेदानींमहाबाहोक्षेमेणपुनरागतः॥३६॥नंदयिष्यसिमांपुत्रसा
न्नाश्लक्ष्णेनचारुणा॥अपीदानींसकालःस्याद्वनात्प्रत्यागतंपुनः॥यत्वांपुत्रकपश्येयंजटा
वल्कलधारिणं॥३७॥तदाहिरामंवनवासनिश्चितंददर्शदेवीपरमेणचेतसा॥उवाचरा
मंशुभलक्षणंवचोवभूवचस्वस्त्ययनाभिकांक्षिणी॥३८॥इत्यार्षेश्रीरामायणेवाल्मीकीये
अयोध्याकांडेचतुर्विंशःसर्गः॥२४॥

तिप्रार्थयते॰॥अपीतियेनकालेनप्रत्यागतंप्रत्यागमनंभ
वेत्सइत्यर्थः॥अपीदानीमितिलोकोक्तौवाधर्मशीलत्वाद्देवर्षिरक्षणोद्यतत्वाच्चभगवत्संकल्पे
नैवतथाज्ञानंतस्याइतिबोध्यं॥३७॥परमेणआदरवतास्वस्त्ययनंमंगलमभिकांक्षितुंशीलमस्य
स्याःसा॥३८॥ इतिश्रीरामाभिरामेश्रीरामीयेरामायणतिलकेअयोध्याकांडेचतुर्विंशःसर्गः॥२४॥

२६ नित्यानुष्ठानेसत्यनित्याकरणेपिनपरलोकनाशइत्याह: । अपियेतिनिर्नमस्काराभर्तृव्यतिरिक्तदेवादेर्नमस्का राद्युपचाररहितादेवपूजनात् · विप्रवादिदेवपूजनात् · सापिस्वर्गंलभेतेइतिप्राक्तनेनान्वय: एतमे वार्थंनियमविधिद्वारेणाहइति · शुश्रूषामेवेति · तत्प्रीतिजनकंकर्मैवेत्यर्थ: तदेवाह · प्रियहितेरतेति हितपदेनपथ्यादुक्तेनेतत्तध्वनयति · । आयाततोऽप्रियमपिहितंकुर्यात् आपाततःप्रियमप्यहितंत्यजे

भर्तारंनानुवर्तेतसाचपापगतिर्भवेत् ॥ भर्तुःशुश्रूषयानारीलभतेस्वर्गमुत्तमं ॥ २६ ॥ अपियानि र्नमस्कारानिवृत्तादेवपूजनात् ॥ शुश्रूषामेवकुर्वीतभर्तुःप्रियहितेरता ॥ २७ ॥ एषधर्मस्त्रिया नित्योवेदेलोकेश्रुतःस्मृतः ॥ अग्निकार्येषुचसदासुमनोभिश्चदेवता: ॥ २८ ॥ पूज्यास्तेमत्कृते देविब्राह्मणाश्चैवसत्कृताः ॥ एवंकालंप्रतीक्षस्वममागमनकांक्षिणी ॥ २९ ॥ नियतानियता हाराभर्तृशुश्रूषणेरता ॥ प्राप्स्यसेपरमंकामंमयिपर्यागतेसति ॥ ३० ॥ यदिधर्मभृतांश्रेष्ठोधा रयिष्यतिजीवितं ॥ एवमुक्तातुरामेणबाष्पपर्याकुलेक्षणा ॥ ३१ ॥ कौसल्यापुत्रशोकार्तारा मंवचनमब्रवीत् ॥ गमनेसुकृतांबुद्धिंनतेशक्नोमिपुत्रक ॥ ३२ ॥

दिति ॥ २७ ॥ तत्रमानमाह · एष

भर्तृसेवारूपोधर्म: स्त्रियानित्यइतिवेदेश्रुतःलोके · स्मृतौस्मृतः तर्हिकिंकर्मानुष्ठेयमित्यत्राह · अग्नीत्यादि · भर्तृसंमतेषुअग्निकार्येषुचतेष्वेवचएवकारार्थ: ॥ २८ ॥ एवंभर्तृसेवातत्परतयाकालंममागमनकालं ॥ २९ ॥ कामंऐहिकविषयसुखं ॥ ३० ॥ तस्यपुत्रमात्रासाध्यत्वादाह · यदीति · श्रे

नन्दयिष्यतिस्ववंशमलिहितनं स्त्रिनत ॥ ३१ ॥
सुकृतांसुखकान्तिश्रवणां ॥ ३२ ॥

॥११॥१२॥१३॥ नक्षत्राणिरेवत्यादिनक्षत्राधिष्ठात्र्योदेवता·ग्रहाःरव्यादयःग्रहदेवताः तत्तदधिदेवताः पुनरुक्ति
रत्रपुत्रप्रेमपारवश्यान्नदोषाय पाठांतरेप्ययमेवार्थः॥१४॥१५॥१६॥१७॥ सर्वक्रव्यादसंबंधिभयंपुत्र
त्वं

९८

ऋतिस्मृतिश्चधर्मश्चपातुत्वांपुत्रसर्वतः॥ स्कंदश्चभगवान्देवः सोमश्चसबृहस्पतिः॥११॥
सप्तर्षयोनारदश्चतेत्वांरक्षंतुसर्वतः॥ तेचापिसर्वतःसिद्धादिशश्चसदिगीश्वराः॥१२॥ रक्षंतामं
यावनेतस्मिन्यांतुत्वांपुत्रनित्यशः॥ शैलाःसर्वेसमुद्राश्चराजा वरुणएवच॥१३॥ द्योरंतरि
क्षंपृथिवीवायुश्चसचराचरः॥ नक्षत्राणिचसर्वाणिग्रहाश्चसहदैवतैः॥१४॥ अहोरात्रेतथा
संध्येपांतुत्वांवनमाश्रितं॥ ऋतवश्चापिषट्चान्येमासाःसंवत्सरास्तथा॥१५॥ कलाश्चका
ष्ठाश्चतथातवशर्मदिशंतुते॥ महावनेपिचरतोमुनिवेषस्यधीमतः॥१६॥ तथादित्याश्च
दैत्याश्चभवंतुसुखदाःसदा॥ राक्षसानांपिशाचानांरौद्राणांक्रूरकर्मणां॥१७॥ क्रव्यादानां
चसर्वेषांमाभूत्पुत्रकतेभयं॥ प्लवगावृश्चिकादंशामशकाश्चैववकानने॥१८॥ सरीसृपाश्च
कीटाश्चमाभूवनगहनेतव॥ महाद्वीपाश्चसिंहाश्चव्याघ्राऋक्षाश्चदंष्ट्रिणः॥१९॥ महिषाः
शृंगिणोरौद्रानतेद्रुह्यंतुपुत्रक॥ नमांसभोजनारौद्रायेचान्येसर्वजातयः॥२०॥

क्रमाभूदित्यन्वय॥१८॥ प्लवगाःवानराःदंशावनमक्षिकाःगहनेतवमाभूवन्मासंतुऋक्षाभल्लू
काः॥१९॥ नेतुभ्यं सर्वजातीयःसर्वजातीयाःसर्वजातयइतिपाठेक्रूरजेनवइतिफलितार्थः॥२०

मंगलकरणमेवाह-सेति· आयासं तज्जनकं शोकं· उपस्पृश्य आचम्य मंगलानि मंगलवचनानि॥१॥ सतां क्रमे सतां मार्गे॥२॥३॥ देवेष्वायतनेषु· देवालयेषु· प्रणमसे च· चाद्वक्तुमिच्छसि च· ते च देवाः चादृग्घ्यः॥४॥ गु

सा विनीयतमायासमुपस्पृश्य जलं शुचि॥ चकार माता रामस्य मंगलानि मनस्विनी॥१॥ न शक्यसे वारयितुं गच्छेदानीं रघूत्तम॥ शीघ्रं च विनिवर्तस्व वर्तस्व च सतां क्रमे॥२॥ यं पालयसि धर्मं त्वं प्रीत्या च नियमेन च॥ स वै राघवशार्दूल धर्मस्त्वामभिरक्षतु॥३॥ येभ्यः प्रणमसे पुत्र देवेष्वायतनेषु च॥ ते च त्वामभिरक्षंतु वने सह महर्षिभिः॥४॥ यानि दत्तानि तेऽस्त्राणि विश्वामित्रेण धीमता॥ तानि त्वामभिरक्षंतु गुणैः समुदितं सदा॥५॥ पितृशुश्रूषया पुत्र मातृशुश्रूषया तथा॥ सत्येन च महाबाहो चिरं जीवाभिरक्षितः॥६॥ समित्कुशपवित्राणि वेद्यश्चायतनानि च॥ स्थंडिलानि च विप्राणां शैला वृक्षाः क्षुपा ह्रदाः॥७॥ पतंगाः पन्नगाः सिंहास्त्वां रक्षंतु नरोत्तम॥ स्वस्ति साध्याश्च विश्वे च मरुतश्च महर्षिभिः॥८॥ स्वस्ति धाता विधाता च स्वस्ति पूषा भगोऽर्यमा॥ लोकपालाश्च ते सर्वे वासवप्रमुखास्तथा॥९॥ ऋतवः षट् च ते सर्वे मासाः संवत्सराः क्षपाः॥ दिनानि च मुहूर्ताश्च स्वस्ति कुर्वंतु ते सदा॥१०॥

णैः सद्गुणैः॥५॥ मातृशुश्रूषयेति· माता त्वत्र कैकेयी॥६॥ समिदादिपदेन तद्धिष्ठातृदेवता उपलक्ष्यंते· क्षुपाः ह्रस्वशाखास्तरवः शिफाः फायुक्तवृक्षाः क्षुपा इत्यन्ये· ह्रदा जलाशयमात्रोपलक्षणं· त्वां रक्षंत्वित्यग्रिमेण संबंधः॥७॥ पतंगाः पक्षिणः· स्वस्ति इत्यस्य कुर्वंत्वित्यग्रिमेण संबंधः॥८॥ धाता विराट्· विधाता सृष्टिविधायकः॥९॥

बाल्यंबलिं॰ होमस्थानाद्बहिर्भूतंलोकपालादिबलिं॰ ॥ स्वस्तिवाच्यंस्वस्तिवाचनमुद्दिश्यमध्वादिभिरुपलक्षि
तान्॰ द्विजान्कृत्वा ॥ ३० ॥ रामस्यवनेस्वस्त्ययस्त्वित्येवंरूपांवनेस्वस्त्ययनक्रियांवाचयामासेत्यन्वयः ॥ ३१

हुतहव्यावशेषेण बाल्यंबलिमकल्पयत् ॥ मध्वुदध्यक्षतघृतैः स्वस्तिवाच्यं द्विजांस्ततः ॥ ३० ॥
वाचयामासरामस्य वनेस्वस्त्ययनक्रियां ॥ ततस्तस्मैद्विजेंद्रायराममातायशस्विनी ॥ ३१ ॥ द
क्षिणांप्रददौकाम्यां राघवंचेदमब्रवीत् ॥ यन्मंगलंसहस्राक्षे सर्वदेवनमस्कृते ॥ ३२ ॥ वृत्रना
शेसमभवत्तत्तेभवतुमंगलं ॥ यन्मंगलंसुपर्णस्य विनताकल्पयत्पुरा ॥ ३३ ॥ अमृतंप्रार्थयानस्य
तत्तेभवतुमंगलं ॥ अमृतोत्पादनेदैत्यान्घ्नतोवज्रधरस्ययत् ॥ ३४ ॥ अदितिर्मंगलंप्रादात्त
त्तेभवतुमंगलं ॥ त्रिविक्रमान्प्रक्रमतोविष्णोरतुलतेजसः ॥ ३५ ॥ यदासीन्मंगलंरामतत्तेभवतु
मंगलं ॥ ऋषयःसागराद्वीपावेदालोकादिशश्चनाः ॥ ३६ ॥ मंगलानिमहाबाहोदिशंतुशुभमंग
लं ॥ इतिपुत्रस्यशेषाश्चकृत्वाशिरसिभामिनी ॥ ३७ ॥

काम्यांइच्छाविषयां ॥ ३२ ॥ वृत्रनाशेतद्रूप
निमित्ते ॥ ३३ ॥ प्रार्थयानस्यआर्षत्वान्मुगभावः अनेनभाविमहद्युद्धंतत्रजयश्चसूचितः ॥ ३४ ॥ विक्र
मःपदविन्यासः ॥ ३५ ॥ ३६ ॥ शुभेमंगलंमंगलानामपिमंगलं॰ इत्यक्तेतिशेषः ॥ पुत्रस्यशिरसिशेषा
अक्षताःशेषाइत्यक्षतनामेतिकतकः ॥ ३७ ॥ ॥ ॥

आगमाः मार्गाः ते झटिति त्वदागमनयोग्याः भवन्त्विति अभिप्रायेणोक्तं मुक्तिः ॥२१॥ सर्वसंपत्तयः वनवासोपे
क्षिताः फलम् लादिरूपाः संत्विति शेषः ॥ पार्थिवेभ्यः पृथिवीभवसत्वेभ्यः ॥२२॥ देवेभ्यः ये च ते परिपंथिन

मा च त्वां हिंसिषुः पुत्र मया संपूजितास्त्विह ॥ आगमास्ते शिवाः संतु सिध्यंतु च पराक्रमाः ॥२१॥
सर्वसंपत्तयो राम स्वस्तिमान् गच्छ पुत्रक ॥ स्वस्ति तेऽस्त्वांतरिक्षेभ्यः पार्थिवेभ्यः पुनः पुनः ॥२२॥
सर्वेभ्यश्चैव देवेभ्यो ये च ते परिपंथिनः ॥ शुक्रः सोमश्च सूर्यश्च धनदोऽथ यमस्तथा ॥२३॥ पां
तु त्वामर्चिता राम दंडकारण्यवासिनं ॥ अग्निर्वायुस्तथा धूमो मंत्राश्चर्षिमुखच्युताः ॥२४॥ उप
स्पर्शनकाले तु पांतु त्वां रघुनंदन ॥ सर्वलोकप्रभुर्ब्रह्मा भूतकर्ता तथर्षयः ॥२५॥ ये च शेषाः सु
रास्ते तु रक्षंतु वनवासिनं ॥ इति माल्यैः सुरगणान् गंधैश्चापि यशस्विनी ॥२६॥ स्तुतिभिश्चानु
रूपाभिरानर्चायतलोचना ॥ ज्वलनं समुपादाय ब्राह्मणेन महात्मना ॥२७॥ हावयामास वि
धिना राममंगलकारणात् ॥ घृतं श्वेतानि माल्यानि समिधश्चैव सर्षपान् ॥२८॥ उपसंपाद
यामास कौसल्या परमांगना ॥ उपाध्यायः स विधिना हुत्वा शांतिमनामयं ॥२९॥

स्तेभ्यश्च स्वस्त्यस्तु

इति योजना ॥२३॥ ऋषिमुखाच्युता निर्गतास्त्वया गृहीताश्चेति शेषः ॥२४॥ भूतकर्ता ब्रह्मा जगत्कारणं च
र्षयः ॥२५॥२६॥२७॥२८॥ उपसंपादयामास होमायेति शेषः ॥ अनामयमारोग्यमुद्दिश्येति शेषः ॥२९॥

मात्राप्रदक्षिणीकरणं रक्षार्थं ॥४४॥ निपीड्यनमस्कृत्य॰ तया श्रिया मातृकृतमंगलजशोभया ॥४५॥ इति श्रीरामाभिरामे श्रीरामीयरामायणतिलके अयोध्याकांडे पंचविंशतिः सर्गः ॥२५॥ धर्मिष्ठे अतिशयेन धर्मवति ॥१॥ अाममंथद्गोभयति स्म तत्र हेतुर्गुणवत्ता ॥२॥ तत्सर्वं वनगमनवृत्तांतं तस्याश्चतस्यास्तत्त्वं दितदेव॰ यौवराज्या

अतीव चाश्रुप्रतिपूर्णलोचना समाप्य च स्वस्त्ययनं यथाविधि ॥ प्रदक्षिणां चापि चकार राघवं पुनः पुनश्चापि निरीक्ष्य सस्वजे ॥४४॥ तया हि देव्या च कृतप्रदक्षिणो निपीड्य मातुश्चरणौ पुनः पुनः ॥ जगाम सीतानिलयं महायशाः स राघवः प्रज्वलितस्तया श्रिया ॥४५॥ इत्यार्षे श्रीरामा॰ अयो॰ पंचविंशः सर्गः ॥२५॥ अभिवाद्य तु कौसल्यां रामः संप्रस्थितो वनं कृतस्वस्त्ययनो मात्रा धर्मिष्ठे वर्त्मनि स्थितः ॥१॥ विराजयन्राजसुतो राजमार्गं नरैर्वृतं ॥ हृदयान्याममंथेव जनस्य गुणवत्तया ॥२॥ वैदेही चापि तत्सर्वं न शुश्राव तपस्विनी ॥ तदेव हृदि तस्याश्च यौवराज्याभिषेचनं ॥३॥ देवकार्यं स्वयं सा कृत्वा कृतज्ञा हृष्टचेतना ॥ अभिज्ञा राजधर्माणां राजपुत्री प्रतीक्षती ॥४॥ प्रविवेशाथ रामस्तु स्ववेश्म सुविभूषितं ॥ प्रहृष्टजनसंपूर्णं ह्रिया किंचिदवाङ्मुखः ॥५॥

भिषेचनं स्थितमभूदिति शेषः ॥३॥ देवकार्यं देवपूजां॰ देवकार्यकरणे हेतुः कृतज्ञत्वं राजधर्माभिज्ञत्वं च॰ देवैरेवं राज्यप्रदानेनोपकृतत्वेन कृतज्ञतया तत्पूजा ॥४॥ ह्रिया सीतायै कथमिदमन्याय्यं मातापितृकृतं कथयामीति लज्जयाऽवाङ्मुख इव ॥५॥

आगमाः मार्गाः ते झटिति त्वदागमनयोग्या भवंत्विति अभिप्रायेणेयमुक्तिः ॥२१॥ सर्वसंपतयः वनवासापेक्षिताः फलमूलादिरूपाः संत्विति शेषः ॥ पार्थिवेभ्यः पृथ्वीभवसत्वेभ्यः ॥२२॥ देवेभ्यः ये च ते परिपंथिन

मा च त्वां हिंसिषुः पुत्र मया संपूजितास्त्विह ॥ आगमास्ते शिवाः संतु सिध्यंतु च पराक्रमाः ॥२१॥
सर्वसंपत्तयो राम स्वस्तिमान् गच्छ पुत्रक ॥ स्वस्ति तेऽस्त्वांतरिक्षेभ्यः पार्थिवेभ्यः पुनः पुनः ॥२२॥
सर्वेभ्यश्चैव देवेभ्यो ये च ते परिपंथिनः ॥ शुक्रः सोमश्च सूर्यश्च धनदोऽथ यमस्तथा ॥२३॥ पां
तु त्वामर्चिता राम दंडकारण्यवासिनं ॥ अग्निर्वायुस्तथा धूमो मंत्राश्चर्षिमुखच्युताः ॥२४॥ उप
स्पर्शनकाले तु पांतु त्वां रघुनंदन ॥ सर्वलोकप्रभुर्ब्रह्मा भूतकर्ता तथर्षयः ॥२५॥ ये च शेषाः सु
रास्ते तु रक्षंतु वनवासिनं ॥ इति माल्यैः सुरगणान् गंधैश्चापि यशस्विनी ॥२६॥ स्तुतिभिश्चानु
रूपाभिरानर्चायतलोचना ॥ ज्वलनं समुपादाय ब्राह्मणेन महात्मना ॥२७॥ हावयामास वि
धिना राममंगलकारणात् ॥ घृतं श्वेतानि माल्यानि समिधः श्वेतसर्षपान् ॥२८॥ उपसंपाद
यामास कौसल्या परमांगना ॥ उपाध्यायः स विधिना हुत्वा शांतिमनामयं ॥२९॥

स्तेभ्यश्च स्वस्त्यस्त

इति योजना ॥२३॥ ऋषिमुखाच्युता निर्गतास्त्वया गृहीताश्चेति शेषः ॥२४॥ भूतकर्ता ब्रह्मा जगत्कारणं ब्र
ह्मेत्यर्थः ॥२५॥२६॥२७॥२८॥ उपसंपादयामास होमायेति शेषः ॥ अनामयमारोग्यमुद्दिश्येति शेषः ॥२९॥

मात्राप्रदक्षिणाकरणेस्तार्थी ॥४४॥ निपीड्यनमस्कृत्य॰ तया श्रियामातृकृतमंगलजशोभया ॥४५॥ इतिश्रीरामाभिरामेश्रीरामीयरामायणतिलके अयोध्याकांडे पंचविंशतिः सर्गः ॥२५॥ धर्मिष्ठेअतिशयेनधर्मवति ॥१॥ आमंथक्षोभयतिस्मतत्रहेतुर्गुणावत्ता ॥२॥ तत्सर्वं वनगमनवृत्तांतं ।तस्याअतस्यास्तत्वदितदेव॰ यौवराज्य

अतीवचाश्रुप्रतिपूर्णलोचनासमाप्यचस्वस्त्ययनंयथाविधि ॥प्रदक्षिणंचापिचकारराघवं पुनः पुनश्चापि निरीक्ष्यसस्वजे ॥४४॥ तयाहि देव्याचकृतप्रदक्षिणो निपीड्यमातुश्चरणौ पुनः पुनः ॥ जगामसीतानिलयंमहायशाःसराघवःप्रज्वलितस्तयाश्रिया ॥४५॥ इत्यार्षे श्रीरामा॰ अयो॰ पंचविंशः सर्गः ॥२५॥ अभिवाद्यतुकौसल्यां रामःसंप्रस्थितोवनं । कृतस्वस्त्ययनोमात्राधर्मिष्ठेवर्त्मनिस्थितः ॥१॥ विराजयन्राजसुतोराजमार्गंनरैर्वृतं । हृदयान्याममंथेवजनस्यगुणवत्तया ॥२॥ वैदेहीचापितत्सर्वंनशुश्रावतपस्विनी ॥ तदेवहृदितस्याश्चयौवराज्याभिषेचनं ॥३॥ देवकार्यंस्मसाकृत्वाकृतज्ञाहृष्टचेतना ॥अभिज्ञाराजधर्माणांराजपुत्रीप्रतीक्षती ॥४॥ प्रविवेशाथरामस्तुस्ववेश्मसुविभूषितं ।प्रहृष्टजनसंपूर्णंह्रियाकिंचिदवाङ्मुखः ॥५॥

भिषेचनंस्थितमभूदितिशेषः ॥३॥ देवकार्यंदेवपूजां॰ देवकार्यकरणेहेतुःकृतज्ञत्वंराजधर्माभिज्ञत्वंच॰ ।दैवैरेवंराज्यप्रदानेनोपकृतत्वेनकृतज्ञतयातत्पूजा ॥४॥ ह्रियासीतायैकथमिदमन्याय्यंमातापितृकृतंकथयामीतिलज्जयाऽवाङ्मुखइव ॥५॥

समालंभोविलेपनं सिद्धार्थौ दृष्टवीर्यौ विशल्यकरणीमित्यन्वर्थनामिकां ॥ ओषधिं गुलुकीकृत्य शुभां रक्षांच कारयत् रक्षाहेतुत्वेन हस्तेबबंधेत्यर्थः ॥ ३८ ॥ तां मंत्रैरतिशयितां कर्तुं जजाप मंत्रानितिशेषः ॥ वा चापि मंत्रानितिशेषः जपोत्तरं स्पष्टमपि मंत्रानुच्चारयामासेत्यर्थः एतच्च तन्मंत्रार्थानुसंधानेन रामस्य तत्प्रसादार्थं

गंधैश्चापि समालभ्य रामस्यायतलोचना ॥ ओषधिं च सुसिद्धार्थां विशल्यकरणीं शुभां ॥ ३८ ॥ चकार रक्षां कौसल्या मंत्रैरभिजजाप च ॥ उवाच अपि प्रहृष्टेव सा दुःखवशवर्तिनी ॥ ३९ ॥ वाङ्मात्रेण न भावेन वाचा संसज्जमानया ॥ आनम्य मूर्ध्नि चाघ्राय परिष्वज्य यशस्विनी ॥ ४० ॥ अवदत्पुत्र सिद्धार्थो गच्छ राम यथासुखं ॥ अरोगं सर्वसिद्धार्थमयोध्यां पुनरागतं ॥ ४१ ॥ पश्यामि त्वां सुखं वत्स संधितं राजवर्त्मसु ॥ मंगलैरूपसंपन्नो वनवासादिहागतः ॥ वध्वाश्च मम नित्यं त्वं कामान्संवर्धयाहि भो ॥ ४२ ॥ मयार्चिता देवगणाः शिवादयो महर्षयो भूतगणाः सुरोरगाः ॥ अभिप्रयातस्य वनं चिराय ते हितानि कांक्षंतु दिशश्च राघव ॥ ४३ ॥

प्रहृष्टेवेति हर्षापारमार्थ्यद्योतीइवशब्दः ॥ ३९ ॥ तमेवाह वाङ्मात्रेणेति संसज्जमानया आंतरखेदगद्गदया आनम्य तिउच्चत्वात् तस्य ॥ ४० ॥ यद्वा वाल्मीकेरपि वर्णनीयमपीभावात् उवाचेत्यत्रोक्तावपि पुनरवददिति उक्तिर्न दोषाय ॥ ४१ ॥ संधितं राजवर्त्मसु प्राप्तराज्यमिति यावत् ॥ ४२ ॥ मंगलैः राजोचितवस्त्राभरणैः वध्वाः सीतायाः संवर्धसंवर्धयया हि भो गच्छ भो भो इति निपात आमंत्रणे ॥ ४३ ॥

व्यजनाभ्यां बालव्यजनाभ्यां शतपत्रं पद्मं तत्समेक्षणां ॥११॥१२॥ क्षौद्रं च दधि च तीर्थोदकमिश्रितमिति शेषः मूर्द्धा
भिषिक्तस्य शिरः स्नातस्य ॥१३॥ श्रेणीमुख्याः परिषन्मुख्याः सर्वेऽत्र तत्कुतः इति शेषः ॥१४॥ पुष्परथः लीलागम
नप्रयोजनो रथो न तु युद्धार्ह इत्यर्थः ॥ नागः अग्रयो निर्जिगमिषो राज्ञोऽग्रे भवति तस्मिन्सत्यामिच्छायामारोह

व्यजनाभ्यां च मुख्याभ्यां शतपत्रनिभेक्षणां ॥ चंद्रहंसप्रकाशाभ्यां वीज्यते न तवाननं ॥११॥ वाग्मिनो बं
दिनश्चापि प्रहृष्टास्त्वां नरर्षभ ॥ स्तुवंतो नाद्य दृश्यंते मंगलैः सूतमागधैः ॥१२॥ न ते क्षौद्रं च दधि च
ब्राह्मणा वेदपारगाः ॥ मूर्ध्नि मूर्धाभिषिक्तस्य ददतिस्म विधानतः ॥१३॥ न त्वां प्रकृतयः सर्वाः श्रेणीमु
ख्याश्च भूषिताः ॥ अनुव्रजितुमिच्छंति पौरजानपदास्तथा ॥१४॥ चतुर्भिर्वेगसंपन्नैः हयैः कां
चनभूषणैः ॥ मुख्यः पुष्परथो युक्तः किं न गच्छति तेऽग्रतः ॥१५॥ न हस्ती चाग्रतः श्रीमान्सर्वल
क्षणपूजितः ॥ प्रयाणे लक्ष्यते वीर कृष्णमेघगिरिप्रभः ॥१६॥ न च कांचनचित्रं ते पश्यामि प्रि
यदर्शन ॥ भद्रासनं पुरस्कृत्य यांतं वीरः पुरःसरं ॥१७॥ अभिषेको यथा सज्जः किमिदानीमि
दं तव ॥ अपूर्वो मुखवर्णश्च न प्रहर्षश्च लक्ष्यते ॥१८॥

ते नो चेदग्रतो गच्छति ॥१५॥ हस्ती कृष्णमे
घप्रभो गिरिप्रभश्च ॥१६॥ भद्रासनं पुरस्कृत्य पूजायुक्तं यथा भवति तथा गृहीत्वा यांतं ते पुरःसरं अग्र
गं सेवकं न पश्यामि ॥१७॥ यदाभिषेकः सज्जः इदानीं तस्मिन्नेतस्मिन्वर्तमानकाले त्वं किं राजचिन्हाभा
वः मुखवर्णश्चापूर्वः कदाप्यननुभूतः हर्षकाले हर्षाभावश्चेति इदं किमित्यर्थः ॥१८॥

वेपमाना· भर्तुर्विगतहर्षत्वावाङ्मुखत्वादिदर्शना त्कंपमाना॥६॥ सोढुं मशक्यं कर्तुंशोकं अन्येषांप्राकृतानांशोकजनकं
वस्तुशोकरूपकार्याजनकं कर्तुंनशशाक· ततस्तदनंतरंसशोकस्तच्छोकजनकवस्तु विवृतनतांप्रकटकार्य
त्वंगतः यद्वासरामोविवृत्ताभिप्रायतांगतः शुद्धमुक्तस्वभावोपिमायाख्यप्रकृत्यवतारसीतासान्निध्यादुद्बुद्ध
विक्षेपशक्तिरिवजानद्दृत्यर्थः अनेनहिनाथेनप्रियायाअग्रेनकिंचित्सुसोगोप्यमिति· लोकव्यवहारोदर्शितः॥७॥

अथसीतासमुत्पवेपमानाचतंपतिं॥ अपश्यच्छोकसंतप्तंचिंताव्याकुलितेंद्रियं॥६॥ तांदृष्ट्वासहि
धर्मात्मानशशाकमनोगतं॥ तंशोकंराघवःसोढुंततोविवृततांगतः॥७॥ विवर्णवदनंदृष्ट्वातंप्र
स्विन्नममर्षणं॥ आहदुःखाभिसंतप्ताकिमिदानीमिदंप्रभो॥८॥ अद्यबार्हस्पतःश्रीमान्युक्तःपुष्ये
णराघव॥ प्रोच्यतेब्राह्मणैःप्राज्ञैःकेनत्वमसिदुर्मनाः॥९॥ नतेशतशलाकेनजलफेननिभेनच
आवृत्तंवदनंवल्गुछत्रेणाभिविराजते॥१०॥

प्रस्विन्नंप्राप्तदुःखजस्वेदं अमर्षणंशोकधारणाक्षममित्व
यत्तुसीतायाःदुःखेनकथमेषाकालंनयिष्यतीतिधियादुःखितइतिविवर्णवदनत्वादिकमिति· तदनु
चितंभगवतिकथमपिदुःखासंबंधात्· तादृशधियोप्यभावाच्च· व्यसनेषुमनुष्याणांभृशंभवतिदुःखित
इत्यादावपिदुःखितइवेत्येवार्थइतिममभाति॥८॥ बार्हस्पतोबृहस्पतिदेवताकःयुक्तःचंद्रेणेतिशेषः यु
क्तस्तेनपुष्येणाभिषेकइतिब्राह्मणैःप्रोच्यतेइत्यन्वयः तज्जन्यसंतोषंविहायदुर्मनाःकेनासि॥९॥ शतश
लाकायस्मिन्छत्रेनेनछत्रेणावृत्तंसन्नविराजतइतियोजना· वल्गुसुंदरं॥१०॥ ॥

रामा॰ ग्री॰
९५

तिप्रसिद्धाःममगुणाः॥२५॥अहंतेनानुवक्तव्योविशेषेणकदाचनेतिप्राचीनःपाठःकतकेनदर्शितःअहमस्मत्स्वरूपंतेत्वयाविशेषेणविशिष्यकदाचनकदापिनानुवक्तव्योःसखीभिर्वार्ताप्रसंगेऽतिशेषःभरतस्याग्रतइत्यनुकर्षःतत्रहेतुरनुकूलतयेति·मत्स्वरूपवर्णनंचतस्यप्रतिकूलमितिभावः॥नापित्वंतेनभर्तव्याऋद्धियुक्ताहिपुरुषानसहंतेपरस्तवं॥तस्मान्नतेगुणाःकथ्याभरतस्याग्रतोमम॥२५॥अहंतेनानुवक्तव्योविशेषेणकदाचन॥अनुकूलतयाशक्यंसमीपेतस्यवर्तितुं॥२६॥तस्मैदत्तंनृपतिनायौवराज्यंसनातनं॥सप्रसाद्यस्त्वयासीतेनृपतिश्चविशेषतः॥२७॥अहंचापिप्रतिज्ञांतांगुरोःसमनुपालयन्॥वनमद्यैवयास्यामिस्थिरीभवमनस्विनि॥२८॥यातेचमयिकल्याणिवनंमुनिनिषेवितं॥व्रतोपवासपरयाभवितव्यंत्वयानघे॥२९॥कल्यमुत्थायदेवानांकृत्वापूजांयथाविधि॥वंदितव्योदशरथःपितामममजनेश्वरः॥३०॥

विशेषेणकदाचनेनिश्चाधुनिकपाठस्तु·नतथाचमत्कारी·विशेषेणनभर्तव्याकिंतुबंधुसाधारणेनेत्यर्थः॥नुकूलतयेत्युत्तरार्धस्यतथोपयोगाभावात्॥२६॥तदनुकूलाचरणंकिमर्थमतआहतस्मादिति·नृपतिनादशरथेनसत्वयाविशेषतःप्रसाद्यः·चोहेतौमतोनृपतिः॥२७॥२८॥यातेगते॥२९॥कल्यंउषसि॥३०॥

राम
॥९५॥

विलपंतीदुःखेन भाषमाणा॰ तत्र भवान् पूज्यस्तातो दशरथः अत्रभवतत्रभवच्छब्दौ पूजार्थौ ॥१९॥ उत्कटा प्रियस्य व्रणो न सीताया अत्यंतमोहो माभूदिति विविधगुणां कीर्त्तनेन संबोधयति॰ कुलेत्यादि॰ येनं क्रमेण हेतुना इदं प्रव्राजनमागतं तत्कथ्यं ॥२०॥२१॥ नृपोणोच्यते॰ प्रस्ताविते ममाभिषेके सज्जे सति नियाद्य सस समयः प्राचीनो व

इतीवविलपंतीं तां प्रोवाच रघुनंदनः॥ सीते तत्रभवांस्तातः प्रव्राजयति मां वनं॥१९॥ कुले महति संभूते धर्मज्ञे धर्मचारिणि॥ शृणु जानकि येनेदं क्रमेणाद्यागतं मम॥२०॥ राज्ञा सत्यप्रतिज्ञेन पित्रा दशरथेन वै॥ कैकेय्यै मम मात्रे तु पुरा दत्तौ महावरौ॥२१॥ तयाद्य मम सज्जेऽस्मिन्नभिषेके नृपोद्यते॥ प्रचोदितः स समयो धर्मेण प्रतिनिर्जितः॥२२॥ चतुर्दश हि वर्षाणि वस्तव्यं दंडके मया॥ पित्रा मे भरतश्चापि यौवराज्ये नियोजितः॥२३॥ सोऽहं त्वामागतो द्रष्टुं प्रस्थितो विजनं वनं॥ भरतस्य समीपे ते नाहं कथ्यः कदाचन॥२४॥

रसंकेतः प्रचोदितः प्रवर्त्तितः तेन प्रवर्त्तनेन राजा धर्मेण धर्ममार्गेण प्रतिनिर्जितः स्ववशः कृतः॥२२॥ अस्तु॰ प्रकृते किं तत्राह॰॥ चतुर्दशेत्यादि॰ पित्रा वरनिर्जितपितृनियोगेन आद्यवरपालनरूपेण॰॥ भरतश्च द्वितीयवरपालनरूपपितृनियोगेन यौवराज्ये नियोजितः मयेति शेषः ज्येष्ठाज्ञां विना तस्य तत्त्वाभासंभवात्॥२३॥ अथ सीताया गृहेऽवस्थितौ सुखजनकबुद्धिरूपदिशपते॰॥ भरतस्येत्यादिना॰॥ न कथ्यो न श्लाघनीयः॥२४॥ ॥

रामा·अ·
२६

यथाकस्यचिन्महद्वचसोव्यलीकंव्यलीकत्वंअनतत्वंनकुरुषेतथेदमपिमेवचः कार्यं·अनुष्ठेयमित्यर्थः वचसो
नतत्वकरणंचाननुष्ठानेभवति॥३५॥इतिश्रीरामाभिरामेश्रीरा॰रा॰ति॰अयो॰षड्विंशः सर्गः॥२६॥एवंरा
मेणगृहवासेनियुक्ता॥ममापिवनवासएवधर्मोनान्यायप्राप्तइतिसीताआह·एवमित्यादि·प्रणयात्
स्नेहादेवसंक्रुद्धा·कथंममपथ्यकुस्थितिमादिशतीत्यमर्षवती॥१॥सएवामर्षोदर्शपिते·किमिति·॥

अहंगमिष्यामिमहावनंप्रियेत्वयाहिवस्तव्यमिहैवभामिनि॥यथाव्यलीकंकुरुषेनकस्य
चित्तथात्वयाकार्यमिदंवचोमम॥३५॥इत्यार्षेश्रीरा॰अयो॰षड्विंशः सर्गः॥२६॥एवमु
क्तातुवैदेहीप्रियार्हाप्रियवादिनी॥प्रणयादेवसंक्रुद्धाभर्तारमिदमब्रवीत्॥१॥किमि
दंभाषसेरामवाक्यंलघुतयाध्रुवं॥त्वयायदपहास्यंमेश्रुत्वानरवरोत्तम॥२॥वीराणांरा
जपुत्राणांशस्त्रास्त्रविदुषांनृप॥अनर्हमयशस्यंचनश्रोतव्यंत्वयेरितं॥३॥आर्यपुत्रपिता
माताभ्रातापुत्रस्तथास्नुषा॥स्वानिपुण्यानिभुंजानाःस्वंस्वंभाग्यमुपासते॥४॥ ॥

९८

लघुतयामयिस्त्वाद्वावलंबनेनइदंकिंभाषसेकिंचहेनरवरोत्तमत्वयायदुक्तंतच्छ्रुत्वामेममअपहा
स्यंअतिशयितोहासोजायते॥२॥यत्त्वयेरितंतद्वीराणांअनर्हमयशस्यंचातोनश्रोतव्यंश्रोतुमयो
ग्यं॥३॥कुतएवंतत्राह·आर्यपुत्रेत्यादि·पित्रादयःस्वानिपुण्यानिस्वस्वकर्मफलानिभुंजानाःस्वं
स्वंभाग्यंस्वानुष्ठितंकर्मैवोपासतेउपजीवंतिनपुत्राद्यनुष्ठितंतत्रतेषांसहाधिकाराभावात्॥४॥

राम
२६

त्वयि गते त्वन्मातुर्नमस्कारेण किं फलं सति तु त्वत्प्रातिकूल्याकरणं तत्फलमिति चेत्तत्राह। धर्ममेवाग्रतः कृत्वा धर्म एव तत्फलं सुखं बुद्धौ कृत्वा तत्संमानः कार्य इति भावः॥३१॥ स्नेहेन मातृत्वप्रयुक्तेन प्रणायेन कृ

माता च मम कौसल्या वृद्धा संतापकर्षिता॥ धर्ममेवाग्रतः कृत्वा त्वत्तः सन्मानमर्हति॥३१॥ वंदितव्याश्च ते नित्यं याः शेषा मम मातरः। स्नेह प्रणय संभोगैः समा हि मम मातरः॥३२॥ भ्रातृ पुत्र समो चापि द्रष्टव्यौ च विशेषतः॥ त्वया भरत शत्रुघ्नौ प्राणैः प्रियतरौ मम॥३३॥ विप्रियं च न कर्तव्यं भरतस्य कदाचन॥ स हि राजा च वैदेहि देशस्य च कुलस्य च॥३४॥ आराधिता हि शीलेन प्रयत्नैश्चोपसेविताः॥ राजानः संप्रसीदंति प्रकुप्यंति विपर्यये॥३५॥ औरस्यानपि पुत्रान्हित्यजंत्यहितकारिणः॥ समर्थान्संप्रतिगृह्णंति जनानपि नराधिपाः॥३६॥ सा त्वं वसेह कल्याणि राज्ञः समनुवर्तिनी॥ भरतस्य रता धर्मे सत्यव्रतपरायणा॥३७॥

घ्रः स्नेहः प्रणयः संभोगसेवा अन्नपानादिविशेषप्रदानं॥३२॥ भ्रात्रा पुत्रेण च समो प्राणैः प्राणेभ्यः प्रियतरो॥३३॥३४॥ विपर्यये शीलादिविपर्यये॥३५॥ जनान्प्राकृतान् संबंधलेशहीनानिति यावत्॥३६॥३७

रामा॰ अ॰
६७

अतोपिमेवनगमनमेवोचितमित्याह॥ प्रासादाग्रेस्थितापेक्षयेतिशेषः विमानैर्वा वैहायसगतेनवा॰ आकाशगमनेन उपलक्षिताऽणिमाद्यष्टसिध्यपेक्षये तिशेषः सर्वावस्थागताभर्तुः अपीतिशेषः विस्मोरभक्तिकावस्थासर्वावस्थेतिगीयत इत्यभिधानात्॰ तांगतस्याऽतएव॰ आई॰ षङ्कर्तुः भर्तुरित्यंतमेकंपदं॥ अथवापथक्रूपदेशकृत्यक्त धर्मानुष्ठानरूपांतां गतापीतियोजना सकलभर्तधर्मरहितस्यापिपत्युः पादछायापादसेवनमेवेतरधर्मापेक्षयास्त्रियाविशिष्यते अधिकंभवति॥ श्रुतिस्मृत्योः सर्वधर्मपरित्यागेनभर्तसे

प्रासादाग्रेविमानैर्वावैहायसगतेनवा॥ सर्वावस्थागताभर्तुः पादछायाविशिष्यते ९॥
अनुशिष्टास्मिमात्राचपित्राचविविधाश्रयं॥ नास्मिसंप्रतिवक्तव्यावर्तितव्यंयथामया १०॥
अहंदुर्गंगमिष्यामिवनंपुरुषवर्जितं॥ नानामृगगणाकीर्णंशार्दूलगणसेवितं ११॥
सुखंवनेनिवत्स्यामियथैवभवनेपितुः॥ अचिंतयंतीत्रीन्लोकान्चिंतयंतीपतिव्रतं १२

वायाएवस्त्रीणांनित्यत्वबोधनादितिभावः॥ ९॥ मद्गुरुपदेशोप्येवमेवेत्याह॰ अनुशिष्टेत्यादिः विविधाश्रयंनानाविधावस्थभर्तनित्याश्रयमनुशिष्टास्मि॰ अतोभर्तरिमयायथोपदिष्टंवर्तितव्यं॰ तथातद्विरुद्धंसंप्रतिनोवक्तव्यास्मिनोपदेष्टव्यास्मि॥ १०॥ यदेवमतोहमिति॰ गमिष्यामित्वद्गमनमन्वितिशेषः॥ ११॥ त्रीन्लोकान्चिंतयंती॰ त्रैलोक्यैश्वर्यमप्यगणयंती॰ पतिव्रतं॰ पत्यासहवासरूपंव्रतंचिंतयंती अपेक्षमाणा॥ १२॥

एका नारी तु भर्त्रा सहाधिकारात् भर्तुर्भाग्यं भर्त्रनुष्ठितं कर्मफलं प्राप्नोति। अतस्तव वनवासादेशेनैव त्वयित
ष्यपां सर्वकर्मणि सहाधिकारादहमपि वने वस्तव्य मित्यादिष्टैव तथैव ममापि गुरुत्वात्स आदेशोनुद्देश
घ्य एवेतिभावः॥ ५॥ यदेवमतो न पित्रादिरिह लोके प्रेत्य परलोके च नारीणां गतिः किंतु एकः पतिरेव सदा
गतिः॥ ६॥ अतो यदि त्वमिति। म६ इति कुशेत्यनेन पद्भ्यामेव गमिष्यामीति। न च ते दुःखदास्यामीति

भर्तुर्भाग्यं तु नारी वै प्राप्नोति पुरुषर्षभ॥ अतश्चैवाहमादिष्टा वने वस्तव्यमित्यपि॥ ५॥ न पि
ता नात्मजो वात्मा न माता न सखीजनः॥ इह प्रेत्य च नारीणां पतिरेको गतिः सदा॥ ६॥ यदि
त्वं प्रस्थितो दुर्गं वनमद्यैव राघव॥ अग्रतस्ते गमिष्यामि मृद्नती कुशकंटकान्॥ ७॥ ईर्षा
रोषं बहिष्कृत्य भुक्तशेषमिवोदकं॥ नय मां वीर विस्रब्धः पापं मयि न विद्यते॥ ८॥

चक्षनितं॥ ७॥ स्त्रिया वनगमनसाहसं कथमित्यत्राह तिरीर्ष्येति नास्य वाक्यो त्वं घनेन रोषं च बहिष्कृत्य त्य
क्त्वा विस्रब्धो निःशंको मां नय तत्र हेतुगर्भविशेषणं वीरेति। स्ववीरत्वस्य लोके ख्यापनाय अन्यथा कु
तस्तत्ख्यातिरिति ध्वनिरत्र॥ त्यागप्रयोजकं पापं च मयि न विद्यते॥ ननु भुक्तभोगाया त्वया वने किं प्रयो
जनमत आह। भुक्तशेषमुदकमिव। यथा दुष्प्रापपानीयकांतारयापिना। पीतशेषं। कमंडलुनि स्थमुद
कमवश्यं नेयमेव तथाहमपि त्वया नेयैव न रुणत्वादिति हासोक्तिः। गूढः॥ ८॥ ॥

वर्षसहस्राणिशतंवात्वयासहवसंतीतेषांव्यतिक्रमंवनवासदुःखंनवेत्स्यामि॰किंतुदारुणमिवतावंतंकालंने
ष्यामीतिभावः स्वर्गोपिनमेमतःत्वयाविनेतिशेषः॥ तदेवविवृणोति॰स्वर्गेपिचेति॥२०॥२१॥मृगैरा
युतंमृगैरासमंतायुतंयुक्तं॥ वानरवारणैश्चयुक्तमितिमितिशेषः॥समंतात्तवेतिशेषः॥त्वदाज्ञा

सहत्वयाविशालाक्षरंस्येपरमनंदिनी॥ एवंवर्षसहस्राणिशतंवापित्वयासह॥ २०॥व
तिक्रमंनवेत्स्यामिस्वर्गोपिहिनमेमतः॥ स्वर्गेपिचविनावासोभविताययदिराघव॥२१॥ त्वया
विनानरव्याघ्रनाहंतदपिरोचये॥२१॥ अहंगमिष्यामिवनंसुदुर्गमंमृगायुतंवानरवार
णैश्च॥ वनेनिवत्स्यामिनथापितुर्गृहे तथैवपादावुपगत्यसंमता॥२२॥ अनन्यभावाम
नुरक्तचेतसंत्वयावियुक्तांमरणायनिश्चितां॥ नयस्वमांसाधुकुरुष्वयाचनांनातोमयाते
गुरुताभविष्यति॥२३॥

वुवर्त्तिनीतियावत॰॥२२॥त्वयावियुक्तामित्यादि॰त्वद्वियोगेमरणविषयनिश्चितमतिं याचनां॥मामि
कांवनानुगमनयाचनां॥साधुकुरुष्वः चरितार्थीसंपादयमयाक्रियमाणादतोनुगमनात्तेगुरुताभारो
नभविष्यति॥२३॥

ब्रह्मचारिणी तपश्चरणशीला नियता त्वदुपदिष्टनियमयुक्ता मधुगंधिषु मकरंदसुरभिषु ॥१३॥ अन्यस्यापि जनस्य जीवसमूहस्य ॥१४॥ निवर्तयितुं शक्या आम्नायप्राप्तानुगमनत्वात् त्वच्छक्तिरूपत्वादिति गूढो-
ऽभिप्रायः उद्यता वनं गंतुमिति शेषः ॥१५॥ दुःखं न करिष्यामि विशिष्टान्नपानादीच्छयेति शेषः त्वया स-

शुश्रूषमाणा नेनित्यं नियता ब्रह्मचारिणी ॥ सह रंस्ये त्वया वीर वनेषु मधुगंधिषु ॥१३॥ त्वं हि क-
र्तुं वने शक्तो राम संपरिपालनं ॥ अन्यस्यापि जनस्येह किं पुनर्मम मानद ॥१४॥ सांहं त्वया गमि-
ष्यामि वनमद्य न संशयः ॥ नाहं शक्या महाभाग निवर्तयितुमुद्यता ॥१५॥ फलमूलाशना नित्यं
भविष्यामि न संशयः ॥ न ते दुःखं करिष्यामि निवसंती त्वया सदा ॥१६॥ अग्रतस्ते गमिष्यामि
भोक्ष्ये भुक्तवति त्वयि ॥ इच्छामि परितः शैलान् पल्वलानि सरांसि च ॥१७॥ द्रष्टुं सर्वत्र निर्भीता त्व-
या नाथेन धीमता ॥ हंसकारंडवाकीर्णाः पद्मिनीः साधुपुष्पिताः ॥१८॥ इच्छेयं सुखिनी द्रष्टुं त्वया
वीरेण संगता ॥ अभिषेकं करिष्यामि त्वाहं नित्यमनुव्रता ॥१९॥

द्रशक्तिरूपत्वात्सदा वसंती दुः-
खमपकार्यापि यथापूर्वं न कदापि दुःखं कृतवती एवमग्रेपि न करिष्यामीति भावः ॥१६॥ सरां-
सि चित्यस्य द्रष्टुमित्यनेनान्वयः ॥१७॥ कारंडवाः जलकुक्कुटाः ॥१८॥ अभिषेकं करिष्यामि तासु
पद्मिनीषु इति शेषः ॥१९॥

इतिबुध्वाएतदभिधीयतेनतुत्वद्गराणादिप्रयासोपाधिनेत्यर्थः॥सदासर्वकालेसुखंवनेनास्तिसुखं
सुखदंनभवतिकिंतुदुःखंदुःखदमेवेत्येवजानामिनिश्चिनोमि॥६॥गिरिनिर्झरगिरिनद्यस्तनि
नदैःसंभूताःगिरिनिर्दरिवासिनांसिंहानांनिनदाः॥श्रोतुंदुःखायातोवनंदुःखंदुःखजनकं॥७॥
विस्रब्धाःनिःशंकाःदृष्ट्वामनुष्यंदृष्ट्वासमभिवर्त्ततेहंतुंसंमुखमायांति॥८॥सग्राहत्वंपंकवत्वं

इतिबुध्वाखलुवचोमयैतदभिधीयते॥सदासुखंनजानामिदुःखमेवसदावनं॥६॥
गिरिनिर्झरसंभूतागिरिनिर्दरिवासिनां॥सिंहानांनिनदादुःखाःश्रोतुंदुःखमतोवनं॥७॥
क्रीडमानाश्चविस्रब्धामत्ताःश्रून्येतथामृगाः॥दृष्ट्वासमभिवर्त्ततेसीतेदुःखमतोवनं॥८॥
सग्राहाःसरितश्चैवपंकवत्यस्तुदुस्तराः॥मत्तैरपिगजैर्नित्यमतोदुःखतरंवनं॥९॥लता
कंटकसंकीर्णाःकृकवाकूपनादिताः॥निरपाश्चसुदुःखाश्चमार्गादुःखमतोवनं॥१०॥
सुप्यतेपर्णशय्यासुस्वयंभग्नासुभूतले॥रात्रिषुश्रमखिन्नेनतस्माद्दुःखमतोवनं॥११॥

चदुस्तरत्वेहेतुःनित्यंगजैरित्यस्ययुक्तिमितिशेषः॥९॥कृकवाकुर्वनकुक्कुटःसरटइत्यन्ये॥नि
रपाःनिर्गतोदकाः॥ऋक्पूरित्यप्समासांतः॥१०॥स्वयंभग्नासु॰स्वयंपतितशीर्णपर्णमयश
य्यास्वपितियावत्॥श्रमखिन्नेन॰दिवाफलाद्यानयनश्रमखिन्नेन॥सुप्यतेवनवासिनाजनेने
तिशेषः॥तेनतवापिसंश्रमसहदेहवाशयनंचेतिसममेवेतिध्वनितं॥११॥ ॥

तथान्याययुक्तं निनीषति स्मनैतुमैच्छत् अतएवास्या निवर्तने निवर्तनरूपप्रयोजननिमित्तं वने वासस्य दुःखतां दुःखजनकतां प्रतिसत् संभवत् बहुहेतु ज्ञातमुवाचेत्यर्थः॥२८॥ इति श्रीरामाभिरामे श्रीरामीयरामायणतिलके अयोध्याकांडे सप्तविंशः सर्गः॥२७॥ स इति ननेतुं कुरुते बुद्धिं ननेतुं कुरुत इ

तथा ब्रुवाणामपि धर्मवत्सलां न च स सीतां नरवरो निनीषति॥ उवाच चैनां बहु सन्निवर्त्तने वने निवासस्य च दुःखतां प्रति॥२८॥ इत्यार्षे श्रीरामा० अयो० सप्तविंशः सर्गः॥२७॥ स एवं ब्रुवतीं सीतां धर्मज्ञो धर्मवत्सलः॥ न नेतुं कुरुते बुद्धिं वने दुःखानि चिंतयन्॥१॥ सांत्वयित्वा ततस्तां तु बाष्पदूषितलोचनां॥ निवर्तनार्थे धर्मात्मा वाक्यमेतदुवाच ह॥२॥ सीते महाकुलीनासि धर्मे च निरता सदा॥ इहाचर स्वधर्मं त्वं यथा मे मनसः सुखं॥३॥ सीते यथा त्वां वक्ष्यामि तथा कार्यं त्वयाबले॥ वने दोषा हि बहवो वसतस्तान्निबोध मे॥४॥ सीते विमुच्यतामेषा वनवासकृता मतिः॥ बहुदोषं हि कांतारं वनमित्यभिधीयते॥५॥

व॥१॥२॥ महाकुलीनेत्यादियुक्तिः स्ववाक्यांगीकारप्रयोजना॥ इहैव स्थित्वा यथा मे मम मनसः सुखं भवति तथा मदागमनमुद्दिश्य स्वधर्मं चर धर्ममेवाचर॥३॥ हि यतो वने बहवो दोषाः क्लेशा अतो मदुक्तं कार्यमित्यन्वयः॥४॥ कांतारं गहनत्वादुष्प्रवेशं बहुदोषमित्यभिधीयत इति योजना॥ सीते इति कल्त्रनामग्रहणमपि दुःखाकुलचित्त

वा०रा०टी०

निलयनं वासस्थानं नदीवत्कुटिलगतयः ॥२०॥ अवत्ले इत्यनेन तन्निवारणं सामर्थ्यध्वनितं ॥२१॥ व्याकुलशा
खाग्रत्वं यथायोगं द्रुमेषु कुशकाशयोश्च बोध्यं ॥२२॥२३॥ भेतव्ये भेतव्यविषये ॥२४॥ अलं गत्वा न गंतव्य

नदी निलयनाः सर्वा नदीकुटिलगामिनः ॥ तिष्ठंत्यावृत्य पंथानमतो दुःखतरं वनं ॥२०॥ पतं
गा वृश्चिकाः कीटा दंशाश्च मशकैः सह ॥ वर्धंते नित्यमबले सर्वं दुःखमतो वनं ॥२१॥ द्रुमाः कं
टकिनश्चैव कुशाः काशाश्च भामिनि ॥ वने व्याकुलशाखाग्रास्तेन दुःखमतो वनं ॥२२॥ काय
क्लेशाश्च बहवो भयानि विविधानि च ॥ अरण्यवासो वसतो दुःखमेव सदा वनं ॥२३॥ क्रोधलो
भौ विमोक्तव्यौ कर्तव्या तपसे मतिः ॥ न भेतव्यं च भेतव्ये दुःखं नित्यमतो वनं ॥२४॥ तदलं ते व
नं गत्वा क्षेमं न हि वनं तव ॥ विमृशन्निव पश्यामि बहुदोषकरं वनं ॥२५॥ वनं तु नेतुं न कृता
मतिर्यदा बभूव रामेण तदा महात्मना ॥ न तस्य सीता वचनं चकार तं ततोऽब्रवीद्राममिदं
सुदुःखिता ॥२६॥ इत्यार्षे श्रीरा॰ अयो॰ ऽष्टाविंशः सर्गः ॥२८॥ एतत्तु वचनं श्रुत्वा सीता
रामस्य दुःखिता ॥ प्रसक्ताश्रुमुखी मंदमिदं वचनमब्रवीत् ॥१॥ ॥ ॥

मित्यर्थः विमृशन् दोषान्विचारयन् तान् दोषानिह स्थोऽपि पश्यामीवातो बहुदोषकरं वनमिति
ब्रवीमीति शेषः ॥२५॥ रामेण यदा वने नेतुं मतिर्न कृता न भवत्तदा सीता तस्य वचनं न चकार ना॰
गीचकार ततो हेतो रिदमब्रवीत ॥२६॥ इति श्रीरा॰ अष्टाविंशः सर्गः ॥२८॥ एतदिति ॥१॥

वल्कावपतितैः वृक्षेभ्यः स्वयमेवपतितैः अहोरात्रं प्रातःसायं ॥१२॥ यथाप्राणेनयथाबलानुसारेण केशसंस्का
राभावात् जटाभारकरणं ॥१३॥ प्रतिपूजनंकार्यंतेनतदर्थसामग्री संपादनक्लेशोध्वनितः ॥१४॥ कालेकालेस्ना

अहोरात्रं चसंतोषः कर्त्तव्योनियतात्मना ॥ फलैर्वल्कावपतितैः सीतेदुःखमतोवनं ॥१२॥ उपवास
श्चकर्तव्योयथाप्राणेनमैथिलि ॥ जटाभारश्चकर्त्तव्योवल्कलांबरधारणं ॥१३॥ देवतानांपितृणां
चकर्तव्यं विधिपूर्वकं ॥ प्राप्तानामतिथीनांच नित्यशः प्रतिपूजनं ॥१४॥ कार्यस्त्रिरभिषेकश्चका
लेकालेचनित्यशः ॥ चरतांनियमेनैवतस्माद्दुःखतरंवनं ॥१५॥ उपहारश्चकर्त्तव्यः कुसुमैःस्व
यमाहृतैः ॥ आर्षेणविधिनावेद्यांसीतेदुःखमतोवनं ॥१६॥ यथालब्धेनकर्त्तव्यः संतोषस्ते
नमैथिलि ॥ यथाहारैर्वनचरैः सीतेदुःखमतोवनं ॥१७॥ अतीववातास्तिमिरंबुभुक्षाचास्ति
नित्यशः ॥ भयानिचमहांत्यत्र अतोदुःखतरंवनं ॥१८॥ सरीसृपाश्चबहवोबहुरूपाश्चभामि
नि ॥ चरंतिपथितेदर्पात्ततोदुःखतरंवनं ॥१९॥

तःकालादौनियमेनैवचरतांकालक्षेपंकुर्वतां ।
त्रिरभिषेकः ॥ कार्यः त्रिषवनस्नानंकर्तव्यमित्यर्थः ॥१५॥ उपहारः पूजा । आर्षोविधिः हंछादिवृत्तिःवे
द्यामित्यनेनान्यत्करणाद्दुःखंध्वनितं ॥१६॥ तेनवन्यपदार्थेनयथाहारैः यथालब्धाहारैः ॥१७॥ तिमिरंरा
त्रिध्वनितिशेषः ॥१८॥ बहुरूपाः सरीसृपाः संतितेचमार्गमध्येदर्पाच्चरंति ॥१९॥ ॥

शावनेपतिर्हीनाप्रवलभर्तृहीतानजीवितुशक्नोति॰ नतुमादृशीप्रबलभर्तृकेतिअहंवनंयास्याम्येवेतिभावः इत्याहु
७॥ अथापिवनस्यसदोषत्वेपिवनेत्वयावस्तव्यंकिलेतिब्राह्मणानांसत्यंवचनं॰ पूर्वंपितृगृहेनिवसंत्यामया
श्रुतमतोवश्यंभावित्वान्ममवनवासस्यनदोषगणानेतिभावः॥८॥ तदेवपुनर्द्रढयति॰ लक्षणिभ्यः इतिसामुद्रि
कलक्षणविज्ञः वचनंवनवाससंपादकलक्षणसत्ताविषयकंवचनंनित्यमेवइतःप्रागपि॥९॥ सवनवास
स्यादेशः ब्राह्मणोक्तोमयाप्राप्तव्यः किल॰ भाविनोन्यथाभावाभावात्॰ तस्मात्त्वयासहयास्यामि॰ इदमन्य

अथापिचमहाप्राज्ञब्राह्मणानांमयाश्रुतं॥ पुरापितृगृहेसत्यंवस्तव्यंकिलमेवने॥ लक्षणि
भ्योद्विजातिभ्यःश्रुत्वाहंवचनंगृहे॥ वनवासकृतोत्साहानित्यमेवमहाबल॥९॥ आदेशोवन
वासस्यप्राप्तव्यःसमयाकिल॥ सात्वयासहभर्त्राहंयास्यामिप्रियनान्यथा॥१०॥ कृतादेशाभवि
ष्यामिगमिष्यामित्वयासह॥ कालश्चायंसमुत्पन्नःसत्यवाग्भवतुद्विजः॥११॥ वनवासेहिजानामि
दुःखानिबहुधाकिल॥ प्राप्यंतेनियतंवीरपुरुषैरकृतात्मभिः॥१२॥

थानकथमप्यन्यथाभविष्यति
त्पर्यः॥ अत्राज्ञापर्यायादेशशब्देनब्राह्मणोक्तिस्त्वदाज्ञैव॰ नवसर्वोतर्यामित्वादितिसूचितं॰ किंचाव
तारकरणसमयकालिकोयंतवादेशोद्यतनरात्रिशेषकालिकश्चादेशइतिध्वनितं॥१०॥ तदेवाह॰ कृ
तादेशाअनुष्ठिताज्ञा॰ अन्यथाप्रतिज्ञाताचरणाभावेदोषाभावोममापितवैवस्यादितिभावः अतस्त्वयास
हगमिष्यामि॰ समुत्पन्नःसंप्राप्तः पूर्वकल्पितवनवासस्येतिशेषः द्विजइतिजात्यभिप्रायेण॰ अत्रद्विजप

१०२

वनेवस्तव्यंतांवासंप्रतित्वयायेदोषाः कीर्त्तितास्तान्मांप्रतिगुणानेव विद्धि · यतोहंतवस्नेहेनपुरस्कृतात्वन्निष्ठस्नेह
विषया · अनेनत्वत्स्नेह विषयस्यदोषपदार्थेनकोपीतिभावः यद्वायतस्त्वद्विषयकस्नेहेनाग्रगाइत्यर्थः ॥२॥
तदेवाह · मृगाइत्यादि · ॥३॥ अदृष्टपूर्वैतावकं रूपंयेषांतत्वात् · रूपंदृष्ट्वेति · स्थानेहृषीकेशतवप्रकीर्त्येतिन्या
याद्येषामन्यकर्तृकत्वत्वत्स्मरणेनभयंतेषांसाक्षात्त्वद्दर्शनेभयमित्यर्थसिद्धमितिध्वनितं · नवसर्वेहिविभ्य

येत्वयाकीर्त्तितादोषावनेवस्तव्यतांप्रति ॥ गुणानित्येवतान्विद्धितवस्नेहपुरस्कृता ॥२॥ मृगाः सिं
हागजाश्चैवशार्दूलाःशरभास्तथा ॥ चमराःसमराश्चैव येचान्येवनचारिणः ॥३॥ अदृष्टपूर्वरूप
त्वात्सर्वेतेतवराघव ॥ रूपंदृष्ट्वापसर्पेयुस्तवसर्वेहिविभ्यति ॥४॥ त्वयाचसहगंतव्यंमयागुरु
जनाज्ञया ॥ त्वद्वियोगेनमेरामत्यक्तव्यमिहजीवितं ॥५॥ नहिमांत्वत्समीपस्थामपिशक्तोपिरा
घव ॥ सुराणामीश्वरः शक्तः प्रधर्षयितुमोजसा ॥६॥ पतिहीनातुयानारीनसाशक्ष्यतिजीवितुं
काममेवंविधंरामत्वयाममनिदर्शितं ॥७॥

ति अनेन · यद्भीषोदेतिसूर्यइतिश्रुत्यर्थोध्वनितः ॥४॥ गु
रुजनाज्ञया · इयंसीताममसुताछायेवानुगतासदेतिसूचितं · पित्राद्याज्ञयाउक्तरीत्यात्वत्पित्राद्याज्ञ
याच · त्वद्वियोगेनहेतुना ॥५॥ आद्योपिर्लोकोक्तौ ॥६॥ एवंविधंपतिहीनायाजीवनमशक्यमित्येवंरूपंत्वया
दर्शितंभरतानुकूलतयात्रवासस्थित्युपदेशेनातोहंत्वयासहयास्यामि · त्वदुपदिष्टभरतानुकूल्येन
स्थातुमशक्यत्वादितिभावः के चित्तु · एवंविधंवनवासदुःखंकामंत्वयाममदर्शितंयद्यपितथापितादृ

प्रेमभावाद्भर्तारमनुगच्छंती विकल्मषा भविष्यामीत्यन्वयः॥ त्वया विनात्र स्थितो हि लोकः कल्मषं संभावयिष्यतीति भावः॥१६॥ प्रेत्यभावे। मत्वा शरीरांतरपरिग्रहेपि परलोके पीतियावत् त्वया सह संगमः। कल्याणः दिव्यसुखहेतुः अतइह संगमस्यकल्याणत्वं कैमुतिकन्यायसिद्धमिति भावः। प्रेत्यसंगमेसत्त्वेमानमाह। ब्राह्मणानां सुखात् पुण्यां किल श्रुतिर्यतन्त्रार्थप्रतिपादिकाश्रूयते॥१७॥ नांश्रुतिं पठंति। इहेति। यास्त्रिपि

शुद्धात्मन्प्रेमभावाद्धि भविष्यामि विकल्मषा॥ भर्तारमनुगच्छंती भर्ता हि परदैवतं॥१६॥ प्रेत्यभावे हि कल्याणः संगमो मे सदा त्वया॥ श्रुतिर्हि श्रूयते पुण्या ब्राह्मणानां यशस्विनां॥१७॥ इहलोके च पितृभिर्या स्त्री यस्य महाबल॥ अद्भिर्दत्ता स्वधर्मेण प्रेत्यभावेपि तस्य सा॥१८॥ एवमस्मात्स्वकां नारीं सुवृत्तां हि पतिव्रतां॥ नाभिरोचयसे नेतुं त्वं मां केनेह हेतुना॥१९॥ भक्तां पतिव्रतां दीनां मां समां सुखदुःखयोः॥ नेतुमर्हसि काकुत्स्थ समानसुखदुःखिनीं॥२०॥ यदि मां दुःखितामेवं वनं नेतुं न चेच्छसि॥ विषमग्निं जलं वाहमास्थास्ये मृत्युकारणात्॥२१॥

।तृभिः पितृपितामहमात्रादिभिर्यस्याद्भिः स्वधर्मेण स्वस्वजातीयकन्यादानधर्मेण दत्ता सा इहलोके च तस्यैव प्रेत्यभावे पि तस्यैव भवतीति॥१८॥ एवं श्रुतिन्यायतो नित्यसंबंधे सिद्धे सतीत्यर्थः॥ अस्मान्नगरात् स्वकां स्वीयां सुवृत्तामित्यस्य विवरणं पतिव्रतामिति॥१९॥ सुखदुःखयोः समां अस्यैव विवरणं। समानसुखदुःखिनीं

इतितात्विकमर्थमुक्त्वापुनर्लोकानुसारेणाह वनेत्यादि हि हेत्वर्थे किलेति निश्चये वनवासे बहुधा दुःखानि संतीति निश्चितं जानाम्येव तथापि तान्यकृतात्मभिरजितेंद्रियैः स्त्रीसाहित्यवशात् प्राप्यंते अत्र पुरुषप्रकरणाभावेपि तदुक्तिस्त्वयापि सा बुद्धिर्वनवासदुःखं दृष्ट्वा न निवर्तनीयेति ध्वनयितुं १२ ननु लक्षणज्ञानां भ्रमो भवेत्तत्राह कन्यये चेति भिक्षिणः शमवृत्तायाः शमवदाचारायास्तापस्याः तपोयुक्त त्वे

वनवासे हि जानामि दुःखानि बहुधा किल प्राप्यंते नियतं वीर पुरुषैरकृतात्मभिः ११ कन्यया च पितुर्गेहे वनवासः श्रुतो मया भिक्षिणः शमवृत्ताया मम मातुरिहाग्रतः १३ प्रसादितश्च वै पूर्वं त्वं वै बहुतिथं प्रभो गमनं वनवासस्य कांक्षितं हि सह त्वया १४ कृतक्षणाहं भद्रं ते गमनं प्रति राघव वनवासस्य शूरस्य मम चर्या हि रोचते १५

नतस्याभ्रमो न संभवतीति भावः १३ अत्रत्यमिहेत्युत्तरश्लोकान्वयि इह अस्मिन् गृहे पूर्वमेव त्वं मेमया बहुतिथं बहुवारं वनवासस्य लीलार्थं वनगमनं प्रति प्रसादितः अतस्त्वया सह वनगमनं मे कांक्षितं हि निश्चयेन इति जानीहि ति शेषः १४ हे राघव ते भद्रं अहं गमनं प्रति कृतक्षणास्मि कृतानुमतिकास्मि वने वासो यस्य तादृशस्य शूरस्य तव चर्या शुश्रूषा मम रोचते हि तादृशस्य शूरस्य तव चर्या रक्षोवधादिरूपा मम रोचने मत्संबंधेनैव शोभते संपद्यते हि यत इति गूढं १५

रामा॰अ॰
१०३

२०३

यदिमांविहायभवान्वनगमनभारंवक्ष्यतिप्राप्स्यतिवदप्रापणोऽस्यत्वत्पंतदायदिदंलोकोवदतिरामेय
त्तेजस्तत्तपतिदिवाकरेनास्तीवेतितदज्ञानादिव॰॥गादितमनन्तंभविष्यतीतिशेषःवतेतिखेदे॰
खेदातिशयव्यंजकतयाचन्यूनपदत्वादिनदोषः॥४॥किंहित्वाकिंमनसिविचार्यत्पर्थःविषण्णः

अनन्तंबतलोकोयमज्ञानाद्यदिवक्ष्यति॥तेजोनास्तिपरंरामेतपतीवदिवाकरे॥४॥किं
हित्वाविषण्णस्त्वंकुतोवाभयमस्तिते॥यत्परित्यक्तुकामस्त्वंमामनन्यपरायणां॥५॥
द्युमत्सेनसुतंवीरंसत्यवंतमनुव्रतां॥सावित्रीमिवमांविद्धित्वमात्मवशवर्तिनीं॥६॥
नत्वहंमनसात्वन्यंद्रष्टास्मित्वदृतेनघ॥त्वयाराघवगच्छेयंयथान्याकुलपांसनी॥७॥
स्वयंतुभार्यांकौमारींचिरमध्युषितांसतीं॥शैलूषइवमांरामपरेभ्योदातुमिच्छसि॥८॥

प्राप्तविषादः॥५॥द्युमत्सेनसुतंसत्यवंतमनुव्रतांतत्पत्नींसावित्रीमिवमांविद्धि॥६॥यथान्याकु
लपांसनीअन्यंपश्यति॰एवमहंमनसाप्यन्यंनद्रष्टास्मिअतस्त्वदृतेत्वांविनाऽत्रनस्थास्येऽतः
हेराघवत्वयासहगच्छेयं॥७॥एवमप्यननुमतिमेवदृष्ट्वापुनराक्षिपति॰॥स्वयंत्वितिकौमा
रींअन्यापूर्वेणाविवाहितामन्यापूर्वांच॰।चिरमध्युषितामनेनतरुणीत्वमुक्तं॰।शैलूषइव॰जाया
जीवइव॥८॥

राम॰
१०३

अननुमतौहेतुर्विजनत्वंश्वश्रूप्रभृतिरक्षकजनरहितत्वं॥२२॥एवमुक्त्वा अननुमतिबोधकवाक्यमुक्त्वा स्नप
यंतीवेत्युत्प्रेक्षातस्या अपिवास्तवदुःखाभावोध्वनितः रामवाक्यस्यनायुक्ततयाज्ञानात्॥२३॥सांत्वयन्सांत्वव
क्यासुवाचेत्यर्थः॥२४॥इतिश्री अयोध्याकांडएकोनत्रिंशःसर्गः॥२९॥वनवासनिमित्तर्थे-वनवासनिमित्त

एवंबहुविधंतंसायाचतेगमनंप्रति॥नानुमेनेमहाबाहुस्तांनेतुंविजनंवनं॥२२॥एवमुक्त्वा
तुसाचिंतांमैथिलीसमुपागता॥स्नापयंतीवगामुष्णैरश्रुभिर्नयनच्युतैः॥२३॥चिंतयंतींतदा
तांतुनिवर्तयितुमात्मवान्॥क्रोधाविष्टांतुवैदेहींकाकुत्स्थोबहुसांत्वयन्॥२४॥इत्यार्षेश्री
रामायणे अयोध्याकांडएकोनत्रिंशःसर्गः॥२९॥सांत्व्यमानातुरामेण मैथिलीजनकात्मजा
वनवासनिमित्तार्थेभर्तारमिदमब्रवीत्॥१॥सातमुत्तमसंविग्रासीताविपुलवक्षसं॥प्रण
याच्चाभिमानाच्चपरिचिक्षेपराघवं॥२॥किंत्वामन्यतवैदेहःपितामेमिथिलाधिपः॥रामजा
मातरंप्राप्यस्त्रियंपुरुषविग्रहं॥३॥

नुमतिसिध्यर्थे॥१॥उत्तमसंविःग्राअतिभीता सेव प्रण
यात्स्नेहात् अभिमानोत्पंतमिश्रत्वेनरहसिकोपप्रीत्यादिप्रयुक्तसकलवचनार्हइत्येवंरूपःप
रिचिक्षेपसोपहासवचनमुक्तवती॥२॥पुरुषविग्रहं॥आकारेणपुरुषंक्रिययातुस्त्रियमेव त्वां
जामातरंप्राप्यमेपिता किममन्यत तवतत्वंनज्ञातवानित्यर्थः यदिजानीयात् मांतुभ्यंनप्रयच्छेदितिशेषः॥३॥

स्वयमात्तत्पदास्यसेइत्यनेनस्वस्यतदाहरणप्रयुक्तश्रमाभावःसूचितः १५ मेतुरित्यादिकर्मणःशेषत्वविवक्षयाषष्ठीआर्तवानिर्तुतत्तदृतुभवानि १६ ततःउक्तहेतोः १७ त्वत्साहित्येननरकोपिस्वर्गस्त्वद्राहित्येनस्वर्गोपिनरकइतिममनिश्चयंजाजानन् १८ कैकेयीवन्मयिनसिद्धांतमाह अयेति अव्यग्रां

पत्रंमूलंफलंयत्तुअल्पंवायदिवाबहु दास्यसेस्वयमाहृत्यतन्मेऽमृतरसोपमं १५ नमातुर्नपितुस्तत्रस्मरिष्यामिनवेश्मनः आर्तवान्युपभुंजानापुष्पाणिचफलानिच १६ नचतत्रततःकिंचिद्द्रष्टुमर्हसिविप्रियं मत्कृतेनचतेशोकोनभविष्यामिदुर्भरा १७ यस्त्वयासहसस्वर्गोनिरयोयस्त्वयाविना इतिजानन्परांप्रीतिंगच्छराममयासह १८ अथमामेवमव्यग्रांवनंनैवनयिष्यसे विषमद्यैवपास्यामिमावशंद्विषतांगमं १९ पश्चादपिहिदुःखेनममनैवास्तिजीवितं उज्झितायास्त्वयानाथतदैवमरणंवरं २० इमंहिसहितुंशोकंमुहूर्तमपिनोत्सहे किंपुनर्दशवर्षाणित्रीणिचैकंचदुःखिता २१ इतिसाशोकसंतप्ताविलप्यकरुणंबहु चुक्रोशपतिमायस्ताभृशमालिंग्यसस्वरं २२

वनवासेदोषान्गणयंती द्विषतांभरतादीनां १९ पश्चात्त्वद्गमनोत्तरकाले अनन्तरंदैववत्त्वद्वियोगकालएव २० किमिति विगत्यंकथनेनवनवासकालसंख्यायाअतिदुस्तरत्वंध्वनयति २१ आ

तदेवदर्शयति· यस्यभरतस्यमांपथ्यंचरामित्यनुवर्त्तिनीमात्यसंप्रत्येवकथितवानसिपथ्यंचरामित्यत्र
सुमार्षः यस्यचभरतस्यार्थेतदभिषेकरूपप्रयोजननिमित्तंअवरुध्यसेनिरुद्धाभिषेकोसि· ॥तस्यत्व
मेववश्यइच्छांनुवर्ती विधेयोनियोज्यश्चभवनाहंतदित्यनुवर्त्तिनीतद्विधेयाचेहवसामीत्याशयः

यस्यपथ्यंचरामात्ययस्यचार्थेवरुध्यसे॥त्वंतस्यभववश्यश्चविधेयश्चसदानघ॥९॥समा
मनादायवनंनत्वंप्रस्थितुमर्हसि॥तपोवायदिवारण्यंस्वर्गोवास्यात्त्वयासह॥१०॥नचमे
भवितातत्रकश्चित्पथिपरिश्रमः॥पृष्ठतस्तवगच्छंत्याविहारशयनेष्विव॥११॥कुशका
शशरेषीकायेचकंटकिनोद्रुमाः॥तूलाजिनसमस्पर्शामार्गेममसहत्वया॥१२॥महा
वातसमुद्भूतंयन्मामवकरिष्यति॥रजोरमणतन्मन्येपरार्ध्यमिवचंदनं॥१३॥शाद्व
लेषुयदाशिश्येवनांतर्वनगोचरा॥कुथास्तरणयुक्तेषुकिंस्यात्सुखवतरंततः॥१४॥

९॥१०॥विहारशयनेषुसुप्तायाइवारण्येगच्छंत्यानमेपरिश्रमइतियोजना॥११॥तूलैरजिनैःप्रिय
कादिमृगाजिनैश्चसमःस्पर्शोयेषांतादृशाभविष्यंतीतिशेषः॥१२॥अवकरिष्यतिविक्षेप्स्यति
व्याप्स्यतीतियावत् परार्ध्यंश्रेष्ठमुत्तमं॥१३॥वनांतःवनमध्येशिश्येत्वयासहेतिशेषः॥कुथाश्चित्र
कंबलास्तदुपास्तरणयुक्तेषुमंचेषुसुप्तायाममततःशाद्वलशयनात्किंसुखतरंस्यात्किमधिकंसु

रामायणटीकाभि० ७१

सर्वथा त्वां सहने ष्यामीत्याह॰ धर्मस्त्विति वानप्रस्थधर्म इत्यर्थः॥ तं पूर्वाचरितधर्मं त्वं च यथा सूर्यं सुवर्चला नवर्त्तते तथा मामनुवर्तस्व॥३०॥ मम तु गमनं निश्चितमेवेत्याह॰ न खल्विति॰ अहं वनं न गच्छेयमिति न किंतु सर्वथा गच्छेयमेव यतस्तत्पितुर्वचनं मां नयति॥३१॥ ननु यदि तव वनेच्छा तदा पितरं वचउद्घ्यध्या पितिचेत्याह॰ एष धर्म इति॰॥ एतत्पदार्थः पितुर्मातुश्च वशपताः॥ इस्यानुवर्तिता अतो हं न दाज्ञां व्यति

धर्मस्तु गजनासोरु सद्भिराचरितः पुरा॥ तं चाहमनुवर्तिष्ये यथा सूर्यं सुवर्चला॥३०॥ न खल्वहं न गच्छेयं वनं जनकनंदिनि॥ वचनं तन्नयति मां पितुः सत्योपबृंहितं॥३१॥ एष धर्मश्च सुश्रोणि पितुर्मातुश्च वशपता॥ आज्ञां चाहं व्यतिक्रम्य नाहं जीवितुमुत्सहे॥३२॥ अस्वाधीनं कथं दैवं प्रकारैरभिराध्यते॥ स्वाधीनं समतिक्रम्य मातरं पितरं गुरुं॥३३॥ यत्र त्रयं त्रयो लोकाः पवित्रं तत्समं भुवि॥ नान्यदस्ति शुभापांगे तेनेदमभिराध्यते॥३४॥

क्रम्य जीवितुं नोत्सहे॰ इति अहं निश्चितं॥३२॥ अस्वाधीनमप्रत्यक्षत्वात्॰॥ तादृशं दैवं प्राकारैर्भावनामात्रसाध्याराधनप्रकारैः स्वाधीनं प्रत्यक्षदृश्यमानत्वात्॥३३॥ यत्र पित्राद्याराधने सति त्रयं धर्मार्थकामरूपं भवति त्रयो लोकाश्चाराधिता भवंति॰ अनेन तदाराधनेन लोकत्रयांतर्गतसकलदेवताराधनफलं दर्शितं॥ अतस्तत्समं मन्यत् पवित्रं पुण्यजनकं॥ यद्वा॰ पविर्महाभयरूपः संसारः पविर्वज्रं महाभयमित्यभिधानात्॥ तस्मात्त्रायते तत्तेन संसारतारकमित्यर्थः॥ अन्यत् त्रैलोक्ये नास्ति तेन भुवि स्थितेरिदमाराध्यते॥३४॥

दिग्धैर्विषलिप्तबाणैः चिरसंनियतं बहुकालं सन्निरुद्धं ॥२३॥२४॥ सितापूर्णा मासीतत्संबंधी अमलो राका-यश्चंद्रस्तत्सदृशं । जलोद्धृतं जलमुद्धृतं यस्मात् । आहिताग्न्यादिः ॥२५॥ परिविश्वासयन्ननुजीवयन् ॥२६॥ तव दुःखेन त्वद्वियोगदुःखेन प्राप्तमपीति शेषः स्वयंभोः ब्रह्मणः स्वव्यतिरिक्ततत्वस्त्वं

सा विद्धा बहुभिर्वाक्यैर्दिग्धैरिव गजांगना ॥ चिरसंनियतं बाष्पं मुमोचाग्निमिवारणिः ॥२३॥ तस्याः स्फटिकसंकाशं वारि संतापसंभवं ॥ नेत्राभ्यां परिसुस्राव पंकजाभ्यामिवोदकं ॥२४॥ तत्सितामलचंद्राभं मुखमायतलोचनं ॥ पर्यशुष्यत बाष्पेण जलोद्धृतमिवांबुजं ॥२५॥ तां परिष्वज्य बाहुभ्यां विसंज्ञामिव दुःखितां ॥ उवाच वचनं रामः परिविश्वासयंस्तदा ॥२६॥ न देवि तव दुःखेन स्वर्गमप्यभिरोचये ॥ न हि मेऽस्ति भयं किंचित्स्वयंभोरिव सर्वतः ॥२७॥ तव सर्वमभिप्रायमविज्ञाय शुभानने ॥ वासं न रोचयेऽरण्ये शक्तिमानपि रक्षणे ॥२८॥ यत्सृष्टासि मया सार्धं वनवासाय मैथिलि ॥ न विहातुं मया शक्या प्रीतिरात्मवता यथा ॥२९॥

तराभावेन पूर्णबलत्वेन च यथा भयाभावः तद्वदेव ममापि सर्वतो भयाभावः ॥२७॥ सर्वं समग्रमांतरमभिप्रायमविज्ञाय ततएव हेतोस्तव वनवासं न रोचये नांगीकृतवानितः प्रागिति शेषः ॥२८॥ यत्सृष्टासि निश्चितासि मया सार्धं वनवासाय गंतुमिति शेषः ॥ यद्वा सृष्टासि अवतीर्णासि अतस्त्वं मया विहातुं न शक्या । आत्मवता आत्मज्ञेन यथा प्रीतिर्दया हातुमशक्या ॥२९॥ श्री

रामा॰ अ॰
१०६

रत्नानिउत्तमवस्तुनि॰भोजनमाशंसमानेभ्योभिक्षुकेभ्योभोजनंदेहि॥४३॥क्रीडार्थाउपस्कराःस्वर्णमयपु
त्रिकाद्युपकरणानि॥४४॥शयनीयानि॰ममचयान्यस्वस्यअन्यानियानिचवस्तूनीतिशेषःब्राह्मणानामनं
तं॰ ब्राह्मणदानोत्तरमवशिष्टानिभर्त्यवर्गेभ्योदेहीत्यर्थः॥४५॥अनुकूलमिष्टंगमनंवनानुगमनं
४६॥इतिश्रीअयो॰त्रिंशःसर्गः॥३०॥संवादंरामसीतयोरितिशेषःपूर्वमागतःकौसल्याम■रहाद्रामसी

ब्राह्मणेभ्यश्चरत्नानिभिक्षुकेभ्यश्चभोजनं॥देहिचाशंसमानेभ्यःसंत्वरस्वचमाचिरं॥४३॥भूष
णानिमहार्हाणिवरवस्त्राणियानिच॥रमणीयाश्चयेकेचित्क्रीडार्थाश्चाप्युपस्कराः॥४४॥शय
नीयानियानानिममचान्यानियानिच॥देहिस्वभृत्यवर्गस्यब्राह्मणानामनंतरं॥४५॥अनुकूलं
नुसाभर्तुर्ज्ञात्वागमनमात्मनः॥क्षिप्रंप्रमुदितादेवीदातुमेवप्रचक्रमे॥४६॥इत्यार्षेश्रीरा॰अयो॰
त्रिंशःसर्गः॥३०॥एवंश्रुत्वासंवादंलक्ष्मणःपूर्वमागतः॥बाष्पपर्याकुलमुखःशोकंसोढुमश
क्नुवन्॥१॥सभ्रातुश्चरणौगाढंनिपीड्यरघुनंदनः॥सीतामुवाचातियशाराघवंचमहाव्रतम्॥२॥

तासंवादप्रवृत्तेःपूर्वमागतःशोकंस्वस्यवनगमनमंगीकरोतिनवेतिशंकयासंभावितरामविरहजं॥१॥
भ्रातुश्चरणौगाढंनिपीड्यप्रणम्येतियावत्॥अतियशाउत्कृष्टकीर्तिमंतींसीतांचक्षुरादिभिःप्रार्थय
न्॰महाव्रतंवनवासलक्षणमहाव्रतकृतनिश्चयंरामंतु■वाचचस्त्वर्थेस्वाभिमतप्राप्तौसीताशरणागम

नमेवमङ्गमनमंगीकारयेत्येवंमुखमुपायइतिम
त्वात आर्थना॥२॥

रामः
१०६

706

बलकराः परलोकबलकराः स्तद्धि तावद्दाइतियावत् ॥ ३५ ॥ गुरुवृत्तिः गुरुचित्तवृत्तिः ॥ ३६ ॥ ३७ ॥ मा मां ॥ ३८ ॥
यतोवनेवसिष्यामीतिदृढनिश्चयेनत्वांमामनुयातुंनिश्चिता ॥ अतस्त्वांदंडकावनंनेतुममया अमतिस्तद्धि

नसत्यंदानमानौवायज्ञोवाप्याप्तदक्षिणाः ॥ तथाबलकराः सीतेयथासेवापितुर्मता ॥ ३५ ॥ स्वर्गोध
नंवाधान्यंवाविद्याः पुत्राः सुखानिच ॥ गुरुवृत्त्यनुरोधेननकिंचिदपिदुर्लभं ॥ ३६ ॥ देवगंधर्वगोलो
कान्ब्रह्मलोकांस्तथापरान् ॥ प्राप्नुवंतिमहात्मनोमातापितृपरायणाः ॥ ३७ ॥ समापितायथाशास्ति
सत्यधर्मपथेस्थितः ॥ तथावर्तितुमिच्छामि सहिधर्मः सनातनः ॥ ३८ ॥ ममसन्नामतिः सीतेने
तुंत्वांदंडकावनं ॥ वसिष्यामिति सात्वं मामनुयातुंसुनिश्चिता ॥ ३९ ॥ साहिदिष्टानवद्यांगिवना
यमदिरेक्षणे ॥ अनुगच्छस्वमांभीरु सहधर्मचरीभव ॥ ४० ॥ सर्वथासदृशंसीतेममस्वस्यकुल
स्यच ॥ व्यवसायमनुक्रांताकांतेत्वमतिशोभनं ॥ ४१ ॥ आरभस्वशुभश्रोणि वनवासक्षमाः क्रियाः ।
नेदानींत्वदृतेसीतेस्वर्गोपि मम रोचते ॥ ४२ ॥

रुद्धायामतिरासीत्साइदानींसन्नाविशीर्णा ॥ ३९ ॥ सात्वं
हियतोधुनावनायवनगमनायदिष्टामयाअनुज्ञाताततोमामनुगच्छस्व सहधर्मचरीभवेत्यनेनवनवा
ससाध्यस्यधर्मस्यरक्षोवधजस्यत्वयाविनाऽसंभवइतिसूचितं ॥ ४० ॥ व्यवसायंभर्त्रनुसरणनिश्चयंअनु
क्रांता प्रकर्षेणप्राप्ताप्रीत्यातिशयात्संबोधनद्वयं ॥ ४१ ॥ क्रियाः दानादिक्रियाः इदानीमेवदृढनिश्चये
॥ ४२ ॥

रामा-अ॰ १०७

कोभजिष्यतीति भरिष्यतीनिपाठांतरं एवंचमातृसेवार्थमेवप्रतिषिध्यसे अलंकारप्रतिसंहारोक्तिश्च उत्सवार्थधृताधिकालंकारविषया मदनुविधानेचमृदिष्टाप्रतिबंधरूपमितिभावः॥११॥ कामैरिष्टान्नपानैः ननुभर्तैवास्यारक्षकस्तत्राह सकामपाशेनपर्यस्तः कैकेय्यनुरागेण बद्धइत्यर्थः॥१२॥१३॥ पुत्रत्वाज्जरतोर

मयाद्यसहसौमित्रेत्वयिगच्छतितद्वनं॥ कोभजिष्यतिकौशल्यांसुमित्रांवायशस्विनीं॥११॥ अभिवर्षतिकामैर्यःपर्जन्यःपृथिवीमिव॥ सकामपाशपर्यस्तोमहातेजामहीपतिः॥१२॥ सहिराज्यमिदंप्राप्यनृपस्याश्वपतेःसुता॥ दुःखितानांसपत्नीनांनकरिष्यतिशोभनं॥१३॥ नस्मरिष्यतिकौसल्यांसुमित्रांचसुदुःखितां॥ भरतोराज्यमासाद्यकैकेय्यांपर्यवस्थितः॥१४॥ तामार्यांस्वयमेवेहराजानुग्रहणेनवा॥ सौमित्रेभरकौसल्यामुक्तमर्थममुंचर॥१५॥ एवंमयिचतेभक्तिर्भविष्यतिसुदर्शिता॥ धर्मज्ञगुरुपूजायांधर्मश्चाप्यतुलोमहान्॥१६॥ एवंकुरुष्वसौमित्रेमत्कृतेरघुनंदन॥ अस्माभिर्विप्रहीनायामातुर्नोनभवेत्सुखं॥१७॥ एवमुक्तस्तरामेणलक्ष्मणःश्लक्ष्णयागिरा॥ प्रत्युवाचतदारामंवाक्यज्ञोवाक्यकोविदं॥१८॥

ज्ञिष्यतीत्यत्राह तस्मरिष्यतीति कैकेय्यांतन्नियोगेसपत्नीतिरस्कारविषयके पर्यवस्थितःप्रतिष्ठितः॥१४॥ नहिमयापिकथंरक्षणंकर्तुंशक्यमत आह राजानुग्रहणेनवादशरथानुग्रहसंपादनेनवेत्यर्थः॥१५ मयिभक्तिःमदाज्ञायापालनात् गुरुःकौसल्यादिः॥१६॥ विप्रहीनायाःवियुक्तायाःनः अस्माकं॥१७॥१८॥

राम १०७

बुद्धिर्युवाभ्यामितिशेषः त्वांत्वांवनंगंतारं अनुगमिष्यामि· अनुःसहार्थेगमनकालेचाग्रतएवधनुर्धरोगमिष्यामी॥३॥
४॥ नचिहैवभोगान्भुक्त्वास्थातव्यमित्यत्राहनेति· आक्रमणमारोहः॥५॥६॥ पूर्वमेवभवतानुज्ञातःतस्मादपरि
तापःसन्स्त्वमप्यनुविधायमांप्रतिसंहारपद्धिम्ममाभिषेचनिकींक्रियामित्यर्थः· किंचपूर्वं अवरणसमयेइत्य

यदिगंतुंकृताबुद्धिर्वनंमृगगजायुतं॥ अहंत्वानुगमिष्यामिवनमग्रेधनुर्धरः॥३॥मयासमेतोर
ण्यानिरम्याणिविचरिष्यसि॥पक्षिभिर्मृगयूथैश्चसंघुष्टानिसमंततः॥४॥नदेवलोकाक्रमणंनामर
त्वमहंवृणे ऐश्वर्यंचापिलोकानांकामयेनत्वयाविना॥५॥एवंब्रुवाणःसौमित्रिर्वनवासायनिश्चि
तः॥रामेणबहुभिःसांत्वैर्निषिद्धःपुनरब्रवीत्॥६॥अनुज्ञातस्तुभवतापूर्वमेवयदस्म्यहं॥कि
मिदानींपुनरपिक्रियतेमेनिवारणं॥७॥यदर्थंप्रतिषेधोमेक्रियतेगंतुमिच्छतः॥एतदिच्छामि
विज्ञातुंसंशयोहिममानघ॥८॥ततोब्रवीन्महातेजारामोलक्ष्मणमग्रतः॥स्थितंप्राग्गामिनंधी
रंयाचमानंकृतांजलिं॥९॥स्निग्धोधर्मरतोधीरःसततंसत्पथेस्थितः॥प्रियःप्राणसमोवश्यो वि
धेयश्चसखाचमे॥१०॥

पूर्वः॥७॥एतत्प्रतिषेधवचनंप्रयोजनं·संशयः पूर्वंकेनाभिप्रायेणानुम
तिरिदानींकेनाभिप्रायेणप्रतिषेधइतिसंदेहः॥८॥प्रागामिनंवनंप्रतिप्रथमगमनाभिप्रायवंतंयाच
मानं·तत्रानुमतिमितिशेषः॥९॥वश्यविधेयावसरकृत्याख्यातौ॥१०॥ राम

तदेवदर्शयति॰ धनुरित्यादिना॰ श्वापदादिभ्योरक्षार्थं धनुर्ग्रहः। पिटका फलमूलाद्याहरणायोग्यावंशपेटी॥२५
स्वाहार्हाणि होमयोग्यानिदृविर्भूतानि स्वाहारणीतिपाठेसुस्थुआहारयोग्यानि॥२६॥ स्वपतश्चेत्यनेन
रात्रौस्वस्यनिर्निद्रत्वंध्वनयति॥२७॥ अनेनवाक्येनस्वपतश्चेत्यंतेनत्वव्रजअनुव्रजः॥ आपृच्छ स्वसुहृज्जना

धनुरादायसगुणंखनित्रपिटकाधरः॥ अग्रतस्तेगमिष्यामिपंथानंतवदर्शयन्॥२५॥ आह
रिष्यामितेनित्यंमूलानिचफलानिच॥ वन्यानिचतथान्यानिस्वाहार्हाणितपस्विनां॥२६॥ भवां
स्तुसहवैदेह्यागिरिसानुषुरंस्यते॥ अहंसर्वंकरिष्यामिजाग्रतःस्वपतश्चते॥२७॥ रामस्त्वने
नवाक्येनसुप्रीतःप्रत्युवाचतं॥ व्रजापृच्छस्वसौमित्रेसर्वमेवसुहृज्जनं॥२८॥ येचराज्ञोददौ
दिव्येमहात्मावरुणःस्वयं॥ जनकस्यमहायज्ञेधनुषीरौद्रदर्शने॥२९॥ अभेद्येकवचेदिव्येतू
णीचाक्षय्यसायकौ॥ आदित्यविमलाभौद्वौखड्गौहेमपरिष्कृतौ॥३०॥ सत्कृत्यनिहितं
सर्वमेतदाचार्यसद्मनि॥ सर्वमायुधमादायक्षिप्रमाव्रजलक्ष्मण॥३१॥ ससुहृज्जनमामं
त्र्यवनवासायनिश्चितः॥ इक्ष्वाकुगुरुमागम्यजग्राहायुधमुत्तमम्॥३२॥

ज्ञांगृहाण॥२८

महायज्ञेतुयज्ञेवरुणोराज्ञेजनकस्यधनुरादिकंददौतच्चजनकेनास्माकंयौतकत्वेनदत्तं॰ तत्सर्वमा
चार्यद्मनि॰ आचार्यसत्कृत्यनिहितंतदादायक्षिप्रमाव्रजआगच्छअत्रैवमनुवादादेवतत्रजनका
यवरुणाकर्तृकधनुरादिदानंरामलक्ष्मणाभ्यांचतत्कर्तृकतद्दानंबोध्यं आयुधमितिजात्या॥२९॥३०॥३१

मातृसेवायां भरत एवास्तीत्याह तवैवेति अनेन रामोक्तानुपपत्तिपरिहारः अप्रमेयबलराममातृसेवायाम
महान्नर्थ इति मत्वा भरत एव तां पूजयिष्यतीत्यर्थः॥१९॥ तदेव कालांतरभवं भयं दर्शयति यदीति
दुःस्थः दुर्मार्गस्थः राज्यं प्राप्येत्यन्वयः दुर्मनसा कैकेय्यनुरोधाद्दुष्टमनसा॥२०॥ त्रैलोक्यमपि तत्पक्षं वधि
ष्यामीत्यनुकर्षः किंतु सेत्युत्तरश्लोकान्वयि॥२१॥ किंच स्वात्मभरणे कौसल्यायाः कस्याप्यपेक्षा नेत्याह

तवैव वतेजसा वीर भरतः पूजयिष्यति॥ कौसल्यां च सुमित्रां च प्रयतो नास्ति संशयः॥१९॥ यदि
दुःस्थो नरदेते भरतो राज्यमुत्तमं॥ प्राप्य दुर्मनसा वीर गर्वेण च विशेषतः॥२०॥ तमहं दुर्मतिं क्रू
रं वधिष्यामि न संशयः॥ तत्पक्षानपि तान्सर्वान्त्रैलोक्यमपि किंतु सा॥२१॥ कौसल्या बिभृयादा
र्यी सहस्रमद्विधानपि॥ यस्याः सहस्रं ग्रामाणां संप्राप्तमुपजीविनां॥२२॥ तदात्मभरणे चैव
मम मातुस्तथैव च॥ पर्याप्ता मद्विधानां च भरणाय मनस्विनी॥२३॥ कुरुष्व मामनुचरं वैधर्म्यं ने
ह विद्यते॥ कृतार्थोहं भविष्यामि तव चार्थः प्रकल्पते॥२४॥

किंतु सा कौशल्येत्यादि कुतस्तस्याए
वं शक्तिस्तत्राह यस्या इति यस्या उपजीविनां उपजीविभिः सहस्रं ग्रामाणां प्राप्तं वर्तते॥२२॥ यदेवं तदि
ति॥२३॥ यदेवमतो मामनुचरं कुरुष्व मत्सेवामनुमन्यस्व इह मत्सेवानुमतौ वैधर्म्यं वैपरीत्यसाधकं न
विद्यते त्वदुक्तहेतोरन्यथासिद्धेर्दर्शिततत्वात्तवार्थः फलमूलाद्याहरणरूपस्त्वत्प्रयासं विनाप्रक
ल्पते प्रसिध्यति अहं च तेन कृतार्थो भवामि अत एव मयदितं मद्वनगमनमिति भावः॥२४॥

अभिचक्रामेत्यस्यानादिकृतवान् । अर्चितमग्निमिव दीप्तमकाल इतिशेषः ॥४॥ अंगदं बाहुमूलधार्यं भूषणं
केयूरं तदधोभागस्थं हेमसूत्रैर्मणिभिः स्वर्णसूत्रस्यूतैर्मुक्तादिरत्नमालाभिः ॥५॥ सीताप्रचोदितः सीता॰
यासुयज्ञपत्न्यै सखीत्वाद्दिव्याभरणदानाय प्रचोदितः ॥६॥ हेमसूत्रं उरोभूषणविशेषः हारय सेवक

तमागतं वेदविदं प्रांजलिः सीतयासह । सुयज्ञमभिचक्राम राघवोग्निमिवार्चितं ॥४॥ जा
तरूपमयैर्मुख्यैरंगदैः कुंडलैः शुभैः । सहेमसूत्रैर्मणिभिः केयूरैर्वलयैरपि ॥५॥ अन्यैश्च रत्नै
र्बहुभिः काकुत्स्थः प्रत्यपूजयत् । सुयज्ञं स तदोवाच रामः सीताप्रचोदितः ॥६॥ हारं च हेमसू
त्रं च भार्यायै सौम्य हारय । रसनां चाथ सा सीता दातुमिच्छति ते सखी ॥७॥ अंगदानि च चित्राणि
केयूराणि शुभानि च । प्रयच्छति सखी तुभ्यं भार्यायै गच्छती वनं ॥८॥ पर्यंकमग्र्यास्तरणं नानार॰
त्नविभूषितं । तमपीच्छति वैदेही प्रतिष्ठापयितुं त्वयि ॥९॥ नागः शत्रुंजयो नाम मातुलो यं ददौ म
म । तं ते निष्कसहस्रेण ददामि द्विजपुंगव ॥१०॥ इत्युक्तः स तु रामेण सुयज्ञः प्रतिगृह्य तत् । रा
मलक्ष्मणसीतानां प्रयुयोजाशिषः शिवाः ॥११॥

109

हारय प्रापय । रशनां कांचीं सा मदनुगामिनी स
खी तव भार्याया इतिशेषः ॥७॥ तुभ्यं भार्यायै च गच्छती सुमभावश्चार्षः ॥८॥ त्वयि तद्गृहे प्रतिष्ठापयितुं
दानपूर्वकं प्रापयितुं ॥९॥ शत्रुंजयो नाम तथा प्रसिद्धं यं गजं मातुलो मम ददौ तं गजं ते ददामि । नि
ष्कसहस्रेण स्वनामांकितनिष्कसहस्रदक्षिणया ॥१०॥ ॥११॥

राजाशार्दूलः क्षत्रियश्रेष्ठः ॥३३॥ मम कां क्षितेमदभीष्टप्रयोजननिमित्तसंपादनोचितकाले आगतः ॥३४॥३५॥ इह
मत्समीपे गुरुषु दृढभक्त्योपेताः एतेन पूर्णाविधतया दानपात्रत्वं सूचितं ॥३६॥ वसिष्ठपुत्रं सुयज्ञनामानं आन
येत्यनेनामलप्रभोर्दशरथस्य वसिष्ठः पुरोहितः तत्पुत्रस्य तत्पुत्र इति न्यायेन सुयज्ञस्य विशिष्यानयन

तद्दिव्यं राजशार्दूलः सत्कृतं माल्यभूषितं ॥ रामाय दर्शयामास सौमित्रिः सर्वमायुधं ॥३३॥ तमु
वाचात्मवान् रामः प्रीत्या लक्ष्मणमागतं ॥ काले त्वमागतः सौम्य कांक्षिते मम लक्ष्मण ॥३४॥ अहं प्र
दातुमिच्छामि यदिदं मामकं धनं ॥ ब्राह्मणेभ्यस्तपस्विभ्यस्त्वया सह परंतप ॥३५॥ वसंतीह दृ
ढं भक्त्या गुरुषु द्विजसत्तमाः ॥ तेषामपि च मे भूयः सर्वेषां चोपजीविनां ॥३६॥ वसिष्ठपुत्रं तु सुय
ज्ञमार्य त्वमानयाशु प्रवरं द्विजानां ॥ अपि प्रयास्यामि वनं समस्तानभ्यर्च्य शिष्टानपरान् द्वि-
जातीन् ॥३७॥ इत्यार्षे श्रीरा॰ अयो॰ एकत्रिंशः सर्गः ॥३१॥ ततः शासनमाज्ञाय भ्रातुः प्रिय
करं हितं ॥ गत्वा स प्रविवेशाशु सुयज्ञस्य निवेशनं ॥१॥ तं विप्रमग्न्यगारस्थं वंदित्वा लक्ष्म
णोऽब्रवीत् ॥ सखेऽभ्यागच्छ पश्य त्वं वेश्म दुष्करकारिणः ॥२॥ ततः संध्यामुपास्थाय गत्वा सौमित्रि-
णा सह ॥ ऋद्धं स प्राविशल्लक्ष्म्या रम्यं रामनिवेशनम् ॥३॥

नियोगः अस्यैव गृहे आयुधस्थापन
मिति बोध्यं ॥३७॥ इति श्रीअयोध्याकांडे एकत्रिंशः सर्गः ॥३१॥ तत इति ॥१॥ अग्न्यगारं अग्निहोत्रशालाहे
सखे रामस्य वेश्म आगच्छ दुष्करकारिणो रामस्य पापराज्यत्यागपूर्ववनं जिगमिषोः कृत्यं च पश्येति शे

अन्यत्र व्रतोपवासादि अलसाः भिक्षादौ ॥ स्वादुकामाः सदन्नकामाः तेषां दानयोग्यत्वायाह॰ महतामिति॰ तथाहि स्वा
ध्यायइतिश्रुतेर्नित्यतपस्वित्वेन महतां संमताः ॥१९॥ यानानि उक्षाः शालीन्वहन्तीति तादृशान् बलीवर्दानां स
हस्रं॰ भद्रकान् तदाख्यान्॰ धान्यविशेषांश्चणकामुद्गादिरूपान्॰ व्यंजनार्हान् दापयः ॥२०॥ व्यंजनार्थं दधि

नित्यस्वाध्यायशीलत्वान्नान्यत्कुर्वंति किंचन ॥ अलसाः स्वादुकामाश्च महतां चापि संमताः ॥१९॥
तेषामशीतियानानि रत्नपूर्णानि दापय ॥ शालिवाहसहस्रं च द्वे शते भद्रकांस्तथा ॥२०॥ व्यंज
नार्थं च सौमित्रे गोसहस्रमुपाकुरु ॥ मेखलीनां महासंघः कौसल्यां समुपस्थितः ॥२१॥ तेषां स
हस्रं सौमित्रे प्रत्येकं संप्रदापय ॥ अंबा यथा नो नंदेच्च कौसल्या मम दक्षिणां ॥२२॥ तथा द्विजाती
स्तान्सर्वान् लक्ष्मणार्चय सर्वशः ॥ ततः पुरुषशार्दूलस्तद्धनं लक्ष्मणः स्वयं ॥२३॥ यथोक्तं ब्राह्म
णेंद्राणामददाद्धनदो यथा ॥ अथाब्रवीद्बाष्पगलांस्तिष्ठतश्चोपजीविनः ॥२४॥ संप्रदाय बहु
द्रव्यमेकैकस्योपजीवनं ॥ लक्ष्मणस्य च यद्वेश्म गृहं च यदिदं मम ॥२५॥

घृतार्थं उपाकुरु देहि॰ मे॰
खलीनां ब्रह्मचारिणां दीर्घ आर्षः समुपस्थितः ॥ निवाहार्थमिति शेषः ॥२१॥ सहस्रं गवां निष्काणां॰ वा नो
स्माकं वा कौसल्या यथा मम दक्षिणां मया तदाश्रितब्रह्मचारिवर्गस्य दापितां नंदेत्तथा तानर्चयेत्य
न्वयः ॥२२॥२३॥ बाष्पगलान् ॥ बाष्पगद्गदान् ॥२४॥ उपजीवनं जीवनसाधनं ॥२५॥

ब्रह्मात्रिदशेश्वरमिव नियोक्तृनियोज्ययोः परपरप्रभुत्वेदृष्टांतः॥१२॥कौशिको विश्वामित्रः आहुयार्चयअनं
तरंरत्नैस्तर्पय॥१३॥१४॥तैत्तिरीयाणांतित्तिरिशाखाध्येतॄणामाचार्यः योद्विजः कौशल्यामाशीर्भिः पर्युपति
ष्ठतिसेवते॥ अभिरूपः श्लाघ्यगुणः॥१५॥यावत्यावताधनेनतुष्यतितावदापय॥ कौशेयानिकृमिको

अथभ्रातरमव्यग्रंप्रियंरामः प्रियंवदं॥सौमित्रिंतमुवाचेदंब्रह्मेव त्रिदिशेश्वरं॥१२॥अगस्त्यंकौ
शिकंचैवताबुभौब्राह्मणोत्तमौ॥अर्चयाहूयसौमित्रेरत्नैः सस्यमिवांबुभिः॥१३॥तर्पयस्वमहा
बाहोगोसहस्रेणराघव॥सुवर्णरजतैश्चैवमणिभिश्चमहाधनैः॥१४॥कौसल्यांचयआशीर्भि
र्भक्तः पर्युपतिष्ठति॥आचार्यस्तैत्तिरीयाणामभिरूपश्चवेदवित्॥१५॥तस्ययानंचदासीश्च
सौमित्रेसंप्रदापय॥कौशेयानिचवस्त्राणियावत्तुष्यतिसद्विजः॥१६॥सूतश्चित्ररथश्चार्यः
सचिवः सुचिरोषितः॥तोषयैनंमहार्हैश्चरत्नैर्वस्त्रैर्धनैस्तथा॥१७॥पशुकाभिश्चसर्वाभिर्गवां
दशशतेनच॥येचमेकठकालापाबहवोदंडमाणवाः॥१८॥ राम

शेयानि॥१६॥चित्ररथनामासुमंत्रादन्यसूतः॥सुचिरोषितः चिरकालवृद्धः॥१७॥पशुकाअजाद्या
दयोयज्ञपशवः॥महिष्यादयश्चकठकालापाकठकालापसं॥ वंधिशाखाध्यायिनः॥दंडमाण
वादंडप्रधानामानवाउपकुर्वाणाब्रह्मचारिणः॥१८॥

रामा·अ·
१११

यत्ररामनिवेशनंयस्मिन् पथ्याश्रितेरामनिवेशनंप्राप्यतेतंपंथानमास्थायप्रातिष्ठतदीप्सा·वृद्धमव
र्वस्वेन॥३३॥३४॥प्रत्यवेक्षस्वमांमयिकृपांकुर्वितिअर्थः॥३५॥परिहाससमन्वितं·क्रीडाप्रयोजन
व्यवहारविशेषसमन्वितं·अस्त्येकमितिपाठे·तावदेवशिष्टमस्तीत्यर्थः॥३६॥अथैकमितिपा

सप्रातिष्ठतपंथानंयत्ररामनिवेशनं॥भग्वंगिरःसमंदीप्त्यात्रिजटंजनसंसदि॥३३॥
आपंचमायाःकक्ष्यायानचकश्चिदवारयत्॥सराममासाद्यतदात्रिजटोवाक्यमब्रवीत्॥३४॥
निर्धनोबहुपुत्रोस्मिराजपुत्रमहायशः॥क्षतवृत्तिर्वनेनित्यंप्रत्यवेक्षस्वमामिति॥३५॥
तमुवाचततोरामःपरिहाससमन्वितं॥गवांसहस्रमप्येकंनचविश्राणितंमया॥३६॥
परिक्षिपसिदंडेनयावत्तावदवाप्स्यसे॥सशाटीपरितःकट्यांसंभ्रांतःपरिवेष्टितां॥३७॥

१११

ठेगवामसंख्यातानांमध्येएकमपिसहस्रंमयानविश्राणितंदत्तमतोत्रैवस्थित्वादंडेनयावत्·ग
वाकीर्णंयावंतंदेशंपरिक्षिपसिपरिगृह्णासितावत्तावद्देशस्थागाअवाप्स्यसे·ब्राह्मणस्यगो
ग्रहणेचापलकौतुकार्थमेतद्भगवद्वचनं·संभ्रांतःत्वरितः॥३७॥ राम

राम
१११

ए कैकं प्रत्येकं यावन्ममागमनमस्मत्संकार्यं पर्यायेणैकशः स्थित्वा पूर्ववद्दातणीयमित्यर्थः ॥२६॥२७॥२८
कृपणेभ्यः दीनेभ्यः तत्र गार्ग्यः गर्गगोत्रः ॥२७॥ क्षतेन खननेन वृत्तिर्जीविका यस्य। क्षीणवृत्तिरिति वा
उञ्छवृत्तिरिति पाठांतरं ॥ फालं हलावयवविशेषः ॥ तत्सदृशं मन्त्रखननार्थं लोहमयमत्र विवक्षितं

अस्मत्संकार्यमेकैकं यावदागमनं मम ॥ इत्युक्त्वा दुःखितं सर्वं जनं तमुपजीविनं ॥२६॥ उवा
चेदं धनाध्यक्षं धनमानीयतां मम ॥ गतोऽस्य धनमाजह्रुः सर्वशो वोपजीविनः ॥२७॥ स रा शिशु
महांस्तत्र दर्शनीयोऽत्यदृश्यत ॥ ततः स पुरुषव्याघ्रस्तद्धनं सहल क्ष्मणः ॥२८॥ द्विजेभ्यो बालवृ
द्धेभ्यः कृपणेभ्योऽत्यदापयत् ॥ तत्रासीत्पिंगलो गार्ग्यस्त्रिजटो नाम वै द्विजः ॥२९॥ क्षतवृत्तिर्वने
नित्यं फालकुद्दाललांगली ॥ तं वृद्धं तरुणी भार्या बालानादाय दारकान् ॥३०॥ अब्रवीद्ब्राह्म
णं वाक्यं स्त्रीणां भर्ता हि देवता ॥ अपास्य फालं कुद्दालं कुरुष्व वचनं मम ॥३१॥ रामं दर्शय धर्मज्ञं यदि किंचिदवाप्स्यसे ॥ स भार्यायाः वचः श्रुत्वा शाटीमाच्छाद्य दुश्छदाम् ॥३२॥

कुद्दालकं खननसाधनं। लांगलं हलाकारो दंडः फलाऽपाकर्षणार्थः दारकाः पुत्राः ॥३०॥ स्त्रीणां भर्ता
हि देवतेति पाठे। यद्यपि देवतात्वादाज्ञानर्हस्तथापि प्रीत्या मद्वचनं कुरुष्वेत्यर्थः ॥३१॥ यदीत्यस्य।
दर्शयसि तदा सर्वथेति शेषः ॥ दुःछदां। अतिजीर्णत्वाच्छादनायोग्यां ॥३२॥

मोदितः संजातमोदः यशआदीनां उपवंहणीः विवर्धनीः महात्मनः रामस्य तदा आशिषः प्रत्यवदत् ॥४४॥
धर्मबलैर्धर्मयुक्तपराक्रमैः चिरात् यथार्हं कृतैः संमानवचोभिः ॥ सुहृज्जनी ये ॥ प्रचोदितः प्रे
रितः प्रेरितदानव्यापारः ॥४५॥ सुहृद्भृत्यजनः तद्युक्तं अर्षं ऽधंजंतमेतत् दरिद्रः सन् भिक्षाचर

ततः सभार्यस्त्रिजटो महामुनिर्गवामनीकं प्रतिगृह्य मोदितः ॥ यशोबलप्रीतिसुखोप
वृंहिणीस्तथाशिषः प्रत्यवदन्महात्मनः ॥४४॥ स चापि रामः प्रतिपूर्णपौरुषो महाध
नं धर्मबलैरुपार्जितं ॥ नियोजयामास सुहृज्जने चिराद्यथार्हसंमानवचः प्रचोदि
तः ॥४५॥ द्विजः सुहृद्भृत्यजनोथवा तदा दरिद्रभिक्षाचरणश्च यो भवेत् ॥ न तत्र कश्चि
न्न बभूव तर्पितो यथार्हसंमाननदानसंभ्रमैः ॥४६॥ इत्यार्षे श्रीरा॰ अयो॰ द्वात्रिंशः
सर्गः ॥३२॥ दत्वा तु सह वैदेह्या ब्राह्मणेभ्यो धनं बहु ॥ जग्मतुः पितरं द्रष्टुं सीतया सह रा
घवौ ॥१॥ ततो गृहीते प्रेष्याभ्यामशोभेतां तदायुधे ॥ मालादामभिरासक्ते सीतया समलं
कृते ॥२॥ ततः प्रासादहर्म्याणि विमानशिखराणि च ॥ अभिरुह्य जनः श्रीमानुदासीनो व्य

णकर्ता॰ संभ्रमः आदरः ॥४६॥ इतिश्रीरामाभिरामे श्रीरा॰ रा॰ ति॰ अयो॰ द्वात्रिंशः सर्गः ॥३२॥ दत्वेति
१॥ आयुधे इति जात्यभिप्रायेण सीतयालंकृते पूजार्थं चंदनादिभिः ॥२॥ विमानशिखराणि सप्त
भूमिकगृहाग्रभागाः प्रासादस्त्रिभूमिकः हर्म्यं राजगृहं उदासीनः अरक्षितत्वेन निरुत्सुकः

सर्वप्राणेनसर्वबलेन आविध्य भ्रामयित्वावेगतः वेगेनसदंडस्तस्यकरात्च्युतः सरय्वाःपारंतीर्त्वाऽतिक्रम्योक्ष्णांसन्निधौउ
क्ष्णांवृषभाणांसन्निधिर्यत्र आर्षआनडुत्तादृशेगोव्रजेपपात आतस्मात्तच्छरय्वास्तटात्परपारस्थंशरय्वाःसमभिव्याप्
या गावस्थितास्ताआनयामास त्रिजटाश्रमंप्रतिनाययामासचेतिशेषः ३८।३९।४०॥ अयंदंडपरिक्षेपवचनरू
पःपरिहासस्त्वयेत्यर्थः॥४१॥ इदंहीति इदंदूरपरिक्षेपजनकंतेजःशक्तिःस्तववंवस्यापियत्तदेवजिज्ञासितुं

आविध्यदंडंचिक्षेपसर्वप्राणेनवेगतः॥सतीर्त्वासरय्वाःपारंदंडस्तस्यकरोद्यतः॥३८॥गोव्रजेबहुसा
हस्रेपपातोक्ष्णांचसन्निधौ॥तंपरिष्वज्यधर्मात्मा आव्याप्यसरयूतटात्॥३९॥आनयामासतागाव
स्त्रिजटस्याश्रमंप्रति उवाचचतदारामस्तंगार्ग्यमभिसांत्वयन्॥४०॥मन्युर्नखलुकर्तव्यः परिहा
सोह्ययंमम॥४१॥इदंहितेजस्तववयदुरत्ययंतदेवजिज्ञासितुमिच्छतामया॥इमंभवानर्थम
भिप्रचोदितोवृणीष्वकिंचेदपरंव्यवस्यसि॥४२॥ब्रवीमिसत्येननतेस्तिसंयंत्रणाधनंहियद्य
न्ममविप्रकारणात्॥भवत्सुसम्यक्प्रतिपादनेनमयार्जितंचैवयशस्करंभवेत्॥४३॥

ज्ञातुंस्वार्थेसन् आर्षः इच्छताइममर्थंदंडप्रक्षेपरूपमर्थंभवान्प्रचोदितोसि अपरंगोभ्योन्यदपिकिंचिद्व
स्तुमत्तोपिवस्तुंवरीतुंव्यवस्यसिचेत्तदपिवृणीष्व४२॥ इदमुपचारमात्रमितिनमंतव्यमित्याह ब्रवीमीति
यंत्रणासंकोचः हियतःममयद्धनंतद्विप्रकारणात् विप्रप्रयोजनसंपादनार्थं कथंतथात्वमतआह भवत्सु
विप्रेषुसम्यग्यथाशास्त्रंप्रतिपादनेनदानेनतत्फलरूपेणहेतुनादानरूपफलार्थंमयार्जितंधनंमेयशस्करे

आनृशंस्यमहिंसा। अनुक्रोशो दया। श्रुतं अनुष्ठानपर्यवसायिशास्त्राध्ययनं शीलं सत्स्वभावः दमो बाह्येंद्रियनि
ग्रहः॥ शमश्चित्तनिग्रहः॥१२॥ तस्मात्तस्य षड्गुणवत्त्वात्॥ उपघातः पीडनं पाठांतरे पि स एवार्थः॥१३॥ जगत्पा
लकत्वादपि तस्योपघातेन जगत्पीडितमित्याह। पीडयेति। पुष्पफलोपगः पुष्पफलसहितः॥ मूलस्येवेत्यने
न सर्वजगदधिष्ठानत्वमस्य सूचितं॥१४॥ मनुष्याणामित्युपलक्षणं। प्राणिमात्रस्य वस्तुमात्रस्य च धर्म

आनृशंस्यमनुक्रोशः श्रुतं शीलं दमः शमः॥ राघवं शोभयंत्येते षड्गुणाः पुरुषर्षभं॥१२॥ तस्मात्तस्यो
पघातेन प्रजाः परमपीडिताः॥ औदकानीव सत्त्वानि ग्रीष्मे सलिलसंक्षयात्॥१३॥ पीडया पीडि
तं सर्वं जगदस्य जगत्पतेः॥ मूलस्येवोपघातेन वृक्षः पुष्पफलोपगः॥१४॥ मूलं ह्येष मनुष्याणां
धर्मसारो महाद्युतिः॥ पुष्पं फलं च पत्रं च शाखाश्चास्येतरे जनाः॥१५॥ ते लक्ष्मण इव क्षिप्रं
सपत्न्यः सहबांधवाः॥ गच्छंतमनुगच्छामो येन गच्छति राघवः॥१६॥ उद्यानानि परित्यज्य क्षे
त्राणि च गृहाणि च॥ एकदुःखसुखा राममनुगच्छाम धार्मिकं॥१७॥ समुद्धृतनिधानानि प
रिध्वस्ताजिराणि च॥ उपात्तधनधान्यानि हृतसाराणि सर्वशः॥१८॥

223

एवांतःसारो यस्य सः॥१५॥
सपत्नः पत्नीसहिताः ते राम उपघातमसहंतो वयं॥ येन मार्गेण॥१६॥ एकदुःखसुखाः समानदुःखसुखाः॥१७॥
समुद्धृतनिधानत्वादिधर्मकाणि गृहाणि कैकेयी प्रतिपद्यतामित्यन्वयः निधानानि निक्षेपाः अजिरमं
गणं। परिध्वस्तं मार्जनादिरहितं येषु। धनं गवादि अनिक्षिप्तं भूषणादि च उपात्तं गृहीतं येभ्यः ऽतएव हृतसारा
णि॥१८

यतोबहुजनाकुलत्वात् रथ्यागंतुं नसुखेनशक्यंतेतस्मात्प्रासादमारुह्यप्रासादात् । तत्रप्रासादेसंस्थाय ४ दीन
त्वेहेतुमाह पदातिमिति । ५ । ६ । रसज्ञः सुखज्ञः कामानांभोगप्रवक्ताणां । वचनंपित्र्यवचनं ७ भृतैः प्राणिभिः

नहिरथ्याः सुशक्यंतेगंतुं बहुजनाकुलाः । आरुह्यतस्मात्प्रासादादीनाः पश्यंतिराघवं ४ पदातिं
सानुजं दृष्ट्वा ससीतंच जनास्तदा । ऊचुर्बहुविधावाचः शोकोपहतचेतसः ५ यंयांतमनु
यातिस्मचतुरंगबलंमहत् । तमेकं सीतयासार्धमनुयातिस्मलक्ष्मणः ६ ऐश्वर्यस्परस
ज्ञः सन्कामानांचाकरो महान् । नेच्छत्येवानृतं कर्तुं वचनंधर्मगौरवात् ७ यानशक्यापु
रा द्रष्टुं भूतैराकाशगैरपि । तामद्यसीतांपश्यंतिराजमार्गगताजनाः ८ अंगरागोचितां
सीतांरक्तचंदनसेविनीं । वर्षमुष्णंचशीतंचनेष्यत्याशुविवर्णतां ९ अद्यनूनंदशरथः
सत्वमाविश्यभाषते । नहिराजाप्रियं पुत्रं विवासयितुमर्हति १० निर्गुणस्यापिपुत्रस्य
कथंस्याद्धि विवासनं । किंपुनर्यस्यलोकोयंजितोवृत्तेनकेवलं ११ राम

वनप्रयाणानुमत्पर्यंराजसन्निधौगमनसमये ९ । १० । सत्वंपिशाचं । राजस्वस्वभावेवर्तमानः हि यतः
नपुत्रंविवासयितुंमर्हसि १० नदेवाह निर्गुणस्यापीति । वृत्तेनचरित्रेण । तस्मात्पिशाचग्रएवेति
भावः ११

मार्तं खिन्नं अभिजनं देशं तत्रस्थ जनानिति यावत् प्रतीक्षमाणः पश्यन्नपि निदेशमाज्ञा॥२९॥ तत्पूर्वं स्वस्वीकारार्थागमनकालः पूर्वो यस्यार्तरूपत्ववतस्तादृशतदारभ्यार्तरूपमिति यावत् सुमंत्रं प्रेक्ष्य प्रतिहारणार्थं स्वागमननिवेदनार्थं व्यतिष्ठत द्वार्येवेति शेषः॥३०॥ तदेव सुमंत्रमाह पितुरिति॥३१॥ इति श्रीरा॰ अयो॰ त्रयस्त्रिंश॰

प्रतीक्षमाणोभिजनं तदार्त्तमनार्तरूपः प्रहसन्निवाथ॥ जगाम रामः पितरं दिदृक्षुः पितुर्निदेशं विधिवच्चिकीर्षुः॥२९॥ तत्पूर्वमैक्ष्वाकसुतो महात्मा रामो गमिष्यन्नृपमार्त्तरूपं॥ व्यतिष्ठत प्रेक्ष्य तदा सुमंत्रं पितुर्महात्मा प्रतिहारणार्थं॥३०॥ पितुर्निदेशेन तु धर्मवत्सलो वनप्रवेशे कृतबुद्धिनिश्चयः॥ स राघवः प्रेक्ष्य सुमंत्रमब्रवीन्निवेदयस्वागमनं नृपाय मे॥३१॥ इत्यार्षे श्रीरामा॰ अयो॰ त्रयस्त्रिंशः सर्गः॥३३॥ ततः कमलपत्राक्षः श्यामो निरुदरो महान्॥ उवाच रामस्तं सूतं पितुराख्याहि मामिति॥१॥ स रामप्रेषितः क्षिप्रं संतापकलुषेंद्रियं॥ प्रविश्य नृपतिं सूतो निश्वसंतं ददर्श ह॥२॥ उपरक्तमिवादित्यं भस्मच्छन्नमिवानलं॥ तटाकमिव निस्तोयं मपश्यज्जगतीपतिं॥३॥ आबोध्य च महाप्राज्ञः परमाकुलचेतनं॥ राममेवानुशोचंतं सूतः प्रांजलिरब्रवीत्॥४॥

सर्गः॥३३॥ निरुदर इति पाठे तनुमध्य इत्यर्थः श्यामः श्यामवर्णस्तरुणश्च॥ अत्र कवेरपि करुणरसमग्नत्वेन वर्णितस्यैव पुनः पुनः कथनमदोषाय॥१॥२॥ उपरक्तं राहुग्रस्तं पुनरपश्यदिति वाल्मीकेः प्रयोगो वर्णनीयमयीभावेन तस्यापि शोकग्रस्तत्वात्॥३॥ आबोध्य महाराजेति संबोध्य राममेवउद्दिश्य शोचंत॥४॥

रुद्धिलैः उद्भिन्नबिलैः ॥१९॥ अपेतोदकत्वादिनामनुष्यरहितं सूच्यते ॥२०॥ दुष्कालो राजिकदेविकदोषकालः ॥२१॥
यनवनेन हेतुना ॥२२॥ दंष्ट्रिणः सर्पाः मृगपक्षिणो गिरिस्थाः ॥२३॥ अस्मत्त्यक्तं पुरमिति शेषः सेव्यमानं अस्माभिः से

रजसाभ्यवकीर्णानि परित्यक्तानि दैवतैः ॥ मूषकैः परिधावद्भिरुद्बिलैरावृतानि च ॥१९॥ अपेतोद
कधूमानि हीनसंमार्जनानि च ॥ प्रनष्टबलिकर्मेज्यामंत्रहोमजपानि च ॥२०॥ दुष्कालेनेव भग्नानि
भिन्नभाजनवंति च ॥ अस्मत्त्यक्तानि वेश्मानि कैकेयी प्रतिपद्यतां ॥२१॥ वनं नगरमेवास्तु येन ग
च्छति राघवः ॥ अस्माभिश्च परित्यक्तं पुरं संपद्यतां वनं ॥२२॥ बिलानि दंष्ट्रिणः सर्वे सानूनि मृग
पक्षिणः ॥ त्यजंत्वस्मद्भयाद्भीता गजाः सिंहा वनान्यपि ॥२३॥ अस्मत्त्यक्तं प्रपद्यंतु सेव्यमानं त्य
जंतु च ॥ तृणमांसफलादानं देशं व्यालमृगद्विजं ॥२४॥ प्रपद्यतां हि कैकेयी सपुत्रा सह बां
धवैः ॥ राघवेण वयं सर्वे वने वत्स्याम निर्वृताः ॥२५॥ इत्येवं विविधा वाचो नानाजनसमीरिताः ॥
शुश्राव राघवः श्रुत्वा न विचक्रेऽस्य मानसं ॥२६॥ स तु वेश्म पुनर्मातुः कैलासशिखरप्रभं ॥
अभिचक्राम धर्मात्मा मत्तमातंगविक्रमः ॥२७॥ विनीतवीरपुरुषं प्रविश्य तु नृपालयं ॥ ददर्शाव
स्थितं दीनं सुमंत्रमविदूरतः ॥२८॥

व्यमानं वनमित्यर्थः कर्तारोऽत्र पूर्वोक्ता दंष्ट्रादयः तृणमांसफला
नामादानं यस्मात् तं व्यालमृगद्विजं तद्वंतं आर्षआद्यच्(?) तादृशं देशमिमं कैकेयी प्रपद्यतामित्यन्वयः ॥२४॥
॥२५॥ न विचक्रे न विकारं प्राप्तं ॥२६॥ पुनः तद्वार्ताश्रवणानंतरमपि मातुः कैकेय्याः ॥२७॥ ॥२८॥

अर्धसप्तशताएकदेशिसमासः सप्तशतस्यार्धसंख्या यासांता इत्यर्थः ॥ अर्शआद्यजंतः अतएवाग्रेवक्ष्यति त्रयःशत
शतार्धाहीति ताम्रलोचनाः रामप्रयाणश्रवणजदुःखजातरोदनेनेतिशेषः कौशल्यांपरिवार्येत्यनेनप्रा
कूलक्ष्मणोक्तंतस्याः सर्वमभीत्वंध्वनितं ॥१३॥ समवेक्ष्यदारानिति शेषः ॥१४॥१५॥ आरादादरतः उत्पपात

अर्धसप्तशतास्तत्र प्रमदास्ताम्रलोचनाः । कौशल्यां परिवार्याथ शनैर्जग्मुर्धृतव्रताः ॥१३॥ आग
तेषु च दारेषु समवेक्ष्य महीपतिः ॥ उवाच राजा तं सूतं सुमंत्रानय मे सुतं ॥१४॥ स सूतो राममा
दाय लक्ष्मणं मैथिलीं तथा ॥ जगामाभिमुखस्तूर्णं संकाशं जगतीपतेः ॥१५॥ स राजा पुत्रमायांतं
दृष्ट्वा चारात्कृतांजलिं ॥ उत्पपातासनात्तूर्णमार्त्तः स्त्रीजनसंवृतः ॥१६॥ सोऽभिदुद्राव वेगेन रा
मं दृष्ट्वा विशांपतिः ॥ तमसंप्राप्य दुःखार्तः पपात भुवि मूर्छितः ॥१७॥ तं रामोऽभ्यपतत्क्षिप्रं
लक्ष्मणश्च महारथः ॥ विसंज्ञमिव दुःखेन सशोकं नृपतिं तथा ॥१८॥ स्त्रीसहस्रनिनादश्च सं
जज्ञे राजवेश्मनि ॥ हाहा रामेति सहसाभूषणध्वनिमिश्रितः ॥१९॥ तं परिष्वज्य बाहुभ्यां ता
वुभौ रामलक्ष्मणौ ॥ पर्यंके सीतया सार्धं रुदंतः समवेशयन् ॥२०॥

आलिंगनार्थी ॥१६॥ तं आलि
लिंगिषितं रामं अप्राप्य मध्ये एव दुःखितः पपात ॥१७॥ अभ्यपतत् अभ्यागतवान् विसंज्ञमिव विसंज्ञमेव ॥१८॥
भूषणध्वनिमिश्रितः उरःशिरस्ताडनादिना चंचलतरभ्रश्यत्भूषणध्वनिमिलितः मूर्छितइतिपाठेपि
स एवार्थः व्याप्त इत्यर्थो वा ॥१९॥ तौ सीतायासार्धं तं राजानं बाहुभ्यां परिष्वज्य पयया पीडा न भवति तथा लिंगि

वर्धयित्वा संपूज्य भयविक्लवया रामो वनप्रयाणोद्युक्त इतीदं परमनिष्टं कथं राज्ञे वदिष्यामीति भयेन विक्लवया कातरया अभ्यज्ञापयेति च्छेदः ॥५॥ उपजीविनां च तेभ्यः स्ववदत्वा सर्वधनं दत्त्वेत्यनेन संबंधः यातिष्ठाः साभावो ध्वन्यते ॥६॥७॥८॥ सदशरथः निष्पंकः निष्पापः निष्पंद इति पाठे निश्चल इत्यर्थः ॥९॥ इहमद्देश मनियेके चिन्मामकादाराः

तेवर्धयित्वा राजानं पूर्वं स्तोजयाशिषा ॥ भयविक्लवया वाचा मंदयाश्लक्ष्णयाब्रवीत् ॥५॥ अयं स पुरुषव्याघ्रो द्वारि तिष्ठति ते सुतः ॥ ब्राह्मणेभ्यो धनं दत्त्वा सर्वं चैवोपजीविनां ॥६॥ स त्वां पश्यतु भद्रं ते रामः सत्यपराक्रमः ॥ सर्वान्सुहृद आपृच्छ्य त्वां हीदानीं दिदृक्षते ॥७॥ गमिष्यति महारण्यं तं पश्य जगतीपते ॥ वृत्तं राजगुणैः सर्वैरादित्यमिव रश्मिभिः ॥८॥ स सत्यवाक्यो धर्मात्मा गांभीर्यात्सागरोपमः ॥ आकाश इव निष्पंको नरेंद्रः प्रत्युवाच तं ॥९॥ सुमंत्रानय मे दारान्ये केचिदिह मामकाः ॥ दारैः परिवृतः सर्वैर्द्रष्टुमिच्छामि राघवं ॥१०॥ सोंतःपुरमतीत्यैव स्त्रियस्ता वाक्यमब्रवीत् ॥ आर्यो ह्वयति वो राजा गम्यतां तत्र माचिरं ॥११॥ एवमुक्ताः स्त्रियः सर्वाः सुमंत्रेण नृपाज्ञया ॥ प्रचक्रमुस्तद्भवनं भर्तुराज्ञाय शासनं ॥१२॥

स्त्रियः संति तान्दारान् इह हानय ॥१०॥ अतीत्य अतिवेगेन प्राप्य ह्वयति आह्वयति वो युष्माकं राजा आर्यो धवत्वात् ॥ न तु प्रजानां तासां दुःखदत्वात् आगम्यतामिति पदं ॥११॥ प्रचक्रमुः गच्छंति स्म तद्भवनं तस्य राज्ञो भवनं ॥१२॥

भवान्वर्षसहस्रायपतिर्भवतु अतःपरमप्यनेककालंराजाभवेत्यर्थः त्वयायोवरोदत्तः तं अन्नतंकर्तुं अहंनयोग्यस्तव
नरकपातःप्रसंगादतोहमरण्येवत्स्यामिमेराज्यस्यकांक्षिताऽऽकाङ्क्षा न ॥२८॥ प्रतिज्ञांतेप्रतिज्ञासमाप्तौतेपादौ
ग्रहीष्यामीत्यन्वयः ॥२९॥ कैकेय्याअद्यैवगमनमनुमन्यस्वेतिमिथोरहसिचोद्यमानः ॥३०॥ श्रेयसेपरलोकहिता
य॰ वृद्धयेइहलोकेभ्युदयाय॰ अरिष्टंपापदुःखभिन्नंपुण्यंसुखंचतेऽस्तु॰ ॥ अव्यग्रःसन् अकुतोभयंपंथानं

भवान्वर्षसहस्रायुःपृथिव्यानृपतेपतिः ॥ अहंत्वरण्येवत्स्यामिनमेराज्यस्यकांक्षिता ॥२८॥ नवपंच
चवर्षाणिवनवासेविहृत्यते ॥ पुनः पादौग्रहीष्यामिप्रतिज्ञांतेनराधिप ॥२९॥ रुदन्नार्तःप्रियंपुत्रंस
त्यपाशेनसंयुतः ॥ कैकेय्याचोद्यमानस्तु मिथोराजातमब्रवीत् ॥३०॥ श्रेयसेवृद्धयेतात पुनरागम
नायच ॥ गच्छस्वारिष्टमव्यग्रः पंथानमकुतोभयं ॥३१॥ नहिसत्यात्मनस्तातधर्माभिमनसस्तव
संनिवर्तयितुंबुद्धिःशक्यतेरघुनंदन ॥३२॥ अद्यत्विदानींरजनींपुत्रमागच्छसर्वथा एका
हंदर्शनेनापिसाधुतावच्चराम्यहं ॥३३॥

गच्छस्वेत्यार्षं ॥३१॥ सत्यात्मनःसत्यप्रतिष्ठितस्वभावस्य
धर्माभिमनसःधर्मसंपादनाभिविष्टमनसः ॥३२॥ प्रातरेवकैकेय्याप्रस्थितस्यमात्राद्यनुनयदानादिना
आचतुर्थप्रहरंव्याप्तस्यतुर्ययामेराजानुमत्यर्थमागतस्यराज्ञातत्कालसमीपमेवप्रवत्स्यमानर
जनीसहवासःप्रार्थ्यते॰ अद्येत्यादि॰ इदानीमिति॰ समीपलक्षकंरजनीमावससर्वथामागच्छकिं
मर्थंतत्राह॰ ॥ चरामित्वयासहयोत्स्यामि ॥३३॥

मुहूर्त्तस्यसंबंधसामान्येषष्ठीमुहूर्त्तेनलब्धसंज्ञमित्यर्थः॥२१॥ कुशलेनमांपश्यसौम्येनचक्षुषामामनुगृहाणेत्यर्थः॥२२॥वनं प्रतिप्रस्थितंमांसीताचान्वेतुगच्छत्विति लक्ष्मणंचप्रस्थितमनुजानीहीत्यर्थः॥ननुलक्ष्मणसीतयोः कुतोवनवासक ष्टप्राप्तिर्नत्वसौवरनिर्बंधस्तयोरतआह कारणैरिति हेतुभिःतथ्यैःव्यवहारदशायासत्यैःनचेच्छतः इहस्था

अथरामोमुहूर्त्तस्यलब्धसंज्ञंमहीपतिं॥उवाचप्रांजलिर्बाष्पशोकार्णवपरिप्लुतं॥२१॥आपृच्छेत्वांमहारा जसर्वेषामीश्वरोसिनः॥प्रस्थितंदंडकारण्यंपश्यत्वंकुशलेनमां॥२२॥लक्ष्मणंचानुजानीहि सीतांचा॥ न्वेतुमांवनं॥कारणैर्बहुभिस्तथ्यैर्वार्यमाणौनचेच्छतः॥२३॥अनुजानीहिसर्वान्नःशोकमुत्सृज्यमान द॥लक्ष्मणंमांचसीतांचप्रजापतिरिवात्मजान्॥२४॥प्रतीक्षमाणमव्यग्रमनुज्ञांजगतीपतेः॥उवाचराजा संप्रेक्ष्यवनवासायराघवं॥२५॥अहंराघवकैकेय्यावरदानेनमोहितः॥अयोध्यायांत्वमेवाद्यभवराजा निगृह्यमां॥२६॥एवमुक्तोनृपतिनारामोधर्मभृतांवरः॥प्रत्युवाचांजलिंकृत्वापितरंवाक्यकोविदः॥२७॥

तुमितिशेषः॥२३॥अनुजानीहिः अनुज्ञांदेहिः प्रजापतिर्ब्रह्माः आत्मजान् सनकादीन्तपसिचरितुमुद्युक्तान् यानुज्ञांदत्तवान्तद्वदित्यर्थः॥२४॥वनवासायजगतीपतेःस्वस्यानुज्ञामनुमतिंप्रतीक्षमाणंप्रार्थयमानंअव्य ग्रंक्लेशतोपिविषादरहितंराघवंप्रेक्ष्यउवाच॥२५॥हेराघवयतोहंकैकेय्यावरदानेनमोहितोनिरुत्तरतयाशो कपरवशोजातोऽतोराज्यानर्हेअतोमांनिगृह्यबध्वाऽयोध्यायांत्वमेवस्वभुजवैभवेनराजाभवःप्रवृत्तमभिषेकं समापयेतियावत्॥२६॥२७॥

रामा॰ अ॰
११७

तर्पितः सर्वकामैरित्यस्योत्तरमाह प्राप्स्यामीति गुणान् मिथ्यान्नादीन् अतः सर्वकामैः सर्वकामप्रतिनिधित्वेना
पक्रमणं इतो गमनमेव वरणे इत्यर्थः यद्वाऽद्यप्रयाणे सतीमान् गुणान् प्रतिज्ञापालनजधर्मरूपान् प्राप्स्या
मिश्चोगमनेकस्तान् दास्यति प्रत्फलाधर्मएव अतः सर्वकामैरित्यादि प्राग्वदेव ॥ ४० ॥ ४१ ॥ अद्यवनवासकृ

प्राप्स्यामि यानद्य गुणान् को मेश्वस्तान् प्रदास्यति ॥ अपक्रमणमेवातः सर्वकामैरहं वृणे ॥ ४० ॥
इयं सराष्ट्रा सजना धनधान्यसमाकुला ॥ मया विसृष्टा वसुधा भरताय प्रदीयतां ॥ ४१ ॥ वनवा
सकृता बुद्धिर्न च मेद्य चलिष्यति ॥ यस्तुष्टु दे वरो दत्तः कैकेय्यै वरद त्वया ॥ ४२ ॥ दीयतां निखि
लेनैव सत्यस्त्वं भव पार्थिव ॥ अहं निदेशं भवतो यथोक्तमनुपालयन् ॥ ४३ ॥ चतुर्दश समा
वत्स्ये वने वनचरैः सह ॥ मा विमर्शो वसुमती भरताय प्रदीयतां ॥ ४४ ॥ न हि मे कांक्षितं राज्यं
सुखमात्मनि वा प्रियं ॥ यथा निदेशं कर्तुं वै तवैव रघुनंदन ॥ ४५ ॥ अपगच्छतु ते दुःखं मा भू
र्बाष्पपरिप्लुतः ॥ न हि क्षुभ्यति दुर्धर्षः समुद्रः सरितां पतिः ॥ ४६ ॥

तात दर्या बुद्धिर्न चलिष्य
ति अतो गमनानुज्ञामेव कुर्वित्याशयः अतिदानश्चूरस्य भवतोनुचितमप्येतदित्याह यद्धितिः निः
खिलेन अद्यैवमत्प्रस्थापनात् निदेशं शासनं ॥ ४२ ॥ ४३ ॥ वनचरैस्तपस्विभिः मा विमर्शः भरताय रा
ज्यप्रदाने मास्तु संदेहो सर्वथा तस्मै वसुमती दीयतां ॥ ४४ ॥ कथमेवमत आह न हीति आत्मनि स्वम
नसि सुखं स्त्रीयानां प्रियं वो द्दिश्य राज्यं न कांक्षितं अपि तु तव निदेशं यथावत्कर्तुमेव कांक्षितं इकामि

राम
११७

साधयिष्यसिगमिष्यसि॥३४॥मत्प्रियार्थंममपरलोकहितार्थं॥३५॥तदेवदर्शयति।नचेत्यादि।छन्नयागूढाभिप्राय
या।चलितोस्मिभ्रंशितोस्मि।त्वदभिषेकमनोरथात्।भस्माग्निकल्पयाभस्मछन्नाग्नितुल्यया॥३६॥वंचनासामान्ये
नप्रतिश्रुतवरयोर्भरताभिषेकत्वद्विवासनरूपविशेषपर्यवसायित्वरूपायामेमयालब्धा।यतोनयावृत्तसा

मातरंमांचसंपश्यन्वसेमामद्यशर्वरीं॥तर्पितःसर्वकामैस्त्वंश्वःकाल्येसाधयिष्यसि॥३४॥दुष्करंक्रि
यतेपुत्रसर्वथाराघवप्रिय॥त्वयाहिमत्प्रियार्थंतुवनमेवमुपाश्रितं॥३५॥नचैतन्मेप्रियंपुत्रशपेस
त्येनराघव॥छन्नयाचलितस्त्वस्मिस्त्रियाभस्माग्निकल्पया॥३६॥वंचनायातुलब्धामेतांत्वंनिस्त
र्तुमिच्छसि॥अनयावृत्तसादिन्याकैकेय्याभिप्रचोदितः॥३७॥नचैतदाश्चर्यतमंयत्त्वंज्येष्ठःसुतोमम
अपानृतकथंपुत्रपितरंकर्तुमिच्छसि॥३८॥अथरामस्तदाश्रुत्वापितुरार्तस्यभाषितं॥लक्ष्मणेनस
हभ्रात्रादीनोवचनमब्रवीत्॥३९॥

दिन्याकुलोचितचारित्रनाशिन्या।॥अभिप्रचोदितोस्मि।॥एवमि
तिशेषः॥अतोयावंचनामयालब्धातांनिस्तर्तुमिच्छसिइतियत्॥३७॥एतदाश्चर्यतमंन।॥अपानृतकथं
अपगतानृतवचनं।॥एतच्चनाश्चर्यं।॥यतोज्येष्ठोगुणैर्वयसाचसुतोसि॥३८॥आर्तस्यपितुर्भाषितंश्रुत्वाए
काहदर्शनेनापीत्यक्तरूपं॥दीनःकैकेय्या।अद्यगच्छेतिनियोगस्यावश्यानुष्ठेयत्वप्रतिज्ञानात्।तावन्मा
त्रपितृमनोरथपरणाशनात्प्राप्तशोकइव॥३९॥

शिवासुसीमास्विति स्थिती तिशेषः मया विना तेनात्र पुरे स्थातुमशक्यत्वादिति भावः केवलमनुशास्तृ रक्षणमात्रं क
रोतु न तु राजत्वाभिमानो राज्यसुखं वा तस्येति ध्वनितं ॥ अनेन राज्ञोऽजीवनं भरतस्य नंदिग्रामवास
श्च ध्वनितः शिवा सुसीमा सुरमम्माणा इत्यापाततोर्थः ॥ त्वया यदुक्तं कैकेय्यै प्रतीतिशेषः ॥ ५६ ॥ यथा शि
ष्टसंमतेन वनिदेशे मया मनो दीयते तथा महत्सु कामेषु काम्यवस्तुषु । मनः संकल्पात्मकं मे मया न

मया विसृष्टां भरतो महीमिमां सशैलखंडां सपुरोपकाननां ॥ शिवा सुसीमास्त्वनुशास्तु के
वलं त्वया यदुक्तं नृपते तथास्तु तत् ॥ ५६ ॥ न मे तथा पार्थिव दीयते मनो महत्सु कामेषु न चा
त्मनः प्रिये ॥ यथा निदेशे तव शिष्टसंमते व्यपैतु दुःखं तव मत्कृतेनघ ॥ ५७ ॥ तदद्य नैवान
घ राज्यमव्ययं न सर्वकामान्वसुधां न मैथिलीं ॥ न चिंतितं त्वामनृतेन योजयन्वृणीय स
त्यं व्रतमस्तु नेतथा ॥ ५८ ॥ फलानि मूलानि च भक्षयन्वने गिरींश्च पश्यन्सरितः सरांसि च ॥
वनं प्रविश्यैव विचित्रपादपं सुखी भविष्यामि तवास्तु निर्वृतिः ॥ ५९ ॥

दीयते । नचभाप्यात्म-
नोंतःकरणस्य प्रियो तो मत्कृते दुःखं व्यपैतु ॥ ५७ ॥ त्वामनृतेन योजयन् राज्यादिकं चिंतितं मद्विषय
चिंतावंतं त्वामपि न वृणीय वरिष्यामि इति मे सत्यं व्रतं । तथा ते व्रतं कैकेयीवरदानसंकल्पः सत्यम
स्तु ॥ अत्र चिंतितं त्वामित्यनेन चिंतया तव मरणेपि मया न स्थेयं । मरणादपि परलोकनाशकान्
तत्वस्यातिकष्टत्वसूचितं । तेन न च मरणेन मे दुःखं नापि पापं । यथा तवानृतत्वकरणे इति सूचितं ॥ ५८ ॥ ५९ ॥

४७॥ अनृतं अनृतयुक्तं एवं सत्यं सत्ययुक्तं तव प्रत्यक्षं तव सन्निधौ॥ सत्येन सुकृतेन ते त्वया च शपे शपथं करोमीत्यर्थः॥४८॥ क्षणमपि इह पुरे इति शेषः स त्वं इमं मन्मनसंभवं शोकं धारयस्व विपर्ययः इहावस्थितिरूपं॥ प्रतिज्ञाता

नैवाहं राज्यमिच्छामि न सुखं न च मेदिनीं॥ नैव सर्वानिमान्कामान्न स्वर्गं न च जीवितं॥४७॥ त्वामहं सत्यमिच्छामि नानृतं पुरुषर्षभ॥ प्रत्यक्षं तव सत्येन सुकृतेन च ते शपे॥४८॥ न च शक्यं मया तात स्थातुं क्षणमपि प्रभो॥ सशोकं धारयस्वेमं न हि मेऽस्ति विपर्ययः॥४९॥ अर्थितो ह्यस्मि कैकेय्या वनं गच्छेति राघव॥ मया चोक्तं व्रजामीति तत्सत्यमनुपालये॥५०॥ मा चोत्कंठां कृथा देव वने रंस्यामहे वयं॥ प्रशान्तहरिणाकीर्णे नानाशकुनिनादिते॥५१॥ पिता हि दैवतं तात देवतानामपि स्मृतं॥ तस्माद्दैवतमित्येव करिष्यामि पितुर्वचः॥५२॥ चतुर्दशसु वर्षेषु गतेषु नरसत्तम॥ पुनर्द्रक्ष्यसि मां प्राप्तं संतापोऽयं विमुच्यतां॥५३॥ येन संस्तंभनीयोऽयं सर्वो बाष्पकलो जनः॥ स त्वं पुरुषशार्दूल किमर्थं विक्रियां गतः॥५४॥ पुरं च राष्ट्रं च मही च केवला मया विसृष्टा भरताय दीयतां॥ अहं निदेशं भवतोऽनुपालयन्वनं गमिष्यामि चिराय सेवितुं॥५५॥ ॥ ॥

र्थे विपरीतानुष्ठाने॥४९॥५०॥ उत्कंठां दर्शनादि विषयोत्कंठां जन्यं दुःखं॥५१॥५२॥५३॥ येन त्वया॥५४॥ केवला कृत्स्ना॥ चिराय वनं सेवितुं गमिष्यामि॥५५॥ श्रीरघुनाथाय

अतोनर्हीति हे देवि त्वतातिशयेन कर्तुमशक्यं न किंचिद्विद्यते इह संसारे अंततः सर्वांते त्वत्कृतपसाध्य फ
लविचारे इत्यर्थः पतिघ्नीमिति रामगमने राजमरणस्यावश्यकत्वादिति भावः रामस्यापि वासनात् राज्ञो
मरणाच्च कुलघ्नी॥६॥ अचलमिव दुष्प्रकंप्यं कर्मभिः क्रूरैः संतापयसि राजानमिति शेषः॥७॥ भर्तुरिच्छा

न त्वकार्यतमं किंचित्तव देवीह विद्यते॥ पतिघ्नीं त्वामहं मन्ये कुलघ्नीमपि चांततः॥६॥ यन्म
हेंद्रमिवाजय्यं दुष्प्रकंप्यमिवाचलं॥ महोदधिमिवाक्षोभ्यं संतापयसि कर्मभिः॥७॥ मावमं
स्था दशरथं भर्तारं वरदं पतिं॥ भर्तुरिच्छा हि नारीणां पुत्रकोट्या विशिष्यते॥८॥ यथावयो
हि राज्यानि प्राप्नुवंति नृपक्षये॥ इक्ष्वाकुकुलनाथेस्मिंस्तं लोपयितुमिच्छसि॥९॥ राजा भ
वतु ते पुत्रो भरतः शास्तु मेदिनीं॥ वयं तत्र गमिष्यामो यत्र रामो गमिष्यति॥१०॥ न च ते विषये
कश्चिद्ब्राह्मणो वस्तुमर्हति॥ तादृशं त्वममर्यादं मद्य कर्म करिष्यसि॥११॥ आश्चर्यमि
व पश्यामि यस्यास्ते वृत्तमीदृशं॥ आचरंत्या न विवृता सद्यो भवति मेदिनी॥१२॥

भर्तुरिच्छाविषयानुसरणं॥८॥ यथावयः वयःक्रममनतिक्रम्य नृपक्षये राजभूतपितृक्षये राज्यानि प्रा
प्नुवंति ज्येष्ठक्रमेणेति यावत् तमिमं मनादिप्रवृत्तमाचारं इक्ष्वाकुकुलनाथे दशरथे जीवत्येव त्वं लोप
यितुमिच्छसीति योजना॥९॥१०॥ विषये देशे तादृशब्राह्मणो वासानर्हः अमर्यादं अतिक्रमितज्येष्ठराज्या
दिव्यवहारं करिष्यसीत्यनेनाद्यापि रामं निवर्तयेति सूचयति॥११॥ यस्यास्ते ईदृशं घोरं वृत्तमस्ति तयात्व

तापस्त्वग्दाहोत्पादकः दुःखमंतर्व्यथोत्पादकं ॥ ६० ॥ समेता मिलिताः ॥ तां कैकेयीं ॥ हा हा इति शब्दः कृतो येन तथाभूतं सर्वं परिचारिकादिजनजातं ॥ ६१ ॥ इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके अयोध्याकांडे चतुस्त्रिंशः सर्गः ॥ ३४ ॥ एवं सपरिकरस्य राज्ञः परमशोके प्राप्ते सुमंत्रः कैकेयीं प्रत्याह ॥ तत इति ॥ शिरो निर्धूननादि

एवं स राजा व्यसनाभिपन्नस्तापेन दुःखेन च पीड्यमानः ॥ आलिंग्य पुत्रं सुविनष्टसंज्ञो मोहं गतो नैव विचेष्ट किंचित् ॥ ६० ॥ देव्यः समस्ता रुरुदुः समेतास्तां वर्जयित्वा नरदेवपत्नीं ॥ रुदन्सुमंत्रोपि जगाम मूर्छां हाहाकृतं तत्र बभूव सर्वं ॥ ६१ ॥ इत्यार्षे श्रीरामायणे अयोध्या० चतुस्त्रिंशः सर्गः ॥ ३४ ॥

ततो निर्धूय सहसा शिरो निःश्वस्य चासकृत् ॥ पाणिं पाणौ विनिष्पिष्य दंतान्कटकटाप्य च ॥ १ ॥ लोचने कोपसंरक्ते वर्णं पूर्वोचितं जहत् ॥ कोपाभिभूतः सहसा संतापमशुभं गतः ॥ २ ॥ मनः समीक्षमाणश्च सूतो दशरथस्य च ॥ कंपयन्निव कैकेय्या हृदयं वाक्शरैः शितैः ॥ ३ ॥ वाक्यवज्रैरनुपमैर्निर्भिंदन्निव चाशुभैः ॥ कैकेय्याः सर्वमर्माणि सुमंत्रः प्रत्यभाषत ॥ ४ ॥ यस्यास्तव पतिस्त्यक्तो राजा दशरथः स्वयं ॥ भर्ता सर्वस्य जगतः स्थावरस्य चरस्य च ॥ ५ ॥

कोपव्यक्तिकाराभिनयः कटकटाप्य कटकटाशब्दवतः कृत्वा ॥ १ ॥ कोपसंरक्ते कृत्वेति शेषः वर्णं मुखकांतिं ॥ पूर्वोचितं पूर्वकालस्थितं ॥ राजमंत्रित्वोचितं च ॥ २ ॥ दशरथस्य मनः समीक्षमाणः कैकेयीविषयस्नेहरहितं जानन् ॥ ३ ॥ ४ ॥ यस्या

अयो० टी० स०

रामा॰ अ॰
१२०

तस्मात्वरदानात्· सर्वभूतानांव्यक्ताव्यक्तवाचां· रुतंशब्दंतद्बोध्यमर्थंसंजज्ञेजानीतेस्म· तेनसर्वभूतरुतज्ञत्वेन:
तिर्यग्गतानांतिर्यक्स्रोतसांपशुपक्ष्यादीनांवचोविदितं॥ज्ञातार्थंभवति॥१७॥ततस्ततएवहेतोः शय
नेशयानस्यतेपितुः भूरिवर्चसःसुवर्णकान्तेर्जृम्भस्यजृम्भाख्यस्यपक्षिणोभावोभिप्रायः विरुतात्तद
यशब्दाद्विदितः अथसतेपितातत्रशयनेशयानएवतद्भावपरिज्ञानजसंतोषेणबहुधाद्वित्रिर्बहुप्र
कारेणचाहसत्॥१८॥तत्रशयनेशयानात्तेजननीमामयंहसतीतिक्रुद्धासतीमृत्युरूपंपाशमिच्छन्ती· हे

120

सर्वभूतरुतंतस्मात्संजज्ञेवसुधाधिपः॥तेनतिर्यग्गतानांचभूतानांविदितंवचः॥१७॥ततोजृम्भस्य
शयनेविरुताद्भूरिवर्चसः॥पितुस्तेविदितोभावः सतत्रबहुधाहसत्॥१८॥तत्रतेजननीक्रुद्धा
मृत्युपाशमभीप्सती॥हासंतेनृपतेसौम्यजिज्ञासामीतिचाब्रवीत्॥१९॥नृपश्चोवाचतांदेवींव
रंशंसामितेयदि॥ततोमेमरणंसद्योभविष्यतिनसंशयः॥२०॥मातातेपितरंदेवीपुनःकेकयम
ब्रवीत्॥शंसमेजीववामावानमांत्वंप्रहसिष्यसि॥२१॥

नृपतेतेहासंहासकारणंज्ञातुमिच्छामीतितेपि
तरमब्रवीत्॥ वरंतेइतिपाठेतेजननीमामयंहसतीतिबुध्वाक्रुद्धाभवत्॥ततोराजात्वद्विषयोयंनहा
सः किंतुवरबलान्मेसर्वरुतज्ञानसामर्थ्यमस्तिअतः किंचिज्जन्तुविदितंतत्· भावोहासिषमित्युक्तेतद्व
रस्वरूपंतद्दातारंचजिज्ञासामीत्यर्थः॥१९॥हासंतत्कारणंवरमितिपाठेतद्दातारं॥२०॥सर्वथाशंसजी
ववा·मावा· क्षिपस्ववातस्मिन्नवगतेअतः परंमांकदापिनहसिष्यसित्वत्कर्तृकमत्कर्मभावविहासाभावं

रामः
१२०

किंच महाव्रह्मर्षिभिः सृष्टाः प्रयुक्ताः ज्वलंतः अग्निवद्भस्मकरणसमर्थाः भीमदर्शनाः भीमंफलं दृश्यते येषु ताहृ
शा धिगिति वाग्रूपा दंडा त्वां न हिंसंति इदमप्याश्चर्यमित्यनुकर्षः स्थितां कृतनिश्चयां अनेन सर्वे त्वां धिक्कु
र्वंतीति ध्वनयति ॥१३॥ अथान्यापदेशेन राजानं निंदति । आम्रमिति । परिचरेत् । आलवालादिकरणेन रोप
येदाम्रस्थाने । तं च पुनः पयसा सिंचेत् ॥ अस्यैवं निंबसेवां कुर्वतः प्रीतये स मधुरो न भवेत् । अतो वच्ये
लें

महाव्रह्मर्षिसृष्टा वा ज्वलंतो भीमदर्शनाः ॥ धिग्वाग्दंडा न हिंसंति रामप्रव्राजने स्थितां ॥१३॥ आ
म्रं छित्वा कुठारेण निंबं परिचरेत्तु कः ॥ यश्चैनं पयसा सिंचेन्नैवास्य मधुरो भवेत् ॥१४॥ अभिजा
त्यं हि ते मन्ये यथा मातुस्तथैव च ॥ न हि निंबात्स्रवेत्क्षौद्रं लोके निगदितं वचः ॥१५॥ तव मातु
रसद्ग्राहं विद्मः पूर्वं यथाश्रुतं ॥ पितुस्ते वरदः कश्चिद्ददौ वरमनुत्तमं ॥१६॥ श्रीरामाय

वेदं कैकेय्यनुवर्तनं राज्ञ इत्याशयः ॥१४॥ इदानीं कैकेय्या मर्मवचनान्यप्याह । अभिजात्यमिति । यथा ते मातु
राज्यं प्रशस्तमाता पितृजत्वोचितव्यवहाररूपं तथैव न तेन मन्ये कारणानुसारित्वात्कार्यस्येति भावः । त
दुपपादयति दृष्टांतेन । नहीति । निंबात्क्षौद्रं न स्रवेदिति वचो लोकप्रसिद्धं किलेत्यर्थः ॥१५॥ ननु मे मातुः क
थमाभिजात्यहतिस्तत्राह । तवेति । असद्ग्राहं । घोरपापकर्माभिनिवेशं ॥ पूर्वं वृद्धेभ्यो यथा येन प्रका
रेण श्रुतं तथा संप्रति विद्मः स्मराम । तदेवाह ॥ पितुरित्यादि ॥ कश्चिदृषिः ॥१६॥ ॥

प्रोत्साहिताप्रेरिता· असद्दर्मं· कनिष्ठाभिषेकपूर्वं ज्येष्ठस्य विवासनरूपं· उपादधाग्राहय· उपावद्रे· तिप्राढेप्पयमे
वार्थः॥२८॥ न त्वं मिथ्याप्रतिज्ञातंलीलयोक्तंवरद्वयदानरूपंवचोतोराजानकरिष्यतितत्॥२९॥ अतोज्येष्ठत्वा
दिगुणाकोरामोभिषिच्यतांतदभिषेकेनुमतिः क्रियतां कर्माणःकर्मणिसाधुः॥३०॥ विपद्दैवाधमाह॥ परिवाद

मात्वंप्रोत्साहितापापेदैवराजसमप्रभं॥ भर्तारं लोककर्तारमसद्धर्ममुपावह॥२८॥ न हि मिथ्या
प्रतिज्ञातंकरिष्यतितवानघः॥ श्रीमान्दशरथोराजा देवि राजीवलोचनः॥२९॥ ज्येष्ठोवदान्यः
कर्मण्यःस्वधर्मस्यापिरक्षिता॥ रक्षिताजीवलोकस्यबलीरामोभिषिच्यतां॥३०॥ परिवादोहितेदेवि
महान्लोकेचरिष्यति॥ यदिरामोवनंयातिविहायपितरंनृपं॥३१॥ स्वराज्यंराघवःपातुभवत्वं
विगतज्वरा॥ नहितेराघवादन्यःक्षमःपुरवरेवसन्॥३२॥ रामेहिपौवराज्यस्थेराजादशरथोव
नं॥ प्रवेक्ष्यतिमहेष्वासः पूर्ववृत्तमनुस्मरन्॥३३॥ इतिसांत्वैश्चतीक्ष्णैश्चकैकेयीराजसंसदि
भूयःसंक्षोभयामाससुमंत्रस्तुकृतांजलिः॥३४॥ नैवसाक्षुभ्यतेदेवीनचस्मपरिदूयते॥ नचा
स्यामुखवर्णस्यलक्ष्यतेविक्रियातदा॥३५॥ इत्यार्षेश्रीरा० अ० पंचत्रिंशः सर्गः॥३५॥

इति अपवादः चरिष्यतिप्रचरिष्यति॥३१॥ राघवाद्रामादन्यः पुरवरेवसन्तेक्षमोनुकूलोनहिभवेदित्यर्थः भ
रतस्त्वत्प्रतिकूलएवभविष्यतीतिभावः॥३२॥ अतोरामोहीति· पूर्ववृत्तंपूर्वराजाचारं॥३३॥ रामेहियौवरा
ज्यस्थेराजादशरथोवनंप्रवेक्ष्यति· महेष्वासःपूर्ववृत्तमनुस्मरन्॥३३॥ भूयोत्पर्थं॥३४॥ सांत्वैःनक्षुभ्यतेनी त्वैःनपरिदूयते॥३५॥ इतिश्रीरा० रा० अ० व्या० पंचत्रिंशः सर्गः॥३५॥

तस्मैवरदापकृषयेतमर्थंकथननिर्वंधरूपंकथयामासेत्यन्वयः ॥२२॥ ततः साधुः सवरदः प्रत्यभाषत· ध्वंसतांवो· स्वपित्रादिसमीपंगच्छतुवा ॥ माकृथाइतिपाठे अस्यावचइतिशेषः ॥२३॥ निरस्य· भइत्वमितोगच्छेतितिमातरंपरित्यज्य ॥२४॥ तथात्वमपिदुर्जनाचरितेपथिस्थितेतिशेषः ॥ अतद्र्मंराजानंमोहात्मोहमुत्पाद्य· अस

प्रियया चतथोक्तः सकैकयः पृथिवीपतिः ॥ तस्मैतंवरदायार्थं कथयामासतत्वतः ॥२२॥ ततः स
वरदः साधूराजानं प्रत्यभाषत ॥ म्रियतांध्वंसतांचेयं माशंसीस्त्वं महीपते ॥२३॥ सतच्छुत्वावच
स्तस्यप्रसन्नमनसोनृपः ॥ मातरंतेनिरस्याशुविजहारकुबेरवत् ॥२४॥ तथात्वमपिराजानं दु
र्जनाचरितेपथि ॥ असद्ग्राहमिमंमोहात्कुरुषेपापदर्शिनी ॥२५॥ सत्यश्चात्रप्रवादोयंलौकिकः प्र
तिभातिमा ॥ पितृन्समनुजायंतेनरामातरमंगनाः ॥२६॥ नैवंभवगृहाणेदंयदाहवसुधाधिपः ॥
भर्तुरिच्छामुपास्येहजनस्यास्यगतिर्भव ॥२७॥

त्वयाहं अस्त्कार्यग्राहकंकुरुषे ॥२५॥ कन्यानांमातृतुल्यत्वंन्यायप्राप्तमित्याह· सत्यइति· ॥ मामांनराः पुत्ररूपाः समनुजायंते पितृस्वभावानुवर्त्तिनोजायंते ॥२६॥ नैवंभवमातृवन्माभवः यद्वसुधाधिप श्राहतद्गृहाण· रामाभिषेकरूपंवचः नेयेतिपाठे विधेयाभवेत्पर्थः ॥ भर्तुरिच्छांतद्विषयंउपास्पतद नुवर्त्तिनीभूत्वा अस्यजनस्य अस्मदादेः गतिः शरणंभव ॥२७॥ राम

पालयिष्यंतीति सो पालने भोक्तिः संसाध्यतां प्रस्थाप्यतां ॥९॥ स्वरश्चव्यरुध्यत रुद्धो जातः भयकार्यमेतत् ॥१०॥११॥ मंडः
सुरासारंशः निरास्वाद्यं निर्गतास्वाद्यतमं अल्पं अवस्कंके ॥१२॥१३॥ हे अहिते मा मां धुरि दासवत् त्वरहेतु
कराम विवासन भरताभिषेक रूप भारे नियुज्य तां च भारं वहं तं मां किंतु दसि व्यथयसि ॥ हे अनार्ये यदिदा

भरतश्च महाबाहुरयोध्यां पालयिष्यति ॥ सर्वकामैः पुनः श्रीमान् रामः संसाध्यतामिति ॥९॥ एवं ब्रु
वति काकुत्स्थे कैकेय्या भयमागतं ॥ मुखं चाप्यगमत् क्रोधं स्वरश्चापि व्यरुध्यत ॥१०॥ सा विषण्णा च सं
त्रस्ता मुखेन परिशुष्यता ॥ राजानमेवाभिमुखी कैकेयी वाक्यमब्रवीत् ॥११॥ राज्यं गतजनं साधो पीतमं
डां सुरामिव ॥ निरास्वाद्यतमं शून्यं भरतो नाभिपत्स्यते ॥१२॥ कैकेय्यां मुक्तलज्जायां वदंत्यामतिदा
रुणं ॥ राजा दशरथो वाक्यमुवाचायतलोचनां ॥१३॥ वहंतं किं तुदसि मां नियुज्य धुरि माहिते ॥ अ
नार्ये कृत्यमारब्धं किं न पूर्वमुपारुधः ॥१४॥ तस्यैतत् क्रोधसंयुक्तमुक्तं श्रुत्वा वरांगना ॥ कैकेयी द्विगु
णं क्रुद्धा राजानमिदमब्रवीत् ॥१५॥

नीमारब्धं कृत्यं सार्वभौमभोगस हित स्वप्रस्थपन प्रतिबंधरू
पं तत् त्वतादृशं गमनं पूर्वमेव वनवासप्रार्थनकाल एव नोपारुधः सर्वं त्यक्त्वा केवलो यास्यामीति किं न प्रार्थि
तवत्यसि तत एतन्निरोधे तव सामर्थ्यं नास्तीति भावः ॥ क्रुद्ध दीनोक्तित्वात् सर्वदोषपरिहारः ॥१४॥ द्विगुणं
क्रुद्धा प्रकारांतरेण मत्प्रयोजनं नाशयतीत्याशयेन ॥१५॥

एवंसुमंत्रेणराजप्रतिज्ञायामिथ्यात्वोक्तावपिराजातस्यावास्तवत्वंजानन्रामस्यवनएवसुखवासोपायमादिशति
ततइति। कैकेय्यनंगीकारानंतरं। प्रतिज्ञयाकैकेयीमुद्दिश्यकृतयावास्तव्या। इदंवक्ष्यमाणं॥१॥ चतुर्विधबला
रथा। दिचतुर्विधबलवतीचमूःसेना॥ अनुयात्रार्थं सेवार्थं। प्रतिविधीयतां नियुज्यतां प्रस्थाप्यतां॥२॥ वादिन्यः

ततःसुमंत्रमैक्ष्वाकः पीडितोत्रप्रतिज्ञया॥ सबाष्पमतिनिश्वस्य जगादेदं पुनः पुनः॥१॥ सूतरत्नसुसं
पूर्णा चतुर्विधबलाचमूः॥ राघवस्यानुयात्रार्थं क्षिप्रंप्रतिविधीयतां॥२॥ रूपाजीवाश्ववादिन्यो व
णिजश्चमहाधनाः॥ शोभयंतुकुमारस्यवाहिनीः सुप्रसारिताः॥३॥ येचैनमुपजीवंतिरमतेयैश्चवी
र्यतः॥ तेषांबहुविधंदत्वातानप्यत्रनियोजय॥४॥ आयुधानिचमुख्यानिनागराः शकटानिच॥ अनु
गच्छंतुकाकुत्स्थंव्याधाश्चारण्यकोविदाः॥५॥ निघ्नन्मृगान्कुंजरांश्चपिबंश्चारण्यकंमधु॥ नदीः
श्चविविधाः पश्यन्नराज्यंसंस्मरिष्यति॥६॥ धान्यकोशश्चयः कश्चिद्धनकोशश्चमामकः॥ तौराम
मनुगच्छेतांवसंतंनिर्जनेवने॥७॥ यजन्पुण्येषुदेशेषु विसृजंश्चाप्तदक्षिणाः॥ ऋषिभिश्चाभिसं
गम्यप्रवत्स्यतिसुखंवने॥८॥

परचित्ताकर्षकवचनचतुराः रूपाजीवाः वेश्याः सुप्रसारिताः सुप्रसारि
ताःपण्याः॥३॥ यैर्मल्लैः वीर्यतः वीर्यपरीक्षयारमतेइत्यर्थः॥४॥ नागराजनाः अरण्यकोविदाः अरण्यमर्मज्ञाः
॥५॥ राज्यंराज्यदेशस्थितिं॥६॥७॥ आप्तदक्षिणाः उक्तदक्षिणाः॥८॥

रामा॰ अ॰
१२३

शीघ्रं यानमारोप्य स्वेच्छया गमने विलंबकरणासंभवात् ॥ सपरिच्छदं ॥ वनयोग्य फालपिटकादि परिच्छदसहितं ना न्विवासनाधिकारिणः ॥ अन्वशात् उक्तवान् २४ ॥ यथापापकर्मकृत् ॥ यथोक्तपापकर्मकृत्सः फालसहि तं पिटकं गृहीत्वा ॥ कंदाद्यर्थं ॥ सर्वा दिशः सर्वदिक्षु गिरिदुर्गाणि अनुचरन् ॥ भ्रममाणः ॥ कंदाद्यलोकय

तं यानेन शीघ्रमारोप्य सभार्यं सपरिच्छदं ॥ यावज्जीवं विवास्योयमिति तानन्वशात्पिता ॥ २४ ॥ स फा लपिटकं गृह्य गिरिदुर्गाण्यलोकयत् ॥ दिशः सर्वास्त्वनुचरन्स यथापापकर्मकृत् ॥ २५ ॥ इत्ये नमत्यजद्राजा सगरो वै सुधार्मिकः ॥ रामः किमकरोत्पापं येनैवमुपरुध्यते ॥ २६ ॥ न हि कंचन पश्यामो राघवस्यागुणं वयं ॥ दुर्लभो ह्यस्य निरयः शशांकस्येव कल्मषं ॥ २७ ॥ अथ वा देवि त्वं कंचिद्दोषं पश्यसि राघवे ॥ तमद्य ब्रूहि तत्त्वेन ततो रामो विवास्यते ॥ २८ ॥ अदुष्टस्य हि सं त्यागः सत्पथे निरतस्य च ॥ निर्दहेदपि शक्रस्य द्युतिं धर्मविरोधवान् ॥ २९ ॥ ॥ ॥

123

त्सर्वा दिशस्त्वनुचरन्नतिष्ठत् ॥ पापकृदिति पाठे गिरिदुर्गाणि वासार्थमलोकयत् ॥ सर्वा दिशश्च कंदा द्यर्थमनुचरन्नतिष्ठत् ॥ यावज्जीवं निजापराधाद्धनेइति शेषः ॥ २५ ॥ प्रकृते तदप्रसंगइत्याह ॥ रामः किमिति ॥ २६ ॥ अगुणं दोषं व्यसनरूपं ॥ निरयः ॥ पापं कल्मषं मालिन्यं ॥ २७ ॥ २८ ॥ २९ ॥

राम
१२३

पूर्वमनुक्तमपि केवलं त्वं वनगमनत्वादेव सिद्धमिति ॥ दृष्टांतबलेनाह तवैवेति ॥ उपारुधत् राज्यभोगेभ्य इति शेषः ॥ १६ ॥ एवमुक्तः असमंजतुल्यतया गमनेनुक्तः स्वप्रतिश्रुतातिरिक्तप्रलापात् राज्ञो धिगित्युक्तिः जनः कैकेयी सेवकजनः सर्वः स्वामिन्याः असंबद्धप्रलापात् नावबुध्यत ॥ क्रोधवशादिति भावः ॥ १७ ॥

तवैव वंशे सगरो ज्येष्ठपुत्रमुपारुधत् ॥ असमंज इति ख्यातं तथायं गंतुमर्हति ॥ १६ ॥ एवमुक्तो धिगित्येव राजा दशरथोब्रवीत् ॥ व्रीडितश्च जनः सर्वः सा च तन्नावबुध्यत ॥ १७ ॥ तत्र वृद्धो महामात्रः सिद्धार्थो नाम नामतः ॥ शुचिर्बहुमतो राज्ञः कैकेयीमिदमब्रवीत् ॥ १८ ॥ असमंजो गृहीत्वा तु क्रीडतः पथि दारकान् ॥ सरय्वां प्रक्षिपन्नप्सु रमते तेन दुर्मतिः ॥ १९ ॥ तं दृष्ट्वा नागराः सर्वे क्रुद्धा राजानमब्रुवन् ॥ असमंजं वृणीष्वैकमस्मान्वा राष्ट्रवर्धन ॥ २० ॥ नानुवाच ततो राजा किंनिमित्तमिदं भयं ॥ ताश्चापि राज्ञा संपृष्टा वाक्यं प्रकृतयोब्रुवन् ॥ २१ ॥ क्रीडतस्त्वेष नः पुत्रान् बालान्भ्रान्तचेतसः ॥ सरय्वां प्रक्षिपन्मौर्ख्यादतुलां प्रीतिमश्नुते ॥ २२ ॥ स तासां वचनं श्रुत्वा प्रकृतीनां नराधिपः ॥ तं तत्याजाहितं पुत्रं तासां प्रियचिकीर्षया ॥ २३ ॥

नह्यहमनस्यनात्रप्रसंग इति महामात्रश्चाह तत्रेति ॥ महामात्रः प्रधानः ॥ १८ ॥ सरय्वां अप्सु प्रक्षिपन् रमते तेन कारणेन दुर्मतिः सः ॥ न तादृशोयमिति भावः ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ तं प्रकृतीनामहितं पुत्रं तत्याजेत्यन्वयः ॥ २२ ॥ ॥

असंगतं चेदं स सैम्यस्य वनगमनमित्याह ॥ यो हीति ॥ कस्मात् गजमध्यवंधनरज्जुः ३ ध्वजिन्या कत्स्यानुल्यया ॥ अनु॰ जानामि मात्तन्नीतये भरताय ददामि ॥ चीराणि वनोपयुक्तवासांसि ॥ आनयंतु केकेयी दास्यः ४ चतुर्दश वर्षाणि वने वसतो मम फलाद्यानयन साधने ॥ भे खनित्रपिटके भो कैकेयी दास्यः समानयत गच्छत ॥

योहि दत्वा द्विपश्रेष्ठं कक्ष्यायां कुरुते मनः ॥ रज्जुस्नेहेन किं तस्य त्यजतः कुंजरोत्तमं ३ तथा मम सतां श्रेष्ठ किं ध्वजिन्या जगत्पते ॥ सर्वाण्येवानुजानामि चीराण्येवानयंतु मे ४ खनित्रपिटके चोभे समानयत गच्छत ॥ चतुर्दश वने वासं वर्षाणि वसतो मम ॥ ५ अथ चीराणि कैकेयी स्वयमाहृत्य राघवं ॥ उवाच परिधत्स्वेति जनौघे निरपत्रपा ॥ ६ ॥ स चीरे पुरुषव्याघ्रः कैकेय्याः प्रतिगृह्य ते ॥ सूक्ष्मवस्त्रमवक्षिप्य मुनिवस्त्राण्यवस्त ह ॥ ७ ॥ लक्ष्मणश्चापि तत्रैव विहाय वसने शुभे ॥ तापसाच्छादनं चैव जग्राह पितुरग्रतः ॥ ८ ॥ अथात्मपरिधानार्थं सीता कौशेयवासिनी संप्रेक्ष्य चीरं संत्रस्ता पृषती वागुरामिव ॥ ९ ॥

शीघ्रं तदानयनायेति शेषः ॥ ५ ॥ एतत्पर्यंतं मंथराप्रेरितं सिद्धं कृत्वा ब्राह्मणशापप्राप्तलोकास्त्र्या विषयत्वसंपादकं कर्म कैकेय्यारभते अथेति ॥ स च शापोऽध्यात्मरामायणोस्पष्टः ॥ ६ ॥ स रामः ॥ चीरे अंतरीयोत्तरीयरूपे ॥ अवक्षिप्य परित्यज्य अवस्त धृतवान् ॥ वस आच्छादने ॥ ७ ॥ ८ ॥ अथात्मनः परिधानार्थं तया दत्तं चीरं सीता संप्रेक्ष्य वागुरां संप्रेक्ष्य पृषती मृगी व संत्रस्ता सेवाभूत् ॥ ९ ॥ ॥ ॥

124

त्वयाविहृतयारामस्यश्रियातेनकिंचित्फलमितिशेषः भरतस्यत्वदनुरूपमतित्वाभावात्तदलंरथाश्रमोणः ह्रियतोलोकतः प्राप्तः परिवादश्चैतेरस्य परिहार्योभवति एवंचलोकापवादमत्रमस्यफलंनान्यत्किंचिदितिभावः॥३०॥३१॥ एतद्वचः सिद्धार्थवचः ह्रियतः कृपणांमार्गमास्थाययथेयंत्वयाकुचेष्टारूपाचेष्टाकृतासासा

तदलंदेविरामस्यश्रियाविहृतयात्वया॥ लोकतोपिहितेरस्यः परिवादःशुभानने॥३०॥ श्रुत्वातु सिद्धार्थवचोराजाश्रांततरःस्वरः॥ शोकोपहतयावाचाकैकेयीमिदमब्रवीत्॥३१॥ एतद्वचोनेच्छसि पापरूपेहितंनजानासिममात्मनोवा॥ आस्थायमार्गंकृपणांकुचेष्टाचेष्टाहितेसाधुपथादपेता॥३२॥ अनुव्रजिष्याम्यहमद्यरामंराज्यंपरित्यज्यसुखंधनंच॥ सर्वेचराज्ञाभरतेनच त्वंयथासुखंभुंक्ष्वचिरायराज्यं॥३३॥ इत्यार्षेश्रीरा० अयो० षट्त्रिंशःसर्गः॥३६॥ महामात्रवचः श्रुत्वारामोदशरथंतदा॥ अभ्यभाषतवाक्यंतुविनयज्ञोविनीतवत्॥१॥ त्यक्तभोगस्यमेराजन् वनेवन्येनजीवतः॥ किंकार्यमनुयात्रेणत्यक्तसंगस्यसर्वतः॥२॥

धुपथादपेता॥३२॥ सर्वेचअयोध्यावासिनोजनाः राज्ञाभरतेनच चस्त्वर्थे॥३३॥ इतिश्रीरामाभिरामेश्रीरामीयेरामायणतिलके अयोध्याकांडेषट्त्रिंशःसर्गः॥३६॥ रामोधीरोदात्तत्वेनकैकेयीपरितोषायाह महामात्रेति महामात्रः सिद्धार्थः विनीतवत्विनीतःसन्॥१॥ अनुयात्रेण अनुयात्रावतासैन्येन त्यक्तसंगस्यसर्वतः॥ असंगो

रामाभिरामटीका ॥४॥

१८॥ तिष्ठतु अत्रैवेतिशेषः इयमद्यापिधर्मनित्यस्त्वं इदानीं स्वयं स्थातुं नेच्छसि॥ तथापीयं तिष्ठतु १९ तुल्यशीलया॰ अनंगीकृतनगरस्थित्या सीतया प्रेरितः सन् चीरं बबंधेत्यन्वयः॥ २०॥ चीरे गृहीते सम्मीक्ष्येति शेषः सबाष्प इति पाठः॥ प्राग्गंतरं तु सम्यगेव॥ २१॥ अतिप्रवृत्ते मर्यादातिक्रमेण प्रवृत्ते॰ यावद्दूरः स्तावत्प्र

लक्ष्मणेन सहायेन वनं गच्छ स्वपुत्रक॥ नेयमर्हति कल्याणी वस्तुं तापसवद्वने॥ १८॥
कुरु नो याचनां पुत्र सीता तिष्ठतु भामिनी॥ धर्मनित्यः स्वयं स्थातुं नहीदानीं त्वमिच्छसि॥ १९॥
तासामेवंविधा वाचः शृण्वन् दशरथात्मजः॥ बबंधे वतथा चीरं सीतया तुल्यशीलया॥ २०॥
चीरे गृहीते तु तया सबाष्पो नृपतेर्गुरुः॥ निवार्य सीतां कैकेयीं वसिष्ठो वाक्यमब्रवीत्॥ २१॥
अतिप्रवृत्ते दुर्मेधे कैकेयि कुलपांसिनि॥ वंचयित्वा तु राजानं न प्रमाणेव तिष्ठसि॥ २२॥
नगंतव्यं वनं देव्या सीतया शीलवर्जिते॥ अनुष्ठास्यति रामस्य सीता प्रकृतमासनं॥ २३॥

माणेन अवतिष्ठसि॥ कुतः अस्या वनगमनस्य त्वयाऽवृतत्वादिति भावः॥ न प्रमाणे वे तिपाठः सद्वृत्तेवेति पाठः॥ तद्व्याख्यानं च न प्रकृतोपयोगीति चिंत्यं॥ २२॥ अत एव नगंतव्यमिति॰ रामस्य प्रकृतं प्रस्तुतमासनं सीता अनुष्ठास्यति॰ अधिष्ठास्यति॰ राज्यं करिष्यति यावद्रामागमनमित्यर्थः॥ २३॥

अपत्रपमाणेवलज्जमानेव कैकेय्याः सकाशात् तेकुशचीरे प्रगृह्य भर्तुरीदृशवस्त्रेतिसुतरांदुर्मनाइव
अतएवाश्रुपूर्णनेत्रा॥१०॥११॥अकुशला अपरिचयात् चीरवंधनेऽनिपुणामुमोह। वंधनस्थलंनिश्चयं
नप्रापेव॥१२॥कृत्वाकंठइति अनेनेदृश्यां राजकुमार्यामस्याईदृशोव्यवहार इतिकैकेय्यांतत्रजनस्या

सांअपत्रपमाणेवप्रगृह्यचसुदुर्मनाः॥ कैकेय्याःकुशचीरेतेजानकीशुभलक्षणा॥१०॥अश्रु
संपूर्णनेत्राचधर्मज्ञाधर्मदर्शिनी॥ गंधर्वराजप्रतिमंभर्तारमिदमब्रवीत्॥११॥कथंनुचीरं
वध्नंतिमुनयोवनवासिनः॥ इतिह्यकुशलासीतासामुमोहमुहुर्मुहुः॥१२॥कृत्वाकंठे।
स्मसाचीरमेकमादायपाणिना॥ तस्थौह्यकुशलातत्रव्रीडिताजनकात्मजा॥१३॥तस्यास्तत्क्षिप्र
मागम्यरामोधर्मभृतांवरः॥चीरंबबंधसीतायाःकौशेयस्योपरिस्वयं॥ रामंप्रेक्ष्यतुसीतायावध्नं
तंचीरमुत्तमं॥अंतःपुरचरानार्योमुमुचुर्वारिनेत्रजं॥१५॥ऊचुश्चपरमायत्तारामंज्वलि
ततेजसं॥वत्सनैवंनियुक्तेयंवनवासेमनस्विनी॥१६॥ पितुर्वाक्यानुरोधेन गतस्यविजनं
वनं॥ तावद्दर्शनमस्यानःसफलंभवतुप्रभो॥१७॥

स्यंतमसूयास्सूचिता॥१३॥कौशेयस्योपरीतितस्याः
कौशेयत्यागप्रसक्त्यभावात्॥१४॥सीतायाश्चीरंवध्नंतमुत्तमं रामंप्रेक्ष्येत्यन्वयः॥१५॥परमायत्ताःपरमखि
न्नाः यतस्त्वेदोपस्करयोःएवंत्वद्वत्इयंनियुक्तान॥१६॥विजनंवनंगतस्ययावदागमनंतावदस्यादर्श

सर्वथैवतवभरतस्यराज्यप्रदानं स्यायथासोप्यर्थइत्याह॥ नहीति॰ अदत्तामपि प्रीतिपूर्वमदत्तां॰ किंतुत्वन्निर्बंधेनदत्तांत्वयि
वा परंपराप्राप्तधर्मनाशिकायां अतःपरं पुत्रवद्वस्तुंनार्हति॰ कुतस्तत्राह॰ यदीति॰ महीपतेर्दशरथाज्जातो
यदिपितृत्समनुजायंतेनराइतिन्यायात्॰॥ इत्याशयः॥ यदिइत्यसंदिग्धेवचनं॥ वेदाश्चेत्प्रमाणमि
तिवत्॰ यद्वाकैकेय्याधिकारांतरमिदं॥ ३०॥ पितृवंशचरित्रज्ञेज्येष्ठेविद्यमानेकनिष्ठस्यराज्यानर्ह॥

नत्वादत्तांमहीं पित्राभरतःशास्तुमिच्छति॥ त्वयिवापुत्रवद्वस्तुंयदिजातोमहीपतेः॥ ३०॥ य
द्यपित्वंक्षितितलाद्गगनंचोत्पतिष्यसि॥ पितृवंशचरित्रज्ञः सोन्यथानकरिष्यति॥ ३१॥ त॰
त्वयापुत्रगर्धिन्यापुत्रस्यकृतमप्रियं॥ लोकेनहिसविद्येतयोनराममनुव्रतः॥ ३२॥ इत्यसे
द्यैवकैकेयिपश्यवाल्मृगद्विजान्॥ गच्छतःसहरामेणपादपांश्चतदुन्मुखान्॥ ३३॥ अ
थोत्तमान्याभरणानिदेविदेहिस्नुषायैव्यपनीयचीरं॥ नचीरमस्याःप्रविधीयतेतिन्य
वारयत्तद्वसनंवसिष्ठः॥ ३४॥

त्वरूपंतत्त्वज्ञः॥ ३१॥ पुत्रगर्धिन्या॰ पुत्रराज्याभिलाषवत्या॥ लोकेसनविद्येतत्सत्तानसंभावितायोरामं
नानुव्रतः॥ ३२॥ तत्रप्रत्यक्षंमानमाह॰ इत्यसीति॰॥ पादपांश्चेति॰ किमुवक्तव्यंमनुष्यानितिशेषः॥ ३३॥
एवंवसिष्ठोभाव्यर्थजातमुक्त्वाप्रकृतमनुष्ठेयमुपदिशति॰॥ अथेति॰ प्रविधीयतेइतिच्छेदः॰ इका
रलोपश्चार्षः॰ दातुंयुज्यतेइत्यर्थः॥ इतिजल्पंतंन्यवारयत्॰ जानक्याइतिशेषः॥ ३५

नतुस्त्रियाः कथंराज्याधिष्ठानमत आह॥ आत्माहीति॰ दारसंग्रहवर्त्तिनां गृहस्थानां सर्वेषामात्मा दाराः॥ अर्द्धोवा एष आत्मनोयत्पत्नीतिश्रुतेः अनेनस्त्रीपुरुषोपाध्योः परस्परावयवमेलनं सूचितं॰ अतएवंलोकेपिसर्वतस्तयोः परस्परप्रियत्वंदृश्यते॥२४॥ अथयास्यतित्वन्निबंधादितिशेषः वयंमदाद्यास्त्राह्मणाः॥ अत्रयत्ररा

आत्माहिदाराःसर्वेषांदारसंग्रहवर्त्तिनां॥ आत्मेयमितिरामस्य पालयिष्यतिमेदिनीं॥२४॥ अथयास्यतिवैदेहीवनंरामेणसंगता॥ वयमत्रानुयास्यामः पुरंचेदंगमिष्यति॥२५॥ अंतपालाश्चयास्यंतिसदारोयत्रराघवः॥ सहोपजीव्यंराष्ट्रंचपुरंचसपरिच्छदं॥२६॥ भरतश्चसशत्रुघ्नश्चीरवासावनेचरः॥ वनेवसंतंकाकुत्स्थमनुवत्स्यतिपूर्वजं॥२७॥ ततःशून्यांगतजनांवसुधांपादपैःसह॥ त्वमेकाशाधिदुर्वृत्ताप्रजानामहितेस्थिता॥२८॥ नहितद्भविताराष्ट्रंयत्ररामोनभूपतिः॥ तद्वनंभविताराष्ट्रंयत्ररामोनिवत्स्यति॥२९॥

मोत्रस्थातुमेनमनुगमिष्यामः॥२५॥ अंतपालाःशुद्धांतरक्षकाःराष्ट्रांतस्थितदंडनायका इत्यन्ये॰ उपजीव्यंजीवनसाधनंधनंतेनसहितंराष्ट्रंसपरिच्छदंदासीदासादिसहितंपुरंचयास्यति॥२६॥ भरतश्चपूर्वजमनुवत्स्यतितत्सदृशावस्थयैवस्यास्यति॰ दशरथजातस्यतत्स्वभावतायाएवौचित्यमितिभावः॥२७॥ पादपैःसहेत्यनेनाटवीभूतामितिद्योत्यते॥२८॥२९॥

अपास्यात्त्यजतु इयं प्रतिज्ञा चीरवासिनी सीता वनं यात्विति त्वदीया प्रतिज्ञा न मम दत्तपूर्वमनुमता व
रदानसमये ॥ अतो यथासुखं गच्छत्विति अन्वयः ॥५॥ अजीवनार्हेण ॥ मुमूर्षुणा ॥ अनेन मतिभ्रंशः सूच्यते ॥
नृशंसा अतिक्रूरा ॥ प्रतिज्ञा रामवनवासविषया नियमेन शपथपूर्वं सा तावत्कृता यदेतन्न ह्रियते
धिकं सीता चीरग्रहणं त्वया प्रतिपन्नं आरब्धं तद्बाल्यात् अज्ञानादेव नात्र ते सामर्थ्यं तस्माद्वेणुमात्मपु

चीराण्यपास्याज्जनकस्य कन्या नेयं प्रतिज्ञा मम दत्तपूर्वा ॥ यथासुखं गच्छतु राजपुत्री वनं
समग्रा सह सर्वरत्नैः ॥५॥ अजीवनार्हेण मया नृशंसा कृता प्रतिज्ञा नियमेन तावत् ॥ त्वया
हि बाल्यात्प्रतिपन्नमेतत्तन्मा दहेद्वेणुमिवात्मपुष्पं ॥६॥ रामेण यदि ते पापे किंचित्कृतम
शोभनं ॥ अपकारः क इह ते वैदेह्या दर्शितोऽधमे ॥७॥ मृगीवोत्फुल्लनयना मृदुशीला मनस्वि
नी ॥ अपकारं कमिव ते करोति जनकात्मजा ॥८॥ ननु पर्याप्तमेवं ते पापे रामविवासनं ॥ कि
मेभिः कृपणैर्भूयः पातकैरपि ते कृतैः ॥९॥

ष्पमिव त्वत्कृता तिप्रवृत्तिस्त्वां मा दहेत् ॥ मा ना
शयतु यद्वा एषा तव प्रवृत्तिस्तव वैधव्यप्राप्तये मां दहेत् नाशयेत् ॥६॥ अशोभनमपराधः ॥ वैदेह्या
ते क अपकारः चीरग्रहणपूर्वकवनवासप्रयोजको दर्शितः संपादितः ॥७॥८॥ ते तव एवं रामवि
वासनं चीरादिवैशिष्ट्येन रामवनगमनं पर्याप्तं सकलनरकानुभवायालं ते त्वया कृतैः एभिरपि
कृपणैर्निर्वाच्यदुःखप्रदैः सीताप्रव्राजनादिरूपैः पातकैः किं किमनुभविष्यसि इति न जानामीति शेषः ॥९॥

शम
१२९
॥ ६ ॥

दानंयोगपत्वमुपपादयति· एकस्येति· प्रतिकर्मप्रसाधनव्यापारः सनित्यंयस्याः साश्वताएव विभूषिता· वसत्वराएपेस्व भ
र्तृशुश्रूषार्थं ॥३५॥ विधानैः उपकरणैः ॥३६॥ तस्मिन्गुरौ तयाजल्पत्यपि· भर्तुः प्रतिकारकामा· वेषादिभिः तद
वस्थासदृशावस्थासंपादनकामासतीचीरपरिग्रहादिनिवृत्तभावानैवबभूवस्म ॥३७॥ इतिसप्तत्रिंशः

एकस्यरामस्यवनेनिवासस्त्वयावृत्तः केकयराजपुत्रि ॥ विभूषितेयंप्रतिकर्मनित्यावसत्वरण्ये
सहराघवेण ॥३५॥ यानैश्चमुख्यैः परिचारकैश्चसुसंवृत्तागच्छतुराजपुत्री ॥ वस्त्रैश्चसर्वैः सहिते
र्विधानैर्नेयंवृत्तानेवरसंप्रदाने ॥३६॥ तस्मिंस्तथाजल्पतिविप्रमुख्येगुरौनपस्याप्रतिमप्रभावे
नैवस्मसीताविनिवृत्तभावाप्रियस्यभर्तुः प्रतिकारकामा ॥३७॥ इत्यार्षेश्रीरा॰ अयो॰ सप्तत्रिंशः
सर्गः ॥३७॥ तस्यांचीरंवसानायांनाथवत्यामनाथवत् ॥ प्रचुक्रोशजनः सर्वोधिक्त्वांदशरथंत्वि
ति ॥१॥ तेनतत्रप्रणादेनदुःखितः समहीपतिः ॥ सनिश्वस्योष्णमैक्ष्वाकस्तांभार्यामिदमब्रवीत् ॥२
सुकुमारीचबालाचसततंचसुखोचिता ॥ नेयंवनस्ययोग्येति सत्यमाहगुरुर्मम ॥३॥ इयंहिकस्या
पिकरोतिकिंचित्तपस्विनीराजवरस्यपुत्री ॥ याचीरमासाद्यजनस्यमध्येजातावि संज्ञाश्रमणीव
काचित् ॥४॥

सर्गः ॥३७॥ तस्यामिति· तद्दशान्तर्गतायामीदृशामनिष्टव्यवहारमनिवारयंस्त्वंमीतिष्ठन्तीतिजनाक्रोशः ॥१
तेनप्रणादेनजनाक्रोशेनतांभार्यांकैकेयीं ॥२॥ वनस्य· वनगमनयोग्यचीरस्यकस्यापि किंचित्करोतिकाकुरपि
तुतेत्पर्यः किंचिदीदृशंत्वविधादिविसंज्ञाऽपरिचिताशकार्यानुष्ठानप्रसंगतः प्राप्तमोहाश्रमणीचभिक्षुकीव ॥४॥

जातगर्धिनी॰ त्वत्समीपे जातो मद्दर्शनविषयो गर्धो ऽभिलाषो यस्यास्तां न्यस्य त्यक्त्वा ॥ १५ ॥ इति श्रीरामाभिरामे श्रीरा
मीये रामायणतिलके ऽयोध्याकांडे ऽष्टत्रिंशः सर्गः ॥ ३८ ॥ रामस्येति॰ विगतचेतनो ऽभूदिति शेषः ॥ १ ॥ नत्येवं

इमां महेंद्रोपमजातगर्धिनीं तथा विधातुं जननीं ममार्हसि ॥ यथा वनस्थे मयि शोककर्षिता
न जीवितं न्यस्य यमक्षयं व्रजेत् ॥ १५ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये ऽयोध्याकांडे ऽष्टत्रिंशः
सर्गः ॥ ३८ ॥ रामस्य तु वचः श्रुत्वा मुनिवेषधरं च तं ॥ समीक्ष्य सह भार्याभी राजा विगतचेतनः ॥ १ ॥
नैनं दुःखेन संतप्तः प्रत्यवैक्षत राघवं ॥ न चैनमभिसंप्रेक्ष्य प्रत्यभाषत दुर्मनाः ॥ २ ॥ स मुहूर्तं
मिवासंज्ञो दुःखितश्च महीपतिः ॥ विललाप महाबाहू राममेवानुचिंतयन् ॥ ३ ॥ मन्ये खलु मया
पूर्वं विवत्सा बहवः कृताः ॥ प्राणिनो हिंसिता वापि तस्मामिदमुपस्थितं ॥ ४ ॥ न त्वेवानागते
काले देहात्च्यवति जीवितं ॥ कैकेय्या क्लिश्यमानस्य मृत्युर्मम न विद्यते ॥ ५ ॥ यो ऽहं पावकसं
काशं पश्यामि पुरतः स्थितं ॥ विहाय वसने सूक्ष्मे तापसाच्छादमात्मजं ॥ ६ ॥

ततः इत्थं न शशाक नोत ॥ २ ॥ ३ ॥ विवत्सा इति धेनव इति शेषः ॥ ४ ॥ कैकेय्या क्लिश्यमानस्यापि मम यतो मत्यु
र्न विद्यते॰ तस्मात्प्रनिर्दिश्यते ऽतः काले ऽनागते देहात् जीवितं न च्यवत इति जाने इति शेषः ॥ ५ ॥ आ
च्छाद्यते ऽनेनेत्याच्छादः॰ तापसानामाच्छादो यस्य तादृशमात्मजं पश्यामि यस्तस्य मे मत्युर्न विद्यत इत्यन्वयः ॥ ६ ॥

अभिषेकायमयाकृतनिश्चयं॰ पश्चात्प्रतिबंधेत्वयाकृतेमत्त्रेरणायेहागतंरामंप्रतियत्त्वमब्रवीः जटाचीरध
रोवनंगच्छेतितत्त्वयोक्तंश्रावितामयातावदेवप्रतिज्ञातंनत्वास्वित्यनुमतंननुसीताप्रव्राजनादि॥१०॥ एतत्
स्वोक्तंतदतिक्रम्यअधिकार्थेप्रवृत्तान्निरयंगंतुमर्हसि॰ कोत्रमेतिक्रमोऽतआह॰ मैथिलीमिति॰ ईदृसेवां

प्रतिज्ञातंमयातावत्त्वयोक्तंदेविश्रावता॥रामंयदभिषेकायत्वमिहागतमब्रवीः॥१०॥नत्वे
तत्समतिक्रम्यनिरयंगंतुमर्हसि॥मैथिलीमपियाहित्वमीदृसेचीरवासिनीं॥११॥एवंब्रु
वंतंपितरंरामःसंप्रस्थितोवनं॥अवाक्शिरसमासीनमिदंवचनमब्रवीत्॥१२॥इयं
धार्मिककौसल्याममभातायशस्विनी॥वृद्धाचाक्षुद्रशीलाचनचत्वांदेवगर्हते॥१३॥मया
विहीनांवरदप्रपन्नांशोकसागरं॥अदृष्टपूर्वव्यसनांभूयःसंमंतुमर्हसि॥१४॥

च्छसि॰ सएतत्तवदुस्थांप्रजामेयेत्याविच्छार्थस्येदृतेदर्शनात्॥११॥एवंब्रुवंतं॰ सीतायथासुखंगच्छवि
तिब्रुवंतं संप्रस्थितः एवंवादातयासहगमनेकृतानुमतिकत्वात्तयागंतुंप्रवृत्तः॥१२॥नचगर्हते॰
त्वद्दारत्वयामथिवनंगच्छत्यपीतिशेषः सत्परदाणांधर्मइतिज्ञात्वेतिभावः॥१३॥प्रपन्नांप्राप्तां॰ भूयःसं
मंतुप्रधानपत्नीत्वात्क्रियमाणसंमानामपिभूयोधिकंसंमंतुमर्हसि॥संमंतुंतस्याः संमानंकर्तुंमत्प्रार्थ नयेतिशेषः
॥१४॥

एतानिवर्षाणिचतुर्दशवर्षाणि· एतेनएतावानेववनवासोनाधिकइतिपुनर्दार्ढ्यायध्वनितं॥१५॥ प्रायच्छत्तद्धनाध्य
क्षः सममेवेतिपाठेवचनसमकालमेवेत्यर्थः॥१६॥ सुजाताश्रयोनिजासुजातानिसामुद्रिकोक्तलक्षणानिवंति
गात्राणीत्यन्वयः॥१७॥ उद्यतः उदयंप्राप्नुवंतः कालेप्रातःकाले॥ अनेनक्लेशतोपिविषादराहित्यंतस्याः स्त्र-

वासांसिचवरार्हाणिभूषणानिमहांतिच॥ वर्षाण्येतानिसंख्यायवैदेह्याःक्षिप्रमानय॥१५
नरेंद्रेणैवमुक्तस्तुगत्वाकोशगृहंततः॥ प्रायच्छत्सर्वमाहृत्यसीतायैक्षिप्रमेवतत्॥१६॥ सासु
जातासुजातानिवैदेहीप्रस्थितावनं॥ भूषयामासगात्राणितैर्विचित्रैर्विभूषणैः॥१७॥ व्यराज
यतवैदेहीवेश्मतत्सुविभूषिता॥ उद्यतोंशुमतः कालेखंप्रभेवविवस्वतः॥१८॥ तांभुजा
भ्यांपरिष्वज्यश्वश्रूर्वचनमब्रवीत्॥ अनाचरंतींकृपणांमूर्ध्न्युपाघ्रायमैथिलीं॥१९॥ असत
त्यःसर्वलोकेस्मिन्सततंसत्कृताःप्रियैः॥ भर्तारंनाभिमन्यंतेविनिपातगतंस्त्रियः॥२०॥ एषस्व
भावोनारीणामनुभूयपुरासुखं॥ अल्पामप्यापदंप्राप्यदुष्यंतिप्रजहत्यपि॥२१॥

चितं॥१८॥ कृपणां॥ अनाचरंतींकुद्वाचारहीनांतांभर्तृशुश्रूषापरांसीतां॥१९॥ सततंप्रियैः सत्कृताअपिवि
निपातगतंकृच्छ्रगतंभर्तारंस्त्रियाः॥ शुश्रूषितुंनानुमन्यंतेताः सर्वलोकेइहलोकेपरलोकेचासत्यः असती
त्वेनगणिताः॥२०॥ नारीणांप्रकृतत्वादसतीनां· यत्पुराअनापदवस्थायांसुखंभर्तृदत्तमनुभूयतस्यअ
ल्पामपिरोगदारिद्र्यादिलक्षणामापदंप्राप्यदृष्ट्वातंदुष्यंतिदुषयंतिनानादूषणायुक्तत्वेनवदंति· नैतावदे

जनःकैकेयीव्यतिरिक्तः सर्वोपि॥ इमांनिकृतिंवरलक्षणांआशायंसंश्रितेस्यस्यस्थितायाइतिशेषः॥७॥८॥ नेत्राभ्यां
उपलक्षितः॥९॥ औपवाह्यंवहनमात्रोपयुक्तंयुद्धानर्हमित्यर्थः युक्त्वायोजयित्वायोज्येतिपाठेप्येवमेव
परंदक्षिणांस्यामितिशेषः॥१०॥ साधुर्वीरोरामःमात्रापित्राचवनंनिर्वास्यतेयत्‌ अतःगुणवतांपुंसां

एकस्याःखलुकैकेय्याःकृतेयंखिद्यतेजनः॥ स्वार्थेप्रयतमानायाःसंश्रित्यनिकृतिंत्विमां॥७॥
एवमुक्त्वातुवचनंबाष्पेणपिहितेंद्रियः॥ रामेतिसकृदेवोक्त्वाव्याहर्तुंनशशाकसः॥८॥ सं
ज्ञांतुप्रतिलभ्यैवमुहूर्त्तात्समहीपतिः॥ नेत्राभ्यामश्रुपूर्णाभ्यां सुमंत्रमिदमब्रवीत्‌॥९॥
औपवाह्यंरथंयुक्त्वात्वमायाहिहयोत्तमैः॥ प्रापयैनंमहाभागमितोजनपदात्परं॥१०॥ एवंमन्येगु
णवतांगुणानांफलमुच्यते॥ पित्रामात्राचयत्साधुर्वीरोनिर्वास्यतेवनं॥११॥ राज्ञोवचनमाज्ञा
यसुमंत्रःशीघ्रविक्रमः॥ योजयित्वाययौतत्ररथमश्वैरलंकृतं॥१२॥ तंरथंराजपुत्राय सूतःक
नकभूषितं॥ आचचक्षेंजलिंकृत्वा युक्तंपरमवाजिभिः॥१३॥ राजासत्वरमाहूयव्यापृतंवित्तसं
चये॥ उवाचदेशकालज्ञोनिश्चितंसर्वतःशुचिः॥१४॥

गुणानांफललंएवंनिर्वासनरूपमुच्यतेशास्त्रेणे
तिमन्येइतिदुःखातिशयादुक्तिःउत्प्रेक्षालंकारः॥११॥ रथंयोजयित्वातत्ररामसन्निधौययौ॥१२॥ आचचक्षे
रथउपस्थितइत्युक्तवान्‌॥१३॥ वित्तसंचयेव्यापृतंधनाध्यक्षमित्यर्थः निश्चितंवचउवाचेत्यन्वयः
सर्वतःशुचिःइहामुत्रानघः॥१४॥

रामा·अ·
१३०

यदेवमतः किमतआह सइति· देवसमः देवतुल्यः ॥ षयतिः ॥ २५ ॥ २६ ॥ यथाभर्तुः मत विषयेवर्तितव्यंतथाअ
भिज्ञास्मि· किंच तथा श्रुतंमेस्वमातापितृभ्यामितिशेषः ॥ २७ ॥ असज्जनेन असतीजनेन· समानयितुंस
मानांकर्तुंभार्यानार्हति· नाहमलं· नसमर्था ॥ २८ ॥ विद्यतेवादनसमर्था इतिगमनसमर्थेइतिचशेषः

सत्वयानावमंतव्यः पुत्रःप्रव्राजितोवनं ॥ तवदेवसमस्त्वेषनिर्धनः सधनोपिवा ॥ २५ ॥ वि
ज्ञायवचनंसीतातस्याधर्मार्थसंहितं ॥ कृत्वांजलिमुवाचेदंश्वश्रूमभिमुखेस्थिता ॥ २६ ॥ क
रिष्येसर्वमेवाहंआर्यायदनुशास्तिमां ॥ अभिज्ञास्मियथाभर्तुर्वर्तितव्यंश्रुतंचमे ॥ २७ ॥ नमा
मसज्जनेनार्यासमानयितुमर्हति ॥ धर्माद्विचलितुंनाहमलंचंद्रादिवप्रभा ॥ २८ ॥ नातंत्री
विद्यतेवीणानाचक्रोविद्यतेरथः ॥ नापतिःसुखमेधेतयास्यादपिशतात्मजा ॥ २९ ॥ मितंद
दातिहिपितामितंभ्रातामितंसुतः ॥ अमितस्यतुदातारंभर्तारंकानपूजयेत् ॥ ३० ॥ साहमे
वंगताश्रेष्ठाश्रुतधर्मपरावरा ॥ आर्येकिमवमन्येयंस्त्रियाभर्ताहिदैवतं ॥ ३१ ॥

130

शतात्मजेतिबहुवीहिः शतपुत्रा ॥ २९ ॥ अमितस्यरोहिकामुष्मिकसकलसुखस्यकर्म ॥ षष्ठी ॥ ३० ॥
एवंगता· भर्तापरमपूज्यइतिज्ञानवती· श्रेष्ठाश्रुताधर्मेतिपाठे· श्रेष्ठाभ्यः श्वश्रूमातृप्रमुखाभ्यः
श्रुतः ॥ परावरः सामान्यविशेषरूपोधर्मोयया· श्रेष्ठेइतिपाठः ॥ कचित्· किमवमन्येयंकस्मादव

राम
१३०

स्य ३

असत्यशीलाः असत्यवचनशीलाः विकृताः विकारोपेताः स्यादिव्यापाराः दुर्गाः दुःखाभिसरणादिगतिशीलाः अत्द
दयाः स्वभर्तरि विरसाः ॥ असत्यः कुलटाः ॥ पापे परपुरुषप्रसंगादौ संकल्पो मनोव्यापारो यासां । क्षणमात्रवि
रागिणः क्षणमात्रविरागिण्य ईर्ष्या ॥ अल्पनिमित्ततः क्षणमात्रेण त्यक्तानुरागाः अविश्वसनीयस्नेहा इतिया
वत् । विरागिण्य इत्यत्र ङीवभाव आर्षः ॥ ना असत्य इति विधेयं ॥ २२ ॥ कुलं प्रशस्तं कृतमुपकारः विद्या सत्कुरूप
दिष्टधर्मविद्या । दत्तं भूषणादिदानं ॥ संग्रहः दृष्टेपि दोषे स्वीकारः यद्वा संग्रहो वंधनादि । एतत्सर्वमपि स्त्री

असत्यशीला विकृता दुर्गा अत्द्दयाः सदा ॥ असत्यः पापसंकल्पाः क्षणमात्रविरागिणः ॥ २२ ॥
न कुलं न कृतं विद्या न दत्तं नापि संग्रहः ॥ स्त्रीणां गृह्णाति हृदयमनित्यहृदया हिताः ॥ २३ ॥
साध्वीनां तु स्थितानां तु शीले सत्ये श्रुते स्थिते ॥ स्त्रीणां पवित्रं परमं पतिरेको विशिष्यते ॥ २४ ॥

णामसतीनां हृदयं न गृह्णाति । पापवृत्तेर्न प्रतिवध्नाति । नञ् बाहुल्यं अप्रतिबंधदार्ढ्यप्रतिपादनाय । का
मानुरागान्न भयं न लज्जेति न्यायात् । कुलाद्युचितं कृत्यं पश्येक त्वा लोकगर्हितकृत्ये एव प्रवर्तते । कुतः
यतो ऽनित्यहृदया अव्यवस्थितचित्ताः ॥ २३ ॥ साध्वीनां तु पतिव्रतानां तु । शीले सच्चरित्रे । सत्ये सत्यवचने
श्रुते गुरुजनोपदेशे स्थिते । स्वकुलोचितमर्यादावस्थितौ नु । तु रेवार्थे । एवं व्यवस्थितानां स्त्रीणां परमं प
वित्रं उत्तमं पुण्यसाधनं पतिरेक एव । ॥ अत एव स्त्रियाः सर्वधर्मसाधनेभ्यो विशिष्यते ॥ २४ ॥

समाहितंधीरं॥३९॥ अथरामवचः श्रवणानंतरं सन्नादः शोकजः शब्दः॥४०॥ मेघोवाद्यविशेषः मुरजपणवाएवमेघाइ
तिरूपकंवा विलपितंरामगुणकैकेयीदुर्गुणप्रतिपादकंवाक्यं परिदेवनंरोदनं व्यसनगतंप्राप्तेष्टवि
योगं॥४१॥ इतिश्रीरामाभिरामेश्रीरा० अयो० एकोनचत्वारिंशः सर्गः॥३९॥ उपसंगत्य पादपतनपूर्वं

वचनंराघवस्यैतद्धर्मयुक्तंसमाहितं॥ शुश्रुवुस्ताःस्त्रियः सर्वाःशोकोपहतचेतसः॥३९॥ जज्ञे
थतासांसन्नादः क्रौंचीनामिवनिस्वनः॥ मानवेंद्रस्यभार्याणामेवंवदतिराघवे॥४०॥ मुरजप
णवमेघघोषवद्दशरथवेश्मबभूवयत्पुरा॥ विलपितपरिवेदनाकुलंव्यसनगतंतदभू
त्सुदुःखितं॥४१॥ इत्यार्षेश्रीरामायणेअयोध्याकांडेएकोनचत्वारिंशः सर्गः॥३९॥ अथराम
श्चसीताचलक्ष्मणश्चकृतांजलिः॥ उपसंगत्यराजानंचक्रुर्दीनाःप्रदक्षिणं॥१॥ तंचापिसम
नुज्ञाप्यधर्मज्ञः सहसीतया॥ राघवः शोकसंमूढः जननीमभ्यवादयत्॥२॥ अन्वक्षंलक्ष्मणो
भ्रातुःकौसल्यामभ्यवादयत्॥ अपिमातुः सुमित्रायाजग्राहचरणौपुनः॥३॥ तंवंदमानंरुद
तीमातासौमित्रिमब्रवीत्॥ हितकामामहाबाहुंमूर्ध्न्युपाघ्रायलक्ष्मणं॥४॥

कंप्रणाम्य दीनाः
मातापित्रोः शोकदर्शनाद्दीनाइव॥१॥ समनुज्ञाप्य कृतानुमतिकंकृत्वा शोकसंमूढः मातृदुःखदर्शना
त्सइव॥२॥ अन्वक्षंअनुपदं रामेणकौसल्यावंदनानंतरंभ्रातुःजननीमितिशेषः कौसल्यामभ्यवा
दयत्पुनःकौसल्यावंदनानंतरंमातुःसुमित्राया अपिअपिनाऽन्यासांच॥३॥४॥

शुद्धसत्वाशुद्धचित्ता· पुत्रादेर्वनगमनेनदुःखंसीतावाक्यश्रवणेनचहर्षः ॥३२॥ अभिप्रेक्ष्यदृष्ट्वा अतिसत्कृतांसर्व
जनैरितिशेषः ॥३३॥ वनवासस्यवनवासकालस्य ॥३४॥ सुप्तायाः सुप्तायाइव· चतुर्दशघटीवत्तु मिष्यंति· ॥ सम
ग्रंभ्रातृभार्यासंहितं· समग्रश्रेयस्कंच· पुनरपिसुहृद्भिर्वृतंराजत्वेन ॥३५॥ अभिनीतार्थं निर्णीतार्थं· त्रयः

सीतायावचनंश्रुत्वाकौसल्याहृदयंगमं ॥ शुद्धसत्वाममोचाश्रुसहसादुःखहर्षजं ॥३२॥ तांप्रांजलि
रभिप्रेक्ष्यमातृमध्येतिसत्कृतां ॥ रामः परमधर्मात्मामातरं वाक्यमब्रवीत् ॥३३॥ अंबमादुःखिता
भूत्वापश्यपस्त्वंपितरंमम ॥ क्षयोपिवनवासस्यक्षिप्रमेवभविष्यति ॥३४॥ सुप्तायास्तेगमिष्यंति
नववर्षाणिपंचच ॥ समग्रमिहसंप्राप्तंमांद्रक्ष्यसिसुहृद्वृतं ॥३५॥ एतावदभिनीतार्थमुक्त्वासज
ननीवचः ॥ त्रयःशतशतार्धाहि ददर्शावेक्ष्यमातरः ॥३६॥ ताश्चापिसतथैवार्तामातृर्दशरथा
त्मजः ॥ धर्मयुक्तमिदंवाक्यंनिजगादकृतांजलिः ॥३७॥ संवासात्परुषंकिंचिदज्ञानादपिय
त्कृतं ॥ तन्मेसमुपजानीतसर्वाश्चामंत्रयामिवः ॥३८॥

शतानित्रीणिशतानिशतार्धंचसंख्याया
सांताः त्रेस्त्रयसादेशश्चार्षः ॥ एवंभूतायाःमातरः ॥ संतिताः ॥ अवेक्ष्यविविच्यददर्शेत्यर्थः ॥ तथामातरश्च
तंदृष्टुरितिशेषः ॥३६॥ तथैवकौशल्यावदेवार्तास्तामातृः प्रतिइदंजगादेत्यन्वयः ॥३७॥ संवासःसहवा
सः परुषमुक्तमितिशेषः ॥ अज्ञानादपियत्कृतंपरुषंकर्म· ॥ समुपजानीतत्तांतमित्यनुजानीतेत्यर्थः ॥३८

यत्रयद्देशप्रापणेमांवक्ष्यसेनियोजसितंदेशंक्षिप्रंप्रापयिष्यामि॰॥नेदृरजन्यांवस्तव्यमितिशेषः ११
कुतस्तत्राह॰ चतुर्दशेति॰ यानिचतुर्दशवर्षाणिवनेवस्तव्यानितान्यद्यैवोपक्रमितव्यानि आरंभ
णीयानियतोदेव्याकैकेय्या अद्यैववनंगच्छेतिप्रेरितोसि १२ त्दृष्टेनचेतसेत्यनेनांगिरामनउत्सा

रथमारोहभद्रंतेराजपुत्रमहायशाः॥क्षिप्रंत्वांप्रापयिष्यामियत्रमांरामवक्ष्यसे॥११॥चतु
र्दशहिवर्षाणिवस्तव्यानिवनेत्वया॥ तान्युपक्रमितव्यानियानिदेव्याप्रचोदितः॥१२॥तंर
थंसूर्यसंकाशंसीताहृष्टेनचेतसा॥आरुरोहवरारोहाकृत्वालंकारमात्मनः॥१३॥वनवा
संहिसंख्यायवासांस्याभरणानिच॥भर्तारमनुगच्छंत्यैसीतायैश्वशुरोददौ॥१४॥तथैवायु
धजातानिभ्रातृभ्यांकवचानिच॥रथोपस्थेप्रविन्यस्यसचर्मकठिनंचयत्॥१५॥अथो॰
ज्वलनसंकाशंचामीकरविभूषितं॥तमारुरुहतुस्तूर्णंभ्रातरोरामलक्ष्मणौ॥१६॥सीतातृ
तीयानारूढान्दृष्ट्वारथमचोदयत्॥सुमंत्रः संमतानश्वान्वायुवेगसमान्जवे॥१७॥

हमित्यक्तोमुख्यःशाकुनोध्वनितः॥१३॥अलंकारकरणोपायमुक्तंस्मारयति॰।वनवासंहीति॰॥यानिद
दौतानिरथोपस्थेविन्यस्येत्यन्वयः अग्रिमश्लोकेतथैवेतिपदस्वरसात्॥१४॥भ्रातृभ्यांभ्रात्रोरित्यर्थःस
चर्मपिनद्धंपेटकं॰ कठिनं॰ खनित्रं॰ प्रविन्यस्यस्थापयित्वा॥१५॥अथो॰ अनंतरंआरुरुहतुः॥१६॥संमतान्

अत्रत्यसुहृज्जनेस्वनुरक्तोपित्वंमयावनवासायसृष्टोऽनुमतःवनंगच्छति· भ्रातरिभरामेप्रसादमनववा
नंमाकार्षीः भ्रातरीत्यनेनसोदरवदेवायंद्रष्टव्यइतिसूचितं॥५॥कनीयसोज्येष्ठानुवर्तनंपरमोधर्मइत्याह
व्यसनीवेति·राज्याभावेन॥६॥इदंज्येष्ठानुवर्तनरूपं·धर्मांतरमपिक्षत्रोचितमाह·दानमित्यादिमृधेषु
युद्धेषु·तनुत्यागःतनावनास्थापूर्वकंयुद्धकरणं॥७॥असौएवंस्वपुत्रंलक्ष्मणमुक्त्वासंसिद्धंवनंगंतुं

संसृष्टस्त्वंवनवासायस्वनुरक्तःसुहृज्जने॥रामेप्रमादंमाकार्षीःपुत्रभ्रातरिगच्छति॥५॥व्यस
नीवासमृद्धोवागतिरेषतवानघ॥एषलोकेसतांधर्मोयज्ज्येष्ठवशगोभवेत्॥६॥इदंहिवृत्तमु
चितंकुलस्यास्यसनातनं॥दानंदीक्षाचयज्ञेषुतनुत्यागोमृधेषुहि॥७॥लक्ष्मणंत्वेवमुक्त्वासा
संसिद्धंप्रियराघवं॥सुमित्रागच्छगच्छेतिपुनःपुनरुवाचतं॥८॥रामंदशरथंविद्धिमांवि
द्धिजनकात्मजां॥अयोध्यामटवींविद्धिगच्छतातयथासुखं॥९॥ततःसुमंत्रःकाकुत्स्थंप्रां
जलिर्वाक्यमब्रवीत्॥विनीतोविनयज्ञश्चमातलिर्वासवंयथा॥१०॥

निश्चितमनस्कं·प्रिय
राघवंप्रियरूपंराघवंगच्छगच्छेतिपुनःपुनरुवाच॥शाकुनसंपत्तयेइतिभावः॥तंलक्ष्मणंपुनरुवा
चेत्यनुकर्षः॥८॥तद्वचनमाह·राममिति·एवंचमातृपितृनगरस्मरणेनमनश्चांचल्यंमा·कुर्वि
तिध्वनितं॥रामस्यपितृवत्सेव्यत्वंसीतायांमातृवद्भावकरणं अरण्याअयोध्यावत्पालत्वंतेनत

२७।२८। करेणूनां तत्पालकवद्धकरिणीनां ॥२६॥ सन्नः स्विन्नः ग्रहेण राहुणा ॥२०॥ अचिंत्यात्मा· अहंममताभिमान
राहित्येन तद्भिरज्ञेयस्वरूपः। अनेन सर्वथा ममताराहित्यं सूचितं· तदेव स्वस्य ध्वनयन्नाह· त्वरितं वाह्यता

एवं वदंतस्ते सोढुं न शेकुर्बाष्पमागतं ॥ नरास्तमनुगच्छंतः प्रियमिक्ष्वाकुनंदनं ॥२७॥ अथ राजा व
तः स्त्रीभिर्दीनाभिर्दीनचेतनः ॥ निर्जगाम प्रियं पुत्रं द्रक्ष्यामीति ब्रुवन्गृहात् ॥२८॥ शुश्रुवे चाग्र
तः स्त्रीणां रुदंतीनां महास्वनः ॥ यथा नादः करेणूनां बद्धे महति कुंजरे ॥२९॥ पिता हि राजा काकु
त्स्थः श्रीमान्सन्नस्तदाबभौ ॥ परिपूर्णः शशी काले ग्रहेणोपप्लुतो यथा ॥३०॥ स च श्रीमानचिं
त्यात्मा रामो दशरथात्मजः ॥ सूतं संचोदयामास त्वरितं वाह्यतामिति ॥३१॥ रामो याहीति सूतं तं
तिष्ठेति च जनस्तथा ॥ उभयं नाशकत्सूतः कर्तुमध्वनि चोदितः ॥३२॥ निर्गच्छति महाबाहौ रा
मे पौरजनाश्रुभिः ॥ पतितैरभ्यवहितं प्रणनाश महीरजः ॥३३॥ रुदिताश्रुपरिद्यूनं हाहाकृत
मचेतनं ॥ प्रयाणे राघवस्यासीत्पुरं परमपीडितं ॥३४॥ सुस्राव नयनैः स्त्रीणामस्रमायाससं
भवं ॥ मीनसंक्षोभचलितैः सलिलं पंकजैरिव ॥३५॥ दृष्ट्वा तु नृपतिः श्रीमानेकचित्तगतं पुरं
निपपातैव दुःखेन कृत्तमूल इव द्रुमः ॥३६॥

मिति ॥३१॥ तं सुमंत्रं· आहेति शेषः उभयं नाशकत्· एवं चना
तिमंदं नातिवेगमवाहयदित्यर्थः ॥३२॥ अभ्यवहितं रथनेम्युद्धतं ॥३३॥ रुदिताश्रुपरिद्यूनं· अनुत्साहवत् ॥३४॥
आयासः खेदः चलितैः तिर्यग्भ्रमितैः पंकजैः वर्षसंभ्रमतोदकैरिति बोध्यं· अपादानस्यैव करणत्वविवक्षा ॥३५॥ एक

चिररात्रायेत्यव्ययं चिरकालावस्थित्यर्थमित्यर्थः नगरे विद्यमानस्य सर्वमनुष्यबलस्य अश्वगजादेर्मूर्च्छा जनस्य
तिर्यक्जंतुरूपस्य च मूर्च्छा बभूवेत्यर्थः ॥१८॥ तदेव प्रपंचयति तदिति समाकुलमिति ॥ कर्तव्यतामूढं च तत्सं
भ्रांतरामानुगमनाय त्वरायुक्तं ॥ मत्ता रामवियोगेन संकुपिता द्विपा यस्मिन् हयानां दुःखेन ॥ सिंजितानां

प्रयाते तु महारण्यं चिररात्राय राघवे ॥ बभूव नगरे मूर्च्छा बलमूर्च्छा जनस्य च ॥१८॥ तत्समाकुल
संभ्रांतं मत्तसंकुपितद्विपं ॥ हयसंजितनिर्घोषं पुरमासीन्महास्वनं ॥१९॥ ततः सबालवृद्धा सा पु
री परमपीडिता ॥ राममेवाभिदुद्राव घर्मार्त्तः सलिलं यथा ॥२०॥ पार्श्वतः पृष्ठतश्चापि लंबमानास्त
मुन्मुखाः ॥ बाष्पपूर्णमुखाः सर्वे तमूचुर्भृशनिस्वनाः ॥२१॥ संयच्छ वाजिनां रश्मीन् सूत याहि शनैः
शनैः ॥ मुखं द्रक्ष्याम रामस्य दुर्दर्शनो भविष्यति ॥२२॥ आयसं हृदयं नूनं राममातुरसंशयं ॥ यद्दे
वगर्भप्रतिमे वनं याति न भिद्यते ॥२३॥ कृतकृत्या हि वैदेही छायेवानुगता पतिं ॥ न जहाति रता ध
र्मे मेरुमर्कप्रभा यथा ॥२४॥ अहो लक्ष्मण सिद्धार्थः सततं प्रियवादिनं ॥ भ्रातरं देवसंकाशं यस्त्वं
परिचरिष्यसि ॥२५॥ महत्येषा हि ते बुद्धिरेष चाभ्युदयो महान् ॥ एष स्वर्गस्य मार्गस्य यदेनमनुगच्छसि ॥२६॥

शब्दवत्पर्याकुलप्राणिभूषणानां निर्घोषो यस्मिन् ॥१९॥ परमपीडिता रामवियोगदुःखेनेति शेषः ॥२०॥ तं सु
मंत्रं ॥२१॥ ॥२२॥ देवगर्भप्रतिमे स्कंदतुल्ये ॥ यद्वा देवगर्भो देवनिधिर्हिरण्यगर्भस्तत्प्रतिमे याति गच्छति स
ति ॥२३॥ मेरुमित्यादि नित्यं तत्प्रदक्षिणसंचारात् ॥२४॥ यस्त्वं भ्रातरं परिचरिष्यसि स त्वं सिद्धार्थः कृतार्थः ॥२५॥

रामा॰ अ॰
१३४

वत्सकारणात्॰ अत्यगारं वत्सावस्थितिमन्गरहमुद्दिश्यागच्छंतीसवत्सावद्धवत्साधेनुर्यथाधावतिएवंराममा
ताअधावतएषुसवत्सेत्याद्यधिकारकथनंकवेरपिशोकाविष्टत्वान्नदोषाय॥४३॥४४॥रामलक्ष्मणसी
तार्थंतद्वियोगजशोकवशात्॰नेत्रजंवारिस्रवंतीमुचंतीनृत्यंतीमिवेतस्ततः॥परिभ्रमंतीअसक्तैः॥
त्ततरामइतिशेषः॥४५॥चक्रयोर्युयुत्सुसेनयोरंतरास्थितः॥उदासीनःपुरुषइव॥सुमंत्रस्यात्मादोला

अत्यगारमिवायांतीसवत्सावत्सकारणात्॥बद्धवत्सायथाधेनूराममातान्वधावत॥४३॥
तथारुदंतींकौसल्यांरथंतमनुधावतीं॥क्रोशंतींरामरामेतिहासीतेलक्ष्मणेतिच॥४४॥राम
लक्ष्मणसीतार्थंस्रवंतींवारिनेत्रजं॥असकृत्प्रैक्षतसतांनृत्यंतीमिवमातरं॥४५॥तिष्ठेति
राजाचुक्रोशयाहियाहीतिराघवः॥सुमंत्रस्यबभूवात्माचक्रयोरिवचांतरा॥४६॥नाश्रौ
षमितिराजानमुपालब्धोपिवक्ष्यसि॥चिरंदुःखस्यपापिष्ठमितिरामस्तमब्रवीत्॥४७॥
सरामस्यवचःकुर्वन्ननुज्ञाप्यचतंजनं॥व्रजतोपिहयान्क्षिप्रंचोदयामाससारथिः॥४८॥

234

थितोबभूव॥४६॥ननुराजवचनातिक्रमेदोषःस्यादतआह॰नेति॥उपालब्धोपि॰मयाबहुशस्तिष्ठतिष्ठेत्यु
क्तोपिमद्वचनंनाकार्षीरितिपुनर्गमनानंतरंराज्ञोपालब्धोपिनाश्रौषमितिवक्ष्यति॰दुःखस्यमद्दुःखस्य
हेतुभूतंपापिष्ठं॥अतिदुःखजनकत्वात्पापा॥ष्ठंचिरंविलंबनमितिहेतोशीघ्रंगच्छेतिरामस्तमब्र
वीत्॥४७॥तंजनं॰अनुव्रजत्पौरजनंअनुज्ञाप्यरामेणाकृतांपुनःपरावृत्यगमनानुज्ञांप्रापय्यव्रजतो

राम
१३४

सीदंतंमर्द्धंतं॥३७॥अंतःपुरसमद्धं॰ अंतःपुरसहितंक्रोशंतंउच्चैःशब्देनरुदंतंराजानंदृष्ट्वाकेचिन्नराहारामेति केचित् हारामभातेतिपर्यदेवयन्शुशुचुः॥उपलक्षणमेतत्॰ केचित्हाराजन्नित्यपि॰ राममातेत्यार्षं॥३८॥अनु पश्चाद्गागेऽदृष्टत्तमाणोरामः॥मातरंराजानंचस्वमनुगतौददर्श॥३९॥पाशेननिबद्धःकिशोरोऽश्वबालोमातरंयथा नपश्यतिएवंधर्मपाशेनसंयुक्तःसबद्धइवनित्यमुक्तस्वभावत्वादेवमुक्तिः॥प्रकाशंनाभ्युदैक्षत॰ संकुचित

ततोहलहलाशब्दोजज्ञेरामस्यपृष्ठतः॥नराणांप्रेक्ष्यराजानंसीदंतंभृशदुःखितं॥३७॥हारामेतिज नाःकेचिद्धाममातेतिचापरे॥अंतःपुरसमद्धंचक्रोशंतंपर्यदेवयन्॥३८॥अन्वीक्षमाणोरामस्तु विषण्णंभ्रांतचेतसं॥राजानंमातरंचैवददर्शानुगतौपथि॥३९॥सबद्धइवपाशेनकिशोरोमात रंयथा॥धर्मपाशेनसंयुक्तःप्रकाशंनाभ्युदैक्षत॥४०॥पदातिनौचयानार्हावदुःखार्हौसुखोचितौ दृष्ट्वासंचोदयामासशीघ्रंयाहीतिसारथिं॥४१॥नहितत्पुरुषव्याघ्रोदुःखजंदर्शनंपितुः॥मातु श्चसहितुंशक्तस्तोत्रैर्नुन्नइवद्विपः॥४२॥

दर्शनव्यापारोभूदित्यर्थः॥४०॥यानार्हैत्वादिगुणविशि ष्टौमातापितरौदृष्ट्वेत्यन्वयः॥४१॥दुःखजं॰ दुःखंजायतेऽस्मात्तादृशं॰ अन्यत्रापिदृश्यतइतिदुःख दमितिपाठांतरंलोकदृष्ट्येदंसहितुंनीषसहेतिवेद्॰॥दुःखितौपितरौद्रष्टुंनशक्तइतियावत्॰॥तोत्र मंकुशः॥तत्पीडितोद्विपोयथास्वपथवर्त्तिवस्तुदर्शनाशक्तस्तद्वत्॰ अस्यचकैकेयीवाक्यमेवांकुशः॥४२

अभिशस्तः मिथ्याभिशंसनं प्रापितः क्रोधनीयानि प्रजा क्रोधकराणि ॥३।४॥ वनं गंतुमिति शेषः अस्य जनस्ये
त्यस्य का किं विशिष्य कथनेन सर्वस्य जगतः परित्रातेति भगवत्स्वरूपज्ञायाकस्याप्यिद्वद्वचः ॥५॥ संज्ञयं अ

न क्रुध्यत्यभिशस्तोपि क्रोधनीयानि वर्जयन् ॥ क्रुद्धान्प्रसादयन्सर्वान्समदुःखः क्व गच्छ
ति ॥३॥ कौसल्यायां महातेजा यथा मातरि वर्त्तते ॥ तथा यो वर्तते स्मासु महात्मा क्वनुगच्छ
ति ॥४॥ कैकेय्या क्लिश्यमानेन राज्ञा संचोदितो वनं ॥ परित्राता जनस्यास्य जगतः क्व नु
गच्छति ॥५॥ अहो निश्चेतनो राजा जीवलोकस्य संक्षयं ॥ धर्म्यं सत्यव्रतं रामं वनवासे
प्रवत्स्यति ॥६॥ इति सर्वा महिष्यस्ता विवत्सा इव धेनवः ॥ रुरुदुश्चैव दुःखार्त्ताः
सस्वरं च विचुक्रुशुः ॥७॥ स तमंतःपुरे घोरमार्तशब्दं महीपतिः ॥ पुत्रशोकाभिसंतप्तः
श्रुत्वा चासीत्सुदुःखितः ॥८॥ नाग्निहोत्राण्यहूयंत सूर्यश्चांतरधीयत ॥ व्यसृजन्क
वलान्नागा गावो वत्सान्न पाययन् ॥९॥

135

धारत्वेन गृहे भूतं वनवासे तन्निमित्तं प्रवत्स्यति प्रवासयति ॥६।७।८॥ नाहूयंत अग्निहोत्रिभी
रामदुःखादिति शेषः अंतरधीयत रामव्यसनात्तद्दिवसे दिवसशेषे सत्यपि अंतर्हितो भूत्
अकाले दुर्दिनमभूदिति शेषः व्यसृजन् त्यक्तवंतः नागाः गजाः नपाययन्नापाययन् अडभाव आर्ष ॥९॥

राज्ञोजनः राजसंबंधीजनः अवरोधजनः उपजीविजनश्च रामंमनसाप्रदक्षिणंकृत्वान्वर्ततदेहमात्रेणेति शेषः रथस्पर्शीघ्रगत्वात् इतिभावः अश्रुवेगेनमनसातुनन्वर्तत। मानुषंइतरमनुष्यसमूहः अश्रुवेगेनमनसापिनन्वर्तत। अपिनादेहेनचनन्वर्तत। मनसाप्यश्रुवेगैश्चेतिपाठांतरं। अत्रपाठेमनसोऽनिवृत्तेरश्रुवेगोज्ञापकः॥४८॥ उत्कट दिदृक्षावतोराज्ञस्तसचिववचनान्निवृत्तिरित्याह। यमिच्छेदिति

न्ववर्तंतजनोराज्ञोरामंकृत्वाप्रदक्षिणं॥ मनसाप्याशुवेगेननन्ववर्ततमानुषं॥४९॥ यमिच्छेत्पुन रायातंनैवदूरमनुव्रजेत्। इत्यमात्यामहाराजमूचुर्दशरथंवचः॥५०॥ तेषांवचः सर्वगुणोप पन्नः प्रस्विन्नगात्रः प्रविषण्णरूपः। निशम्यराजाकृपणः सभार्योव्यवस्थितस्तंसुतमीक्षमाणः ॥५१॥ इत्यार्षेश्रीरा० अयो० चत्वारिंशःसर्गः॥४०॥ तस्मिंस्तुपुरुषव्याघ्रेनिष्क्रामतिकृतांजलौ आर्तशब्दोहिसंजज्ञेस्त्रीणामंतःपुरेमहान्॥१॥ अनाथस्यजनस्यास्यदुर्बलस्यतपस्विनः। योगतिःशरणंचासीत्सनाथः क्वनुगच्छति॥२॥

॥५०॥ व्यवस्थितः अवस्थितः॥५१॥ इतिश्रीरामाभिरामेश्रीरामीयेरामायणतिलके अयोध्याकांडेचत्वारिंशःसर्गः॥४०॥ इदानींतत्प्रयाणनिमित्तसर्वप्रजाशोकउच्यते। तस्मिन्नितिमात्रवेष्टितपितृउद्देशेनकृतांजलौ। निष्क्रामतिनिगरान्निर्गच्छतिसति॥१॥ नदेवाह। अनाथस्येति। तपस्विनः शोच्यस्य। गतिः सकलसुखावाप्तिहेतुः शरणंसर्वापद्भ्योरक्षिता॥२॥

१७ सुताश्चानर्थितोऽनपेक्षिणो मातापित्रोरिति शेषः स्त्रीणां भर्तारोऽनर्थिनः भ्रातरो भ्रातॄणामनर्थिन इति शेषः
राममेवान्वचिंतयन् तद्ध्यानेन सर्वो जनः सर्वत्र विरक्तोऽभूदित्याशयः ॥१८॥१९॥ पुरंदरेणारहिता सपर्व
ता समेरुः ॥ यथा मही चलति तस्य त्रिलोकीपतित्वात् ॥ तथा रामेणारहिताऽयोध्या च चाल रक्षकाभावात् ॥

नवाति पवनः शीतो न शशी सौम्यदर्शनः ॥ न सूर्यस्तपते ल्लोकं सर्वं पर्याकुलं जगत् ॥ १७ ॥ अनर्थिनः
सुतास्त्रीणां भर्तारो भ्रातरस्तथा ॥ सर्वे सर्वं परित्यज्य राममेवान्वचिंतयन् ॥ १८ ॥ ये तु रामस्य सुहृदः
सर्वे ते मूढचेतसः ॥ शोकभारेण चाक्रांताः शयनं नैव भेजिरे ॥ १९ ॥ ततस्त्वयोध्यारहिता महात्मना
पुरंदरेणेव मही सपर्वता ॥ चचाल घोरं भयशोकदीपिता सनागयोधाश्वगणा ननाद च ॥ २० ॥ इत्या
र्षे श्रीरामायणे अयोध्याकांडे एकचत्वारिंशः सर्गः ॥ ४१ ॥ यावत्तु निर्यतस्तस्य रजोरूपमदृश्यत ॥ नै
वेक्ष्वाकुवरस्तावत्संजहारात्मचक्षुषी ॥ १ ॥ यावद्राजा प्रियं पुत्रं पश्यत्यत्यंतधार्मिकं ॥ तावद्व्यवर्ध
तेवास्य धरण्यां पुत्रदर्शने ॥ २ ॥

ननाद च दुःखाद्विक्रंदेत्यर्थः ॥ २० ॥ इति श्रीरामाभिरामे श्रीरामीयेरा॰ अयो॰
एकचत्वारिंशः सर्गः ॥ ४१ ॥ निर्यतस्तस्य रामस्य संबंधि रजसो रूपं रथ्याधूलेः स्वरूपं यावत्तेनादृश्यतता
वदात्मनश्चक्षुषी न संजहार इदं रामरथोरज इति प्रीत्या तत्पश्यन्नेवासीदिति भावः ॥ १ ॥ यावत्प्रियं पुत्रं
राजा पश्यति रथधूलिदर्शनद्वारेति शेषः ॥ तावत्पुत्रदर्शनेन निमित्तेन धरण्यां स्थितोऽस्य देहो व्यवर्धतेवउत्था

दुर्दिनाद्युत्पातारात्रोरावणस्यचनाशसूचकाइतिबोध्यं· त्रिशंकुर्दक्षिणदिक्स्थः लोहितांगो भौमः गुरु बुधौ अन्येसर्वेग्रहाःशनिशुक्रादयःसोममभ्येत्य॥रात्रावेव क्रगत्या चंद्रंप्राप्यदारुणाक्रूरार्चिषः संतोव्य वस्थिताः॥१०॥गतार्चीषि· त्यक्तस्वाभाविककांतीनि· ग्रहाःशन्यादयः विशाखाः विमार्गस्थाः सधूमाश्च

त्रिशंकुर्लोहितांगश्च बृहस्पतिबुधावपि॥ दारुणाः सोममभ्येत्य ग्रहाः सर्वे व्यवस्थिताः॥१०॥ नक्ष त्राणि गतार्चीषि ग्रहाश्च गततेजसः॥ विशाखाश्च सधूमाश्च नभसि प्रचकाशिरे॥११॥ कालिका निलवेगेन महोदधिरिवोत्थितः॥ रामे वनं प्रव्रजिते नगरं प्रचचाल तत्॥१२॥ दिशः पर्याकु लाः सर्वास्तिमिरेणेव संवृताः॥ न ग्रहो नापि नक्षत्रं प्रचकाशे न किंचन॥१३॥ अकस्मान्नागरः सर्वो जनो दैन्यमुपागमत्॥ आहारे वा विहारे वा न कश्चिदकरोन्मनः॥१४॥ शोकपर्यायसंतप्तः सततं दीर्घमुच्छ्वसन्॥ अयोध्यायां जनः सर्वश्शुशोच जगतीपतिं॥१५॥ बाष्पपर्याकुलमुखो रा जमार्गगतो जनः॥ न हृष्टो लभ्यते कश्चित् सर्वः शोकपरायणः॥१६॥

नभसिदृश्यंते॥११॥ कालिका मेघपंक्तिः अनिलवेगेन आकाशेउत्थितउदधिरिव दृश्यते॥ नगरं प्रचचालेत्यनेनभूकंपः॥१२॥१३ अकस्मात्दैन्यहेतुकारणाभावेपिदैन्यंरामवियोगदैन्याधिकंदैन्यं॥१४॥ शोकेनरामवियोगजेनप र्यायसंतप्तः पुनःपुनः संतप्तः प्रतिज्ञापालनरूपधर्मवत्यपिकोपउत्पातः॥१५॥ पूर्वंतुकेषांचिन्नतत्वज्ञा

वा॰रा॰टी॰अयो॰स॰४१ ७

ननुममत्यागेपिमत्पुत्रादेः कथंत्यागोयेचत्वामनुजीवंतीत्यादिनोक्तस्तत्राह॰॥भरतइति॰यदित्वयाप्राप्तंरा
ज्यंप्राप्यभरतःप्रनीतःस्यात्तुष्टःस्यात्तर्हि मेमरणानंतरंसभरतः पित्रार्थंपितृत्वमनुयुक्तश्राद्धार्थंय
त्दद्यात्दद्यात्तत्तद्दत्तंमामाआगमत्॰माप्राप्नोत्वित्यर्थः अन्यथात्वहंनत्यजामीत्यर्थः कृतकस्तुअ
नुजानामीत्यादिसार्धश्लोकएकंवाक्यं॰तत्पूर्वार्धेत्यजामीत्यस्यानुकर्षः॥नत्वन्तीयार्थेयन्मेसदद्या
त्पित्रर्थंमामतद्दत्तमागमदितिपाठःसदद्यादितिचावर्तते॥भरतस्त्वयाप्राप्तंराज्यंप्राप्यप्रती

भरतश्चेत्प्रतीतःस्याद्राज्यंप्राप्यैतदव्ययं॥यन्मेसदद्यात्पित्रर्थंमामांतद्दत्तमागम
त्॥९॥अग्रयरेणसमुध्वस्तंसमुत्थाप्यनराधिपं॥न्यवर्ततदादेवीकौसल्याशोककृ
र्शिता॥१०॥

137

ताःविवेकवान्सन् यत्प्राप्यंराज्यंतत्सपित्रर्थंपितुर्ममप्रीतिसंपादनाययदिदद्यात्त्यजेत्॰ मां
चातद्दत्तंनकृतंनतस्मैदत्तंदानंराज्यस्यपयेनतादृशंमांप्रीत्यापूर्ववदागमत्॰प्राप्नुयाञ्चेत्तदायत्स
मेदद्यात् अस्मिन्लोकेविहारशय्याभोजनादिपरत्रंचपरलोकेपिंडदानादितत्सर्वंअनुजाना
मिअंगीकरोमि॰॥अन्यथातंत्यजाम्येवेत्यर्थइत्याह॥९॥रेणसमुध्वस्तं॰॥मुविलुंठनाद्रजोव्याप्तंन्यव
र्तनराज्ञासहेतिशेषः॥१०॥

रजसोप्यदर्शनेत-च्छरीरंपतितमभूदित्याह॥ नेतिरामस्यरजः रामरथोद्धतंरजइत्यर्थः॥३॥ तस्येति॥ पतितंतमुत्था
प्यतस्यदक्षिणंबाहुंधृत्वाकौसल्यानुअगात्तस्यपुरंप्रतिगम्यमानमनुआसद्दैवससार॥ कैकेयीत्वस्यवामं
पार्श्वमेवकेवलमन्वगात्‌ नथान्वंचराज्ञोऽस्यापरमवैरस्यात्‌॥४॥ तदेवाह॥ तामिति॥५॥ नचवांधवी॥ वंध्

नपश्यतिरञ्जोप्यस्ययदारामस्यभूमिपः॥ तदार्तश्चविषण्णश्चपपातधरणीतले॥३॥ तस्यदक्षिणमन्वा
गात्कौसल्याबांहुमंगना॥ परंचास्यान्वगात्पार्श्वंकैकेयीसासुमध्यमा॥४॥ तांनयेनचसंपन्नोधर्मे
णविनयेनच॥ ७ वाचराजाकैकेयीसमीस्यव्यथितेंद्रियः॥५॥ कैकेयिमाममकांगानिमास्प्राक्षीःपा
पनिश्चये॥ नहित्वांद्रष्टुमिच्छामिनभार्यानचवांधवी॥६॥ येचत्वामनुजीवंतिनाहंतेषांनतेमम
म॥ केवलार्थपरांहित्वांत्यक्तधर्मांत्यजाम्यहं॥७॥ अगृह्णांयच्चतेपाणिंअग्निंपर्यणयंचयत्‌॥ अनु
जानामितत्सर्वमस्मिन्लोकेपरत्रच॥८॥

नास्नेहपात्रदास्यादिरूपापिनेत्यर्थः॥ अणांतत्वान्
ङीप्॥६॥७॥ नकेवलमैहिकव्यवहारस्यत्यागः किंतुपारलौकिकस्यापीत्याह॥ अगृह्णामिति॥ यच्च
तेपाणिंपर्यगृह्णांयच्चत्वामग्निंपर्यणायंप्रदक्षिणमनयं अग्निहोत्रसंबंधंवाकार्यंतत्सर्वंअस्मि
न्लोकेपाणिग्रहणसाध्यक्रीडादिपरलोकेऽग्निहोत्रादिसाध्यस्वर्गादिचानुजानामित्यजामि॥८॥

रामा·अ·
१३८

सुखसदोचिता· सुखस्पसदाउचितातादृशपिकंटकेषाक्रमणेनपदविक्षेपेणक्लांतापीडिता॥१९॥स्वापदानां
व्याघ्रादीनांमासमंतान्नर्दितं॥२०॥सकामाभवेतिवक्रोक्त्या· अनपकारिणांदुःखदानात्तेकामपूर्तिर्नकदा
पीतिभावः विधवात्वेहेतुर्नहीत्यादि॥२१॥अपस्नातः मृतस्नातः अरिष्टं कश्मलमयं॥२२॥तदेवाह·शू

सान्त्वनंजनकस्पेष्टासुतासुखसदोचिता॥कंटकाक्रमणक्लांतावनमध्यगमिष्यति॥१९॥अ
नभिज्ञावनानांसान्त्वनंभयमुपैष्पति॥स्वापदानर्दितंश्रुत्वागंभीरंरोमहर्षणं॥२०॥सकामा
भवकैकेयिविधवाराज्यमावस॥नहितंपुरुषव्याघ्रंविनाजीवितुमुत्सहे॥२१॥इत्येवंवि
लपन्राजाजनौघेनाभिसंवृतः॥अपस्नातइवारिष्टंप्रविवेशगृहोत्तमं॥२२॥शून्यचत्वरवे
श्मांतांसंवृत्तापणवेदिकां॥क्लांतदुर्बलदुःखार्तनात्याकीर्णमहापथां॥२३॥तामवेक्ष्यपुरीं
सर्वांराममेवानुचिंतयन्॥विलपन्प्रविशद्राजागृहंसूर्यइवांबुदं॥२४॥महाहृदमिवा
क्षोभ्यंसुपर्णेनहृतोरगं॥रामेणरहितंवेश्मवैदेह्यालक्ष्मणेनच॥२५॥

न्येति· शून्यानिर्मनु
ष्याश्चत्वराणिगृहप्रांतभागाः वेश्मांतावेश्ममध्यभागाश्चयस्यांसर्वजनानांरामपश्चेगतत्वात्· संवृ
त्तापणवेदिका· संवृत्ताआवृत्ताः पण्यस्थापनवेदिकायस्यांसा· देवतामितिपाठेपिहितापणादेवताग
हामित्यर्थः क्लांतागंतुमशक्ताअतएवदुर्बलादुःखार्त्तारामवियोगपीडार्तायस्यां· नात्याकीर्णास्तंतसं
मर्दरहितोमहापथोयस्यांतां॥२३॥२४॥सुपर्णेनहृतोरगं· महाहृदमिवेतिरिपूणांनिर्भयप्रवेशद्योतकं
॥२५

राम
१३८

738

यथापाणिनाग्निस्पृष्ट्वा स्वकर्तृकदोषेणातसीडयानुतप्तोभवतितथास्वकृतमेतत्दुःखमित्यनुतापः॥११॥ निव
त्यनिवत्यपुनःपुनरित्यर्थः॥रथवर्त्मसुसीदतः रथमार्गदर्शनेक्लिश्यतः ग्रस्तस्यराहुणा॥१२॥ आत्मानंन

हत्वेवब्राह्मणांकामात्स्पृष्ट्वाग्निमिवपाणिना॥ अन्वतप्यतधर्मात्मापुत्रंसंचिंत्यराघवं॥११॥ निव
त्यैवनिवर्त्यैवसीदतोरथवर्त्मसु॥राज्ञोनातिबभौरूपंग्रस्तस्यांशुमतोयथा॥१२॥ विललाप
पसदुःखार्त्तःप्रियंपुत्रमनुस्मरन्॥नगरांतमनुप्राप्तंबुध्वापुत्रमथाब्रवीत्॥१३॥ वाहनानांच
मुख्यानांवहतांतंममात्मजं॥पदातिपथिदृश्यंतेसमहात्मानदृश्यते॥१४॥ यःसुखेनोपधा
नेष्वशेतेचंदनरूषितः॥वीज्यमानोमहार्हाभिःस्त्रीभिर्ममसुतोत्तमः॥१५॥ सनूनंक्वचिदेवाधव
क्षमूलमुपाश्रितः॥काष्ठंवायदिवाश्मानमुपधायशयिष्यते॥१६॥ उत्थास्यतिचमेदिन्याःकृप
णःपांसुगुंठितः॥विनिश्वसन्प्रस्रवणात्करेणूनामिवर्षभः॥१७॥ द्रक्ष्यंतिनूनंपुरुषादीर्घबाहुं
वनेचराः॥राममुत्थायगच्छंतंलोकनाथमनाथवत्॥१८॥

गरांतंनगरसमीपंप्राप्तंबुध्वापुत्रंचाप्राप्तं
बुध्वाब्रवीत् इतिकतकः॥यद्वापुत्रंनगरांतंनगरवाह्यदेशंप्राप्तंमत्वेत्यर्थः॥१३॥१४॥ महार्हाभिः उत्त
मरूपालंकारवतीभिः॥१५॥ क्वचिन्नदीतीरादौ अश्मापाषाणः॥१६॥ बंदिस्त्वत्यादिराहित्येनकृपण
इव प्रस्रवणात् गिरिप्रस्थादिप्रदेशात्॥१७॥१८॥ ॥

अथकौसल्यागृहप्रवेशानंतरं॰॥आत्मनःकालरात्रीमिव॰संहारदात्रीमिवरात्रींप्रपन्नायांमध्यंप्राप्तायां॥अ॰
मांस्यशस्वस्यसत्तात्रापनार्थमितिभावः॥कौसल्याऽदर्शनेहेतुमाह॰रामंमिति॰काव्यलिंगमत्रालंकारः॥दृ
ष्टेर्दर्शनशक्तेरामविषयेसमनस्कायाविलीनत्वात्पदार्थांतरंनस्फुरतीतिव्यंग्यं॰परंगुणीभूतं॥३४॥वि

अथरात्र्यांप्रपन्नायांकालरात्रीमिवात्मनः॥अर्धरात्रेदशरथःकौसल्यामिदमब्रवीत्॥३३॥नत्वां
पश्यामिकौसल्येसाधुमांपाणिनास्पृश॥राममेवानुगताद्दृष्टिरद्यापिननिवर्तते॥३४॥तंराममेवा
नुविचिंतयंतंसमीक्ष्यदेवीशयनेनरेंद्रं॥उपोपविश्याधिकमार्तरूपाविनिश्वसंतंविललाप
कृच्छ्रं॥३५॥इत्यार्षेश्रीरामायणेवाल्मीकीयेअयोध्याकांडेद्विचत्वारिंशःसर्गः॥४२॥ततःस
मीक्ष्यशयनेसन्नंशोकेनपार्थिवं॥कौसल्यापुत्रशोकार्तातमुवाचमहीपतिं॥१॥राघवेनर
शार्दूलविषमुत्सृज्यजिह्मगां॥विचरिष्यतिकैकेयीनिर्मुक्तेवहिपन्नगी॥२॥विवास्यरामं
सुभगालब्धकामासमाहिता॥त्रासयिष्यतिमांभूयोदुष्टाहिरिववेश्मनि॥३॥

निश्वसंतंराजा
नं॰॥उपोपविश्यशयनसमीपेउपविश्य॥३५॥इतिश्रीरामाभिरामेश्रीरामीयेरामायणतिलकेअ
योध्याकांडेद्विचत्वारिंशःसर्गः॥४२॥अहिजिह्मगाःसर्पवत्कुटिलगतिःकुटिलचरित्रा॥जिह्म
तामितिपाठेजिह्मतांकौटिल्यरूपंविषंमुक्त्वेत्यर्थः॥निर्मुक्तात्यक्तकंचुकी॥२॥३॥

मदुमंदोच्चारणात्· अतएवमंदार्थमवुद्धार्थंदीनंशोच्यंअस्वरंशुद्धकंठध्वनिरहितं॥२६॥नयंतुयेकेचिदत्र
मनुष्याइतिशेषः॥अन्यत्रस्त्रांतरगृहे· आश्वासःखेदापगमः॥२७॥द्वारदर्शिनोवेत्रिणःकौसल्यायागृह
मनयन्· तत्रगृहेतेर्विनीतवत्पर्यंकेन्यवेशयतराजेतिशेषः यद्वातन्निवेशनोत्तरंराजाविनीतव

अथगद्गदशब्दस्तु विलपन्वसुधाधिपः॥उवाचमृदुमंदार्थंवचनंदीनमस्वरं॥२६॥कौसल्या
यागृहंशीघ्रंराममातुर्नयंतुमां॥नत्वन्यत्रममाश्वासोहृदयस्यभविष्यति॥२७॥इतिब्रुवंतं
राजानमनयन्द्वारदर्शिनः॥कौसल्यायागृहंतत्रन्यवेशयतविनीतवत्॥२८॥ततस्तत्रप्रवि
श्यकौसल्यायानिवेशनं॥अधिरुह्यापिशयनंबभूवलुलितंमनः॥२९॥पुत्रद्वयविही
नंचस्नुषयाचविवर्जितं॥अपश्य[illegible]द्भवनंराजानष्टचंद्रमिवांबरं॥३०॥तच्चदृष्ट्वामहारा
जोभुजमुद्यम्यवीर्यवान्॥उच्चैःस्वरेणप्राक्रोशत्हाराम विजहासिनौ॥३१॥सुखितावततंका
लंजीविष्यंतिनरोत्तमाः॥परिष्वजंतोयेरामंद्रक्ष्यंतिपुनरागतं॥३२॥

त्· अधोमुखआसेतिशेषः

२८॥कौसल्यायानिवेशनंप्रविश्यस्यस्वापस्थानभूतंशयनंमंचमारुह्यापि· लुलितंकलुषंबभूव
२९॥३०॥नौआवांमातापितरावित्यर्थः॥३१॥येऽवततंकालं· तावत्कालंरामपरावृत्तिकालपर्यंतं
जीविष्यंतिपुनरा[illegible]गतंरामंपरिष्वजंतोरामंद्रक्ष्यंतितेसुखितानरोत्तमाश्च· तेनस्वस्याऽधमत्वादिव्यंग्यं३२॥

१०॥११॥गोरूपांवध्वं॥१२॥१३॥उदाग्रायुधनिस्त्रिंशो॰आयुधंधनुरादि॰॥निस्त्रिंशःखड्गः॥१४॥कन्याद्विजातीनामिति द्वंद्वः तत्रकन्यानांसुमनसःपुष्पाणि॰॥द्विजानांफलानिचप्रदिशंतःप्रगृह्णंतःत्वस्थाभूत्वासकलपौरजनो

अत्त्वेवोपस्थितोवीरौकदायोध्याभविष्यति॥यशस्विनीहृष्टजनासूच्छ्रितध्वजमालिनी॥१०॥
कदाप्रेक्ष्यनरव्याघ्रौअरण्यात्पुनरागतौ॥भविष्यातिपुरीत्दृष्टासमुद्रइवपर्वणि॥११॥कदायो
ध्यांमहाबाहुःपुरींवीरःप्रवेक्ष्यति॥पुरस्कृत्यरथेसीतांवृषभोगोवधूमिव॥१२॥कदाप्राणिसह
स्राणिराजमार्गेममात्मजौ॥लाजैरवकरिष्यंतिप्रविशंतावरिंदमौ॥१३॥प्रविशंतौकदायोध्यां
द्रक्ष्यामिशुभकुंडलौ॥उदग्रायुधनिस्त्रिंशौसश्रृंगाविवपर्वतौ॥१४॥कदासुमनसःकन्याद्विजाती
नांफलानिच॥प्रदिशंतःपुरींत्दृष्टाःकरिष्यंतिप्रदक्षिणं॥१५॥कदापरिणतोबुद्ध्यावयसाचा
मरप्रभः॥अभ्युपैष्यतिधर्मात्मात्रिवर्षइवलालयन्॥१६॥निःसंशयंमेयामन्येपुरावीरकद
र्यया॥पातुकामेषुवत्सेषुमातृणांशातितास्तनाः॥१७॥

त्स्वायकदापुरींप्रदक्षिणंकरिष्यति॥१५

बुद्ध्यापरिणतःज्ञानेनवृद्धः वयसाचामरप्रभस्तरुणतरएव॰देवानांसदातरुणत्वात्॰सुवर्णइवका॰
लिकः॰कालिकसुवर्णमिवजनान्लालयन्॰त्रिवर्षइवलालयन्निति पाठेमामितिशेषः॥मांलालयन्नि
तिपाठेप्रतिक्रीडांकुर्वन्नित्यर्थः॥१६॥कदर्ययाक्रूराचारया॰पातुकामायेषांतेषु॰पातुकामेषु॰शातिताःकृताः॥१७

240

भवतुभरतराज्यवरणं॥अथापिइहैवनगरेरामोभैक्ष्यंचरन्गृहेवसेदितियदिअनयावरंतस्यात्तंवरंदातुंममापिका
मकारइच्छाचरणं॥अपिआत्मजंरामं॥अस्यादासमपिदातुंवरंममकामकारः इच्छमेवतद्वियोगशोकाभावात्
एवंचैवंवरायाचनंममातित्रासनार्थमेवेतिव्यंग्यं॥४॥कैकेय्याकआरामंस्थानात्स्वस्थानाद्यथेष्टतःस्वेच्छा
नुसारेणपातयित्वाप्रभ्रश्यपर्वणाहिताग्निनारक्षसांभागस्य पदादिरूपः विप्रविद्धःप्रक्षिप्तः इतःपरंतद्दर्श

अथास्मिन्नगरेरामश्चरन्भैक्ष्यंगृहेवसेत्॥कामकारोवरंदातुमपिदासंममात्मजं॥४॥पातयित्वातुकै
केय्यारामंस्थानाद्यथेष्टतः॥प्रविद्धोरक्षसांभागःपर्वणीवाहिताग्निना॥५॥नागराजगतिर्वीरोम
हाबाहुर्धनुर्धरः॥वनमाविशतेनूनंसभार्यःसहलक्ष्मणः॥६॥वनेत्वदृष्टदुःखानांकैकेय्य
नुमतेत्वया॥त्यक्तानांवनवासायकान्वावस्थाभविष्यति॥७॥तेरत्नहीनास्तरुणाःफलकालेवि
वासिताः॥कथंवत्स्यंतिकृपणाःफलमूलैःकृताशनाः॥८॥अपीदानींसकालःस्यान्ममशोक
क्षयःशिवः॥सहभार्यंसहभ्रात्रापश्येयमिहराघवं॥९॥

नमसंभावितंरक्षोभिर्नाशादितिव्यंग्यं॥५॥६॥
कैकेय्यनुमतेस्थितेनेतिशेषः कान्वावस्था रक्षोभक्षणातिरिक्ता नकापि जीवनंसर्वथानसंभावितमि
तिभावः॥७॥रत्नहीनाउत्तमवस्त्रहीनाः तरुणोचतरुणीचतरुणाः फलकालेयुवावस्थत्वेनराज्यभो
गकाले॥८॥शोकक्षयःशोकस्यक्षयोयस्मिन्सः अपिइदानीस्यात् इदानीमेवस्यात्सकालइत्यर्थः अपीदा

तदेवाह॰ य इति॰ श्लोकद्वयमेकं वाक्यं॰ साधु सिद्धसंकल्पं कुर्वन् गतः वनमिति शेषः सत्यवादिनं तत्त्वेन प्रसि
द्धं ॥३॥ शाश्वत् सर्वथा नित्यं॰ प्रेत्य फलस्यामुष्मिकसुखस्योदयो यस्मात्तत्र धर्मे स्थितोऽतो न शोच्यः ॥४॥ सुस
हाय संपत्तेश्च न शोच्य इत्याह॰ वर्तते चेति॰ ॥ उत्तमां वृत्तिं पितृतुल्यशुश्रूषाव्यापारं वर्तते वर्तयते॰ क
रोतीति यावत्॰ लाभः सुखमेव ॥५॥ एवं वैदेह्यप्यनुगच्छतीति तेन लाभ एव तस्य अनेन सर्वभूतदया

यस्तवार्ये गतः पुत्रस्त्यक्त्वा राज्यं महाबलः ॥ साधु कुर्वन्महात्मानं पितरं सत्यवादिनं ॥३॥ शिष्टै
राचरिते सम्यक्शश्वत्प्रेत्य फलोदये ॥ रामो धर्मे स्थितः श्रेष्ठो न स शोच्यः कदाचन ॥४॥ वर्त
ते चोत्तमां वृत्तिं लक्ष्मणोऽस्मिन्सदानघ ॥ दयावान्सर्वभूतेषु लाभस्तस्य महात्मनः ॥५॥ अ
रण्यवासे यद्दुःखं जानन्त्येव सुखोचिता ॥ अनुगच्छति वैदेही धर्मात्मानं तवात्मजं ॥६॥ कीर्तिभू
तां पताकां यो लोके भ्रामयति प्रभुः ॥ धर्मः सत्यव्रतपरः किं न प्राप्तस्तवात्मजः ॥७॥

वत्त्वेन लक्ष्मणस्य सर्वभूताधारभूधारकशेषावतारत्वं॰ धर्मानुगत्या च जानक्याः श्रीत्वं ध्वनितं तेन राम
स्य भगवत्त्वं ध्वनितं ॥६॥ तदेवाह॰ यः कीर्त्यात्मना संभूतां पताकां ध्वजं लोके त्रैलोक्येपि भ्रामयति प्रव
र्तयति प्रभुः सर्वभूतपालको दयया॰ ॥ स तवात्मजः साक्षात् धर्मस्तद्रूपो यतः ॥ सत्यव्रतपरतः किं न
प्राप्तः किं तत् श्रेयो यन्न प्राप्तः अनेन तदेव व्यंग्यं द्रढं कर्तुं सर्वश्रेयस्थानत्वस्य भगवदतिरिक्तेऽभा
वात् ॥७॥

241

वत्सलापुत्रवत्सला सिंहेनगौरिव। त्वयाविवत्साकृताऽनेन पातकेनेतिशेषः एवंकैकेय्यासिंत्याबालवत्सागौरि वबलात्विवत्साकृता ॥१८॥ अतोनहीति। गुणैःसर्वकल्याणगुणैः ॥१९॥ कल्प्यतेदैवेनेतिशेषः कल्पतइतिपा ठेविद्यतइत्यर्थः ॥२०॥ दीपयतेसंतापयति ॥२१॥ इतिश्रीरामाभिरामेश्रीरामीयेरामायणतिलके अयोध्याकां

साहंगौरिवसिंहेनविवत्सावत्सलाकृता। कैकेय्यापुरुषव्याघ्रबालत्सेवगौर्बलात् ॥१८॥ नहितावद्गुणैर्जुष्टंसर्वशास्त्रविशारदं एकपुत्राविनापुत्रमहंजीवितुमुत्सहे ॥१९॥ नहिमेजीवितेकिंचित्सामर्थ्यमिहकल्प्यते। अपश्यंत्याःप्रियंपुत्रंलक्ष्मणंचमहाबलं ॥२०॥ अयंहिमांदीपयते। यवन्हिस्तनूजशोकप्रभवोमहाहितः ॥ महीमिमांरश्मिभिरुत्तमप्रभोयथानिदाघेभगवान्दिवाकरः ॥२१॥ इत्यार्षेश्रीरामायणेवाल्मीकीयेअयोध्याकांडेत्रिचत्वारिंशःसर्गः ॥४३॥ विलपंतींतथातांतुकौसल्यांप्रमदोत्तमां ॥ इदंधर्मेस्थिताधर्म्यंसुमित्रावाक्यमब्रवीत् ॥१॥ नवार्ये सद्गुणैर्युक्तःसपुत्रःपुरुषोत्तमः ॥ किंतेविलपितेनैवंकृपणंरुदितेनवा ॥२॥

डेत्रिचत्वारिं शःसर्गः ॥४३॥ एवंदुःखितांकौसल्यांसुमित्रासमाश्वासयतीत्याह। विलपंतीमिति। इदंवाक्यमित्यन्वयः ॥१॥ कृपणंयथातथारुदितेनवाकिंअयुक्तमेवेत्यर्थः। नत्रहेतुः। सद्गुणैर्युक्तइति। तादृशस्यचनक्वाप्यपाय इतिभावः पुरुषोत्तमइत्यनेनतस्येश्वरत्वंव्यंग्यं। एवंचसर्वव्यापकत्वेनात्रापिसन्निधानाद्दुःखापादि

या·यादृशी श्रीः शरीरशोभा·यादृशंच शौर्य्यं। यादृशी च कल्याणसत्वता दृश्यते·तया ज्ञायते निवृत्तव
नवासः क्षिप्रमेव स्वं राज्यं प्राप्स्यति॥१४॥इदानीं सा त्वादेव सर्वोत्तरयामित्वं रामस्य दर्शयति·।सूर्यस्यापी
ति·सर्वस्यापि स्वस्वकार्यजनकत्वेन तदधीनमेवेति भावः त्तमात्तमे ति षष्ठीतत्पुरुषः॥१५॥अगुणाः
दोषजनकाइत्यर्थः॥१६॥रामएताभिस्तिसृभिः सह अभिषेक्ष्यते वसिष्ठादिभिरिति शेषः श्रिया विजय

याश्रीः शौर्यंच रामस्य याच कल्याणसत्वता॥निवृत्तारण्यवासः स्वं क्षिप्रं राज्यमवाप्स्यति॥१४॥
सूर्यस्यापि भवेत्सूर्यो ह्यग्नेरग्निः प्रभोः प्रभुः॥श्रियाः श्रीश्च भवेदग्र्या कीर्त्याः कीर्तिः क्षमाक्ष
मा॥१५॥दैवतं देवतानां च भूतानां भूतसत्तमः॥तस्य के ह्यगुणा देवि वने वाप्यथवा पुने॥१६॥
पृथिव्या सह वैदेह्या श्रिया च पुरुषर्षभः॥क्षिप्रं तिसृभिरेताभिः सह रामो ऽभिषेक्ष्यते॥१७॥दुः
खजं विसृजंत्यश्रु निष्क्रामंतमुदीक्ष्य यं॥अयोध्यायां जनः सर्वः शोकवेगसमाहतः॥१८॥
कुशचीरधरं वीरं गच्छंतमपराजितं॥सीतेवानुगता लक्ष्मीस्तस्य किं नाम दुर्लभं॥१९॥

142

लक्ष्म्या॥१७॥कालांतरे ऽपि राज्यार्हतां जनानुरागप्रदर्शनेनाह दुःखजमिति यतः अयोध्यायां क्रिय
मानः सर्वो जनः॥यं निष्क्रामंतमुदीक्ष्य दुःखजमश्रु विसृजति·अतस्तस्य राज्यमवश्यं भावीति
शेषः॥१८॥अथ तस्य वने विषयसुखं नास्तीति शोचंतीमाह·कुशचीरादिधरमपि यं लक्ष्मीरिव
सीतानुगता तस्य किं दुर्लभं इव शब्द एवार्थे·सीतारूपेण लक्ष्मीरेवैषेति भावः एतेन स विष्णुरेवे

एतदेवघनयंतीसकलदेवसेव्यत्वंतस्याह·व्यक्तमिति·शौचं·अपहतपाप्मत्वादिलक्षणं·माहात्म्यं सर्वनि
यंतृत्वं·यद्भीषोदेतिसूर्यइतिश्रुतेः॥८॥युक्तशीतोष्मः॥अतएवसुखः सुखस्पर्श इत्यर्थः॥९॥चंद्रमाश्चंद्र
ल्हादयिष्यतिसुखयिष्यति·॥१०॥ब्रह्मा·ब्राह्मणो विश्वामित्रब्रह्मेव स्वर्ष्टिकर्तावा·तिमिध्वजः शंबरस्त
त्सुतः सुबाहुरित्यर्थइतिकतककृतः॥तीर्थस्तु कदाचिद्रामोवैजयंतंनगरंनिरुध्यतत्रत्पतिमिध्वजा

व्यक्तंरामस्यविज्ञायशौचंमाहात्म्यमुत्तमं॥नगात्रमंशुभिः सूर्यः संतापयितुमर्हति॥८॥शिवः
सर्वेषुकालेषुकाननेभ्योविनिःसृतः॥राघवंयुक्तशीतोष्मः सेविष्यतिसुखोनिलः॥९॥शयानम
नघंरात्रौपितेवाभिपरिष्वजन्॥घर्मघ्नः संस्पृशन्शीतश्चंद्रमाल्हादयिष्यति॥१०॥ददौचास्त्रा
णि दिव्यानियस्मैब्रह्मामहौजसे॥दानवेंद्रंहतंदृष्ट्वा तिमिध्वजसुतंरणे॥११॥सस्मरः पुरुष
व्याघ्रः स्वबाहुबलमाश्रितः॥असंत्रस्तोप्यरण्येसौवेश्मनीवनिवत्स्यते॥१२॥यस्येषुपथमा
साद्यविनाशंयांतिशत्रवः॥कथंनपृथिवीतस्यशासनेस्थातुमर्हति॥१३॥

रव्यशंबरपुत्रस्यदा
नवस्यपुत्रंहतवान्·तेनप्रीतोब्रह्मारामायदिव्यास्त्राणिददावित्येतत्बलात्कल्पयति·कतकोक्तं
तुनयुक्तं॥ताटकावधोत्तरंसुबाहुवधात्प्रागेवविश्वामित्रेणास्त्रोपदेशस्यप्रागुक्तत्वात्॥सुबाहोर्मा
रीचभ्रातृत्वस्यपूर्वमुक्तत्वेनशंबरपुत्रत्वानौचित्याच्च॥११॥१२॥तस्यशासनेपृथिवीतस्थाः प्राणिनः
कथंनशासनेस्थास्यंति·अतस्तस्यकुतोपिनभयमितिभावः॥१३॥ राम

वाक्योपचारे· वाक्यरचनायां रामारमणीया॥३१॥ इतिश्रीरामाभिरामेश्रीरामीयेरामायणतिलके अयोध्याकां
डेचतुश्चत्वारिंशःसर्गः॥४४॥ इदानींदूरमनगच्छत्पौरजननिवर्तनमाह· अन्विति· वनवासायप्रयांतमि

आश्वासयंतीविविधैश्चवाक्यैर्वाक्योपचारेकुशलानवद्या॥ रामस्यतांमातरमेवमुक्त्वादेवी
सुमित्राविररामरामा॥३०॥ निशम्यतल्लक्ष्मणमातृवाक्यंरामस्यमातुर्नरदेवपत्न्याः॥ सद्यःश
रीरेविननाशशोकः शरद्गतोमेघइवाल्पतोयः॥३१॥ इत्यार्षेश्रीरामायणेअयोध्याकांडेचतुश्च
त्वारिंशःसर्गः॥४४॥ अनुरक्तामहात्मानंरामंसत्यपराक्रमं॥ अनुजग्मुःप्रयांतंतंवनवासाय
मानवाः॥१॥ निवर्तितेतीववलात्सुहृद्वर्गेणराजनि॥ नैवतेसंन्यवर्तंतरामस्यानुगतारथं॥२
अयोध्यानिलयानांहिपुरुषाणांमहायशाः॥ बभूवगुणसंपन्नः पूर्णचंद्रइवप्रियः॥३॥ सयाच्य
मानः काकुत्स्थस्ताभिःप्रकृतिभिस्तदा॥ कुर्वाणःपितरंसत्यंवनमेवान्वपद्यत॥४॥ अवेक्षमा
णःसस्नेहंचक्षुषाप्रपिबन्निव॥ उवाचरामः सस्नेहंताः प्रजाःस्वाःप्रजाइव॥५॥

त्यन्वयः॥१॥ सुहृद्वर्गेण· यमिच्छेत्पुनरायातंनैवदूरम॥नुव्रजेदित्युक्तिरूपेण· ते अनुरक्ताःपौराः
२॥ तदनिवृत्तौ हेतुमाह· अयोध्येति॥३॥ याच्यमानःप्रतिनिवृत्तिमितिशेषः· ताभिःप्रकृतिभिःअ
नुरक्तत्वमप्रजाभिः सत्यंसत्यवंतं॥४॥ स्वाःप्रजाइवस्वपुत्रानिव॥५॥ राम

धनुर्ग्रहाणां शराणां वरः॥ श्रेष्ठः पुरुषोत्तम त्वं विना न लक्ष्मणो ग्रेसरः स्यादिति भावः॥२०॥ द्रक्ष्यसि लृट्॥२१॥२२॥
२३॥ रामे राम विषये शोकः प्रलापादि दुःखं व्यथामास्त॥ यन स्तस्मिन् शिवं अशुभं न दृश्यते॥२४॥ हे अन

धनुर्ग्रहवरो यस्य बाणखड्गास्त्रभृत्स्वयं॥ लक्ष्मणो व्रजति ह्यग्रे तस्य किं नाम दुर्लभं॥२०॥ निवृत्तवन
वासं तं द्रक्ष्यसि पुनरागतं॥ जहि शोकं च मोहं च देवि सत्यं ब्रवीमि ते॥२१॥ शिरसा चरणावेतौ वंद
मानमनिंदिते॥ पुनर्द्रक्ष्यसि कल्याणि पुत्रं चंद्रमिवोदितं॥२२॥ पुनः प्रविष्टं दृष्ट्वा तं अभिषिक्तं महा
श्रियं॥ समुत्स्रक्ष्यसि नेत्राभ्यां शीघ्रमानंदजं जलं॥२३॥ मा शोको देवि दुःखं वा न रामे दृश्यते ऽशिवं॥
क्षिप्रं द्रक्ष्यसि पुत्रं त्वं ससीतं सहलक्ष्मणं॥२४॥ त्वया शेषो जनश्चायं समाश्वास्यो यतो ऽनघे॥ किमि
दानीमिदं देवि करोषि हृदि विक्लवं॥२५॥ नार्हा त्वं शोचितुं देवि यस्यास्ते राघवः सुतः॥ न हि रामा
त्परो लोके विद्यते सत्पथे स्थितः॥२६॥ अभिवादयमानं तं दृष्ट्वा ससुहृदं सुतं॥ मुदाश्रु मोक्ष्यसे
क्षिप्रं मेघरेखेव वार्षिकी॥२७॥ पुत्रस्ते वरदः क्षिप्रमयोध्यां पुनरागतः॥ कराभ्यां मृदुपीनाभ्यां चर
णौ पीडयिष्यति॥२८॥ अभिवाद्य नमस्यंतं शूरं ससुहृदं सुतं॥ मुदास्रैः प्रोक्ष्यसे पुत्रं मेघराजिरिवाचलं
॥२९॥

घे यस्मात्त्वया ऽशेषोयं जनः त्वत्परिवाररूपत्वात्त्वया समाश्वास्य अतो देवि त्वं हृदि विक्लवं दुःखं किं करो
षि॥२५॥२६॥ मेघरेखा मेघपंक्तिः॥२७॥२८॥ अभिवाद्य चरणौ स्पृष्ट्वा प्रोक्ष्यसे सेचने। वर्तमानसामीप्ये लट्॥२९॥

ओजसा तपो बलेन॰ एवं त्रिविधं यथा तथा वृद्धाः॥ तेषां मध्ये वयः प्रकंपशिरसः वयसः आधिक्यात् कंप
युक्तशिरसः अतिवृद्धत्वादनुधावनाशक्त्या दूरादिदमूचुः क्वचित्तु प्रभुग्नशिरस इति पाठः॥ १३॥ किमू
चुस्तदाह॰ वहंत इति॰ रथेन गम्यमानं पर्यंत इत्यर्थः॥ जात्याः उत्तमजातीयाः भर्तारि राम विषये हिता भव

ते द्विजास्त्रिविधं वृद्धा ज्ञानेन वयसौजसा॥ वयःप्रकंपशिरसो दूरादूचुरिदं वचः॥ १३॥
वहंतो जवना रामं भो भो जात्यास्तुरंगमाः॥ निवर्तध्वं न गंतव्यं हिता भवत भर्तरि॥ १४॥ कर्णा
वंति हि भूतानि विशेषेण तुरंगमाः॥ यूयं तस्मान्निवर्तध्वं याचनां प्रतिवेदिताः॥ १५॥ धर्म
तः स विशुद्धात्मा वीरः शुभदृढव्रतः॥ उपवाह्यस्तु वो भर्ता नापवाह्यः पुराद्वनं॥ १६॥ एव
मार्तप्रलापांस्तान् वृद्धान् प्रलपतो द्विजान्॥ अवेक्ष्य सहसा रामो रथादवततार ह॥ १७॥

त॰ वनं मा नयत नेत्यावृत्तः॥ ब्राह्मणानां याच्यामतिक्रम्य युष्मद्गमनं भर्तुरहितमिति भावः॥ १४॥ विशेषे
णायं यूयं कर्णवंत इत्युत्कर्षः तस्मात् बधिरवन्न गंतव्यं॰ अपि तु याचनामस्मदीयां॰ प्रतिवेदि
ताः॥ ज्ञातवंतो निवर्तध्वं॥ १५॥ उपवाह्यः पुरसमीपं प्रापणीयः वः युष्माकं॰ न तु पुरादपनीय वनं
वाह्यः प्रापणीयः॥ १६॥ आर्तप्रलापान् आर्तवाक्यानि प्रलपतः कथयतः॥ १७॥ राम

अयोध्यानिवासिनांयुष्माकमितिशेषः॥६॥प्रियाणिऐलौकिकसुखजनकानिहितानि परलोकसुखजनकानि॥७॥वयसाबालोपिज्ञानवृद्धः वीर्यगुणान्वितोपिमृदुः॥८॥समीक्षितःराज्ञानिश्चितःमयाशिष्टैःमत्तोधिकैरितियावत्॥९॥दृष्टैराजगुणैर्युक्तःह्रियतःअपिचापिअस्मादपिहेतोःभरतेप्रीतिर्विधीयतां

याप्रीतिर्बहुमानश्चमय्ययोध्यानिवासिनां॥मत्प्रियार्थंविशेषेणभरतेसाविधीयतां॥६॥सहि कल्याणचारित्रःकैकेय्यानंदवर्धनः॥करिष्यतियथावृद्धःप्रियाणिचहितानिच॥७॥ज्ञानवृद्धो वयोबालोमृदुर्वीर्यगुणान्वितः॥अनुरूपःसवोभर्ताभविष्यतिभयापहः॥८॥सहिराजगुणैर्युक्तोयुवराजःसमीक्षितः॥अपिचापिमयाशिष्टैःकार्यंवोभर्तृशासनं॥९॥नसंतप्येद्यथाचासौवनवासंगतेमयि॥महाराजस्तथाकार्योममप्रियचिकीर्षया॥१०॥यथायथादाशरथिर्धर्ममेवाश्रितोभवेत्॥तथातथाप्रकृतयोरामंपतिमकामयन्॥११॥बाष्पेणपिहितंदीनंरामःसौमित्रिणासह॥चकर्षेवगुणैर्बद्धंजनंपुरनिवासिनं॥१२॥

यतोवोयुष्माकंभर्तृशासनंराजाज्ञा कार्याअवश्यकार्याभवति॥९॥तथाकार्यःअनुकूलाचरणेनसदासमाश्वासनीयः॥१०॥धर्मराजवाक्यपरिपालनरूपंअकामयन्चित्तेस्वीकृतवंतःअत्पंतधर्मशालित्वात्॥११॥बाष्पेणपिहितंपिहितनेत्रं॥रज्जुरूपैःस्वगुणैर्बद्धं॥पुरवासिनंसौमित्रिसहितोरामश्चकर्षेव॥उत्प्रेक्षालंकारः गुणैरित्यत्रश्लेषः॥१२॥

वेदमंत्रानुसारिणीनदभ्यासानुसरणशीला· त्वत्कृते त्वन्निमित्तं· वनवासानुसारिणी· ॥ वेदाभ्यासादिप
रित्यज्यवनवासोन्मुखीकृतेत्यर्थः ॥२४॥ अस्माकंत्वयासहवनानुगमनेनकाप्यनुपपत्तिरित्याहुः त्व
दयेष्विति· येनोऽस्माकंपरधनंवेदाःस्तेस्माकंत्वदयेएवावतिष्ठंते· ॥ चारित्रंपातिव्रत्यं ॥२५॥ नपुनरि
तियद्यपित्वद्गतौत्वदनुगमनेऽस्माकंमतिः सुकृता निश्चिताऽतः पुनर्वनगमननिश्चयोऽस्मा
कंनकार्योस्ति· कृतत्वादेवतथापिकिंचित्वद्भ्रमद्वतिशेषः ॥ त्वयिधर्मव्यपेक्षे· ब्राह्मणवचनरूपधर्म

याहिनः सततंबुद्धिः वेदमंत्रानुसारिणी ॥ त्वत्कृतेसाकृतावत्सवनवासानुसारिणी ॥२४॥
त्वदयेष्ववतिष्ठंतेवेदायेनः परंधनं ॥ वत्स्यंत्यपिगृहेष्वेवदाराश्चारित्ररक्षिताः ॥२५॥ पु
नर्ननिश्चयः कार्यस्त्वद्गतौसुकृतामतिः ॥ त्वयिधर्मव्यपेक्षेतुकिंस्याद्धर्मपथेस्थितं ॥२६॥
याचितोनोनिवर्तस्वहंसशुक्लशिरोरुहैः ॥ शिरोभिर्निभृताचारमहीपतनपांसुलैः ॥२७॥

145

निरपेक्षेसतिकिंभूतंधर्मपथेस्थितंस्यात्· नकिंमपिसर्वेधर्ममार्गंव्यतिक्रमेयुः ॥२६॥ तस्मात्त्वम
स्माभिर्हंसशुक्लशिरोरुहैः पलितकेशैः शिरोभिः साष्टांगप्रणामेनमहीपतनपांसुलैः महीपत
नेनपांसुलैरजोव्याप्तैर्देहैश्चयाचितस्त्वंनिभृताचारनिश्चलधर्मानुष्ठाननिवर्तस्व· अत्रब्राह्म
णैर्नमस्कारः क्षत्रियस्यकथमितिनशंक्यं· तत्वज्ञतयाभगवदवतारत्वद्धयानमस्कारेणादो
षात्· ॥ यद्वाराज्ञोविष्णवंशत्वेननतौनदोषइत्याहुः ॥२७॥ ॥ राम ॥

द्विजानांसंगमार्थंसन्निकृष्टपदन्यासोभूत्वावनपरायणःस्वशनैर्जगामननुनिवृत्तोनापिस्थितः रथेन-
गमनेब्राह्मणाक्लेशेनदोषः प्रतिनिवृत्तेब्राह्मणाश्वासनेव्रतभंगोभवतीतिधियापद्भ्यांमंदगमनो-
न्नत् ।।यावद्वृद्धसन्निधानमितिभावः।।१७।। रथेनपरिमोक्तुंनशशाक अत्यंतंरथवेगालंबनेननि
वर्तयितुंनशशाकेत्यर्थः।। तत्रघृणाचक्षुष्कहेतुः घृणादयातत्स्वचक्षुःचक्षुष्मानित्यर्थः।।१९।। गच्छं

पद्भ्यामेवजनान्सर्वानुपतिष्ठत्सलक्ष्मणः। सन्निकृष्टपदन्यासोरामोवनपरायणः।।१८।। द्विजाती
न्हि पदातींस्तान्रामश्चारित्रवत्सलः। नशशाकघृणाचक्षुः परिमोक्तुंरथेनसः।।१९।। गच्छंतमेव
तंदृष्ट्वारामंसंभ्रांतमानसाः। ऊचुःपरमसंतप्तारामंवाक्यमिदंद्विजाः।।२०।। ब्राह्मण्यं कृत्स्न
मेतत्त्वांब्रह्मण्यमनुगच्छति। द्विजस्कंधाधिरूढास्त्वामग्नयोप्यनुयांत्यमी।।२१।। वाजपेय
समुत्थानिछत्राण्येतानिपश्यनः। पृष्ठतोनुप्रयातानिमेघानिवजलात्यये।।२२।। अनवाप्ता
तपत्रस्यरश्मिसंतापितस्यते। एभिश्छायांकरिष्यामःस्वैश्छत्रैर्वाजपेयकैः।।२३।।

तमेवस्वप्रार्थनानंतरमपिवस्थितंनापिनिवृत्तमित्यर्थः।।२०।। ब्राह्मण्यं ब्राह्मणसमूहः ब्रह्मण्यंब्र
ह्महितं द्विजस्कंधाधिरूढाः पात्रारणिद्वारेणेतिशेषः।।२१।। वाजपेयसमुत्थानि वाजपेययाजिनो
राजवच्छत्रादिसंबंधस्यश्रुतावुक्तेः मेघानिवजलात्यये शारदमेघवत्पांडराणिछत्राणीत्य
र्थः।।२२।। अनवाप्तातपत्रस्य अप्राप्तश्वेतच्छत्रस्यवाजपेयकैः वाजपेययागप्राप्तैः।।२३।।

संपरिवर्त्य श्रमापनुत्तये कृत विलुंठनान्विधाय तोयपरिप्लुतांगान्ताम् पितान् तमसायाः अविदूरे अचार
यत् भक्तिन तृणानकारयत् ॥३३॥ इति श्रीरामाभिरामे श्रीरामीये टी॰ ति॰ अयो॰ पंचचत्वारिंशः सर्गः ४५
सीतामुद्वीक्ष्य सौमित्रिमब्रवीदित्यनेन सीतोद्देश्यकत्वाप्यस्य वाक्यस्य सोध्वनिता ॥१॥ हे सौमित्रे वनवासस्य
स्य संबंधि निशानां मध्ये ऽद्यप्रवृत्ता इयं निशा वनं वनवासं प्रति पूर्वा प्रहिताप्राप्ता वनवासकालस्य

ततः सुमंत्रोपिरथाद्विमुच्य श्रांतान्हयान्संपरिवर्त्य शीघ्रं ॥ पीतोदकांस्तोयपरिप्लुतांगा
नचारयद्वैतमसाविदूरे ॥३३॥ इत्यार्षे श्रीरा॰ अयो॰ पंचचत्वारिंशः सर्गः ४५ ॥ ततस्तु त
मसातीरं रम्यमाश्रित्य राघवः ॥ सीतामुद्वीक्ष्य सौमित्रिमिदं वचनमब्रवीत् ॥१॥ इयमद्य नि
शा पूर्वा सौमित्रे प्रहिता वनं ॥ वनवासस्य भद्रं ते न चोत्कंठितुमर्हसि ॥२॥ पश्य शून्यान्यरण्या
नि रुदंतीव समंततः ॥ यथानिलयमायद्भिर्निलीनानि मृगद्विजैः ॥३॥ अद्यायोध्या तु न
गरी राजधानी पितुर्मम ॥ सस्त्रीपुंसा गतानस्मान्शोचिष्यति न संशयः ॥४॥

तन्निशामारभ्यपरिगणनीयत्वात् ॥ अतस्त्वमुत्कंठितुमद्यप्रभृति पुरोत्सुकेनायोध्यादिस्मरणं क
र्तुं नार्हसि ॥२॥ यथायोगं स्वस्वनिलयमायद्भिः रागच्छद्भिर्मृगद्विजैर्निलीनानि सशब्दं मंतलीनत
याव्याप्तानि अतएव शून्यानि अरण्यानि रुदंतीव अस्मान्दृष्ट्वा खिन्नानीव वर्त्तन्ते तानि
पश्य ॥३॥ सस्त्रीपुंसा स्त्रीपुंसैः सहिता अद्यप्रभृति ॥४॥ राम

एवमपिगच्छंतमेवदृष्ट्वाहुः बहूनामिति· येद्विजाइहागतास्तेषांबहूनांयज्ञाइहकालेविततासंतितेषांस
माप्तिस्त्वन्निवर्तनायत्ताअनिवृत्तौसर्वयज्ञविघ्नकर्तृत्वं॥त्वय्यापतस्यतीतिभावः॥२८॥नकेवलमस्मत्प्रा
र्थनैवापितुसर्वभूतप्रार्थनापीत्याहुः भक्तीति·जंगमाजंगमानिसर्वाणिपिभूतानिभक्तिमंतिस्तेहवंतितेषुते
षुत्वन्निवृत्तिंयाचमानेषुभक्तेषुत्वमपिभक्तिंस्नेहंप्रदर्शयनिवर्त्येतिशेषः॥२९॥तेषांयांयांप्रकारमाह॥अ

वहूनांविततायज्ञाद्विजानांयइहागताः॥तेषांसमाप्तिरायत्तातववत्सनिवर्तने॥२८॥भक्तिमं
तीहभूतानिजंगमाजंगमानिच॥याचमानेषुतेषुत्वंभक्तिंभक्तेषुदर्शय॥२९॥अनुगंतुमशक्ता
स्त्वांमूलैरुद्धतवेगिनः॥उन्नतावायुवेगेनविक्रोशंतीवपादपाः॥३०॥निश्चेष्टाहारसंचारावृक्षै
कस्थाननिश्चिताः॥पक्षिणोपिप्रयाचंतेसर्वभूतानुकंपनं॥३१॥एवंविक्रोशतांतेषांद्विजातीनां
निवर्तने॥ददृशेतमसातत्रवारयंतीवराघवं॥३२॥

लैःस्थावरत्वादुत्अत्यंतंहृतवेगाअतस्त्वा
मनुगंतुमशक्ताः·उन्नताउच्छ्रिताःपादपाः॥वायुवेगेनचशाखाचलनशब्दैर्विक्रोशंतीवत्वन्निवर्तनाये
तिशेषः॥३०॥चेष्टागात्रचलनादिरूपा॥आहारार्थसंचारश्चतेभ्योनिर्गतःनइहिताः॥वृक्षरूपैकस्था
नएवनिश्चितानिश्चयेनस्थिताःनत्वाहारायापिभुवमवतीर्णाः॥एवंमरणपर्यंतव्यापारेणत्वांयाचंते
निवृत्तिमितिशेषः॥३१॥निवर्त्तनेनिवर्त्तननिमित्तं·विक्रोशतांतेषांअनुग्रहायमार्गेतिर्यक्प्रवाह
त्वात्राघवंवारयंतीव·तमसादददृशेदृष्टा॥३२॥

संयम्य यथायोग्यं बंधनं कृत्वा प्रभूतयवसान् प्रभूतघासान् प्रत्यनंतरः प्रत्यासन्नः ॥१२॥ शयनं शयनस्थलं श
र्करायां सल्लेपणादिना चक्रे इत्यन्वयः ॥१३॥ वृक्षदलैः वृक्षपत्रैः सौमित्रिणा सार्धं सूतेन कृतां शय्यां वी
क्ष्य सभार्यः संविवेश ॥१४॥ गुणान् कथयामास जागरणार्थमिति भावः ॥१५॥ तां रात्रिमित्यत्र संयोग

सोऽश्वान्सुमंत्रः संयम्य सूर्येऽस्तं समुपागते ॥ प्रभूतयवसान्कृत्वा बभूव प्रत्यनंतरः ॥१२॥
उपास्य तु शिवां संध्यां दृष्ट्वा रात्रिमुपागतां ॥ रामस्य शयनं चक्रे सूतः सौमित्रिणा सह ॥१३॥
तां शय्यां तमसातीरे वीक्ष्य वृक्षदलैः कृतां ॥ रामः सौमित्रिणा सार्धं सभार्यः संविवेश ह ॥१४॥
सभार्यं संप्रसुप्तं तु भ्रातरं संप्रेक्ष्य लक्ष्मणः ॥ कथयामास सूताय रामस्य विविधान्गुणान् ॥१५॥
जाग्रतोरेव तां रात्रिं सौमित्रेरुदितो रविः ॥ सूतस्य तमसातीरे रामस्य ब्रुवतो गुणान् ॥१६॥
गोकुलाकुलतीरायास्तमसाया विदूरतः ॥ अवसत्तत्र तां रात्रिं रामः प्रकृतिभिः सह ॥१७॥
उत्थाय च महातेजाः प्रकृतीस्ता निशाम्य च ॥ अब्रवीद्भ्रातरं रामो लक्ष्मणं पुण्यलक्षणं ॥१८॥

द्वितीया ॥ उदितो रविः अरुणोदयकालो जात इत्यर्थः ॥१६॥ गोकुलैराकुलं व्याप्तं तीरं यस्याः त
स्यास्तमसायास्तीरेऽविदूरतः द्विजसंवेशदेशादतिदूरदेशेऽतिसंधाय गमनसौकर्यार्थम
वसत् प्रकृतिसाहित्यं तमसातीरवासमात्रे बोध्यं ॥१७॥ निशाम्य अवलोक्य निद्राणा इति शेषः
॥१८॥

कुतस्तत्राह अनुरक्ता इति बहुभिर्गुणैरिति सर्वान्वयि ॥५॥ नौ अस्मादर्थे अस्मन्निमित्तं अभीक्ष्णं मुहुर्मुहुः रुदं
तौ पि नरौ अंधौ न भवेतामपि भवेतामेवानुशोचामि नौ ॥६॥ अथवा तदनुशोको अस्माकं कथं इत्याह भरत इति ७
आनृशंसत्वमक्रूरत्वं ॥८॥ अथ लक्ष्मणानुगमनेन संतुष्ट आह त्वयेति मामनुव्रजता नयातु यत्कार्यं क

अनुरक्ता हि मनुजा राजानं बहुभिर्गुणैः ॥ त्वां च मां च नरव्याघ्र शत्रुघ्नभरतौ तथा ॥५॥ पितरं चा
नुशोचामि मातरं च यशस्विनीं ॥ अपि नांधौ भवेतां नौ रुदंतौ तावभीक्ष्णशः ॥६॥ भरतः खलु धर्मा
त्मा पितरं मातरं च मे ॥ धर्मार्थकामसहितैर्वाक्यैराश्वासयिष्यति ॥७॥ भरतस्यानृशंसत्वं संचिं
त्याहं पुनः पुनः ॥ नानुशोचामि पितरं मातरं च महाभुज ॥८॥ त्वया कार्यं नरव्याघ्र मामनुव्रजता
कृतं ॥ अन्वेष्टव्या हि वैदेह्या रक्षणार्थे सहायता ॥९॥ अद्भिरेव हि सौमित्रे वत्स्याम्यद्य नि
शामिमां ॥ एतद्धि रोचते मह्यं वन्ये पि विविधे सति ॥१०॥ एवमुक्त्वा तु सौमित्रिं सुमंत्रमपि रा
घवः ॥ अप्रमत्तस्त्वमश्वेषु भव सौम्येत्युवाच ह ॥११॥

र्तव्यं त्वत्कृतमेव ॥ हि यतस्त्वदनुव्रजनाभावे वैदे
ह्या रक्षणार्थे सहायता सहायसमूहोन्वेष्टव्यः स्यात् त्वमेकोपि सहायसमूहस्थानीय इति भावः अतस्त
स्यै अथो रम्ये वसुखाहारादिकं संपादयेति शेषः ॥९॥ अहं तु अत्र तमसातीरे इमां निशामद्भिरेव कृतप्रा
णरक्षणो वत्स्यामि प्रथमदिनत्वात् वनवाससंकल्पांगत्वेनेति शेषः एतदेवाह एतद्धीति वन्ये सत्यपीत्यन्व

युक्तः सज्जः॥२७॥परिच्छदो धनुःकवचादि. आकुलावर्त्तां निबिडावर्ता आवर्तैराकुलामितिवा॥२८॥भयदर्शि नामप्यभयंमार्गं राजमार्गमित्यर्थः॥२९॥त्वमेवरथमास्थायोदङ्मुख प्रयाहि मत्प्रतिनिवृत्तिबुध्युत्पाद नेनजनमोहनाय नतुवयंव्रतभंगापत्तेः॥३०॥तदेवाह. मूहूर्तमिति. नविद्युर्वनमेवगत इतिनजानी

अयंयुक्तोमहाबाहो रथस्तेरथिनांवर॥त्वरयारोहभद्रंतेससीतः सहलक्ष्मणः॥२७॥तंस्पंद नमधिष्ठायराघवः सपरिच्छदः॥शीघ्रगामाकुलावर्तांतमसामतरन्नदीं॥२८॥ससंतीर्यमहा बाहुः श्रीमान्‌शिवमकंटकं प्रापद्यतमहामार्गमभयंभयदर्शिनां॥२९॥मोहनार्थंतु पौराणा स्ततरामोब्रवीद्वचः॥उदङ्मुखः प्रयाहित्वंरथमारुह्यसारथे॥३०॥मुहूर्त्तंत्वरितंगत्वा निवर्त्त यरथंपुनः॥यथानविद्युःपौरामांतथाकुरुसमाहितः॥३१॥रामस्यतुवचःश्रुत्वातथाचक्रे चसारथिः॥प्रत्यागम्यचरामस्यस्पंदनंप्रत्यवेदयत्॥३२॥तौसंप्रयुक्तंतुरथंसमास्थितौत दाससीतौरघुवंशवर्धनौ॥प्रचोदयामासततस्तुरंगमान्ससारथियेनपथातपोवनं॥३३॥

युः॥३१॥तथाचक्रे. उदङ्मुखतयागत्वामार्गांतरेण निवर्त्तिपूर्वकमागत्य॥एवंहि रामः प्रतिनिवृत्तइति पौरभ्रमः सिध्यति. महामायाधिष्ठातुर्भगवतइयत्याक्रियया पौरमोहनं नाश्चर्यायेतिमंतव्यं. प्रत्य वेदयत्. आरोहणार्थं मज्ञापयत्॥३२॥संप्रयुक्तंसम्यगानीयदर्शितं. समास्थितावारूढौ. अस्तामि तिशेषः येनपथामार्गेणातपोवनंप्राप्यतइतिशेषः ततस्तेनमार्गेणतुरंगमान्प्रचोदयामास॥३३॥

अस्मद्व्यपेक्षान्॰ अस्मास्वेवविशेषेणापेक्षावतः॥ अतएवगृहेषुनिर्व्यपेक्षान्निरपेक्षान्॰ अमात्सांप्रतंअरुणोद
येपिसुप्तान्॥१९॥ इतेपौराअस्मन्निवर्तनेयथानियमंयत्नंकुर्वंतितथाजानेअपिप्राणान्न्यसिष्यंतित्यक्ष्यं
तिनतुअस्मन्निवर्तनविषयंनिश्चयंत्यक्ष्यंतीत्यर्थः॥२०॥ अतोयावदितिआदिलघुशीघ्रं॥२१॥ शीघ्रगमने

अस्मद्व्यपेक्षान्सौमित्रेनिर्व्यपेक्षान्गृहेष्वपि॥ वृक्षमूलेषुसंसक्तान्पश्यलक्ष्मणसांप्रतं॥१९॥ यथै
तेनियमंपौराःकुर्वंत्यस्मन्निवर्तने॥ अपिप्राणान्नशिष्यंतिनतुत्यक्ष्यंतिनिश्चयं॥२०॥ यावदेवतुसं
सुप्तास्तावदेववयंलघुरथमारुह्यगच्छामःपंथानमकुतोभयं॥२१॥ अतोभूयोपिनेदानीमिक्ष्वा
कुपुरवासिनःस्वपेयुरनुरक्तामांवृक्षमूलेषुसंश्रिताः॥२२॥ पौराह्यात्मकृताद्दुःखाद्विप्रमोच्या
नृपात्मजैः॥ नतुखल्वात्मनायोज्यादुःखेनपुरवासिनः॥२३॥ अब्रवील्लक्ष्मणोरामंसाक्षाद्धर्ममि
वस्थितं॥ रोचतेमेतथाप्राज्ञक्षिप्रमारुह्यतामिति॥२४॥ अथरामोब्रवीत्सूतंशीघ्रंसंयुज्यतांरथः॥ ग
मिष्यामिततोऽरण्यंगच्छशीघ्रमितःप्रभो॥२५॥ सूतस्ततःसंत्वरितःस्यंदनंतैर्हयोत्तमैः॥ योज
यित्वातुरामस्यप्रांजलिःप्रत्यवेदयत्॥२६॥

हेतुमाह॰ अतइति॰ एतदनंतरमेतेयतोमामनुरक्ता
तोभूयोपिनस्वपेयुरतोयावन्नोत्तिष्ठंतितावच्छीघ्रंगच्छामइत्याशयः॥२२॥ तत्रहेत्वंतरमाह॰ पौराहि
ति॰ आत्मकृतात् आत्मनिमित्तकात्॰ आत्मनाआत्मनिमित्तकेनयोज्याःसंयोज्याः॥२३॥ आरुह्य
तांरथइतिशेषः॥२४॥ ततःसंयोजितेनरथेनेत्यर्थः॥ शीघ्रंगच्छरथयोजनायेतिशेषः॥ प्रभोसमर्थ॥२५॥ २६

६ निधनंप्रायोपवेशनेनमरणं॰ महाप्रस्थानंमरणादीक्षापूर्वकमुत्तराभिमुखगमनं॰ तद्रहितानांजीवितंकिमर्थं कस्मैफलायरहितंनकस्माअपीत्यर्थः अतोमरणमेवश्रेयः ७॥८॥ रामवृत्तांतंपृच्छंतंजनंप्रतिकिंवक्ष्यामः अस्माभीराघवोवनंनीतःप्रापितइतिउत्तरंदेयमितिचेदिदंवक्तुंकथंक्षमंवक्तुमशक्यमयोग्यंचे

योनःसदापालयतिपितापुत्रानिवौरसान्॥ कथंरघूनांसश्रेष्ठस्त्यक्त्वानोविपिनंगतः॥६॥ इहैवनिधनंयाममहाप्रस्थानमेववा॥ रामेणरहितानांनोकिमर्थंजीवितंहितं॥७॥ संतिशुष्काणिकाष्ठानिप्रभूतानिमहांतिच॥ तैःप्रज्वाल्यचितांसर्वेप्रविशामोथवावयं॥८॥ किंवक्ष्यामोमहाबाहुरनसूयःप्रियंवदः॥ नीतःसराघवोस्माभिरितिवक्तुंकथंक्षमं॥९॥ सानूनंनगरीदीनादृष्ट्वास्मान्राघवंविना॥ भविष्यतिनिरानंदासस्त्रीबालवयोधिका॥१०॥ निर्यातास्तेनवीरेणसहनित्यंमहात्मना॥ विहीनास्तेनचपुनःकथंद्रक्ष्यामतांपुरीं॥११॥ इतीवबहुधावाचोबाहुमुद्यम्यतेजनाः॥ विलपंतिस्मदुःखार्तीहृतवत्साइवाग्र्यगाः॥१२॥ ततोमार्गानुसारेणगत्वाकिंचित्ततःक्षणं॥ मार्गनाशाद्विषादेनमहताससमभिप्लुताः॥१३॥

ततः॰ अन्यच्चनसहुत्तरमितिभावः॥९॥१०॥११॥ अग्रेभवाअग्र्यापुरोगामिन्यस्ताश्चतागाश्चेत्यर्थः यद्वाअग्र्याःमुख्याःपुष्टत्वदुग्धवत्त्वादिगुणागावइवेत्यर्थःगाइत्यर्थः॥१२॥ ततःमार्गानुसारेणश्रुतिसंधानप्रवर्तितमार्गानुसारेणकिंचित्क्षणंकिंचित्कालंगत्वाततोमार्गनाशात् वंचनयामार्गांतरेप्रवृत्त्यारथमार्गादर्शनात्महताविषादेनसम

उक्तं निगम इति॰ तत इति॰ प्रयाणापेक्षितं॰ मांगल्यं शुभं यन्निमित्तं शाकुनं तद्दर्शनात्तदनुभवहेतोरुदङ्मुखं
रथं चकार स्थापयामास॰ ततश्चारुत्य दक्षिणाभिमुखतया वनं ययौ॥ ३४॥ इति श्रीरामाभिरामे श्रीरामीये
रामायणतिलके अयोध्याकांडे षट्चत्वारिंशः सर्गः॥ ४६॥ शोकेनोपहता अत एव निश्चेष्टाः हतचेतसो मूर्छि

ततः समास्थाय रथं महारथः ससारथिर्दाशरथिर्वनं ययौ॥ उदङ्मुखं तं तु रथं चकार प्रयाण
मांगल्य निमित्तदर्शनात्॥ ३४॥ इत्यार्षे श्रीरा॰ अयो॰ षट्चत्वारिंशः सर्गः॥ ४६॥ प्रभातायां तु शर्व
र्यां पौरास्ते राघवं विना॥ शोकोपहतनिश्चेष्टा बभूवुर्हतचेतसः॥ १॥ शोकजाश्रुपरिद्यूना वीक्ष
माणास्ततस्ततः॥ आलोकमपि रामस्य न पश्यंति स्म दुःखिताः॥ २॥ ते विषादार्तवदना रहितास्ते
न धीमता॥ कृपणाः करुणा वाचो वदंति स्म मनीषिणः॥ ३॥ धिगस्तु खलु निद्रां तां यया पहृतचे
तनाः॥ नाद्य पश्यामहे रामं पृथूरस्कं महाभुजं॥ ४॥ कथं रामो महाबाहुः स तथावितथक्रियः॥
भक्तं जनमभित्यज्य प्रवासं तापसो गतः॥ ५॥

नाः॥ १॥ परिद्यूनाः क्लिन्नाः॥ आलोक॰ आलोकसाधनं रथो
द्धतधूल्यादपि॥ २॥ ३॥ यया निद्रया॰ निद्रां भगवतीं विष्णोरित्यादिना मार्कंडेयेन तस्या भगवन्मायारूप
त्वाभिधानात्॥ तदावरणादेव च विषयाविषयानां भगवद्दर्शनं प्रसिद्धं श्रुतिशिरःसु पश्यामहे इ
तितङार्षः हे इति संबोधनं॰ वा परस्परं॥ ४॥ तथाऽवितथाऽमोघा क्रिया यस्य सः त्यक्त्वा गत इदमत्र

रा॰ टी॰ अयो॰ ५

२ बाष्पेणपिहितानना: अश्रुव्याप्तमुखाइत्यर्थः ।३। हर्षः शारीरोमुखविकासादिरूपः मोदआंतरोहर्षः प
रस्मैपदमार्षम्नसारयन्नप्रासारयन्नित्यर्थः प्रसारितान्यपिनाशोभंत ॥४॥ नष्टमिति-चिरनष्टधनस्यविपु
लस्यागमंलाभंदृष्ट्वापिनाभ्यनंदन्नवाशब्दएवार्थे० नाभ्यनंदन्नेवेत्यर्थः ॥५॥ व्यगर्हयंत-राघवमप्रतिनि
वर्त्यकिमर्थंयूयमागताइत्येवंवाग्रूपैःतोत्रैः अंकुशैः ॥६॥ तेषांरामंविनाआगतानां-रामंराजानंवि

अभिगम्यनिवृत्तानांरामंनगरवासिनां ॥ उद्गतानीवसत्त्वानिबभूवुरमनस्विनां ॥२॥ स्वंस्वं
निलयमागम्यपुत्रदारैःसमावृताः ॥ अश्रूणिमुमुचुःसर्वेबाष्पेणपिहिताननाः ॥३॥ नचाहृ
ष्यन्नचामोदन्वणिजोनप्रसारयन् ॥ नचाशोभंतपण्यानिनापचन्गृहमेधिनः ॥४॥ नष्टंदृष्ट्वा
नाभ्यनंदन्विपुलंवाधनागमं ॥ पुत्रंप्रथमजंलब्ध्वाजननीनाप्यनंदत ॥५॥ गृहेगृहेरुदंत्यश्च
भर्तारंगृहमागतं ॥ व्यगर्हयंतदुःखार्तावाग्भिस्तोत्रैरिवद्विपान् ॥६॥ किंनुतेषांगृहैःकार्यंकिं
दारैःकिंधनेनवा ॥ पुत्रैर्वापिसुखैर्वापियेनपश्यंतिराघवं ॥७॥ एकःसत्पुरुषोलोकेलक्ष्म
णःसहसीतया ॥ योनुगच्छतिकाकुत्स्थंरामंपरिचरन्वने ॥८॥

नासर्वस्यास्थिरत्वात्किंचभग
वंतंराममादरेणापश्यंतोयेगृहपुत्रदारसुखादिष्वासक्त्याप्रतिनिवृत्तास्तेषांपुनःपुनःसंसारप्रा
प्तिरेवनतुकदापिमोक्षइत्याशयः ॥ तस्यमायिकरूपदर्शनेपिचित्तशुद्धिद्वारामोक्षोपयोगिज्ञाना
धिकारोभवति ॥७॥ सत्पुरुषःभाग्यवान्पुरुषःसीताचभाग्यवतीयोवनेरामंपरिचरन्अनुगच्छति ॥८॥

किमिदं-यथयद्रथमार्गादर्शनं इतःपरं किं करिष्यामः अहो दैवेनोपहता वयमितिवदंतोन्यवर्तंतेत्यन्वयः॥१४॥
व्यथिताःसज्जनायस्यांतांसत्पदेनकेकेप्याव्यावृत्तिः॥१५॥तयोर्हर्षंदत्तयस्तेनव्याकुलमानसाः यद्वात्तयंग
हंप्रतिव्याकुलंगंतव्यंनवेत्येवंरूपमानसंयेषांतादृशाः अवर्तयंत अमुंचत्॥१६॥१७॥१८॥ दुःखेनरामवि॰

रथमार्गानुसारेणान्यवर्तंतमनस्विनः॥ किमिदंकिंकरिष्यामोदैवेनोपहताइति॥१४॥ तदाययथा
गतेनैवमार्गेणक्लांतचेतसः॥ अयोध्यामगमन्सर्वेपुरीव्यथितसज्जनां॥१५॥ आलोक्यनगरीं
तांचक्षयव्याकुलमानसाः॥ आवर्तयंततेश्रूणिनयनैःशोकपीडितैः॥१६॥ एषारामेणनगरीर
हितानातिशोभते॥ आपगागरुडेनेवह्रदादुद्धृतपन्नगा॥१७॥ चंद्रहीनमिवाकाशंतोयहीनमि
वार्णवं॥ अपश्यन्निहतानंदंनगरंतेविचेतसः॥१८॥ तेतानिवेश्मानिमहाधनानिदुःखेनदुः
खोपहताविशंतः नैवप्रजग्मुःस्वजनंपरंवानिरीक्षमाणाःप्रविनष्टहर्षाः॥१९॥ इत्यार्षे श्रीरा॰
अयो॰ सप्तचत्वारिंशःसर्गः॥४७॥ तेषामेवंविषण्णानांपीडितानामतीवच॥ बाष्पविप्लुतनेत्राणां
सशोकानांमुमूर्षया॥१॥

योगदुःखेनोपहताः कथंगृहंप्रवेष्टव्यमितिदुःखेनविशंतोपिनैवप्रजग्मुः
स्ववेश्मपरवेश्मविवेकंनाज्ञासिषुःतथानिरीक्षमाणाअपिस्वजनपरजनविवेकंनप्रापवंतः॥१९॥ इतिश्री
रामाभिरामेश्रीरा॰ रा॰ अयो॰ सप्तचत्वारिंशःसर्गः॥४७॥ तेषामित्यादिपद्यद्वयमेकंवाक्यं मुमूर्षयोपल
क्षितानांअमनस्विनांदुर्मनसांखिन्नानामितियावत् सत्वात्यंसवः उद्धृतानीवउत्क्रांतानीव मतप्रायाजाताइतिभावः॥१॥

रामा·अ·
१५१

151

भयाभावादौहेतुः सहिसूरइत्यादिनोऽस्माकमदूरात्पुराभवति· यावत्पुरेतिभविष्यतिलट् आसन्नो
भविष्यतीत्यर्थः अतोराघवमनुगच्छामप्रार्थनायांलोट्॥१६॥पादच्छाया· छायापदेनानुग्रहहेतुभू
तासेवात्लक्ष्यते भर्तुरामचंद्रस्यपादसेवैवनः परमसुखंसुखसाधनं॥ गतिःशरणांपरायणांशा

सहिसूरोमहाबाहुःपुत्रोदशरथस्यच॥पुराभवतिनोदूरादनुगच्छामराघवं॥१६॥पाद
च्छायासुखंभर्तुस्तादृशस्यमहात्मनः॥सहिनाथोजनस्यास्यसगतिःसपरायणं॥१७॥
वयंपरिचरिष्यामःसीतांयूयंचराघवं॥इतिपौरस्त्रियोभर्तृन्दुःखार्तास्तत्तदब्रुवन्॥१८॥
युष्माकंराघवोरण्येयोगक्षेमंविधास्यति॥सीतानारीजनस्यास्ययोगक्षेमंकरिष्यति॥१९॥
कोन्वनेनाप्रतीतेनसोत्कंठितजनेनच॥संप्रीयेताऽमनोज्ञेनवासेनहृतचेतसा॥२०॥
कैकेय्यायदिचेद्राज्यंस्यादधर्म्यमनाथवत्॥नहिनोजीवितेनार्थःकुतःपुत्रैःकुतोधनैः२१

भवतप्रतिष्ठा॥१७॥वयंस्त्रियःयूयंपुरुषाः॥१८॥अप्राप्तप्राप्तिर्योगःप्राप्तरक्षणंक्षेमं॥१९॥अप्रतीतेन·अ
सुखेनसोत्कंठितजनेन·उत्कंठितजनसहितेन· अतएवामनोज्ञेनहृतचेतसाचित्तनाशकेनवा
सेनकोऽनुसंप्रीयेतेत्यर्थः॥२०॥यदिचेदिति· समुदायोयमर्थः अधर्म्यमधर्मयुक्तं· अतएवाना
थवत्नाथवर्जितं· जीवितेनार्थःजीवितादपिभिन्नोऽर्थोपिन· पुत्रादिरूपस्ततसुतरांनेत्यर्थः॥२१॥

राम
१५१

सीतालक्ष्मणाबेवेति॰ किंवाच्यं॰ अचेतना आपगादयोपिसभाग्यानत्वयं॰ यमित्याह॰ आपगाइतिविगात्स्वच्छ
त्वा॥९॥रम्यकानना॰ चारुवृक्षसंघा॰॥अनूपोजलप्रायदेशा॰॥१०॥अनर्चितुंनशक्यंपति॰ अर्चितुमेवशक्यंपती
त्यर्थः॥११॥नदेवदर्शयिष्यंति॰ विचित्रेत्यादि॰ विचित्रैः कुसुमैः रापीडः शिरोभूषणामेषां॰ बल्लीमंजरीः पुष्प

आपगाः कृतपुण्यास्ताः पद्मिन्यश्चसरांसिच॥येषुयास्यतिकाकुत्स्थोविगाह्यसलिलंशुचि॥९॥
शोभयिष्यंतिकाकुत्स्थमटव्योरम्यकाननाः॥आपगाश्चमहानूपाः सानुमंतश्चपर्वताः॥१०॥का
ननंवापिशैलंवायंरामोनुगमिष्यति॥प्रियातिथिमिवप्राप्तंनैनंशक्ष्यंत्यनर्चितुं॥११॥विचित्रकुसु
मापीडाबहुमंजरिधारिणः॥राघवंदर्शयिष्यंतिनगाभ्रमरशालिनः॥१२॥अकालेचापिमु॰
ख्यानिपुष्पाणिचफलानिच॥दर्शयिष्यंत्यनुक्रोशाद्गिरयोराममागतं॥१३॥प्रस्रविष्यंतितो
यानिविमलानिमहीधराः॥विदर्शयंतोविविधान्भूयश्चित्रांश्चनिर्झरान्॥१४॥पादपाः प
र्वताग्रेषुरमयिष्यंतिराघवं॥यत्ररामोभयंनात्रनास्तितत्रपराभवः॥१५॥

स्तबकान्धर्तुंशीलमे
षां छांदसोह्रस्वः॰ नगाः॰ नगाः वृक्षाः॰ दर्शयिष्यंति॰ आत्मानमितिशेषः॰ एवंचपुष्पांजलिरूपार्चायांते
शक्ताइतिभावः॥१२॥गिरयोदर्शयिष्यंति स्वगतवृक्षद्वारेतिशेषः॥१३॥१४॥पादपा॰ रमयिष्यंति॰ स्व
मूलाकीर्यमाणपल्लवकुसुमरचितशाय्यास्वितिशेषः॥यत्ररामः॰ वसतीतिशेषः॥१५॥

इदानीं तद्गुणवर्णनेनात्मानमाप्यापयंति॰ पूर्णेत्यादि ॥२९॥ पूर्वाभिभाषी सौहार्दप्रदर्शनाय॰ परभयापगमाय॰ च॰ सर्वत्र पूर्वभाषणशीलः ॥३०॥३१॥ मत्पौरिवभयागमे॰ मत्फहेतुकभयागमइवेत्यर्थः ॥३२॥ विलप

पूर्णचंद्राननः श्यामो गूढजत्रुररिंदमः ॥ आजानुबाहुः पद्माक्षो रामो लक्ष्मणपूर्वजः ॥२९॥ पूर्वाभिभाषी मधुरः सत्यवादी महाबलः ॥ सौम्यश्च सर्वलोकस्य चंद्र इव प्रियदर्शनः ॥३०॥ नूनं पुरुषशार्दूलो मत्तमातंगविक्रमः ॥ शोभयिष्यत्यरण्यानि विचरन्स महाबलः ॥३१॥ तास्तथा विलपंत्यस्तु नगरे नागरस्त्रियः ॥ चुक्रुशुर्दुःखसंतप्ता मत्योरिव भयागमे ॥३२॥ इत्येवं विलपंतीनां स्त्रीणां वेश्मसु राघवं ॥ जगामास्तं दिनकरो रजनी चाभ्यवर्तत ॥३३॥ नष्टज्वलनसंतापा प्रशांताध्यायसत्कथा ॥ तिमिरेणानुलिप्तं च तत्तदा नगरं भवत् ॥३४॥ उपशांतवणिक्पण्या नष्टहर्षा निराश्रया ॥ अयोध्या नगरी चासीन्नष्टतारमिवांबरं ॥३५॥ तदा स्त्रियो रामनिमित्तमातुरा यथा सुते भ्रातरि वा विवासिते ॥ विलप्य दीना रुरुदुर्विचेतसः सुतैर्हि तासामधिको पि सो भवत् ॥३६॥

तीनां दुःखं द्रष्टुमशक्त इति शेषः रविरस्तं जगाम॰ तदीयदुःखदर्शनासहिष्णुतया रविरपि शीघ्रंगतिरभूदित्याशयः ॥३३॥ नष्टो होमाद्यर्थोपि ज्वलनसंतापो ज्वलनसंगमो यस्यां॰ प्रशांता अध्याया॰ अध्ययनानि॰ सत्कथाश्च यस्यां सा ॥३४॥ निराश्रया रामरूपाश्रयराहित्यात्॰ ॥३५॥ सुतैः त्तीयार्थी॰ सुतेभ्योपि तासां स अधिको भवत् ॥३६॥ ॥ ॥ ॥

152

पुत्रो रामः परिहरेत् त्यागात् परिहरेत् ॥ पुत्रभर्तृत्यागिन्या इतरत्यागः कियानिति भावः ॥२२॥ जीवंत्याः कैके
य्या राज्येन तया भृतकाः योषिता हि अपि जीवंत्या न ॥ वसेमहि न वसेम ॥ इममर्थं प्रति पुत्रैरपि शपामहे ॥२३॥
अधर्म्या अधर्मयुतां ॥२४॥ अनालंभे अयज्ञं तत्र हेतुरनायकमिति कृते तन्निमित्तं ॥२५॥ विलोपो नाशः

यया पुत्रश्च भर्ता च त्यक्तौ चैश्वर्यकारणात् ॥ कं सा परिहरेदन्यं कैकेयी कुलपांसनी ॥२२॥ कैके
य्याः न वयं राज्ये भृतका हि वसेमहि ॥ जीवंत्या जातु जीवंत्यः पुत्रैरपि शपामहे ॥२३॥ या पुत्रं पा
र्थिवेंद्रस्य प्रवासयति निर्घृणा ॥ कस्तां प्राप्य सुखं जीवेदधर्म्यां दुष्टचारिणीं ॥२४॥ उपद्रुतमि
दं सर्वमनालंभमनायकं ॥ कैकेय्याः स्कृते सर्वं विनाशमुपयास्यति ॥२५॥ न हि प्रव्रजिते रामे
जीविष्यति महीपतिः ॥ मृते दशरथे व्यक्तं विलोपस्तदनंतरं ॥२६॥ ते विषं पिबतालोड्य क्षीणपु
ण्याः सुदुःखिताः ॥ राघवं वानुगच्छध्वं अश्रुतिं वापि गच्छत ॥२७॥ मिथ्याप्रव्राजितो रामः सभार्यः स
हलक्ष्मणः ॥ भरते संनिबद्धाः स्म सौनिके पशवो यथा ॥२८॥

॥२६॥ ते यूयं पुरुषाः सस्त्रीकाः इति शेषः
आलोड्य पेषयित्वा ॥ अश्रुतिं वापि यत्र देशे कैकेय्या नामश्रवणमपि न भवति तादृशं दूरदेशं वा ग
च्छतेत्यर्थः ॥२७॥ मिथ्याप्रव्राजितः मिथ्यावरकल्पनया प्रव्राजितो भूत् ॥ ततः कैकेयीवशाद् भरते रा
जनि सति ॥ सौनिके ॥ सूना पशुवधस्थानं तत्र भवे हिंसके तत्समीपे पशवो यथा निश्चितमरणा
स्तथा सन्निबद्धाः स्म सन्निचिघाभयाम ॥२८॥ ॥ ॥

पापापापकर्मारब्धशरीरा॰ ॥ पापानुबंधिनी पापकर्मणिरता॰ तीक्ष्णा क्रूरदर्शना॰ संभिन्नमर्यादा त्यक्तमर्यादा ॥ ५ ॥ ईदृशं अनेककल्याणगुणवंतं ॥ सानुक्रोशं सदयं ॥ ६ ॥ प्रजानां प्रियमिति शेषः यद्वा प्रजाविष

ह्यानृशंसाद्यकैकेयी पापापापानुबंधिनी ॥ तीक्ष्णा संभिन्नमर्यादा तीक्ष्णा कर्मणि वर्तते ॥ ५ ॥
या पुत्रमीदृशं राज्ञः प्रवासयति राघवं ॥ वनवासे महाप्राज्ञं सानुक्रोशं जितेंद्रियं ॥ ६ ॥
अहो दशरथो राजा निस्नेहः स्वसुतं प्रति ॥ प्रजानामनघं रामं परित्यक्तुमिहेच्छति ॥ ७ ॥
एता वाचो मनुष्याणां ग्रामसंवाससवासिनां ॥ शृण्वन्नतिययौ वीरः कोसलान्कोसलेश्वरः ॥ ८ ॥
ततो वेदश्रुतिं नाम शिववारिवहां नदीं ॥ उत्तीर्याभिमुखः प्रायादगस्त्याध्युषितां दिशं ॥ ९ ॥
गत्वा तु सुचिरं कालं ततः शीतवहां नदीं ॥ गोमतीं गोयुतानूपामतरत्सागरंगमां ॥ १० ॥ गोमतीं चाप्यतिक्रम्य राघवः शीघ्रगैर्हयैः ॥ मयूरहंसाभिरुतां ततार स्यंदिकां नदीं ॥ ११ ॥

येयं नद्यं पापरहितं ॥ ७ ॥ कोसलान् अति॰ अतिक्रम्य ययौ ॥ ८ ॥ शिववारिवाहां शिवानि वारीणि वहंती ॥ ९ ॥ गोभिर्युतान्यनूपानि जलप्रायदेशा यस्याः सा सागरंगमा भित्यनेन यमुनावत्तस्या अपि पृथक्सागरप्रवेशं सूचयति ॥ १० ॥ स्यंदिका तदाख्यां ॥ ११ ॥ ॥ राम ॥

वादनंवादित्रंप्रशांतानिगीतोत्सववादित्राणियस्यांसा॰पिहितंग्रापणानांपण्यवस्तूनामुदयःप्रसारणंयस्यांसा॰
संवृत्तपितोदकः॥नीरणोदकःसंक्षुभितोदक इतिपाठेदैण्यात्सं॰क्षुभितोदकइत्यर्थः॥३७॥इतिश्रीरामाभिरामे
श्रीरामीयेरामायणतिलके अयोध्याकांडेऽष्टचत्वारिंशःसर्गः॥४८॥अथरामवृत्तांतमाह॰रामोपीति॰तेनैव॰
यत्रराविशेषेद्विजाववंचितास्तेनैवमहदंतरंवहुदूरं॥१॥व्यपायात्गता विषयोदेशः॥२॥विशेषेरूण्यः

प्रशांतगीतोत्सवनृत्तवादनाविभ्रष्टहर्षापिहितापणोदया॥तदात्वयोध्यानगरीबभूवसाम
हार्णवःसंवृतपितोदकोयथा॥३७॥इत्यार्षेश्रीरामायणेवाल्मीकीयेअयोध्याकांडेऽष्टचत्वारिं
शःसर्गः॥४८॥रामोपिरात्रिशेषेणतेनैवमहदंतरं॥जगामपुरुषव्याघ्रःपितुराज्ञामनुस्मर
न्॥१॥तथैवगच्छतस्तस्यव्यपायाद्रजनीशिवा॥उपास्यनुशिवांसंध्यांविषयानत्यगाहत॥२॥
ग्रामान्विकृष्टसीमांतान्पुष्पितानिवनानिचपश्यन्नतिययौशीघ्रंशरैरिवहयोत्तमैः॥३॥
शृण्वन्वाचोमनुष्याणांग्रामसंवासवासिनां॥राजानंधिक्दशरथंकामस्यवशमागतं॥४॥

सीमांतायेषु॰ अनेनसौराज्यंध्वनितं॰॥तान्यतिक्रामत्॰शनैरिवशीघ्रंययोरमणीयदेशादिदर्शन
पारवश्यात्॰अतिशीघ्रमपिगमनंशनैरिवप्रत्यभादित्यर्थः॥इतितीर्थः॥शरैरिवेतिपाठः॰शरसदृशवेग
वद्भिरश्वोत्तमैरित्यर्थइतिकतकः॥३॥ग्रामाःमहांतःसंवासाःस्वल्पग्रामाःशृण्वन्नन्ययावित्यन्वयःना
वाचआह॰राजानंधिगित्यादि ... ॥४॥ ... ॥ ... राम

राजर्षीणांद्दीतिश्लोकः पुनरुक्तार्थक इव कनकासंमतश्चेतिवोध्यं- एवंहितत्व्याख्याह्रियतः अस्मिन्लो
के राजर्षीणांवनेमृगयारत्यर्थमासीत्. अतोहमपिकालेश्वाद्यादिकालेमनुजैः। मनुपुत्रैः सदाचार
परैरपिकृतांस्वीकृतांध्वनिनांचचत्लल्त्येषुइषुसिध्यर्थमभिकांक्षितां॥ नात्यर्थमभिकांक्षामीतिसं
वंधः॥१६॥ तंतमर्थमभिप्रेत्यविषयीकृत्यमधुरयागिरासूतंप्रतिवाक्यमुदीरयन्॰ सऐक्ष्वाकोराम

नात्यर्थमभिकांक्षामिमृगयांसरयूवने॥ रतिर्ह्येषातुलालोकेराजर्षिगणसंमता॥१६॥ स
तमध्वानमैक्ष्वाकः सूतंमधुरयागिरा॥ तंतमर्थमभिप्रेत्ययथौवाक्यमुदीरयन्॥१७॥ इ
त्यार्षेश्रीरामायणेअयोध्याकांडेएकोनपंचाशःसर्गः॥४९॥ विशालान्कोसलान्रम्यान्या
त्वालक्ष्मणपूर्वजः॥ अयोध्यामुन्मुखोधीमान्प्रांजलिर्वाक्यमब्रवीत्॥१॥ आपृच्छेत्वांपुरिश्रे
ष्ठेकाकुत्स्थपरिपालिते॥ देवतानिचयानित्वांपालयंत्यावसंतिच॥२॥ निवृत्तवनवास
स्त्वामनृणोजगतीपतेः॥ पुनर्द्रक्ष्यामिमात्राचपित्राचसहसंगतः॥३॥ ॥ ॥

स्तमध्वानंययावितिसंवंधः॥१८॥ इतिश्रीरामाभिरामेश्रीरामीयेरामायणतिलके अयोध्याकांडेएको
नपंचाशःसर्गः॥४९॥ अथजन्मभूमिप्रयुक्तस्नेहेननिर्गमनकालेशिष्टाचारपरिप्राप्ततयाचस्वदेशमा
पृच्छति- स्वस्वरूपगोपनार्थविशालानिति- यात्वातदंतंगत्वा॥१॥ हेपुरिश्रेष्ठेत्वांतत्संबंधिदेवतानि
चआपृच्छेप्रार्थयामि॥२॥ प्रार्थनाप्रकारमाह- निवृत्तेति॥३॥ ॥ राम ॥

सः अतीतस्य दिकः॥ महीस्य दिक्कासीमां कोसलदेशरूपां राष्ट्रावृत्तां अवांतरजनपदावृतां वैदेहीमन्वदर्श
यत्॥ इक्ष्वाकवे मनुना दत्तकोसलदेशस्य दक्षिणसीमां कथयामासेत्यर्थः॥ यद्यपीक्ष्वादयः सार्वभौमास्त
थापि तेषां स्वराजधानीत्वास्पदं कोशलदेश एव॥ सार्वभौमत्वं तु तत्तद्देशसिंहासनाधिष्ठानसकलराज
पालनीयाज्ञत्वमेवेत्यलं॥१२॥ सूत इत्युक्तः अरण्ये इत्यादिभ्यामाभाष्य संबोध्य हंसमत्तस्वरः मत्तहंसस्वरः
१३॥ अथ परिगृहीतमनुष्यदेहस्य तद्देहग्रहणानुरूपो भिनयः कदेति॥ आगम्य अतिक्रांतस्वदे

समहीं मनुना राज्ञा दत्तामिक्ष्वाकवे पुरा॥ स्फीतां राष्ट्रावृतां रामो वैदेहीमन्वदर्शयत्॥१२॥
सूत इत्येव चाभाष्य सारथिं तमभीक्ष्णशः॥ हंसमत्तस्वरः श्रीमानुवाच पुरुषोत्तमः॥१३॥ क
दाहं पुनरागम्य सरय्वाः पुष्पिते वने॥ मृगयां पर्यटिष्यामि मात्रा पित्रा च संगतः॥१४॥ राज
र्षीणां हि लोकेस्मिन्नत्यर्थं मृगया वने॥ काले कृतां तां मनुजैर्धन्विनामभिकांक्षितां॥१५॥

शमितिशेषः॥१४॥ ननु मृगयायाः स्त्रीद्यूतमृगयामद्यवाक्पारुष्यो ग्रदंडताः॥ अर्थस्य दूषणं चेति राज्ञां
व्यसनसप्तकमित्यक्तेर्व्यसनानां निषेधाद्वक्यंतदिच्छेत्यत आह॥ नात्यर्थमिति॥ प्रजान्यायचिंता
दिवैमुख्यायादकतया ऽत्यंतरतेरेवतस्या निषेधात्॥ ननु सर्वथैव निषेधोऽस्त्वत आह॥ एषा रतिः क्री
डा लोके राजर्षिगणसंमता ऽतो नातुल्ला न सर्वथा निषिद्धेत्यर्थः॥ गजादयो न हंतव्या मृगयायां महेषुभि
रित्यादिनोक्तस्या अप्यनुमतत्वमिति भावः॥१५॥

नरेंद्राणां रत्नणीयात् ग्रामशद्ब इति शेषः ॥ नरेंद्ररत्नणायोग्ये केकयग्रामान् ॥ इतर नरेंद्रराज्यतुल्ये केकयग्रामानिति यावत् ॥ १० ॥ मध्येन मध्यगत्वाए नरेंद्राणामितरेषां भोज्यं राज्यं देशयत्यो स्वदेशत्वाभावेन नानुया नशंकाभावात् शनैर्देशसौभाग्यं पश्यन् अगमदित्यर्थः ॥ ११ ॥ तत्र अयोध्याराज्याद्दक्षिणराज्ये ॥ १२ कालेक्रीडाकाले सेविता अंभः पूर्णाह्रदा यास्यांतां ॥ १३ ॥ नागपत्नीभिर्गंधर्वपत्नीभिश्च सेविता सत

रत्नणीयान्नरेंद्राणां ब्रह्मघोषाभिनादितान् ॥ रथेन पुरुषव्याघ्रः कोसलानत्यवर्तत ॥ १० ॥
मध्येन मुदितं स्फीतं रम्योद्यानसमाकुलं ॥ राज्यं भोज्यं नरेंद्राणां ययौ धृतिमतां वरः ॥ ११ ॥
तत्र त्रिपथगां दिव्यां शीततोयामशैवलां ॥ ददर्श राघवो गंगां रम्यां ऋषिनिषेवितां ॥ १२ ॥
आश्रमैरविदूरस्थैः श्रीमद्भिः समलंकृतां ॥ कालेप्सरोभिर्हृष्टाभिः सेवितांभोह्रदां शिवां ॥
॥ १३ ॥ देवदानवगंधर्वैः किन्नरैरुपशोभितां ॥ नागगंधर्वपत्नीभिः सेवितां सततं शिवां ॥ १४
देवाक्रीडशताकीर्णां देवोद्यानयुतां नदीं ॥ देवार्थमाकाशगमां विख्यातां देवपद्मिनीं ॥ १५ ॥

ततं शिवामित्यनेन महानिशायामपि तस्यां स्नानाद्यधिकारः सूचितः तदुक्तं भारते भुक्त्वा वाय दिवा भु क्त्वा रात्रौ वाय दिवा दिवा नकालनियमः कश्चिद्गंगां प्राप्य सरिद्वरांइति ॥ १४ ॥ देवानामाक्रीडैः क्रीडा पर्वतै र्हिमवति उभयतीरवार्तिभिर्युक्ता देवार्थं देवानां स्नानपानादिप्रयोजनाय तत्प्रार्थनया आ काशगां देवपद्मिनी देवभोग्यहेमपद्मवती ॥ १५ ॥ .... ॥ ...... राम .... ॥

255

ज्ञानपदं जनं स्वदर्शनार्थं तत्रागतं तेषामश्रुपूर्णमुखत्वात् लोकव्यवहारानुसारेणानटइव स्वयमप्यश्रुपूर्णमुखः ॥४॥ अनुक्रोशः आदरोनुतापोवा दयाकारुण्यं यथायोग्यं मयिवः युष्माकं युष्माभिरितियावत् कृतः कृतार्थं दुःखस्य चिरमनुभवइतिशेषः ॥ पापीयः अशोभनंअतो युष्माभिर्गम्यतां वयमप्यर्थसि

ततोरुचिरतास्रार्तोभुजमुद्यम्यदक्षिणं ॥ अश्रुपूर्णमुखोदीनोब्रवीज्ज्ञानपदंजनं ॥४॥ अनुक्रोशोदयाचैव यथार्हं मयिवः कृतः ॥ चिरं दुःखस्य पापीयो गम्यतामर्थसिद्धये ॥५॥ तेभिवाद्य महात्मानं कृत्वा चापि प्रदक्षिणं ॥ विलपंतो नरा घोरं व्यतिष्ठंश्च क्वचित् क्वचित् ॥६॥ तथा विलपतां तेषामतृप्तानांच राघवः ॥ अचक्षुर्विषयं प्रायाद्यथार्कः क्षणदामुखे ॥७॥ ततो धान्यधनोपेतान् दानशीलजनान् शिवान् ॥ अकुतश्चिद्भयान् रम्यांश्चैत्ययूपसमावृतान् ॥८॥ उद्यानाम्रवनोपेतान् संपन्नसलिलाशयान् ॥ तुष्टपुष्टजनाकीर्णान्गोकुलाकुलसेवितान् ॥९॥

इत्येपित्रनुज्ञातार्थसिद्धये अवतारप्रयोजनार्थसिद्धये इतित्वरस्व गच्छामइतिशेषः व्याख्यानांतरं त्वप्रयोजकत्वान्नोक्तं ॥५॥ तेएवं रामेणाबोधिताः ॥६॥ अतृप्तानां दर्शनतृप्तिरहितानां क्षणदामुखेसायंकालेऽर्कोयथातथा अचक्षुर्विषयंदेशंगतः ॥७॥ तदेवाह वाल्मीकिः ततइतिदानशीलाजनायेषुतान् चैत्यैर्देवताधिष्ठानवृक्षैर्यूपैश्चसमावृतान् ॥८॥ गोकुलैरा

वा.रा.टी.अयो.

रामा॰ अ॰
१५६

देवराजानस्तेऽप्यवात्यायेषां तैश्चवरगजैः अपवात्येरिति पाठे तेषां क्रीडार्थयानभूतैरित्यर्थः ॥ २३ ॥ भूषणान्येवाह॰ फलेत्यादि॰ द्विजैः पक्षिभिः विष्णुपादस्पर्शेन ब्रह्मलोकात्ब्रह्मांडवात्यजलदेशाद्वच्युतां॰ अपापां कर्मनाशादिवत् केनापि प्रकारेण पापजनकत्वाभाववतीमिति॰ । कृतकस्तत्रेतस्यां पापज

देवराजोपवात्यैश्चसन्नादिवववनांतरां ॥ प्रमिदामिवयत्नेन भूषितां भूषणोत्तमैः ॥ २३ ॥ फलपुष्पैः किसलयैर्वृतां गुल्मैर्द्विजैस्तथा ॥ विष्णुपादच्युतां दिव्यामपापां पापनाशिनीं ॥ २४ ॥ शिंशुमारैश्चनक्रैश्चभुजंगैश्चसमन्वितां ॥ शंकरस्यजटाजूटाद्भ्रष्टां सागरतेजसा ॥ २५ ॥ समुद्रमहिषीं गंगां सारसक्रौंचनादितां ॥ आससादमहाबाहुः शृंगवेरपुरं प्रति ॥ २६ ॥ तामूर्मिकलिलावर्तामन्ववेक्ष्यमहारथः ॥ सुमंत्रमब्रवीत्सूतमिहैवाद्यवसामहे ॥ २७ ॥ अविदूरादयंनद्याबहुपुष्पप्रवालवान् ॥ सुमहानिंगुदीवृक्षोवसामोत्रैवसारथे ॥ २८ ॥

नकत्वसंभावनायाएवाभावात्॰ वस्तुतोऽपापां पापवर्जंतुरहितां तत्र हेतुः पापनाशिनीं दर्शमात्रेणेतादृशीं ॥ २४ ॥ शिंशुमारोजलकपिरिति वैजयंती कोशकर्ता॰ । नक्रैर्मकरैः सागरतेजसा॰ भगीरथतपसा ॥ २५ ॥ शृंगवेरपुरं प्रतिस्थितामिति शेषः ॥ २६ ॥ ऊर्मिभिः कलिलाः संपृक्ता आवर्तायस्यां सातां॰ इह गंगातीरे ॥ २७ ॥ नद्याविदूरत्वं बहुपुष्पप्रवालवत्वे हेतुः ॥ इंगुदीतापसतरुः ॥ २८ ॥

156

राम
१५६

शिलामयस्थले योजलाघातशब्दस्तद्रूपाट्टहासेनोग्रां· पाठांतरे जलेनाधूताः प्रक्षालिताः गुहाग्राः गुहामु
खानि ययाताम्· फेनरूपो यो निर्मलो ह्रासो मंदहासस्तद्वतीं· ॥ एवमादिना स्त्रीरूपेण वर्णनं प्रवाहरूपा
या अपि गंगाया इति बोध्यं· वेणीकृतजलां द्वित्रिजलसंयोगात् ॥१६॥ स्तिमिता निश्चला साचासौ गंभीरा
चतां· गंभीरनिर्घोषां· मृदंगादिवत्· भैरवनिस्वनां अशन्यादिवत् ॥१७॥ आभोगपुलिनां विशालसैक

जलाघातादृहासोग्रां फेननिर्मलहासिनीं ॥ क्वचिद्वेणीकृतजलां क्वचिदावर्तशोभितां ॥१६॥ क्व
चित्स्तिमितगंभीरां क्वचिद्वेगसमाकुलां ॥ क्वचिद्गंभीरनिर्घोषां क्वचिद्भैरवनिःस्वनां ॥१७॥ दे
वसंघाप्लुतजलां निर्मलोत्पलसंकुलां ॥ क्वचिदाभोगपुलिनां क्वचिन्निर्मलवालुकां ॥१८॥ हंस
सारससंघुष्टां चक्रवाकोपशोभितां ॥ सदामत्तैश्च विहगैरभिपन्नामनिंदितां ॥१९॥ क्वचित्तीररुहै
र्वृक्षैर्मालाभिरिव शोभितां ॥ क्वचित्फुल्लोत्पलच्छन्नां क्वचित्पद्मवनाकुलां ॥२०॥ क्वचित्कुमुदषंडैश्च
कुड्मलैरुपशोभितां ॥ नानापुष्परजोध्वस्तां समदामिव च क्वचित् ॥२१॥ व्यपेतमलसंघातां मणि
निर्मलदर्शनां ॥ दिशागजैर्वनगजैर्मत्तैश्च वरवारणैः ॥२२॥

नां ॥१८॥१९॥२०॥ कुड्मलरूपैः कुमुद
षंडैः समूहैरित्यर्थः· पुष्परजसा ध्वस्तां संयुक्तां समदामिव· मदसहितां प्रमदामिव स्थितां ॥२१॥ व्यपेतो दूरीकृ
तो मलसंघातः पापसंघातो ययातां· व्यपेतजलसंघातामिति पाठेंतरे क्रूरप्रवाहरहितामित्यर्थः मणिर्मुक्तामणि
अनेनातिस्वच्छशुभ्रजलत्वं· दिशा [illegible] शयोक्तिरलंकारः वरवारणैरुत्तमगजैः
॥२२

उपागतःरामसमीपंप्राप्तःविषयंस्वदेशं॥३४॥समागच्छत्देहालिंगनादिनासंगतोभवत्॥३५॥आर्तःरामीयवल्क
लादिधारणादर्शनेनतप्तःइदमस्मत्पुरं॥३६॥ईदृशवचनेकारणमाह॥ईदृशंहीति॥अनेनभगवत्स्वरू
पज्ञत्वमात्मनोध्वनितंअन्नाद्यंअन्नमोदनस्तदाद्यंभोज्यादीत्यर्थः॥३७॥३८॥नोराज्यंभक्ष्यादिकंचप्रशा

सश्रुत्वापुरुषव्याघ्रंरामंविषयमागतं॥वृद्धैःपरिवृतोमात्यैर्ज्ञातिभिश्चाप्युपागतः॥३४॥ततो
निषादाधिपतिंदृष्ट्वादूरादुपस्थितं॥सहसौमित्रिणारामःसमागच्छद्गुहेनसः॥३५॥तमार्तः
संपरिष्वज्यगुहोराघवमब्रवीत्॥यथायोध्यातथेदंतेरामकिंकरवाणिते॥३६॥ईदृशंहिमहा
बाहोकःप्राप्स्यत्यतिथिंप्रियं॥ततोगुणवदन्नाद्यमुपादायपृथग्विधं॥३७॥अर्घ्यंचोपानयत्क्षि
प्रंवाक्यंचेदमुवाचह॥स्वागतंतेमहाबाहोतवेयमखिलामही॥३८॥वयंप्रेष्याभवान्भर्ता
साधुराज्यंप्रशाधिनः॥भक्ष्यंभोज्यंचपेयंचलेह्यंचैतदुपस्थितं॥३९॥शयनानिचमुख्यानि
वाजिनांखादनंचते॥गुहमेवंब्रुवाणंतुराघवःप्रत्युवाचह॥४०॥अर्चिताश्चैवहृष्टाश्चभ
वतासर्वदावयं॥पद्भ्यामभिगमाच्चैवस्नेहसंदर्शनेनच॥४१॥

क्षिस्वीकुरु॥३९॥वाजिनांखा-
दनंघासादि॥४१॥महाप्रभुरपिसत्स्वगृहादियद्दूरंयत्पद्भ्यामागतोसियच्चतवेयमखिलाम
हीत्यनेनस्नेहंदर्शयसितेनत्वयावयमर्चिताएवहृष्टाश्चभवेमेत्युवाचेत्यर्थः सर्वदावयमर्चिता
इत्यनेनमत्ध्यानमेवमेमहतीपूजात्वंसर्वदानवास्तेइत्यप्यर्थोगर्भितः॥अतएववयंत्वयिसर्वदाहृष्टाः॥४१॥

देवादीनां संमान्यं सलिलं यस्यास्तां। अनेन गंगाजलं प्रवाहादन्यत्रानीतमपि सकलपापक्षयसमर्थमिति ध्व
नितम्। २९। तत्र गंगातीरे इंगुदीवृक्षं हयैर्ययतुः। ३०। तं अभियाय तत्समीपं गत्वेति यावत्। अवतरत
अवातरत्। ३१। उपतस्थे समीपं सेवार्थं प्राप्तः। ३२। आत्मसमः प्राणसमः। निषादजात्यः। तज्जातो भवः
बलवान्। प्राणतः सेनातश्च स्थपतिर्निषादाधिपतिः। निषादजात्यः स्थपतिरित्यनेन निषादस्थप

प्रेक्षामि सरितां श्रेष्ठां संमान्यसलिलां शिवां। देवमानवगंधर्वमृगपन्नगपक्षिणां। २९। लक्ष्म
णश्च सुमंत्रश्च बाढमित्येव राघवं। उक्त्वा तमिंगुदीवृक्षं तदोपययतुर्हयैः। ३०। रामोभिया
य तं रम्यं वृक्षमिक्ष्वाकुनंदनः। रथादवतरत्तस्मात्सभार्यः सहलक्ष्मणः। ३१। सुमंत्रोप्यव
तीर्याथ मोचयित्वा हयोत्तमान्। वृक्षमूलगतं राममुपतस्थे कृतांजलिः। ३२। तत्र राजा
गुहो नाम रामस्यात्मसमः सखा। निषादजात्यो बलवान्स्थपतिश्चेति विश्रुतः। ३३।

तियाजयेदित्यत्र कर्मधारय इति सूचितं। यद्यपीदृश सख्यं हीनप्रेष्यं हीनसख्यमित्यादिनोपयातकेषु ग
णितं तथापि तद्विप्रविषयं। राज्ञामाटविकबलेन प्रयोजनवत्त्वात्। षड्विधबलसंग्रहस्य राजधर्मत्वाच्च तत्सख्यं उ
क्तमेव दिक्। अत्रेदं बोध्यं। निषादगुहविषये रामस्यात्मसमः सखेत्येवं वदता वाल्मीकिना रामसमत्व
रामसमानख्यातित्वोक्त्या भगवद्भक्तत्वेन निषादत्वेपि पर्वव्रतश्रवणादिमत्वेन तस्य पतत्वज्ञत्वं सूचितं। ३३।

त्वरितं दीयतामित्यन्वयः ॥ ४८ ॥ जलमेवाददे तीर्थप्राप्तिनिमित्तकोपवासस्यावश्यकत्वात् ॥ ४९ ॥ अभेत्यत तोऽन्यत्र समीपदेशे आगत्य तस्थावित्यनेन तस्य निद्राभावः सूचितः अन्वजाग्रदित्यार्षं अजागरादित्यर्थः सुचिरेण शर्वरीति ॥ ५० ॥ निद्रानागमनाच्चिरत्वप्रतिभासस्तस्या ॥ ५१ ॥ इति श्री अयो॰ पंचाशत् सर्गः ॥ ५० ॥ एवं रा

गुहस्तत्रैव पुरुषांस्त्वरितं दीयतामिति ॥ ततश्चीरोत्तरासंगः संध्यामन्वास्य पश्चिमां ॥ ४८ ॥ जलमेवाददे भोज्यं लक्ष्मणेनाहृतं स्वयं ॥ तस्य भूमौ शयानस्य पादौ प्रक्षाल्य लक्ष्मणः ॥ ४९ ॥ सभार्यस्य ततोऽभेत्य तस्थौ वृक्षमुपाश्रितः ॥ गुहोऽपि सह सूतेन सौमित्रिमनुभाषयन् ॥ ५० ॥ अन्वजाग्रत्ततो राममप्रमत्तो धनुर्धरः ॥ ५० ॥ तथा शयानस्य ततो यशस्विनो मनस्विनो दाशरथेर्महात्मनः ॥ अदृष्टदुःखस्य सुखोचितस्य सा तदा व्यतीता सुचिरेण शर्वरी ॥ ५१ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये अयोध्याकांडे पंचाशः सर्गः ॥ ५० ॥ तं जाग्रतमदंभेन भ्रातुरर्थाय लक्ष्मणं ॥ गुहः संतापसंतप्तो राघवं वाक्यमब्रवीत् ॥ १ ॥ इयं तात सुखा शय्या त्वदर्थमुपकल्पिता ॥ प्रत्याश्वसिहि साध्वस्यां राजपुत्र यथासुखं ॥ २ ॥

मेशयानेत इत्तार्थं जाग्रत्त्वं लक्ष्मणगुहसंवादः तमित्यादि अदंभेन अकृत्रिमानुरागेनः भ्रातुरर्थाय भ्रातृरक्षार्थं राघवं रघुकुलजं ॥ संतापसंतप्तो रामस्य भूशय्यादिजेन संतापेन पीडितः ॥ १ ॥ इयमिति ॥ प्रत्याश्वसिहि विश्रांतो भव ॥ २ ॥

अत एव पुनरालिंगति अत्यंतप्रेमास्पदत्वं बोधयितुं भुजाभ्यामिति ॥४२॥ वनेषु चेति तस्याटविकत्वाद्वनकुश
लप्रश्नः क्वचिद्धनेष्विति पाठः ॥४३॥ अनुजानामी· अंगीकृत्य ददामि· प्रतिग्रहे भोगफलके ॥४४॥ धर्मे प्रणिहि
तं पित्राज्ञापालनलक्षणे धर्मे सावधानं अत्र तद्दत्तस्याग्रहे प्रतिग्रहे· अप्रतिगृहीतत्वरूपत्वत्र धर्मोपन्या

भुजाभ्यां साधुवृत्ताभ्यां पीडयन्वाक्यमब्रवीत् ॥ दिष्ट्या त्वां गुह पश्यामि ह्यरोगं सह बांधवैः ॥४२॥ अ
पि ते कुशलं राष्ट्रे मित्रेषु च धनेषु च ॥ यत्त्विदं भवता किंचित्प्रीत्या समुपकल्पितं ॥४३॥ सर्वं तदनु
जानामि न हि वर्ते प्रतिग्रहे ॥ कुशचीराजिनधरं फलमूलाशनं च मां ॥४४॥ विद्धि प्रणिहितं धर्मे
तापसं वनगोचरं ॥ अश्वानां खादनेनाहमर्थी नान्येन केनचित् ॥४५॥ एतावतात्र भवता भविष्या
मि सुपूजितः ॥ एते हि दयिता राज्ञः पितुर्दशरथस्य मे ॥४६॥ एतैः सुविहितैरश्वैर्भविष्याम्यह
मर्चितः ॥ अश्वानां प्रतिपानं च खादनं चैव सोन्वशात् ॥४७॥ राम ॥

सेन अन्नभोजनायोग्यत्वे व्रतस्थत्वरूपहेतूपन्यासेन च तदन्नस्य भोजनयोग्यत्वं सूचयतीति तस्य त
त्त्वज्ञत्वं सूचितं· अन्यथा निषादत्वेनाभोज्यान्नतया तमेव हेतुमुपन्यसेत् स वाक्यं पक्वान्नमाह
रेत्· एतेन न तत्त्वज्ञः सर्वोपि भोज्यान्न एवेति ध्वनितं ॥४५॥ एते अश्वाः ॥४६॥ प्रतिपानं जातश्वानां राजौप
वात्यानां घासदानानंतरं यत्पाय्यते नीरादि तत्प्रतिपानं यच्च घृतशर्करादियुतयवचूर्णादि खाद्यते तत्खादनं ॥४[illegible]

रामा·अ·
१५९

विधवा विगतपतिका ॥१२॥ अमेणोपरता राजभवने ऽयोध्यानगरे च भविष्यतीति शेषः निर्घोषोपरतं उप
रतनिर्घोषं भवतीति मन्ये ॥१३॥ जीवंतीति नाशंसे न संभावयामि· यदि वा जीवंति । तावत्पर्यंतं तदेमां श
र्वरीमेव जीविष्यंति नाग्रे अन्नपानाद्यभावादिति संभावयामीति शेषः ॥१४॥ जीवेदपि । तद्रात्राः पर

अस्मिन्प्रव्रजिते राजा न चिरं वर्तयिष्यति ॥ विधवा मेदिनी नूनं क्षिप्रमेव भविष्यति ॥१२॥
विनद्य सुमहानादं श्रमेणोपरताः स्त्रियः ॥ निर्घोषोपरतं तात मन्ये राम निवेशनं ॥१३॥ कौस
ल्या चैव राजा च तथैव जननी मम ॥ नाशंसेयं हि जीवंति सर्वे ते सर्वरीमिमां ॥१४॥ जीवेद
पि हि मे माता शत्रुघ्नस्यान्ववेक्षया ॥ तद्दुःखं यदि कौसल्या वीरसूर्विनशिष्यति ॥१५॥ अनु
रक्तजनाकीर्णा सुखालोकप्रियावहा ॥ राजव्यसनसंसृष्टा सा पुरी विनशिष्यति ॥१६॥ क
थं पुत्रं महात्मानं ज्येष्ठं पुत्रमपश्यतः ॥ शरीरं धारयिष्यंति प्राणा राज्ञो महात्मनः ॥१७॥ वि
नष्टे नृपतौ पश्चात्कौसल्या विनशिष्यति ॥ अनंतरं च माता पि मम नाशमुपैष्यति ॥१८॥

मपीति शेषः यद्यत्र वीरसूः कौसल्या एकपुत्रत्वाद्विनशिष्यत्येव तदातिदुःखमित्यर्थः ॥१५॥ अनुर
क्तैः रामानुरक्तैर्जनैराकीर्णा व्याप्ता सुखालोकरूपं प्रियमावहतीति सा· सदा सुखवद्द्रोका· इद
नी राजव्यसनेन दशरथमरणदुःखेन संसृष्टा युक्ता ॥१६॥ राजव्यसनमेव दर्शयति · कथमि
ति ॥१७॥ मातापि भर्तृ· पुत्रवियोगात्त्व· सत्यप्येकपुत्रसन्निधौ ॥१८॥ राम

राम
१५९

159

अयंजनः आटविकः॥३॥ नहिरामादितिसर्वोत्मभर्तानात्॥४॥ अस्यप्रसादादेवआशंसेप्रार्थये॥५॥६॥ अविदितम
ज्ञातं॰ किंच चतुरंगमितिपरकीयमितिशेषः तादृशमपिपरकीयंबलंसंतरेमहियुद्धेनजयेम॰ ततोवाच
ततन्नुवाचेतिच्छेदः आर्षःसंधिः॥७॥ अत्रदेशेवयंनभीताः यतोधर्ममेवानुपश्यतात्वयारक्ष्यमाणाभवामः

उचितोयंजनःसर्वःक्लेशानांत्वंसुखोचितः॥ गुप्त्यर्थंजागरिष्यामःकाकुत्स्थस्यवयंनिशां॥३॥ नहिरा
मात्प्रियतरोममास्तेभुविकश्चन॥ ब्रवीम्येवचतेसत्यंसत्येनैवचतेशापे॥४॥ अस्यप्रसादादाशंसे
लोकेस्मिन्सुमहद्यशः॥ धर्मावाप्तिंचविपुलामर्थकामौचपुष्कलौ॥५॥ सोहंप्रियसखंरामंशया
नंसहसीतया॥ रक्षिष्यामिधनुष्पाणिः सर्वथाज्ञातिभिःसह॥६॥ नमेस्त्यविदितंकिंचिद्वनेस्मिंश्
चरतःसदा॥ चतुरंगंह्यतिबलंसुमहत्संतरेमहि॥७॥ लक्ष्मणस्तुततोवाचरक्ष्यमाणास्त्वयान
घ॥ नात्रभीतावयंसर्वेधर्ममेवानुपश्यता॥८॥ कथंदाशरथौभूमौशयानेसहसीतया॥ शक्या
निद्रामयालब्धुंजीवितंवासुखानिवा॥९॥ योनदेवासुरैःसर्वैःशक्यःप्रसहितुंयुधि॥ तंपश्य
सुखसंसुप्तंतृणेषुसहसीतया॥१०॥ योमंत्रतपसालब्धोविविधैश्चपराक्रमैः॥ एकोदशरथस्यै
षपुत्रःसदृशलक्षणः॥११॥

॥५॥ तथापिजागरणेकारणमाह॰ कथमिति॰ जीवितंविशिष्टसुखजी
वितजनकं॰ भोजनादि॥९॥१०॥ मंत्रेणगायत्र्यादिः तपःकृच्छ्रादि॰ पराक्रमैः तज्जन्यैःऋष्यशृंगाद्यानय
नाश्वमेधाद्यनुष्ठानैः एकोमुख्यः तत्रहेतुः सदृशलक्षणः पुरुषोत्तमसदृशलक्षणः दशरथसदृशल

गुरौ रामे सौन्दर्दात् इत्युभयान्वयि । अतिस्नेहात् ज्वरातुरो गुहः व्यथातुरो नागो गजइव ॥ २७ ॥ इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके अयो॰ एकपंचाशः सर्गः ॥ ५१ ॥ प्रभातायामिति ॥ १ ॥ सुकृष्णो विहगः काकः कोकिलपालकत्वाच्च कोकिलपदेनोक्तः ॥ काकेति नामग्रहणस्य प्रातर्निंद्यत्वादेवमुक्तिः ॥ २ ॥ ३ ॥ विज्ञाय

तथा हि सत्यं ब्रुवति प्रजाहिते नरेंद्र इस्त्वनौ गुरुसौन्दर्दाद्गुहः ॥ मुमोच बाष्पं व्यसनाभिपीडितो ज्वरातुरो नाग इव व्यथातुरः ॥ २७ ॥ इत्यार्षे श्रीरामायणे अयोध्याकांडे एकपंचाशः सर्गः ॥ ५१ ॥ प्रभातायां तु शर्वर्यां पृथुवक्षा महायशाः ॥ उवाच रामः सौमित्रिं लक्ष्मणं शुभलक्षणं ॥ १ ॥ भास्करोदयकालोसौ गता भगवती निशा ॥ असौ सुकृष्णो विहगः कोकिलस्तात कूजति ॥ २ ॥ बर्हिणानां च निर्घोषः श्रूयते नदतां वने ॥ तराम जान्हवीं सौम्य शीघ्रगां सागरंगमां ॥ ३ ॥ विज्ञाय रामस्य वचः सौमित्रिर्मित्रनंदनः ॥ गुहमामंत्र्य सूतं च सोतिष्ठद्भ्रातुरग्रतः ॥ ४ ॥ स तु रामस्य वचनं निशम्य प्रतिगृह्य च ॥ स्थपतिस्तूर्णमाहूय सचिवानिदमब्रवीत् ॥ ५ ॥

तरणसाधनं शीघ्रमानेयमित्येवं रामवचनतात्पर्यं ज्ञात्वा ॥ गुहं सूतं चामंत्र्य · आमंत्रणे नैव तत्तात्पर्यं बोधयित्वा यथापूर्वं भ्रातुरग्रतो तिष्ठत् ॥ ४ ॥ स तु गुहस्तु · रामस्य वचनं · तराम जान्हवीमित्येवंरूपं · निशम्य तात्पर्यतो ज्ञात्वा प्रतिगृह्य नमस्कारपूर्वं प्रतिगृह्य संचिवान् · आहूय तन्मध्ये कं

160

मनोरथं रामराज्याभिषेकम् अनवाप्य अतिक्रांतम् अतिक्रांतं नष्टं नष्टमिति क्रोशन्नितिशेषः प्रत्यागतं रामं राज्ये ऽ निक्षिप्यैव मे पिता विनशिष्यतीत्यन्वयः ॥१९॥ तस्मिन् काले मरणकाले उपस्थिते येवृत्तं मृतं पितरं रघुकुलजं सर्वप्रेतकार्येषु संस्करिष्यंतीति सिद्धार्थाः ॥ भाग्यवंतः प्राप्तराज्याश्च भरतादयः इतिशेषः क्रो

अतिक्रांतमतिक्रांतमनवाप्य मनोरथं ॥ राज्ये राममनिक्षिप्य पिता मे विनशिष्यति ॥१९॥ सिद्धार्थाः पितरं वृद्धं तस्मिन्काले त्युपस्थिते ॥ प्रेतकार्येषु सर्वेषु संस्करिष्यंति राघवं ॥२०॥ रम्यचत्वरसंस्थानां संविभक्तमहापथां ॥ हर्म्यप्रासादसंपन्नां गणिकावरशोभितां ॥२१॥ रथाश्वगजसंबाधां तूर्यनादविनादितां ॥ सर्वकल्याणसंपूर्णां हृष्टपुष्टजनाकुलां ॥२२॥ आरामोद्यानसंपन्नां समाजोत्सवशालिनीं ॥ सुखिता विचरिष्यंति राजधानीं पितुर्मम ॥२३॥ अपि जीवेद्दशरथो वनवासात्पुनर्वयं ॥ प्रत्यागम्य महात्मानमपि पश्याम सुव्रतं ॥२४॥ अपि सत्यप्रतिज्ञेन सार्धं कुशलिनो वयं ॥ निवृत्ते वनवासे स्मिन्नयोध्यां प्रविशामहि ॥२५॥ परिदेवयमानस्य दुःखार्तस्य महात्मनः ॥ तिष्ठतो राजपुत्रस्य शर्वरी सात्यवर्तत ॥२६॥

धानन्नामाग्रहणं ॥२०॥२१

२२॥ विचरिष्यंति भरतादयः इतिशेषः ॥२३॥ अपि जीवेदिति संभावने लिङ् ॥ अपि च अपि पश्याम अपि इक्ष्यामः ॥२४॥ सत्यप्रतिज्ञेन रामेण ॥२५॥ परिदेवयमानस्येति इत्यमित्यादिः तिष्ठतः जाग्रतः ॥२६॥

उत्तमश्वासीद्दक्षिणश्च तेन स्पर्शादिव्यापारे उत्तमेन स्पर्शमात्रेण सकलदुःखहारकत्वाद्दक्षिणेन दर्शनकरेण
दक्षिणकरेण ॥१३॥ गमनप्रत्याशानिवृत्तये पुनः सावधारणां निवृत्तिमाह· निवर्त्तस्वेति· एतावत्प
र्यंतं राज्ञाज्ञया यानेन गमनं कृतं हि अतः परं ममानेन प्रयोजनं यतो रथं विहाय पद्भ्यामेव महावनं
गमिष्यामोऽतस्त्वं सर्वथा निवर्तस्व ॥१४॥ अभ्यनुज्ञातं प्रतिनिवृत्त्यै इति शेषः ॥१५॥ तत्रादौ लोकदृष्ट्या

ततोऽब्रवीद्दाशरथिः सुमंत्रं स्पृशन्करेणोत्तमदक्षिणेन ॥ सुमंत्र शीघ्रं पुनरेव याहि राज्ञः
सकाशे भव चाप्रमत्तः ॥१३॥ निवर्तस्वेत्युवाचैनमेतावद्धि कृतं मम ॥ रथं विहाय पद्भ्यां तु ग
मिष्यामो महावनं ॥१४॥ आत्मानं त्वभ्यनुज्ञातमवेक्ष्यार्त्तः स सारथिः ॥ सुमंत्रः पुरुषव्याघ्र
मैक्ष्वाकमिदमब्रवीत् ॥१५॥ नातिक्रांतमिदं लोके पुरुषेणेह केन चित् ॥ तव सभ्रातृभा
र्यस्य वासः प्राकृतवद्वने ॥१६॥ न मन्ये ब्रह्मचर्ये वा स्वधीते वा फलोदयः ॥ मार्दवार्जवयो
र्वापि त्वां चेद्व्यसनमागतं ॥१७॥

शोकापनुदं वचनमाह· नातीति· सभ्रातृभार्यस्य तव प्राक्
तवत्कृइव तव वने वासो येन दैवेन कृतस्तदिदं दैवं इह लोके केनाप्यतिक्रांतं न लंघितं न अतो
त्वदये मा शुच इत्यर्थः यद्वा तेव वने वासो जात इति यदिदं इह लोके अयोध्यास्थलोकमध्ये केनापि
पुरुषेणानत्र दिअतिअत्यंतं क्रांतं स्वीकृतं सर्वासंमतमेवाऽतोऽस्मदादानन्दोषेण मा गरह्लीयादिति
तात्पर्यं ॥१६॥ किं च यदि त्वामीदृशं व्यसनमागतं तदा ब्रह्मचर्यादि निष्फलमिति मन्ये ॥१७॥

161

अस्यवाहनसंयुक्तो अस्यजलंनिरस्यनावंतीरंप्रापयतीत्यस्यवाहनमरित्रंमयूरव्यंसकादित्वात्समा
सः कर्णग्राहः कर्णधारः सुखेनप्रतारः प्रतरणंययातां· दृढांदृढसंधिबंधां· तीर्थेऽवतारमार्गेउपाहर·

अस्यवाहनसंयुक्तांकर्णग्राहवतींशुभां॥सुप्रतारांदृढांतीर्थेशीघ्रंनावमुपाहर॥६॥तंनि
शम्यगुहामात्योगतोमहान्॥उपोह्यरुचिरांनावंगुहायप्रत्यवेदयत्॥७॥त
तःसप्रांजलिर्भूत्वागुहोराघवमब्रवीत्॥उपस्थितेयंनौर्देवभूयःकिंकरवाणिते॥८॥
तवाऽमरसुतप्रख्यतर्तुंसागरगामिनीं॥नौरियंपुरुषव्याघ्रशीघ्रमारोहसुव्रत॥९॥अ
थोवाचमहातेजारामोगुहमिदंवचः॥कृतकामोस्मिभवताशीघ्रमारोप्यतामिति॥१०॥
ततःकलापान्संनह्यखड्गौबध्वाचधन्विनौ॥जग्मतुर्येनतांगंगांसीतयासहराघवौ॥११॥
राममेवंतुधर्मज्ञमुपागत्यविनीतवत्॥किमहंकरवाणीतिसूतःप्रांजलिरब्रवीत्॥१२॥

समीपंप्रापय॥६॥उपोह्यसमीपंप्रापय्य॥७॥८॥९॥आरोप्यतांखनित्रपिटकवैदेहीवस्त्राभरणादि
कमितिशेषः॥१०॥संनह्यकवचंकलापान्तूणीरान्·येनअवतारेणमार्गेणनावमाहृत्यनामनि
वीच्यगुणांगंगांलोकास्तरंतितमवतारंतर्तुंजग्मतुः॥११॥एवंतुएवंभूतंतु·रथादिनिरपेक्षंगच्छंतं॥१२॥

एतच्छब्दार्थमाह· यदेषामिति· प्रशासतीत्यभ्यस्तत्वाददत्सर्वं कृतेष्वपि· कामक्रोधप्रवृत्तेष्वपि ।२५। यत्का-
र्यं प्रतियथायेनं प्रकारेण अलीकमप्रियं· ।तान्प्रतिग्लायति· ।२६। अभिवाद्य मत्प्रति निवितया म
दीयनमस्कारं कृत्वा ।२७। इदं पदार्थमाह· ननेति· वनेवत्स्यामहेति· वेति संधिरार्षः वत्स्यामहे
इति वा नानुशोचामीति संबंधः ।२८। पुनरागतानस्मान्पुनस्त्वं द्रक्ष्यसीति संबंधः पुनः पुनरभीक्ष्णं

एतदर्थं हि राज्यानि प्रशासति नराधिपाः। यदेषां सर्वकृत्येषु मनो न प्रतिहन्यते ।२५। य
द्यथा स महाराजो नालीकमधिगच्छति। न च तां प्रति शोकेन सुमंत्र कुरुतत्तथा ।२६। अ
दृष्टदुःखं राजानं वृद्धमार्यं जितेंद्रियं। ब्रूयास्त्वमभिवाद्यैव मम हेतोरिदं वचः ।२७। नचा
हमनुशोचामि लक्ष्मणो न च शोचति। अयोध्यायाश्च्युताश्चेति वने वत्स्यामहेति वा ।२८।
चतुर्दशसु वर्षेषु निवृत्तेषु पुनः पुनः। लक्ष्मणं मां च सीतां च द्रक्ष्यसे शीघ्रमागतान् ।२९।
एवमुक्त्वा तु राजानं मातरं च सुमंत्र मे। अन्याश्च देवीः सहिताः कैकेयीं च पुनः पुनः ।३०।
आरोग्यं ब्रूहि कौसल्यामथ पादाभिवंदनं। सीताया मम चार्यस्य वचनाल्लक्ष्मणस्य च ।३१।

द्रक्ष्यसि वा ।२९। सहिताः मममात्रेति शेषः पुनः पुनरभीक्ष्णं· पूर्वोक्तं वाक्यमुक्त्वा कौसल्यामित्युपलक्ष
णं· सर्वान्प्रति· कैकेयीं चारोग्यं अहमरोगोऽदुःख इति ब्रूहि कैकेयीमिति निर्व्यंग्योक्तिः किंतु देव
कृतत्वेनास्यामनपराधित्वमित्याशयेन ।३०। अथ आरोग्यकथनानंतरं सर्वान्प्रति आर्यस्य ज्येष्ठस्य

इदानींरामंभगवंतंमत्वाह॰सहेति॰गतिमुत्कर्षंएकस्यैवत्रिलोकीजेतुर्जयेनपितृवाक्यपरिपालनेनचत्री
न्लोकान्जयन्निव॰एवंचतवायंवनवासोपिमहाफलएव॥१८॥वयंतुसर्वथापीडिताइत्याह॰वयमिति॰
उपवंचिताः केचिद्धाज्ञावविदितगमनेनअहंबलान्निवर्तनेनएवंसर्वेतपक्ताः॥१९॥आत्मसमंअतिवु॰

सदाराघववैदेह्याभ्रात्राचैववनेवसन्॥त्वंगतिंप्राप्स्यसेवीरत्रीन्लोकांस्तुजयन्निव॥१८॥
वयंखलुहताराममयत्वयाप्युपवंचिताः॥कैकेय्यावशमेष्यामःपापायादुःखभागिनः॥१९॥इ
तिब्रुवन्नात्मसमंसुमंत्रःसारथिस्तथा॥दृष्ट्वादूरगतंरामंदुःखार्त्तोरुरुदेचिरं॥२०॥ततस्तु
विगतेबाष्पेसूतंस्पृष्ट्वोदकंशुचिं॥रामस्तुमधुरंवाक्यंपुनःपुनरुवाचतं॥२१॥इक्ष्वाकूणांत्व
यातुल्यंसुहृदंनोपलक्षये॥यथादशरथोराजामांनशोचेत्तथाकुरु॥२२॥शोकोपहतचेताश्च
वृद्धश्चजगतीपतिः॥कामभारावसन्नश्चतस्मादेतद्ब्रवीमिते॥२३॥यद्यदाज्ञापयेत्किंचित्सम
हात्मामहीपतिः॥कैकेय्याःप्रियकामार्थंकार्यंतदविकांक्षया॥२४॥

द्विमन्मंत्रियोग्यं॰दूरगतमिति

पाठेदूरदेशावस्थानवंतंनिश्चित्यतत्समीपेदुःखार्त्तश्चिरंरुरोद॥२०॥स्पृष्ट्वोदकमाचांतंशुचिंपवि
त्रं॥२१॥सुहृदंव्यसनापनोदकंयतएवमतोयथेत्यादि॥२२॥कामभारावसन्नःकामवेगेनपीडितः
यद्वाऽवसन्नमदभिषेकादिमनोरथसमूहः तस्मादेतदुक्तंवक्ष्यमाणंच॥२३॥कैकेय्याःप्रियायःकामो
विषयोभरताभिषेकादिस्तदर्थंयथायेनप्रकारेणयद्यस्तुआज्ञापयेत्ततत्अविकांक्षयाऽस्मदादीना

पुत्रशोकः पुत्रवियोगजः शोकः ॥ ३९ ॥ मेरथंमत्प्रवर्त्यंरथंदूरात् दृष्ट्वातदादर्शनकालेसराममपि॰ अपिः
संभावनेसरामंसंभावयमानोजनः पुरीचनिकटगतंरथंविनारामंदृष्ट्वाविदीर्यतापि॰ अपिःसंभावना
यां ॥ ४० ॥ सूतावशेषं॰ हतवीरंरथंदृष्ट्वास्वसैन्यमिव ॥ ४१ ॥ दूरेपिनिवसंतंत्वांमानसेनव्यापारेणाग्रतः

कथंहित्वद्विहीनोहंप्रतियास्यामितांपुरीं ॥ तवतातवियोगेनपुत्रशोकातुरामिव ॥ ३९ ॥ स
राममपितावन्मेरथंदृष्ट्वातदाजनः ॥ विनारामंरथंदृष्ट्वाविदीर्येतापिसापुरी ॥ ४० ॥ दैन्यंहि
नगरीगच्छेदृष्ट्वाशून्यमिमंरथं ॥ सूतावशेषंस्वंसैन्यंहतवीरमिवाहवे ॥ ४१ ॥ दूरेपिनिवसं
तंत्वांमानसेनाग्रतःस्थितं ॥ चिंतयंत्योद्यनूनंत्वांनिराहाराःकृताःप्रजाः ॥ ४२ ॥ दृष्टंतद्धित्व
यारामयादृशंत्वत्प्रवासने ॥ प्रजानांसंकुलंवृत्तंत्वच्छोकक्लांतचेतसां ॥ ४३ ॥ आर्तनादो
हियत्पौरैरुन्मुक्तस्त्वत्प्रवासने ॥ सरथंमांनिशाम्यैवकुर्युःशतगुणंततः ॥ ४४ ॥

पुरतस्थितमिवत्वांचिंतयंत्यः रथेनागतप्रायोराम इति चिंतयंत्यः प्रजाः जनाः अद्यएकस्पममगम
नदिनेनूनंनिश्चयेननिराहाराःकृताःनिराहारसंकल्पवत्यःकृता ॥ मरिष्यंतीतियावत् ॥ ४२ ॥ त
स्यैवयुक्त्यासाधनंकरोति॰ दृष्टमित्यादिनासंकुलंआर्तनादादि ॥ ४३ ॥ सरथंमामेवनिशम्येत्यन्वयः
॥ ४४ ॥

एवंपितरंमातरंप्रतिचसंदिश्यपुनः पितरंप्रतिसंदिशति· ब्रूयाइति· महाराजेदशरथेनपमतेराजसम
तेपदेराज्ये ॥३२॥ अथसुमंत्रंप्रत्याह भरतंचेति· अभिषिच्यअभिषेचय्य ॥३३॥ राजन्निदशरथे ॥३४॥ अवि
शेषतःशत्रुघ्नसंबंधात्कैकेय्याविशेषतःकैकेय्याविशेषेत्यर्थः एवंममाता पिकैकेय्याविशेषाइत्य

ब्रूयाश्चापिमहाराजंभरतंक्षिप्रमानय ॥ आगतश्चापिभरतः स्थाप्योनपमतेपदे ॥३२॥ भरतं
चपरिष्वज्यपयौवराज्येभिषिच्यच ॥ अस्मत्संतापजंदुःखंनत्वामभिभविष्यति ॥३३॥ भरतश्चापि
वक्तव्यो यथाराजनिवर्तसे ॥ तथामातृषुवर्त्तेथाःसर्वास्वेवविशेषतः ॥३४॥ यथाचतवकैकेयीसु
मित्राचाविशेषतः ॥ तथैवदेवीकौसल्यामममातावि शेषतः ॥३५॥ तातस्यप्रियकामेनयौवराज्य
मपेक्षता ॥ लोकयोरुभयोःशक्यंनित्यदासुखमेधितुं ॥३६॥ निवर्त्यमानोरामेणसुमंत्रःप्रतिबो
धितः ॥ तत्सर्वंवचनंश्रुत्वास्नेहात्काकुत्स्थमब्रवीत् ॥३७॥ यद्हंनोपचारेणब्रूयाःस्नेहाद
विक्लवं ॥ भक्तिमानितितत्तावद्वाक्यंत्वंक्षंतुमर्हसि ॥३८॥

र्थेत्यर्थः ॥३५॥ अवेक्षताःअंगीकुर्वताउ
भयोर्लोकयोरिहलोकपरलोकयोःनित्यदासर्वदाछांदसोदाप्रत्ययः सुखंधर्मयितुंशक्यंतेननतथा
वर्तस्व· येनलोकद्वयेपिसुखंभवतीतिवभंगप· पर्यायोक्तमत्रालंकारः ॥३६॥ ॥३७॥ उपचारःस्वामिभ
क्त्योचितःसत्कारः ॥ तेननब्रूयाःब्रूयांछांदसमेतत् ॥ अपितुस्नेहात्विक्लवंवाक्यंब्रवीमितद्वाक्यंभक्ति

॥८॥ रा०टी०अयो०सर्ग ॥५२॥

भविष्यंतिसंभाविता नितानिरथेनसाधनेनाहमेवरथ्यीभूत्वाप्रतिबोधिष्ये॥५०॥ ननुस्वतेनत्वयाकथंरथिकृत्यं कर्तुंशक्यं तत्राह त्वत्कृतेनेति-नकेवलमहंस्वतः किंतुप्रधानभूतोमंत्री-स्वतत्वंतुत्वत्कृतानुग्रहरूपफलेननतदर्थं-फलस्यापिहेतुत्वांगीकारात्मयांकृतमितिशेषः तत्फलंचत्वदीयरथ्यचर्ययात्वदनुग्रहकृतंसुखंमयाप्राप्तं-इदानींत्वत्कृतेनत्वदंगीकृतवनानुगमनानुग्रहेणवनवासकृतंसुखंराज्य

भविष्यंतिवनेयानितपोविघ्नकराणिते॥रथेनप्रतिबाधिष्येतानिसर्वाणिराघव॥५०॥त्वत्कृतेनमयाप्राप्तंरथ्यचर्याकृतंसुखं॥आशंसेत्वत्कृतेनाहंवनवासकृतंसुखं॥५१॥प्रसीदेच्छामितेरण्येभवितुंप्रत्यनंतरः॥प्रीत्याभिहितमिच्छामिभवमेप्रत्यनंतरः॥५२॥इमेपिचहयावीरयदितेवनवासिनः॥परिचर्यांकरिष्यंतिप्राप्स्यंतिपरमांगतिं॥५३॥तवशुश्रूषणंमूर्ध्नाकरिष्यामिवनेवसन्॥अयोध्यांदेवलोकंवासर्वथाप्रजहाम्यहं॥५४॥नहिशक्याप्रवेष्टुंसामयायोध्यात्वयाविना॥राजधानीमहेंद्रस्ययथादुष्कृतकर्मणा॥५५॥

त्विंतादुःखाभावान्महत्सुखमाशंसे-॥प्रार्थयामि-॥एतेनत्वदवनारं ज्ञात्वैवत्व इथ्यचर्यासौभाग्यायस्तत्वंमयांगीकृतमितिध्वनितं॥५१॥प्रत्यनंतरः-प्रत्यासन्नोनुकूलइतियावत्-प्रत्यनंतरोभवेतित्वयाप्रीत्याभिहितंवाक्यंश्रोतुमिच्छामि॥५२॥५३॥देवलोकंवेत्यनेनत्वद्भक्तानांभक्त्यंतरायभूतदेवलोकप्राप्तिरपिहेयेवेतिसूचितं॥५४॥५५॥

264

पुनारामंविनास्वगमनेनुपपत्तिमाह॰ अहमिति॰ अपिच अहंदेवीकिंवक्ष्यामिदेवींकौसल्यांतवसुतोमयाम
तुलकुलंप्रापितइतिब्रूहितत्राहईदृशंवचनंप्रियमपि असत्यंनैवाहंब्रूयां। वनंप्रापितइत्येवतर्हिब्रूहि
तत्राह॰ इदंसत्यमपिअप्रियमेव अतःकथंब्रूयां॰ सत्यंब्रूयात्प्रियंब्रूयान्नब्रूयात्सत्यमप्रियमितिस्मृतेः
तस्मात्तवमातरंप्रतिवक्तुंयोग्यस्योत्तरस्याभावादहंनगमिष्यामीतिभावः एतदेवध्वनयन्वक्ष्यति॰ तन्नशक्ष्या

अहंकिंचापिवक्ष्यामिदेवींतवसुतोमया।नीतोसौमातुलकुलंसंतापंमाकृथाइति॥४५॥असत्यम
पिनैवाहंब्रूयांवचनमीदृशं॥कथमप्रियमेवाहंब्रूयांसत्यमिदंवचः॥४६॥ममतावन्नियोगस्था
स्त्वद्बंधुजनवाहिनः॥कथंरथंत्वयाहीनंप्रवात्स्यंतिहयोत्तमाः॥४७॥तन्नशक्ष्याम्यहंगंतुमयोध्यां
त्वदृतेनघ।वनवासानुयानायमामनुज्ञातुमर्हसि॥४८॥यदिमेयाचमानस्यत्यागमेवकरि
ष्यसि॥सरथोग्निंप्रवेक्ष्यामित्यक्तमात्रइहत्वया॥४९॥

म्यहंगंतुमिति॰ यत्तुक्तंकेनासत्यमपिमा
तुलकुलगमनंवक्ष्यामिनतुसत्यमपिवनगमनमप्रियत्वादित्यक्तंतत्तुतन्नशक्ष्यामीत्यादिनोक्तवचसांनग
रगमनाभावप्रतिपादकत्वस्यैवलाभाच्चिंत्यं॥४५॥४६॥रथोपिनेतुमशक्यइत्यनुपपत्त्यंतरमाह॰ ममेति॰
एतेऽश्वाममनियोगस्थःमत्प्रेरणामात्राधीनाःमत्प्रेरणया॰ त्वद्बंधुजनवहनशीलाःएवनत्वन्यवहन
शीलानापित्वद्बंधुरहितरथवहनशीलाः अतस्त्वयाहीनंरथंमेतेकथंरथंप्रवात्स्यंतिनकथमपिवक्ष्यं
तिअतोरथनयनेदुःशंकमितिभावः॥४७॥उपसंहरति॰ तन्नेति॥४८॥त्यक्तमात्रेत्यागक्षणएव॥४९॥

राम·अ·
१६५

सजनेवनेवासोनयोग्यइत्युक्तिरत्रैववनेस्थेयमितिकदाचित्गुहःप्रार्थयेततत्प्रतिबंधाय·आश्रमेजानपदर
हितेवासोयोग्यस्ततस्तत्रआश्रमवासोचितोविधिर्जटाधारणादिरूपइदानींकर्तव्यइत्यन्वयः॥६६॥सोहंनि
यमं·वन्याहारभूशयनादिरूपंगृहीत्वासीतायालक्ष्मणस्यचानुमत्यातपस्विजनभूषणांजटाःकृत्वागमिष्या
मिअतोन्यग्रोधक्षीरमानयभूयोतिशयेनपितुर्हितकामःतत्प्रतिज्ञारक्षणेन·यत्तुसीतायाहितकामइति

नेदानींगुहयोग्योयंवासोमेसजनेवने॥अवश्यमाश्रमेवासःकर्तव्यस्तद्गतोविधिः॥६६॥सोहंगृ
हीत्वानियमंतपस्विजनभूषणं॥हितकामःपितुर्भूयःसीतायालक्ष्मणस्यच॥६७॥जटाःकृत्वागमि
ष्यामिन्यग्रोधक्षीरमानय॥तत्क्षीरंराजपुत्रायगुहःक्षिप्रमुपाहरत्॥६८॥लक्ष्मणस्यात्मनश्चैवरा
मस्तेनाकरोज्जटाः॥दीर्घबाहुर्नरव्याघ्रोजटिलत्वमधारयत्॥६९॥तौतदाचीरसंपन्नौजटामंडल
धारिणौ॥अशोभेतामृषिसमौभ्रातरौरामलक्ष्मणौ॥७०॥ततोवैखानसंमार्गमास्थितःसहल
क्ष्मणः॥व्रतमादिश्यवान्रामःसहायंगुहमब्रवीत्॥७१॥

तन्नजटाधारणेनसीताहितासिद्धेःअ
नुमतिस्तुअनुमतिस्तुअपेक्षितैवअन्ययासन्यासबुध्यापरमदुःखापत्तेः॥६७॥६८॥लक्ष्मणस्याकरोत्·
तेनापिरामवदवस्थानस्यसंकल्पितत्वात्॥६९॥७०॥वैखानसंमार्गंवानप्रस्थाश्रमधर्मःआस्थितःप्र
संकृतबुद्धिःसन्व्रतंवानप्रस्थव्रतंआदिष्टवान्·अंगीकृतवान्·अत्रगंगारूपतीर्थप्राप्तावग्रेप्रयाग
रूपतीर्थप्राप्तौतदग्रेपितृमरणश्रवणेपियन्मुंडनाकरणंरामलक्ष्मणयोस्तेनानेनपरकृतिरूपार्थवादे
नक्षत्रियाणांतीर्थादिषुमुंडन [illegible] दिकंससहायं॥७१॥

165

रामः
१६५

वनवासे त्वयं प्राप्ते वनवासकाले समाप्ते पुरीं वहेयं प्रापयेयमिति यद्येष मे मनोरथः ॥५६॥ अन्यथा त्वया र
हितस्य स्थितिपद्ये ॥५७॥ भर्तृपुत्रगते राजपुत्राश्रिते पथि यथा भृत्येन स्थातव्यं तथा त्वद्विषये तिष्ठंतं सर्वभृ
त्यमध्ये भक्तिमंतं मत्वं · स्थित्या भृत्ययोग्यया स्थित्या सर्वदा स्थितं निर्युक्त कार्यविषये कदाप्यपराध

वनवासे त्वयं प्राप्ते ममैष हि मनोरथः ॥ यदनेन रथेनैव त्वां वहेयं पुरीं पुनः ॥५६॥ चतुर्दश हि वर्षा
णि सहितस्य त्वया वने ॥ क्षणभूतानि यास्यंति शतसंख्यान्यतोऽन्यथा ॥५७॥ भृत्यवत्सल तिष्ठंतं भ
र्तृपुत्रगते पथि ॥ भक्तं भृत्यं स्थितं स्थित्यां न मां त्वं हातुमर्हसि ॥५८॥ एवं बहुविधं दीनं याचमानं
पुनः पुनः ॥ रामो भृत्यानुकंपी तु सुमंत्रमिदमब्रवीत् ॥५९॥ जानामि परमां भक्तिमहं ते भर्तृवत्स
ल श्रृणु ॥ चापि यदर्थं त्वां प्रेषयामि पुरीमितः ॥६०॥ नगरीं त्वां गतं दृष्ट्वा जननी मे यवीयसी ॥
कैकेयी प्रत्ययं गच्छेदिति रामो वनं गतः ॥६१॥ विपरीते तु बुद्धिहीना वनवासं गते मयि ॥ राजानं
नातिशंकेत मिथ्यावादीति धार्मिकं ॥६२॥ एष मे प्रथमः कल्पो यदंबा मे यवीयसी ॥ भरतारक्षि
तं वत्तं पुत्रे राज्यमवाप्स्यते ॥६३॥ मम प्रियार्थं राज्ञश्च सुमंत्र त्वं पुरीं व्रज ॥ संदिष्टश्चापि यानर्थां
स्तांस्तान्ब्रूयास्तथा तथा ॥६४॥ इत्युक्त्वा वचनं सूतं सांत्वयित्वा पुनः पुनः ॥ गुहं वचनमक्लीबो रा
मो हेतुमदब्रवीत् ॥६५॥

रहितमिति यावत् ॥५८॥५९॥६०॥ रामो वनं गत इति प्रत्ययं निश्चयं कैकेयी
गच्छेदित्यन्वयः ॥६१॥ अतिशंका अन्यथा शंका तां न कुर्यात् इत्येष मे प्रथमः कल्पो मुख्यप्रयोजनं त्वद्गमन
स्येत्यन्वयः ॥६२॥ भरतेनारक्षितं [illegible] यादिति च मम त्वद्गमन

८० कर्णधारेणनाविकेनसमाहितासज्जीकृतास्फ्यमरित्रंतेनवेगादभिहतान्नाणु नाः ८१ गंगायामहादेवतात्व त्स्त्री देवतात्वाच्चसीताप्रार्थितवती त्याह मध्यमिति ८२ पालयत्तुपारयत्तुसमापयत्त्विति यावत्तरलये

अनुज्ञायसुमंत्रंचसबलंचैवतंगुहं आस्थायनावंरामस्तुचोदयामासनाविकान् ८० ततस्तैश्चालितानौकाकर्णधारसमाहिता शुभस्फ्यवेगाभिहताशीघ्रंसलिलमत्यगात् ८१ मध्यंतुसमनुप्राप्यभागीरथ्यास्त्वनिंदिता वैदेही प्रांजलिर्भूत्वातांनदीमिदमब्रवीत् ८२ पुत्रोदशरथस्यायंमहाराजस्यधीमतः निदेशंपालयत्वेनंगंगेत्वदभिरक्षितः ८३ चतुर्दशहिवर्षाणिसमग्राण्युष्यकानने भ्रात्रासहमयाचैवपुनः प्रत्यागमिष्यति ८४ ततस्त्वांदेविसुभगेक्षेमेणपुनरागता यक्ष्येप्रमुदितागंगेसर्वकामसमृद्धिनि ८५ त्वंहित्रिपथगेदेविब्रह्मलोकंसमक्षसे भार्याचोदधिराजस्यलोकेस्मिन्संप्रदृश्यसे ८६ सात्वांदेविनमस्यामिप्रशंसामिचशोभने प्राप्तराज्येनरव्याघ्रेशिवेनपुनरागते ८७ गवांशतसहस्राणि वस्त्राण्यन्नंचपेशलं ब्राह्मणेभ्यः प्रदास्यामितवप्रियचिकीर्षया ८८

समानक्षान्तित्वात् ८३ पुनः पुत्यागमिष्यति स्वदेशंयदीतिशेषः ८४ सर्वकामसमृद्धिनि सर्वकामसमृद्धं सर्वकामपूरणमस्याअस्तिदातव्यत्वेनेत्यर्थः ८५ समक्षसेव्याप्नोषि अक्षू व्याप्तौ संघातेचतत्त्वंचास्याबालकांडेनिरूपितं ८६ प्रशंसामिस्तौमि शिवेनक्षेमेण ८७ ८८ ॥ राम ॥

किमब्रवीत्तदाह अप्रमत्त इति दुःखेनारक्षारक्षणं यस्य तत् दुरारक्षं अतिशयेन दुरारक्षं दुरारक्षतमं दुरारक्ष्यतममिति पाठे अतिशयेन दुःखेन रक्षितुं योग्यमित्यर्थः ॥७२॥७३॥७४॥ स्थितां इमां नावं परिगृह्य हस्ते गृहीत्वा सीतामारोपय अन्वक्षं पश्चात्त्वमारोह ॥७५॥ अप्रतिकूलयन् अनुकूलयन् ॥७६॥७७॥ ब्रह्मवत्

अप्रमत्तो बले कोशे दुर्गे जनपदे तथा ॥ भवेथा गुह राज्यं हि दुरारक्षतमं मतं ॥७२॥ ततस्तं समनुज्ञाप्य गुहमिक्ष्वाकुनंदनः जगाम तूर्णमव्यग्रः सभार्यः सहलक्ष्मणः ॥७३॥ स तु दृष्ट्वा नदीतीरे नावमिक्ष्वाकुनंदनः ॥ तितीर्षुः शीघ्रगां गंगामिदं वचनमब्रवीत् ॥७४॥ आरोह त्वं नरव्याघ्र स्थितां नावमिमां शनैः ॥ सीतां चारोपयान्वक्षं परिगृह्य मनस्विनीं ॥७५॥ स भ्रातुः शासनं श्रुत्वा सर्वमप्रतिकूलयन् ॥ आरोप्य मैथिलीं पूर्वमारुरोहात्मवांस्ततः ॥७६॥ अथारुरोह तेजस्वी स्वयं लक्ष्मणपूर्वजः ॥ ततो निषादाधिपतिर्गुहो ज्ञातीनचोदयत् ॥७७॥ राघवोपि महातेजा नावमारुह्य तां ततः ॥ ब्रह्मवत्क्षत्रवच्चैव जजाप हितमात्मनः ॥७८॥ आचम्य च यथाशास्त्रं नदीं तां सह सीतया ॥ प्रणामन्मतिसंतुष्टो लक्ष्मणश्च महारथः ॥७९॥

क्षत्रियवत् ॥ ब्राह्मणक्षत्रियार्हं ब्रह्मक्षत्रदेवताकमित्यर्थो वा ॥ आत्मनो हितमुद्दिश्य जजाप ॥ सुत्रामाणमचानावमारोहेदिति स्मृतेः क्षत्रियाधिकारे प्राप्ते ब्रह्मक्षत्रदेवताकत्वं चास्य ब्राह्मणोक्तमिति निकनकः देवीं नावमित्यादि ब्रह्मक्षत्रसाधारणो मंत्र इत्यन्ये ॥७८॥ प्रणामन् अडभाव आर्षः ॥७९॥ ॥

कृत एवमतियत्नोऽत आह नहीति। असुकरा दुष्करा काचन कापि क्रियातिक्रांता न किंतु इतः प्रभृति दुष्क
रक्रियारंभ इति भावः यद्वा काचन क्रियाऽपायलक्षणा अतिक्रांता अस्मानतिक्रम्य प्राप्ता चेत्ततो रक्षासु
करा न हि प्रत्युतं प्रत्युतमेवेति न्यायादित्यर्थः अद्येत्यादि सार्धश्लोक एकं वाक्यं ॥९७॥ दुःखज्ञाने हेतुः प्र

न हि तावदतिक्रांता ऽसुकरा काचन क्रिया ॥ अद्य दुःखं तु वैदेही वनवासस्य वेत्स्यति ॥९७॥
प्रनष्टजनसंबाधं क्षेत्रारामविवर्जितं ॥ विषमं च प्रपातं च वनमद्य प्रवेक्ष्यति ॥९८॥ श्रुत्वा राम
स्य वचनं प्रतस्थे लक्ष्मणोऽग्रतः ॥ अनंतरं च सीताया राघवो रघुनंदनः ॥९९॥ गतं तु गंगापरपा
रमाशु रामं सुमंत्रः सततं निरीक्ष्य ॥ अध्वप्रकर्षाद्विनिवृत्तदृष्टिर्मुमोच बाष्पं व्यथितस्तपस्वी
॥१००॥ स लोकपालप्रतिमप्रभाववांस्तीर्त्वा महात्मा वरदो महानदीं ॥ ततः समृद्धाञ्छुभसस्यमालि
नः क्षणेन वत्स्यान्मुदितानुपागमत् ॥१०१॥ तौ तत्र हत्वा चतुरो महामृगान्वराहमृश्यं पृषतं महा
रुरुं ॥ आदाय मेध्यं त्वरितं बुभुक्षितौ वासाय काले ययतुर्वनस्पतिं ॥१०२॥ इत्यार्षे श्रीरा० अयो०
द्विपंचाशः सर्गः ॥ स तं वृक्षं समासाद्य संध्यामन्वास्य पश्चिमां ॥ रामो रमयतां श्रेष्ठ इति होवाच लक्ष्मणं ॥१॥

नष्टेति। क्षेत्रं शाल्यादिक्षेत्रं। विषमं निम्नोन्नतं। प्रपातं गर्तादित्युक्तं ॥९८॥९९॥१००॥ वत्स्यान् वत्सदेशान् ॥१०१॥
ऋश्यादयो हरिणभेदाः। काले सायंकाले। मांसस्य चवन्याहारांतर्गतत्वान्न दोषः। मृगयाधर्मकत्वाच्च मृ
गहनने दोष बुभुक्षितौ हत्वा तानाराध्य यागानावित्येनेन भोजनमर्हा सिद्धमेवेति बोध्यं ॥१०२॥ इति द्विपंचाशः स

यद्येमहाबलिदानेनेतिशेषः ॥८९॥ तीर्थानिप्रयागादीनि ॥ आयतनादीनिकाश्यपादीनि ॥९०॥९१॥ दक्षिणाभर्तुरनुकूला ॥९२॥९३॥ संरक्षणार्थायसीतायाइतिशेषः भवसावधानइतिशेषः ॥९४॥ यदेवमतोग्रतइति·

सुराघटसहस्रेणमांसभूतोदनेनच ॥ यक्ष्येत्वांप्रीयतांदेविपुरींपुनरुपागता ॥८९॥ यानित्वत्तीरवासीनिदैवतानिचसंतिहि ॥ तानिसर्वाणियक्ष्यामितीर्थान्यायतनानिच ॥९०॥ पुनरेवमहाबाहुर्मयाभ्रात्राचसंगतः ॥ अयोध्यांवनवासात्तुप्रविशत्वनघोनघे ॥९१॥ तथासंभाषमाणासासीतागंगामनिंदिता ॥ दक्षिणादक्षिणंतीरंक्षिप्रमेवाभ्युपागमत् ॥९२॥ तीरंतुसमनुप्राप्यनावंहित्वानरर्षभः ॥ प्रातिष्ठतसहभ्रात्रावैदेह्याचपरंतपः ॥९३॥ अथाब्रवीन्महाबाहुः सुमित्रानंदवर्धनं ॥ भवसंरक्षणार्थायसजनेविजनेपिवा ॥९४॥ अवश्यंरक्षणंकार्यंमद्विधैर्विजनेवने ॥ अग्रतोगच्छसौमित्रेसीतात्वामनुगच्छतु ॥९५॥ पृष्ठतोनुगमिष्यामिसीतांत्वांचानुपालयन् ॥ अन्योन्यस्यहिनोरक्षाकर्तव्यापुरुषर्षभ ॥९६॥ राम ॥ ॥

एवंचकार्यवशात्खलघोरण्यग्रतोगमनमदोषायेतिध्वनितंमार्गेणखलघोरग्रतोगमनमदोषायेत्यन्ये· एवंस्त्रविश्वसनीयेतिचध्वनितं ॥९५॥ नः अस्माकंसातयापिपातिव्रत्यमहिम्नेतररक्षणं ॥९५॥

९॥ कामस्य गरीयस्त्वं साधयति॥ कोहीत्यादिना॰ अत्यज्ञोपिकः पुमान् मामिव छंदानुवर्तिनं आज्ञाकारिणं पुत्रं प्रमदायाः कृते प्रमदातोषनिमित्तं त्यजेत् किंपुनः सर्वज्ञो राजा तस्मात्सर्वतः प्रबलः काम इति भावः॥१०॥ एवंवादोहि भगवतो लक्ष्मणमतिपरीतार्थं अयोध्यां त्वंप्रविशेतिलक्ष्मणंप्रतिवक्तुंतदाशयंज्ञातुं च नवा।

इदं व्यसनमालोक्य राज्ञश्च मतिविभ्रमं॥ काम एवार्थधर्माभ्यां गरीयानिति मे मतिः॥९॥ कोह्यविद्वानपि पुमान्प्रमदायाः कृते त्यजेत्॥ छंदानुवर्तिनं पुत्रं तातो मामिव लक्ष्मण॥१०॥ सुखीवत सभार्यश्च भरतः कैकयीसुतः॥ मुदितान्कोसलानेको यो भोक्ष्यत्यधिराजवत्॥११॥ स हि राज्यस्य सर्वस्य सुखमेकं भविष्यति॥ तातेतु वयसातीते मयि चारण्यमाश्रिते॥१२॥ अर्थधर्मौ परित्यज्य यः काममनुवर्तते॥ एवमापद्यते क्षिप्रं राजा दशरथो यथा॥१३॥ मन्ये दशरथांताय मम प्रव्राजनाय च॥ कैकेयी सौम्य संप्राप्ता राज्याय भरतस्य च॥१४॥ अपीदानींतु कैकेयी सौभाग्यमदमोहिता कौसल्यां च सुमित्रां च साप्रबाधेत मत्कृते॥१५॥ ॥ राम ॥ ॥

य

स्तव इति बोध्यं॥११॥ एकं मुख्यं सुखं अनुभविनेतिशेषः॥ ईदृशो भविष्यति सुखमेक इति वा पाठः॥ एक एव राजा भविष्यतीत्यर्थः इतीतीर्थः॥१२॥ यो भरतः काममनुवर्त्तते स यथा राजा दशरथो यथा विपदमापन्न एवं विपदमापद्यते प्राप्नोतीत्यर्थः॥ अन्ये तु राज्ञा दशरथो यथा राजत्वमापन्नस्तथा भरतो राजत्वमापद्यते इत्यर्थमाहुः॥१३॥१४॥ मत्कृते मम दुःखसंपादननिमित्तं॥१५॥ राम

आजनपदादितिछेदः आङितियातेत्यनेनसंबध्यते अस्माज्जनपदाद्बहिर्देशेऽद्येयंयारात्रिरायाताप्रा
प्तायेयंवनवासरात्रिषुप्रथमासुमंत्रेणरहिताचतामिमांप्राप्यनोत्कंठितुंनगरादिस्मर्त्तुं॥२॥नविद्यते
तंद्रिययोस्ताभ्यां इडभावोह्रस्वत्वंचार्षं क्वचित्तुअतंद्रीभ्यामित्येवपाठः आवयोर्वर्तनेऽस्मदायत्ता

अद्येयंप्रथमारात्रिर्यातानजनपदाद्बहिः॥ यासुमंत्रेणरहितातांनोत्कंठितुमर्हसि॥२॥ जाग
र्तव्यमतंद्रिभ्यामद्यप्रभृतिरात्रिषु॥ योगक्षेमौहिसीतायावर्तेतेलक्ष्मणावयोः॥३॥ रात्रिंकथं
चिदेवेमांसौमित्रेवर्तयामहे॥ अपवर्तामहेभूमौआस्तीर्यस्वयमर्जितैः॥४॥ सतुसंविश्य
मेदिन्यांमहार्हशयनोचितः॥ इमाःसौमित्रयेरामोव्याजहारकथाःशुभाः॥५॥ ध्रुवमद्यम
हाराजोदुःखंस्वपितिलक्ष्मण॥ कृतकामातुकैकेयीतुष्टाभवितुमर्हति॥६॥ साहिदेवीम
हाराजंकैकेयीराज्यकारणात्॥ अपिनच्यावयेत्प्राणान्दृष्ट्वाभरतमागतं॥७॥ अनाथश्चहि
वृद्धश्चमयाचैवविनाकृतः॥ किंकरिष्यतिकामात्माकैकेय्यावशमागतः॥८॥ ॥

चित्यर्थः अप्राप्तप्राप्तिर्योगः लब्धपरिपालनंक्षेमः॥३॥ कथंचिदेवेमांउटजादिनिर्माणाभावात् स्वय
मर्जितैस्तृणपर्णादिभिरितिशेषः अपवर्तामहेयथाकथंचिच्छयनंकुर्वः॥४॥ कथाःवार्ता॥५॥ कृतका
मासंपन्नमनोरथा॥६॥ राज्यकारणात् ॥महाराज्ययदाभिषेककारणात् प्राणान् ॥अपिनच्यावयेत् ॥अ

अपुत्रायाः पुत्रकृतप्रयोजनरहितायाः ॥२३॥ शेते इदानीमितिशेषः ॥२४॥ नन्वेवं त्वदयेशोकस्तर्हि मया सर्वनिवारणसहायेनोक्तं राज्यमेवकुतो नांगीकृतमिति चेन्न राज्यकरणे त्वदपेक्षापि मे न किंत्वधर्मभयादेव मया तन्नांगीकृतमित्याह एक इत्यादि तरेयं निरस्तारातिकां कर्तुं शकः इत्यर्थः ननु वीर्यमका

शोचंत्या श्चाल्पभाग्यायान किंचिदुपकुर्वता ॥ पुत्रेण किमपुत्रायामया कार्यमरिंदम ॥२३॥ अल्पभाग्या हि मे माता कौसल्या रहिता मया ॥ शेते परमदुःखार्ता पतिता शोकसागरे ॥२४॥ एकोप्यहमयोध्यां च पृथिवीं चापि लक्ष्मण ॥ तरेयमिषुभिः क्रुद्धो ननु वीर्यमकारणं ॥२५॥ अधर्मभयभीतश्च परलोकस्य चानघ ॥ ते न लक्ष्मण नाद्याहमात्मानमभिषेचये ॥२६॥ एतदन्यच्च करुणं विलप्य विजने बहु ॥ अश्रुपूर्णमुखो दीनो निशि तूष्णीमुपाविशत् ॥२७॥ विलापोपरतं रामं गतार्चिषमिवानलं ॥ समुद्रमिव निर्वेगमाश्वासयत लक्ष्मणः ॥२८॥ ध्रुवमद्य पुरी राम अयोध्या युधिनांवर ॥ निष्प्रभा त्वयि निष्क्रांते गतचंद्रेव शर्वरी ॥२९॥ ॥

रणं परलोकहितेऽपि तु धर्म एवेतिशेषः ॥२५॥ अधर्मात् कैकेय्यै पित्रदत्तवरपालनप्रतिज्ञात्यागरूपादधर्मात् भीतः अत एव परलोकस्य च नाशाद्भीत इतिशेषः ॥२६॥ अन्यच्च एतज्जातीयः विजने इत्यनेन स्वविलापेन लोकदुःखाभावो ध्वनितः अश्रुपूर्णमुखत्वं नरवत्लोकव्यवहारानुसारेणेति बोध्यं ॥२७॥२८॥ आयुधिनामिति छेदः ॥२९॥

मातातवेतिशेषः कालेप्राप्तकालेऽत्यायेत्यर्थः ॥१६॥ नाथोरक्षकः ॥१७॥ क्रूरकर्मा कैकेयी द्वेषादन्यायमाचरेत् हि
निश्चितं तत देवात् हे धर्मज्ञ नेममचमातरं सुमित्रां कौशल्यां चोद्दिश्य गरं विषं हि तु ददात् ॥१८॥ जात्यंतरे जन्मां
तरे एतत्पुत्रवियोगदुःखं ॥१९॥ फलकाले सुखानुभवकाले ॥२०॥ कुत इत्यत आह सौमित्रे इति ॥२१॥ हे लक्ष्मण

मातास्मत्कारणाद्देवी सुमित्रा दुःखमावसेत् ॥ अयोध्यामित एव त्वं काल्ये प्रविश लक्ष्मण ॥१६॥ अ
हमेको गमिष्यामि सीतया सह दंडकान् ॥ अनाथाया हि नाथस्त्वं कौसल्याया भविष्यसि ॥१७॥ क्रूर
कर्मा हि कैकेयी द्वेषादन्यायमाचरेत् ॥ परिदद्याद्धि धर्मज्ञ गरं ते मम मातरं ॥१८॥ नूनं जात्यंतरे तात
स्त्रियः पुत्रैर्वियोजिताः ॥ जनन्या मम सौमित्रे तदद्यैतदुपस्थितं ॥१९॥ मया हि चिरपुष्टेन दुःखसंवर्धि
तेन च ॥ विप्रयुज्यत कौसल्या फलकाले धिगस्तु मां ॥२०॥ मा स्म सीमंतिनी काचिज्जनयेत्पुत्रमी
दृशं ॥ सौमित्रे योऽहमंबाया दद्मि शोकमनंतकम् ॥२१॥ मन्ये प्रीतिविशिष्टा सा मत्तो लक्ष्मण सा
रिका ॥ यत्तस्याः श्रूयते वाक्यं शुक पादमरेर्दश ॥२२॥

अंबया पालिता कृतवचनशिक्षा च सारिका म
त्तोंबायां प्रीतिविशिष्टा अधिकप्रीतियुक्ता इति मन्ये यद्यस्मात्तस्याः सारिकायाः सकाशात् एवं शत्रुनिग्रह
विषयं शुक पादमरेर्दशेति वाक्यं श्रूयते कौसल्ययेति शेषः ॥ अस्मत्तस्तु तदपि नेति भावः अत्रेदं वाक्यं अरेर्वि
त्रास्यपादं हे शुक दशेत्यर्थ कृतया लोकप्रसिद्धं अरेर्मत्पालपितुः कौसल्यायाः शत्रोः पादं दशेत्यर्थ कृत त
या रामेणायोजितमिति वक्रोक्तिरत्रालंकारः ॥२२॥ ॥

सरामः लक्ष्मणस्य वनवासंप्रत्यादरादुच्यमानं एवंभूतं अत एवोत्तमपुंस्कं अत्यंतश्रेष्ठं वचो निशम्य सुचिरा
यस्वयं वनवासरूपं धर्मं प्रपद्यांगीकृत्य समस्ताः समाः वनवासं प्रति विदधे लक्ष्मणस्यानुमतिमिति शेषः
३४ भयं तत्कार्यं इतस्ततईक्षणरूपं संभ्रमं चनोपेयतुः ३५ इति श्री रामाभिरामे श्रीरामीये रामायणे

सलक्ष्मणस्योत्तमपुष्कलं वचो निशम्य चैवं वनवासमादरात् ॥ समाः समस्ता विदधे परंत
पः प्रपद्य धर्मं सुचिराय राघवः ॥ ३४ ॥ ततस्तु तस्मिन्विजने महाबलौ महावने राघववंशवर्ध
नौ ॥ न तौ भयं संभ्रममभ्युपेयतुर्यथैव सिंहौ गिरिसानुगोचरौ ॥ ३५ ॥ इत्यार्षे श्रीरा॰ अ॰ त्रिपंचा
शः सर्गः ॥ ते तु तस्मिन्महावृक्षे उषित्वा रजनीं शुभां ॥ विमलेभ्युदिते सूर्ये तस्माद्देशात्प्रत
स्थिरे ॥ १ ॥ यत्र भागीरथी गंगा यमुनाभिप्रवर्तते ॥ जग्मुस्तं देशमुद्दिश्य विगाह्य सुमहद्वनं
२ ॥ ते भूमिभागान्विविधान् देशांश्चापि मनोहरान् ॥ अदृष्टपूर्वान्पश्यंतस्तत्र तत्र यशस्वि
नः ॥ ३ ॥ यथा क्षेमेण संपश्यन्पुष्पितान्विविधान्द्रुमान् ॥ निवृत्तमात्रे दिवसे रामः सौमित्रिमब्रवीत् ॥ ४ ॥

लके अयोध्याकांडे त्रिपंचाशः सर्गः ॥ ५३ ॥ १ ॥ गंगामभियमुना प्रवर्तते तद्देशं प्रयागं गंगाया अतिपुण्य
त्वध्वननायैवमुक्ति ॥ २ ॥ भूमिभागाः भूमिप्रदेशाः ते पश्यंतो जग्मुरिति संबंधः ॥ ३ ॥ यथा यथासुखं जना
गमानशंकाभावात् क्षेमेण उपविश्योत्थाय शनैः शनैः स्वेच्छानुरोधेन संपश्यत् समपश्यन् निवृ

औपयिकं युक्तं॥ यतस्त्वत्परितापेन सीतायाममच विषादो भवति॥ ३०॥ अथ गंतव्यमिति यदुक्तं तदुत्तरं सीत
वदहमप्यवर्जनीय इति वक्तुमात्मनः सीतासाधर्म्यमाह नचेति॥ त्वयाहीना सीता त्वयाहीनोहं च ज
लादुद्धृतौ मत्स्याविव न जीवाव न जीवाव इत्यस्यावृत्यानन्त्र्? इयान्वयः जीवनाभावस्य सर्वथा सत्
त्वप्रतिपादनाय द्विरुक्तिः॥ ३१॥ अथ नोत्क्रमितुमर्हसीत्यस्योत्तरं नहीति॥ न खत्रयस्य नेच्छेयं नेच्छे

नैतदौपयिकं राम यदिदं परितप्यसे॥ विषादयसि सीतां च मां चैव पुरुषर्षभ॥ ३०॥ न च सी
ता त्वया हीना न चाहमपि राघव॥ मुहूर्तमपि जीवावो जलान्मत्स्याविवोद्धृतौ॥ ३१॥ न हि ता
तं न शत्रुघ्नं न सुमित्रां परंतप॥ द्रष्टुमिच्छेयमद्याहं स्वर्गं चापि त्वया विना॥ ३२॥ ततस्तत्र सु
खासीनौ नातिदूरे निरीक्ष्य तां॥ न्यग्रोधे सुकृतां शय्यां भेजाते धर्मवत्सलौ॥ ३३॥

यं नेच्छेयमिति प्रकारेण नेच्छेयमिति यदावृत्त्यान्वयः स्वर्गं चाप्यप्राप्तं द्रष्टुं त्वया विना नेच्छेयं॥ किं सुत
रां गंतुमिति भावः॥ ३२॥ ततो लक्ष्मणवचनानंतरं॥ तत्र तस्मिन्नेव न्यग्रोधमूले समासीनौ सीतारामौ न्य
ग्रोधमूले स्वावस्थावदेशाद तिसमीपे लक्ष्मणेन सुकृतां सम्यग्रचितां शय्यां भेजाते॥ वत्सलावत्स
लश्च वत्सलौ॥ पुमान् स्त्रियेत्येकशेषः॥ ३३॥

दृष्ट्वा अवसरंज्ञात्वासौमित्रिणासार्धमभ्यवंददितिशेषःसीतयाचनमस्कारंकारितवान्‌तदाहअभ्यवादयन्॥१२॥
तत्रमूलफलाशनाइत्यंतेनस्ववृत्तांतसहितमात्मानंभरद्वाजायन्यवेदयत्॥१३॥१४॥१५॥धर्ममेववानप्रस्थ
धर्ममेव मूलफलग्रहणंमांसस्याप्युपलक्षणं॥१६॥गांमधुपर्कांगमहोक्तं॥१७॥अन्नमत्रादनीयमात्रं अतएव

हुताग्निहोत्रंदृष्ट्वैवमहाभागःकृतांजलिः॥रामःसौमित्रिणासार्धंसीतयाचाभ्यवादयत्॥१२॥न्यवे
दयतचात्मानंतस्मैलक्ष्मणपूर्वजः॥पुत्रौदशरथस्यावांभगवन्नामलक्ष्मणौ॥१३॥भार्याममेयंकल्या
णीवैदेहीजनकात्मजा॥मांचानुयाताविजनंतपोवनमनिंदिता॥१४॥पित्राप्रव्राज्यमानंमांसौमित्रि
रनुजःप्रियः॥अयमन्वगमद्भ्रातावनमेवधृतव्रतः॥१५॥पित्रानियुक्ताभगवन्प्रवेक्ष्यामस्तपोवनं॥
धर्ममेवाचरिष्यामस्तत्रमूलफलाशनाः॥१६॥तस्यतद्वचनंश्रुत्वाराजपुत्रस्यधीमतः॥उपानय
तधर्मात्मागामर्घ्यमुदकंततः॥१७॥नानाविधानन्नरसान्वन्यमूलफलाश्रयान्॥तेभ्योददौतप्ततपा
वासंचैवाभ्यकल्पयत्॥१८॥मृगपक्षिभिरासीनोमुनिभिश्चसमंततः॥राममागतमभ्यर्च्यस्वागते
नागतंमुनिः॥१९॥प्रतिगृह्यतुतामर्चामुपविष्टंसराघवं॥भरद्वाजोऽब्रवीद्वाक्यंधर्मयुक्तमिदंतदा॥२०॥

वन्यमूलफलाश्रमादितिवक्तव्ये ति रसाःपानीयविशेषाः वासंवासस्थानं॥१८॥आगतं आगतंतेजोविशेषान्मर्यादा
रक्षणायमध्येमध्येस्थित्वानिकटप्राप्तंराममंमृगपक्षिभिर्मुनिभिश्चसहस्वागतेनाभ्यर्च्यमुनिभिःसहमुनि
रामंसमंततआसीनोभवदितियोजनामृगपक्षिणामर्चाचप्रदक्षिणागमनादिरूपावर्णिता॥१९॥२०॥

भगवतोग्नेः केतुं लिंगं धूमं पश्य यदेवमतोत्र मुनिः सन्निहित इति मन्ये ॥५॥ संभेदं संगमं वारिणोर्गंगायमुनजलयोः वारिघर्षो विजातीयवारिसंबंधः घट्ट इति पाठेप्येवमेव ॥६॥ येषां दारूणि भिन्नानि ते द्रुमा दृश्यंत इत्यन्वयः ॥७॥ धन्विनां वितता पाठे तेषां मध्ये विततौ मुख्यावितिया। वत्स संधौ अंतर्वेदिदेशे निलयं आश्र

प्रयागमभितः पश्य पसौमित्रे धूममुत्तमं ॥ अग्नेर्भगवतः केतुं मन्ये सन्निहितो मुनिः ॥५॥ नूनं प्राप्ताः स्म संभेदं गंगायमुनयोर्वयं ॥ तथाहि श्रूयते शब्दो वारिणो वारिघर्षजः ॥६॥ दारूणि परिभिन्नानि वनजैरुपजीविभिः ॥ छिन्नाश्चाप्याश्रमे चैते दृश्यंते विविधा द्रुमाः ॥७॥ धन्विनौ तौ सुखं गत्वा लंबमाने दिवाकरे ॥ गंगायमुनयोः संधौ प्रापतुर्निलयं मुनेः ॥८॥ रामस्त्वाश्रममासाद्य त्रासयन्मृगपक्षिणः ॥ गत्वा मुहूर्त्तमध्वानं भरद्वाजमुपागमत् ॥९॥ ततस्त्वाश्रममासाद्य मुनेर्दर्शनकांक्षिणौ ॥ सीतयानुगतौ वीरौ दूरादेवावतस्थतुः ॥१०॥ स प्रविश्य महात्मानमृषिं शिष्यगणैर्वृतं ॥ संशितव्रतमेकाग्रं तपसा लब्धचक्षुषं ॥११॥

वासं तत्समीपदेशं ॥८॥ आश्रमं तत्समीपवनप्रदेशं त्रासयन् धनुर्धरत्वादिस्वरूपमात्रेणैव केवलं त्रासयन् भरद्वाजं तदाश्रमं ॥९॥ आश्रमं भरद्वाजस्य दूरादेवावतस्थतुः कार्यवशान्निर्गतशिष्यद्वारा विज्ञापनपूर्वकानुमतिलाभार्थमिति भावः ॥१०॥ स तथा लब्धानुमतिः प्रविश्य उटजमिति शेषः संशितव्रतं तीक्ष्णव्रतं तपसा लब्धचक्षुषं त्रैकालिकसर्वजगद्वृत्तांताभिज्ञं ॥११॥

वैदेहीरमतेतं आश्रयतीत्याश्रमं जगतस्यस्थानं सर्वोत्तमं मां त्वमेवैकांते पश्यमत्स्वरूपं न प्रकटयेत्यंतेन
व्याख्यातं॰ तदयुक्तं॰ मुनिना रामस्वरूपप्रकटनस्य सर्ववेद्यं यथाभवति तथा प्राकृक्ताप्यकरणात्॰ अ
त्र रमर्यादया पितादशार्थालाभाच्च॰ पौरजानपदो जन इति पदस्वारस्याच्चेति॰ ॥ सुधियो विभावयंतु॰ एत
दिति॰ राघवस्यार्थग्राहकं तदुक्तप्रयोजनप्रतियादकं नतत् वक्ष्यमाणमब्रवीत् ॥ २७ ॥ दशक्रोशे इतिस
न्नम्यंतं॰ इतो मदाश्रमात् ॥ २८ ॥ २९ ॥ यावता यदा शृंगाण्यवेक्षते नेन देतिशेषः समाधत्ते॰ मनसाकर्तुमाशा

दशक्रोश इतस्तात गिरिर्यस्मिन्निवत्स्यसि ॥ महर्षिसेवितः पुण्यः पर्वतः शुभदर्शनः ॥ २८ ॥ गो
लांगूलानुचरितो वानरर्क्षनिषेवितः ॥ चित्रकूट इति ख्यातो गंधमादनसन्निभः ॥ २९ ॥ यावता चित्र
कूटस्य नरः शृंगाण्यवेक्षते ॥ कल्याणानि समाधत्ते न मोहे कुरुते मनः ॥ ३० ॥ ऋषयस्तत्र बहवो वि
हृत्य शरदां शतं ॥ तपसा दिवमारूढाः कपालशिरसा सह ॥ ३१ ॥ प्रविविक्तमहं मन्ये तं वासं भवतः
सुखं ॥ इह वा वनवासाय वस राम मया सह ॥ ३२ ॥

स्ते ॥ ३० ॥ तदुपपादयति॰ । ऋषय इति॰ बहुदिन
मतनकपालवत्शुक्लं यत् शिरस्तेन सह॰ तेन विद्यमानेनोपलक्षितास्तपसान् शरदां शतं विहृत्य अति
वार्द्धकेपितपसाक्रीडित्वा दिवं स्वर्गमारूढाः केचित्तु कपालशिरसेति॰ शरीरोपलक्षणं॰ सशरीराः॥
स्वर्गं गताः इत्याहुः तन्न धर्मपुत्रादीनामपि क्वियदुरमेव धर्मवैभवदर्शनायैतत् शरीरेण गमनं ततस्त
न्निरासपर्वकमेव स्वर्गगमनश्रवणात् इति कतकः ॥ ३१ ॥ वनवासाय॰ वनवासनियमसिद्धये॰

चिरस्य चिरकालस्य इहाश्रमे आगतं त्वां पश्यामि ॥ अनेन पूर्वं मयि कदाचिदागमनं ध्वनितं । पूर्वं रामावतारकालिक
मागमनं मनसि निधाय वैयोक्तिः पश्यामि चक्षुषा एवं रूपं पश्यामि । यः केवलं ध्यानगोचर एव सोप्येवंभूतद्रूप
श्चर्ययंगपं । अकारणं निर्निमित्तं ॥२१॥२२॥२३॥ इत आसन्न । एतदाश्रमाददूरवर्ती पौरजानपदो जनः मां सुद
र्शी । सुखेन द्रष्टुं शक्यं प्रेक्ष्य ज्ञात्वा वैदेहीं मां च प्रेक्षको जनः वैदेत्यादि दर्शनार्थी जनस्तदर्थं मिममाश्रममाग

चिरस्य खलु काकुत्स्थ पश्याम्यहमुपागतं ॥ श्रुतं तव मया चैव विवासनमकारणं ॥२१॥ अवकाशो
विविक्तोयं महानद्योः समागमे ॥ पुण्ये च रमणीये च वसत्विह भवान्सुखं ॥२२॥ एवमुक्तस्तु वचनं भ
रद्वाजेन राघवः ॥ प्रत्युवाच शुभं वाक्यं रामः सर्वहिते रतः ॥२३॥ भगवन्नित आसन्नः पौरजानपदो
जनः ॥ सुदर्शमिह मां प्रेक्ष्य मन्येहमिममाश्रमं ॥२४॥ आगमिष्यति वैदेहीं मां चापि प्रेक्षको जनः ॥ अ
नेन कारणेनाहमिह वासं न रोचये ॥२५॥ एकांते पश्य भगवन्नाश्रमस्थानमुत्तमं ॥ रमते यत्र वैदे-
ही सुखार्हा जनकात्मजा ॥२६॥ एतच्छ्रुत्वा शुभं वाक्यं भरद्वाजो महामुनिः ॥ राघवस्य तु तद्वाक्य
मर्थग्राहकमब्रवीत् ॥२७॥

मिष्यतीत्यहं मन्ये इत्यन्वयः ॥२४॥२५॥ यत्र यस्मिन्नाश्रमस्थाने तादृश
मेकांते वर्तमानं तं पश्य ज्ञात्वा निर्दिशेत्यर्थः ॥२६॥ अत्र भगवन्नित्यादिश्लोकत्रयस्य । तीर्थेन । वास्तवस्त्व
र्थः रावणवधार्थं गूढमवतीर्णं मां माप्रकटीकुरु ॥ अन्यथा सर्वोपि जनः सुदर्शं विष्णुं मां ज्ञात्वा । वैदेहीं
च मां लक्ष्मीं । प्रेक्ष्य ज्ञात्वा । तां मां च प्रेक्षकः सन्निरागमिष्यति अत एवं विधं प्रकटवासं न रोचये । तो यत्र

एते कुंजरादयः सीतया सार्धं चरतस्तवेत्यन्वयः ॥४३॥ कोयष्टिभः टिट्टिभः ॥४४॥ इति श्रीरामाभिरामे श्रीरामी
ये रामायणतिलके अयोध्याकांडे चतुःपंचाशः सर्गः ॥५४॥ अथ भरद्वाजेन मार्गोपदेशः उषित्वेति ॥१॥
औरसान्पुत्रान् पितेव तान्प्रस्थितान्प्रेक्ष्यते षांस्वस्त्ययनं चकार चैवौ पादपूरणार्थौ ॥२॥ प्रचक्रमे

चरतः सीतया सार्धं नंदिष्यति मनस्तव ॥४३॥ मत्तः कोयष्टिमकोकिलस्वनैर्विनोदयंतं
च सुखं परं शिवं मृगैश्च मत्तैर्बहुभिश्च कुंजरैः सुरम्यमासाद्य समावसाश्रमं ॥४४॥ इत्यार्षे
श्रीरामायणे वाल्मीकीये अयोध्याकांडे चतुःपंचाशः सर्गः ॥५४॥ उषित्वा रजनीं तत्र राजपु
त्रावरिंदमौ ॥ महर्षिमभिवाद्याथ जग्मतुस्तं गिरिं प्रति ॥१॥ तेषां स्वस्त्ययनं चैव महर्षिः स च
कार ह ॥ प्रस्थितान्प्रेक्ष्य तांश्चैव पिता पुत्रानिवौरसान् ॥२॥ ततः प्रचक्रमे वक्तुं वचनं स महामु
निः ॥ भरद्वाजो महातेजा रामं सत्यपराक्रमं ॥३॥ गंगायमुनयोः संधिमासाद्य मनुजर्षभ ॥
कालिंदीमनुगच्छेतां नदीं पश्चान्मुखाश्रितां ॥४॥ ॥ राम ॥ ॥

173

मार्गोपदेशार्थमिति शेषः ॥३॥ पश्चान्मुखाश्रितां गंगाजलवेगाभिघातेन किंचिद्दूरं पश्चान्मुखंग
तामिति तीर्थः ॥ संधिः संगमतीर्थः ॥ संगमात्पश्चात्प्रदेश एवाश्रितत्वप्रयुक्तव्यवहारां संगमपू
र्वभागे तु गंगाया एव व्यवहार इति भाव इति कतकः ॥ अन्ये तु पश्चान्मुखया गंगया श्रितां कालि
दीमनुगच्छेत्यर्थः ॥ अत एवाग्रे कालिंदीमासाद्येत्युक्तिरित्याहुः ॥४॥ राम

रामं तद्वचनं पूर्णं तत्र वसंतः प्रतिजग्राह अतिथियोगपसत्कारैर्वशीकृतवान् ॥३३॥ रजनी प्रपन्नाप्रापा ॥३४॥३५
३६॥ इहाश्रमे शर्वरी मुषितास्म अहम् अथेत्यर्थे वसतिंगंतव्यां चित्रकूटरूपां तद्गमनं प्रत्यनुजानातु ॥३७

सरामं सर्वकामैस्तं भरद्वाजप्रियातिथिं ॥ सभार्यं सह च भ्रात्रा प्रतिजग्राह हर्षयन् ॥३३॥ तस्य प्रयागे रामस्य तं महर्षिमुपेयुषः ॥ प्रपन्ना रजनी पुण्या चित्राः कथयतः कथाः ॥३४॥ सीतातृतीयः काकुत्स्थः परिश्रांतः सुखोचितः ॥ भरद्वाजाश्रमे रम्ये तां रात्रिमवसत्सुखं ॥३५॥ प्रभातायां तु शर्वर्यां भरद्वाजमुपागमत् ॥ उवाच नरशार्दूलो मुनिं ज्वलिततेजसं ॥३६॥ शर्वरीं भगवन्नद्य सत्यशील तवाश्रमे ॥ उषितास्मो ऽह वसतिमनुजानातु नो भवान् ॥३७॥ रात्र्यां तु तस्यां व्युष्टायां भरद्वाजोऽब्रवीदिदं मधुमूलफलोपेतं चित्रकूटं व्रजेति ह ॥३८॥ वासमौपयिकं मन्ये तव राम महाबल ॥ नानानगगणोपेतः किन्नरोरगसेवितः ॥३९॥ मयूरनादाभिरतो गजराजनिषेवितः ॥ गम्यतां भवता शैलश्चित्रकूटः स विश्रुतः ॥४०॥ पुण्यश्च रमणीयश्च बहुमूलफलायुतः ॥ तत्र कुंजरयूथानि मृगयूथानि चैव हि ॥४१॥ विचरंति वनांतेषु तानि द्रक्ष्यसि राघव ॥ सरित्प्रस्रवणप्रस्थान्दरीकंदरनिर्झरान् ॥४२॥

भरद्वाजः तथा रामेण प्रार्थितः इतिशेषः व्रज इत्यनुजगाविति शेषः ॥३८॥ औपयिकमुचितं नगावृक्षाः ॥३९॥४०॥४१॥ विचरंतीदृशं शास्त्रं सरितो नद्यः प्रस्रवणास्तु नुतरजलप्रवाहास्तत्सुताः प्रस्थाः सानूनि दरीपाषाणा निर्भरः कंदरा गिरिगुहाः निर्झराः ... त्यन्वयः ॥४२॥

१३ काष्ठसंघाटः ॥ काष्ठसंघातस्तद्रूपं महाप्लवं उडुपं ॥ १४ ॥ उशीरैर्नलदैः वेतसैरित्यर्थ इति कतकोक्तम युक्तं ॥ १५ ॥ अचिंत्यां अचिंत्यप्रभावं ॥ १६ ॥ सः रामः ॥ १७ ॥ कठिनं स्वनित्रं कार्जंपेटकं ॥ द्वंद्वैकवद्भावः ॥

सीतामेवाग्रतः कृत्वा कालिंदीं जग्मतुर्नदीं ॥ अथासाद्य तु कालिंदीं शीघ्रस्रोतस्विनीं नदीं ॥ १३ ॥ चिंतामापेदिरे सद्यो नदीजलतितीर्षवः ॥ तौ काष्ठसंघाटमथो चक्रतुः सुमहाप्लवं ॥ १४ ॥ शुष्कैर्वंशैः समाकीर्णमुशीरैश्च समावृतं ॥ ततो वेतसशाखाश्च जंबुशाखाश्च वीर्यवान् ॥ १५ ॥ चकार लक्ष्मणः छित्वा सीतायाः सुखमासनं ॥ तत्र श्रियमिवाचिंत्यां रामो दाशरथिः प्रियां ॥ १६ ॥ ईषत्संलज्जमानां तामध्यारोपयत प्लवं ॥ पार्श्वे तत्र च वैदेह्या वसने भूषणानि च ॥ १७ ॥ प्लवे कठिणकाजं च रामश्चक्रे समाहितः ॥ आरोप्य सीतां प्रथमं संघाटं परिगृह्य तौ ॥ १८ ॥ ततः प्रतेरतुर्यत्तौ प्रीतौ दशरथात्मजौ ॥ कालिंदीमध्यमायाता सीता त्वेनामवंदत ॥ १९ ॥ स्वस्ति देवि तरामि त्वां पारयेन्मे पतिर्व्रतं ॥ यक्ष्ये त्वां गोसहस्रेण सुराघटशतेन च ॥ २० ॥ स्वस्ति प्रत्यागते रामे पुरीमिक्ष्वाकुपालितां ॥ कालिंदीमथ सीता तु याचमाना कृतांजलिः ॥ २१ ॥

आजं अजचर्मपिनद्धं पेटकं इत्यर्थः अन्ये संघाटं प्लवं ॥ १८ ॥ १९ ॥ पतिः व्रतं चतुर्दशवर्षावधिकं पारयेत् समापयेत् ॥ २० ॥ स्वस्ति प्रत्यागते यक्ष्य इति संबंधः ॥ २१ ॥

अथशुद्धांकालिंदीमासाद्यतस्यास्तीर्थमवतरणप्रदेशं॰ प्रचरितंगमनागमनाभ्यामतिक्षुण्णंदृष्ट्वा॥ ५॥ प्लवंतर
णसाधनं॰ अंशुमतीसूर्यतनयां॥ ६॥ श्यामंश्यामनामकं॰ आशिषःप्रयुंजीतः अस्माकंपुनरागमनंभवत्वि
ति॰॥ सीतावृक्षंनेत्यादिनाप्रार्थयेत्॥ ७॥ वसेद्वातिक्रमेतवेत्येकवचनं॰ सीताभिप्रायकं॰ अमेवसेत्॰॥

अथासाद्यतुकालिंदींप्रतिस्रोतःसमागतां॥ तस्यास्तीर्थंप्रचरितंप्रकामंप्रेक्ष्यराघव॥ ५॥ तत्रयू
यंप्लवंकृत्वातरतांशुमतींनदीं॥ ततोन्यग्रोधमासाद्यमहांतंहरितच्छदं॥ ६॥ परीतंबहुभिर्वृक्षैः
श्यामंसिद्धोपसेवितं॥ तस्मिन्सीतांजलिंकृत्वाप्रयुंजीताशिषःक्रियां॥ ७॥ समासाद्यचतंवृ
क्षंवसेद्वातिक्रमेतवा॥ क्रोशमात्रंततोगत्वानीलंप्रेक्ष्यचकाननं॥ ८॥ शल्लकीबदरीमिश्रंराम
वन्यैश्चयामुनैः॥ सपंथाःचित्रकूटस्यगतस्यबहुशोमया॥ ९॥ रम्योमार्दवयुक्तश्चदावैश्चैव
विवर्जितः॥ इतिपंथानमादिश्यमहर्षिःसन्यवर्तत॥ १०॥ अभिवाद्यतथेत्युक्त्वारामेणविनि
वर्तितः॥ उपावृत्तेमुनौतस्मिन्रामोलक्ष्मणमब्रवीत्॥ ११॥ कृतपुण्याःस्मभद्रंतेमुनिर्यं
न्नोऽनुकंपते॥ इतितौपुरुषव्याघ्रौमंत्रयित्वामनस्विनौ॥ १२॥

अन्यथागच्छेदित्यर्थः ततःकालिं
दीदक्षिणतीरवर्तिन्यग्रोधात्॥ ५॥ यामुनैर्यमुनातीरजैः॥ ९॥ मार्दवयुक्तः॥ वालुकोपेतत्वात्॰ कंटक
पाषाणादिरहितत्वाच्च॰ दावैर्विवर्जितः॰ वनाग्निरहितः॥ १०॥ तथेत्युक्त्वात्वदुपदिष्टमार्गेणैवंगमि

सीतावचनेनसंरब्धस्त्वरावानानयामासेत्यन्वयः ॥ आनयामासेत्यानिन्येइत्यर्थे आर्षं॰ विचित्रेत्यादिनदी
विशेषणं ॥ ३१ ॥ नदीयमुनां ॥ ३२ ॥ चेरतुः भक्षितवंतौ॰ वप्रंतीरं ॥ ३३ ॥ इतिश्रीरामाभिरामेश्रीरामीयेरामाय
णतिलके अयोध्याकांडेपंचपंचाशः सर्गः ॥ ५५ ॥ अथावसुप्तंस्वप्नबोधानंतरमपिईषत्सुप्तं॰ ए ते

सीतावचनसंरब्धः आनयामासलक्ष्मणः ॥ विचित्रवालुकजलांहंससारसनादितां ॥ ३१ ॥
रेमेजनकराजस्यसुताप्रेक्ष्यतदानदीं ॥ क्रोशमात्रंततोगत्वाभ्रातरौरामलक्ष्मणौ ॥ बहु
न्मेध्यान्मृगान्हत्वाचेरतुर्यमुनावने ॥ ३२ ॥ विहृत्यते बर्हिणपूगनादितेशुभेवने
वारणवानराकुले ॥ समंनदीवप्रमुपेत्यसत्वरं निवासमाजग्मुरदीनदर्शनाः ॥ ३३ ॥ इत्या
र्षे श्रीरामायणेवाल्मीकीये अयोध्याकांडेपंचपंचाशः सर्गः ॥ ५५ ॥ अथरात्र्यांव्यतीतायामव
सुप्तमनंतरं ॥ प्रबोधयामासशनैर्लक्ष्मणंरघुपुंगवः ॥ १ ॥ सौमित्रेशृणुवन्यानांवल्गुव्या
हरतांस्वनं ॥ संप्रतिष्ठामहेकालः प्रस्थानस्यपरंतप ॥ २ ॥ ससुप्तस्ततोभ्रात्रासमये
प्रतिबोधितः ॥ जहौनिद्रांचतंद्रांचप्रसक्तंचपरिश्रमं ॥ ३ ॥ राम ॥

नचतुर्दशवर्षपर्यंतंलक्ष्मणः स्वापहीनोऽनाहारश्चेतिलोकप्रवादोऽपास्तः ॥ १ ॥ वन्यानांशुक
पिकादीनांशृणु प्रस्थानस्यकालोजातोऽतः संप्रतिष्ठामहे गच्छामः संप्रतीत्तामहेकालमिति
पाठे प्रस्थानकालंजानीमइत्यर्थः ॥ २ ॥ समयेप्रबोधसमये॰ तंद्रां आलस्यं ॥ ३ ॥

उक्तमेवोपसंहरति· ततइति॥ रथ॥ तीरजैर्वृक्षैरुपलक्षितां यमुनातीरसंवंधिवनात्॥२३॥२४॥२५॥ पर्यगच्छत्परितोगच्छत् प्रदक्षिणां चकारेतियावत्॥२६॥ विधेयामनुकूलां· सीतामायाचंती प्रार्थयंतीमवलो

तीरमेवाभिसंप्राप्तादक्षिणां वरवर्णिनी॥ ततःप्लवेनांशुमतीशीघ्रगामूर्मिमालिनी॥२२॥ तीरजैर्बहुभिर्वृक्षैः संतेरुर्यमुनांनदीं॥ तेषुतेप्लवमुत्सृज्यप्रस्थाययमुनावनात्॥२३॥ श्यामंन्यग्रोधमासेदुःशीतलंहरितच्छदं॥ न्यग्रोधंसमुपागम्यवैदेहीचाभ्यवंदत॥२४॥ नमस्तेस्तुमहावृक्षपारयेन्मेपतिर्व्रतं॥ कौशल्यांचैवपश्येयंसुमित्रां चयशस्विनीं॥२५॥ इतिसीतांजलिंकृत्वापर्यगच्छन्मनस्विनी॥ अवलोक्यततःसीतामायाचंतीमनिंदितां॥२६॥ दयितांचविधेयांचरामोलक्ष्मणमब्रवीत्॥ सीतामादायगच्छत्वमग्रतोभरतानुज॥२७॥ पृष्ठतोनुगमिष्यामि सायुधोद्विपदांवर॥ यद्यत्फलंप्रार्थयतेपुष्पंवाजनकात्मजा॥२८॥ तत्तत्प्रयच्छवैदेह्यायत्रास्यारमतेमनः॥ एकैकंपादपंगुल्मंलतांवापुष्पशालिनीं॥२९॥ अदृष्टरूपांपाश्यंतीरामंपप्रच्छसाबला॥ रमणीयान्बहुविधान् पादपान्कुसुमोत्करान्॥३०॥

कावत्रवीदित्यन्वयः॥२७॥२८॥२९॥ साऽबलासीताः पप्रच्छकोयंवृक्षइत्यादि॥ रमणीयान्रम्यान् कुसुमोत्करान् पादपान्· कुसुमस्तोमविशिष्टवृक्षाऽवयवान्॥३०॥

सुतरां आजीवो जीवनोपायो यस्मिन् ॥ १४ ॥ अयं वासो भवेत् वासयोग्यो भवेत् ॥ १५ ॥ वाल्मीकिमभिवादयन् अभ्यवादयन् चित्रकूटे स्थितएव वाल्मीकि रामराज्यप्रत्तिसमये तमसातीरं गत इति न विरोधः ॥

मनोज्ञोयं गिरिः सौम्य नानाद्रुमलतायुतः ॥ बहुमूलफलो रम्यः स्वाजीवः प्रतिभाति मे ॥ १४ ॥ मुनयश्च महात्मानो वसंत्यस्मिन् शिलोच्चये ॥ अयं वासो भवेत्तात वयमत्र वसेमहि ॥ १५ ॥ इति सीता च रामश्च लक्ष्मणश्च कृतांजलिः ॥ अभिगम्याश्रमं सर्वे वाल्मीकिमभिवादयन् ॥ १६ ॥ तान्महर्षिः प्रमुदितः पूजयामास धर्मवित् ॥ आस्यतामिति चोवाच स्वागतं तं निवेद्य च ॥ १७ ॥ ततोब्रवीन्महाबाहुर्लक्ष्मणं लक्ष्मणाग्रजः ॥ सन्निवेद्य यथान्यायमात्मानमृषये प्रभुः ॥ १८ ॥ लक्ष्मणानय दारूणि दृढानि च वराणि च ॥ कुरुष्वावसथं सौम्य वासे मेभिरतं मनः ॥ १९ ॥ तस्य तद्वचनं श्रुत्वा सौमित्रिर्विविधान् द्रुमान् ॥ आजहार ततश्चक्रे पर्णशालामरिंदमः ॥ २० ॥ तां निष्ठितां बद्धकटां दृष्ट्वा रामः सुदर्शनां ॥ शुश्रूषमाणमेकाग्रमिदं वचनमब्रवीत् ॥ २१ ॥

इति प्राचः प्राचेतसादयं वाल्मीकिरन्य एवेति तत्त्वं ॥ १६ ॥ तं रामं प्रति स्वागतं स्वागतप्रश्नं निवेद्य विज्ञाप्य ॥ १७ ॥ आत्मानं संनिवेद्य अमुकपुत्रः ॥ अमुकहेतोरागतोस्मीत्युक्त्वा ॥ १८ ॥ १९ ॥ २० ॥ निष्ठितां अंतर्बहिः काष्ठभित्त्यासु प्रतिष्ठापितां बद्धकटां बद्धकवाटां छांदसो वर्णलोपः यद्वा बद्धछदिर्बद्धः कटो वर्षावारको यस्यामित्यर्थात् एकाग्रलक्ष्मणं ॥ २१ ॥ ॥

276

नद्याः कालिंद्याः जलं स्पृष्ट्वा स्नानाद्यं तं नित्यकृत्यं कृत्वा ॥४॥५॥ आदीप्तानिव ज्वलितानिव स्वैः पुष्पैर्मालावत इवस्थितान् शिशिरात्यये वसंते ॥६॥ शक्ष्यामजीवितुं जीवनसाधनफलादिसंपत्तेः ॥७॥ आरुरुक्ष

ततउत्थाय ते सर्वे स्पृष्ट्वा नद्याः शिवं जलं । पंथानमृषिभिर्जुष्टं चित्रकूटस्य तं ययुः ॥४॥ ततः संप्रस्थितः काले रामः सौमित्रिणा सह । सीतां कमलपत्राक्षीमिदं वचनमब्रवीत् ॥५॥ आदीप्तानिव वैदेहि सर्वतः पुष्पितान्नगान् । स्वैः पुष्पैः किंशुकान् पश्य मालिनः शिशिरात्यये ॥६॥ पश्य भल्लातकान्बिल्वान्नरैरनुपसेवितान् । फलपुष्पैरवनतान्नूनं शक्ष्यामजीवितुं ॥७॥ पश्य द्रोणप्रमाणानि लंबमानानि लक्ष्मण । मधूनि मधुकारीभिः संभृतानि नगेनगे ॥८॥ एष क्रोशति नत्यूहस्तं शिखी प्रतिकूजति । रमणीये वनोद्देशे पुष्पसंस्तरसंकटे ॥९॥ मातंगयूथानुसृतं पक्षिसंघानुनादितं । चित्रकूटमिमं पश्य प्रवृद्धशिखरं गिरिं ॥१०॥ समभूमितले रम्ये द्रुमैर्बहुभिरावृते । पुण्ये रंस्यामहे तात चित्रकूटस्य कानने ॥११॥ ततस्तौ पादचारेण गच्छंतौ सह सीतया । रम्यमासेदतुः शैलं चित्रकूटं मनोरमं ॥१२॥ तं तु पर्वतमासाद्य नानापक्षिगणायुतं । बहुमूलफलं रम्यं संपन्नसरसोदकम् ॥१३॥

नु शक्ष्यं द्रोणतत्प्रमाणं मधुपूर्णानि मधूनि मधुपटलानि ॥ मधुकारीभिः मधुमक्षिकाभिः नगेवृक्षे ॥८॥ नत्यूहः दात्यूहः पुष्पसंस्तरसंकटे पुष्पैः कृतेन संस्तरेण आच्छादनेन संकटे निबिडे वनोद्देशे ॥९॥ ॥१०॥ ॥११॥ ॥१२॥ संपन्नसरसोदकं स्वादूदकसहितं ॥१३॥

सत्रावसानिकान्ः यागसमाप्तिप्रयोजनान्मंत्रान्ः गृहीत्वा संग्रहेणावस्तुशांत्याद्यकरोत् ॥३०॥ एवं गृहाधिष्ठितदेवतापूजां भुक्त्वा पुनः स्नानपूर्वकं वैश्वदेवादिप्रकारमाह॰ वैश्वदेवेत्यादि ॥३१॥ वास्तुसंशमनीयानि॰ वास्तुदोषशमनार्थमंगलानि मंगलपाठादीनि ॥३२॥ पापसंशमनं ॥ पापशमनसाधनं॰ बलिं वैश्वदेवब

संग्रहेणाकरोत्सर्वान्मंत्रान्सत्रावसानिकान् ॥ इष्ट्वा देवगणान्सर्वान्विवेशावसथं शुचिः ॥३०॥ बभूव च मनोल्हादो रामस्यामिततेजसः ॥ वैश्वदेवबलिं कृत्वा रौद्रं वैष्णवमेव च ॥३१॥ वास्तुसंशमनीयानि मंगलानि प्रवर्तयन् ॥ जपं च न्यायतः कृत्वा स्नात्वा नद्यां यथाविधि ॥३२॥ पापसंशमनं रामश्चकार बलिमुत्तमं ॥ वेदिस्थलविधानानि चैत्यान्यायतनानि च ॥ आश्रमस्यानुरूपाणि स्थापयामास राघवः ॥३३॥ तां वृक्षपर्णच्छदनां मनोज्ञां यथाप्रदेशं सुकृतां निवातां ॥ वासाय सर्वे विविशुः समेताः सभां यथा देवगणाः सुधर्मां ॥३४॥ सुरम्यमासाद्य तु चित्रकूटं नदीं च तां माल्यवतीं सुतीर्थां ॥ ननंद हृष्टो मृगपक्षिजुष्टां जहौ च दुःखं पुरविप्रवासात् ॥३५॥ इत्यार्षे श्रीरा॰ अयो॰ षट्पंचाशः सर्गः ॥५६॥

लिमित्युपसंहारेणावादः वेदिस्थलानां बलिहरणवेदिस्थलानां अष्टदिग्वर्तिनां॰ विधानानि चैत्यं गणपत्यायतनं॰ आयतनानि॰ विष्ण्वादेः अनुरूपाणि स्वस्वमार्गेणेति यावत् ॥३३॥ वृक्षपर्णैः कृतं छदनं छादनं यस्यां तां ॥३४॥ मृगपक्षिजुष्टां तां नदीमासाद्य तत्र स्थः ॥३५॥ इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके अयोध्याकांडे षट्पंचाशः सर्गः ॥५६॥

शालां पर्णशालाधिष्ठातृदेवताः ॥२२॥ वास्तुशमनं वास्तुशान्तिं चिरजीविभिः चिरजीवित्वेच्छावद्भिः ॥२३॥
पशुवधदोषशंकां वारयति कर्त्तव्य इति यज्ञार्थपशुहिंसा न दोष इति भावः शास्त्रदृष्टः शास्त्रबो-
धितः धर्मशास्त्रबोधितकर्तव्यत्वरूपः ॥२४॥ ऐणेयं मृगमांसं एतच्छालां एनां शालां तदधिष्ठातॄः शि-

ऐणेयं मांसमाहृत्य शालां यक्ष्यामहे वयं ॥२२॥ कर्तव्यं वास्तुशमनं सौमित्रे चिरजीविभिः ॥ मृगं
हत्वानय क्षिप्रं लक्ष्मणेह शुभेक्षण ॥२३॥ कर्त्तव्यः शास्त्रदृष्टो हि विधिर्धर्ममनुस्मर ॥ भ्रातुर्वच-
नमाज्ञाय लक्ष्मणः परवीरहा ॥२४॥ चकार च यथोक्तं स तं रामः पुनरब्रवीत् ॥ ऐणेयं श्रपयस्वै-
तच्छालां यक्ष्यामहे वयं ॥२५॥ त्वर सौम्य मुहूर्तोऽयं ध्रुवश्च दिवसोऽप्ययं ॥ स लक्ष्मणः कृष्णमृगं हत्वा
मेध्यं प्रतापवान् ॥२६॥ अथ चिक्षेप सौमित्रिः समिद्धे जातवेदसि ॥ तं तु पक्वं समाज्ञाय निष्टप्तं छि-
न्नशोणितं ॥२७॥ लक्ष्मणः पुरुषव्याघ्रमथ राघवमब्रवीत् ॥ अयं सर्वः समस्ताङ्गः श्रितः कृष्णमृ-
गो मया ॥२८॥ देवता देवसंकाश यजस्व कुशलो ह्यसि ॥ रामः स्नात्वा तु नियतो गुणवान् जपकोविदः
॥२९॥

खिपर्जन्यादि पंचाशद्देवताः अयं सौम्यो मुहूर्तः दिवसश्चायं ध्रुवसंज्ञकः ॥२५॥२६॥ निष्टप्तं नितरां तप्तं
छिन्नशोणितं उपरतरुधिरस्पंदं ॥२७॥ सर्वः सर्वकर्मार्हः समस्तांगः शिरःपादादिसर्वांगोपेतः श्रितः प-
क्वः ॥२८॥ गुणवान् कर्मापेक्षितप्रापत्यादिगुणवान् ॥२९॥ ॥ राम ॥

द्वितीये ह्नि शृंगवेरपुरतः प्रतिनिवर्त्तितादिवसात् ॥ ५ ॥ शून्यामिव शून्यनगरीमिव ॥ ६ ॥ चिंताप्रकारमाह · कच्चि
दिति · नशब्दो वितर्के ॥ ७ ॥ ८ ॥ अभ्यद्रवन् तस्तं संमुखमाजग्मुः ॥ ९ ॥ गंगायां शृंगवेरे पुरे रामेणानुज्ञातस्त

ततः सायान्हसमये द्वितीयेह्नि सारथिः ॥ अयोध्यां समनुप्राप्य निरानंदां ददर्श ह ॥ ५ ॥ सशू
न्यामिव निःशब्दां दृष्ट्वा परमदुर्मनाः ॥ सुमंत्रश्चिंतयामास शोकवेगसमाहतः ॥ ६ ॥ कच्चिन्न
सगजा साश्वा सजना सजनाधिपा ॥ रामसंतापदुःखेन दग्धा शोकाग्निना पुरी ॥ ७ ॥ इति चिंताप
रः सूतो वाजिभिः शीघ्रयायिभिः ॥ नगरद्वारमासाद्य त्वरितः प्रविवेश ह ॥ ८ ॥ सुमंत्रमभिधाव
तः शतशोथ सहस्रशः ॥ क्व राम इति पृच्छंतः सूतमभ्यद्रवन्नराः ॥ ९ ॥ तेषां शशंस गंगायामहमा
पृच्छ्य राघवं ॥ अनुज्ञातो निवृत्तोस्मि धार्मिकेन महात्मना ॥ १० ॥ ते तीर्णा इति विज्ञाय बाष्पपू
र्णमुखा नराः ॥ अहो धिगिति निश्वस्य हा रामेति विचुक्रुशुः ॥ ११ ॥ शुश्राव च वचस्तेषां वृंदं वृं
दं च तिष्ठतां ॥ हताः स्म खलु ये नेह पश्याम इति राघवं ॥ १२ ॥ दानयज्ञविवाहेषु समाजेषु
महत्सु च ॥ न द्रक्ष्यामः पुनर्जातु धार्मिकं राममंतरा ॥ १३ ॥

मापृच्छ्य निवृत्तोस्मि · ततः परं वृत्तां
तं न जानामीति शशंस ॥ १० ॥ तीर्णाः गंगामुत्तीर्य गताः ॥ ११ ॥ वृंदं वृंदं संघशस्तिष्ठतां तेषां जनानां ·
ये इह रथे रामं न पश्यामस्ते हताः खलु इति वचः शुश्राव ॥ १२ ॥ दानादिव्यवहारेषु धार्मिकं रामं
वयमंतरा दानादिव्यवहारमध्ये जातु पुनर्न द्रक्ष्याम इति च शुश्राव ॥ १३ ॥

एवंरामव्यापारमुक्त्वाविसष्टसुमंत्रव्यापारमाह॥ कथयित्वेति॥ रामेदक्षिणातीरस्थेसुमंत्रेणासहदुःखार्त्तो
गुहश्चिरंरामगुणान्कथयित्वारामभद्रेदृष्टिपथादतिक्रांतेतेनसहस्वगृहंजगाम॥१॥ भरद्वाजाभिग
मनंरामादीनांभरद्वाजमुद्दिश्यगमनंसभाज्यनंभरद्वाजेनेतिशेषः सहासनमितिपाठांतरं॥ तत्रस्थैःशृं
गिवेरपुरस्थैः गुहप्रेषितचारैःकरणभूतैस्तन्मुखेनाभिलक्षितंकृत्वागुहानुज्ञातःसुमंत्रोययौ इत्यन्
यः॥ गंगोत्तरणात्तृतीयदिवसेभरद्वाजाश्रमात्प्रतिनिवृत्तदूतमुखात्तावत्पर्यंतंवृत्तंज्ञात्वा॥ तद्दिनएव

कथयित्वातुदुःखार्त्तःसुमंत्रेणचिरंसह॥ रामेदक्षिणाकूलस्थेजगामस्वगृहंगुहः॥१॥ भरद्वाजा
भिगमनंप्रयागेचसहासनं॥ आगिरेर्गमनंतेषांतत्रस्थैरभिलक्षितं॥२॥ अनुज्ञातःसुमंत्रोथ
योजयित्वाहयोत्तमान्॥ अयोध्यामेवनगरींप्रययौगाढदुर्मनाः॥३॥ सवनानिसुगंधीनिसरि
तश्चसरांसिच॥ पश्यन्नतोययौशीघ्रंग्रामाणिनगराणिच॥४॥

शृंगवेरात्सुमंत्रस्यप्रतिनिवृत्ति
रितिबोध्यं॥ अतएवरामस्यनिर्गमदिनाद्दिनेषष्ठेर्धरात्रकेहाहालक्ष्मणहासीतेहारामेतिमतोन्वय
इतिपाद्मे॥ संगच्छते॥ दिनद्वयेनशृंगवेरपुरेरामागमनं॥ तद्द्वितीयदिनेगंगोत्तरणं॥ तदादिनत्र
यंसुमंत्रस्यतत्रस्थितिः॥ तत्रतृतीयदिवसेमध्याह्नेप्रयागतआगतचारेभ्योरामवृत्तांतंलब्ध्वा॥ ततः
प्रस्थायमध्येवस्थानं॥ ततःषष्ठेऽपराह्णेऽयोध्याप्रवेशः॥ सुमंत्रस्यतदर्धरात्रेराज्ञोमरणमिति॥२॥ अ
नुज्ञातःगुहेनेतिशेषः॥३॥ [illegible] ॥४॥ राम

रामा॰ अ॰
१७९

किन्नामप्रतिवक्ष्यति॰ अतिघोरत्वान्नकिमपिवक्तुंशक्यमितिभावः॥२१॥अथप्रत्येकंराममातरणांदुःखप्रल
पः॥यथाचेतियथाजीवंजीवनंदुःदुःखजनकंमन्ये॰ एवंध्रुवंनिश्चयेनसुःकरंसुकरंनाशनेतिम
न्ये॰यत्रयतःपुत्रेरामेआछिद्यन्यायप्राप्तमभिषेकमाछिद्यत्यक्तानियानेसत्यपिकौसल्याजीवति॰

सहरामेणनिर्यातोविनाराममिहागतः॥स्ततःकिन्नामकौसल्यांक्रोशंतीप्रतिवक्ष्यति॥२१॥
यथाचमन्येदुर्जीवमेवंनसुकरंध्रुवं॥आछिद्यपुत्रेनिर्यातेकौसल्यायत्रजीवति॥२२॥सत्य
रूपंतुतद्वाक्यंराजस्त्रीणांनिशामयन्॥प्रदीप्तइवशोकेनविवेशसहसागृहं॥२३॥सप्रविश्या
ष्टमींकक्ष्यांराजानंदीनमानसं॥पुत्रशोकपरिद्यूनमपश्यत्पांडुरेगृहे॥२४॥अभिगम्यतमासी
नंराजानमभिवाद्यच॥सुमंत्रोरामवचनंयथोक्तंप्रत्यवेदयत॥२५॥सतूष्णीमेवतच्छ्रुत्वारा
जाविद्रुतमानसः॥मूर्छितोन्यपतद्भूमौरामशोकाभिपीडितः॥२६॥ततोंतःपुरमाविद्धंमूर्छिते
पृथिवीपतौ॥उच्छ्रित्यबाहुचुक्रोशन्नृपतौपतितेक्षितौ॥२७॥सुमित्रयातुसहिताकौसल्याप
तितंपतिं॥उत्थापयामासतदावचनंचेदमब्रवीत्॥२८॥इमंतस्यमहाभागदूतंदुष्करकारि
णः॥वनवासादनुप्राप्तंकस्मान्नप्रतिभाषसे॥२९॥

मन्येइत्येकैकव्यक्त्यपेक्षयैकवचनं॥२२॥सत्यरू
पंपरमार्थरूपंतत्स्त्रीणांवाक्यंनिशामयन्॰ शोकेनप्रदीप्तइवसन्राजगृहंविवेश॥२३॥अत्रश्लोक
द्वयेतीर्थकतकादिव्याख्यानात्पंतंसमंजसेत्युपेक्षिता॰सइति॰परिद्यूनंम्लानं॥२४॥प्रत्यवेदयत॰विस्तरे

राम
१७९

279

पित्रेव रामेण परिपालितं नगरं· अस्य जनस्य किं समर्थमुचितं किं प्रियं तत्कारं वस्तु किमिहामुत्र सुखावहं
वस्त्विति चिंताव्याप्तं वभूवेति शेषः ॥१४॥ अनु अनंतरं· वातायनगतानां स्त्रीणां राममुद्दिश्य अभितप्तानां प
रिदेवनं· अंतरापणां· आपणामध्ये गच्छन् शुश्राव ॥१५॥१६॥ कक्ष्याद्वाराणि ॥१७॥ हाहाकारः कृतो याभिः

किं समर्थं जनस्यास्य किं प्रियं किं सुखावहं ॥ इति रामेण नगरं पित्रेव परिपालितं ॥१४॥ वाता
यनगतानां च स्त्रीणामन्वंतरापणं ॥ राममेवाभितप्तानां शुश्राव परिदेवनं ॥१५॥ स राजमार्गम
ध्येन सुमंत्रः पिहिताननः ॥ यत्र राजा दशरथस्तमेवोपययौ गृहं ॥१६॥ सोवतीर्य रथाच्छी
घ्रं राजवेश्म प्रविश्य च ॥ कक्ष्याः सप्ताभिचक्राम महाजनसमाकुलाः ॥१७॥ हर्म्यैर्विमानैः प्रा
सादैरवेक्ष्याथ समागतं ॥ हाहाकारकृता नार्यो रामादर्शनकर्षिताः ॥१८॥ आयतैर्विमलै
र्नेत्रैरश्रुवेगपरिप्लुतैः ॥ अन्योन्यमभिवीक्षंते व्यक्तमार्ततराः स्त्रियः ॥१९॥ ततो दशरथस्त्रीणां
प्रासादेभ्यस्ततस्ततः ॥ रामशोकाभितप्तानां मंदं शुश्राव जल्पितं ॥२०॥

स्ताः हर्म्यं धनिकगृहं·
विमानं सप्तभूमिकं गृहं· प्रासादो राजगृहं त्रिभूमिकं गृहमित्यन्ये· न तु पल्लवितामयोध्यां समाग
तमवेक्ष्येत्यन्वयः यद्वा तैः करणैः रवेक्ष्य तत्रारोहणपूर्वकमवेक्ष्येत्यन्वयः ॥१८॥ अन्योन्यं अव्यक्तं यथा
भवति तथा वीक्षंते इति कर्तव्यतामौढ्यादिति शेषः ॥१९॥ प्रासादेभ्यः सुमंत्रस्य· राजवेश्मप्रवे
शं दृष्ट्वा· प्रासादेभ्यो [illegible] ॥२०॥ ॥

२ नवग्रहः नवं नतुनं ग्रहो ग्रहणं यस्य तं द्विपमिव विनिश्वसंतं अस्वस्थं स्वीयमध्येन स्थितं कुंजरमिव ध्यायंतं ॥ ३ ॥ रजसा मार्गरजसा परमार्तवत् परमार्तो ऽहं वचनं वाच ॥ ४ ॥ वत्स्यति वनवासकालस्य बहुदीर्घत्वा

ततः सूतो महाराजे कृतांजलिरुपस्थितः ॥ राममेवानुशोचंतं दुःखशोकसमन्वितं ॥ २ ॥ वृद्धं परमसंतप्तं नवग्रहमिव द्विपं ॥ विनिश्वसंतं ध्यायंतमस्वस्थमिव कुंजरं ॥ ३ ॥ राजा तु रजसा सूतं ध्वस्तांगं समुपस्थितं ॥ अश्रुपूर्णमुखं दीनमुवाच परमार्तवत् ॥ ४ ॥ क्व नु वत्स्यति धर्मात्मा वृक्षमूलमुपाश्रितः ॥ सोऽत्यंतसुखितः सूत किमशिष्यति राघवः ॥ ५ ॥ दुःखस्यानुचितो दुःखं सुमंत्र शयनोचितः ॥ भूमिपालात्मजो भूमौ शेते कथमनाथवत् ॥ ६ ॥ यं यांतमनुयांति स्म पदातिरथकुंजराः ॥ स वत्स्यति कथं रामो विजनं वनमाश्रितः ॥ ७ ॥ व्यालैर्मृगैराचरितं कृष्णसर्पनिषेवितं ॥ कथं कुमारौ वैदेह्या सार्धं वनमुपाश्रितौ ॥ ८ ॥ सुकुमार्या तपस्विन्या सुमंत्र सह सीतया ॥ राजपुत्रौ कथं पादैरवरुह्य रथाद्गतौ ॥ ९ ॥ सिद्धार्थः खलु सूत त्वं येन दृष्टौ ममात्मजौ ॥ वनांतं प्रविशंतौ तौ अश्विनाविव मंदरम् ॥ १० ॥ किमुवाच वचो रामः किमुवाच च लक्ष्मणः ॥ सुमंत्र वनमासाद्य किमुवाच च मैथिली ॥ ११ ॥

त्स्यति भविष्यप्रयोगः ॥ ५ ॥ दुःखस्याऽनुचितोऽपि दुःखं प्राप्तः शयनस्योचितः ॥ ६ ॥ ७ ॥ व्यालैः अजगरैः मृगैर्व्याघ्रादिभिः ॥ ८ ॥ रथादवरुह्य कथं पादैर्गतौ ॥ ९ ॥ अश्विनाविव मंदरं मंदरस्य कार्त्स्न्यमात्रा वनसादृश्यं ॥ १० ॥ ११ ॥ ॥ राम ॥

अद्येति॰ इमं दुःखसाधनं पुत्रप्रवासनरूपमनयं कृत्वा अद्य किं व्यपत्रपसि लज्जसि॰ ॥ यन्न प्रतिभाषसे तस्मच्छोकं विधूयोत्तिष्ठते॰ सुकृतं सत्यपरिपालनरूपं पुण्यमस्तु॰ किं च एवं शोके त्वया क्रियमाणे॰ ॥ तव सहायता सहाय समूहः परिजनः सर्वोपि न स्यात्॰ त्वच्छोकेन सर्वोपि नश्येदित्यर्थः ॥ ३० ॥ कैकेयी

अद्येममनयं कृत्वा व्यपत्रपसि राघव ॥ उत्तिष्ठ सुकृतं तेस्तु शोके न स्यात्सहायता ॥ ३० ॥ देव यस्या भयाद्रामं नानुपृच्छसि सारथिं ॥ नेह तिष्ठति कैकेयी विस्रब्धं प्रतिभाष्यतां ॥ ३१ ॥ सा तथोक्त्वा महाराजं कौसल्या शोकलालसा ॥ धरण्यां निपपाताशु बाष्पविप्लुतभाषिणी ॥ ३२ ॥ विलपंतीं तथा दृष्ट्वा कौसल्यां पतितां भुवि ॥ पतिं चावेक्ष्य ताः सर्वाः समंताद्रुरुदुः स्त्रियः ॥ ३३ ॥ ततस्तमंतःपुरनादमुत्थितं समीक्ष्य वृद्धास्तरुणाश्च मानवाः ॥ स्त्रियश्च सर्वा रुरुदुः समंततः पुरं तदासीत्पुनरेव संकुलं ॥ ३४ ॥ इत्यार्षे श्रीरामायणे अयोध्याकांडे सप्तपंचाशः सर्गः ॥ ५७ ॥ प्रत्याश्वस्तो यदा राजा मोहात्प्रत्यागतस्मृतिः ॥ तदा जुहाव तं सूतं रामवृत्तांतकारणात् ॥ १ ॥

भयान्न पृच्छामीति चेत्तत्राह॰ देवेति॰ विस्रब्धं निःशंकं ॥ ३१ ॥ विप्लुतभाषिणी गद्गदभाषिणी ॥ ३२ ॥ ३३ ॥ ३४ ॥ इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके अयोध्याकांडे सप्तपंचाशः सर्गः ॥ ५७ ॥ प्रत्याश्वस्त इति॰ प्रत्याश्वस्तः कृतोपचारः मोहात् मोहं परित्यज्य प्रत्यागतस्मृतिः प्रत्यागतसंज्ञः ॥ प्रत्यागतः पुनरिति पाठेप्ययमेवार्थः ॥ रामवृत्तांतकारणात् [illegible] राममागच्छतु ॥ १ ॥ ॥

ततोममभाताकौसल्यामद्वचनात्कुशलंप्रणामं धर्मेऽप्रमादंचवक्तव्याः किंचैनामिदंवक्ष्यमाणंविशिष्यब्रूयाः किं
तदित्याहधर्मेत्यादि ।१७।१८। अभिमानः प्रधानमहिषीत्वप्रयुक्तोऽहंकारः मानस्तत्प्रयुक्तइतरतिरस्कार
कश्चित्तविकारः मातृषित्यस्यमदीयास्वितिशेषः अनुगतोराजायस्यास्तांकैकेयीं हेअंबआर्यामम्ब
चांकारय धारयेतिपाठेप्ययमेवार्थः तथायासहमाविरोत्सीरित्यर्थः ।१९। भरतेचराजवद्वृत्तिःकार्यात

माताचममकौसल्याकुशलंचाभिवादनं। अप्रमादंचवक्तव्याब्रूयाश्चैनामिदंवचः ।१७। ध
र्मनित्यायथाकालमग्न्यगारपराभवा। देविदेवस्यपादौचदेववत्परिपालय ।१८। अभिमानं
चमानंचत्यक्त्वावर्त्तस्वमातृषु। अनुराजानमार्यांचकैकेयीमंबधारय ।१९। कुमारेभरते
वृत्तिर्वर्तितव्याचराजवत्। अर्थज्येष्ठाहिराजानोराजधर्ममनुस्मर ।२०। भरतःकुशलंवा-
च्योवाच्योमद्वचनेनच। सर्वास्वेवयथान्यायंवृत्तिंवर्तस्वमातृषु ।२१।

781

त्वहेतुः अज्येष्ठा अपि
राजानोहिनिश्चयेनपूज्याइतिराजधर्ममनुस्मर। अर्थज्येष्ठाहीतिपाठेऽर्थेनराज्यरूपार्थेनज्येष्ठा
हियतोतःपूज्याइतिशेषः इतिराजधर्ममनुस्मरेतिकतककृत् अनुराजानमनुराज्ञःपश्चात् आर्यां
कैकेयीमभिवादयेत्यर्थः कैकेयीमभिवादयेतिपाठः कुमारेचेत्यादिप्राग्वत् कैकेय्यावरबलेना
धिकत्वात् भरतस्यचराजदत्तार्थवत्वेनज्येष्ठत्वात्तयोरभिवादनसंवायायुक्तं तद्देशसुखनिवृत्त
येचराजधर्ममनुस्मरेत्याह ।२०। भरतोमद्वचनेनकुशलंवाच्यः सर्वासुमातृषुन्यायमनतिक्रम्यव

आसितादयोभावेनिष्ठां॥ ना:एतेनआसनादिव्यापारश्रवणेनयथा· ययातिरिवसाधुषुस्वर्गात् पतन्ययातिर्मां
साधुषुपातयेतीइंप्रार्थयित्वायथासाधुषुपतितस्तद्वार्तयासुखजीवनोजातः एवंस्वर्गतुल्यात् पुत्रसंयोगा
त्भ्रष्टस्यभवल्लक्षणसाधुसमागमात्पुत्रवार्ताश्रवणेनजीविष्यामीतिभावः॥१२॥ सज्जमानयास्खलंत्या·
बाष्पपरिबद्धया· कंठगतबाष्पनिरुद्धया॥१३॥ हेमहाराजराघवो धर्ममेवानुपालयन्· तत्पाल

आसितं शयितं भुक्तं सूतरामस्य कीर्तय॥ जीविष्याम्यहमेतेन ययातिरिव साधुषु॥१२॥ इति
सूतो नरेंद्रेण चोदितः सज्जमानया॥ उवाच वाचा राजानं सबाष्पपरिबद्धया॥१३॥ अब्रवी
न्मे महाराज धर्ममेवानुपालयन्॥ अंजलिं राघवः कृत्वा शिरसाभिप्रणम्य च॥१४॥ सूत
मद्वचनात्तस्य तातस्य विदितात्मनः॥ शिरसा वंदनीयस्य वंद्यौ पादौ महात्मनः॥१५॥ सर्व
मंतःपुरं वाच्यं सूत मद्वचनात्त्वया॥ आरोग्यमविशेषेण यथार्हमभिवादनम्॥१६॥

नात्रहेतोः अब्रवीत्· वक्ष्यमाणं वचः तदाह· हेसूतमत्प्रतिनिधित्वेनराज्ञेअंजलीकृत्वातयैवशिरसा
नत्वा· विदितात्मन· लोकेधर्मिष्ठत्वेनप्रसिद्धस्यशिरसावंदनयोग्यस्यराज्ञः पादौमद्वचनात्· रामो
भिवादयइत्युक्त्वामत्प्रतिनिधित्वेनवंद्यौ॥१५॥ ततः सर्वमंतःपुरंत्वयामद्वचनात्· रामोवः सर्वा
अविशेषेणारोग्यंपृच्छतीतिवाच्यं· यथार्हंयथायोग्यं· तासामदभिवादनंचवाच्यम्॥१६॥

उक्तमेवार्थं प्रकारांतरेणाह॰ यदीति॰ ॥ यदि यत् रामः प्रव्राजितः तत् लोभरूपेण कारणेन कैकेय्या कारितं॰ य द्वा कैकेय्यै प्रतिश्रुतवरदाननिमित्तकं वा भवतु सर्वथा दुष्कृतं कृतं॰ अननुचिंत्य कृतं॰ एतद्व्यतिरिक्तं वर ये तिसु वक्तव्यात् वरदानकाले विशिष्य नियोगाभावाच्च॰ पतित्वेन भार्याशिक्षणे सामर्थ्याधिकाराच्च ॥ २८ ॥ ननु दैवप्रेरणयेदं जातं इति न दोषो राज्ञ इत्याशंक्य निरपराधपुत्रत्यागे दोषस्त्ववश्यं राज्ञ इत्याह॰ इद मिति॰ ईश्वरस्य कृते ईश्वरप्रेरणायां सत्यां यथाकामं ईश्वरेच्छामनतिक्रम्येदं तावत् कृतं भवतु नाम त

यदि प्रव्राजितो रामो लोभकारणकारितं ॥ वरदाननिमित्तं वा सर्वथा दुष्कृतं कृतं ॥ २८ ॥ इदं ताव द्यथाकाममीश्वरस्य कृते कृतं ॥ रामस्य तु परित्यागे न हेतुमुपलक्षये ॥ २९ ॥ असमीक्ष्य समार ब्धं विरुद्धं बुद्धिलाघवात् ॥ जनयिष्यति संक्रोशं राघवस्य विवासनं ॥ ३० ॥ अहं तावन्महारा जे पितृत्वं नोपलक्षये ॥ भ्राता भर्ता च बंधुश्च पिता च मम राघवः ॥ ३१ ॥

या पितु रामस्य परित्यागे हेतु भूतं दोषं न पश्यामि॰ अतः केवलं बुद्धिलाघवात् असमीक्ष्य उचितानुचितमनवेक्ष्य विरुद्धं धर्मशास्त्र विरुद्धं आरब्धं रामविवासनं॰ संक्रोशं इह परत्र च दुःखं जनयिष्यत्येव ॥ निर्हेतुकपुत्रदारत्यागस्यो पपातकेषु गणनात् इति भावः ॥ २९ ॥ ३० ॥ गुरोरप्यवलिप्तस्य कार्याकार्यमजानतः ॥ उत्पथं प्रतिपन्नस्य परित्यागो विधीयते इति वचनार्थं हृदि निधायाह॰ अहमिति॰ भर्ता स्वामी॰ पिता चेति॰ ज्येष्ठो भ्राता पि तृसम इत्युक्तेः॰ वस्तुतस्तु केवलमायिकत्वात् लक्ष्मणादिशरीराणां तेषामेव मुख्यत्वेन दोष इति बोध्यं ॥ ३१ ॥

वक्तव्यश्चेति भरत इति शेषः राजस्थं प्रधानराज्यस्थं ॥२२॥ व्यपरोरुद्धः राज्यात् भ्रंशयेत्यर्थः तस्यैवाज्ञाप्रवर्त्तन
त्वमदनुग्रहाय तस्यैवाज्ञां प्रवर्त्तयन् कुमारराज्ये जीवस्वतो यं कुरु ॥२३॥ अब्रवीदित्यादिवाक्यं भरतं
प्रत्येव अब्रवीदित्यादिश्लोकद्वयं प्रक्षिप्तमिति कतकः ॥२४॥२५॥ अथ लक्ष्मणवाक्यमाह लक्ष्मण इति

वक्तव्यश्च महाबाहुरिक्ष्वाकुकुलनंदनः ॥ पितरं यौवराज्यस्थो राज्यस्थमनुपालय ॥२२॥ अति
क्रांतवया राजा मा स्मैनं व्यपरोरुधः ॥ कुमारराज्ये जीव त्वं तस्यैवाज्ञाप्रवर्त्तनात् ॥२३॥ अब्र
वीच्चापि मां भूयो भृशमश्रूणि वर्त्तयन् ॥ मातेव मम माता ते द्रष्टव्या पुत्रगर्द्धिनी ॥२४॥ इत्ये
वं मां महाबाहुर्ब्रुवन्निव महायशाः ॥ रामो राजीवपत्राक्षो भृशमश्रूण्यवर्त्तयत् ॥२५॥ लक्ष्म
णस्तु सुसंक्रुद्धो निश्वसन्वाक्यमब्रवीत् ॥ केनायमपराधेन राजपुत्रो विवासितः ॥२६॥
राज्ञा तु खलु कैकेय्या लघु चाश्रुत्य शासनं ॥ कृतं कार्यमकार्यं वा वयं येनाभिपीडिताः ॥२७॥

केनेत्यादि सार्द्धसप्तश्लोकास्तद्वचः ॥२६॥ येन विवासनेन वयं पीडिताः तद्विवासनं राज्ञा तु कार्यं वाकार्य
मिवाकार्यं कृतं यतः कैकेय्या लघुशासनं आश्रुत्य प्रतिज्ञाय कृतं । यद्वा तद्विवासनं कृतं कार्यं
कर्तुं योग्यं वा भवतु अकार्यमकर्तुं योग्यं वा भवतु अस्माकं तु पीडा सर्वथैवेत्यर्थः ॥२७॥

एवं रामवृत्तांतसुक्त्वा प्रत्यागतिसमयानुभूतस्वदेशपुरवृत्तांतमाह॰ ममात्विति॰ ममाश्वाः मन्निय म्याश्वाः नप्राव
र्त्तंतयथापूर्वं रथवहनोन्मुखानाभवन् इत्यर्थः जात्यश्वस्वभाववर्णनेनस्वभावोक्तिरत्रालंकारः॥१॥ तद्दुःखं
तद्वियोगदुःखं॥२॥ बहून्रामस्यगंगोत्तरणादिनादिनत्रयंयावद्यभरद्वाजाश्रमाद्वारप्रतिनिवृत्तिम
त्तृतीयदिवसाएवसुमंत्रप्रस्थानंतथापितद्दिनेऽप्यावशिष्टदिनपर्यंतंस्थित्वाबहुनियुक्तंकिम

ममत्वश्वानिवृत्तस्यनप्रावर्तंतवर्त्मनि॥ उष्णमश्रु विमुंचंतोरामेसंप्रस्थितेवनं॥१॥ उभा
भ्यांराजपुत्राभ्यामथकृत्वाहमंजलिं॥ प्रस्थितोरथमास्थायतद्दुःखमपिधारयन्॥२॥ गुहेनसा
र्धंतत्रैवस्थितोस्मिदिवसान्बहून्॥ आशयायदिमेरामः पुनःशब्दापयेदिति॥३॥ विषयेते
महाराजमहाव्यसनकर्षिताः॥ अपिवृक्षाःपरिम्लानाःसपुष्पांकुरकोरकाः॥४॥ उपतप्तोदका
नद्यः पल्वलानिसरांसिच॥ परिशुष्कपलाशानिवनान्युपवनानिच॥५॥ नचसर्पंतिसत्वा
निव्यालानप्रसरंतिच॥ रामशोकाभिभूतंतन्निकूजमिवतद्वनम्॥६॥

र्थंतत्रस्थितिस्तत्रा
ह॰ शब्दापयेदिति॰ तत्समीपचरंतुगुहमनुष्यमुखेनाकारयेदित्यर्थः॥३॥ कैकेयीनिमित्तरामविवा
सनंसर्वक्षोभकरमभूदित्याह॰ विषयेतेइति॰ तवदेशे॰ पुष्पमपिनविकसितं॰ अंकुरशाखासु
पल्लवोद्भेदः कोरकाः पुष्पमुकुलानितैःसहिताः वृक्षाः अत्रसर्वत्रहेत्वंशोचोत्प्रेक्षाबोध्या॥४॥ उपत
प्तोतकाःशुष्कोदकाःपलाशाःपर्णानि॥५॥ सत्वानिप्राणिनःनसर्पंतिनप्रसरंतीत्यादावाहारार्थमपीतिशे
षः॰ यतस्तत्प्राणिजातंरामशोकाभिभूतंततद्वनंमार्गस्थमत्यंतंपतिशब्दवत्निष्कूजमिवपक्षिशब्दरहितं॥६॥

सर्वलोकप्रियं रामं त्यक्त्वा स्थितेत्वयि प्राकृ सर्वलोकहि[illegible]ते संप्रत्तिसर्वलोकहितेऽरते वा अनेन क्रूरेणाकर्म
णा सर्वो लोकः कथमनुरज्येत॥ सर्वलोकहितेरतमिति पाठे रामविशेषणं। सर्वलोकप्रियत्वे हेतु। तथेति बोध्यं
३२ कथं राजा भविष्यति पितेति शेषः॥ इत्येवं राजानं ब्रुवती निलक्ष्मणो वोचदित्पर्थः॥ ३३॥ विस्मितावि स्मृतस

सर्वलोकप्रियं त्यक्त्वा सर्वलोकहितेरतं॥ सर्वलोको नुरज्येत कथं चानेन कर्मणा॥ ३२॥ सर्वप्रजा
भिरामं हि रामं प्रव्राज्य धार्मिकं॥ सर्वलोकविरोधेन कथं राजा भविष्यति॥ ३३॥ जानकी तु महा
राज निश्वसंतीत पस्विनी॥ भूतोपहतचित्तेव विष्ठिता विस्मृता स्थिता॥ ३४॥ अदृष्टपूर्वव्यस
ना राजपुत्री यशस्विनी॥ तेन दुःखेन रुदती नैव मां किंचिदब्रवीत्॥ ३५॥ उद्वीक्षमाणा भर्ता
रं मुखेन परिशुष्यता॥ मुमोच सहसा बाष्पं प्रयांतमुपवीक्ष्य सा॥ ३६॥ तथैव रामोऽश्रुमुखः।
कृतांजलिः स्थितोऽब्रवील्लक्ष्मण बाहुपालितः॥ तथैव सीता रुदती तपस्विनी निरीक्षते राज
रथं तथैव मां॥ ३७॥ इत्यार्षे श्रीरामायणे अयोध्याकांडे अष्टपंचाशः सर्गः॥ ५८॥

र्वप्रयोजनेव स्थिता। आश्चर्यं मन्यमानेव विष्ठिता स्थिता॥ ३४॥ ३५॥ ३६॥ लक्ष्मणबाहुपालितः॥ ल
क्ष्मणेन सेव्यमानः॥ अब्रवीत् उक्तमिति शेषः। निरीक्षते राज्ञः न वरथं मां च॥ ३७॥ इति श्रीरामाभि
रामे श्रीरामीये रामायणतिलके अयोध्याकांडे अष्टपंचशः सर्गः॥ ५८॥ ॥

आर्तस्वरपरिग्लानविनिश्वसितनिस्वना॰ दीर्घशब्दवन्निश्वसंयुक्तेतियावत्॥१५॥ पुत्रहीनापुत्रवियुक्ता कौशल्येव अनेनसर्वेषांरामेपुत्रवत्प्रेमध्वनितं॥१६॥१७॥ राजासर्वथात्वयामहदकार्यंकृतमितिसुमंत्राभिप्रायंतदीयात्युक्तिवचनैर्निर्णीयांशीकारेणोत्तरमाह॰॥ कैकेय्येति॰ पापाभिजनभावया पापकुलजपापापदेशजपापायाभिप्रायया चकुलेप्यभिजनोजन्मभूमावित्यमरः विनियुक्तेन

अप्रहृष्टमनुष्याचदीननागतुरंगमा॥ आर्तस्वरपरिम्लानविनिश्वसितनिस्वना॥१५॥ निरानंदामहाराजरामप्रव्राजनातुरा॥ कौसल्यापुत्रहीनेवअयोध्याप्रतिभातिमे॥१६॥ सूतस्यवचनंश्रुत्वावाचापरमदीनया॥ बाष्पोपहतयासूतमिदंवचनमब्रवीत्॥१७॥ कैकेय्याविनियुक्तेनपापाभिजनभावया॥ मयानमंत्रकुशलैर्वृद्धैःसह समर्थितं॥१८॥ नसुहृद्भिर्नचामात्यैर्मंत्रयित्वासनैगमैः॥ मयायमर्थः संमोहात्स्त्रीहेतोःसहसाकृतः॥१९॥ भवितव्यतयानूनमिदंवाव्यसनंमहत्॥ कुलस्यास्यविनाशायप्राप्तंसूतयदृच्छया॥२०॥ सूतयद्यस्तितेकिंचिन्मयापिसुकृतंकृतं॥ त्वंप्रापयाशुमांरामंप्राणाःसंत्वरयंतिमां॥२१॥

रामप्रव्राजनेइतिशेषः नसमर्थितंनविचारितं॥१८॥ नजोनेकथाप्रयोगः शोकेनचित्तवैक्लव्यात् सहसासारित्यविचारेणैव॥१९॥ भवितव्यतयाअवश्यप्रापकदुरदृष्टवशात्॰ वाइतिवेशब्दसमानार्थः॰ यदृच्छयादैवेच्छया॥२०॥ सुकृतंप्रियं॰ संत्वरयंतिनिष्क्रामितुमिच्छंतीतियावत्॥२१॥

लीनं संकुचितं पुष्करपत्रं नलिनीदलं यासु ताः संतप्तपद्माः शुष्कपद्माः पद्मिन्यः सरांसि विहंगमा अत्र जल
पक्षिणः ॥७॥ स्थलजानि माल्यानि पुष्पाणि यथापुरं यथापूर्वं ॥८॥ उद्यानानि पुष्पवाटिकाः आरामान् कृत्रिम
वनानि ॥९॥ अनेन मनुष्याणां सर्वशोकोत्पन्नदुःखवत्त्वं केमुनिकन्यायेनैव प्रतिपादितं बोध्यं तदेवाह प्रवि

लीनपुष्करपत्राश्च नद्यश्च कलुषोदकाः ॥ संतप्तपद्माः पद्मिन्यो लीनमीनविहंगमाः ॥७॥ जलजा
नि च पुष्पाणि माल्यानि स्थलजानि च ॥ नातिभान्त्यल्पगंधीनि फलानि च यथापुरं ॥८॥ अत्रोद्याना
नि शून्यानि प्रलीनविहगानि च ॥ न चाभिरामानारामान्पश्यामि मनुजर्षभ ॥९॥ प्रविशंतमयोध्यायां
न कश्चिदभिनंदति ॥ नरा राममपश्यंतो निश्वसंति मुहुर्मुहुः ॥१०॥ देव राजरथं दृष्ट्वा विना रा
ममिहागतं ॥ दुरादश्रुमुखः सर्वो राजमार्गगतो जनः ॥११॥ हर्म्यैर्विमानैः प्रासादैरवेक्ष्य रथ
मागतं ॥ हाहाकारकृता नार्यो रामादर्शनकर्षिताः ॥१२॥ आयतैर्विमलैर्नेत्रैरश्रुवेगपरिप्लु
तैः ॥ अन्योन्यमभिवीक्षंतेव्यक्तमार्ततरा स्त्रियः ॥१३॥ नामित्राणां न मित्राणामुदासीनजनस्य
च ॥ अहमार्ततया कंचिद्विशेषं नोपलक्षये ॥१४॥

शंतमिति ॥१०॥ देवेति संबुद्धिः राजरथं राज्ञस्तव
रथं अश्रुमुखः अभूदिति शेषः ॥११॥१२॥ अव्यक्तमिति छेदः रामप्रवासजनितपीडयार्त्ताः परस्परं स
म्यक्नेक्षंते इत्यर्थः ॥१३॥ अन्योन्यं शत्रूणां तथा मित्राणां उदासीनजनस्य चार्तमार्तमार्तत्वगुणसाम्येन विशे
षं नोपलक्षये इत्यन्वयः सद्यपि रामस्य सत्तो ऽ सि नासंभवः कैकेय्या कुत्सयोस्तत्तस्पदे वचशात्सं भवेपित

शो चित्तयाणां॰ प्रकीर्णकेशा एव शैवलं यत्र॰ कैकेय्येव वडवामुखं यत्र ॥ २९ ॥ अस्य वेगप्रभवः प्रवृत्तिहेतुः अ
स्य वेगोत्पादक इत्यर्थः नृशंसायाः कैकेय्याः वराएव वेलामर्यादा॰ यस्य॰ यतः रामप्रव्राजनसमुद्रात्का
लकूटमिवजातेनिकृन्तकः अन्येतु रामप्रव्राजनमेव आतत्यं विस्तारोयस्य॰ सरामप्रव्राजनायतः

बाहुविक्षेपमीनोसौ विक्रंदितमहास्वनः ॥ प्रकीर्णकेशशैवालः कैकेयीवडवामुखः ॥ २९ ॥ ममा
श्रुवेगप्रभवः कुब्जावाक्यमहाग्रहः ॥ वरवेलोनृशंसायारामप्रव्राजनायतः ॥ ३० ॥ यस्मिन्बत
निमग्नोहं कौसल्येराघवंविना ॥ दुस्तरोजीवतादेवि मयायंशोकसागरः ॥ ३१ ॥ अशोभनंयो
हामिहाद्यराघवं दिदृक्षमाणोनलभेसलक्ष्मणं ॥ इतीवराजाविलपन्महायशाः पपाततूर्णं
शयनेसुमूर्छितः ॥ ३२ ॥ इतिविलपतिपार्थिवेप्रणष्टेकरुणतरं द्विगुणंचरामहेतोः ॥ वचनमनु
निशम्यतस्यदेवीभयमगमत्पुनरेवराममाता ॥ ३३ ॥ इत्यार्षेश्रीरा॰ अयो॰ एकोनषष्ठितमः स
र्गः ॥ ५९ ॥ ततोभूतोपसृष्टेववेपमानापुनःपुनः ॥ धरण्यांगतसत्वेवकौसल्यासूतमब्रवीत् ॥ १ ॥

इत्यर्थमाहुः ॥ ३० ॥ ३१ ॥ दिदृक्षमाणोयद्राघवंदृष्टुंनलभे॰ तदृशोभनंममममद्दुत्पापं॰ पापजन्यंतददर्श
नमितियावत् ॥ ३२ ॥ रामहेतोरिति॰ विलपतिपार्थिवेप्रणष्टेमूर्छितेसति॰ तस्यकरुणतरंवचनं॰
निशम्य॰ देवि द्विगुणंभयमुपागमत्॰ भर्तृवियोगदुःखस्यापरस्यसंभावनया ॥ ३३ ॥ इतिश्रीएकोनष
ष्ठितमःसर्गः ॥ ५९ ॥ ततइति॰ भूतोपसृष्टेवभूताविष्टेवगतसत्वेवगतासुरिवधरण्यांपतितेतिशेषः ॥ १

यदियदिवा अथवेतियावत् मदाज्ञयाभवान्गत्वाराघवं निवर्तयतु ननुभरतायत्वयाराज्यस्पदत्तत्वात्वद
ज्ञयामयाकथंगंतव्यंतत्राह अद्यापि ममैवाज्ञयावङ्कुरता गमनमितिभावः निवृत्तो हेतुर्नेत्यादि॥२२॥ पुनर
पिरामनिवर्तनस्याशक्यत्वात्स्वनयनमेवाह अथवापीति॥२३॥ वृत्तदंष्ट्रः कुंदकुड्मलाकारदंष्ट्रः यदि
जीवामीतितत्समीपगमनपर्यंतमपिजीवनेसंदेह इतिभावः॥२४॥ अतोन्वितपतः शब्दार्थमाह इमामिति ए

यद्यद्यापिममैवाज्ञानिवर्तयतुराघवं॥ नशक्ष्यामिविनारामंमुहूर्तमपिजीवितुं॥२२॥ अथवापिमहा
बाहुर्गतोदूरंभविष्यति॥ मामेवरथमारोप्यशीघ्रंरामायदर्शय॥२३॥ वृत्तदंष्ट्रोमहेष्वासः क्वासौल
क्ष्मणपूर्वजः॥ यदिजीवामिसाध्वेनंपश्येयंसीतयासह॥२४॥ अतोनुकिंदुःखतरंयोहमिक्ष्वाकु
नंदनं॥ इमामवस्थामापन्नोनेहपश्यामिराघवं॥२५॥ हारामरामानुजहाहावैदेहितपस्विनि॥
नमांजानीतदुःखेनम्रियमाणमनाथवत्॥२६॥ सतेनराजादुःखेनभृशमर्पितचेतनः॥ अवगाढः
सुदुष्पारंशोकसागरमब्रवीत्॥२७॥ रामशोकमहावेगः सीताविरहपारगः॥ श्वसितोर्मिमहावर्तोबा
ष्पवेगजलाविलः॥२८॥

एवमत्यंतसन्निहितमरणकालेउत्तमलोकदस्वस्वरणाभ्याससंपादनायभगव
तात्मवियोगः पितुःसंपादितइतितत्वं॥२५॥२६॥ अर्पितचेतनः गतचेतनः सुदुष्पारंशोकसागरमवगाढः
प्रविश्यं अब्रवीत् शोकंसागरत्वेवर्णयदित्यर्थः॥२७॥ तदाह रामेत्यादि रामशोकरूपोमहानावेगोवैपु
ल्यंयस्य सीताविरहरूपपारगः तत्पारसंबंधः श्वसितरूपऊर्मियुक्तो महावर्तोयस्यसः वाष्पवेगरूपन

नदीनां गतिं ग्रामनगरवृत्तान्त दृष्ट्वा रामं वा लक्ष्मणं वा पप्रच्छ ति पृष्ट्वा च जानाति। अयोध्यातः क्रोशमात्रे विद्य
मानं विहारं संश्रिता यथा रमते स्म तथैव वनेपि अरमत। स्पष्टः॥१२॥१३॥ इदमेव सीतायाः संबंधि इ
दमेव प्रस्तुतकृतांतजातमेव स्मरामि। कैकेयीमुद्दिश्य प्रवृत्तं सहसा हठेन सीतया तस्याः परमदुः
खकारिणीत्वात्। मां प्रति यत्तद्विषयं जल्पवाक्यमुपजल्पितमुक्तं। तदिदानीं मां न प्रतिभात्येव। इत्ये

परिपृच्छति वैदेही ग्रामांश्च नगराणि च॥ गतिं दृष्ट्वा नदीनां च पादपान्विविधानपि॥१२॥ रामं
वा लक्ष्मणं वापि पृष्ट्वा जानाति जानकी॥ अयोध्याक्रोशमात्रे तु विहारमिव संश्रिता॥१३॥
इदमेव स्मराम्यस्याः सहसैवोपजल्पितं॥ कैकेयीसंश्रितं जल्पं नेदानीं प्रतिभाति मां॥१४॥
ध्वंसयित्वा तु तद्वाक्यं प्रमादात्पर्युपस्थितं॥ ल्हादनं वचनं सूतो देव्या मधुरमब्रवीत्॥१५॥
अध्वना वातवेगेन संभ्रमेणातपेन च॥ न विगच्छति वैदेह्याश्चंद्रांशुसदृशप्रभा॥१६॥ स
दृशं शतपत्रस्य पूर्णचंद्रोपमप्रभं॥ वदनं तद्वदान्याया वैदेह्या न विकंपते॥१७॥

वं रूपेण प्रमादात् पर्युपस्थितं। मुखान्निर्गतं कैकेयीविषयं सीतावाक्यं ध्वंसयित्वा व्यवहारांत
रेणानुक्तं तुल्यप्रायमिव कृत्वा। देव्याः कौसल्यायाः ल्हादनं मधुरं वचनं सूतोब्रवीत् इत्याह क
विः॥१४॥१५॥१६॥ वदान्यायाः दात्र्याः वल्गुवाचश्च वदान्यो वल्गुवागपि। न विकंपते म्लानतां न याति
॥१७॥

२ अथयदि॥३।४ संभ्रममावेगं॥५॥ रामस्यपादौप रिचरन् परलोकमाराधयतिसंपादयति॥६॥ अभीतेतिच्छेदः
विस्रंभःप्रणयः॥७॥ कृतंवनवासकृतंदैन्यमित्यर्थः॥८॥९॥ बालवेति॰ दुःखापरिज्ञानेनोपमातस्यादेहाद्यभिमा

नयमांयत्रकाकुत्स्थः सीतायत्रचलक्ष्मणः॥ तान्विनाक्षणमप्यत्रजीवितुंनोत्सहेत्यहं॥२॥ निवर्तयर
थंशीघ्रंदंडकान्नयमामपि॥ अथतान्नानुगच्छामिगमिष्यामियमक्षयं॥३॥ वाष्पवेगोपहतयासवाचा
सज्जमानयाइदमाश्वासयन्देवीं सूतः प्रांजलिरब्रवीत्॥४॥ त्यजशोकंचमोहंचसंभ्रमंदुःख
जंतथा व्यवधूयचसंतापंवनेवत्स्यतिराघवः॥५॥ लक्ष्मणश्चापिरामस्यपादौपरिचरन्वने॥ आरा
धयतिधर्मज्ञः परलोकंजितेंद्रियः॥६॥ विजनेपिवनेसीतावासंप्राप्यगृहेष्विव॥ विस्रंभंलभतेऽ
भीतारामेविन्यस्तमानसा॥७॥ नास्यादैन्यकृतंकिंचित्सुसूक्ष्ममपिलक्ष्मते॥ उचितेवप्रवासानां
वैदेहीप्रतिभातिमे॥८॥ नगरोपवनंगत्वायथास्मरमतेपुरा॥ तथैवरमतेसीतानिर्जनेषुचवने
ष्वपि॥९॥ बालेवरमतेसीताबालचंद्रनिभानना॥ रामारामेत्यदीनात्माविजनेपिवनेसती॥१०॥ त
द्गतंहृदयंयस्यास्तदधीनंचजीवितं॥ अयोध्यापिभवेदस्यारामहीनातथावनं॥११॥

नाभावान्नाधिजंदुःखमितिभावः॥ अबालचंद्रेत्यादिच्छेदः रामारामेरामरूपेआरामेइत्यर्थः भिन्नेपदे
वा॥१०॥ रामहीनाऽयोध्यायथावनं॰ तथाभवेदित्यन्वयः॥११॥ ॥ राम ॥

रामा·त्रि
१८१

महर्षिभिर्यातेप्राप्ते॥२२॥ तथापीति·स्तुतेननिवार्यमाणा·स्तुतोक्तंगृहीतवत्यपिन विरराम·दुःखप्राबल्यादिति शेषः॥२३॥ इतिश्रीरामाभिरामेश्रीरामीयेरामायणतिलके त्रयो॰षष्टितमःसर्गः॥६०॥ परमपतिव्रतापिकौ शल्यादुःखातिशयात्सर्वंजानत्यपि·त्रेताश्रयव्यवहारवल्लोकाश्रयेणराजानमुपालभते·वनमिति·

तथापिसूतेन सुयुक्तवादिनानिवार्यमाणासुतशोककर्षिता॥ नचैवदेवीविररामकूजि ताप्रियेतिपुत्रेतिचराघवेतिच॥२३॥ इत्यार्षेश्रीरामायणेत्रयो॰षष्टितमःसर्गः॥६०॥ वनंग तेधर्मरतेरामेरमयतांवरे॥ कौसल्यारुदतीवार्ताभर्तारमिदमब्रवीत्॥१॥ यद्यपित्रिषुलोके षुप्रथितंतेमहद्यशः॥ सानुक्रोशोवदान्यश्चप्रियवादीचराघवः॥२॥ कथंनरवरश्रेष्ठपु त्रौतौसहसीतया॥ दुःखितौसुखसंवृद्धौकथंदुःखंसहिष्यतः॥३॥ सानूनंतरुणीश्यामा सुकुमारीसुखोचिता॥ कथमुष्णंचशीतंचमैथिलीविसहिष्यते॥४॥ भुक्त्वाशनंविशाला क्षीसूपदंशान्वितंशुभं॥ वन्यंनैवारमाहारंकथंसीतोपभोक्ष्यते॥५॥ गीतवादित्रनिर्घोषं श्रुत्वाशुभसमन्विता॥ कथंक्रव्यादसिंहानांशब्दंश्रोष्यत्यशोभनम्॥६॥

आर्ताखिन्ना·रुदतीति पाठेसुतरामार्ता·रुदतीवेतिपाठे इवएवार्थे·यद्वाउक्तार्थध्वननायेवशब्दः॥१॥ अनुक्रोशादिविशिष्टोराघव इतितेमहद्यशः प्रथितमितियोजना॥२॥ अथापिहेनरश्रेष्ठ·सीतयासहतौपुत्रौकथंत्यक्तवानितिशे षः·अथतानुशोचतिदुःखीताविल्यादि·[illegible] दुःखंप्राप्ताविल्यर्थः॥३॥ तरुणी·अतिक्रांतकौमारा·श्यामाप्रा

राम
१८१

287

अलक्तरसवर्जितावपि तद्रसरक्तकान्ती स्वभावरक्ततया· पद्मकोशसमप्रभौ· नतु मार्गगतिप्रयुक्तकाठिन्यभा
जौ ॥१५॥ नूपुरेणोत्कृष्टा तिरस्कृता ॥ हंसादिलीलायया सेव खेलं विलासयुतं अर्शआद्यजंतं· तद्रागेण
भर्तृप्रीतिप्रयोजकभूषणानुरागेण न्यस्तानि अत्यक्तानि भूषणानि यया ॥१९॥ नाहारयति न करोति न सं
प्राप्नोतीति वा ॥२०॥ अतस्ते रामादयो न शोच्याः नैतत्वात्माप्यत एव न शोच्यः नराजापि तेषां सुखश्रवणेन त

अलक्तरसरक्ताभावलक्तरसवर्जितौ ॥ अद्यापि चरणौ तस्याः पद्मकोशसमप्रभौ ॥१५॥ नूपुरो
त्कृष्टलीलेव खेलं गच्छति भामिनी ॥ इदानीमपि वैदेही तद्रागान्यस्तभूषणा ॥१९॥ गजं वावी
क्ष्य सिंहं वा व्याघ्रं वा वनमाश्रिता ॥ नाहारयति संत्रासं बाहू रामस्य संश्रिता ॥२०॥ न शोच्यास्ते
न चात्मा ते शोच्यो नापि जनाधिपः ॥ इदं हि चरितं लोके प्रतिष्ठास्यति शाश्वतम् ॥२१॥ विधूय
शोकं परिहृष्टमानसा महर्षियाते पथि सुव्यवस्थिताः ॥ वनेरता वन्यफलाशनाः पितुः शुभां प्र
तिज्ञां प्रतिपालयन्ति ते ॥२२॥

स्यापि जीवनसंभवात्· ॥ इतोपि न शोच्याः इत्याह· इदं हीत्यादि· ॥ प्राप्त
मपि राज्यं· महाबलोपि परित्यज्य पितृवचनमपालयत्· ॥ इत्येवमादि रामचरितं स्वार्थमुद्दिश्य भर्तार
मपि परित्यज्यातिघोरं कृतवती कैकेयीत्यादि· इदं रामचरितं शाश्वतं प्रतिष्ठास्यतीत्यनेन तन्नामवदे
वास्य सुस्थिरत्वं वदती तस्येश्वरत्वं ध्वनितं· न त्वन्यचरित्रं शाश्वतं प्रतिष्ठां लभते ॥२१॥

अथापि कदाचिद्भरतो जन्यात्तथापि रामस्तन्नांगीकरिष्यतीति सदृष्टांतमाह· भोजयंतीत्यादिना· केचिच्छ्रा
द्धकर्तारो वयोगुणैरधिकान् विप्रान् श्राद्धे निमंत्र्य· वयोगुणहीनानपि स्वान्बांधवान् श्राद्धे भोजयंति·
ततः कृतकार्याः संतो निमंत्रितान् द्विजर्षभान् पश्चादिष्टपंक्तौ भोजयितुं समीक्षंते विचारयंति ।१२।
तत्र निमंत्रितेषु ये गुणवंतः आज्ञापेक्षितगुणवंतस्ते सुरोपमाः पश्चात्पंक्तौ सुधामपि सुधासदृशस्वा
द्वन्नमपि नानुमन्यंते ।१३। ननु कुतो नानुमन्यंते· ब्राह्मणशेषभोजने शूद्रशेषभोजनवत्· दोषाभावा

भोजयंति किल श्राद्धे केचित्स्वानेव बांधवान् ॥ ततः पश्चात्समीक्षंते कृतकार्या द्विजोत्त
मान् ॥१२॥ तत्र ये गुणवंतश्च विद्वांसश्च द्विजातयः ॥ न पश्चात्ते भिमन्यंते सुधामपि सुरोपमाः ॥१३॥
ब्राह्मणेष्वपि वृत्तेषु भुक्तशेषं द्विजोत्तमाः ॥ नाभ्युपेतुमलं प्राज्ञाः शृंगच्छेदमिवर्षभाः ॥१४॥ एवं
कनीयसा भ्रात्रा भुक्तं राज्यं विशांपते ॥ भ्राता ज्येष्ठो वरिष्ठश्च किमर्थं नावमन्यते ॥१५॥

दत्त आह· ब्राह्मणेष्वपीति· ब्राह्मणेषु वृत्तेषु भुक्तवत्सु तद्भुक्तशेषमपि· यतो द्विजोत्तमाः प्राज्ञाश्चात
स्तद्भोजनमभ्युपेतुमंगीकर्तुं नालं· अवमाननात्। ऋषभः स्वशृंगच्छेदमिव· शृंगस्थानीयो हि सतां
मानः ॥१४॥ दार्ष्टांतिके योजयति। एवमिति· कनीयोभुक्तत्वात्· स्वयं ज्येष्ठो वयसा गुणैश्च वरि
ष्ठः ॥ सन् तेन त्यक्तमपि राज्यं किमर्थं नावमंस्यते ॥ सर्वथा तिरस्करिष्यत्येवेत्यर्थः ॥ मद्दर्शनानुरोधे
नागतो मज्जीवनपर्यंतमेव स्थास्यति· तर्हि· न पुना राज्यं करिष्यतीत्यर्थः ॥१५॥

महेंद्रध्वजसंकाशः तद्वत्सर्वलोकस्योत्सवदः ॥७॥ पद्मवर्णः पद्मदलवर्णः पद्मनिश्वासं पद्मगंधिनिश्वास
८ ॥ यत्र यतस्तं अपश्यंपत्या इदंसहस्रधानफलतिनविशीर्यते मित्यन्वेता वज्रसारवज्रवत्कठिनं
नूनमित्यन्वेता ॥९॥ त्वयाव्यपोह्य वृद्धैरविचार्य यत्करणांशोचनीयं कर्मानुचितवरदानरूपंत्वया
कृतं तेनहेतुनाममबांधवाः केके यथानिरस्ताः ॥ सुखार्हा अपिकृपणाः संतोवने धावंति यद्वाव्य

महेंद्रध्वजसंकाशः क्वनुशेतेमहाभुजः ॥ भुजंपरिघसंकाशमुपधायमहाबलः ॥७॥ प
द्मवर्णः सुकेशांतंपद्मनिश्वासमुत्तमं ॥ कदाद्रक्ष्यामिरामस्यवदनंपुष्करेक्षणं ॥८॥ वज्र
सारमयंनूनंहृदयंमेनसंशयः ॥ अपश्यंत्यानतंयद्वै फलतीदंसहस्रधा ॥९॥ यत्त्वयाक
रुणंकर्मव्यपोह्यममबांधवाः ॥ निरस्ताःपरिधावंतिसुखार्हाः कृपणावने ॥१०॥ यदि
पंचदशेवर्षेराघवःपुनरेष्यति ॥ जह्याद्राज्यंचकोशंचभरतोनोपलक्ष्यते ॥११॥

पोह्य अनादृत्य राज्यात्प्रभ्रंशयित्वा त्वया निरस्तावनेपरिधावंतीति यत्तदकरुणं क्रूरं कर्मत्वयाकृतमि
त्यर्थः ॥१०॥ ननुचतुर्दशवर्षानंतरंतवपुत्रस्यैवराज्यंभविष्यतितत्राह यदीति ॥ तावत्पर्यंतंवनेजी
वनमेवनसंभाव्यते तथापियदिजीवन्पुनरेष्यति तथापिभरतोराज्यंजह्यादितिनोपलक्ष्यते न

रामेऽशक्तिशंकामपि नेत्याह॥ नत्विति॥ कांचनैः कांचनभूषितपुंखैः युगांते युगांतकाले॥ ईश्वर इव भूतानि समुद्रांश्च नि
र्दहेत् नाशयेच्छोषयेच्च॥२१॥ पित्रा त्वया स्वयमेव स्वपुत्रो हतः भ्रष्टराज्यः कृतः जलजेन मत्स्येन स यथात्मजा
नेव भक्षयति तद्वत् इत्यर्थः॥२२॥ एवं चाहमेव हतेत्याह श्लोकत्रयेण॥ द्विजातीत्यादि॥ सनातनैर्ऋषिभिः शा
स्त्रे वेदे दृष्टः स्त्रैवर्णिके द्विजातिभिश्चरितो धर्मः यदि ते स सत्यः स्यात्तर्हि पुत्रो न विवासितः स्यात् इति शे

नन्वसौ कांचनैर्बाणैर्महावीर्यो महाभुजः॥ युगांत इव भूतानि सागरानपि निर्दहेत्॥२१॥ स तादृशः
सिंहवत्तो वृषभाक्षो नरर्षभः॥ स्वयमेव हतः पित्रा जलजेनात्मजो यथा॥२२॥ द्विजातिचरितो धर्मः शा
स्त्रे दृष्टः सनातनैः॥ यदि ते धर्मनिरते त्वया पुत्रे विवासिते॥२३॥ गतिरेका पतिर्नार्या द्वितीया गति
रात्मजः॥ तृतीया ज्ञातयो राजन् चतुर्थी नैव विद्यते॥२४॥ तत्र त्वं मम नैवासि रामश्च वनमाहितः॥
न वनं गंतुमिच्छामि सर्वथा हा हता त्वया॥२५॥ हतं त्वया राष्ट्रमिदं सराज्यं हताः स्म सर्वाः सह मंत्रि
भिश्च॥ हता सपुत्रास्मि हताश्च पौराः सुतश्च भार्या च तव प्रहृष्टौ॥२६॥ ॥ ॥

षः एवं धर्ममुपेक्ष्य धर्मनिरते पुत्रे त्वया विवासिते सति॥२३॥ शास्त्रेणोच्यमानस्त्रियास्तिस्रो गतयः
तत्र तासु प्रथमगतिभूतस्त्वं मम नास्येव सपत्नीवशत्वात्॥ नास्तीति पाठे त्वार्षत्वं बोध्यं॥ द्वितीयग
तिभूतो रामश्च वनमाहितः वनं प्रतिप्रहितः त्वया॥ न च तत्प्राप्तये वनं गंतुमिच्छामि॥ सपतिकात्वात्
तृतीया ज्ञातयस्त्वसंनिहिताः तस्मात्सर्वथा हता त्वया॥२४॥२५॥ सुतश्च भार्या च भरतकैकेय्यौ प्रहृष्टौ॥२६॥

परेणाहृतं क्रोष्ट्रादिखादितशेषं परलीढं परास्वादितं न मन्यंते न मंस्यन्ते ॥१६॥ एतानि हविरादीनि एकत्राध्वरे वि
नियोगाद्यातयामानि पुनरध्वरे अध्वरांतरे विनियुक्तानि न कुर्वंति जीर्णं च परिभुक्तं च यातयाममिदं द्वयमि
त्यमरः यद्यपि मंत्राः कृष्णाजिना दर्भा इति स्मृत्या कुशानां यातयामत्वदोषो नेत्युक्तं तथापि तज्जीर्णत्वरूपयात
यामत्वदोषाभावपरं न तु विनियोगपरं ब्रह्मयज्ञेषु ये दर्भा विनियुक्ता न ते न्यत इत्यनेन विनियुक्तनियोगनि
षेधस्य न्यायेन सर्वत्र लाभादित्याहुः ॥१७॥ तथैवान्येनात्मुपभुक्तपूर्वमिदं राज्यं रामो भिमंतुमंगीकर्तुं नालं ॥ न

नपरेणाहृतं भक्ष्यं व्याघ्रः खादितुमिच्छति ॥ एवमेव नरव्याघ्रः परलीढं न मन्यते ॥१६॥ हविराज्यं पु
रोडाशाः कुशा यूपाश्च खादिराः ॥ नैतानि यातयामानि कुर्वंति पुनरध्वरे ॥१७॥ तथा ह्यात्तमिदं राज्यं हृ
तसारां सुरामिव ॥ नाभिमंतुमलं रामो नष्टसोममिवाध्वरं ॥१८॥ नैवं विधमसत्कारं राघवो मर्षयिष्यति
बलवानिव शार्दूलो बालधेरभिमर्षणं ॥१९॥ नैनं सपसहिता लोका भयं कुर्युर्महामधे ॥ अधर्मं त्विह धर्मात्मा
लोकं धर्मेण योजयेत् ॥२०॥

नष्टसोमं भुक्तसोमं अध्वरं तत्स्थं सोमरूपं हविः ॥१८॥ बालधेः पुच्छस्य ॥१९॥ शार्दूलव
द्बलवत्त्वमेव दर्शयति नैतस्येति ॥ सहिताः सुरासुरैः सहिताः लोकाः प्रतियोद्धारः किमर्थं तर्हि मामाक्रम्य राज्यं न
कृतवान् तत्राह अधर्मं त्विति अधर्मं तु मत्वा न तथाकृतवानिति भावः नन्वेवं तस्य धर्मनिरतता कथमत आह इ
हेति यो धर्मात्मा इह मनुष्यलोके लोकं धर्मेण योजयेत् एवं धर्मप्रवर्तकस्य तस्य धर्मनिरतानुक्तिसिद्धे
वेति भावः यद्वा तु रप्यर्थे [illegible] धर्मेण योजयेत् स कथं स्वयमधर्मं कुर्यादित्यर्थः ॥२०

परेष्वपि शत्रुष्वपि ॥७॥ विमृशमानानां जानतीनां ॥८॥ दृष्टौ लोके परावरावुत्कर्षापकर्षौ यया सा॰ अपकर्षा अपि भर्तारमेवं न वदंतीति भावः ॥९॥ प्रणाली प्रासादादौ जलनिर्गममार्गः नवोदकं वर्षजलं ॥१०॥ स्वानुनयार्थं राज्ञा कृतं राज्ञोंजलिं पाणिभ्यां गृहीत्वा॰ पद्ममिव मूर्ध्नि बध्वा रुदती त्रस्ता॰ अहमपि कैकेयीवत्पतिशोककारि ॥ वचनादिकं प्राप्तवतीति भीता॰ संभ्रमात्त्वरा शिष्टत्वादरात्त्वचश्च

प्रसादयेत्त्वां कौसल्ये रचितोयं मयांजलिः ॥ वत्सला चानृशंसा च त्वं हि नित्यं परेष्वपि ॥७॥ भर्ता तु खलु नारीणां गुणवान्निर्गुणोपि वा ॥ धर्मं विमृशमानानां प्रत्यक्षं देवि दैवतं ॥८॥ सा त्वं धर्मपरा नित्यं दृष्टलोकपरावरा ॥ नार्हसे विप्रियं वक्तुं दुःखितापि सुदुःखितं ॥९॥ तद्वाक्यं करुणं राज्ञः श्रुत्वा दीनस्य भाषितं ॥ कौसल्या व्यसृजद्बाष्पं प्रणालीव नवोदकं ॥१०॥ सा मूर्ध्नि बध्वा रुदती राज्ञः पद्ममिवांजलिं ॥ संभ्रमादब्रवीत्त्रस्ता त्वरमाणाक्षरं वचः ॥११॥ प्रसीद शिरसा याचे भूमौ निपतितास्मि ते ॥ याचितास्मि हता देव हंतव्याहं न हि त्वया ॥१२॥ नैषा हि सा स्त्री भवति श्लाघनीयेन धीमता ॥ उभयोर्लोकयोर्लोके पत्या या संप्रसाद्यते ॥१३॥

ह ॥११॥ भूमौ निपतितास्मि॰ साष्टांगं प्रणमामि॰ हे देव त्वया याचिताहं॰ अनुनीताहं हतास्मि॰ ईश्वरेप्सितव्यं वै परीत्यस्यान्याय्यत्वात्॰ अतस्त्वयाहं तव्या॰ न किंतु उदासीवत्प्रहर्तव्येत्यर्थः ॥१२॥ एषा हि लोके सा स्त्री कुलस्त्री न भवति॰ या उभयोर्लोकयोः श्लाघनीयेन पत्या संप्रसाद्यते ॥१३॥

१९०

दारुणशब्दसहितांदारुणशब्दयुक्तां स्वदुष्कृतेवक्ष्यमाणां॥२७॥इतिश्रीरामाभिरामेश्रीरा० रा० ति० अयो०ए
षकषष्टितमःसर्गः॥६१॥एवंकौसल्याक्रूरवचोभीतस्यराज्ञोजलिपर्यंतंदैन्यंदृष्ट्वाराजानमनुयति एवं
त्विति चिंतयामासअनयोच्यमानंसर्वंसत्यंकिमिहकर्तव्यमितिविचारयामास॥१॥मोहव्याकुलितें

इमांगिरंदारुणशब्दसंहितांनिशम्परामेतिमुमोहदुःखितः॥ततःसशोकंप्रविवेशपार्थिवः
स्वदुष्कृतंचापिपुनस्तथास्मरत्॥२७॥इत्यार्षेश्रीरा० अयो० एकषष्टितमःसर्गः॥६१॥एवंतुक्रु
द्धयाराजाराममात्रासशोकया॥श्रावितःपरुषंवाक्यंचिंतयामासदुःखितः॥१॥चिंतयित्वासच
नृपोमोहव्याकुलितेंद्रियः॥अथदीर्घेनकालेनसंज्ञामापपरंतपः॥२॥ससंज्ञामुपलभ्यैवदीर्घ
मुष्णंचनिश्वसन्॥कौसल्यांपार्श्वतोदृष्ट्वाततश्चिंतामुपागमत्॥३॥तस्यचिंतयमानस्यप्रत्यभा
त्कर्मदुष्कृतं॥यदनेनकृतंपूर्वमज्ञानाच्छब्दवेधिना॥४॥अमनास्तेनशोकेनरामशोकेनच
प्रभुः॥द्वाभ्यामपिमहाराजःशोकाभ्यामभितप्यते॥५॥दह्यमानस्तुशोकाभ्यांकौशल्यामाहदुः
खितः॥वेपमानोंजलिंकृत्वाप्रसादार्थमवाङ्मुखः॥६॥

इंद्रियोजातइतिशेषः॥२॥चिंतामुपागमत्
पुत्रविश्लेषजदुःखसाधनंकर्ममेतिचिंतामाप॥३॥प्रत्यभात्प्रतिभातंदुष्कृतंकर्ममुनिकुमारव
धरूपं शब्दमेवलक्ष्यदेशस्थंप्राप्यविध्यतीतिशब्दवेधी॥४॥अमनाद्दुर्मनाःतेनशोकेनमुनिकुमार
वधजेनशोकेन॥५॥अवाङ्मुखः...॥६॥ ॥

रामा·अ·
१९१

नदीनांवेगेनसमुद्रसलिलमिवेतिउत्प्रेक्षामात्रं।नतुतस्यतेनवृद्धिरित्याहुः।परंतुमहत्समुद्रसलिलंवेगेन
चंद्रोदयवृद्धिवेगेननदीनांत्वरितटद्वयांतरेयथावर्धतइत्यर्थः।समुद्रगामिनदीनांचंद्रोदयकालि
कसमुद्रवध्यावृद्धेःकियत्दूरमप्याप्तुपलंभादित्याहुः।१८।शुभंवचः।अतिदुःखितायाअपिपत्य

तंहिचिंतयमानायाःशोकोयंहृदिवर्धते।नदीनामिववेगेनसमुद्रसलिलंमहत्।१८।एवंहि
कथयंत्यास्तुकौसल्यायाःशुभंवचः।मंदरश्मिरभूत्सूर्योरजनीचाभ्यवर्तत।१९।अथप्र
ह्लादितोवाक्यैर्देव्याकौसल्यायानृपः।शोकेनचसमाक्रांतोनिद्रायावशमेयिवान्।२०।इत्या
र्षेश्रीरामायणेवाल्मीकीयेअयोध्याकांडेद्विषष्टितमःसर्गः।६२।प्रतिबुद्धोमुहूर्तेनशोको
पहतचेतनः।अथराजादशरथःसचिंतामभ्यपद्यत।१।रामलक्ष्मणयोश्चैवविवासाद्वास
वोपमं।आपेदेउपसर्गस्तंतमःसूर्यमिवासुरं।२।सभार्येहिगतेरामेकौसल्यांकोसलेश्व
रः।विवक्षुरसितापांगींस्मृत्वादुष्कृतमात्मनः।३।

नुनयपरत्वाद्वचसःशुभत्वं।१९।२०।इतिश्री
रामाभिरामेश्रीरामीयेरामायणतिलकेअयोध्याकांडेद्विषष्टितमःसर्गः।६२।प्रतिबुद्धइति।१।वा
सवोपमंतंदशरथंउपसर्गःउपप्लवःशोकःइतियावत्।आसुरंतमःअसुरस्यराहोःसंबंधितमःआ
वरणशक्तिःयथासूर्यमावृणोतितद्वत्।२।आत्मनोदुष्कृतंस्मृत्वा।असितापांगीविवक्षुरभवत्।३।

राम
१९१

191

किमपि अल्पमनुचितं भाषितं तत्त्वं तव्यमितिशेषः ॥ १४ ॥ शोक एवमाद्यनुचितव्यवहारप्रवर्तक इत्याह- शोकइत्या
दि ॥ १५ ॥ सुसूक्ष्मोऽपि सोकः सोढुं न शक्यते किं पुनर्महानितिशेषः ॥ १६ ॥ स्वशोकस्य महत्त्वं दर्शयति- वनेति-
पंचरात्रइत्यस्यगत इतिशेषः तत्र प्रथमा तमसातीरे ॥ द्वितीया गुह्यपरे- तृतीया गंगातीरे- ॥ चतुर्थी प्रया
गे- पंचमी यमुनावने- षष्ठी चित्रकूटे । तद्दिने सुमंत्रस्यायोध्याप्राप्तिः ॥ अतएवाग्रे षष्ठीति दशरथोक्तिः

जानामि धर्मं धर्मज्ञ त्वां जाने सत्यवादिनं ॥ पुत्रशोकार्तया तत्तु मया किमपि भाषितं ॥ १४ ॥ शो
को नाशयते धैर्यं शोको नाशयते श्रुतं ॥ शोको नाशयते सर्वं नास्ति शोकसमो रिपुः ॥ १५ ॥ शक्य
मापतितः सोढुं प्रहारो रिपुहस्ततः ॥ सोढुमापतितः शोकः सुसूक्ष्मोऽपि न शक्यते ॥ १६ ॥ वनवा
साय रामस्य पंचरात्रोऽत्र गण्यते ॥ यः शोकहतहर्षायाः पंचवर्षोपमो मम ॥ १७ ॥

अथ षष्ठाऽद्यदिने संपूर्णदिनं स्वनिकटे स्थितत्वेन स्वदेशे तमसातीर एव स्थितत्वेन तद्दिनम
गणय्य कौशल्ययाद्य पंचरात्रोगण्यत इत्युक्तं ॥ राजा तु तमपि गृहीत्वा षष्ठीति वक्ष्यति- यत्तुक
तकेन निर्गमनात् सप्तरात्रः सुमंत्रागमनदिन इत्युक्तं तदज्ञानात्- गंगोत्तारणदिनात्तृतीये
ह्नि चारप्रवृत्तिनिवृत्त्युत्तरं सायाह्ने तद्दिने एव सुमंत्रप्रस्थानस्य वक्तुं शक्यत्वात्- ॥ रामस्य निर्गम
दिनाद्दिने षष्ठे इति पूर्वलिखितपाठ विरोधाच्च ॥ १७ ॥

अस्तु प्रकृते किं तत्राह सोहमिति फलागमे रामकृतस्वोत्तरक्रियया लभ्यपारलौकिकफलप्राप्तिसमये रामाभिषेकजसुखप्राप्तिसमये वा ॥ १० ॥ यदाचरतीत्याद्युक्तविषयमाह लब्धेति कुमारोऽजकुमारः शब्दवेधी निलब्धः शब्दो येन तादृशेन मया शब्दवेधीत्येवं लब्धकीर्तिनेतियावत् कुमारेणाजीवत्पितृकेनेदमेवं व्यपिमाणं ॥ ११ ॥ तदिदं तत्फलमिदं दुःखम् अज्ञानकृतकर्मणः कथमेवं फलं तत्राह संमोहादिति अज्ञानेनापि भक्षितं विषं यथा बालमपि हंति तद्वदित्यर्थः ॥ १२ ॥ शब्दवेध्यं शब्दवेधित्वमित्यर्थं आर्षं इदं फलं

सोहमाम्रवनं छित्वा पलाशांश्च न्यषेचयं ॥ रामं फलागमे त्यक्त्वा पश्चाच्छोचामि दुर्मतिः ॥ १० ॥ लब्धशब्देन कौसल्ये कुमारेण धनुष्मता ॥ कुमारः शब्दवेधीति मया पापमिदं कृतं ॥ ११ ॥ तदिदं मेऽनुसंप्राप्तं देवि दुःखं स्वयं कृतं ॥ संमोहादिह बालेन यथा स्याद्भक्षितं विषं ॥ १२ ॥ यथान्यः पुरुषः कश्चित्पलाशैर्मोहितो भवेत् ॥ एवं मयाप्यविज्ञातं शब्दवेध्यमिदं फलं ॥ १२ ॥

एवं दुःखफलमिति मयाप्यविज्ञातं अयं भावः यथान्यः प्राकृतः पुरुषः पलाशैः पलासपुष्पैर्मोहितस्तत्फलं न जानाति तथाहमपि शब्दवेधित्वं लोकपूज्यं ज्ञात्वा तत्फलमेवं क्रूरमिति न ज्ञातवानिति कतकस्तु फलाशापुष्पैरन्यो मोहितो भवति तथाहं कैकेयीवाक्यैरिति शेषः अथाज्ञानकृतस्यापि विषपानवदावश्यकं फलमित्युपसंहरति एवमिति शब्दवेधित्वरूपं सामर्थ्यं प्राप्य यत्कर्माविज्ञातं सत्कृतं तस्य कर्मण इदं फलं कैकेयीवाक्यकृतो मोह इत्यर्थः इत्याह ॥ १३ ॥ ॥

षष्ठीरजनी प्राप्येतिशेषः ॥४॥५॥ तदेव लभते तत्कर्मत एवेति च ॥६॥ अर्थानामैहिकानां कर्मणां पारलौकिनामारं
भे आरंभकाले फलप्रतियोगुरुलाघवं गौरवं लाघवं च दोषं वा दोषं गुणं वा न जानाति केनचिदल्पेन हृ
त्यादिना महदनिष्टं केनचिन्महतापियागादिनाऽल्पफलं तथा इदं कर्माल्पदोषं बहुगुणं इदं च बहु

स राजा रजनीं षष्ठीं रामे प्रव्राजिते वनं ॥ अर्धरात्रे दशरथः सोस्मरद्दुष्कृतं कृतं ॥४॥ स राजा पुत्र
शोकार्तः स्मृत्वा दुष्कृतमात्मनः ॥ कौसल्यां पुत्रशोकार्तामिदं वचनमब्रवीत् ॥५॥ यदाचरति क-
ल्याणि शुभं वा यदि वाशुभं ॥ तदेव लभते भद्रे कर्ता कर्मजमात्मनः ॥६॥ गुरुलाघवमर्थानामा
रंभे कर्मणां फलं ॥ दोषं वा यो न जानाति स बाल इति ह्योच्यते ॥७॥ कश्चिदाम्रवनं छित्वा पलाशां
श्च निषिंचति ॥ पुष्पं दृष्ट्वा फले गृध्नुः स शोचति फलागमे ॥८॥ अविज्ञाय फलं यो हि कर्मत्वेवा
नुधावति ॥ स शोचेत्फलवेलायां यथा किंशुकसेवकः ॥९॥ राम ॥

दोषमल्पगुणमित्येवं न जानाति स बाल इत्युच्यते नस्तनंधयः ॥७॥ छित्वा यत्लाशोपरोधनिवृत्यर्थ
मितिशेषः पुष्पं दृष्ट्वा पुष्पमहत्वं दृष्ट्वा फलमहत्वमनुमायेत्यर्थः गृध्नुः लिप्सुः शोचति स्वतर्कि
तफलाभावात् ॥८॥ दृष्टांतं दार्ष्टांतिके योजयति अविज्ञायेति फलं क्रियमाणकर्मणो भाविफलं
अविज्ञायाविचार्य कर्मत्वेव कर्मैव तु लौकिकं वैदिकं वा अनुधावति अनुतिष्ठति शोचेत्तप्येदित्यर्थः

रामा॰अ॰
१९३

जिघांसुरन्वगामित्यन्वयः॥२१॥ पर्यंतः शत्रंतत्वमार्षं॥२२॥ शाब्दं प्रतिशब्दं लक्ष्यं कृत्वा॰ यद्वा शब्दावगतं वेध्यं प्रतिगजप्रेप्सुर्गजरूपं वध्यं प्राप्तुमिच्छुः॰ तज्जिघांसया शरमुद्धृत्य॥ अभिलक्ष्यं लक्ष्यसंमुखमपातयं॥२३॥ यत्र निशितं बाणममुंच॰ तत्र वनौकस आरण्यकमनुष्यस्य बाणाभिहतमर्मणस्तोये पततो हा हेति व्य

निपाने महिषं रात्रौ गजं वाभ्यागतं मृगं॥ अन्यद्वा श्वापदं किंचिज्जिघांसुरजितेंद्रियः॥२१॥ अथांधकारे त्वश्रौषं जले कुंभस्य पूर्यतः॥ अचक्षुर्विषये घोषं वारणस्येव नर्दतः॥२२॥ ततोहं शरमुद्धृत्य दीप्तमाशीविषोपमं॥ शब्दं प्रतिगजप्रेप्सुरभिलक्ष्यमपातयं॥२३॥ अमुंचं निशितं बाणमहमाशीविषोपमं॥ तत्र वागुषसि व्यक्ता प्रादुरासीद्वनौकसः॥२४॥ हाहेति पततस्तोये बाणाभ्याहतमर्मणः॥ तस्मिन्निपतिते भूमौ वागभूत्तत्र मानुषी॥२५॥ कथमस्मद्विधे शस्त्रं निपतेत्तु तपस्विनि॥ प्रविविक्तां नदीं रात्रावुदाहारोहमागतः॥२६॥ इषुणाभिहतः केन कस्य वा पकृतं मया॥ ऋषेर्हिन्यस्तदंडस्य वने वन्येन जीवतः॥२७॥ कथं नु शस्त्रेण वधो मद्विधस्य विधीयते॥ जटाभारधरस्यैव वल्कलाजिनवाससः॥२८॥

क्ता वागुषसि प्रादुरासीत्॥ तद्भूमौ तस्मिन्निपतिते सति मानुषी वागभूत्॥२४॥२५॥ तामेव वाणीमाह॰ कथमित्यादि॰ अस्मद्विधे तपस्विन्यजातशत्रौ॰ प्रविविक्तां निर्जनां रात्रौ अपररात्रे उदाहारः इत्यत्र दीर्घ आर्षः॥२६॥ न्यस्तदंडस्य त्यक्तपरपीडस्य॥२७॥ जटाभारेत्यादिनाहं तु रपिलाभाभावः सूचितः॥२८॥ ॥ ॥

राम
१९३

तादृशादुष्कर्मप्राप्तिः कुर्यादित्यत्राह॰ देवीति ॥१४॥ प्राव षं वर्णयति॰ अपास्येति॰ भौमान् रसान् रसानपास्य नि
रस्य शोषयित्वेति यावत्॰ तेनैव हेतुना जगत्त्वापरेता चरितो॰ अत एव भीमां दिशं दक्षिणां दिशं॰ आचरते ग
च्छति॰ आविशत इति पाठांतरं॰ उपास्येति पाठेपि सेवित्वेत्यर्थः द्वाराशोषयित्वेत्यत्रैव पर्यवसानं बोध्यं ॥१५

देव्यनूढा त्वमभवो युवराजो भवाम्यहं ॥ ततः प्रावृडनुप्राप्ता ममकामविवर्धनी ॥१४॥ अपास्य हि र
सान् भौमान् तप्त्वा च जगदंशुभिः ॥ परेताचरितां भीमां रविराचरते दिशं ॥१५॥ उष्ममंतर्दधे सद्यः
स्निग्धा ददृशिरे घनाः ॥ ततो जहृषिरे सर्वे भेकसारंगबर्हिणः ॥१६॥ क्लि न्नपक्षोत्तरास्स्नाताः कृच्छ्रा
दिव पतत्रिणः ॥ वृष्टिवाताव धूताग्रान् पादपानभिपेदिरे ॥१७॥ पतितेनांभसाच्छन्नः पतमानेन ॥
चासकृत् ॥ आबभौ मत्तसारंगस्तोयराशिरिवाचलः ॥१८॥ पांडुरारुणवर्णानि स्रोतांसि विमला
न्यपि ॥ सुस्रुवुर्गिरिधातुभ्यः सभस्मानि भुजंगवत् ॥१९॥ तस्मिन्नतिसुखे काले धनुष्मान्निषुमा
न्रथी ॥ व्यायामकृतसंकल्पः सरयूमन्वगां नदीं ॥२०॥

सारंगा हरिणाश्चातकावा॰ ॥१६॥ क्लिन्नाः
पक्षोत्तराः पक्षोपरिभागा येषां॰ ॥ अत एव कृच्छ्रात्॰ कृच्छ्राद्याचरणनिमित्तं॰ स्नाता इव वृष्टियुक्तवाते
न कंपिताग्रान् ॥१७॥ पतमानेन पततामत्ताः सारंगा यस्मिन्॰ तादृशो चलस्तोयराशिरिवाबभौ ॥१८
गिरिधातुभ्यः धातुरूपदेहेतुभ्यः क्वचित्पांडुरधातुसंयोगात्पांडुराणि॰ क्वचिदरुणधातुसंयोगादरुण
नि॰ क्वचित्सभस्मानि भस्मसंबंधानि ॥ भुजंगवत्कुटिलानीत्यर्थः ॥१९॥ व्यायामो मृगयाविहारः ॥२०॥

त्रस्तं नेत्राभ्यां समुद्वीक्ष्य ॥ ३७ ॥ ३८ ॥ ३९ ॥ जनयिता पिता। नूनं निश्चयेन मत्प्रतीक्षौ कृतामाशां ॥ पुत्रो जलमा
नेष्यतीत्येवं रूपां। ममागमनात्। तृष्णां पिपासां च चिरं धारयिष्यतः ॥ तपसः श्रुतस्य वेत्यत्र मामकस्य
पित्रास्य चेति शेषः ॥ फलयोगः फलसंबंधो नास्ति ॥ ४१ ॥ अपरिक्रमः संचारादक्षमोंऽधत्वात् ॥ ४२ ॥ अश

पांसुशोणितदिग्धांगं शयानं शल्यवेधितं ॥ समामुद्वीक्ष्य नेत्राभ्यां त्रस्तमस्वस्थचेतनं ॥ ३७ ॥ इ
त्युवाच वचः क्रूरं दिधक्षन्निव तेजसा ॥ किं तवापकृतं राजन् वने निवसता मया ॥ ३८ ॥ जिही
र्षुरंभो गुर्वर्थं यदहं ताडितस्त्वया ॥ एकेन खलु बाणेन मर्मण्यपि हते मयि ॥ ३९ ॥ द्वावंधौ निहतौ
वृद्धौ माता जनयिता च मे ॥ तौ नूनं दुर्बलावंधौ मत्प्रतीक्षौ पिपासितौ ॥ ४० ॥ चिरमाशां कृतां क
ष्टां तृष्णां संधारयिष्यतः ॥ न नूनं तपसो वास्ति फलयोगः श्रुतस्य वा ॥ ४१ ॥ पिता यन्मां न जा
नीते शयानं पतितं भुवि ॥ जानन्नपि च किं कुर्यादशक्तश्चापरिक्रमः ॥ ४२ ॥ भिद्यमानमिवाश
क्तस्त्रातुमन्यो नगो नगं ॥ पितुस्त्वमेव मे गत्वा शीघ्रमाचक्ष्व राघव ॥ ४३ ॥ न त्वामनुदहेत्क्रुद्धो
वनमग्निरिवैधितः ॥ इयमेकपदी राजन् यतो मे पितुराश्रमः ॥ ४४ ॥ राम ॥

क्तिर्वृद्धत्वात्। वातादिना भिद्यमानं नगं वृक्षं अन्यो नग इव मां त्रातुमशक्तस्त्वमेव मे पितुराचक्ष्व
॥ ४३ ॥ एधितो वह्निर्वनमिव त्वां न दहेत् ॥ मा दहत्वित्यर्थः ॥ एकपदी सूक्ष्ममार्गः यतः यया एकपद्या
मे पितुराश्रमः प्राप्यते सेयमेकपदी ॥ ४४ ॥

ममवधेनकः पुमानर्थी ॥ मनुष्यमांसेननकस्यापिप्रयोजनमितिव्यर्थ एवमद्वधइतिभावः ॥ परलोकनाशकत्वात्के
वलाऽनर्थसहितं ॥ इहलोकेचफलरहितम् ॥ २९ ॥ क्वचिदिहलोके ॥ परत्रवा यथागुरुतल्पगंन साधुमन्य
ते एवमेनंनमन्येतकोपीत्यर्थः ॥ आत्मनइमंजीवितक्षयंनानुशोचामि ॥ ३० ॥ ३१ ॥ एकेनेषुणा वृद्धौ हतौ अहं

कोवधेनममार्थीस्यात्किंवास्यापकृतंमया ॥ एवंनिष्फलमारब्धंकेवलानर्थसंहितं ॥ २९ ॥ नकश्चि-
त्साधुमन्येतयथैवगुरुतल्पगं ॥ नेमंतथानुशोचामिजीवितक्षयमात्मनः ॥ ३० ॥ मातरं पितरं चोभौ
अनुशोचामिमद्वधे ॥ तदेतन्मिथुनंवृद्धं चिरकालभृतंमया ॥ ३१ ॥ मयिपंचत्वमापन्ने कांवृत्तिंव
र्तयिष्यति ॥ वृद्धौचमातापितरौ अहंचैकेषुणाहतः ॥ ३२ ॥ केनस्मनिहताः सर्वेसुबालेनाकृ-
तात्मना ॥ तांगिरंकरुणांश्रुत्वाममधर्मानुकांक्षिणः ॥ ३३ ॥ कराभ्यांसशरंचापंव्यथितस्यापतद्भु
वि ॥ तस्याहंकरुणांश्रुत्वाऋषेर्विलपतोनिशि ॥ ३४ ॥ संभ्रांतः शोकवेगेनभृशमासंविचेतनः ॥ तंदे
शमहमागम्यदीनसत्वः सुदुर्मनाः ॥ ३५ ॥ अपश्यमिषुणातीरे सरय्वास्तापसंहतं ॥ अवकीर्ण-
जटाभारं प्रविद्धकलशोदकं ॥ ३६ ॥

चहतः मद्वधेनतयोर्वधस्यसिद्धत्वादित्याशयः ॥ ३२ ॥ अकृता
त्मना अजितेंद्रियेण धर्मानुकांक्षिणः धर्मप्रतीक्षाशीलस्य ममकराभ्यांपतत् अन्वयः करुणां करुणाजनकं
वचः श्रुत्वा विलपितः लालयतइतिपाठेतुयङंतात्शताआर्षः ॥ ३४ ॥ ३५ ॥ प्रविद्धं ध्वस्तंपर्यस्तंवा ॥ ३६ ॥

ज्ञातास्यमानस्य॰ नाम्पतः छायया संकुचितांशस्येति यावत्॰ उद्धरं अडभावआर्षः ॥५२॥ संत्रस्तः प्राणाद्दरत्वा
त्॰ ॥ तपोधनस्तत्कुमारः ॥५३॥ कृच्छ्रं मर्मव्रणं प्राप्य॰ विलप्य च॰ संततमुच्छ्रसंतम॰ शरयन्तीरेम त्वाशयया
नंवीस्याहं भृशं विषण्णोभवमिति कौसल्यां प्रतिउक्तानुवादः ॥५४॥ इति श्री रामाभिरामे श्रीरामीये राम

विघूर्णतो विचेष्टस्य वेपमानस्य भूतले ॥ तस्य त्वाताम्यमानस्य तं बाणमहमुद्धरं ॥ स मामुद्वी
क्ष्य संत्रस्तो जहौ प्राणांस्तपोधनः ॥५२॥ जलार्द्रगात्रं तु विलप्य कृच्छ्रं मर्मव्रणं संततमुच्छ्वसंतं
ततः सरय्वां तमहं शयानं समीक्ष्य भद्रे सुभृशं विषण्णः ॥५३॥ इत्यार्षे श्रीरा॰ अयो॰ त्रिषष्टितमः
सर्गः ॥६३॥ वधमप्रतिरूपं तु महर्षेस्तस्य राघवः ॥ विलपन्नेव धर्मात्मा कौसल्यामिदमब्रवीत्
॥१॥ तदज्ञानान्महत्पापं कृत्वा संकुलितेंद्रियः ॥ एकस्त्वचिंतयं बुध्या कथं नु सुकृतं भवेत् ॥२॥
ततस्तं घटमादाय पूर्णं परमवारिणा ॥ आश्रमं तदहं प्राप्य यथाख्यातं पथं गतः ॥३॥ तत्राहं दु
र्बलावंधौ वृद्धावपरिणायकौ ॥ अपश्यं तस्य पितरौ लूनपक्षाविव द्विजौ ॥४॥ ॥

१२

यणतिलके अयोध्याकांडे त्रिषष्टितमः सर्गः ॥६३॥ वधमिति॰ राघवो दशरथः वधं स्मृत्वा पुत्रं प्रति
विलपन्नेव॰ कौशल्यामिदमब्रवीत् अवदत् ॥१॥ संकुलितेंद्रियः क्षुभितेंद्रियः कथं नु सुकृतं भवे
दिति अचिंतयं ॥२॥ ततः एवं चिंतानंतरं॰ यथाख्यातपथं॰ मुनिकुमारोपदिष्टमार्गं प्राप्याहं त्व
आश्रमं गतः ॥३॥ तत्र आश्रमे॰ अपरिणायकौ संचारयितृपुरुषांतररहितौ ॥४॥ ॥

तयागत्वातथाप्रसादययथात्वांनशपेत्· मांविशल्यंकुरुतेशरोमेमर्म ॥४५॥ रुणाद्धि पीडयति· मृदु सिकता प्रायंसोत्सेधमुयवत्तीरं· ॥ अंबुरपोनदीवेगइव ॥४६॥ ममचिंतांलक्षयामासेत्यन्वयः एवंचिंतयाशल्यंनो। इरतीतिज्ञातवान् ॥४७॥ परमार्थः शास्त्रतत्वं· परमार्थंवदितिपाठेपरमार्त्तः सन्निन्नित्पर्थः ॥४८॥ त्वयंशक्तित्वयं

तंप्रसादयगत्वात्वंनत्वांसंकुपितःशपेत् ॥ विशल्यंकुरुमांराजन्मर्ममेनिशितःशरः ॥४५॥ रुणा। द्धिमदुसोत्सेधंतीरमंबुरपोयथा ॥ सशल्यःक्लिश्यतेप्राणैर्विशल्योविनशिष्यति ॥४६॥ इतिमाम विशाद्धिंतानस्यशल्यापकर्षणे ॥ दुःखितस्यचदीनस्यममशोकातुरस्यच ॥४७॥ लक्षयामाससस्त्र षिश्चिंतांमुनिसुतस्तदा ॥ ताम्यमानंसमांकृच्छ्रादुवाचपरमार्थवित् ॥४८॥ सीदमानोविवृत्तांगोचे ष्टमानोगतःक्षयं संस्तभ्यशोकंधैर्येणस्थिरचित्तोभवाम्यहं ॥४९॥ ब्रह्महत्याकृतंपापंहृदयादपनी यतां ॥ नद्विजातिरहंराजन्माभूत्तेमनसोव्यथा ॥५०॥ शूद्रायामस्मिवैश्येनजातोनरवराधिप ॥ इ तीववदतःकृच्छ्राद्बाणाभिहतमर्मणः ॥५१॥

गतःप्राप्तःविवृत्तांगः परावृत्तनेत्रः अचेष्टमानः हस्तपा दादिचेष्टारहितः धैर्येणशोकंसंस्तभ्याहंस्थिरचित्तोभवामिममचित्ते. मोहोनास्तीत्यर्थः अतोयद्ददामि तत्श्रृणु· इत्यर्थः शोकंब्रह्महत्याप्तिजंसंस्तभ्यत्यक्त्वा· ॥ अधुनास्थिरचित्तोभवेतिपाठांतरेर्थः ॥४९॥ अते ब्रह्महत्याकृतंपापंत्वयंअर्धर्चादिस्तापशब्दः ॥५०॥ वैश्येनशूद्रायांजातःकरणः इतीव· इत्येवंजातीयकं ॥५१॥

सुतपदशब्दतइवसुतधियासज्जमानयागद्गदया॰।अतएवहीनव्यंजनयाव्यंजनात्तरव्यक्तिरहितया
अतएवाव्यक्तयावाचावदंतंमुनिमिन्द्रस्पभीतचित्तइवाहंनाहशेपववाचाऽब्रुवमित्यन्वयः॥११॥मनस
इतिमनसःकर्मभीतिरूपंवाग्बलमाश्रित्यचेष्टाभिरभीतिसाध्यव्यवहारैरभिअभितःसंस्तभ्यभी

मुनिमव्यक्तयावाचातमहंसज्जमानया॥हीनव्यंजनयाप्रेक्ष्यभीतचित्तइवाब्रुवं॥११॥मनसः
कर्मचेष्टाभिरभिसंस्तभ्यवाग्बलं॥अचचक्षेत्वहंतस्मैपुत्रव्यसनजंभयं॥१२॥क्षत्रियोहंद
शरथोनाहंपुत्रोमहात्मनः॥सज्जनावमतंदुःखमिदंप्राप्तंस्वकर्मजं॥१३॥भगवंश्चापह
स्तोहंसरयूतीरमागतः॥जिघांसुःश्वापदंकिंचिन्निपानेवागतंगजं॥१४॥ततःश्रुतोमया॰
शब्दोजलेकुंभस्यपूर्यतः॥द्विपोयमितिमत्वाहंबाणेनाभिहतोमया॥१५॥गत्वानद्यास्त
तस्तीरमपश्यमसुनाहृदि॥विनिर्भिन्नंगतप्राणंशयानंभुवितापसं॥१६॥ततस्तस्यैववच॰
चनादुपेत्यपरितप्यतः॥समयासहसाबाणउद्धृतोमर्मतस्तदा॥१७॥ श्रीरामाय

ताकारतामाशाद्यअभीतइवाचचक्षे॥१२॥महात्मनस्तवपुत्रोनाहमितियोजना॰।सज्जनावमतंस
ज्जनगर्हितं॥मयाभवताचेतिशेषः॥१३॥तदेवाह॰भगवन्निति॰निपानेआगतंश्वापदंव्याघ्रादिगजं
वाजिघांसुरित्यन्वयः॥१४॥अयंशब्दहेतुःपदार्थइत्यर्थः॥द्विपइतिमत्वाहं॰स्थितस्ततोमयासबाणे
नहतः॥१५॥गतप्राणंगतकल्पप्राणं॥१६॥तस्यैव॰त्वत्पुत्रस्यैव॰वचनात्बाणउद्धृतइत्यन्वयः॥१७

तन्निमित्ताभिः पुत्रनिमित्ताभिः कथाभिः हेतुभिरपरिश्रमावासीनौ पुत्रोजलमानेष्यतीत्येवंरूपां तामाशांउ
पासीनौसेवमानौ मत्कृतेमत्कृतदुष्कर्मनिमित्तं तामाशांप्रतिहीनावपि तांसेवमानावपश्यमितिपूर्वे
णान्वयः उदासीनावितिपाठेऽनाथवदुदासीनौदुःखितावित्र ५ नौदृष्ट्वा शोकोपहृ तचित्तइत्यादि

तन्निमित्ताभिरासीनौकथाभिरपरिश्रमौ नामाशां मत्कृतेहीनावुपासीनावनाथवत् ५ शो
कोपहृतचित्तश्चभयसंत्रस्तचेतनः तच्चाश्रमपदंगत्वाभूयःशोकमहंगतः ६ पदशब्दं
तुमेश्रुत्वामुनिर्वाक्यमभाषत किंचिरायसिमेपुत्रपानीयंक्षिप्रमानय ७ यन्निमित्तमि
दंतातसलिलेक्रीडितंत्वयाउत्कंठितातेमातेयंप्रविशक्षिप्रमाश्रमं ८ यद्व्यलीकंकृतं
पुत्रमात्रातेयदिवामया नतन्मनसिकर्तव्यंत्वयातातातपस्विना ९ त्वंगतिस्त्वगतीनांच
चक्षुस्त्वंहीनचक्षुषां समासक्तास्त्वयिप्राणाः कथंत्वंनाभिभाषसे १० ॥ ॥

भूयः अधिकं ६ चिरायसिविलंबसि ७ यन्निमित्तं येनहेतुनाएतात्कालंत्वयासलिलेक्रीडि
तं नतेमाताउत्कंठिता सशोकस्मरणावत्यभूत् यन्नदत्तमिनिपाठे यत्वयाशीघ्रंजलमावयो
र्नदत्तं तत्वयासलिलेक्रीडितंतेननतेमातोत्कंठितेत्यन्वयः ८ व्यलीकमप्रियं ९ अगतीनांत्वं
गतिः हीनचक्षुषांत्वंचक्षुः अनोयन्नभाषसेतत्कथंकस्मात् १० ॥

पुत्रकोपेनापि तत्कालनाशाभावो. अज्ञानादेवेत्याह. सप्तधात्विति. स्वापेक्षयात पोन्यूनत्वात्सप्तधेति. ब्रह्म
वादिनि ब्रह्मवादिसमे. ब्रह्मचारिणीति पाठांतरं ॥२४॥ जीवसेजीवसि. तेन व. यस्मादिदंकर्म अज्ञानात्कृतं. तेन
जीवसि. हिः पादपूरणार्थः यदिज्ञानपूर्वं कृतमिदं स्यात्तदा राघवाणां कुलमेव न स्यात्. कुतो भवान्. ।

सप्तधा तु भवेन्मूर्धा मुनौ तपसि तिष्ठति ॥ ज्ञानाद्धि सृजतः शस्त्रं तादृशे ब्रह्मवादिनि ॥२४॥ अ
ज्ञानाद्धि कृतं यस्मादिदं ते तेन जीवसे ॥ अपि ह्यद्य कुलं न स्याद्राघवाणां कुतो भवान् ॥२५॥ न
यनोनयतं देशमिति मां चाभिभाषत ॥ अद्य तं द्रष्टुमिच्छावः पुत्रं पश्चिमदर्शनं ॥२६॥ रुधिरेण
वसिक्तांगं प्रकीर्णाजिनवाससं ॥ शयानं भुवि निःसंज्ञं धर्मराजवशंगतं ॥२७॥ अथाहमेकस्तं
देशं नीत्वा तौ भृशदुःखितौ ॥ अस्पर्शयमहं पुत्रं तं मुनिं सह भार्यया ॥२८॥ तौ पुत्रमात्मनः स्पृष्ट्वा
तमासाद्य तपस्विनौ ॥ निपेततुः शरीरेस्य पिता चैनमुवाच ह ॥२९॥ नाभिवादयसे मां च न च मा
मभिभाषसे ॥ किं च शेषे तु भूमौ त्वं वत्स किं कुपितो ह्यसि ॥३०॥ न त्वहं ते प्रियः पुत्र मातरं प
श्य धार्मिकीं ॥ किं च नालिंगसे पुत्र सुकुमार वचो वद ॥३१॥

जीवेदिति शेषः ॥२५॥ पश्चिमदर्शन
मंतदर्शनं द्रष्टुमिच्छावोऽस्तं देशं नयेति मामभाषत ॥२६॥ ॥२७॥ अहं तं देशं तौ नीत्वा. तं पुत्रमस्पर्श
यं ॥२८॥ तं तदवस्थमात्मनः पुत्रमासाद्य स्पृष्ट्वाऽस्य शरीरे निपेततुः पितैनमुवाच च ॥२९॥ कुपितो जा
तकोपः ॥३०॥ नन्वहमिति पाठः अप्रिय इति च्छेद इति कतकः न त्विहमिति पाठः अहं यदि तव प्रियो

अंधौमातापितरौ॰ कोतः परंरक्षिष्यतीति भगवंतौशोचन् विलप्य च स्वर्गमास्थित इत्यन्वयः ॥ १५ ॥ युष्मद्दत्तके पुत्रे
एवं गते स ति शेषं कर्तव्यं यत्स्यात्तत्तत्रमत्य भगवान्प्रसीदतु तदादिश पमामाज्ञापयत्विमन्वयः युष्मद्दत्ताणामपि मया कर्तुं शक्यमिति भावः ॥ १६ ॥ एवमज्ञानकृतत्वबोधनात् ॥ शेषायुः पर्यंतंरक्षणास्यापिक

स चोद्धतेन बाणेन सहसा स्वर्गमास्थितः ॥ भगवंतावुभौ शोचन्वृद्धाविति विलप्य च ॥ १८ ॥ अज्ञानाद्भवतः पुत्रः सहसाभिहतो मया ॥ शेषमेवंगते यत्स्यात्तत्प्रसीदतु मे मुनिः ॥ १९ ॥ स तच्छ्रुत्वा वचः क्रूरं मयातदघशंसिना ॥ नाशकत्तीव्रमायासं स कर्तुं भगवानृषिः ॥ २० ॥ स बाष्पपूर्णवदनो निश्वसंशोकमूर्छितः ॥ मामुवाच महातेजाः कृतांजलिमुपस्थितं ॥ २१ ॥ यद्येतदशुभं कर्म न स्म मे कथयेः स्वयं ॥ फलेन्मूर्धा स्म ते राजन्सद्यः शतसहस्रधा ॥ २२ ॥ क्षत्रियेण वधो राजन्वानप्रस्थे विशेषतः ॥ ज्ञानपूर्वंकृतः स्थानाच्यावयेदपि वज्रिणं ॥ २३ ॥ राम ॥

र्तव्यताबोधनाच्च ॥ मांतदैव न भस्मसादकरोदित्याह सइति॰ तीव्रमायासं॰ भस्मीभावफलकशापदानं ॥ २० ॥ २१ ॥ स्मशब्दो वाक्यालंकारे॰ फलेत् विशीर्येत॰ ॥ २२ ॥ ज्ञानपूर्वत्वे सद्योनर्थप्राप्तिः स्यादित्याह॰ क्षत्रियेणेति॰ विशेषतः अंधत्वाऽनाथत्वादेः ज्ञानपूर्वंकृतो यद्ययं वधः स्यात्तदा तच्छ्रुवणेनोमत्को पोवज्रिणमपि स्थानात् च्यावयेत् पातयेत्॰ किमुत्वादृशमित्यर्थः ॥ २३ ॥

यमगृहगमनेस्वप्रयोजनमाह॰ ततइति॰ धर्मराजोमेक्षमतां॰ पुत्रवियोगजनकंपूर्वकृतापराधं॰ । अयंमेपुत्रः
पितरौविभयात्पालयतु । ३८ । ननुत्वयायाचितेपिकथमेतल्लभ्यतेऽतआह॰ दातुमिति॰ ॥ लोकपालोयमः ईदृ
शस्यअनाथस्यअभयदक्षिणांपुत्रदानेनतदभावेनमह्याभयप्राप्तेरितिभावः ॥ कृतकृत्यः॰ यतोयंमेपु
त्रः पितरौविभयात्॰ अतोस्यधर्मराजोभवान्क्षमतांशस्त्रघातजन्यदुर्मरणजनकंपापंक्षमतामेवंमया
२ प्रार्थितोदुर्मरणजंदुर्गतिंदूरीकृत्यत्वांस्वर्गंनयिष्यति॰ । ईदृशस्यतपस्विनोममैकांपुत्रताराणरूपाऽ

ततोवैवस्वतंदृष्ट्वातंप्रवक्ष्याभिभारतीं ॥ क्षमतांधर्मराजोमेविभयात्पितरावयं ॥ ३८ ॥ दातुमर्ह
सिधर्मात्मालोकपालोमहायशाः ॥ ईदृशस्यममाक्षय्यामेकामभयदक्षिणां ॥ ३९ ॥ अपापोसियथा
पुत्रनिहतःपापकर्मणा ॥ तेनसत्येनगच्छाशुयेलोकास्त्वस्त्रयोधिनां ॥ ४० ॥ यांहिशूरागतिंयांति
संग्रामेष्वनिवर्तिनः ॥ हतास्त्वभिमुखाःपुत्रगतिंतांपरमांव्रज ॥ ४१ ॥

भयदक्षिणां॰ ॥ लोकपालत्वा
द्दातुमर्हसीत्यर्थमाह॰ । अथमतस्यपुनर्लाभमशक्यंमत्वा॰ विश्वामित्रइवत्रिशंकुंस्वमहिम्नासुतं
स्वर्गंप्रापयति॰ अपापोसीत्यादि॰ ॥ अपापस्त्वंपुत्रपापकर्मणाऽनेनक्षत्रियेणनिहतोसि॰ तेनहननेनप्रा
यश्चित्तरूपेणशुद्धः सत्येनमदीयेनास्त्रयोधिनांशूराणांलोकान्गच्छेत्यर्थः ॥ यद्वा॰ हेपुत्रपापेनकर्म
णाशस्त्रवधलक्षणेननिहतोयथायद्यपित्वमसितथापितेनमदीयेनसत्येनापापोभूत्वाऽस्त्रयोधिनां
लोकान्गच्छ ॥ ४० ॥ उक्तमेवार्थंपुनराह ॥ ४१ ॥

अन्महापुराणंवैश्यात्शूद्राजातत्वेनसंकरत्वाद्वेदप्रसंगोनोक्तः॥३२॥संध्यामितिःतंत्रमार्गेणोतिशेषःहुत
हुताशनःनमस्कारेणमंत्रेणपंचयज्ञान्समापयेदित्यक्तरीत्याःश्लाघयिष्यतिःश्लाघनमुद्वर्तनंतत्स्व
कंःस्नापयिष्यतिःनाप्सुश्लाघमानःस्नायादितिब्रह्मचारिप्रकरणस्थापस्तंबस्मृतौतथाव्याख्यानात्॥

कस्यवापुरस्तात्रेहंश्रोष्यामिहृदयंगमं॥अधीयानस्यमधुरंशास्त्रंवान्यद्विशेषतः॥३२॥कोमांसं
ध्यामुपास्यैवस्नात्वाहुतहुताशनः॥श्लाघयिष्यत्युपासीनःपुत्रशोकभयार्दितं॥३३॥कंदमूलफ
लंन्हृत्वायोमांप्रियमिवातिथिं॥भोजयिष्यत्यकर्मण्यमप्रग्रहमनायकं॥३४॥इमामंधांचवृद्धांच
मातरंनेतपस्विनीं॥कथंपुत्रभरिष्यामिकृपणांपुत्रगर्धिनीं॥३५॥तिष्ठमामागमःपुत्रयमस्य
सदनंप्रति॥श्वोमयासहगंतासिजनन्याचसमेधितः॥३६॥उभावपिचशोकार्तावनाथौकृप
णौवने॥क्षिप्रमेवगमिष्यावस्त्वयाहीनौयमक्षयं॥३७॥

कंदंजलोद्भवपद्मादीनांमूलं॥स्थ
लोद्भवानामितितीर्थः॥अकर्मण्यंकर्मानुष्ठानाक्षमं॥अप्रग्रहंनीवारादिसंग्रहरहितं॥अनायकं
पालकहीनमित्यर्थःतीर्थःकर्मणिसाधुकर्मण्यमित्यतिथिविशेषणं॥भोजयिष्यतिकर्मण्यमित्येवच
पाठःअप्रग्रहं॥यष्टिग्रहणपूर्वकमार्गप्रदर्शीरहितंःअतएवानायकंःस्नानादिकर्मप्रवर्तकहीनमि
त्यर्थःकतकः॥३४॥भरिष्यामिस्वयमंधइतिशेषः॥३५॥मामित्याबाधेद्विर्वचनममामुद्दिश्यतिष्ठःमाग
मःमागच्छेतिःवासमेधितःसहितः॥३६॥यमक्षयंयमगृहं॥३७॥

वपुष्मता·पुष्पकादिवत्प्रशस्ताकारेण॥५०॥५१॥जहि मारणैर्विषयोजय·॥५२॥यदज्ञानान्निहतोतः शप्स्येनत्तुप्रत्य
त्तमेव भस्मीकरोमि·॥सुदुःखमतिदारुणमितिक्रियाविशेषणं॥५३॥दुःखंमरणपर्यवसायिसांप्रतंवर्त्ते

एवमुक्त्वातुदिव्येनविमानेनवपुष्मता॥आरुरोहदिवंक्षिप्रंमुनिपुत्रोजितेंद्रियः॥५०॥स
कृत्वाथोदकंतूर्णंतापसःसहभार्यया॥मामुवाचमहातेजाःकृतांजलिमुपस्थितं॥५१॥
अद्यैवजहिमांराजन्मरणेनास्तिमेव्यथा॥यःशरेणैकपुत्रंमांत्वमकार्षीरपुत्रकं॥५२॥त्वया
पिचयदज्ञानान्निहतोमेसबालकः॥तेनत्वामपिशप्स्येहंसुदुःखमतिदारुणं॥५३॥पुत्रव्य
सनजंदुःखंयदेतन्ममसांप्रतं॥एवंत्वंपुत्रशोकेनराजन्कालंकरिष्यसि॥५४॥अज्ञानात्तु
हतोयस्मात्क्षत्रियेणत्वयामुनिः॥तस्मात्त्वांनाविशत्याशुब्रह्महत्यानराधिप॥५५॥त्वामप्ये
तादृशोभावःक्षिप्रमेवगमिष्यति॥जीवितांतकरोघोरोदातारमिवदक्षिणा॥५६॥एवंशापं
मयिन्यस्यविलप्यकरुणंबहु॥चितामारोप्यदेहंतन्मिथुनंस्वर्गमभ्ययात्॥५७॥

399

तेत्वन्निमित्तमितिशेषः कालंकरिष्यसिमर्तुंप्राप्स्यसि॥५४॥ब्रह्महत्यातत्समंपापं॥५५॥एतादृशोभावः
रूपंपुत्रशोकेनमरणं॥रूपःयथातत्तद्धस्तादक्षिणांदातारंयथासादक्षिणान्यतःप्राप्ताभवतितद्वत्॥
॥५६॥देहंदेहौ॥५७॥श्रीरामाय

तमेवार्थं विशेषतश्चाह॰ यांगतिमिति॥४२॥ सर्वभूतानांग तिराश्रयोब्रह्म॰ एकपत्नीव्रतारामादयः॥४३॥ गुरुसेवाभृ
तःतत्सेवाकर्तारः देहन्यासकृतः महाप्रस्थानादिना परलोकार्थं तनुत्यजः॥४४॥ अस्मिन्कुले मदीये नित्य
तपस्विकुलेयास्पति अकुशलांगतिमित्यनुकर्षः॥४५॥ उदकं संस्कारपूर्वोदकं॥४६॥ स्वर्गं मध्यारुह्य तेन

यांगतिंसगरःशैब्योदिलीपोजनमेजयः॥ नहुषोधुंधुमारश्च प्राप्तास्तांगच्छ पुत्रक॥४२॥ यागतिः
सर्वभूतानांस्वाध्यायात्तपसश्चया॥ भूमिदस्याहिताग्नेश्च एकपत्नीव्रतस्यच॥४३॥ गोसहस्रप्रदा
तॄणांगुरुसेवाभृतामपि॥ देहन्यासकृतांयाच तांगतिंगच्छ पुत्रक॥४४॥ नहित्वस्मिकुले जातो॥
गच्छत्यकुशलांगतिं॥ सतु यास्यति येनत्वं निहतोमम बांधवः॥४५॥ एवंसकरुणांतत्र पा॥
र्यदेवयतासकृत्॥ तथोत्काकर्तुमुदकं प्रवृत्तः सहभार्यया॥४६॥ सतुदिव्येनरूपेणमुनिपु
त्रःस्वकर्मभिः॥ स्वर्गमध्यारुरोहाशु क्षिप्रंशक्रेणसहधर्मवित्॥४७॥ आबभाषेचतौवृद्धौशक्रेणस
हतापसः॥ आश्वस्यचमुहूर्तंतु वाक्यंपितरमब्रवीत्॥४८॥ स्थानमस्मिमहत्प्राप्तोभवतोःपरि॥
चारणात्॥ भवंतावपिचक्षिप्रं ममम्लमुपेष्यथः॥४९॥

सत्येनाश्रुगच्छेति॰ वचनानंतरमेवतिशे
षः शक्रेणसहेत्यनेन मुनिपुत्रंस्वर्गंनेतुंशक्रः समागतइतिध्वनितं॥४७॥ आरुह्यपुनः शक्रेणसहागा
त्याबभाषेइत्यन्वयः अस्यैवप्रपंच आश्वस्येत्यादि अत्रवकुः शोकग्रस्तनयावभाषेऽब्रवीदितिपुनरु
क्तंनदोषाय॥४८॥ भवतोइति॰ अनेनमातापितृसेवाधर्मोत्तराभावेपिसइंद्रसालोक्यदेतिध्वनितं॰ म्लंसमीपं॥४

अनेनरामेणायन्मयिकृतं राज्यंत्यक्त्वामद्वचःपरिपालनरूपंतत्तस्यैवसदृशं। अनन्वयोत्रालंकारः॥ मत्स
दृशोऽन्यायकृत् रामसदृशउचितकर्ताचभुविनाभूदस्तिभविष्यतिवान्यइत्याह। दुर्वृत्तमपीति ६४

सदृशंनतुतस्यैवयदनेनकृतंमयि॥ दुर्वृत्तमपिकःपुत्रंत्यजेन्नुविविचक्षणः॥ ६४॥ कश्च
न्नाज्यमानोवानासूयेतपितरंसुतः॥ चक्षुषात्वांनपश्यामिस्मृतिर्ममविलुप्यते॥ ६५॥ दू
तावैवस्वतस्यैतेकौशल्येत्वरयंतिमां॥ अतस्तुकिंदुःखतरंयदहंजीवितक्षये॥ ६६॥ नहि
पश्यामिधर्मज्ञंरामंसत्यपराक्रमं॥ तस्यादर्शनजःशोकःसुतस्याप्रतिकर्मणः॥ ६७॥ उच्छो
षयतिवैप्राणान्वारिस्तोकमिवातपः॥ नतेमनुष्यादेवास्तेयेचारुशुभकुंडलं॥ ६८॥ मुखंद्र
क्ष्यंतिरामस्यवर्षेपंचदशेपुनः॥ पद्मपत्रेक्षणंसुभ्रुसुदंष्ट्रंचारुनासिकं॥ ६९॥ धन्याद्रक्ष्यंति
रामस्यताराधिपसमंमुखं॥ सदृशंशारदस्येंदोःफुल्लस्यकमलस्यच॥ ७०॥ सुगंधिममराम
स्यधन्याद्रक्ष्यंतितन्मुखं॥ निवृत्तवनवासंतमयोध्यांपुनरागतं॥ ७१॥ ॥ ॥

६५॥ ६६॥ ६७॥ स्तोकमल्पंवारिआतपोयथाशुष्कंकरोति॥ येद्रक्ष्यंतिननेमनुष्याःकिंतुदेवांशाए
व॥ ६८॥ ६९॥ ७०॥ ७१॥

शब्दवेध्यनुकर्षिणा· प्रथमं शब्दवेधिना पश्चाद्विहृशल्यानुकर्षणमपि कृतवता· पापं मुनिकुमारवधरूपं· ती
र्थस्तु शब्दवेध्यानुशिक्षिणेति पाठः· शब्देन वेद्धुं योग्यं शब्दवेध्यं तदनुशिक्षितुं शीलं यस्य· तेनेत्यर्थश्चाह· त
दसमंजसमिति स्पष्टमेव ॥५५॥ विपाकः फलं· अपथ्यैर्व्यंजनैः सह भुक्ते ऽन्नरसे व्याधिर्यथोयतिष्ठते· व्या
धिमन्नरथेति पाठे उपस्थापयतीति शेषः ॥५६॥ उदारस्यशब्दस्य पतद्वचः तद्वचः फलं· असोमरणभयादि तिशे

तदेव चिंतयानेनस्मृतं पापं मया स्वयं ॥ तदा बाल्यात्कृतं देवि शब्दवेध्यनुकर्षिणा ॥५५॥ तस्यायं
कर्मणो देवि विपाकः समुपस्थितः ॥ अपथ्यैः सह संभुक्ते व्याधिरन्नरसे यथा ॥५६॥ तस्मान्मा
मागतं भद्रे तस्योदारस्य तद्वचः ॥ इत्युक्त्वा स रुदंस्त्रस्तो भार्यामाह तु भूमिपः ॥६०॥ यदहं पुत्र
शोकेन संत्यजिष्यामि जीवितं ॥ चक्षुर्भ्यां त्वां न पश्यामि कौसल्ये त्वं हि मां स्पृश ॥६१॥ यमक्षयम
नुप्राप्ता द्रक्ष्यंति न हि मानवाः ॥ यदि मां संस्पृशेद्रामः सकृदन्वारभेत वा ॥६२॥ धनं वा यौवरा
ज्यं वा जीवेयमिति मे मतिः ॥ न तन्मे सदृशं देवि यन्मया राघवे कृतं ॥६३॥

षः रुदन्जीवितं
त्यक्ष्यामीति भार्यामाहेति संबंधः ॥६०॥ चक्षुर्भ्यां न पश्यामि मुमूर्षुत्वादिति भावः ॥६१॥ न हि द्रक्ष्यंतीति इ
ह विद्यमानान्स्वेष्टबंधूनिति शेषः इतः परं त्वत्स्पर्शादिकं मे दुर्लभमिति भावः यदि मामद्य रामः सकृदपि
स्पृशेत्· अन्वारभेत किंचिद्द्वारा वा स्पृशेत् ॥६२॥ यदि वा धनं कोशं· यौवराज्यं वा लभेत· तदा जीवेयं· रा

परमसंस्काराः व्याकरणादिशिक्षावंतः परमालंकारा वा· मागधा वंशावलीकीर्तकाः ॥ मंगला इति पाठेपि मंग
लपाठकास्त एव उत्तमश्रुताः उत्तमं श्रुतं वंशपरंपराश्रवणमेषां ते मगधाः ॥ श्रुतिशीला गायनाः तंत्रीना
दविभाजनशीला गायकाः पृथक्पृथक् निगदंतः स्वस्वमार्गानुसारेणेति शेषः ॥२॥ उदात्तं उच्चैः स्वरे
णाभिहिता आशिषो यैस्तेषां प्रसादानामाभोगेषु मध्येषु विस्तीर्णः प्रतिध्वनिनेति शेषः ३ पाणिवादकाः

सूताः परमसंस्कारा मंगलाश्चोत्तमश्रुताः ॥ गायकाः श्रुतिशीलाश्च निगदंतः पृथक्पृथक् ॥२॥
राजानं स्तुवतां तेषामुदात्ताभिहिताशिषां ॥ प्रासादाभोगविस्तीर्णः स्तुतिशब्दो ह्यवर्तत ॥३॥
ततस्तु स्तुवतां तेषां सूतानां पाणिवादकाः ॥ अपदानान्युदाहृत्य पाणिवादानवादयन् ॥४॥
तेन शब्देन विहगाः प्रतिबुद्धाश्च सस्वनुः ॥ शाखास्थाः पंजरस्थाश्च ये राजकुलगोचराः ॥५॥
व्याहृताः पुण्यशब्दाश्च वीणानां चापि निस्वनाः ॥ आशीर्गेयं च गाथानां पूरयामास वेश्म तत् ॥६॥

पाणिवादनशीलाः अपदानानि· राज्ञां वृत्ताद्भुतकर्माणि उदाहृत्य तदनुगतपाणिवादानवाद
यन् ॥४॥ सस्वनुः फणादित्वात्पक्षे एत्वाभ्यासलोपाभावः ये राजकुलगोचराः राजकुलवासयो
ग्या ये शुकादयः ॥५॥ तैः पूर्वोक्तश्लोकोक्तैः शुकादिभिर्व्याहृताः पुण्यशब्दाः काशीगंगादिरूपाः गा
थानां केवलगायकानामाशीर्गेयमाशीर्वादप्रधानगानं· यद्वा गाथा राज्ञां चरित्रादिप्रतिपादका
स्तासामाशीर्वादघटितं गानमित्यर्थः ॥६॥

शुक्रं मार्गगतं यथा सौख्यादि विहायस्वोच्चमार्गगतं शुक्रमिवेत्यर्थ इति तीर्थः कतकस्तु । शुकं मार्गगतं यथेति पाठः हस्तात्पंजराद्वान्यदेशगतं पुनश्च मार्गं यथास्थानं गतं प्राप्तं । शुकं । क्रीडाशुकमिवेत्यर्थ इत्याह ॥ चित्त

हा

इच्छंति सुखिनो रामं शुक्रं मार्गगतं यथा ॥ कौसल्ये चित्तमोहेन हृदयं सीदते नरां ॥ ७२ ॥ वेदयेन च संयुक्तान्शब्दस्पर्शरसानहं ॥ चित्तनाशाद्विपद्यंते सर्वाण्येवेंद्रियाणि हि ॥ ७३ ॥ क्षीणस्नेहस्य दीपस्य संरक्ता रश्मयो यथा ॥ अयमात्मभवः शोको मामनाथमचेतनं ॥ ७४ ॥ संसाधयति वेगेन यथा कूलं नदी रयः ॥ हा राघव महाबाहो मम आयासनाशन ॥ ७५ ॥ हा पितृप्रिय मे नाथ हा ममासि गतः सुत ॥ हा कौसल्ये न पश्यामि हा सुमित्रे तपस्विनि ॥ ७६ ॥ हा नृशंसे ममामित्रे कैकेयि कुलपांसनि ॥ इति मातुश्च रामस्य सुमित्रायाश्च सन्निधौ ॥ राजा दशरथः शोचन् जीवितांतमुपागमत् ॥ ७७ ॥ तथा तु दीनः कथयन्नराधिपः प्रियस्य पुत्रस्य विवासनातुरः ॥ गतेर्धरात्रौ भृशदुःखपीडितस्तदा जहौ प्राणमुदारदर्शनः ॥ ७८ ॥ इत्यार्षे श्रीरा० अयो० चतुःषष्टितमः सर्गः ॥ ६४ ॥
अथ रात्र्यां व्यतीतायां प्रातरेवापरेहनि ॥ वंदिनः पर्युपातिष्ठन् तत्पार्थिवनिवेशनम् ॥ १ ॥

मोहेन दुःखातिशयप्राप्तमूर्छया सीदते नराम तिशयेन शीर्यतीव ७२ वेदये जानामि । संयुक्तान् इंद्रियसंयुक्तान् ७३ संरक्ताभस्पनां प्राप्ता यथा दीपस्य रश्मयो विपद्यंते तेन ये इंद्रियाणीत्यर्थः ७४ संसाधयति नाशयति ७५ ॥ ७६ ॥ ७७ ॥ ७८ ॥ इति चतुःषष्टितमः सर्गः ॥ ६४ ॥ अथेति १ ॥

शयनं प्रति अनंतराः आसन्नाः कौसल्यादिव्यतिरिक्ताः प्रत्यबोधयन् प्रतिबोधनोचितमदुविनीतवचनैः स्पर्शैश्च १२ उचितवृत्ताः स्पर्शनादिव्यापारोचिताः किंचिदपि जीवचेष्टादि १३ स्वप्नशीलज्ञाः स्वप्नभावज्ञाः संचलनाडिषु हृदयकरमूलनाडिषु चेष्टा नोपलेभिरे ततो वेपथुयुक्ता राज्ञः प्राणेषु शंकिता आसन् १४ प्रतिस्रो

अथ याः कोसलेंद्रस्य शयनं प्रत्यनंतराः ॥ तास्त्रियस्तु समागम्य भर्तारं प्रत्यबोधयन् १२ अथाप्युचितवृत्तास्ता विनयेन नयेन च ॥ न ह्यस्य शयनं स्पृष्ट्वा किंचिदप्युपलेभिरे १३ तास्त्रियः स्वप्नशीलज्ञाश्चेष्टासंचलनादिषु ॥ ता वेपथुपरीताश्च राज्ञः प्राणेषु शंकिताः ॥ १४ ॥ प्रतिस्रोतस्तृणाग्राणां सदृशं संचकाशिरे ॥ अथ संदेहमानानां स्त्रीणां दृष्ट्वा च पार्थिवं १५ यत्तदाशंकितं पापं तदा जज्ञे विनिश्चयः ॥ कौसल्या च सुमित्रा च पुत्रशोकपराजिते १६ प्रसुप्ते न प्रबुध्येते यथाकालसमन्विते ॥ निष्प्रभा सा विवर्णा च सन्ना शोकेन संनता १७ न व्यराजत कौसल्या तारेव तिमिरावृता ॥ कौसल्यानंतरं राज्ञः सुमित्रा तदनंतरं ॥ १८ ॥

न इति स्रोतोभिमुखस्थितवेतसादितृणाग्राणां सदृशं कंपं संचकाशिरे प्रकाशितवंतः ॥ प्राणा इति यावत् संदेहमानानां संदिहानानां ॥ १५ ॥ यदाशंकितं पापं मरणरूपं राज्ञो निश्चयो जज्ञे जातः ॥ १६ ॥ यथाकालसमन्विते मृते इव यद्वा ऽ यथाकालसमन्विते बह्वीषु रात्रिषु दुःखतो जागरणात् अयथाकाले प्रत्युषसि निद्रया समन्विते इत्यर्थः शोकेन सन्ना उपहता सन्नता सुप्तिवशसंकुचितहस्तपादादिकरणा ॥ १७ ॥ को

पर्युपस्थानंपरिचर्या· स्त्रीभिः वर्षवरैः षंडैश्च· भूयिष्ठाः षंढोवर्षवरस्तत्स्यौ· परिचारिकाइतिशेषः॥७॥ स्नान
शिक्षाज्ञाः स्नानविधिज्ञाः यद्वा सूर्योदयात्पूर्वमेवउषसिस्नानार्थंजलानयनेतव्यमितिशिक्षाज्ञाः॥८॥ मं
गलालंभनीयानि मंगलार्थमालंभनीयानिस्पर्शनीयानिगवादीनि॥ आलंभः स्पर्शहिंसयोः प्राशनीया
निगोदकादीनिदंतधावनानंतरंगंडूषत्वेन प्राशनीयानि· नारिकेलस्येदकजीरकोदकानिच· उपस्क

ततःशुचिसमाचाराः पर्युपस्थानकोविदाः॥ स्त्रीवर्षवरभूयिष्ठानुपतस्थुर्यथापुरा॥७॥ हरिचं
दनसंपृक्तमुदकंकांचनैर्घटैः॥ आनिन्युस्स्नानशिक्षाज्ञाययाकालंयथाविधि॥८॥ मंगलालंभनी
यानिप्राशनीयान्युपस्करान्॥ उपानिन्युस्तथापुण्याः कुमारीबहुलाः स्त्रियः॥९॥ सर्वलक्षणसं
पन्नंसर्वंविधिवदर्चितं॥ सर्वंसुगुणलक्ष्मीवत्तदभूदाभिहारिकं॥१०॥ ततःसूर्योदयंयावत्स
र्वंपरिसमुत्सुकं॥ तस्थावनुपसंप्राप्तंकिंस्विदित्युपशंकितं॥११॥

रादर्पणवस्त्राभरणादयः कु
मारीबहुलाः कुमार्योबहुलायासुताःस्त्रियोवरनार्यः॥९॥ अभिहारकं· प्रातःसमयेराज्ञेयदभिह
र्तव्यंमंगलार्थमानेतव्यंतत्सर्वं सर्वलक्षणायुक्तं· सर्वविधिवदर्चितं· यथायोग्यं बहुकृतं· सुगुणंच
तल्लक्ष्मीवच्च॥१०॥ परिसमुत्सुकं राजदर्शनमप्रतीतिशेषः॥ तस्थौ ततोनुपसंप्राप्तं· अप्राप्तराजादर्श
नं· अतएवकिंस्विदित्युपशंकितमभूत्॥११॥

रामा॰अ॰
२०३

ताभिः कैकेयीप्रभृतिभिः यश्चांतःपुरं प्रविष्टाभिः स्वनादेन प्रथमप्रविष्टानां स्त्रीणां बलवान्नादोऽनुद्रुतः युक्तः अभ्यदितिशेषः ॥ २६ ॥ येनानुद्रवणेन स्फीतीकृतो वर्धितः सना दो भूयोधिकं तद्गृहं समनादयत्त्व्याप्तवा न् तीर्थस्तु येन स्थिरीकृतं भूयइतिपठित्वा यनेनादेन स्थिरीकृतं मुखरितं तद्गृहं कर्तृ भूयोत्पर्यसम

रुदंत्यः शोकसंतप्तानिपेतुर्गतचेतनाः ॥ ताभिः सबलवान्नादः क्रोशंतीभिरनुद्रुतः ॥ २६ ॥ येन स्फी तीकृतो भूयः तद्गृहं समनादयत् ॥ तत्परित्रस्तसंभ्रांतपर्युत्सुकजनाकुलं ॥ २७ ॥ सर्वतस्तु मुलाक्रंदं परितापार्तबांधवं ॥ सद्योनिपतितानंदं दीनविक्लवदर्शनं ॥ २८ ॥ बभूव नरः देवस्य सद्म दिष्टांतमीयुषः ॥ २९ ॥ अतीतमाज्ञाय तु पार्थिवर्षभं यशस्विनं तं परिवार्य पत्नयः ॥ भृशं रुदंत्यः करुणं सुदुःखिताः प्रगृह्य बाहू व्यलपन्ननाथवत् ॥ २९ ॥ इत्यार्षे श्री रामायणे वाल्मीकीये अयोध्याकांडे पंचषष्टितमः सर्गः ॥ ६५ ॥ तमग्निमिव संशांत मंबुहीनमिवार्णवम् ॥ गतप्रभमिवादित्यं स्वर्गस्थं प्रेक्ष्य भूमिपं ॥ १ ॥

नादयत् ॥ अनददित्थमाहुः पर्युत्सुकजनाकुलं पूर्ववृत्तांतज्ञानाय पर्युत्सुकजननिविडं ॥ २७ ॥ दिष्टांतं कालधर्ममुपेयुषः प्राप्तस्य सद्म परित्रस्तसंभ्रांतत्वादिगुणविशिष्टं बभूव ॥ २८ ॥ अतीतं मृतं पत्नयः पत्न्यः बहुप्रग स्य अभिहत्य अनाथवत् अनाथा अहं ॥ २९ ॥ इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके अयोध्या

राम
२०३

नविभ्राजते। नविशेषेणभ्राजते। तत्रहेतुः शोकेत्यादि। तेउभेदेव्यौपश्वासादिनासुप्तेदृष्ट्वा। नपंचतंसुप्त
मेवसंतंतदवस्थायामेवोद्धृतप्राणं। लक्षणानोदृष्ट्वा सर्वमेवांतःपुरमुद्धृतप्राणं। तत्कल्पमदृश्यत। अम
न्यतेतिपाठेंतःपुरंकर्तृनृपमुद्धृतप्राणममन्यतेत्यर्थः। तीर्थस्त। अदृश्यतेत्येततपरस्परमपश्यदित्यर्थेवा

नस्मविभ्राजतेदेवीशोकाश्रुकलुषितानना। तेचदृष्ट्वातदासुप्तेउभेदेव्यौचतंनृपं॥१९॥ सुप्तमेवो
द्धृतप्राणमंतःपुरमदृश्यत॥ ततःप्रचुक्रुशुर्दीनाःसस्वरंतावरांगनाः॥२०॥ करेणवइवारण्ये
स्थानप्रच्युतयूथपाः॥ तासामाक्रंदशब्देनसहसोद्गतचेतने॥२१॥ कौसल्याचसुमित्राचत्यक्त
निद्रेबभूवतुः॥ कौसल्याचसुमित्राचदृष्ट्वास्पृष्ट्वाचपार्थिवं॥२२॥ हाभर्तेतिपरिक्रुश्यपेततुर्धर
णीतले॥ साकोसलेंद्रदुहिताचेष्टमानामहीतले॥२३॥ नभ्राजतेरजोध्वस्तातारेवगगनच्युता।
नृपेशांतगुणेजातेकौसल्यांपतितांभुवि॥२४॥ अपश्यंस्ताःस्त्रियःसर्वाहतांनागवधूमिव॥ ततः
सर्वानरेंद्रस्यकैकेयीप्रमुखाःस्त्रियः॥२५॥ ॥ राम ॥ ॥

चस्ये॥१९॥२०॥ स्थानाद्वासस्थानात्प्रच्युतोयूथपोमहागजोयासांताः करेणवइवप्रचुक्रुशुरित्यन्वयः
॥२१॥२२॥ हाभर्तेति। हाभर्तरितीत्यर्थः। अयोध्याजनपदवाचीकोशलशब्दस्तालव्यमध्याकौसल्यापिपित्त
देशवाचीतुदंत्यमध्यः॥२३॥ शांतगुणेउपशांतजीवनधर्मे॥२४॥२५॥ ॥

जीवन्नेवनाशमदर्शनंगतः जीवनाशमितोगतइतिपाठे· राज्ञोजीवनाशोयथाभवतितथागतइत्यर्थः·
चारुतपस्विनीभर्तृसेवनादित्यर्थः पर्युद्वेगोभयं वनेदुःखंप्राप्स्यतिशेषः॥९॥ निशाम्यमानानादमितिशे
षः निषम्यनादमितिपाठांतरं॥१०॥ अप्यपुत्रश्चेतिजनकइतिशेषः अल्पपुत्रइत्यस्यकन्यामात्रसंतति

समामनाथांविधवांनाद्यजानातिधार्मिकः॥ रामःकमलपत्राक्षोजीवन्नाशमितोगतः॥८॥ विदे
हराजस्यसुतातथाचारुतपस्विनी॥ दुःखस्यानुचितादुःखंवनेपर्युद्विजिष्यति॥९॥ नदतां
भीमघोषाणांनिशासुमृगपक्षिणां॥ निशम्यमानासंत्रस्ताराघवंसंश्रयिष्यति॥१०॥ वृद्धश्चै
वाल्पपुत्रश्चवैदेहीमनुचिंतयन्॥ सोपिशोकसमाविष्टोनूनंत्यक्ष्यतिजीवितं॥११॥ साहम
द्यैवदिष्टांतंगमिष्यामिपतिव्रता॥ इदंशरीरमालिंग्यप्रवेक्ष्यामिहुताशनं॥१२॥ तांततःसंपरि
ष्वज्यविलपंतींतपस्विनीं॥ व्यपनिन्युःसुदुःखार्तांकौसल्यांव्यावहारिकाः॥१३॥ तैलद्रोण्यांत
दामात्याःसंवेश्यजगतीपतिं॥ राज्ञःसर्वाण्यथादिष्टाश्चक्रुःकर्माण्यनंतरं॥१४॥

रित्यर्थइतिनीर्थः॥११॥ दिष्टांतंमरणं· शरीरालिंगनपूर्वकंअग्निप्रवेशोहेतुःपतिव्रतेति॥१२॥
व्यावहारिकाःव्यवहारेवात्याभ्यंतरसकलराज्यकृत्येनियुक्ताः अमात्याःव्यपनिन्युः॥ अंतःपु
राद्यत्तस्त्रीद्वाराभर्तालिंगनाद्विमोच्यान्यतोनिन्युरित्यर्थः॥१३॥ तैलद्रोण्यां· तैलपूर्णकटाहः आदिष्टा
वसिष्ठादिभिराज्ञप्ताअमात्यास्तस्यांनृपंसंवेश्यस्थापयित्वानंतरंकर्तव्यानिदुःखपरिपालनादी

नविभ्राजते। नविशेषेणभ्राजते। तत्र हेतुः शोकेत्यादि। तेउभे देव्यौ प्रश्वासादिना सुप्तेदृष्ट्वा। नपंचतं सुप्त मेवसंतं तदवस्थायामेवोद्धृतप्राणं। लक्षणतो दृष्ट्वा सर्वमेवांतःपुरमुद्धृतप्राणं। तत्कल्पमदृश्यत। अम न्यतेतिपाठेंतः पुरं कर्तृनृपमुद्धृतप्राणममन्यतेत्यर्थः तीर्थस्तु। अदृश्यतेत्येतत् परस्परमपश्यदित्यर्थं वा।

नस्मविभ्राजते देवी शोकाश्रुकलुलिताननो॥ तेचदृष्ट्वा तदा सुप्ते उभेदेव्यौ चतंनृपं ॥१९॥ सुप्तमेवो द्धृतप्राणमंतःपुरमदृश्यत॥ ततः प्रचुक्रुशुर्दीनाः सस्वरं तावरांगना॥२०॥ करेणव इवारण्ये स्थानप्रच्युतयूथपाः॥ तासामाक्रंदशब्देनसहसोद्गतचेतने॥२१॥ कौसल्याच सुमित्राचत्यक्त निद्रेबभूवतुः॥ कौसल्या च सुमित्रा च दृष्ट्वा स्पृष्ट्वा च पार्थिवं॥२२॥ हा भर्तेतिपरिक्रुश्यपेततुर्धर णीतले॥ साकोसलेंद्रदुहिता चेष्टमाना महीतले॥२३॥ नभ्राजते रजोध्वस्ता तारेवगगनच्युता॥ नृपेशांतगुणेजाते कौसल्यां पतितां भुवि॥२४॥ अपश्यंस्ताः स्त्रियः सर्वा हतां नागवधूमिव॥ ततः सर्वा नरेंद्रस्य कैकेयीप्रमुखाः स्त्रियः॥२५॥ ॥ राम ॥ ॥

चक्षे॥१९॥२०॥ स्थानाद्वासस्थानात् प्रच्युतो यूथपो महागजो यासां ताः करेणव इव प्रचुक्रुशुरित्यन्वयः ॥२१॥२२॥ हाभर्तेति। हा भर्तरितीत्यर्थः। अयोध्याजनपदवाची कोशलशब्दस्तात्लव्यमध्याकौसल्यापि पित देशवाचीतुदंत्यमध्यः॥२३॥ शांतगुणे उपशांतजीवनधर्मे॥२४॥२५॥ ॥

रामा·अ·
२०४

204

जीवन्नेवनाशमदर्शनंगतःजीवनाशमितोगतइतिपाठे·राज्ञोजीवनाशोयथाभवतितथागतइत्यर्थः
चारुतपस्विनीभर्तृसेवनादित्यर्थः पर्युद्विग्नोभयं वनेदुःखंप्राप्स्यतिशेषः ९ निशम्यमानानादमितिशि
षः निषम्यनादमितिपाठांतरं १० अल्पपुत्रश्चेतिजनकइतिशेषः अल्पपुत्रइत्यस्यकन्यामात्रसंतति

समामनाथांविधवांनाद्यजानातिधार्मिकः॥रामःकमलपत्राक्षोजीवन्नाशमितोगतः॥८॥विदे
हराजस्यसुतातथाचारुतपस्विनी॥दुःखस्यानुचितादुःखंवनेपर्युद्विजिष्यति॥९॥नरदंता
भीमघोषाणांनिशासुमृगपक्षिणां॥निशम्यमानासंत्रस्ताराघवंसंश्रयिष्यति॥१०॥वृद्धश्चै
वाल्पपुत्रश्चवैदेहीमनुचिंतयन्॥सोपिशोकसमाविष्टोनूनंत्यक्ष्यतिजीवितं॥११॥साहम
द्यैवदिष्टांतंगमिष्यामिपतिव्रता॥इदंशरीरमालिंग्यप्रवेक्ष्यामिहुताशनं॥१२॥तांततःसंपरि
ष्वज्यविलपंतींतपस्विनीं॥व्यपनिन्युःसुदुःखार्तांकौसल्यांव्यावहारिकाः॥१३॥तैलद्रोण्यांत
दामात्याःसंवेश्यजगतीपतिं॥राज्ञःसर्वाण्यथादिष्टाश्चक्रुःकर्माण्यनंतरं॥१४॥

रित्यर्थइतितीर्थः॥११॥दिष्टांतंमरणं·शरीरालिंगनपूर्वकंअग्निप्रवेशोहेतुःपतिव्रतेति॥१२॥
व्यावहारिकाःव्यवहारेवास्याभ्यंतरसकलराज्यकृत्येनियुक्ताः अमात्याःव्यपनिन्युः अंतःपु
राद्यपत्तस्त्रीद्वाराभर्तालिंगनाद्विमोच्यानयतोनिन्युरित्यर्थः॥१३॥तैलद्रोण्यां तैलपूर्णकटाहः आदिष्टा
वसिष्ठादिभिराज्ञप्ताः अमात्यास्तस्यान्यंसंवेशयस्थापयित्वानंतरंकर्माणिदुःखपरिपालनादी

रामायणटीका श्रीः ॥

राम
१०४

राज्ञः शिरउपगत्यअंकेकृत्वेत्यर्थः ॥२॥ एकाग्राः पुत्रराज्याग्रचिन्ता ॥३॥ राज्यस्याकंटकत्वंदर्शयति विहाये
तिविपथेकांतारेसार्थहीनासहायभूतपथिकसंघरहिता ॥४॥ आत्मनोदैवतंभर्तारंपरित्यज्यत्यक्तः ध
र्मोयुक्तस्त्रीधर्मोययातादृश्याः कैकेय्याअन्याअन्यत्रपुत्रराज्येकाजीवितुमिच्छेत् परिषज्येतिपाठे
भर्तारंपरिषज्यतेनसहभोगानभुक्त्वातंकालांतरेपरित्यज्येतिशेषः ॥५॥ एवंसहसकरुणहेतुमाह नेति

कौसल्याबाष्पपूर्णाक्षी विविधंशोककर्षिता ॥ उपगत्यशिरोराज्ञः कैकेयीप्रत्यभाषत ॥२॥
सकामाभवकैकेयिभुंक्ष्वराज्यमकंटकं ॥ त्यक्त्वाराजानमेकाग्रा नृशंसेदुष्टचारिणि ॥३॥
विहायमांगतोरामोभर्ताचस्वर्गतोमम ॥ विपथेसार्थहीनेवनाहंजीवितुमुत्सहे ॥४॥ भर्तारं
तुपरित्यज्यकास्त्रीदैवतमात्मनः ॥ इच्छेज्जीवितुमन्यत्रकैकेय्यास्त्यक्तधर्मिणः ॥५॥ नलुब्धोबु
ध्यतेदोषान्किंपाकमिवभक्षयन् ॥ कुब्जानिमित्तंकैकेय्याराघवाणांकुलंहतं ॥६॥ अनियोगेनि
युक्तेनराज्ञारामंविवासितं ॥ सभार्यंजनकःश्रुत्वापरितप्स्यत्यहंयथा ॥७॥

किंपाकोनिंबःकतकस्त्व

किंपाकोविषभेदंतंकोपादिनाभक्षयन्आत्महत्यादोषंनबुध्यतेतद्वदित्यर्थइत्याह ॥ नत्रलुब्धइतिनात्यं
तंसमंजसं धनलोभादिनापरस्यविषभक्षणंकारयन्यथाहत्यादोषंनबुध्यतइतिवकुमुचितंयतकैके
य्याराघवाणांकुलंहतंतत्रकुब्जानिमित्तं प्रेरकतया ॥६॥ अनियोगेअनुचितनियोगेवरव्याजात् कैके
य्यानियुक्तेनराज्ञासभार्यंरामंविवासितं [illegible] ॥७॥ ॥

राज्ञिशोकात्·पुत्रशोकात्त्रिदिवं स्वर्गंगतेनपांगनासुचशोकादेवमहीतलस्थासु·महीतलेलुठंतीषुनिवृत्त
चारःनिवृत्तकिरणप्रचारःप्रवृत्तचाराप्रवृत्ततमःप्रचारा॥२६॥सुहृदोवसिष्ठाद्याः पर्युषितदाहनिषेध
वचनानितुविप्रविषयाणीतिनविरोधः तस्मिन्शयनेतैलद्रोण्यां॥२५॥आकंठंधारारूपेणप्रवहद्भिर

गतेतुशोकात्त्रिदिवंनराधिपेमहीतलस्थासुनृपांगनासुच॥निवृत्तचारःसहसागतोरविःप्रव
त्तचारारजनीह्युपस्थिता॥२६॥ऋतेतुपुत्राद्दहनंमहीपतेर्नारोचयन्तेसुहृदःसमागताः॥
इतीवतस्मिन्शयनेन्यवेशयन्विचिंत्यराजानमचिंत्यदर्शनं॥२७॥गतप्रभाद्यौरिवभास्करंवि
नाव्यपेतनक्षत्रगणेवशर्वरी॥पुरीबभासेरहितामहात्मनाकंठास्रकंठाकुलमार्गचत्वरा॥२८॥
नराश्चनार्यश्चसमेत्यसंघशोविगर्हमाणाभरतस्यमातरं॥तदानगर्यांनरदेवसंक्षयेबभूवु
रार्तानचशर्मलेभिरे॥२९॥इत्यार्षेश्रीरामायणेअयो॰षट्षष्टितमःसर्गः॥६६॥आक्रंदिताति·
रानंदासास्रकंठजनाविला॥अयोध्यायामवततासाव्यतीयायशर्वरी॥१॥व्यतीतायांतुशर्व
र्यामादित्यस्योदयेततः॥समेत्यराज्यकर्तारःसभामीयुर्द्विजातयः॥२॥

स्रेरुपलक्षिताःकंठाये
षांतेराकुलामार्गाश्चत्वराश्चयस्यां॥२९॥३०॥एकःश्लोकोत्रसर्गेकतकसंख्ययाभ्रष्टइतिज्ञायते·इति
श्रीरामाभिरामेश्रीरामीयेरामायणतिलकेअयो॰षट्षष्टितमःसर्गः॥६६॥आक्रंदितासंजाताक्रंदाअ
तएवनिरानंदा·विद्यमानासकंठैर्जनैराविलाकुला·[illegible]भता॥१॥राजकर्तारःरा

पुत्रेणविनासंकालनैमित्तनिर्हारंकर्तुमीषुः यतःसर्वज्ञाःततोहेतोस्तैत्तद्रोणांभःपरंदंतीति ।१५। शायितंज्ञात्वाहा मतोयमितिपर्यदेवयन् ।१६। नेत्राणांप्रस्रवणमश्रुप्रवाहोयेषुमुखेषुतेः ।१७।१८।१९। तवप्रभुःतवजी

नतुसंकालनंराज्ञोविना पुत्रेणमंत्रिणः ॥सर्वज्ञाःकर्तुमीषुस्तेनतोरक्षंतिभूमिपं ॥१५ तैलद्रोणां शायितंतंसचिवैस्तुनराधिपं ॥हामृतोयमितिज्ञात्वास्त्रियस्ताःपर्यदेवयन् ॥१६ बाहुनुद्धृत्यकृ पणानेत्रप्रस्रवणैर्मुखैः ॥रुदंत्यःशोकसंतप्ताःकृपणंपर्यदेवयन् ॥१७ हामहाराजमेणासततं । प्रियवादिना ॥विहीनाःसत्यसंधेनकिमर्थंविजहासिनः ॥१८ कैकेय्यादुष्टभावायाराघवेणवि विर्जिताः ॥कथंसपत्न्यावत्स्यामःसमीपेविधवावयं ॥१९ ॥सहिनाथःसचास्माकंतवचप्रभुरात्म वान् ॥वनंरामोगतःश्रीमान्विहायनृपतिश्रियं ॥२० ॥त्वयातेनचवीरेणविनाव्यसनमोहिताः ॥ कथंवयंनिवत्स्यामःकैकेय्याचविदूषिताः ॥२१ ॥ययाचराजारामश्चलक्ष्मणश्चमहाबलः ॥सीतया सहसंत्यक्ताःसाकमन्यंनहास्यति ॥२२ ॥ताबाष्पेणचसंवीताःशोकेनविपुलेनच ॥व्यचेष्टंतनिरा नंदाराघवस्यवरास्त्रियः ॥२३ ॥निशानक्षत्रहीनेवस्त्रीवभर्त्रविवर्जिता ॥पुरीनाराजतायोध्याहीना राज्ञामहात्मना ॥२४ ॥बाष्पपर्याकुलजनाहाहाभूतकुलांगना ॥शून्यचत्वरवेश्मांतानबभ्राजयथापुरं ॥२५

वनस्यप्रभुः ॥२० ॥विदूषिताःराज्यगर्वान्तिरस्कृताः ॥२१ ॥२२ ॥राघवस्यदशरथस्य ॥२३ ॥नभ्राजतेतिछे दः ।२४ ।शून्यचत्वरवेश्मांताःसंमार्जनालेपनत्यादिरहिताः चत्वराः अंगनाः यथापुरं यथापूर्वं ॥ २५ ॥

रा

वीजमुष्टिः न प्रकीर्यंते वीजानारोपो न क्रियते फलकाले लुंटाकशंकया पितुर्वशे पुत्रो भार्या चापत्युर्वशे न वर्तते अतिक्रमे दंडयित्रभावात् १० धनाद्यभावाश्च परिपालकाभावात् इदमुक्तरूपमत्याहितं महद्भयमराजके प्रथमं प्राप्नोति अत्याहितं महाभीतिरित्यमरः अन्यत् सत्यं पितापुत्रपतिभार्यारूप प्रधानसत्यादन्यत् क्रयविक्रयादिलक्षणं कुतः ११ सभां न कारयंति न्यायविचारायेति शेषः

नाराजके जनपदे वीजमुष्टिः प्रकीर्यते। नाराजके पितुः पुत्रो भार्या वा वर्तते वशे १० अराजके धनं नास्ति नास्ति भार्याप्यराजके। इदमात्याहितं चान्यत् कुतः सत्यमराजके ११ नाराजके जनपदे कारयंति सभां नराः। उद्यानानि च रम्याणि हृष्टाः पुण्यगृहाणि च १२ नाराजके जनपदे यज्ञशीला द्विजातयः। सत्राण्यन्वासते दांता ब्राह्मणाः संशितव्रताः १३ नाराजके जनपदे महायज्ञेषु यज्वनः। ब्राह्मणा वसुसंपूर्णा विसृजंत्याप्तदक्षिणाः १४

केपि यंतीति पाठांतरं उद्यानानीत्यादौ नयंतीत्यनुकर्षः वस्त्राद्यपहारभयात् न कारयंति वा भयादेव पुण्यगृहाणि पुण्यसंपादकगृहाणि विप्राद्यर्थानि १२ सत्रं यत्र सर्वे ऋत्विजः सर्वे च यजमानाः नान्वासते नानुतिष्ठंति १३ वसुसंपूर्णाः बहुधनाः आप्तदक्षिणाः शास्त्रेण यथाप्राप्तदक्षिणाः यज्वनो ऋत्विजः प्रति न विसृजंति १४

३।पृथग्वाचं·राजकार्यविषयेभिन्नभिन्नप्रस्थाना वाचोऽब्रुवन्·एवंचकार्यसिद्धेरयोगाद्वसिष्ठमेवाभिमुखाब-
भूवुः॥४॥पुत्रशोकेनास्मिन्पार्थिवेपंचत्वंमरणमापन्नेसतिदुःखंयथातथावर्षशतोपमाशर्वरीअतीतितिसं-
बंधः॥५॥६॥केकयेषुतदाख्यदेशेषु·अवांतरभेदापेक्षयाबहुवचनमितिकतकः। वस्तुतोंगाद्या दिवद्ब-

मार्कंडेयोथमौद्गल्योवामदेवश्चकाश्यपः॥कात्यायनोगौतमश्चजाबालिश्चमहायशाः॥३॥ते
द्विजाःसहामात्यैःपृथग्वाचामुदीरयन्॥वसिष्ठमेवाभिमुखाःश्रेष्ठंराजपुरोहितं॥४॥अतीताश
र्वरीदुःखंयानोवर्षशतोपमा॥अस्मिन्पंचत्वमापन्नेपुत्रशोकेनपार्थिवे॥५॥स्वर्गस्थश्चमहारा
जोरामश्चारण्यमाश्रितः॥लक्ष्मणश्चापितेजस्वीरामेणैवगतःसह॥६॥उभौभरतशत्रुघ्नौकेकये
षुपरंतपौ॥पुरेराजगृहेरम्येमातामहनिवेशने॥७॥इक्ष्वाकूणामिहाद्यैवकश्चिद्राजाविधीयतां॥अ
राजकंहिनोराष्ट्रंविनाशंसमवाप्नुयात्॥८॥नाराजकेजनपदेविद्युन्मालीमहास्वनः॥अभिवर्ष
तिपर्जन्योमहींदिव्येनवारिणा॥९॥

हुवचनांतएवजनपदवाचीत्यन्ये·राजगृहेराजगृहाख्येपुरे॥७॥
इक्ष्वाकूणां·इक्ष्वाकूणांमध्ये॥विपत्तेर्बाधकमाह·अराजकंहीति·हियतोऽराजकंनोराष्ट्रंविनाशमवाप्नु
यादतः॥कश्चिद्राजाविधीयतां·राजकंसद्धिराष्ट्रंनोनाशंनावाप्नुयाद्यद्येतिकतकसंमतःपाठः·नोऽस्मा
कंराष्ट्रंराजकंराजयुतंसन्नाशंनाप्नुयाण्णियुपद्यथातथाकश्चिद्राजाविधीयतामित्यन्वयः। हिर्वाक्यालंकारे

एकोसहायएवचरतीत्येकचरोयति॰॥वशीजितेंद्रियः आत्मनामनसाआत्मानंब्रह्म।२३॥२४॥प्रतिमंडि
ताः भूषिताः प्रतिमंडितैरितिपाठांतरं॥२५॥संवदतउपतिष्ठंतेसंधिस्त्वार्षः॥२६॥कल्प्यंतेप्रवर्त्यंते।२७

नाराजकेजनपदेचरत्येकचरोवशी॥भावयन्नात्मनात्मानंयत्रसायंगृहोमुनिः॥२३॥
नाराजकेजनपदेयोगक्षेमःप्रवर्त्तते॥नचाप्यराजकेसेनाशत्रून्विषहतेयुधि॥२४॥नारा
जकेजनपदेरथ्यैःपरमवाजिभिः॥नराःसंयांतिसहसारथैश्चप्रतिमंडिताः॥२५॥नारा
जकेजनपदेनराःशास्त्रविशारदाः॥संवदंतोपतिष्ठंतेवनेषूपवनेषुच॥२६॥नाराज
केजनपदेमाल्यमोदकदक्षिणाः॥देवताभ्यर्चनार्थायकल्प्यंतेनियतैर्जनैः॥२७॥नारा
जकेजनपदेचंदनागुरुरूषिताः॥राजपुत्राविराजंतेवसंतेइवशाखिनः॥२८॥यथाह्य
नुदकानद्योयथाचाप्यतृणंवनं॥अगोपालायथागावस्तथाराष्ट्रमराजकं॥२९॥ध्वजो
रथस्यप्रज्ञानंधूमोज्ञानंविभावसोः॥तेषांयोनोध्वजोराजासदेवत्वमितोगतः॥३०॥
नाराजकेजनपदेस्वकंभवतिकस्यचित्॥मत्स्याइवजनानित्यंभक्षयंतिपरस्परं॥३१॥

२०७

२८॥२९॥प्रज्ञानंअनुमापकः तेषांराजकर्तृणांनोस्माकंयोराजा॰ध्वजः अस्मासुराज्यभारप्रतिष्ठाज्ञा
पकः सइतोदेवत्वंगतः एवंचास्मानितः परंकेपिजनानसंपंतीतिभावः।३०।स्वकंजीवनमित्यर्थः।३१

नर्तकः सूत्रधारः नराश्च प्रहृष्टाश्च यत्र तादृशा उत्सवा देवाद्युत्सवाः समाजाः तत्तज्ज्ञाष्ठ्कार्यसिद्धिप्रयोजनाः ॥ समूहाः तेऽभयेपि हृष्टा दृष्टशांतिद्वारा राष्ट्रवर्धना भवंति तेन वर्धंते १५ व्यवहारिणः कमप्यर्थमुद्दिश्यान्योन्यं विवदमानाः सिद्धार्थाः निर्णीतार्थाः यद्वा व्यवहारिणः पापजीविनः असिद्धार्था न निष्पन्न

नाराजके जनपदे प्रहृष्टनटनर्तकाः ॥ उत्सवाश्च समाजाश्च वर्धंते राष्ट्रवर्धनाः ॥ १५ ॥ नाराजके जनपदे सिद्धार्था व्यवहारिणः ॥ कथाभिरभिरज्यंते कथाशीलाः कथाप्रियैः ॥ १६ ॥ नाराजके जनपदे तूद्यानानि समागताः ॥ सायाह्ने क्रीडितुं यांति कुमार्यो हेमभूषिताः ॥ १७ ॥ नाराजके जनपदे धनवंतः सुरक्षिताः ॥ शेरते विवृतद्वाराः कृषिगोरक्षजीविनः ॥ १८ ॥ नाराजके जनपदे वाहनैः शीघ्रवाहिभिः ॥ नरा निर्यांत्यरण्यानि नारीभिः सह कामिनः ॥ १९ ॥ नाराजके जनपदे बद्धघंटा विषाणिनः ॥ अटंति राजमार्गेषु कुंजराः षष्टिहायनाः ॥ २० ॥ नाराजके जनपदे शरान्संततमस्यतां ॥ श्रूयते तलनिर्घोष इष्वस्त्राणामुपासने ॥ २१ ॥ नाराजके जनपदे वणिजो दूरगामिनः ॥ गच्छंति क्षेममध्वानं बहुपण्यसमाचिताः ॥ २२ ॥ ॥

प्रयोजनाः कथाशीलाः पुराणादिकथाश्रवणशीलाः कथाप्रियैः कथाकथनप्रियैः पौराणिकैरुक्ताभिः कथाभिर्नरज्यंते वक्तृश्रोतॄणां स्वास्थ्याभावात् ॥ १६ ॥ समागताः मिलिताः ॥ १७ ॥ १८ ॥ १९ ॥ विषाणिनः प्रशस्तदंताः ॥ २० ॥ उपासने अभ्यासे ॥ २१ ॥ २२ ॥ ॥ ॥

राजनि जीवत्यपि तद्वचनं वयं नातिक्रमामः अत इदानीमपि त्वमेव गतिरिति वसिष्ठं प्रति सर्वेषामुक्तिः
३७ स त्वं नोस्माकं वृत्तं कृत्यं नृपं विना प्रमुख्यमिति शेषः ऽनादृशं वीक्ष्य राष्ट्रं चेदं तं विनाऽरण्यभूतं समीक्ष्य
रिक्ष्वाकुसुतं भरतं तथान्यं वाकं चिद्राजानमभिषेचय ३८ इति श्रीरामाभिरामे श्रीरामीये रामायणति

जीवत्यपि महाराजे तस्यैव वचनं वयं॥ नातिक्रमामहे सर्वे वेलां प्राप्येव सागरः॥ ३७॥ स नः समी
क्ष्य द्विजवर्य वृत्तं नृपं विना राष्ट्रमरण्यभूतं॥ कुमारमिक्ष्वाकुसुतं तथान्यं त्वमेव राजानमि
हाभिषेचय॥ ३८॥ इत्यार्षे श्रीरामायणे वाल्मीकीये अयोध्याकांडे सप्तषष्ठितमः सर्गः॥ ६७॥
तेषां तद्वचनं श्रुत्वा वसिष्ठः प्रत्युवाच ह॥ मित्रामात्यजनान्सर्वान्ब्राह्मणांस्तानिदं वचः॥ १॥
यदसौ मातुलकुले पुरे राजगृहे सुखी॥ भरतो वसति भ्रात्रा शत्रुघ्नेन मुदान्वितः॥ २॥ त
च्छीघ्रं जवना दूता गच्छंतु त्वरितं हयैः॥ आनेतुं भ्रातरौ वीरौ किं समीक्षामहे वयं॥ ३॥ ग
च्छंत्विति ततः सर्वे वसिष्ठं वाक्यमब्रुवन्॥ तेषां तद्वचनं श्रुत्वा वसिष्ठो वाक्यमब्रवीत्॥ ४॥

लके अयोध्याकांडे सप्तषष्ठितमः सर्गः॥ ६७॥ मित्रामात्यजनाः सुमंत्रादयः ब्राह्मणा मार्कंडेया
दयः॥ १॥ यत् यस्मात् राज्ञा कैकेयीवचनाद्दत्तराज्यो भरतो मातुलकुले वसति॥ २॥ अतस्ता
वानेतुं दूता गच्छंतु वयं किं समीक्षामहे विचारयामहे राज्ञैव भरतराज्यस्य निश्चितत्वादि
ति भावः॥ ३॥ मंत्रिणो वसिष्ठवाक्यमनुजानंति गच्छंत्विति॥ ४॥ ॥ राम ॥

यंसंभिन्नमर्यादाः छन्दयितस्वजातिवर्णाश्रममर्यादाः अतएव पूर्वं राजदंडनिपीडिता नास्तिकाः संतितेपीदानीं छि
न्नसंशया राजदंडशंकारहिताः संतो भावाय प्रभुत्वाय कल्पंते ॥३२॥ दृष्टिरक्तः यथा शरीरस्य हितसाध
ने अहितनिवारणे च नित्यमेव प्रवर्तनेन तथा राजा राष्ट्रस्य सत्यधर्मयोः प्रभवः प्रवर्तको राजा प्रजानां हितसा
धने अहितनिवारणे च नित्यमेव प्रवर्तते ॥३३॥ राजा सत्यं च धर्मश्च सत्यधर्मयोः प्रवर्तक इत्यर्थः कुलवतां तेत्र

ये हि संभिन्नमर्यादा नास्तिकाः छिन्नसंशयाः ॥ तेपि भावाय कल्पंते राजदंडनिपीडिताः ॥३२॥ य
थादृष्टिः शरीरस्य नित्यमेव प्रवर्तते ॥ तथा नरेंद्रो राष्ट्रस्य प्रभवः सत्यधर्मयोः ॥३३॥ राजा सत्यं च
धर्मश्च राजा कुलवतां कुलं राजा माता पिता चैव राजा हितकरो नृणां ॥३४॥ यमो वैश्रवणः शक्रो वरु
णश्च महाबलः ॥ वि[illegible]शिष्यते नरेंद्रेण वृत्तेन महता ततः ॥३५॥ अहो तम इवेदं स्यान्न प्रज्ञायेत
किंचन ॥ राजा चेन्न भवेल्लोके विभजन्साध्वसाधुनी ॥३६॥

बीजशुद्धिमतां कुलं तत्प्रवर्तकः ॥३४॥

यमादयो महता वृत्तेन युक्तेन राज्ञा विशिष्यते ॥ अतिशय्यंते तिरस्क्रियंते यमस्य दंडमात्रं कुबेरस्य धन
दत्वमेव इंद्रस्य पालनमेव वरुणस्य सदाचारे नियमनमेव गुणचतुष्टयवता ज्ञाता तिरस्क्रियंते इति
भावः ॥३५॥ साध्वसाधुनी विभजन् व्यवस्थापयन् राजा चेन्न स्यात् तदा अहो सूर्याभावे तम इव तमसीव
न किंचित् कर्तव्याकर्तव्यं प्रज्ञायेत प्रतीयेत तम इति प्रथमार्थे सप्तमी ॥ अकारांततमशब्दस्य तम इ
तिसप्तम्यंतं तमस्यापि तमतायेति हि [illegible] शात् ॥३६॥

प्रास्थानिकं कार्यशेषं प्रस्थानप्रयोजनकं कार्यशेषं विशिष्टपाथेयादिसंपादनलक्षणं कृत्वाऽनंतरं
ययुः ॥११॥ अपरतालस्य तदाख्यदेशस्य न्यंतेन पश्चिमभागेन प्रलंबाख्यदेशस्योत्तरं भागं प्रति नि
षेवमाणा मालिनीं नदीं मध्येनातीत्य जग्मुः अपरतालप्रलंबौ पर्वताविति कतकतीर्थौ ॥ अयोध्या

ततः प्रास्थानिकं कृत्वा कार्यशेषमनंतरं ॥ वसिष्ठेनाभ्यनुज्ञाता दूताः संत्वरितं ययुः ॥११॥
न्यंतेनापरतालस्य प्रलंबस्योत्तरं प्रति ॥ निषेवमाणास्ते जग्मुर्नदीं मध्येन मालिनीं ॥१२॥
ते हास्तिनपुरे गंगां तीर्त्वा प्रत्यङ्मुखा ययुः ॥ पंचालदेशमासाद्य मध्येन कुरुजांगलं ॥१३॥

याः पश्चिमाभिमुखं गच्छंतस्तयोरन्योन्यं पूर्वापरस्थयोरपरतालप्रलंबयोर्मध्येन मालिनीं निषेव
माणा उदङ्मुखाः कियद्दूरं गत्वा ततः ॥ प्रलंबस्योत्तरभागेन पश्चिमाभिमुखा जग्मुरित्यर्थं तीर्थ
आह ॥१२॥ ते प्रत्यगुदीचीं दिशं यांतस्ते पंचालदेशमासाद्य आग्नेयी दिङ्मुखप्रवाहं गंगां हस्ति
नापुरसमीपे तीर्त्वा प्रत्यङ्मुखाः संतो मध्येन कुरुजांगलं कुरुजांगलस्य मध्यमार्गमाश्रित्य ययुः ॥१३

सिद्धार्थादयो मंत्रिसमाननामानो दूतान् मंत्रिण इत्याहुः अन्ये तु मंत्रिणो दूताश्च मे इत्याहुः इति कर्तव्यं गतैस्तु
ष्माभिरनुष्ठेयकृत्यजातं ॥५॥ शीघ्रजवैरतिवेगैः ममशासनाद्भरतो वाच्य इत्यन्वयः ॥६॥ कथं वाच्यस्तदा
ह पुरोहित इति अत्ययं असत्यकालातिक्रमं न देवात्ययिकं ॥ अतिक्रमे एती त्यव्ययं कालातिक्रमेण

एहि सिद्धार्थ विजय जयंताशोकनंदन ॥ श्रूयतामिति कर्त्तव्यं सर्वानेव ब्रवीमि वः ॥५॥ पुरं रा
जगृहं गत्वा शीघ्रं शीघ्रजवैर्हयैः ॥ त्यक्तशोकैरिदं वाच्यः शासनाद्भरतो मम ॥६॥ पुरोहितस्त्वां कु
शलं प्राह सर्वे च मंत्रिणः ॥ त्वरमाणश्च निर्याहि कृत्यमात्ययिकं त्वया ॥७॥ मा चास्मै प्रोषितं रा
मं मा चास्मै पितरं मृतं ॥ भवंतः शंसिषुर्गत्वा राघवाणामितः क्षयं ॥८॥ कौशेयानि च वस्त्राणि
भूषणानि वराणि च ॥ क्षिप्रमादाय राज्ञश्च भरतस्य च गच्छत ॥९॥ दत्तपथ्यशना दूता जग्मुः
स्वं स्वं निवेशनं ॥ केकयांस्ते गमिष्यंतो हयानारुह्य संमतान् ॥१०॥

तिनश्यतीति वाच्योर्थः विन
यादित्वात्ठक् तादृशं कृत्यमस्ति ॥ अतस्त्वरमाणो निर्याहि इति वाच्यमित्यनुकर्षः ॥७॥ इतः स्त्रीरू
पान्मृत्वा त्क्षयमाशंसिषुः ॥ मा कथयंतु ॥८॥ राज्ञः केकयराजस्य दत्तपथ्यशनाः दत्तं पथ्यशनसा
धनं द्रव्यं येषां तेन तथा बाहुलकात् सप्तम्या अलुक् जग्मुः स्त्रीपुत्रादेः स्वप्रयाणकथनार्थं संमतान्
वेगवत्त्वेनातिशोषः ॥१०॥

विल्लोः पदं सुदामपर्वतस्थं विष्णुपदांकितस्थानं विपाशाशाल्मल्योर्नद्योर्नेष्येत्यनुकर्षः ॥१९॥२०॥ विकृष्टेन विप्रकृष्टेनातिदुरेणेत्यर्थः सता निरुपद्रवेण गिरिव्रजं केकयराजगृहापरनामकं सप्तरात्रेणागत्वा वैदूतास्तैश्रांतवाहनाइतिच्छित्वा चित्याउ स्कंदश्यपते ॥२१॥ भर्तुरिति भर्तर्नियोनुर्वसिष्ठस्य प्रियार्थं शीघ्रगमने

विल्लोः पदं प्रेक्षमाणा विपाशां चापि शाल्मलीं ॥ नदीर्वापिस्तटाका निपल्वलानि सरांसि च ॥१९॥
पश्यंतो विविधांश्चापि सिंहान्व्याघ्रान्मृगान्द्विपान् ॥ ययुः पथातिमहता शासनं भर्तुरीप्सवः
॥२०॥ ते श्रांतवाहना दूता विकृष्टेन सता पथा ॥ गिरिव्रजं पुरवरं शीघ्रमासेदुरंजसा ॥२१॥ भर्तुः
प्रियार्थं कुलरक्षणार्थं भर्तुश्च वंशस्य परिग्रहार्थं ॥ अहेडमानास्त्वरया स्म दूता रात्र्यां तु ते
तत्पुरमेव याताः ॥२२॥ इत्यार्षे श्रीरामायणे वाल्मीकीये अयोध्याकांडे ऽष्टषष्टितः सर्गः ॥६८॥

नप्रीतिसंपादनार्थं यद्वा भर्तुर्दशरथस्य प्रियार्थं शीघ्रानीतभरतकर्तृकौर्ध्वदैहिकेन परलोकप्राप्तेः कुलस्य प्रजाकुलस्य रक्षणार्थं भर्तुर्दशरथस्य यो वंशो वंशपरंपरागतराज्यं तस्य परिग्रहार्थं भरतेन स्वीकारार्थं ॥ अहेडमाना अपेक्षारहिताः हेड अनादरे अत एव त्वरयायुक्ता दूता रात्र्यामेव तत्पुरं याताः ॥
२२॥ अत्र कतकोक्तसंख्या रीत्या षट्श्लोकास्त्रुटिताः ॥२५॥ इति श्रीरामाभिरामे श्रीरामीये रा॰ अयो॰ अ
ष्टषष्टितमः सर्गः ॥६८॥

२२०

१४ शरदंडांतदाख्यानंदी उपगम्यातिजग्मुः अतिचक्रमुः १५ निकूलवृक्षंशरदंडापश्चिमतीरवृक्षं दिव्यं विशिष्टदेवताधिष्ठितं सत्योपयाचनंतन्नामकं अन्वर्थनामकत्वादिष्टदातारं अतएवाभिवाद्यं सर्वनमस्कार्यं वृक्षमभिगम्यप्रदक्षिणीकृत्य कुलिंगाख्यांनगरींप्राविशन् १६ अभिकालतेजोभिभवनोग्रमीतनोयोधिवनाच्युताइतिपाठांतरं पितृपैतामहीमित्यार्षं इक्ष्वाकूणांपितृपितृपितामहसंबं

सरांसिचसुफुल्लानिनदीश्चविमलोदकाः निरीक्षमाणाजग्मुस्तेदूताःकार्यवशाद्द्रुतं १४ तेप्रसन्नोदकांदिव्यांनानाविहगसेवितां उपातिजग्मुर्वेगेनशरदंडांजलाकुलां १५ निकूलवृक्षमासाद्यदिव्यंसत्योपयाचनं अभिगम्याभिवाद्यंतंकुलिंगांप्राविशन्पुरीं १६ अभिकालंततःप्राप्यतेजोभिभवनाच्युताः पितृपैतामहींपुण्यांतेरुरिक्षुमतींनदीं १७ अवेक्ष्यांजलिपानांश्चब्राह्मणान्वेदपारगान् ययुर्मध्येनवाल्हीकान्सुदामानंचपर्वतं १८

धिनीमिक्षुमतींतेरुः १७ अंजलिपानान् अंजलिमात्रप्रमाणजलाहारान् इक्षुमतीतीरस्थान् वाल्हीकान्जनपदान् इत्येके तद्देशस्थानंजलिपानान्ब्राह्मणानवेक्ष्यतत्पन्वयः अंजलिनापिबंतितिनादृशान्वेदपारगान्ब्राह्मणान्दृष्ट्वेत्यनेनवाल्हीकदेशस्यात्मनाचारत्वंसूचितं यत्रवेदपारगाब्राह्मणाअपीदृशाः कांकथान्येषामिति तथाभारतेकर्णपर्वणिवाल्हीकानामतदेशानतत्रदिवसंवसेत्इतिपरे १८

गोमयह्रदे गोमयपूर्णे ह्रदे ८ ९ तिलोदनं तिलमिश्रमोदनं अन्वगाहत तेत्यं ततः प्रथमः स्वप्नः १० स्वप्नां
तरमाह स्वप्नेपीति नभसा समावनामेवोपरुद्धां तिरोहितां यद्वा सुरस्तोभिरुपरुद्धां ११ औ

स्वप्ने पितरमद्राक्षं मलिनं मुक्तमूर्धजं ॥ पतंतमद्रिशिखरात्कलुषे गोमये ह्रदे ८ प्लव
मानश्च मे दृष्टः स तस्मिन् गोमये ह्रदे ॥ पिबन्नंजलिना तैलं हसन्निव मुहुर्मुहुः ९
ततस्तैलोदनं भुक्त्वा पुनः पुनरधःशिराः ॥ तैलेनाभ्यक्तसर्वांगस्तैलमेवान्वगाहत ॥ १०
स्वप्नेपि सागरं शुष्कं चंद्रं च पतितं भुवि ॥ उपरुद्धां च जगतीं तमसेव समावृतां ॥ ११ औपवा
ह्यस्य नागस्य विषाणं शकलीकृतं ॥ सहसा चापि संशांता ज्वलिता जातवेदसः ॥ १२ ॥ अ
वदीर्णां च पृथिवीं शुष्कांश्च विविधान्द्रुमान् ॥ अहं पश्यामि विध्वस्तान्सधूमांश्चैव
पर्वतान् ॥ १३ ॥ पीठे कार्ष्णायसे चैव निषण्णं कृष्णवाससं ॥ प्रहसंति स्म राजानं प्रमदाः
कृष्णपिंगलाः ॥ १४ ॥ त्वरमाणश्च धर्मात्मा रक्तमाल्यानुलेपनः ॥ रथेन खर[illegible]रयु
क्तेन प्रयातो दक्षिणामुखः ॥ १५ ॥ प्रहसंतीव राजानं प्रमदा रक्तवासिनी ॥ प्रकर्षंती मया दृष्टा
राक्षसी विकृतानना ॥ १६ ॥

औपवाह्यस्य राजवाहनस्य नागस्य दंतिनः विषाणं दंतः ज्वलिता
अग्नयोऽकस्माच्छांता दृष्टाः १२ अवदीर्णां विदीर्णां ॥ १३ कृष्णाश्च पिंगलाः प्रमदाः १४ ॥ १५ रक्तवा
सिनी रक्तवस्त्रा प्रहसंतीव ॥ १६ ॥ रघुवीर ॥ ॥ ॥

यामिति॰ यामेवरात्रिंप्राप्यद्रुताः पुरींप्रविशंतिस्मेतियोजना॰ अयंवक्ष्यमाणः सुखांप्रभातरूपांतांरात्रिंप्राप्याप्रि यंस्वप्नंदृष्ट्वापर्यतप्यते॰ त्यन्वयः प्रातःकालिकत्वेनशीघ्रफलतास्वप्नस्यसूचिता २ आयासंदुःस्वप्नदर्श नजंदुःखंविनयिष्यंतः अपनेष्यंतः ३ अन्येतदूरीकुर्वंतोवीणादिवादयंति॰ अपरेशांतिंतस्यखेदशां

यामेवरात्रिंतेद्रुताःप्रविशंतिस्मतांपुरीं॥ भरतेनापितांरात्रिंस्वप्नोदृष्टोयमप्रियः॥ १ सुखा मेवतुतांरात्रिंदृष्ट्वातंस्वप्नमप्रियं॥ पुत्रोराजाधिराजस्यसुभृशंपर्यतप्यत॥ २ तप्यमानं तमाज्ञायवयस्याःप्रियवादिनः॥ आयासंविनयिष्यंतःसभायांचक्रिरेकथाः॥ ३ वादयंति तदाशांतिंलासयंत्यपिचापरे॥ नाटकान्यपरेप्राहुर्हास्यानिविविधानिच॥ ४ सतैर्महात्माभ रतःसखिभिःप्रियवादिभिः॥ गोष्ठीहास्यानिकुर्वद्भिर्नप्राहृष्यतराघवः॥ ५ तमब्रवीत्प्रि यसखोभरतंसखिभिर्वृतं॥ सुहृद्भिःपर्युपासीनःकिंसखेनानुमोदसे॥ ६ एवंब्रुवाणंसुहृ दंभरतःप्रत्युवाचह॥ शृणुत्वंयन्निमित्तंमेदैन्यमेतदुपागतं॥ ७

शांतिंतस्यखेदशांतिमुद्दिश्यलास

यंतिनर्तयंतिवेश्याःशांतिंलोलयंतीतिपाठेनस्पशांतिंनृत्यभूमिमवस्थानं॰ लोलयंतिचालयंति श्लोका द्यर्थप्रश्नव्याजेनेत्यर्थः॥ अपरेहास्यानिहास्यरसप्रधानानिविविधानिनाटकान्याहुः॥ ४ गोष्ठीहा स्यानिगोष्ठ्युचितानिहास्यानिनर्माणि॥ ५ प्रियसखःसखिमात्रस्यप्रियत्वविवादाद्न्ययोगतिर्न्नैयाञ्च त्यंतप्रियइति॰॥ नानुमोदसेनानंदसीतिशेषः॥ ६॥ ७॥ ॥ ॥ ॥

असत्यादुःसद्गापरिखा· परिखाप्रदेशवर्त्तिप्राकारयं त्रसम्मूढोयस्पतत्· असत्यपरिघमितिपाठांतरं १ राज्ञाकेकयेन· राजपुत्रेणयुधाजितासमागम्य· वसिष्ठादिदत्तपदार्थपुरःसरतयासंगम्यपूर्वंयथो चितव्यवहारंकृत्वाताभ्यामर्चिताःराज्ञःस्वीयस्यभरतस्यपादौगृहीत्वानमस्कृत्यतंभरतंवच

भरतेब्रुवतिस्वप्नंदूतास्तेक्लांतवाहनाः॥ प्रविश्यासत्यपरिघंरम्यंराजगृहंपुरं॥१॥ समाग म्यचराज्ञातेराजपुत्रेणचार्चिताः॥ राज्ञःपादौगृहीत्वाचतमूचुर्भरतंवचः॥२॥ पुरोहित स्त्वांकुशलंप्राहसर्वेचमंत्रिणः॥ त्वरमाणश्चनिर्याहिकृत्यमात्ययिकंत्वया॥३॥ इमानि चमहार्हाणिवस्त्राण्याभरणानिच॥ प्रतिगृह्यविशालाक्षमातुलस्यचदापय॥४॥ अत्रविंश तिकोट्यस्तुनृपतेर्मातुलस्यच॥ दशकोट्यस्तुसंपूर्णास्तथैवचनृपात्मज॥५॥ प्रतिगृह्य तुतत्सर्वंस्वनुरक्तसुहृज्जने॥ दूतानुवाचभरतःकामैःसंप्रतिपूज्यतान्॥६॥ कच्चित्सुकु शलीराजापितादशरथोमम॥ कच्चिदारोग्यताराममेलक्ष्मणेचमहात्मनि॥७॥

ऊचुःराज्ञःकेकयराजस्यैवेत्यन्ये॥२॥ मंत्रिणःप्राहुरितिविपरिणामः·अत्यायिकंकालातिक्रमासहं कृत्यमस्तीतिशेषः॥३॥ मातुलस्यचचात्मातामहस्यच॥४॥ अत्रभ्रात्रभ्रइव्यौविंशतिकोट्यः॥ तत्सं ख्याकवस्त्राभरणानिनृपतेर्मातामहस्यतदर्धंमातुलस्य॥५॥ सुहृज्जनेमातुलादिरूपेप्रदाप्येतिशे षःकामैःअभिमतवस्तुजातैः॥६॥ अथक्रमेणकुशलंपृच्छतिराजेत्यादि॥७॥ ॥

इमांभयावहांरात्रिंप्राप्यएवमेतद्दृष्टं॰ अहंमरिष्यामीतिविपरिणामः॥१७॥ दृष्टदुःस्वप्नफलंनिर्गमयति नरइ
त्यादि॰ धूम्रागंधूम्रशिखा॥१८॥ एतदुक्तंनिमित्तंस्वप्नरूपंदृष्ट्वेतिशेषःवचःयुष्माकंनप्रतिपूजयेनप्रतिये
प्रियेइतिपाठेयुष्माकंवचःप्रतिनयेप्रियनभर्शंमानोभवामीत्यर्थःयड॰ताच्छ्रडितिकन्नकः॥१९॥भया॥

एवमेतन्मयादृष्टमिमांरात्रिंभयावहां॥ अहंरामोथवाराजालक्ष्मणोवामरिष्यति॥१७॥ नरोया
नेनयःस्वप्नेखरयुक्तेनयातिहि॥ अचिरात्तस्यधूमाग्रंचितायांसंप्रदृश्यते॥१८॥ एतन्निमि
त्तंदीनोहंनवचःप्रतिपूजये॥ शुष्यतीवचमेकंठोनस्वस्थमिवमेमनः॥१९॥ नपश्यामिभय
स्थानंभयंचैवोपधारये॥ भ्रष्टश्चस्वरयोगोमेछायाचापगताममः॥२०॥ जुगुप्सन्निवचा
त्मानंनचपश्यामिकारणं॥२१॥ इमांचदुःस्वप्नगतिंनिशाम्यहित्वनेकरूपामवितर्कितां
पुरा॥ भयंमहत्तद्धृदयान्नयातिमेविचिंत्यराजानमचिंत्यदर्शनं॥२२॥ इत्यार्षेश्रीरा॰ अ
योध्या॰ एकोनसप्ततितमः सर्गः॥६९॥

स्थानंभयकारणं उपधारये अवशात्तोविमर्शि॰ छा
याकांतिःअपगतापूर्वरूपंत्यक्त्वनीमलिनेत्यर्थः॥२०॥ आत्मानंजुगुप्सइव॰ किमर्थममजन्मेत्येव
मादिरूपेण॰ कारणंजुगुप्साकारणं॰ जुगुप्सन्निवेतिपाठेजुगुप्सन्निवतिष्ठामितत्कारणंचनप
श्यामीत्यर्थः॥२१॥ पुरापूर्वमतर्कितां अनेकरूपांदुःस्वप्नगतिंनिशाम्यहिदुःस्वप्नस्मृत्वाहिस्मृत्वैव
चिंतायाअविषयदर्शनंतमपितातंविचिंत्यराजानदर्शनविषयांचिंतांप्राप्यमहद्भयंमेहृदयान्नयाति

१६ सुप्रजाः शुभप्रजावती ॥ १७ ॥ तौ च कुशलं ब्रुयादिति संबंधः ॥ १८ ॥ तस्मै भरतायेत्यन्वयः चित्रान्कंबला
न्चित्राणि अजिनानि मृगाणां ॥ १९ ॥ अतिसंवृद्धान्यत्नेन वर्धितान् ॥ व्याघ्रवीर्यबलोपमान् ॥ तदुप

भरतेनैवमुक्तस्तु नृपो मातामहस्तदा ॥ तमुवाच शुभं वाक्यं शिरस्याघ्राय राघवं ॥ १६ ॥ गच्छ
तातानुजाने त्वां कैकेयी सुप्रजास्त्वया ॥ मातरं कुशलं ब्रूयाः पितरं च परंतप ॥ १७ ॥ पुरोहितं
च कुशलं ये चान्ये द्विजसत्तमाः ॥ तौ च तात महेष्वासौ भ्रातरौ रामलक्ष्मणौ ॥ १८ ॥ तस्मै हस्त्युत्त
मांश्चित्रान्कंबलानजिनानि च ॥ सत्कृत्य केकयो राजा भरताय ददौ धनं ॥ १९ ॥ अंतःपुरेऽति
संवृद्धान्व्याघ्रवीर्यबलोपमान् ॥ दंष्ट्रायुक्तान्महाकायान्शुनश्चोपायनं ददौ ॥ २० ॥ रुक्म
निष्कसहस्रे द्वे षोडशाश्वशतानि च ॥ सत्कृत्य कैकयीपुत्रं केकयो धनमादिशत् ॥ २१ ॥ त
दामात्यानभिप्रेतान्विश्वास्यांश्च गुणान्वितान् ॥ ददावश्वपतिः शीघ्रं भरतायानुयायिनः ॥ २२ ॥
ऐरावतानैंद्रशिरान्नागान्वै प्रियदर्शनान् ॥ खरान्शीघ्रान्सुसंयुक्तान्मातुलोऽस्मै धनं ददौ ॥ २३ ॥
स दत्तं केकयेंद्रेण धनं तन्नाभ्यनंदत ॥ भरतः कैकयीपुत्रो गमनत्वरया तदा ॥ २४ ॥

मवीर्यबलवतः बलान्वितानिति पाठांतरं ॥ २० ॥ निष्कसुरोभूषणे धनमुक्तरूपं ॥ २१ ॥ अमात्यान् ॥
स्वीयान् ॥ अश्वपतिः केकयः ॥ २२ ॥ ऐरावतान् इरावतपर्वतभवान् ऐरावतकुलोद्भवान्वा ऐंद्र
शिरान् ऐंद्रशिरनामकदेशभवान् ॥ नागान्गजान् ॥ २३ ॥ २४ ॥ राम

८ ९ मातुः स्वभावानुवादः पूर्वं तस्या अरोगं पप्रच्छ इति॰ आत्मकामेति॰ आत्मप्रयोजनकामा॰ प्राज्ञमानिनी॰ आत्मानं प्राज्ञां मन्यते सा ॥ १० ॥ संप्रश्रितं सविनयं संदिष्टं च ॥ ११ ॥ येषां कुशलमिच्छसि तेषां कुशलमेव॰ त्वरय

आर्या च धर्मनिरता धर्मज्ञा धर्मवादिनी ॥ अरोगा चापि कौसल्या माता रामस्य धीमतः ॥ ८ ॥ कच्चित्सुमित्रा धर्मज्ञा जननी लक्ष्मणस्य या ॥ शत्रुघ्नस्य च वीरस्य अरोगा चापि मध्यमा ॥ ९ ॥ आत्मकामा सदा चंडी क्रोधना प्राज्ञमानिनी ॥ अरोगा चापि मे माता कैकेयी किमुवाच ह ॥ १० ॥ एवमुक्तास्तु ते दूता भरतेन महात्मना ॥ ऊचुः संप्रश्रितं वाक्यमिदं तं भरतं तदा ॥ ११ ॥ कुशलास्ते नरव्याघ्र येषां कुशलमिच्छसि ॥ श्रीश्च त्वां वृणुते पद्मा युज्यतां चापि ते रथः ॥ १२ ॥ भरतश्चापि तान् दूतानेवमुक्तोऽभ्यभाषत ॥ आपृच्छे यं महाराजं दूताः संत्वरयंति माम् ॥ १३ ॥ एवमुक्त्वा तु तान् दूतान् भरतः पार्थिवात्मजः ॥ दूतैः संचोदितो वाक्यं मातामहमुवाच ह ॥ १४ ॥ राजन् पितुर्गमिष्यामि सकाशं दूतचोदितः ॥ पुनरप्यहमेष्यामि यदा मे त्वं स्मरिष्यसि ॥ १५ ॥

ह्वानेन शंका न कार्या ॥ पद्मा पद्मवनी श्रीस्त्वां वृणुते॰ तथा शोभा त्वयि दृश्यते॰ येन सर्वामंगलशंकाव्यावृत्तिः ततो यात्रायै रथो युज्यताम् ॥ १२ ॥ दूता मां संत्वरयंतीत्युक्त्वा महाराजमापृच्छे गमनानुज्ञापयेद् इति दूतानभ्यभाषतेत्यन्वयः ॥ १३ ॥ संचोदितः शीघ्रं पृच्छेत्येवं प्रेरितः ॥ १४ ॥ मे स्मरिष्यसीति शेषत्वविवक्षायां षष्ठी मामित्यर्थः ॥ १५ ॥

सुदामांतदाख्यांनदीं ॥ इदंमार्गांतरंचतुरंगबलगमनोचितं दूतास्तुशीघ्रंतन्नगरंप्राप्तयेकांतारमार्गेणाग ता: इदंचदूतमार्गोक्तनद्यादीनामिहानुक्तेरन्येषामुक्तेश्चज्ञायते ॥१॥ दूरेपारंपरतीरंयस्यास्तांह्रादि नीतदाख्यांनदींप्रत्यक्स्रोतस्तरंगिणींपश्चिमप्रवाहांनदीं ॥ ततःशतद्रुंतत्संज्ञिकां ॥२॥ ऐलधा नेनदाख्यग्रामे नदींतत्ग्रामवर्त्तिनीं ऐलधानीमितिपाठेतदाख्यामित्यर्थकतकः अपरपर्व ताजनपदविशेषाः ॥ अपरपर्पटानितिपाठांतरं ॥ शिलांनदाख्यनदींआकुर्वतीनामकंनद्यंतरमि

सप्राङ्मुखोराजगृहादभिनिर्यायवीर्यवान् ॥ ततःसुदामांद्युतिमान्संतीर्यावेक्ष्यतांनदीं ॥१॥ ह्रादिनींदूरपारांचप्रत्यक्स्रोतस्तरंगिणीं ॥ शतद्रुमतरच्छ्रीमान्नदीमिक्ष्वाकुनंदनः ॥२॥ ऐल धानेनदींतीर्त्वाप्राप्यचापरपर्पटान् ॥ शिलामाकुर्वतींतीर्त्वाआग्नेयंशल्यकर्षणं ॥३॥ सत्यसं धःशुचिर्भूत्वाप्रेक्षमाणःशिलावहां ॥ अभ्यगात्समहाशैलान्वनंचैत्ररथंप्रति ॥४॥

तिकतकःशिलामासमंतात्कुर्वतीशिलाकर्षणस्वभावामित्यर्थइतितीर्थःस्वमध्यपतितंवस्तु शिलारूपंकुर्वतीमित्यर्थःतरणंचतद्वर्तिशिलाप्रायकाष्ठनौकयेत्यन्ये आग्नेयंआग्नेयदि गातंशल्यकर्षणं तद्दोषघ्न्युपेतंदेशं तत्रचशिलावहानदीनिकतकःआग्नेयंशल्यकर्तनमि तिग्रामद्वयंतन्मध्येशिलावहानदीतितीर्थः ॥३॥ महाशैलानतीत्यचैत्ररथंवनमभ्यगात् चैत्र रथंयातुंमहाशैलानत्यगादितिपाठांतरेऽर्थः ॥४॥

२५॥ सइतिसः माता महादिभ्योलब्धधनः यात्रापरिकरसन्नद्धनायस्ववेश्माभिगम्यकतयात्रापरिकरस्ततोभ्य
तिक्रम्यनिर्गत्यनरादिसंकुलंराजराजमार्गंप्रपेदेसुमहती श्रीःसुमहद्धीस्तद्वान्॥२६॥ अभ्यतीत्यस्वगृ
हाद्वाजगृहपर्यंतंराजमार्गमतीत्यर्थः॥२७॥ मातुलंच-चेनमातामहीमातुलानौ॥२८॥ मंडलाकारा॥ॱ॥च

बभूवत्वस्यहृदयेचिंतासुमहतीतदा॥ त्वरयाचापिदूतानांस्वप्नस्यापिचदर्शनात्॥२५॥ सस्व
वेश्माभ्यतिक्रम्यनरनागाश्वसंकुलं॥ प्रपेदेसुमहच्छ्रीमान्राजमार्गमनुत्तमं॥२६॥ अभ्यतीत्यः
ततोपश्यद्दंतःपुरमनुत्तमं॥ ततस्तद्भरतःश्रीमानव्याविवेशानिवारितः॥२७॥ समातामहमा
पृच्छ्यमातुलंचयुधाजितं॥ रथमारुह्यभरतःशत्रुघ्नसहितोययौ॥२८॥ रथान्मंडलचक्रांश्चयो
जयित्वापरंशतं॥ उष्ट्रगोश्वखरैर्भृत्याभरतंयांतमन्वयुः॥२९॥ बलेनगुप्तोभरतोमहात्मासहा
र्यकस्यात्मसमैरमात्यैः॥ आदायशत्रुघ्नमपेतशत्रुर्गृहाद्ययौसिद्धइवेंद्रलोकात्॥३०॥ इत्यार्षे
श्रीरामायणेअयोध्याकांडेसप्ततितमःसर्गः॥७०॥

क्रा॥ॱ॥ येषांतान्-कतकस्त-मंडलाकारतया
रथप्रवर्तनसाधकंचक्रंमंडलचक्रंचतुर्दिक्चक्रमध्यस्थंतद्येषांतान्कांच्यादीचतथेदानीं प्रसिद्ध
मित्याह॥२९॥ बलेनस्वीयेनमातुलीयेनच-आर्यकस्यमातामहस्यसभार्यकःस्वात्मसमैरितिपाठां
तरेभार्यासहितइत्यर्थः॥३०॥ इतिश्रीरामाभिरामेश्रीरामीयेरामायणतिलकेअयोध्याकांडेसप्तति
तमःसर्गः॥७०॥

तोरणांदक्षिणार्धेनतोरणाग्रामस्यदक्षिणभागेनजंबूप्रस्थाख्यंग्राममागात० वरूथंतदाख्यं॥११॥उज्जिहानाया
स्तन्नामकनगर्याः प्रियकाः तन्नामानोवृक्षाः॥१२॥सालांस्तुप्रियकान्इतिपाठेसालशब्दोवृक्षपर्यायः सतांस्ति
तिपाठेसमरतइत्यर्थः शीघ्रान्वाजिनश्वास्थायरथेसंयोज्यअनुज्ञाप्य० मयाशीघ्रंगम्यते० भवद्भिः मंदमागं

तोरणांदक्षिणार्धेनजंबूप्रस्थंसमागमत्॥ वरूथंचययौरम्यंग्रामंदशरथात्मजः॥११॥तत्रवने
रम्यवासंकृत्वासौप्राङ्मुखोययौ॥उद्यानमुज्जिहानायाः प्रियकायत्रपादपाः॥१२॥सतांस्तु
प्रियकान्प्राप्यशीघ्रानास्थायवाजिनः॥अनुज्ञाप्याथभरतोवाहिनींत्वरितोययौ॥१३॥वासंकृ
त्वासर्वतीर्थेतीर्त्वाचोत्तरगांनदीं॥अन्यानदीश्चविविधैः पार्वतीयैस्तुरंगमैः॥१४॥हस्तिपृष्ठ
कमासाद्यकुटिकामप्यवर्तत॥ततारचनरव्याघ्रोलौहित्येवकपीवतीं॥१५॥एकसालेस्थाणु
मतींविनतेगोमतींनदीं॥कलिंगनगरेचापिप्राप्यसालवनंतदा॥१६॥भरतः क्षिप्रमागच्छत्सुप
रिश्रांतवाहनः॥भरतः समतीत्याशुशर्वर्यामरुणोदये॥१७॥

मंतव्यमित्येवं० उज्जिहानायाश्चयं
कुः स्वदेशत्वेनभयाभावात्॥१३॥सर्वतीर्थेतदाख्यग्रामेपार्वतीयैः पर्वतोद्भवैः स्वार्थिकाणंतमित्या
हुः॥१४॥हस्तिपृष्ठकंग्राम० कुटिकानदी० लौहित्येग्रामेकपीवतींनदीं॥१५॥हस्तिपृष्ठइतिएकसाले
तिश्लोकद्वयंप्रक्षिप्तमितिकतकः भरतइति॥१५॥१६॥नातिप्रतीतो० नातिदृषितःप्रतीतोदृषितः ख्यातइ

सरस्वतीइयमत्रपश्चिमप्रवाहा:गंगापदेनात्रसुचक्षुसीतासिंधन्यतमापश्चिमप्रवाहायान्या:एतास्तिस्त्रोपिगंगा प्रवाहाएवेतिपुराणप्रसिद्धं॥तांयुग्मेनसंगमेनप्रतिपद्यप्राप्यवीरमत्स्यानांदेशानांमुत्तरान्देशान्प्राप्यमारुडाख्यंवनंप्राविशत्॥उत्तरमितिपाठेवनविशेषणंतत्॥५॥ततोवेगिनीत्वादिविशेषणवतींकुलिंगाख्यां

सरस्वतींचगंगांचयुग्मेनप्रतिपद्यच॥उत्तरान्वीरमत्स्यानांभारुंडंप्राविशद्वनं॥५॥वेगिनींच कुलिंगाख्यांह्लादिनींपर्वतावृतां॥यमुनांप्राप्यसंतीर्णोबलमाश्वासयत्तदा॥६॥शीतीकृत्वातु गात्राणिक्लांतानामश्वास्यवाजिनः॥तत्रस्नात्वाचपीत्वाचप्रायादादायचोदकं॥७॥राजपुत्रोमहा रण्यमनभीक्ष्णोपसेवितं॥भद्रोभद्रेणयानेनमारुतःखमिवात्ययात्॥८॥भागीरथींदुःप्रत रांसोंशुधानेमहानदीं॥उपायाद्राघवस्त्यक्तांप्राग्वटेविश्रुतेपुरे॥९॥सगंगांप्राग्वटेतीर्त्वासमा यात्कुटिकोष्ठिकां॥सबलस्तांसतीर्त्वाथसमगाद्धर्मवर्धनं॥१०॥ राम ॥

नदींसंतीर्णोयमुनांप्राप्यबलमाश्वासयन्॥६॥गात्राणिवाजिनांशीतीकृत्वा·स्नपनादिना·आश्वास्य क्लांतायांघासादिदानेन·उदकमादायतीर्थबुध्या॥७॥अनभीक्ष्णोपसेवितं·बहुधाजनैरनुपसेवि तं·भद्रेनप्रशस्तेनरथेन·भद्रजातीयेनगजेनवा॥८॥अंशुधानेग्रामेमहानदींगंगांदुष्प्रतरांज्ञा त्वाप्राग्वटेपुरेआगत्यतत्रतांनीर्त्वाकुटिकोष्ठिकांआयात्·तांतीर्त्वाधर्मवर्धनंग्राममगात्॥९॥१०॥

यतो विक्रोशद्भिरिव द्रुमैः नृपालक्षितानि ॥ २४ ॥ अद्यापि उदितेपि सूर्ये अस्मासु प्रत्यासन्नेष्वपि कलमेव्यक्तं ॥ २५ ॥
संमूर्छितो व्याप्तः ॥ २६ ॥ कोणो भेर्यादिवादनदंडः तेन संघट्टितः तदाघातजनितः यः पुरा सदा अदीनगति
रनुभूतः स किं विरतः ॥ २७ ॥ अनिष्टानि अनिष्टसूचकानि पापानि क्रूराणि काकादयः पापं स्यात् क्रूरपाप्मनोः

तान्येतान्यद्य पश्यामि निरानंदानि सर्वशः ॥ सस्तपर्णैरनुपथं विक्रोशद्भिरिव द्रुमैः ॥ २४ ॥ नद्यापि
श्रूयते शब्दो मत्तानां मृगपक्षिणां ॥ संरक्तां मधुरां वाणीं कलं व्याहरतां बहु ॥ २५ ॥ चंदनागरुसंपृ
क्तो धूपसंमूर्छितो मलः ॥ प्रवाति पवनः श्रीमान्किंनु नाद्य यथा पुरा ॥ २६ ॥ भेरीमृदंगवीणानां को
णसंघट्टितः पुनः ॥ किमद्य शब्दो विरतः सदादीनगतिः पुरा ॥ २७ ॥ अनिष्टानि च पापानि पश्यामि
विविधानि च ॥ निमित्तान्यमनोज्ञानि तेन सीदति मे मनः ॥ २८ ॥ सर्वथा कुशलं न स्यात्सर्वथा मम
बंधुषु ॥ तथा ह्यसति संमोहे हृदयं सीदतीव मे ॥ २९ ॥ विषण्णः श्रांतहृदयः त्रस्तः संलुलितेंद्रियः ॥
भरतः प्रविवेशाशु पुरीमिक्ष्वाकुपालितां ॥ ३० ॥ द्वारेण वैजयंतेन प्राविशच्छ्रांतवाहनः ॥ द्वाःस्थैरु
त्थाय विजयं पृष्टस्तैः सहितो ययौ ॥ ३१ ॥

अमनोज्ञानि अशुभसूचकानि निमित्तानि वामाक्षिस्पं
दादीनि ॥ २८ ॥ असति संमोहे तत्कारणे ॥ २९ ॥ विषण्णो दीनः श्रांतहृदयः खिन्नचित्तः संलुलितानि क्षुभिता
नींद्रियाणि यस्य सः ॥ ३० ॥ वैजयंतेन इंद्रप्रासादद्वारतुल्यद्वारेण तन्नामकेन वा विजयं पृष्टः कृत
विजयप्रश्नः विजयमुक्त्वा इति पाठांतरं ॥ ३१ ॥

216

पांडुमृत्तिकासुधाधवलितत्वान्निरानंदत्वाच्च पांडुमृत्तिकारूपकं यज्वादिभिर्व्याप्तापि राजपालितापि पांडुमृत्तिकास
मूहइव निःसारा ॥१५॥१९॥ सायाह्ने उद्यानानि प्रविश्य रात्रौ क्रीडित्वोपरतैर्नरैः प्रातः समंताद्विप्रधावद्भिर्यानि
पूर्वमत्यंतप्रकाशनेतान्यद्यकामिभिः परित्यक्तानि अनुमांतस्तीकृत्य रुदंतीव ममान्यथा महारण्यानीव प्रकाशंते

अयोध्यां मनुना राज्ञा निर्मितां स ददर्श ह ॥ तां पुरीं पुरुषव्याघ्रः सप्तरात्रोषितः पथि ॥१८॥ अयोध्यामग्रतो
दृष्ट्वा सारथिं चेदमब्रवीत् ॥ एषा नातिप्रतीता मे पुण्योद्याना यशस्विनी ॥१९॥ अयोध्या दृश्यते दूरात्सार
थे पांडुमृत्तिका ॥ यज्विभिर्गुणसंपन्नैर्ब्राह्मणैर्वेदपारगैः ॥१५॥ भूयिष्ठमृद्धैराकीर्णा राजर्षिवरपा-
लिता ॥ अयोध्यायां पुरा शब्दः श्रूयते तुमुलो महान् ॥१९॥ समंतान्नरनारीणां तमद्य न शृणोम्यहं ॥
उद्यानानि हि सायाह्ने क्रीडित्वोपरतैर्नरैः ॥२०॥ समंताद्विप्रधावद्भिः प्रकाशंते ममान्यथा ॥ तान्यद्या
नुरुदंतीव परित्यक्तानि कामिभिः ॥२१॥ अरण्यभूतेव पुरी सारथे प्रतिभाति मां ॥ नह्यत्र यानैर्दृ-
श्यंते न गजैर्न च वाजिभिः ॥ निर्यांतो वाभियांतो वा नरमुख्या यथा पुरा ॥२२॥ उद्यानानि पुरा भांति
मत्तप्रमुदितानि च ॥ जनानां रतिसंयोगेष्वत्यंतगुणवंति च ॥२३॥

॥२०॥२१॥ यानैः शिविकादिभिः अभि
यांतः प्रविशंतः ॥२२॥ मत्तप्रमुदितानि मत्तप्रमुदितभृंगकोकिलादिमंति नादृशास्त्रीपुरुषवंति चरत्यर्थ
संयोगे विविधकुसुमललनागृहदीर्घिकाक्रीडापर्वतादियुक्ततयात्यंतगुणवंति अत्यंतमनुकूलानिता

माल्यापणेषु माल्यविक्रयापणेषु पण्यानि माल्यरूपाणि ॥३९॥ नद्धे नव्यापारेण क्रयविक्रयादिव्यापारेण यंत्रिताः निरुद्धापणाः ॥४०॥ मलिनत्वादिगुणकं स्त्रीपुंसं पश्यामि ॥४१॥ ४२ ॥ शृंगाटकं चतुष्पथः रजसारू

माल्यापणेषु राजंते नाद्य पण्यानि वा तथा ॥ दृश्यंते वणिजोप्यद्य न यथा पूर्वमत्र वै ॥३९॥ ध्यानसंविग्नहृदया नष्टव्यापारयंत्रिताः ॥ देवायतनचैत्येषु दीनाः पक्षिमृगास्तथा ॥४०॥ मलिनं चाश्रुपूर्णाक्षं दीनं ध्यानपरं कृशं ॥ सस्त्रीपुंसं च पश्यामि जनमुत्कंठितं पुरे ॥४१॥ इत्येवमुक्त्वा भरतः सूतं तं दीनमानसः ॥ तान्यनिष्टान्ययोध्यायां प्रेक्ष्य राजगृहं ययौ ॥४२॥ तां शून्यशृंगाटकवेश्मरथ्यां रजोरुणद्वारकवाटयंत्रां ॥ दृष्ट्वा पुरीमिंद्रपुरीप्रकाशां दुःखेन संपूर्णतरो बभूव ॥४३॥ बभूव पश्यन्मनसोप्रियाणि यान्यन्यदा नास्य पुरे बभूवुः ॥ अवाक्शिरा दीनमना नहृष्टः पितुर्महात्मा प्रविवेश वेश्म ॥४४॥ इत्यार्षे श्रीरामायणे अयोध्याकांडे एकसप्ततितमः सर्गः ॥७१॥ अपश्यंस्तु ततस्तत्र पितरं पितुरालये ॥ जगाम भरतो द्रष्टुं मातरं मातुरालये ॥१॥ अनुप्राप्तं तु तं दृष्ट्वा कैकेयी प्रोषितं सुतं ॥ उत्पपात तदा हृष्टा त्यक्त्वा सौवर्णमासनं ॥२॥

णानि धूसराणि द्वारकवाटानि द्वारयंत्राणि च यस्यां ॥४३॥ अन्यदा राजजीवने ॥४४॥ इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके अयोध्याकांडे एकसप्ततितमः सर्गः ॥७१॥ अपश्यन्निति ॥१॥२॥

अनेकाग्रहृदयः व्याकुलहृदयः द्वाःस्थं जनं प्रत्यर्च्य सोपचारं निवर्त्य· अश्वपतेः केकयस्य ३२ आनीतः दूतद्वारे
तिशेषः कारणेन विना कारणोक्तिं विना ॥ अत एव मे हृदयम् अशुभाशंकि· शीलं धैर्यादिस्वभावः पतति गलति ३३
श्रुताः कथास्विति शेषः तान् तादृशान् ॥३४॥ नानाकारानाह· संमार्जनेत्यादि· ईदृशानि कुटुंबिभवनानुपल

सत्वनेकाग्रहृदयो द्वाःस्थं प्रत्यर्च्य तं जनं ॥ सतमश्वपतेः क्रांतमब्रवीत्तत्र राघवः ॥३२॥ किमहं त्वरया
नीतः कारणेन विना नद्य ॥ अशुभाशंकि हृदयं शीलं च पततीव मे ॥३३॥ श्रुतानु यादृशाः पूर्वं नृप
तीनां विनाशने ॥ आकारांस्तानहं सर्वानिह पश्यामि सारथे ॥३४॥ संमार्जनविहीनानि परुषाण्युप
पलक्षये ॥ असंयतकवाटानि श्रीविहीनानि सर्वशः ॥३५॥ बलिकर्मविहीनानि धूपसंमोदनेन च
अनाशितकुटुंबानि प्रभाहीनजनानि च ॥३६॥ अलक्ष्मीकानि पश्यामि कुटुंबिभवनान्यहं ॥ अ
पेतमाल्यशोभानि असंमृष्टाजिराणि च ॥३७॥ देवागाराणि शून्यानि न भांतीह यथापुरा ॥ देवता
र्चाः प्रविद्धाश्च यज्ञगोष्ठ्यस्तथैव च ॥३८॥

लये इति संबंधः असंपतकवाटानि· अनाशितकुटुंबा
नीति वक्ष्यमाणत्वेन न तद्बंधनसामर्थ्याभावात् ॥३५॥ धूपसंमोदनेन परिमलेन हीनानीति शेषः अना
शितकुटुंबानि अभोजितकुटुंबानि· प्रभा शोभा ॥३६॥ अलक्ष्मीकानि· विचित्रध्वजतोरणाद्यभा
वात् ॥३७॥ देवतार्चाः प्रतिमाः प्रविद्धाः निरस्तपूजनाः यज्ञगोष्ठ्यः तथाविधाः प्रविद्धाः यज्ञरहिताः
॥३८॥

ष्मन्यः पित्रेतिशेषः तेशयनीयः शयनार्हः ॥ ११ ॥ इहस्तु मिक्ष्व निरागतः प्रायेणोऽहतस्यावस्थानात् ॥ १२ ॥ अंबानां मध्येयाज्येष्ठातस्याः निवेशने तिष्ठतीतिशेषः ॥ १३ ॥ अजानंतमिति राजवृत्तांतमितिशेषः प्रियवत्सज

ष्मन्योयंशयनीयस्तेपर्यंकोहेमभूषितः ॥ नचायमिक्ष्वाकुजनः प्रहृष्टः प्रतिभातिमे ॥ ११ ॥ राजाभवनिभ्रथिष्ठं इहांबायानिवेशने ॥ नमहंनाद्यपश्यामिइहस्तुमिक्षन्निहागतः ॥ १२ ॥ पितुर्ग्रहीष्येपादौचतंममाख्याहिपृच्छतः ॥ अहोस्विदंबाज्येष्ठायाःकौसल्यायानिवेशने ॥ १३ ॥ तंप्रत्युवाच ॥ कैकेयीप्रियवत्घोरमप्रियं ॥ अजानंतंप्रजानंतीराज्यलोभेनमोहिता ॥ १४ ॥ यागतिःसर्वभूतानांतांगतिंतेपितागतः ॥ राजामहात्मातेजस्वीयायजूकःसतांगतिः ॥ १५ ॥ तच्छ्रुत्वाभरतो ॥ वाक्यंधर्माभिजनवांछुचिः ॥ पपातसहसाभूमौपितृशोकबलार्दितः ॥ १६ ॥ हाहतोस्मीतिकृपणांदीनांवाचमुदीरयन् ॥ निपपातमहाबाहुर्बाहुविक्षिप्यवीर्यवान् ॥ १७ ॥ ततःशोकेनसंवीतःपितुर्मरणादुःखितः ॥ विललापमहातेजाभ्रांताकुलितचेतनः ॥ १८ ॥

नंतीतियोजना तत्रहेतु राज्यलाभेनेति ॥ १४ ॥ यायजूको यज्ञशीलः ॥ १५ ॥ धर्माभिजनवान् धर्मयुक्तवंशमान् ॥ १६ ॥ बाहुविक्षिप्यप्रसार्य बाहू ॥ १७ ॥ शोकेन संवीतः आवृत्तचित्तः मरणादुःखितः मरणश्रवणेनसंजातदुःखः भ्रांताः अनवस्थिताः आकुलिताः खिन्नाः चेतनायस्यसःतादृशो विललाप ॥ १८ ॥ ॥

स्वगृहं स्वमातृगृहं ॥३।४॥ आर्यकवेश्मनः मातामहगृहाच्च्युतस्य चलितस्य ते कतिचित् कतिरात्र्यो लग्नास्त्वं
कुमर्हसीत्यन्वयः रथेन शीघ्रमागच्छतस्तव बाध्वनि श्रमो न खलु तद्वद ॥५॥ आर्यको मातामहः मातुलश्च कु

सपत्नि विश्यैवधर्मात्मा स्वगृहं श्रीविवर्जितं भरतः प्रेक्ष्य जग्राह जनन्याश्चरणौ शुभौ ॥३॥ तं मूर्ध्नि
समुपाघ्राय परिष्वज्य यशस्विनं अंके भरतमारोप्य प्रष्टुं समुपचक्रमे ॥४॥ अद्य ते कतिचिद्रा॰
त्र्यो च्युतस्यार्यकवेश्मनः अपि नाध्वश्रमः शीघ्रं रथेनापततस्तव ॥५॥ आर्यकस्ते सुकुशली यु
धाजिन्मातुलस्तव प्रवासाच्च सुखं पुत्र सर्वमेवक्तुमर्हसि ॥६॥ एवं पृष्टस्तु कैकेय्या प्रियं
पार्थिवनंदनः आचष्टे भरतः सर्वं मात्रे राजीवलोचनः ॥७॥ अद्य मे सप्तमी रात्रिश्च्युतस्यार्य
कवेश्मनः अंबायाः कुशली तातो युधाजिन्मातुलश्च मे ॥८॥ यन्मे धनं च रत्नं च ददौ राजा प
रंतपः परिश्रांतं पथ्यभवत्ततोहं पूर्वमागतः ॥९॥ राजवाक्यहरैर्दूतैस्त्वर्यमाणोहमागतः ॥ य
दहं प्रष्टुमिच्छामि तदंबावक्तुमर्हसीति ॥१०॥ राम ॥

शलीनवेति इतः प्रवासादारभ्य मातुलगृहे सुखं न चेत्येतत्सर्वं वक्तुमर्हसि ॥६।७॥ च्युतस्य चलित
स्य सप्तमी रात्रिः एतद्दिनात्पूर्वा रात्रिः सप्तमीत्यर्थः तेन सप्तरात्रोषितः पथीत्यनेन विरोधः ॥८॥ परि
श्रांतं परिश्रांतवाहनं ॥९।१०॥

रामा॰अ॰
२१९

२६ यस्य तेक रिष्यति या त्रामथासिषंया त्राम कार्ये॰ अयाचिषमिति पाठे मातामहाय इति शेषः ॥२७॥ अन्यथा भूतं॰ चिंतितविपरीतं जातं ॥२८॥ रामे गौर्धदे हि कं कृतमिति मन्वानआह॰ धन्या इत्यादि॰ ॥२९॥ पुनः शो

स रुदित्वा चिरं कालं भूमौ परिविवर्त्य च ॥ जननीं प्रत्युवाचेदं शोकैर्बहुभिरावृतः ॥२६॥ अभिषेक्ष्यति रामं तु राजा यज्ञं नु यक्ष्यते ॥ इत्यहं कृतसंकल्पो हृष्टो यात्रामयाचिषं ॥२७॥ तदिदं ह्यन्यथा भूतं व्यवदीर्णं मनो मम ॥ पितरं यो न पश्यामि नित्यं प्रियहिते रतं ॥२८॥ अंब केनात्यगाद्राजा व्याधिना मय्यनागते ॥ धन्या रामादयः सर्वे यैः पिता सत्कृतः स्वयं ॥२९॥ न नूनं मां महाराजः प्राप्तं जानाति कीर्तिमान् ॥ उपजिघ्रेत्तु मां मूर्ध्नि तातः संनाम्य सत्वरं ॥३०॥ क्व स पाणिः सुखस्पर्शस्तातस्याक्लिष्टकर्मणः ॥ यो हि मां रजसा ध्वस्तमभीक्ष्णं परिमार्जति ॥३१॥ यो मे भ्राता पिता बंधुर्यस्य दासोस्मि संमतः ॥ तस्य मां शीघ्रमाख्याहि रामस्याक्लिष्टकर्मणः ॥३२॥ पिता हि भवति ज्येष्ठो धर्ममार्यस्य जानतः ॥ तस्य पादौ गृहीष्यामि स हीदानीं गतिर्मम ॥३३॥ धर्मविद्धर्मशीलश्च महाभागो दृढव्रतः ॥ आर्ये किमब्रवीद्राजा पिता मे सत्यविक्रमः ॥३४॥

चति॰ नेति प्राप्तं इहागतं॰ संनाम्य मूर्ध्नानमिति शेषः ॥३०॥ परिमार्जति परिमार्ष्टि ॥३१॥ आख्याहि आगतमिति शेषः ॥३२॥ धर्मं जानत आर्यस्य श्रेष्ठस्य विवेकिनः पुरुषस्य॰ ज्येष्ठो ज्येष्ठभ्राता पिता भवति अतस्तस्य पादौ गृहीष्यामि॰ यतः स इदानीं मम गतिः ॥३३॥३४॥

219

राम
२१९

विलापं दर्शयति·एतदिति·पुराभाति स्म॥१९॥अप्रशुष्कः आपः शुष्का यस्मिन् कालाग्निनासः अप्र शुष्क मिव·
सागर मिति पाठे सागर स्वरूप मित्यर्थः शुष्कापद्द ति पाठांतरं॥२०॥श्रीमद्दनं वस्त्राणा क्कायर्चकंठेनकंठ
स्वरेण सह बाष्पं नेत्रजलमुत्सृज्य भूमौ पतित्वा विललापे तिशेषः॥२१॥सालस्य सालवृक्षस्य स्कंधं शा

एतत्सुरुचिरं भाति पितुर्मे शयनं पुरा॥शशिने वामलं रात्रौ गगनं तोयदात्यये॥१९॥तदिदं न विभा
त्यद्य विहीनं तेन धीमता॥व्योमेव शशिना हीन मप्रशुष्क इव सागरः॥२०॥बाष्पमुत्सृज्य कंठेन
स्वात्मना परिपीडितः॥प्रच्छाद्य वदनं श्रीमद्वस्त्रेणाजयतां वरः॥२१॥तमार्त्तं देवसंकाशं समी
क्ष्य पतितं भुवि॥निकृत्तमिव सालस्य स्कंधं परशुना वने॥२२॥मातामातंगसंकाशं चंद्रार्कसदृशं
सुतं॥उत्थापयित्वा शोकार्तं वचनं चेदमब्रवीत्॥२३॥उत्तिष्ठोत्तिष्ठ किं शेषे॥राजन्नत्र महाय
शाः॥त्वद्विधा न हि शोचंति सन्तः सदसि संमताः॥२४॥दानयज्ञाधिकारा हि शीलश्रुतितपोनुगा
बुद्धिस्ते बुद्धिसंपन्न प्रभेवार्कस्य मंदिरे॥२५॥

खं॥२२॥२३॥राजन्नत्रेति·राजपुत्रे तिपाठः सदसि
संमताः सभ्याः॥२४॥शीलं सद्वृत्तं·श्रुतिः श्रुतं·न पश्वांङ्गायणादि·तदनुगा·शीलश्रुतिमनोनुगे तिपाठे
तदुभय परिशीलन विषयं यन्मनः संकल्पात्मकं तदनुगा बुद्धिरध्यवसायात्मिका·अर्कस्य मंदिरे·अ
र्कमंडले तदेवहितस्य गृहं·तीर्थस्क मंदिर इति पाठं मत्वाऽत्युन्नत मंदर पर्वते ऽर्कप्रभायाः चिरावस्थाना
देव मुक्ति रिति व्याचख्यौ॥२५॥

चारित्रशंकया॰ रामस्य धर्मच्युतिशंकया त्रस्तः। स्ववंशस्य माहात्म्यं असदाचारभावपूर्वकं सदाचारनिरतत्वं असदाचारत्यागित्वं च॰ तस्मात्संस्मृत्य प्रष्टुं दंडकारण्यगमनकारणमिति शेषः ॥४३॥ कस्य चित् हेतोरिति शेषः अपापा निरपराधः ॥४४॥ भ्रूणहेव विवासित इति पाठे॰ ॥ सर्वशाखाध्यायी भ्रूणः तस्य हंतेत्यर्थः ॥ भ्रूणो

तच्छ्रुत्वा भरतस्त्रस्तो भ्रातुश्चारित्रशंकया ॥ स्वस्य वंशस्य माहात्म्यात्प्रष्टुं समुपचक्रमे ॥४३॥ कच्चिन्न ब्राह्मणधनं हृतं रामेण कस्य चित् ॥ कच्चिन्नाढ्यो दरिद्रो वा तेनापापो विहिंसितः ॥४४॥ कच्चिन्न परदारान्वा राजपुत्रोभिमन्यते ॥ कस्मात्स दंडकारण्ये भ्राता रामो विवासितः ॥४५॥ अथास्य चपला माता तत्स्वकर्म यथातथं ॥ तेनैव स्त्रीस्वभावेन व्याहर्तुमुपचक्रमे ॥४६॥ एवमुक्ता तु कैकेयी भरतेन महात्मना ॥ उवाच वचनं हृष्टा वृथापंडितमानिनी ॥४७॥ न ब्राह्मणधनं किंचिद्धृतं रामेण कस्य चित् ॥ कच्चिन्नाढ्यो दरिद्रो वा तेनापापो विहिंसितः ॥४८॥ न रामः परदारान्स चक्षुर्भ्यामपि पश्यति ॥ मया तु पुत्र श्रुत्वैव रामस्येहाभिषेचनम् ॥४९॥ याचितस्ते पिता राज्यं रामस्य च विवासनं ॥ स स्ववृत्तिं समास्थाय पिता तेन तथाकरोत् ॥५०॥

गर्भ इत्यन्ये ॥४५॥ स्त्रीस्वभावेन धर्माधर्महिताहितोचितानुचितविवेकशून्यतारूपेण ॥४६॥४७॥४८॥ इह राज्ये ॥४९॥ ते राज्यं रामस्य च विवासनं ते पिता याचित इति संबंधः ॥ स्ववृत्तिं स्वस्य सत्यस्थितिलक्षणां॰ तथाकरोत् तुभ्यं राज्यं दत्तवानित्यर्थः ॥५०॥

पश्चिमं संदेशं अंत्यकालिकं ॥३५॥ विलपन् परलोकं गतः नतु किंचिदपि संदेशमवोचदित्यर्थः ३६ इमांवा
चं सिद्धार्थास्त्वित्यादि वक्ष्यमाणं ॥३७॥३८ एवं द्वितीयेति राजमरणापेक्षयारामवनगमनरूपाप्रियस्यद्वि

पश्चिमं साधुसंदेशमिच्छामिश्रोतुमात्मनः ॥ इतिपृष्टा यथातत्वं कैकेयीवाक्यमब्रवीत् ॥३५॥ रामे
ति राजा विलपन् हासीतेलक्ष्मणेतिच ॥ समहात्मापरंलोकं गतोगतिमतांवरः ॥३६॥ इतीमांपश्चि
मांवाचं व्याजहारपितातव ॥ कालधर्मपरिक्षिप्तः पाशैरिवमहागजः ॥३७॥ सिद्धार्थास्तुनरारामभा
गतं सहसीतया ॥ लक्ष्मणं चमहाबाहुं द्रक्ष्यंतिपुनरागतं ॥३८॥ तच्छ्रुत्वा विषसादैवं द्वितीयाप्रियशं
सनात् ॥ विषण्णवदनोभूत्वाभूयः पप्रच्छमातरं ॥३९॥ क्वचेदानींसधर्मात्माकौसल्यानंदवर्धनः
लक्ष्मणेनसहभ्रात्रासीतयाचसमागतः ॥४०॥ तथापृष्टायथान्यायमाख्यातुमुपचक्रमे ॥ माता
स्ययुगपद्वाक्यंविप्रियंप्रियशंसया ॥४१॥ सहिराजसुतः पुत्रचीरवासामहावनं ॥ दंडकान्सहवै
देह्यालक्ष्मणानुचरोगतः ॥४२॥ राम राम ॥

तीयत्वं ३९ क्वचेदानींगतइतिशेषः समागतोमिलितः ॥४०॥ विप्रियंरामविवासनरूपं प्रियशंसयाप्रि
यशंकयाएतच्छ्रवणेभरतस्यसुखंभविष्यतीतितकेण युगपत् राजमरणकथनसमकालमेव ॥४१॥
॥४२॥

मेराजेतियोजना॥ अस्मिन्कुलेसुखंत्वयापरित्यक्तं ५ वृत्तोनीतः ६ कस्माद्विनाशितःकस्मात्त्वत्राजितःसवा कस्माद्वनंगतःनिष्प्रयोजनमेवेत्यर्थः ७ नकेवलंपितृभ्रातृपीडा॰ अपितुमात्रोरपीत्याहकौसल्येत्यादि॰ ममजननीत्वामेवमत्कंप्राप्ययदिजीवेनांनदापिदुष्करंदुर्लभमेव ८ आर्योरामःगुरुषुकर्तव्यांवृत्तिंजानाति

मत्कमापादितोराजात्वयामेपापदर्शिनि॥ सुखंपरित्यक्तंमोहात्कुलेस्मिन्कुलपांसनि॥ ५ त्वांप्राप्यहिपितामेद्यसत्यसंधोमहायशाः॥ तीव्रदुःखाभिसंतप्तोवृत्तोदशरथोनृपः ६ विनाशितोमहाराजःपितामेधर्मवत्सलः॥ कस्मात्प्रव्राजितोरामःकस्मादेववनंगतः ७ कौसल्याचसुमित्राचपुत्रशोकाभिपीडिते॥ दुष्करंयदिजीवेतांप्राप्यत्वांजननीमम ८ नन्वार्योपिचधर्मात्मात्वयिवृत्तिमनुत्तमां॥ वर्ततेगुरुवृत्तिज्ञोयथामातरिवर्तते॥ ९ तथाज्येष्ठाहिमेमाताकौसल्यादीर्घदर्शिनी॥ त्वयिधर्मंसमास्थायभगिन्यामिववर्तते॥ १० तस्याःपुत्रंमहात्मानंचीरवल्कलवाससं॥ प्रस्थाप्यवनवासायकथंपापेनशोचसे॥ ११॥

तादृशाः ९ राममात्रापिनकश्चिदपराधः त्वयिकृतइत्याह॰ तथेति॰ दीर्घदर्शिनीत्वत्तोदुरकालभाव्यनर्थंजानातीत्वयिधर्मंत्वद्धितानुवर्त्तनरूपंधर्ममास्थाय॰ अथाभगिन्यांवर्ततेतथात्वयिवर्तनइत्यर्थः १० तस्यास्तादृशधर्मयुक्तायाःचीरपर्यायंवल्कलंवासोयस्यतं॥ ११॥

५१ परिद्यूनः क्षीणः विलपन् वा धर्मज्ञ रामस्यैव पित्राज्ञापालनरूपधर्मज्ञः ॥ ५२ ॥ माशोकं कुर्वितिशेषः ॥ ५३ ॥ अनामयं निरूपद्रवं राज्यं चैतत्त्वधीनं ॥ ५४ ॥ संकाल्य प्रेतसंस्कारेणासंस्कृत्य ५५ इतिश्रीरामाभिरा० रा० रा० अ

७२

रामस्तु सह सौमित्रिः प्रेषितः सह सीतया ॥ तमपश्यन्प्रियं पुत्रं महीपालो महायशाः ॥ ५१ ॥ पुत्रशोकपरिद्यूनः पंचत्वमुपपेदिवान् ॥ त्वयात्विदानीं धर्मज्ञ राजत्वमवलंब्यतां ॥ ५२ ॥ त्वत्कृते हि मया सर्वमिदमेवं विधं कृतं ॥ माशोकं मा च संतापं धैर्यमाश्रय पुत्रक ॥ ५३ ॥ त्वदधीनां हि नगरीं राज्यं चैतदनामयं ॥ ५४ ॥ तत्पुत्र शीघ्रं विधिना विधिज्ञैर्वसिष्ठमुख्यैः सहितो द्विजेन्द्रैः ॥ संकाल्य राजानमदीनसत्वमात्मानमुर्व्यामभिषेचयस्व ॥ ५५ ॥ इत्यार्षे श्रीरामायणे अयो० द्विसप्ततितमः सर्गः ॥ ७२ ॥ श्रुत्वा च स पितुर्वृत्तं भ्रातरौ च विवासितौ ॥ भरतो दुःखसंतप्त इदं वचनमब्रवीत् ॥ १ ॥ किं नु कार्यं हतस्येह मम राज्येन शोचतः ॥ विहीनस्याथ पित्रा च भ्रात्रा पितृसमेन च ॥ २ ॥ दुःखे मे दुःखमकरोः व्रणे क्षारमिवाददाः ॥ राजानं प्रेतभावस्थं कृत्वा रामं च तापसं ॥ ३ ॥ कुलस्य त्वमभावाय कालरात्रिरिवागता ॥ अंगारमुपगृह्य स्म पिता मे नावबुद्धवान् ॥ ४ ॥

यो० द्विसप्ततिः सर्गः अथ सर्वानर्थमूलत्वमातुस्तद्वचनादेव ज्ञात्वा मुपालभते श्रुत्वेति वृत्तं गतीनय ॥ १ ॥ हतस्य त्वयाऽपरदुःखं प्रापितस्य ॥ २ ॥ दुःखे दुःखं करणे दृष्टांतः व्रणोद्धारमिव क्षारं खरमूत्रसहितचूर्णं ॥ ३ ॥ कालरात्रिः संहाररात्रिः मे पिता गार

रामाभिरामी अयोध्याकांडे ७२

नर्हित्वंषेढकल्पस्तत्राह॰ अथवेति॰ शक्तिःराज्यभरणसामर्थ्यं॥ योगैःयोगःसंहननोपायध्यानसंगतिर्यु
क्तिर्धिष्ण्युक्तयोगैर्बुद्धियुक्तमहाप्राणात्वलक्षणबलेनयद्यपिभवेत्संभावितैवाथापिपुत्रगार्द्धिनीपुत्रराज्याभिलाषवती॰ त्वांसकामांपूर्णकामनांनकरिष्यामि॰ अन्यथात्वमिवाहमपिलोकेदूषितस्यामितिभा
वः॥१७॥ किंच॰ त्यजेदेकंकुलस्यार्थेइतिन्यायेनतवविवासनमेवसांप्रतं॥ तथापिरामस्यत्वयिमात

अथवामेभवेच्छक्तिर्योगैर्बुद्धिबलेनवा॥ सकामांनकरिष्यामित्वामहंपुत्रगर्द्धिनीं॥१७॥ न
मेविकांक्षाजायेतत्यक्तुंत्वांपापनिश्चयां॥ यदिरामस्यनावेक्षात्वयिस्यान्मातृवत्सदा॥१८॥
उत्पन्नातुकथंबुद्धिस्तवेयंपापदर्शिनि॥ साधुचारित्रविभ्रष्टेपूर्वेषांनोविगर्हिता॥१९॥ अ
स्मिन्कुलेहिसर्वेषांज्येष्ठोराज्येभिषिच्यते॥ अपरेभ्रातरस्तस्मिन्प्रवर्त्तन्तेसमाहिताः॥२०॥

वद्व्यवहारात्तन्नकर्त्तुंशक्यमित्याह॥ नेति॰ त्वांत्यक्तुंविकांक्षाइच्छाभावोनैवजायेत॰ यदिरामस्यमातृव
दवेक्षात्वयिनस्यात्॥१८॥ इयंबुद्धिःकनिष्ठस्याभिषेकबुद्धिः॥१९॥ अस्याबुद्धेःपूर्वगर्हितत्वमेवदर्श
यति॥ अस्मिन्निति॥ अस्मदीयेकुलेसर्वेषांज्येष्ठोभिषिच्यते॰ नत्वापेक्षिकज्येष्ठो॰ अपरेभ्रातरस्तस्मि
न्समाहितास्तदधीनाःप्रवर्त्तते॰ एवंकिलनःपूर्वेषामाचरइतिशेषः॰ स्मरतिचमनुःज्येष्ठएवतु
गृह्णीयात्सकलंपैतृकंधनं॰ अन्येतमनुजीवेयुर्यथैवपितरंतथेति॥२०॥ ॥

222

किंकारणं फलंपश्यसि ॥१२॥ अहं राघवंप्रतियथायादृशः यादृशभक्तिमान् तथालुब्धायाराज्यलुब्धायास्तेन विदितइतिमन्येतत्रहेतुः तथाहि ततएव राज्यार्थंमहानयमनर्थः पितृनाशराज्यार्द्द ज्येष्ठवनवासादिरूप आनीतः संपादितः ॥१३॥ उक्तानर्थमात्रमेवत्वदुष्टेच्छाफलंननुत्वदिष्टसिद्धिरित्याह

अपापदर्शिनंशूरं कृतात्मानंयशस्विनं ॥ प्रव्राज्यचीरवसनं किंनुपश्यसिकारणं ॥१२॥ लुब्धायाविदितोमन्येनतेहंराघवंयथा ॥ तथात्त्वनर्थोराज्यार्थंत्वयानीतोमहानयं ॥१३॥ अहं हि पुरुषव्याघ्रावपश्यन् रामलक्ष्मणौ ॥ केनशक्तिप्रभावेनराज्यंरक्षितुमुत्सहे ॥१४॥ तं हि नित्यंमहाराजो बलवंतंमहौजसं ॥ उपाश्रितोभूद्धर्मात्मामेरुर्मेरुवनंयथा ॥१५॥ सोहंकथमिमंभारंमहाधुर्यसमुद्यतं ॥ दम्योधुरमिवासाद्यसहेयंकेनचौजसा ॥१६॥ ॥

अहं हीति नकथमपीतिभावः ॥१४॥ नकेवलंममैवरामशक्त्यपेक्षाकिंतुपितुरपीत्याह तंहीतिमेरुः स्वजनितमेरुवनंयथास्वस्त्राणार्थमाश्रितः अन्यथापरैराक्रमणीयएवस्यात् एवंराजाइहामुत्रार्थसिद्ध्येराममाश्रितः ॥१५॥ सोहंज्येष्ठरामैकबलः भारंराज्यभारं महाधुर्येनसमुद्यतं धृतंधुरमासाद्यदम्योवत्सतरइवकथंसहेयं केनचौजसाबलेनवहेयं रामंविनेतिशेषः ॥१६॥

रामा॰अ॰
२२३

सर्वथात्वद्बुद्धिसहंनानुवर्तिष्य इत्याह नत्विति॥२५॥नकेवलंत्वदिच्छाकरणंकिंत्वनिष्टमपिकरिष्यामीत्याह अप्रियार्थंतत्संपादनार्थं॥२६॥दासभृतोदासत्वंप्राप्तः मद्राज्येच्छोस्तवानिष्टसंपादनार्थमित्याशयः नकेवलंत्वत्कोपादेवैतदाचरणमपितुपरमार्थतएवेत्याह सुस्थितेनेति॥सुखप्रतिष्ठेनचित्तेनेत्यर्थःज्ये

नतुकामंकरिष्यामितवाहंपापनिश्चये॥यथाव्यसनमारब्धंजीवितांतकरंमम॥२५॥एषत्विदानीमेवाहमप्रियार्थंतवानघे॥निवर्तयिष्यामिवनाद्भ्रातरंस्वजनप्रियं॥२६॥निवर्तयित्वारामंचतस्याहंदीप्ततेजसः॥दासभूतोभविष्यामिसुस्थितेनांतरात्मना॥२७॥इत्येवमुक्त्वाभरतोमहात्माप्रियेतरैर्वाक्यगणैस्तुदंस्तां॥शोकार्दितश्चापिननादभूयःसिंहोयथामंदरकंदरस्थः॥२८॥इत्यार्षेश्रीरा॰अयो॰त्रिसप्ततितमःसर्गः॥७३॥तांतथागर्हयित्वातुमातरंभरतस्तदा॥रोषेणमहताविष्टःपुनरेवाब्रवीद्वचः॥१॥राज्याद्भ्रंशस्वकैकेयिनृशंसेदुष्टचारिणि॥परित्यक्तासिधर्मेणमामृतंरुदतीभव॥२॥

ज्यानुवर्तनस्यैवशास्त्रतः।परमहितत्वादितिभावः॥२७॥प्रियेतरैःदुःखकरैः॥२८॥इतिश्रीरामाभिरामेश्रीरा॰रा॰ति॰अयो॰त्रिसप्ततितमःसर्गः॥७३॥तामिति॥१॥भ्रंशस्वभ्रष्टाभव वनंगच्छेत्यर्थः मृतंगतभर्तारमुद्दिश्यरुदतीमाभव धर्मत्यागेनभार्यापतिभावस्यनष्टत्वादितिभावः केचित्तु परित्यक्ताधर्मणास्तेपुत्रजीवनमसंभावितमतोमामांमृतंद्दृष्ट्वारुदतीभवेत्यर्थः तवपुत्रमरणकृतःशोकोस्त्वितिभावइत्याहुः॥२॥

राम
२२३

२२३

राजधर्मनावेत्तसेनजानासि· राजवृत्तस्पराजधर्मस्य· शाश्वतीमव्यभिचरितांगतिं· फलमपिनजानासी
त्निमन्ये॥२१॥एनइाज्ञांसर्वराज्ञांसमंयइाजपुत्रेषुज्येष्ठस्याभिषेकः। इक्ष्वाकूणांत ज्येष्ठाभिषेचनं
विशेषतः स्यात्· संभाव्यते· राज्ञां सर्वमितिपाठेसर्वमित्यत्रक्वांदसीषष्ठ्यर्थेद्वितीया· सर्वेषामित्पर्थः
२२ धर्मेणैकेनरक्षारक्षणंयेषांतेषांधर्मैकरक्षाणांधर्ममिकंरक्षंतितेषांवाकुलक्रमागतचारित्रेणशो

नह्मिमन्येनशंसेत्वंराजधर्ममवेक्षसे॥गतिंवानविजानासिराजवृत्तस्पशाश्वतीं॥२१॥सततं
तराजपुत्रेषुज्येष्ठोराजाभिषिच्यते॥राज्ञामेतत्समंतत्स्यादिक्ष्वाकूणांविशेषतः॥२२॥तेषांध
र्मैकरक्षाणांकुलचारित्रशोभिनां॥अद्यचारित्रशौंडीर्यंत्वांप्राप्यविनिवर्तितं॥२३॥तवापि
सुमहाभागेजनेंद्रकुलपूर्वके॥बुद्धिमोहः कथमयंसंभूतस्त्वयिगर्हितः॥२४॥

भावृत्तांयच्चारित्रविषयकंशौंडीर्यंगर्वस्तदद्यत्वांप्राप्पत्वत्संबंधान्निवर्त्तितमित्पर्थः॥२३॥तयात्वय्य
पिमहाकुलप्रसूतायामेवंविधबुद्धिकारणंनपश्यामीत्याह· तवापीति· हेसुमहाभागेतदुपपादकंवि
शेषणंजनेंद्रकुलपूर्वकइति· जनेंद्रःकैकेयकुलकुटस्थपूर्वकःकारणंयस्याः तथाभूतेऽतोमहाकु
लप्रसूतायास्तवगर्हितोयंबुद्धिमोहस्त्वयिकथंसंभूतइत्पन्वयः· जनेंद्राः कुलपूर्वगाइतिपाठे
तवपितृवंशराजानोपिकुलपूर्वकुलज्येष्ठंगच्छंति· राजत्वेनतादृशा इत्पर्थः·शेषंप्राग्वत्॥२४॥

नत्वमश्वपतेः कन्या॰॥ नत्कुलोचिताकन्यानभवसीत्यर्थः॥ पितुरित्यस्यममेतिशेषः यद्वास्वपितुः कुलस्य प्रध्वंसिनी दुश्चरित्रत्वव्यवस्थापिका॥९॥ पितामममगतः गमितः॥१०॥ यत्प्रधानायत्पापप्रधाना॰ तत्पापं तत्पापफलं॰ पितृभातृरहिते ऽ तएवत्वन्निमित्तसर्वलोकाप्रिये॰ मयिवर्त्ततइति इत्यरूपंसर्वलो

नत्वमश्वपतेः कन्याधर्मराजस्यधीमतः॥ राक्षसीतत्रजातासिकुलप्रध्वंसिनीपितुः॥९॥ यत्त्वया धार्मिकोरामोनित्यंसत्यपरायणः॥ वनंप्रस्थापितोवीरोपितापित्रिदिवंगतः॥१०॥ यत्प्रधानासितत्पापंमयिपित्राविनाकृते॥ भ्रातृभ्यांचपरित्यक्तेसर्वलोकस्यचाप्रिये॥११॥ कौसल्यांधर्मसंयुक्तांवियुक्तांपापनिश्चये॥ कृत्वाकंप्राप्स्यसेत्वद्यत्वंलोकंनिरयगामिनी॥१२॥ किंनावबुध्यसेक्रूरेनियतंबंधुसंश्रयं॥ ज्येष्ठंपितृसमंरामंकौसल्यायात्मसंभवं॥१३॥

काप्रियत्वरूपंच॥११॥ हेपापनिश्चयेवियुक्तां॰ पतिपुत्रवियुक्तां॰ कृत्वाकंलोकंकंनरकलोकं॥१२॥ बंधुसंश्रयं॰ बंधूनामाश्रयभूतं॰ कौसल्यायाआत्मसंभवंऔरसंसंधिस्त्वार्षः एवंगुणविशिष्टंकिंनावबुध्यसेनजानासीत्यर्थः॥१३॥

अदूषयतः त्वत्संबंधिकिंगुणादिकमदूषयत्तुल्यंयुगपत् ॥३॥ तस्मात्भ्रूणहत्यांसर्वशाखामध्येत्वमहं
तां प्राप्तासि। उत्तमक्षत्रियस्यराज्ञोभर्तुर्वधाद्रामादीनांविवसनाच्चेतिभावः नरकंगच्छ प्राप्तकालेलोट्
नरकाएवतेन्यायप्राप्तइत्यर्थः ॥४॥ ईदृशंभर्तृमरणंरामविवासनरूपं घोरेणकर्मणा कर्मणा घोरत्वंच

किन्नुनेदूषयइमोराजावाभ्रशधार्मिकः ॥ ययोर्मत्कृतेविवासश्चत्वत्कृतेतुल्यमागतो ॥३॥ भ्रूणह
त्यामसिप्राप्ताकुलस्यास्यविनाशनात् ॥ कैकेयीनरकंगच्छमाचतातसलोकतां ॥४॥ यत्त्वयाही
दृशंपापंकृतंघोरेणकर्मणा ॥ सर्वलोकप्रियंहित्वाममाप्यापादितंभयं ॥५॥ त्वत्कृतेमेपिता
वृत्तोरामश्चारण्यमाश्रितः ॥ अयशोजीवलोकेचत्वयाहंप्रतिपादितः ॥६॥ मातृरूपेममामित्रे
नृशंसेराज्यकामुके ॥ नतेहमभिभाष्योस्मिदुर्वृत्तेपतिघातिनि ॥७॥ कौसल्याचसुमित्राचया
श्चान्याममातरः ॥ दुःखेनमहताविष्टास्त्वांप्राप्यकुलदूषिणीं ॥ ८ ॥

सामान्यविषयः वरद्वयस्ये
दृशाविशेषविषयत्वकरणं। सर्वलोकप्रियंरामंहित्वाविवास्य। भयंकैकेयीपुत्रोयंतद्वदेवदुष्टस्व
भावइतिलोककर्तृकरूपं। यद्वात्वद्दोषतोरामोमांस्त्यक्ष्यतीतिभयं। यद्वामहापातकयुतायास्तव
संसर्गेणपंचमपातकित्वंरूपभयं ॥५॥ नदेवाहः त्वदिति। जीवलोकेच। चात्परलोकेच। प्रतिपादि
तः प्रापितः ॥६॥ नतेहमभिभाष्यः मत्संभाषणंत्वयानकार्यमित्यर्थः ॥७॥८॥ ॥

१८॥१९॥अस्मासु अमरेषु कुतो निमित्तः किंनिमित्तकः कुतइत्याद्यादित्वात्सप्तम्यर्थे तसिल्. नचास्मासु इ-
ति नजिकाकुईय्यम्॥२०॥२१॥किंचिदपि भयं कुतोपि हेतोर्युष्माकं नास्ति. शांतंपापमित्यादिकं अनुचित
श्रवणजदोषनिवर्तको वचनविशेषः युष्मत्दुःखजनकं पापं शांतमित्यर्थकः किंतु अहं मग्नौ दुःखम

निरीक्षमाणस्तांशक्रो ददर्श सुरभिं स्थितां॥ आकाशे विष्ठितां दीनां रुदतीं भृशंदुःखितां॥१८॥
तां दृष्ट्वा शोकसंतप्तां वज्रपाणिर्यशस्विनी॥ इंद्रः प्रांजलिरुद्विग्नः सुरराजोब्रवीद्वचः॥१९॥
भयं कच्चिन्नचास्मासु कुतश्चिद्विद्यते महत्॥ कुतोनिमित्तः शोकस्ते ब्रूहि सर्वहितैषिणि॥२०॥
एवमुक्तातु सुरभिः सुरराजेन धीमता॥ प्रत्युवाच ततो धीरा वाक्यं वाक्यविशारदा॥२१॥शांतं पा
पं नवः किंचित्कुतश्चिदमराधिप॥ अहं तु मग्नौ शोचामि स्वपुत्रौ विषमे स्थितौ॥२२॥एतौ दृष्ट्वा
कृशौ दीनौ सूर्यरश्मिप्रतापितौ॥ वध्यमानौ बलीवर्दौ कर्षकेण दुरात्मना॥२३॥ममकायात्प्र
सूतौ हि दुःखितौ भारपीडितौ॥ यौ दृष्ट्वा परितप्ये हं नास्ति पुत्रसमः प्रियः॥२४॥यस्याः पुत्रसह
स्रैस्तु कृत्स्नं व्याप्तमिदं जगत्॥ तां दृष्ट्वा रुदतीं शक्रो न सुतान्मन्यते परं॥२५॥ ॥ ॥

ग्नौ विषमे मे देशे स्थितौ कर्षकेण प्रतोदादिना वध्यमानौ ताड्यमानौ. दृष्ट्वा शोचामि॥२२॥२३॥नास्ति पुत्र
समः प्रियइति सुरभिवचनोपसंहारः॥२४॥अथेंद्रस्यापरमाह. यस्याइति. पुत्रसहस्रैः साक्षात्सुतसं
तानपतितैः तां रुदतीं दृष्ट्वा॥ इंद्रोपि सुतात्परमधिकं किमपि न मन्यते॥२५॥ ॥

अस्त्वौरसस्तत्र किं तत्राह अंगेत्यादि अंगानि मुखवक्षउदरपाणि प्रत्यंगानि नेत्रगुल्फादीनि एतेनांगादं
गात्संभवसीति श्रुतौ वीप्सयांगप्रत्यंगग्रहणं सूचितं एतेन तस्य सर्वांगतेजःसंभूतत्वं दर्शितं यदेत
द्रेतस्तत्सर्वेभ्योंगेभ्यस्तेजःसंभूतमिति श्रुतेः स्त्रिया रक्तमेव रेतः हृदयं हृदयपुंडरीकं आत्माधिष्ठानं
अनेन हृदयादधिजायसे इति श्रुत्यर्थ उक्तः ॥ यदेवं तस्मान्मातुरौरसः पुत्रः प्रियतरः आत्मा वै पुत्रना
मासीति श्रुतेः निरुपाधिप्रेमास्पदत्वं चात्मनः सर्वलोकसिद्धमेव बांधवाः पितृमात्रादयः प्रिया एव न तु

अंगप्रत्यंगजः पुत्रो हृदयाच्चाभिजायते ॥ तस्मात्प्रियतरो मातुः प्रिया एव तु बांधवाः ॥१४॥ अन्यदा
किल धर्मज्ञा सुरभिः सुरसंमता ॥ वहमानौ ददर्शोर्व्यां पुत्रौ विगतचेतसौ ॥१५॥ नावर्धदिवसं श्रां
तौ दृष्ट्वा पुत्रौ महातले ॥ रुरोद पुत्रशोकेन बाष्पपर्याकुलेक्षणा ॥१६॥ अधस्ताद्व्रजतस्तस्याः सु
रराज्ञो महात्मनः ॥ बिंदवः पतिता गात्रे सूक्ष्माः सुरभिगंधिनः ॥१७॥

प्रियतराः एवं चौरसवियोगदुः
खमतिदुःसहमिति भावः प्रियत्वान्न तु बांधव इति पाठं मत्वा तीर्थेनेत्थं व्याख्यातं प्रियत्वादेव न बांधवः बं
धुदत्तपुत्रादिवन्न भवतीति तत्र नार्थसामंजस्यमिति कतकसंमतपाठ एव न्याय्यान् ॥१४॥ अत्रार्थे इति
हासमाह अन्यदेति कस्मिंश्चित्पूर्वकाले इत्यर्थः सुरभिः कामधेनुः किलेत्यैतिह्ये धर्मज्ञाः पुराविदो
वदंत्येवं वदंतीति किलेत्यर्थः वहमानौ हलं ॥१५॥ अर्धदिवसं दिवसस्यार्धं व्याप्य वहनेन श्रांतौ दृष्ट्वा
पुत्रौ स्वांगजौ कुतोपि हेतोर्भुवं गतौ वत्सपतितौ च समकायात्परस्तादिति ॥१६॥ सुरराज्ञः सुरराजस्य अनित्य

१९
रा० अ०

रामा॰अ॰
२२६

पापं जपेऽस्य विवासनपूर्वकं कनिष्ठराज्यरूपं ॥ ३२ ॥ अस्य मरणं तमेव प्रायश्चित्तमित्याह सेति बुद्धिपूर्वं कृतमहापापेत्यर्थः कंठे रज्जुं बध्वेत्यस्यापि यस्येति शेषः परायणं गतिः ॥ ३३ ॥ विप्रवासितकल्मषः दूरीकृतकलंकः ॥ ३४ ॥ इतीत्यस्याविलप्येति शेषः नागइवआरएपेत्तोमरेति पाठांतरं संक्रुद्धः पन्नगइव

नत्वहं पापसंकल्पे पापे पापं त्वया कृतं ॥ शक्तो धारयितुं पौरैरश्रुकंठैर्निरीक्षितः ॥ ३२ ॥ सा त्वमग्निं प्रविश वा स्वयं वा विश दंडकान् ॥ रज्जुं बध्वाथवा कंठे नहि तेन्यत्परायणं ॥ ३३ ॥ अहमप्यवनीं प्राप्ते रामे सत्यपराक्रमे ॥ कृतकृत्यो भविष्यामि विप्रवासितकल्मषः ॥ ३४ ॥ इति नागइवारण्ये तोमरांकुशतोदितः ॥ पपात भुवि संक्रुद्धो निश्वसन्निव पन्नगः ॥ ३५ ॥ संरक्तनेत्रः शिथिलांबरस्तथा विधूतसर्वाभरणः परंतपः ॥ बभूव भूमौ पतितो नृपात्मजः शचीपतेः केतुरिवोत्सवक्षये ॥ ३६ ॥ इत्यार्षे श्रीरामायणे अयोध्याकांडे चतुःसप्ततितमः सर्गः ॥ ७४ ॥ दीर्घकालात्समुत्थाय संज्ञां लब्ध्वा स वीर्यवान् ॥ नेत्राभ्यामश्रुपूर्णाभ्यां दीनामुद्वीक्ष्य मातरं ॥ १ ॥

श्वसन् इत्यन्वयः पाठांतरे अरण्ये तत्संबंधिनिबंधनस्थाने तोमरांकुशतोदितो नागइवेत्यर्थः भुवि पपात भरत इति शेषः ॥ ३५ ॥ शचीपतेः केतुरिंद्रध्वजः उत्सवक्षये उत्सवांते ॥ ३६ ॥ इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके अयोध्याकांडे चतुःसप्ततितमः सर्गः ॥ ७४ ॥ दीनां स्वमनीषितभंगतः ॥ १ ॥

राम
२२६

इहसंसारेभ्ऽयसीं सर्वोत्कृष्टां ॥२६॥ समं सर्वप्राण्यनुग्रहे वैषम्यरहितमप्रतिमं सर्वोत्तमं वृत्तं चरित्रं यस्याः
श्रीमत्याः इष्टदानैश्वर्यशक्तिमत्याः गुणमुख्यायाः सत्यरूपमुख्यगुणवत्याः लोकधारणकाम्यया प्रवृत्ता
या इति शेषः स्वभावपरिच्छेद्या आहारनिद्राभयमैथुनानि सामान्यमेतत्पशुभिर्नराणामिति । सामा
न्यप्राप्तमिथुनीभावलक्षणया ॥२७॥ स्याः पुत्रसहस्राणि संतानपरंपराद्वारेण संतिसापि शोचति किंपु

इन्द्रोऽप्यश्रुनिपातं तं स्वगात्रे पुण्यगंधिनं ॥ सुरभिं मन्यते दृष्ट्वा भूयसीं तामिहेश्वरः ॥२६॥ समा
प्रतिमवृत्ताया लोकधारणकाम्यया ॥ श्रीमत्या गुणमुख्यायाः स्वभावपरिचेष्टया ॥२७॥ य
स्याः पुत्रसहस्राणि सापि शोचति कामधुक् ॥ किं पुनर्या विना रामं कौसल्या वर्तयिष्यति ॥२८
एकपुत्रा च साध्वी च विवत्सेयं त्वया कृता ॥ तस्मात्त्वं सततं दुःखं प्रेत्य चेह च लप्स्यसे ॥२९॥
अहं त्वपचितिं भ्रातुः पितुश्च सकलामिमां ॥ वर्धनं यशसश्चापि करिष्यामि न संशयः ॥३०
आनाय्य च महाबाहुं कोसलेन्द्रं महाबलं ॥ स्वयमेव प्रवेक्ष्यामि वनं मुनिनिषेवितं ॥३१॥

नर्मानुषी एकपुत्रा कौसल्या रामं विना वर्तयिष्यति · जीविष्यति · शोकेन विच्छिद्यासतीति शेषः इदं ।
किं कर्तव्यमित्यर्थः ॥२८॥ विवत्सा विवत्सेव · यदेवं · तस्मादिति ॥२९॥ अपचितिं पूजां पितुरिमां वृत्स्य
माणौर्ध्वदैहिकक्रियारूपां पूजां करिष्यामीत्यपकर्षः ॥३१॥ अथ यशो वर्धनं भ्रातृपूजां चाहं आनाय्ये
त्यादि · महाबाहुं रामं · वने प्रवेक्ष्यामि तद्व्रतं समापयेत् तत्प्रतिनिधितयेति भावः ॥३१॥

कौसल्यांस्वगृहात्स्थितां ॥ ९ ॥ समेत्य आलिंग्य ॥ तादृशासमये आलिंगनकरणायोग्यं विशेषणं मनस्विनी ॥ १० ॥ राज्यंप्राप्तंभुंक्ष्वेति शेषः राज्यप्राप्तिप्रकारमाह क्रूरेण ॥ रामविवासनरूपेण कर्मणा कैकेय्याः ॥ नयेत्यर्थे शेषत्वविवक्षयां संप्राप्तं राजतः ततश्चत्वयाप्राप्तमिति भावः ॥ ११ ॥ त्वमपिमे पुत्र इति · नवराज्यप्रदानेन किमपिमेदुःखं · अपितु चीरवसनं वनचारिणं चीरवसनत्वादिवनचारि

ततःशत्रुघ्नभरतौकौसल्यांप्रेक्ष्यदुःखितौ ॥ पर्यष्वजेतांदुःखार्त्तांपतितांनष्टचेतनां ॥ ९ ॥
रुदंतौरुदतींदुःखात्समेत्यार्यांमनस्विनी ॥ भरतंप्रत्युवाचेदंकौसल्याभृशदुःखिता ॥ १० ॥
इदंतेराज्यकामस्यराज्यंप्राप्तमकंटकं ॥ संप्राप्तंबतकैकेय्याःशीघ्रंक्रूरेणकर्मणा ॥ ११ ॥
प्रस्थाप्यचीरवसनंपुत्रंमेवनवासिनं ॥ कैकेयीकंगुणंतत्रपश्यतिक्रूरदर्शिनी ॥ १२ ॥
क्षिप्रंमामपिकैकेयीप्रस्थापयितुमर्हति ॥ हिरण्यनाभोयत्रास्तेसुतोमेसुमहायशाः ॥ १३ ॥

वेषंमेपुत्रंरामंत्वदागमनादपिपूर्वंशीघ्रंवनंप्रतिप्रस्थाप्य · ॥ राजानंमारितवतीकैकेयीतत्रतादृशप्रस्थापनेकंगुणंपश्यतीति इतिनजानेइतिदुःखामितिशेषः स्थितेतुरामेसत्यवपितृवाक्यात्त्वामेवाभिषिंचेदतोव्यर्थोयंतत्प्रयासइतिभावः ॥ १२ ॥ ममापिप्रस्थापयितुमर्हतीति · ॥ मांप्रत्यतिस्यादुःखहेतुत्वप्रकृतेरितिभावः हिरण्यनाभः हिरण्यवर्णनाभियुक्तः इदम् साधारणंरामलक्ष्मणो ॥ १३ ॥

(२२)

अमात्याः भरतागमनेक्षत्वात्प्राप्तासुमंत्रादयः अभ्यकुत्सयत् लोकस्येवस्वस्यापिकैकेयीकृतव्यवहारे परमानिष्टताख्यापनायोक्तरीत्यैवसर्वलोकसमक्षंतजगर्हे इत्यर्थः अथप्रयोजकत्वानुमंतत्वाद्यपिस्वस्यप्रकृतविषयेनास्तीतिमंत्रिणः प्रत्यापयति॥ राज्यमित्यादि मातरंनैवमंत्रये अपिरेवार्थेराज्य

सोमात्यमध्येभरतोजननीमभ्यकुत्सयत्॥राज्यंनकामयेजातुमंत्रयेनापिमातरं॥२॥अभिषेकंनजानामियोभूद्राज्ञासमीक्षितः॥विप्रकृष्टेह्यहंदेशेशत्रुघ्नसहितोभवं॥३॥वनवासंनजानामिरामस्याहंमहात्मनः॥विवासनंचसौमित्रेसीतायाश्चयथाभवत्॥४॥तथैवक्रोशतस्तस्यभरतस्यमहात्मनः॥कौसल्याशब्दमाज्ञायसुमित्रांचेदमब्रवीत्॥५॥आगतःक्रूरकार्यायाःकैकेय्याभरतःसुतः॥तमहंद्रष्टुमिच्छामिभरतंदीर्घदर्शिनं॥६॥एवमुक्त्वासुमित्रांतांविवर्णावदनाकृशा॥प्रतस्थेभरतोयत्रवेपमानाविचेतसा॥७॥सतुराजात्मजश्चापिशत्रुघ्नसहितस्तदा॥प्रतस्थेभरतोयेनकौसल्यायानिवेशनं॥८॥ ॥

ग्रहणार्थेनप्रेरयामितत्रहेतुःराज्यंनकामयेइति॥२॥योभिषेकोराज्ञासमीक्षितश्चिंतितः॥अज्ञानेहेतुमाह विप्रकृष्टेइति अतिदूरतरेइत्यर्थः॥३॥४॥तथैवप्राग्वदेव॥५॥दीर्घदर्शिनं ऐहिकामुष्मिककर्मणःकालांतरभाविफलज्ञानक्षमबुद्धिमंतं अतएवतद्द्रष्टुमिच्छामि॥६॥७॥चापिभ्यांसुमंत्रादयः येनमार्गेणनिवेशनंप्राप्यतइतिशेषः॥८॥ ॥

इममर्थं परबुद्धेरनन्यत्वात् शपथैः प्रत्याययति सत्यसंधत्वादिगुणविशिष्ट आर्यो रामो यस्यानुमते
संमते स्मातिवनं गतः तस्य कृतशास्त्रानुगा गुरुशिक्षितश्रुतिस्मृतिमार्गगा बुद्धिर्मा भूत् इतोधिका
नर्थाभावादयं परमः शपथः अतः परं प्रपंचः सामान्येन शपथकरणमपि विशेषतः स्वस्मिन्नपि प

कृतशास्त्रानुगा बुद्धिर्माभूत्तस्य कदाचन॥ सत्यसंधः सतां श्रेष्ठो यस्यार्योनुमते गतः॥२१॥
प्रैष्यं पापीयसां यातु सूर्यं च प्रतिमेहतु॥ हंतु पादेन गां सुप्तां यस्यार्योनुमते गतः॥२२॥ का
रयित्वा महत्कर्म भर्ता भृत्यमनर्थकं॥ अधर्मो योस्य सोस्यास्तु यस्यार्योनुमते गतः॥२३॥ परि
पालयमानस्य राज्ञो भूतानि पुत्रवत्॥ ततस्तु द्रुह्यतां पापं यस्यार्योनुमते गतः॥२४॥ बलि
षड्भागमुद्धृत्य नृपस्यारक्षितुः प्रजाः॥ अधर्मो योस्य सोस्यास्तु यस्यार्योनुमते गतः॥२५॥ संश्रु
त्य च तपस्विभ्यः सत्रे वै यज्ञदक्षिणां॥ तां चापालयतां पापं यस्यार्योनुमते गतः॥२६॥ हस्त्य
श्वरथसंबाधे युद्धे शस्त्रसमाकुले॥ मास्म कार्षीत्सतां धर्मं यस्यार्योनुमते गतः॥२७॥

यैवस्पतीतिबोध्यं॥२१॥ प्रैष्यं प्रेषत्वं प्रतिमेहतु अभिमुखं मूत्रादि करोतु॥२२॥ यो भर्ता भृत्यं महत्कर्म
कारयित्वा अनर्थकं भृतिरहितं करोति तस्य यो धर्मः सोस्यास्तु इत्यन्वयः॥२३॥ ततः तस्मै आद्यादि
त्वाद्द्रुह्यतुर्यत्पापं तस्य यस्यानुमते गतस्तस्यास्त्विति शेषः॥२४॥ बलिः करस्तद्रूपं षड्भागमुद्धृत्यादाय प्रजा
अरक्षितुर्योऽधर्मः सोस्यास्तु॥२५॥ सत्रे यागे संश्रुत्य प्रतिज्ञाय अपालयतां तपस्विभ्यो ऋत्विग्भ्यः॥२६॥

कैकेयीचिन्तानुवृत्तेस्तवराजसंस्कारेऽधिकारेनास्तीतिध्वनयंत्पाह। अथवेति। अग्निहोत्रमितिराजदेहस्या
प्युपलक्षणं कैकेयीवर्त्मगमनेभरतोमेप्रेतकार्यंनकुर्यादितिराज्ञानिषेधादितिभावः।।१४।।अथवानवा
तस्यत्वेराजसंस्कारादिकृत्वापश्चात्मांतत्रनयेत्याह। कामंवेति। तप्स्यते। तप्यतेचेत्यपिबोध्यं।।१५।।स
माचितंव्याप्तंनिर्यातितंदत्तं। निर्यातनंवैरशुद्धौदानेन्यासार्पणेमतं।।१६।।व्रणेप्राचीनेस्पृचिनाप्रतुद्ये

अथवास्वयमेवाहंसुमित्रानुचरासुखं।।अग्निहोत्रंपुरस्कृत्यप्रस्थास्येयेनराघवः।।१४।।का
मंवास्वयमेवाद्यतत्रमांनेतुमर्हसि।।यत्रासौपुरुषव्याघ्रस्तप्यतेमेसुतस्तपः।।१५।।इदंहि
तवविस्तीर्णंधनधान्यसमाचितं।।हस्त्यश्वरथसंपूर्णंराज्यंनिर्यातितंतया।।१६।।इत्यादिबहु
भिर्वाक्यैःक्रूरैःसंभर्त्सितोनघः।।विव्यथेभरतोतीवव्रणेतुद्येवसूचिना।।१७।।पपातचरणेतस्या
स्तदासंभ्रांतचेतनः।।विलप्यबहुधाऽसंज्ञोलब्धसंज्ञस्तदाभवत्।।१८।।एवंविलपमानांतांप्रांज
लिर्भरतस्तदा।।कौसल्यांप्रत्युवाचेदंशोकैर्बहुभिरावृतां।।१९।।आर्यकस्मादजानंतंगर्हसेमामक
ल्मषं।।विपुलांचममप्रीतिंस्थितांजानासिराघवे।।२०।।

वसंभर्त्सितःकैकेयीपक्षत्वधियागर्हि
तोविव्यथेपितृभ्रातृवियोगखिन्नेनाश्वासार्थमागतस्यस्थलेपरिखेदहेतुवचनश्रवणादितिभावः।।१७
असंज्ञइतिछेदः।।१८।।विलपमानांइदंतेराज्यकामस्येत्यादिभाषमाणां।।१९।।अजानंतंअत्रत्यवृत्तांत
मितिशेषः राघवेनहिविषयेममत्वदिपूर्वंस्थितांविपुलांप्रीतिंजानास्येवइदानींतुततोधिकापितृवृद्ध

प्रमीयतां म्रियतां॰ । धर्म्यां क्रियां अग्निहोत्रादिकां म्रियतामित्यनुकर्षः ॥ ३५ ॥ दुःखित इत्यस्य भवेत्विति शेषः अप्राप्येत्यस्य म्रियतामिति शेषः ॥ ३६ ॥ राजस्त्रीत्यादौ यस्यार्य इत्याद्यनुषंगः ॥ ३७ ॥ त्वात्तयेति॰ पतनी

अप्राप्यसदृशान् दारानन पत्यः प्रमीयतां ॥ अनवाप्य क्रियां धर्म्यां यस्यार्योऽनुमते गतः ॥ ३५ ॥ मात्मनः संततिं द्रष्टा स्वेषु दारेषु दुःखितः ॥ आयुः समग्रमप्राप्य यस्यार्योऽनुमते गतः ॥ ३६ ॥ राजस्त्रीबालवृद्धानां वधे यत्पापमुच्यते ॥ भृत्यत्यागे च यत्पापं तत्पापं प्रतिपद्यतां ॥ ३७ ॥ त्वात्तया मधुमांसेन लोहेन च विषेण च ॥ सदैव विभृयाद्भृत्यान्यस्यार्योऽनुमते गतः ॥ ३८ ॥ संग्रामे समुपोढे च शत्रुपक्षभयंकरे ॥ पलायमानो वध्येत यस्यार्योऽनुमते गतः ॥ ३९ ॥ कपालपाणिः पृथिवीमटतां चीरसंवृतः ॥ भिक्षमाणो यथोन्मत्तो यस्यार्योऽनुमते गतः ॥ ४० ॥ मद्ये प्रसक्तो भवतु स्त्रीष्वक्षेषु च नित्यशः ॥ कामक्रोधाभिभूतश्च यस्यार्योऽनुमते गतः ॥ ४१ ॥ मास्य धर्मे मनो भूयादधर्मं स निषेवतां ॥ अपात्रवर्षी भवतु यस्यार्योऽनुमते गतः ॥ ४२ ॥ संचितान्यस्य वित्तानि विविधानि सहस्रशः ॥ दस्युभिर्विप्रलुप्यंतां यस्यार्योऽनुमते गतः ॥ ४३ ॥ राम ॥

यतासंपादकवस्तुविक्रयेणेत्यर्थः भृत्यान् भरणीयान् पुत्रदारादीन् ॥ ३८ ॥ समुपोढे प्राप्ते ॥ ३९ ॥ चीरं जीर्णमलिनवस्त्रं ब्रह्महा भवत्विति शेषः ॥ तादृशी निषिद्धाचरणप्रव्रज्या भवत्विति वा भावः ॥ ४० ॥ ४१ ॥ अपात्रवर्षी अपात्रे दाता ॥ ४२ ॥ दस्युभिर्विप्रलुप्यंतां त्यागभोगविहीनानि भवंत्विति भावः ॥ ४३ ॥

सुसूक्ष्मार्थशास्त्रंवेदः धीमता आचार्येणेतिशेषः ब्रह्मोपसत्वरूपं प्राप्नोत्वित्यर्थः ॥२८॥ अहौविशालौबाहू अं
सौ चयस्यतंरामं राज्यस्थं अतएवासीनंसंहासनेमाज्ञासीत् तादृशरामदर्शनभाग्यरहितोभवतुज्येष्ठानुव
र्तेनरहितोभवत्वित्यर्थः तावत्पर्यंतंजीवनंमाभूदितिवा ॥२९॥ कृसरंतिलमुद्गतंडुलात्मकं छागंछागमां

उपदिष्टंसुसूक्ष्मार्थशास्त्रंयत्नेनधीमता ॥ सनाशयतुदुष्टात्मायस्यार्योनुमतेगतः ॥२८॥ माचतंमूढ
बाहुंसचंद्रभास्करतेजसं ॥ द्राक्षीद्राज्यस्थमासीनंयस्यार्योनुमतेगतः ॥२९॥ पायसंकृसरंछागंव
थासोश्नातुनिर्घृणः ॥ गुरूंश्चाप्यवजानातुयस्यार्योनुमतेगतः ॥३०॥ गवांस्पृशतुपादेनगुरू
न्परिवदेतच ॥ मित्रेद्रुह्येतसोत्यर्थयस्यार्योनुमतेगतः ॥३१॥ विश्वासात्कथितंकिंचित्परिवादं
मिथः क्वचित् ॥ विवृणोतुसदुष्टात्मायस्यार्योनुमतेगतः ॥३२॥ अकर्ताचाकृतज्ञश्चत्यक्तश्चनि
रपत्रपः ॥ लोकेभवतुविद्विष्टोयस्यार्योनुमतेगतः ॥३३॥ पुत्रैर्दारैश्चभृत्यैश्चस्वगृहेपरिवारितः
सएकोमृष्टमश्नातुयस्यार्योनुमतेगतः ॥३४॥

सं ०व थाश्राद्धादिनिमित्तंविना अश्नातु अशनजंपापं
प्राप्नोतु ॥३०॥ गवामितिअंगमितिशेषः परिवदेत् मित्रेमित्राय ॥३१॥ विश्वासात् अयंकोपिनप्रकटयि
ष्यतीतिविश्वासात् मिथः ॥ रहसिमिथोन्योन्यरहस्ययोः ॥ किंचित्परिवादं कस्यचित्सुरापानादिदोषं ॥३२
अकर्ताप्रत्युपकाराकर्ता अतएवाकृतज्ञः अतएवत्यक्तः सज्जनैः त्यक्तात्मेतिपाठेसज्जनैस्त्यक्तआत्मा
स्वरूपंयस्यैत्येवार्थः उद्बंधनादिनात्यक्तदेहइत्यर्थंतीर्थः अतएवलोकेविद्विष्टश्चभवतु ॥३३॥ एकोमृष्ट

रामा·अ·
२३०

विप्रलुप्तप्रजातस्य·अन्नाद्यदानेनप्रनष्टसंतानस्य·स्त्रीद्वेषाद्दातयाभूतस्य॥यद्वाविप्रलुप्ताक्विर्जि
तापत्रजाता·जातापत्याजायायेननस्य॥प३॥विहृंतुविघ्नयतुबालवत्सांदोग्धु·शास्त्रोक्तदोहनाधिकंदो
ग्धु॥प४॥परदारान्निषेवतांयत्पापंतत्पापंप्रतिपद्यतांमूढःभयादितिशेषः॥पप॥एकः यत्पापद्वयंतदे
कएवलभतामित्यर्थः॥प६॥विप्रलंभेनवंचनयायोजयन्·अप्रयच्छन्नितियावत्॥प७॥भक्त्याशिव

विप्रलुप्तप्रजातस्यदुष्कृतंब्राह्मणस्ययत्॥तदेतत्प्रतिपद्येतयस्यार्योनुमतेगतः॥प३॥ब्राह्म
णायोद्यतांपूजांविहृंतुकलुषेंद्रियः॥बालवत्सांचगांदोग्धुयस्यार्योनुमतेगतः॥प४॥धर्मदारा
न्परित्यज्यपरदारान्निषेवतां॥त्यक्तधर्मरतिर्मूढोयस्यार्योनुमतेगतः॥पप॥पानीयदूषकेपापं
तथैवविषदायके॥यत्तदेकःसलभतांयस्यार्योनुमतेगतः॥प६॥त्रषार्त्तेसतिपानीयेविप्र
लंभेनयोजयन्॥यत्पापंलभतेतत्स्याद्यस्यार्योनुमतेगतः॥प७॥भक्त्याविवदमानेषुमार्गं
माश्रित्यपश्यतः॥तस्यपापेनयुज्येतयस्यार्योनुमतेगतः॥प८॥

२३०

विष्ण्वादिदेवताभक्त्यामार्गंतत्त
दुपोद्बलकशैववैष्णवादिशास्त्रमाश्रित्यायमुत्कृष्टोयंनेतिविवदमानेषुयत्पापंपयक्ष्वतयोर्विवादं
पश्यतःप्राप्तवतःपापंतेनपापेनसयुज्येतेत्यर्थः तस्यपापेनेतिपाठेतेषांयत्पापंतेनयस्यानुमतेगतस्त
स्ययोगःसंबंधोभूयादित्यर्थःभावेचयुज्येतेतिप्रयोगःअयंपरस्त्वयंनेतिसंरंभाभिनिवेशिनःया
तुधानाभवंत्येवपिशाचाश्चनसंशयइतिशिवपुराणोक्तंच·योब्रह्मविष्णुरुद्राणांभेदंयुक्तिनिवेश

राम
२३०

त्त्वमेसंधेव्याप्येतिशेषः॥४४॥४५॥देवतानामिति॥देवतादिशुश्रूषारहितस्यपयत्पापंतत्पापंसप्रतिपद्यतामि
त्यर्थः॥४६॥सतांकीर्त्यासद्भिः क्रियमाणश्लाघायाः भ्रश्यतुसामाभूत्तस्येत्यर्थः॥४७॥अनर्थेसन्नीवशत्वाद्य

उभेसंध्येशयानस्ययत्पापंपरिकल्प्यते॥तच्चपापंभवेत्तस्ययस्यार्योनुमतेगतः॥४४॥यदग्नि
दायकेपापंयत्पापंगुरुतल्पगे॥मित्रद्रोहेचयत्पापंतत्पापंप्रतिपद्यतां॥देवतानांपितृणां
चमातापित्रोस्तथैवच॥मास्मकार्षीत्सशुश्रूषांयस्यार्योनुमतेगतः॥४६॥सतांलोकात्सतांकी
र्त्याःसज्जुष्टात्कर्मणस्तथा॥भ्रश्यतुक्षिप्रमद्यैवयस्यार्योनुमतेगतः॥४७॥अपास्यमातृशु
श्रूषामनर्थेसोवतिष्ठतां॥दीर्घबाहुर्महावक्षायस्यार्योनुमतेगतः॥४८॥बहुभृत्योदरिद्रश्च
ज्वररोगसमन्वितः॥समायात्सततंक्लेशंयस्यार्योनुमतेगतः॥४९॥आशामाशंसमानानां
दीनानामूर्ध्वचक्षुषां॥अर्थिनांवितथंकुर्याद्यस्यार्योनुमतेगतः॥५०॥माययारमतांनित्यंपरुषः
पिशुनोशुचिः॥राज्ञोभीतस्त्वधर्मात्मायस्यार्योनुमतेगतः॥५१॥ऋतुस्नातांसतींभार्यांऋतुकालानु
रोधिनीं॥अतिवर्तेतदुष्टात्मायस्यार्योनुमतेगतः॥५२॥

नर्थे॥४८॥समायात्प्राप्नुयात्॥४९॥अर्थि
नामाशामितिसंबंधः॥आशंसमानानांस्तुवतां॥ऊर्ध्वचक्षुषांदातृमुखनिरीक्षकाणां॥५१॥माययावंचनया
राज्ञोभीतइतिभयकारणंपिशुनत्वाद्येव॥५२॥ऋतुकालावरोधिनीं॥ऋतुस्नानकालत्वात्स्वसंनिहितां॥

॥४५

धिक्यात् ततएवमोहः विलुलितं क्लमितं ॥ ६४ ॥ दीर्घं यथाभवति तथा रात्रिः ॥ रात्रिशेषः पाठांतरे घर्मं उष्णं यथाभवति तथा ॥ ६५ ॥ अत्रैकस्तो कोधिक इतिकतक संख्यया ज्ञायते इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके अयो० पंचसप्ततीतमः सर्गः ॥ ७५ ॥ तमिति वसिष्ठः भरतागमनं श्रुत्वा आग

तमेवशोकसंतप्तं भरतं केकयीसुतं ॥ उवाच वदतां श्रेष्ठो वसिष्ठः श्रेष्ठवागृषिः ॥ १ ॥ अलं शोकेन भद्रं ते राजपुत्र महायशः ॥ प्राप्तकालं नरपतेः कुरु संयानमुत्तमं ॥ २ ॥ वसिष्ठस्य वचः श्रुत्वा भरतो धरणीं गतः ॥ प्रेतकृत्यानि सर्वाणि कारयामास धर्मवित् ॥ ३ ॥ उद्धृत्य तैलसंसेकात्स तु भूमौ निवेशितं ॥ आपीतवर्णवदनं प्रसुप्तमिव भूमिपं ॥ ४ ॥ संवेश्य शयने चाग्र्ये नानारत्नपरिष्कृते ॥ ततो दशरथं पुत्रो विललाप सुदुःखितः ॥ ५ ॥ किं ते व्यवसितं राजन्प्रोषिते मय्यनागते ॥ विवास्य रामं धर्मज्ञं लक्ष्मणं च महाबलं ॥ ६ ॥ क्व यास्यसे महाराज हित्वेमं दुःखितं जनं ॥ हीनं पुरुषसिंहेन रामेणाक्लिष्टकर्मणा ॥ ७ ॥ राम ॥

तद्दृतिशेषः ॥ १ ॥ संयानं प्रेतनिर्हारं ॥ २ ॥ धरणीं गतः वसिष्ठं साष्टांगं नमस्कृत्वेत्यर्थः धारणां गत इति पाठे धैर्यं प्राप्त इत्यर्थः कारयामास तत्कारणार्थं मंत्रिणः प्रेरयामासेत्यर्थः ॥ ३ ॥ बहुदिवसतैलावस्थानोपाधिना आपीतवदनं वर्णयस्य तं ॥ ४ ॥ दशरथमिति उद्दिश्येति शेषः ॥ ५ ॥ व्यवसितं मनीषितं प्रोषिते देशांतरगते ॥ ६ ॥ रामेणहीनमिमं दुःखितं जनं हित्वा क्व यास्यसीत्यन्वयः ॥ ७ ॥

नः साधयेद्दुःखव्याधियुक्तो भवति मानवः इति कर्मविपाकशास्त्रोक्तेश्च ॥ अत्र विवदमानानां जयोपायं ज्ञात्वा तत्
कथयतः पापमिति नीर्थव्याख्या· द्वयोः साम्यस्थापनपूर्वकं तेषां कलहशमनमकुर्वतः कलहप्रियस्य
यत्पापमिति कतकव्याख्या ॥ ५८ ॥ ५९ ॥ ६० भूयः अभ्यधिकं दुःखं· हियत एवं कष्टैः शपथैः शपमानो मे

एवमाश्वासयन्नेव दुःखार्त्तो निपपात ह ॥ विहीनां पतिपुत्राभ्यां कौसल्यां पार्थिवात्मजः ॥ ५९ ॥ तदा
तं शपथैः कष्टैः शपमानमचेतनं ॥ भरतं शोकसंतप्तं कौसल्या वाक्यमब्रवीत् ॥ ६० ॥ मम दुःख
मिदं पुत्र भूयः समुपजायते ॥ शपथैः शपमानो हि प्राणानुपरुणत्सि मे ॥ ६१ ॥ दिष्ट्या न चलितो ध
र्मादात्मा ते सहलक्ष्मणः ॥ वत्स सत्यप्रतिज्ञो हि सतां लोकानवाप्स्यसि ॥ ६२ ॥ इत्युक्त्वा चांकमानी
य भरतं भ्रातृवत्सलं ॥ परिष्वज्य महाबाहुं रुरोद भृशदुःखिता ॥ ६३ ॥ एवं विलपमानस्य दुःखा
र्तस्य महात्मनः ॥ मोहाच्च शोकसंरंभाद्बभूव लुलितं मनः ॥ ६४ ॥ लालप्यमानस्य विचेतनस्य प्र
णष्टबुद्धेः पतितस्य भूमौ ॥ मुहुर्मुहुर्निश्वसतश्च दीर्घं सा तस्य शोकेन जगाम रात्रिः ॥ ६५ ॥ इत्या
र्षे श्रीरामायणे अयो॰ पंचसप्ततितमः सर्गः ॥ ७५ ॥

प्राणानुपरुणत्सि पीडयसे ॥ ६१ ॥ अथ विशुद्धभा
वं ज्ञात्वानुगृह्णाति· दिष्ट्येति· आत्मा अंतःकरणं· लक्ष्मणः सहितः सहलक्ष्मणस्ते आत्मेत्यर्थः हे वत्स
हि यदि सत्यप्रतिज्ञो भविष्यसि तदा सतां लोकानवाप्स्यसि· कैकेय्यग्रे कृतां रामानयनप्रतिज्ञां सत्यां
कुर्वीतिव्यंग्यं ॥ ६२ ॥ एवमनर्हत्वाद्यपुत्रोचितकर्मणाश्वासयति· इत्युक्त्वेति ॥ ६३ ॥ शोकसंरंभात् शोका

निर्यासो गुग्गुल्वादिः सरलपद्मकौ काष्ठभेदः॥ देवदारूणि॰ देवदारुकाष्ठानि॰ क्षेपयंति चितायामिति
शेषः॥ १६॥ तत्र चितादेशे॰ गत्वा तं चितामध्ये संवेशयामासुः स्थापयामासुः॥ १७॥ जेपुः पैतृमेधिक

चंदनागरुनिर्यासान्सरलं पद्मकं तथा॥ देवदारूणि चान्यत्र क्षेपयंति तथापरे॥ १६॥ गंधा
नुच्चावचांश्चान्यांस्तत्र गत्वाथ भूमिपं॥ तत्र संवेशयामासुश्चितामध्ये तमृत्विजः॥ १७॥ तदा
हुताशनं हुत्वा जेपुस्तस्य तदृत्विजः॥ जगुश्च ते यथाशास्त्रं तत्र सामानि सामगाः॥ १८॥ शिबि
काभिश्च यानैश्च यथार्हं तस्य योषितः॥ नगरान्निर्ययुस्तत्र वृद्धैः परिवृतास्तथा॥ १९॥ प्रस
व्यं चापि तं चक्रुर्ऋत्विजोग्निचितं नृपं॥ स्त्रियश्च शोकसंतप्ताः कौसल्याप्रमुखास्तदा॥ २०॥
क्रौंचीनामिव नारीणां निनादस्तत्र शुश्रुवे॥ आर्तानां करुणां काले क्रोशंतीनां सहस्रशः॥ २१॥
ततो रुदंत्यो विवशा विलप्य च पुनः पुनः॥ यानेभ्यः सरयूतीरमवतेरुर्नृपांगनाः॥ २२॥

मंत्रान्॥ तस्य परलोकसुखप्रदर्थमिति शेषः॥ तदृत्विजः तद्यज्ञप्रवर्तकाः॥ १८॥ १९॥ प्रसव्यमप्रदक्षिणं॰
अग्निचितं अग्निं चितवंतं अश्वमेधादियज्ञकर्तारं॰॥ स्त्रियश्च प्रसव्यं चक्रुरित्यन्वयः॥ २०॥ २१॥ २२॥

तेतव। अस्मिन् पुरे अयोध्यायां। योगक्षेमं प्रजानां अव्यग्रं। परित्यक्तदुःखपारवश्यं यथातथा। स्वः स्वर्गं प
॥१०॥ अविचारितं। प्राचीनवैभवादिस्मरणरहितं यथातथा ॥११॥ ऋत्विजो यज्ञकर्मणि वृत्ताः। पुरोहि

योगक्षेमं तु ते व्यग्रं कोस्मिन् कल्पयिता पुरे ॥ त्वयि प्रयाते स्वस्तात रामे च वनमाश्रिते ॥८॥ विध
वा पृथिवी राजंस्त्वया हीना न राजते ॥ हीन चंद्रेव रजनी नगरी प्रतिभाति मां ॥९॥ एवं विलप
मानं तं भरतं दीनमानसं ॥ अब्रवीद्वचनं भूयो वसिष्ठस्तु महामुनिः ॥१०॥ प्रेतकार्याणि या
न्यस्य कर्तव्यानि विशांपतेः ॥ तान्यव्यग्रं महाबाहो क्रियतामविचारितं ॥११॥ तथेति भरतो
वाक्यं वसिष्ठस्याभिपूज्य तत् ॥ ऋत्विक्पुरोहिताचार्यांस्त्वरयामास सर्वशः ॥१२॥ ये त्वग्रयो
नरेंद्रस्य अग्न्यगाराद्बहिष्कृताः ॥ ऋत्विग्भिर्याजकैश्चैव ते हूयंते यथाविधि ॥१३॥ शिबिका
यामथारोप्य राजानं गतचेतनं ॥ वाष्पकंठा विमनसस्तमूहुः परिचारकाः ॥१४॥ हिरण्यं च सु
वर्णं च वासांसि विविधानि च ॥ प्रकिरंतो जना मार्गं नृपतेरग्रतो ययुः ॥१५॥ - ॥ ॥

तः सर्वहितप्रवर्तकः तदुक्तं मंत्रे च धर्मकृत्ये च शांतिकर्मणि पौष्टिके। अध्वरे यश्च कुशलः स स्याद्रा
जपुरोहित इति। उपनीयवेदाध्यापक आचार्यः ॥१२॥ अग्न्यगाराद्बहिष्कृताः अतः शवसत्वाद्बहिः प्र
देशे प्रतिष्ठापिताः ॥ याजकैः उपद्रष्टृभिः हुयंते स्म ॥१३॥१४॥ हिरण्यं रजतं स्वर्णं रजतपुष्पाणीति यावत् ॥१५॥

त्रयोदशे॰ त्रयोदशेऽह्नि शोधनार्थमुपागतो विललापेत्यन्वयः दशाहाभ्यंतरेऽस्थिसंचयनं कृत्वा सकल
श्राद्धानंतरं त्रयोदशेऽह्नि चिताभस्मोद्धारपूर्वकं स्थलशुद्धिः कर्तव्येति क्षत्रियधर्म इति वाल्मीकेरुक्तेरा
यतेद्वितिक्तकः तीर्थस्तुशोधनं अस्थिसंचयनमित्याह॰ शब्देन रोदनशब्देन पिहितः आवृतः कंठो यस्य॰

ततः प्रभातसमये दिवसे च त्रयोदशे॥ विललाप महाबाहुर्भरतः शोकमूर्छितः॥४॥ शब्दा
पिहितकंठश्च शोधनार्थमुपागतः॥ चितामूले पितुर्वाक्यं इदमाह सुदुःखितः॥५॥ तात य
स्मिन्निसृष्टोऽहं त्वया भ्रातरि राघवे॥ तस्मिन्वनं प्रव्रजिते शून्ये त्यक्तोऽस्म्यहं त्वया॥६॥ य
स्या गतिरनाथायाः पुत्रः प्रव्राजितो वनं॥ तामंबां तात कौसल्यां त्यक्त्वा त्वं क्व गतो नृप॥७॥ दृष्ट्वा
भस्मारुणं तच्च दग्धास्थिस्थानमंडलं॥ पितुः शरीरनिर्वाणं निष्टनन्विषसाद ह॥८॥

233

चितामूले इदं वाक्यमाह॥४॥५॥ न देवाह॰ तात नेति॰ निसृष्टः दत्तः प्रव्रजिते प्रव्राजितेऽहं शून्ये त्यक्तः निरव
लंबतया निरस्तः॥६॥ यस्या अनाथाया गतिरवलंबः पुत्र इत्यर्थः॥७॥ भस्मारुणां भस्मयुतं॰ अतिदाहाद
रुणं च दग्धास्थि॰ दग्धान्यस्थीनि यस्मिन् स्थानमंडलं॰ चितास्थानमंडलं॰ पितुः शरीरनिर्वाणं शरी
रनाशस्थानं॰ तद्दृष्ट्वा निष्टनन्॰ अत्यंतं विलपन् विषसाद॥८॥ ॥ राम

२१॥२२॥ दशाहं॰ अत्यंतसंयोगेद्वितीया॰ दुःखमाशौचं॰ भूमौशयाना इतिशेषः इदंब्रह्मचर्यमात्रोपलक्षणं॰ ननु
द्वादशाहेनभूपालः क्षत्रियःषोडशेहनीतिस्मृतेः कथंक्षत्रियस्यदशाहेनाशौचात्ययइतिचेन्न॰ क्षत्रियस्त
दशाहेनस्वकर्मनिरतः शुचिरितिपराशरोक्तेश्चरितिदिक्॥२३॥ इतिश्रीरामाभिरामेश्रीरामीयेरामायण

कृत्वोदकंतेभरतेनसार्धंनृपांगनामंत्रिपुरोहिताश्च॥ पुरंप्रविश्याश्रुपरीतनेत्राभूमौदशाहंव्यप
नयंतदुःखं॥३३॥ इत्यार्षेश्रीरामायणेवाल्मीकीयेअयोध्याकांडेषट्सप्ततितमःसर्गः॥७६॥ ततो
दशाहेतिगतेकृतशौचोनृपात्मजः॥ द्वादशेहनिसंप्राप्तेश्राद्धकर्माण्यकारयत्॥१॥ ब्राह्मणे-
भ्योधनंरत्नंददावन्नंचपुष्कलं॥ वास्तिकंबहुशुक्लंचगाश्चापिबहुशस्तदा॥२॥ दासीर्दासांश्चया
नानिवेश्मानिसुमहांतिच॥ ब्राह्मणेभ्योददौपुत्रोराज्ञस्तस्यौर्ध्वदेहिकं॥३॥ ॥ ॥

तिलकेअयोध्याकांडेषट्सप्ततितमःसर्गः॥७६॥ ततइति॰ दशाहेतिगतेएकादशेह्निकृतशौचः अनुष्ठि
तप्रेतविमुक्तिदैकादशाहश्राद्धः श्राद्धकर्माणि॰ द्वितीयमासिकादि॰ सपिंडीकरणांतश्राद्धानि॥१॥ वास्तिकं
छागसमूहं॰ आर्षश्छगःवस्तोजः शुक्लंरजतंशुक्लोयोगांतरेप्येतेशुक्लंचरजतं॥२॥ ऊर्ध्वदेहोद्भवमौर्ध्वदेहिकं पारलौ
क॥३

यात्वयाविहीनासापृथिवीअवदारणकालेतुतस्मिन्नपिनावदीर्यते॥१६॥१७॥१८॥अनुगामिनोनुचराआर्ततरा अभूवन्नितिशेषः॥१९॥व्यवेक्षेतां॰ अलुठेतां॰ विश्रांतावितिपाठे विशेषेणश्रांतावित्यर्थः॥२०॥प्रकृतिमान् सत्वप्रकृतिः॰वैद्यः सर्वज्ञः सर्वज्ञभिषजौवैद्यो॥२१॥वृत्तस्यकृतदाहस्य॰ सावशेषास्थिनिचये अस्थि

अवदारणकालेतुपृथिवीनावदीर्यते॥ विहीनायात्वयाराज्ञाधर्मज्ञेनमहात्मना॥१६॥
पितरिस्वर्गमापन्नेरामेचारण्यमाश्रिते॥ किंमेजीवितसामर्थ्यंप्रवेक्ष्यामिहुताशनं॥१७॥
हीनोभ्रात्राचपित्राचशून्यामिक्ष्वाकुपालितां॥ अयोध्यांनप्रवेक्ष्यामिप्रवेक्ष्यामितपोवनं॥१८॥
तयोर्विलपितंश्रुत्वाव्यसनंचाप्यवेक्ष्यतत्॥ भृशमार्ततराभूयः सर्वएवानुगामिनः॥१९॥ततः
नोविषण्णौश्रांतौचशत्रुघ्नभरतावुभौ॥ धरायांस्मव्यचेष्टेतांभग्नशृंगाविवर्षभौ॥२०॥ततः
प्रकृतिमान्वैद्यः पितुरेषांपुरोहितः॥ वसिष्ठोभरतंवाक्यमुत्थाप्यतमुवाचह॥२१॥त्रयोद
शोयंदिवसः पितुर्वृत्तस्यतेविभो॥ सावशेषास्थिनिचयेकिमिहत्वंविलंबसे॥२२॥

संचयनाख्यकर्मणआशौचांतराकृतस्यापवशेषोभूयुद्धिमस्मोद्धारलक्षणस्तस्मिन्कर्तव्ये सतिइत्यर्थः॥एतेनत्रयोदशेहन्यस्थिसंचयनंस्मृतिविरुद्धमित्यपास्तं॥२२॥ ॥

२३५

दीनः दुःखितो भूत्वा पपात ॥ उत्थाप्यमानः पुरुषैः यंत्रबद्धो ध्वजो यंत्रध्वजः ॥ स इव पपात शक्रयंत्रध्वजः स्याकाशा-
स्य भूमौ पातनायोगान् गृहाद्यलंकारार्थध्वजयंत्ररूपेण ध्वजसदृशरूपेण निर्मित इन्द्रस्यार्थ इति कतकः उत्पातत-
पतितेन तेनोपमेत्यन्ये ॥ ९ ॥ अंतकाले पुण्यक्षयकाले ॥ १० ॥ ११ ॥ गुणांगा निज्ञपत्न्यात्मनगुणस्यांगभूता निविष्टि

स तु दृष्ट्वा रुदन्दीनः पपात धरणीतले ॥ उत्थाप्यमानः शक्रस्य यंत्रध्वज इवोच्छ्रितः ॥ ९ ॥ अभि-
पेतुस्ततः सर्वे तस्यामात्याः शुचिव्रतं ॥ अंतकाले निपतितं ययातिमृषयो यथा ॥ १० ॥ शत्रुघ्नश्चा-
पि भरतं दृष्ट्वा शोकपरिप्लुतं ॥ विसंज्ञो न्यपतद्भूमौ भूमिपालमनुस्मरन् ॥ ११ ॥ उन्मत्त इव निश्चि-
त्तो विललाप सुदुःखितः ॥ स्मृत्वा पितुर्गुणांगानि तानि तानि तदा तदा ॥ १२ ॥ मंथराप्रभवस्तीव्रः कै-
केयीग्राहसंकुलः ॥ वरदानमयोक्षोभ्यो मज्जयच्छोकसागरः ॥ १३ ॥ सुकुमारं च बालं च सततं ला-
लितं त्वया ॥ क्व तात भरतं हित्वा विलपंतं गतो भवान् ॥ १४ ॥ ननु भोज्येषु पानेषु वस्त्रेष्वाभरणेषु
च ॥ प्रवारयति नः सर्वांस्तन्नः कोद्य करिष्यति ॥ १५ ॥

त्रवस्त्राभरणादिदानादिकर्माणि स्मृत्वा विल-
लाप ॥ १२ ॥ वरदानमयत्वादक्षोभ्यः ॥ अमज्जयत् ॥ अस्मानिति शेषः ॥ १३ ॥ १४ ॥ नन्विति ॥ वस्त्राभरणादी-
नि दिव्यवस्तून्यस्मत्सु पस्थाप्यं गणेषु किं ते पेक्षितं । गृहाणेति प्रकर्षेण समदिश्य वरणं कारयति भवान् ।
तदद्य नः कः करिष्यति । त्वयि गते इति शेषः ॥ १५ ॥ ॥ ॥

दुःखेदुःखजनकसंकटेप्राप्ते। यः सर्वभूतानांगतिः स्मरणमात्रेण सर्वदुःखनाशकः आत्मनः स्वस्य आवयोश्च ग
तिरितिकिंवक्तव्यं॰ अनेनातिसंकटेभगवत्स्मरणमेवदुःखनाशेसमर्थं॰ नान्यादितिसूचितं। सरामस्त्रिया
प्रव्राजितः सचगतइत्येतदनुचितंतेनकृतंसामर्थ्येसतीतिशेषः॥२॥ किंवारामोराज्यलोभात्पित्राज्ञामु
ल्लंघितवानिति॰ अयशोभयादेवंकरोतु॰ लक्ष्मणः सर्वथानुचितंकृतवानित्याह॰ बलवानिति॰ लक्ष्म

गतिर्यः सर्वभूतानांदुःखेकिंपुनरात्मनः॥ सरामः सत्वसंपन्नः स्त्रियाप्रव्राजितोवनं॥२॥ बल
वान्वीर्यसंपन्नोलक्ष्मणोनामयोप्यसौ॥ किन्नमोचयतेरामंकृत्वापिपितृनिग्रहं॥३॥ पूर्वमेवतु
निग्राह्यः समवेक्ष्यनयानयौ॥ उत्पथंयः समारूढोनार्याराजावशंगतः॥४॥ इतिसंभाषमाणे
तुशत्रुघ्नेलक्ष्मणानुजे॥ प्राग्द्वारेभूत्तदाकुब्जासर्वाभरणभूषिता॥५॥ लिप्ताचंदनसारेणराज
वस्त्राणिबिभ्रती॥ विविधंविविधैस्तैस्तैर्भूषणैश्चविभूषिता॥६॥

णोनाम अनुचितकर्तृत्वेनशोच्यः
योपि॰ अस्मत्भ्राताअसौपितृनिग्रहंकृत्वारामंनमोचयतेस्मवनवासात्॥३॥ कथंपितृनिग्रहः उचितस्त
त्राह॰ पूर्वमितियोराजानार्यावशंगतः सन् उत्पथंअनायमार्गंआरूढः प्राप्तः अतोलक्ष्मणः स्वयंनयानयै
न्यायान्यायौअभिषेकविषयौसमीक्ष्यविचार्य॰ गुरोरप्यवलिप्तस्येतिशास्त्रानुसारेणवनप्रव्राजनात्पू
र्वमेवतत्प्रसंगकालएवनिग्राह्योनेदमनुचितमितिभावः॥४॥ प्राक्द्वारेशत्रुघ्नाधिष्ठितद्वारेकुब्जादेवा

त्रीणि द्वंद्वानि-क्षुत्पिपासे-शोकमोहौ-॥जरामृत्यू जन्ममरणे सुखेदुःखे तन्नाभावो भावे तितीर्षः॥अस्ति
जायतेवर्धते पक्षीयते-॥विपरिणमते विनश्यती त्येवं रूपाणी निकृतकः भूतेषु प्राणिषु-॥एवंभवितुम
तिशोकाक्रांततयाभवितु॥२३॥सर्वभूतभवाभवौ उत्पत्तिविनाशौ॥२४॥२५॥परिमृद्य तौ मार्जयंतो-

त्रीणि द्वंद्वानि भूतेषु प्रवर्त्तान्यविशेषतः॥तेषु चापरिहार्येषु नैवं भवितुमर्हसि॥२३॥सुमं
त्रश्चापि शत्रुघ्नमुत्थाप्याभिप्रसाद्य च॥श्रावयामास तत्त्वज्ञः सर्वभूतभवाभवौ॥२४॥उत्थि
तौ तौ नरव्याघ्रौ प्रकाशेते यशस्विनौ॥वर्षातपपरिग्लानौ पृथग्इंद्रध्वजाविव॥२५॥अश्रू
णि परिमृद्नंतौ रक्ताक्षौ दीनभाषिणौ॥अमात्यास्त्वरयंति स्म तनयौ चापराः क्रियाः॥२६॥इ॥
त्यार्षेश्रीरामायणे वाल्मीकीये अयोध्याकांडे सप्तसप्ततितमः सर्गः॥७७॥अथ यात्रां स
मीहंतं शत्रुघ्नो लक्ष्मणानुजः॥भरतं शोकसंतप्तमिदं वचनमब्रवीत्॥१॥ राम

तनयोराजपुत्रौ अपराः त्रियाः भस्मोद्धारादिक्रियाउद्दिश्य पेतिशेषः॥२६॥इतिश्रीरामाभिरामे श्री
रामीयेरामायणतिलके अयोध्याकांडे सप्तसप्ततितमः सर्गः॥७७॥यात्रां-रामसमीपयात्रां-
समीहंतं समीहमानं विचारयंतमित्यर्थः॥१॥ ॥ राम ॥ ॥

पृथिवीतलेपातयित्वेतिशेषः॥१६॥भांडंभूषणमात्रेपि॥१७॥१८॥गृहीत्वाकुब्जांकैकेयीमभिनिर्भर्त्स्य॰कुब्जामोचना र्थमागतामितिशेषः निर्भर्त्सनमत्रहस्तेनदूरीकरणं॥१९॥परुषैःमर्मग्राहिभिः अतएवदुःखैः पुत्रंशरणमा

सचरोषेणसंवीतःशत्रुघ्नःशत्रुशासनः॥संचकर्षतदाकुब्जांक्रोशंतींपृथिवीतले॥१६॥तस्यां त्वाकृष्यमाणायांमंथरायांततस्ततः॥चित्रंबहुविधंभांडंपृथिव्यांतद्व्यशीर्यत॥१७॥तेनभांडे नविस्तीर्णंश्रीमद्राजनिवेशनं॥अशोभततदाभूयःशारदंगगनंयथा॥१८॥सबलीबलव त्क्रोधाद्गृहीत्वापुरुषर्षभः॥कैकेयीमभिनिर्भर्त्स्यबभाषेपरुषंवचः॥१९॥तैर्वाक्यैःपरुषैर्दुः खैःकैकेयीभृशदुःखिता॥शत्रुघ्नभयसंत्रस्तापुत्रंशरणमागता॥२०॥तंप्रेक्ष्यभरतःक्रुद्धं शत्रुघ्नमिदमब्रवीत्॥अवध्याःसर्वभूतानांप्रमदाःक्षम्यतामिति॥२१॥हन्यामहमिमांपा पांकैकेयींदुष्टचारिणीं॥यदिमांधार्मिकोरामोनासूयेन्मातृघातकं॥२२॥इमामपिहतांकु ब्जांयदिजानातिराघवः॥त्वांचमांचैवधर्मात्मानाभिभाषिष्यतेध्रुवं॥२३॥भरतस्यवचःश्रुत्वा शत्रुघ्नोलक्ष्मणानुजः॥न्यवर्ततततोदोषात्तांमुमोचचमूर्छितां॥२४॥

गताकुब्जामोचनार्थमि तिशेषः॥२०॥यतःसर्वभूतानांमवध्याःअतःक्षम्यतामित्यब्रवीत्॥२१॥मातृघातकंमांप्रतियदिरामोनासूये त्नकुर्यात्तदाहमिमांमातरमपिहन्यां॥२२॥जानातिर्ज्ञास्यसेनाभिभाषिष्यतेस्त्रीघातिनावितिमत्वाइ

वानरीकुरूपत्वात् अत्रगुरुलघुप्रयुक्तछंदोभंग आर्षः पाठांतरे च पादपूरणे ॥७॥ अकरणं निर्दयं ॥८॥ वनेराम
स्तिष्ठतीतिशेषः यथामतिनिगृह्णमितिशेषः ॥९॥ धनवृतः कर्तव्यत्वेन अवधनवृतइत्यर्थः द्रुतंवचइतिपाठांत

मेखलादामभिश्चित्रैरन्यैश्चवरभूषणैः ॥ बभासेबहुभिर्बद्धा रज्जुभिरिववानरी ॥७॥ तांसमीक्ष्यतदा
द्वास्थोभृशंपापस्यकारिणीं ॥ गृहीत्वाऽकरुणंकुब्जांशत्रुघ्नायन्यवेदयत् ॥८॥ यस्याः कृतेवनेरामो
न्यस्तदेहश्चवः पिता ॥ सेयंपापानृशंसाचतस्याः कुरुयथामति ॥९॥ शत्रुघ्नश्चतदाज्ञायवचनं ।
भृशदुःखितः ॥ अंतःपुरचरान्सर्वानित्युवाचधृतव्रतः ॥१०॥ तीव्रमुत्पादितंदुःखंभ्रातॄणांमेत
यापितुः ॥ ययासेयंनृशंसस्यकर्मणः फलमश्नुतां ॥११॥ एवमुक्ताचतेनाशुसखीजनसमावृता
गृहीताबलवत्कुब्जासातद्गृहमनादयत् ॥१२॥ ततः सुभृशसंतप्तस्तस्याः सर्वः सखीजनः ॥ क्रुद्ध
माज्ञायशत्रुघ्नंव्यपलायतसर्वशः ॥१३॥ अमंत्रयतकृत्स्नश्चतस्याः सर्वः सखीजनः ॥ यथायंस
मुपक्रांतोनिःशेषंनः करिष्यति ॥१४॥ सानुक्रोशांवदान्यांचधर्मज्ञांचयशस्विनीं ॥ कौसल्यांशरणं
यामः साहिनोस्तिध्रुवागतिः ॥१५॥

रं ॥१०॥ अत्र अश्नुतांप्राप्नुतांतनथाकर्तव्यंमयेतिशेषः ॥११॥१२॥१३॥ स
मुपक्रांतः प्रारब्धपराक्रमः ॥१४॥ अतः सानुक्रोशामितिसानोस्माकंध्रुवागतिरस्ति अतस्तांशरणंयामइत्य
मंत्रयतेत्यन्वयः ॥१५॥ ॥ राम ॥ राम ॥ राम ॥

पा भांडं उपकरणं ॥ ६ ॥ राजता राजत्वं ॥ ७ ॥ पूर्वो ज्येष्ठः अरण्ये वत्स्यामि रामप्रतिनिधित्वेनेति शेषः ॥ ८ ॥ आनयिष्यामीदृशार्थः ॥ ९ ॥ रामहेतोः रामाभिषेकार्थं ॥ १० ॥ पुरस्कृतं अग्रतः कृतं ॥ अध्वरात् महायज्ञशालायाः स्वा

राज्यं गृहाण भरत पितृपैतामहं ध्रुवं ॥ अभिषेचय चात्मानं पाहि चास्मान्नरर्षभ ॥ ५ ॥ अभिषेचनिकं भांडं कृत्वा सर्वं प्रदक्षिणं ॥ भरतस्तं जनं सर्वं प्रत्युवाच धृतव्रतः ॥ ६ ॥ ज्येष्ठस्य राजता नित्यमुचिता हि कुलस्य नः ॥ नैवं भवंतो मां वक्तुमर्हंति कुशला जनाः ॥ ७ ॥ रामः पूर्वो हि नो भ्राता भविष्यति महीपतिः ॥ अहं त्वरण्ये वत्स्यामि वर्षाणि नव पंच च ॥ ८ ॥ युज्यतां महती सेना चतुरंगमहाबला ॥ आनयिष्याम्यहं ज्येष्ठं भ्रातरं राघवं वनात् ॥ ९ ॥ आभिषेचनिकं चैव सर्वमेतदुपस्कृतं ॥ पुरस्कृत्य गमिष्यामि रामहेतोर्वनं प्रति ॥ १० ॥ तत्रैव तं नरव्याघ्रमभिषिच्य पुरस्कृतं ॥ आनयिष्यामि वै रामं हव्यवाहमिवाध्वरात् ॥ ११ ॥ न सकामां करिष्यामि स्वामिमां मातृगंधिनीं ॥ वने वत्स्याम्यहं दुर्गे रामो राजा भविष्यति ॥ १२ ॥ ॥ ॥

ग्निहोत्रगृहमित्यर्थः ॥ ११ ॥ मातृगंधिनीं ॥ केवलमातृव्यपदेशां ॥ मातृसंज्ञामात्रामित्यर्थ इति तीर्थः ॥ कतकस्तु पुत्रगंधिनीमिति पाठः ॥ पाठः पुत्रगंधिनीमित्यर्थ इत्याह ॥ १२ ॥ ॥

२५ शत्रुघ्नविक्षेपः शत्रुघ्नेनेतस्ततः कर्षणं तेन प्रनष्टज्ञानां विलग्नां यंत्रादिना संयंतां ॥ २६ ॥ इति श्रीरामाभिरामे श्रीरा० रा० ति० अयो० अष्टसप्ततितमः सर्गः ॥ ७८ ॥ ततइति ॥ १ ॥ रक्षासाधनत्वाद्राज्ञा गुरुः ॥ तत्राप्ययं गुरुतरः ज्येष्ठं राज्यार्हं २ यएतद्राज्यमनायकं न नोराजाभव । ननु ज्येष्ठे विद्यमाने कथमहं राजा तत्राह संगत्या

सा पादमूले कैकेय्या मंथरा निपपात ह ॥ निश्वसंती सुदुःखार्ता कृपणं विललाप ह ॥ २५ ॥ शत्रुघ्नविक्षेपविमूढसंज्ञां समीक्ष्य कुब्जां भरतस्य माता ॥ शनैः समाश्वासयदार्तरूपां क्रौंचीं विलग्नामिव वीक्षमाणां ॥ २६ ॥ इत्यार्षे श्रीरामायणे अयोध्याकांडेऽष्टसप्ततितमः सर्गः ॥ ७८ ॥ ततः प्रभातसमये दिवसे थ चतुर्दशे समेत्य राजकर्तारो भरतं वाक्यमब्रुवन् ॥ १ ॥ गतो दशरथः स्वर्गं यो नो गुरुतरो गुरुः ॥ रामं प्रव्राज्य वै ज्येष्ठं लक्ष्मणं च महाबलं ॥ २ ॥ त्वमद्य भव नो राजा राजपुत्र महायशः ॥ संगत्या नापराध्नोति राज्यमेतदनायकं ॥ ३ ॥ आभिषेचनिकं सर्वमिदमादाय राघव ॥ प्रतीक्षते त्वां स्वजनः श्रेणयश्च नृपात्मज ॥ ४ ॥

ज्येष्ठस्य वनवासं प्रति पितुराज्ञासंगत्या तवच राज्यं प्रति तदाज्ञासंगत्या राज्यं कुर्वन्नपि भवान्नापराध्नोति । धर्मविरोधज्येष्ठविरोधलोकविरोधान्न प्राप्नोति । पित्राज्ञाया उभाभ्यामपि पालनीयत्वात् । इतिबहवः एतद्राज्यमनायकमपि अमात्यादीनां संगत्या एकमत्येन दैवगत्या वा नापराध्नोति न नश्यति अतो नो राजा भवेत्यर्थ इत्यर्थः आह ३ आभिषेचनिकं अभिषेचनप्रयोजनं वस्तुजातं रामाभि

रामा॰अ॰
२३८

श्रवणाविषयेप्राप्तंनिशम्यश्रुत्वात्हर्षोभवदितिशेषः अयंतंप्रतिजनंलक्षीकृत्यकर्मप्रवचनीयत्वाद्द्वितीया आर्यस्यपूज्यस्यभरतस्यार्यपूज्यंयदाननंमुखंजनाशीर्वादश्रवणजसंतोषेणपूज्यत्वंमुखस्यतद्धर्षजन्नि नेत्रसंभवाः अतएवप्रहर्षजाबिंदवोनिपेतुः अनुक्तभरतसौमुख्यकथनं चास्यश्लोकस्यप्रयोजनं मित्याहुः ॥ अत्रकतकपाठस्तद्व्याख्याचज्यायसी ॥ १६ ॥ इदंवचनंरामानयनवचनं विपातः विशेषेण पातोगतःशोकोएषांतेजनाइति विशेष्यंविधूतशोकाइतिपाठांतरं हेनरवरतववचनात् रामेत्वयि

ऊचुस्तेवचनमिदंनिशम्यहृष्टाःसामात्याःसपरिषदोविपातशोकाः पंथानंनरवरभक्तिमा न्जनश्चव्यादिदेशस्तववचनाच्चशिल्पिवर्गः ॥ १७ ॥ इत्यार्षेश्रीरामायणेवाल्मीकीयेअयोध्या कांडेएकोनाशीतितमःसर्गः ॥ ७९ ॥ अथभूमिप्रदेशज्ञाःसूत्रकर्मविशारदाः ॥ स्वकर्माभिरताः शूराखनकायंत्रकास्तथा ॥ १ ॥

चभक्तिमान् शिल्पिवर्गःपंथानंकर्तुंव्यादिदेशःजनोरक्षकजनश्चरक्ष णंकर्तुंव्यादिदेश ॥ १७ ॥ इतिश्रीरामाभिरामेश्रीरामीयेरामायणतिलकेअयो॰ एकोनाशीतितमःसर्गः ॥ ७९ भूमिप्रदेशज्ञाःअंतःसजलनिर्जलादिभूमिप्रदेशज्ञाःसूत्रकर्मविशारदाःशिविरादिनिर्माणेसूत्र ग्रहणकुशलाःनिर्जलेघगाधवापीकूपादिनिर्माणंसूत्रकर्मेतिकतकः खनकाःस्वकर्मणिखनननेऽ भिरताःपरसेनयावरुद्धंभेपिखननेदक्षाः अतएवशूराःयंत्रकाःजलप्रवाहादिनियंत्रणसमर्थाः ॥ १ ॥

२३९

रामः
२३८

शिल्पिनः खनकाः यत्र पथोऽभावस्तत्र पंथाः गमनमार्गः क्रियतां विषमाणि च निम्नोन्नतानि च समानि क्रियंतां रथा
दिसुखगत्यमिति भावः पथि विद्यमानेषु दुर्गेषु विशेषेण जनान् चारयंतीति पथिदुर्गविचारकाः पथिदुर्गवि
शारदा इति पाठे तत्र वर्तमानदुर्गे चोरादिभीत्यागंतुमशक्यप्रदेशे रक्षणे विशारदा इत्यर्थः ॥१३॥ एवं संभाषमा
णं तं प्रति सर्वोपि जनः श्रीमत् शुभं अनुत्तमं वाक्यमुवाच न देवाह एवमिति ॥ एवं रामराज्यविषयं भाषमाणं

क्रियतां शिल्पिभिः पंथाः समानि विषमाणि च ॥ रक्षिणश्चानुसंयांतु पथिदुर्गविचारकाः ॥१३॥ एवं
संभाषमाणं तं रामहेतोर्नृपात्मजं ॥ प्रत्युवाच जनः सर्वः श्रीमद्वाक्यमनुत्तमं ॥१४॥ एवं ते भाषमा
णस्य पद्मा श्रीरुपतिष्ठतां ॥ यस्त्वं ज्येष्ठे नृपसुते पृथिवीं दातुमिच्छसि ॥१५॥ अनुत्तमं तद्वचनं नृपा
त्मजप्रभाषितं संश्रवणे निशम्य च ॥ प्रहर्षजास्तं प्रति बाष्पबिंदवो निपेतुरार्याननेत्रसंभवाः ॥१६॥

छ्प

स्य ते पद्मा तदाख्या पद्मचिन्हा च श्रीरुपतिष्ठतां ज्येष्ठानुसरणादिति भावः तदेवाह यस्त्वमिति ज्ये
ष्ठे ज्येष्ठाय पृथिवीं दातुमिच्छसि अतः श्रीस्त्वामुपतिष्ठतां ॥१४॥१५॥ अश्रवणे रामानयनप्रतिज्ञाविष
येऽनुत्तमं नृपात्मजेन प्रभाषितं तद्वचनं निशम्य स्थितानां जनानां प्रति भरतमुद्दिश्य प्रहर्षजाः आर्यानन
नेत्रसंभवाः हर्षयुक्तसुखस्थनेत्रबिंदवो निपेतुरिति तीर्थः ॥ अत्र आनन पदमधिकं कतकस्तु नृपात्म
जः प्रभाषितमिति सविसर्गपाठः नृपात्मजो जनैः प्रभाषितमनुत्तमं तद्वचनं आशीर्वचनं संश्रवणे सम्यक्

बलिनःस्कूदस्खलान्वीराणस्तंवान् विधमंतिहस्ताभ्यामेव निःसारयंति । दुर्गाणिस्थलानि उन्नतान्प्रदेशा
न् विधमंतिखननेनसमीकुर्वंति ॥८॥ कूपान्मार्गमध्यवर्तिनः तादृशमायत श्वभ्रं गर्तंच पांसुभिरपूरयन् ॥९॥
बंधनीयान्सेतून् तोयान् क्षोदनीयान् शर्कराभूयिष्ठप्रदेशान् संचुक्षुदुः । चूर्णयामासुः भेदनीया

अपरेवीरणस्तंबान्बलिनोबलवत्तराः ॥ विधमंतिस्मदुर्गाणिस्थलानिचततस्ततः ॥८॥
अपरेपूरयन्कूपान्पांसुभिःश्वभ्रमायतं ॥ निम्नभागांस्तथैवाशुसमांश्चक्रुःसमंततः ॥९॥
बबंधुर्बंधनीयांश्चक्षोद्यान्संचुक्षुदुस्तथा ॥ विभिदुर्भेदनीयांश्चतांस्तान्देशान्नरास्तदा ॥१०॥
अचिरेणतुकालेनपरिवाहान्बहूदकान् ॥ चक्रुर्बहुविधाकारान्सागरप्रतिमान्बहून् ॥११॥
निर्जलेषुचदेशेषुखानयामासुरुत्तमान् ॥ उदपानान्बहुविधान्वेदिकापरिमंडितान् ॥१२॥
ससुधाकुट्टिमतलःप्रपुष्पितमहीरुहः ॥ मत्तोद्घुष्टद्विजगणःपताकाभिरलंकृतः ॥१३॥
चंदनोदकसंसिक्तोनानाकुसुमभूषितः ॥ बह्वशोभतसेनायाःपंथाःसुरपथोपमः ॥१४॥

न्जलनिर्गमार्थंभेद्यान् ॥१०॥ परिवाहान् अल्पप्रवाहान्बंधनेनबहूदकान्चक्रुः ॥११॥ खानयामासुः
अखनन् उदपानान्कूपवाप्यादीन्वेदिकाभिःपरितोऽलंकृतान् ॥१२॥ ससुधाकुट्टिमतलः तत्रतत्र
सक्तायजलाशयसमीपेविश्रमार्थंनिवासायससुधानलसुधानिबद्धभूदेशःसकुट्टिमतलश्च
कुट्टिमोस्त्रीनिबद्धाभूः क्वचित्सुधाभिः क्वचिन्मृत्तिकाभिरेवबद्धचत्वरइत्यर्थः ॥१३॥ १४॥

कर्मान्तिकाश्चेतनजीविनः स्थपतयो रथादिकर्तारः प्रधानवर्धकयः यन्त्रकोविदाः नेपाणीयादियन्त्रकरणकुशलाः पथदर्शनकोविदा इति पाठान्तरं वर्धकिनस्तक्षाणः मार्गिणः । तत्तद्वनमार्गविशेषस्तानियुक्ताः वृक्षतक्षकाः मार्गावरोधिवृक्षच्छेत्तारः ॥ २ ॥ सूपकाराः सूदाः सुधाभवलेपः वंशचर्मकृतः वंशकृतः वंशदलैः कटशूर्पादिकृतः चर्मकृतः अवस्थानार्थमभ्वपरुषारोप्पमाणः पल्ययनादिकृतः समर्था इत्यारः पूर्वानुभूत

कर्मान्तिकाः स्थपतयः पुरुषा यन्त्रकोविदाः । तथा वर्धकयश्चैव मार्गिणो वृक्षतक्षकाः ॥ २ ॥ सूपकाराः सुधाकारा वंशचर्मकृतस्तथा । समर्था ये च द्रष्टारः पुरतश्च प्रतस्थिरे ॥ ३ ॥ स तु हर्षात्तमुद्देशं जनौघो विपुलः प्रयान् । अशोभत महावेगः सागरस्येव पर्वणि ॥ ४ ॥ ते स्ववारं समास्थाय वर्त्मकर्मणि कोविदाः । करणैर्विविधोपेतैः पुरस्तात्सम्प्रतस्थिरे ॥ ५ ॥ लतावल्लीश्च गुल्मांश्च स्थाणूनश्मन एव च । जनास्ते चक्रिरे मार्गं छिन्दन्तो विविधान्द्रुमान् ॥ ६ ॥ अवृक्षेषु च देशेषु केचिद्वृक्षानरोपयन् । केचित्कुठारैष्टङ्कैश्च दात्रैश्छिन्दन्क्वचित्क्वचित् ॥ ७ ॥

मार्गी मार्गद्रष्टारः ॥ ३ ॥ स त्विति । एवं मार्गसंनाह प्रवृत्तो जनौघो रामदर्शनकौतुकजहर्षान्महावेगः महावेगवान्प्रयान् गच्छन् पर्वणि सागरस्य महावेगो जलौघ इवाशोभत ॥ ४ ॥ ते मार्गशोधकाः स्ववारं स्वसमूहं समास्थाय वारसंघातसंचया इत्यमरः विविधोपेतैः नानाप्रकारयुक्तैः पिटकखनित्रदात्रादिकरणैः युक्ता इति शेषः ॥ ५ ॥ लताः शाखाः स्थाणून्कूटं अपसारयन्त इति शेषः ॥ ६ ॥ अरोपयन् छायार्थमिति शेषः टंकः पाषाणभेदनः छि

जान्हवीसमासाद्य अभिव्याप्य प्रवर्त्तितो नरेंद्रमार्गो विराजत इत्यन्वयः॥२१॥२२॥इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके अयो॰ अशीतितमः सर्गः॥८०॥नांदीमुखं भरताभिषेकाय वसिष्ठेन करिष्यमाणनांदीमुखाद्यभ्युदयप्राग्वर्त्तिनी रामानयनाभ्युदयप्रारंभयुक्तां नांदीमुखीति कश्चित्तु रात्रिं अल्पाव

जान्हवीं तु समासाद्य विविधद्रुमकाननां॥शीतलामलपानीयां महामीनसमाकुलां॥२१॥सचंद्रतारागणमंडितं यथा नभः क्षपायाममलं विराजते नरेंद्रमार्गः स तदा व्यराजत क्रमेण रम्यः शुभशिल्पिनिर्मितः॥२२॥इत्यार्षे श्रीरामायणे अयो॰ अशीतितमः सर्गः॥८०॥ततो नांदीमुखीं रात्रिं भरतं सूतमागधाः॥तुष्टुवुर्वाग्विशेषज्ञाः स्तवैर्मंगलसंस्तवैः॥१॥सुवर्णकोणाभिहतः प्राणदद्यामदुंदुभिः॥दध्मुः शंखांश्च शतशो वाद्यांश्चोच्चावचस्वरान्॥२॥स तूर्यघोषः सुमहान्दिवमापूरयन्निव॥भरतं शोकसंतप्तं भूयः शोकैररंध्रयत्॥३॥ततः प्रबुद्धो भरतस्तं घोषं सन्निवर्त्य च॥नाहं राजेति चोक्त्वा तं शत्रुघ्नमिदमब्रवीत्॥४॥ ॥ ॥

शेषांद्रष्टुतिशेषः स विशेषज्ञाः राजनि राजपुत्रे चापेक्षितविशेषं स्तवं जानंतीति तादृशाः मंगलसंस्तवैः मंगलप्रतिपादकैः॥१॥सुवर्णकोणाः सुवर्णदंडः यामदुंदुभिः यामावसानसूचको दुंदुभिः उच्चावचान् उच्चावचस्वरान्वाद्यान्वाद्यविशेषान्दध्मुः नांद्यानिति पाठः मंगलादीनित्यर्थः॥२॥ इतितीर्थः॥२॥शोकैः शोकोत्पादनैः अरंध्रयत् हिनस्ति स्म रधपाकहिंसनयोः॥३॥४॥

अथमार्गकरणानंतरं अधिकृताः मार्गशिबिरादिनिवेशाधिकारिणः यथाज्ञप्तियथाभरताज्ञापनं शिबिरादिनिवेशे अनुचरानाज्ञाप्ययो यादृशो भरतस्याभिमतो निवेशस्तं तथा कृत्वा भूयो धिकभूषाभिः शोभयामासुः वितानकनककलशरत्नध्वजादिभिर्भूषयामासुः निवेशः शिबिरं भूषणोपमं भागस्यालंकारं सदृशं अंतिरमणीयमितियावत् ॥१५॥१६॥ निवेशान् शिबिराणि ॥१७॥ बहुपांसुचया इत्यनेन शर्करादिराहित्यमस्य

आज्ञाप्याथयथाज्ञप्तियुक्तास्ते धिकृतानराः ॥ रमणीयेषु देशेषु बहुस्वादुफलेषु च ॥१५॥ यो निवेशस्त्वभिप्रेतो भरतस्य महात्मनः ॥ भूयस्तं शोभयामासुर्भूषाभिर्भूषणोपमं ॥१६॥ नक्षत्रेषु प्रशस्तेषु मुहूर्तेषु च तं द्विदः ॥ निवेशान् स्थापयामासुर्भरतस्य महात्मनः ॥१७॥ बहुपांसुचयाश्चापि परिखापरिवारिताः ॥ तत्रेंद्रनीलप्रतिमाः प्रतोलीवरशोभिताः ॥१८॥ प्रासादमालासंयुक्ताः सौधप्राकारसंवृताः ॥ पताकाशोभिताः सर्वे सुनिर्मितमहापथाः ॥१९॥ विसर्पद्भिरिवाकाशे विटंकाग्रविमानकैः ॥ समुच्छ्रितैर्निवेशास्ते बभुः शक्रपुरोपमाः ॥२०॥

वनं परिखाः सगर्ताः पर्यंतभित्तयः तत्र परिखावच्छेदेनेत्यर्थः ॥ इंद्रनीलमणिनिर्मिताः प्रतिमाश्चित्रप्रतिमा येषु निवेशेषु इंद्रकीलप्रतिमा इति पाठे इंद्रकीलपर्वतसदृशा इत्यर्थः एवमुच्चाः परिखा इतियावत् प्रतोली रथ्या ॥१८॥ सौधसदृशैः प्राकारैः संवृताः ॥१९॥ आकाशे विनर्दितभिरिव विधिधिक्षेरिवस्थितैरुपलक्षिताः विटंकं कपोतपालिका तद्युक्ताग्रैर्विमानकैः सप्तभूमिकगृहैरत्युन्नतैरुपलक्षिता इत्यर्थः इति कतकः विसर्पद्भिरिवाकाशे इति पाठांतरं

सराजपुत्रं॰ राजपुत्रै रितरैः सहितंशत्रुघ्नंयुधाजिन्नामाकश्चिन्मंत्री॰ येचहिताजनास्तांश्चानयत ॥ १३ ॥ हलह
लेतिशब्दानुकरणं ॥ १४ ॥ १५ ॥ ह्रद इव सभा॰ ह्रदोत्रसामुद्रः भिन्नलिंगत्वेपि सत्वदयोर्द्वेगाभावात् ॥ चंद्र इ
वसुखमितिवन्नदुष्टोयमा॰ तिमिरनेकयोजनायामविस्तारोमत्स्यः नागाजलगजाः सर्पाश्चमणयोमुक्ता
द्याः शर्कराः सुवर्णखनिमृत्तिकाः सभायांजलस्थानेसभातेजः एतदेवध्वनयतास्तिमितजलइत्युक्तं॰ चि
त्रस्थतिमिनागसंवृतत्वंमणयश्चस्तंभादिषु विद्यंते वशंखाश्चित्रेषु स्वर्णशर्करास्थानेकुट्टिमादौस्व

सराजपुत्रंशत्रुघ्नंभरतंचयशस्विनं ॥ युधाजितंसुमंत्रंचयेचतत्रहिताजनाः ॥ १३ ॥ ततोहलहलाश
ब्दोमहान्समुपपद्यत ॥ रथैरश्वैर्गजैश्चापिजनानामुपगच्छतां ॥ १४ ॥ ततोभरतमायांतंशतक्रतुमि
वामराः ॥ प्रत्यनंदन्प्रकृतयोयथादशरथंतथा ॥ १५ ॥ ह्रदइवतिमिनागसंवृतःस्तिमितजलोमणि
शंखशर्करः ॥ दशरथसुतशोभितासभासादशरथेवबभूवसापुरा ॥ १६ ॥ इत्यार्षेश्रीरा॰ अयो॰ एका
शीतितमः सर्गः ॥ ८१ ॥

पूर्णलेयः प्रकारांतरेणजलादिवर्णनेतुकवेर्न्यूनतादोषः ममतुविभक्तिविपरिणामे
नैषामेवसभायामध्यन्वयान्नदोषः एतेनवसिष्ठोजलंतिमिनागौभरतशत्रुघ्नौ॰ मणयोमात्यपौरजा
नपदाइतिकतकोक्तमपास्तं॰ दशरथसुतशोभितासभापुरासदशरथा॰ सेवबभावितियोजना॰ पितृसमा
नाकारत्वात्॰ पुत्रस्येदानीमपिसदशरथेवेत्यभिप्रेता॰ पुरायथेसंशोउपमेतितयोरत्रसंसृष्टिः ॥ १६ ॥ इतिश्रीरा

२४१

कैकेय्या हेतुना मद्विषये जायमानं लोकस्य सूतमागधादेरपकृतमनुचितकर्म पश्य॰ एवंरूपाणि दुःखानि दुःखकराणि मयि विसृज्य राजा गतः॥५॥ तस्य योगतस्तस्यैत्यर्थः अकर्णिका अकर्णधारा॰ अकंटकेति पाठः कंटकोनाविकस्तद्रहितेत्यर्थ इति कतकः॥६॥७॥८॥ राजधर्मवित् राजपुरोहितकर्तव्यधर्मवेत्ता॰ अतः स्वकृत्यं स्वयं

पश्य शत्रुघ्न कैकेय्या लोकस्यापकृतं महत्॥ विसृज्य मयि दुःखानि राजा दशरथो गतः॥५॥ तस्यैषा धर्मराजस्य धर्ममूला महात्मनः॥ परिभ्रमति राजश्रीर्नौरिवाकर्णका जले॥६॥ यो हि नः सुमहान्नाथः सोऽपि प्रव्राजितो वनं॥ अनया धर्ममुत्सृज्य मात्रा मे राघवः स्वयं॥७॥ इत्येवं भरते वीक्ष्य विलपंतमचेतनं॥ कृपणा रुरुदुः सर्वाः सस्वरं योषितस्तदा॥८॥ तथा तस्मिन्विलपति वसिष्ठो राजधर्मवित्॥ सभामिक्ष्वाकुनाथस्य प्रविवेश महायशाः॥९॥ शातकुंभमयीं रम्यां मणिहेमसमाकुलां॥ सुधर्मामिव धर्मात्मा सगणः प्रत्यपद्यत॥१०॥ स कांचनमयं पीठं स्वस्त्यास्तरणसंवृतं॥ अध्यास्त सर्ववेदज्ञो दूताननुशशास च॥११॥ ब्राह्मणान्क्षत्रियान्योधानमात्यान्गणवल्लभान्॥ क्षिप्रमानयताव्यग्राः कृत्यमात्ययिकं हि नः॥१२॥

संपादयतीत्याह॰ सभामित्यादि॥९॥ तद्विशेषणं शातकुंभमयीमित्यादि॰ सगणः सशिष्यगणः॥१०॥ स्वस्त्यास्तरणसंवृतं स्वस्तिकाकारमंडलवदास्तरणसंवृतं॰ पीठमध्यास्त॰ ततो दूताननुशशास च॥११॥ गणवल्लभाः सेनानायकाः॥ आत्ययिकं कालविलंबासहिष्णु॥१२॥

धर्मज्ञः ज्येष्ठाभिषेकरूपधर्मज्ञः धर्मकांक्षया ज्येष्ठानुवर्तनरूपधर्मलिप्सया मनसा जगाम ससस्मार ९ जगा
गार्हे सर्वज्ञोपि कथमेवमनुचितेमां प्रवर्तयसीत्युक्तवानित्यर्थः ॥ १० ॥ विद्यास्नातस्य सर्वविद्यानंतरभावि
स्नानयुतस्य रामस्य मद्विधः चरितब्रह्मचर्यादिः ॥ ११ ॥ रामस्य स्वमिति शेषः ॥ हे भगवन्नेवं विज्ञाय

तच्छ्रुत्वा भरतो वाक्यं शोकेनाभिपरिप्लुतः ॥ जगाम मनसा रामं धर्मज्ञो धर्मकांक्षया ॥ ९ ॥ स
बाष्पकलया वाचा कलहंसस्वरो युवा ॥ विललापसभामध्ये जगर्हे च पुरोहितं ॥ १० ॥ चरि
तब्रह्मचर्यस्य विद्यास्नातस्य धीमतः ॥ धर्मे प्रयतमानस्य को राज्यं मद्विधो हरेत् ॥ ११ ॥ कथं द
शरथाज्जातो भवेद्राज्यापहारकः ॥ राज्यं चाहं च रामस्य धर्मं वक्तुमिहार्हसि ॥ १२ ॥ ज्येष्ठः श्रे
ष्ठश्च धर्मात्मा दिलीपनहुषोपमः ॥ लब्धुमर्हति काकुत्स्थो राज्यं दशरथो यथा ॥ १३ ॥ अनार्य
जुष्टमस्वर्ग्यं कुर्यां पापमहं यदि ॥ इक्ष्वाकूणामहं लोके भवेयं कुलपांसनः ॥ १४ ॥ यद्धि मा
त्रा कृतं पापं नाहं तदपि रोचये ॥ इहस्थो वनदुर्गस्थं नमस्यामि कृतांजलिः ॥ १५ ॥ राममेवानु
गच्छामि स राजा द्विपदां वरः ॥ त्रयाणामपि लोकानां राघवो राज्यमर्हति ॥ १६ ॥

धर्मं न्याय्यं वक्तुं इह सभायामर्हसि नेदृशमन्याय्यमित्यर्थः ॥ १२ ॥ १३ ॥ १४ ॥ ननु त्वन्मात्रा प्रयासेन राज्यसंपादनादस्माभिरेव
मुक्तमत आह यद्धीति वनदुर्गं वनरूपदुर्गस्थं ॥ १५ ॥ द्विपदां मनुष्याणां वरः श्रेष्ठो राजाऽस्य राज्यस्येति शेषः ॥ १६

२४२

प्रग्रहांप्रकृष्टैर्वीसिष्ठादिभिग्रहः परिग्रहो धिष्ठानंयस्यांसा॰ निशापक्षेप्रकृष्ट गुर्वादिग्रहवती ॥१॥ आर्याणांत्रैव
र्णिकानां॰ आसनानिविविशतां आसनेषूपविशतां ॥२॥ घनापायेशरदि ३ सवसिष्ठः प्रेक्ष्यचचान्वकृतानुमति
कांश्चकृत्वा ॥४॥ धर्मसत्यपरिपालनरूपं ॥५॥ सतांधर्मं जीवनोर्वाक्यकरणादित्येवंरूपं ॥६॥ निहतकंटकंरामस्य

तामार्यगणसंपूर्णांभरतःप्रग्रहांसभां ॥ ददर्शबुद्धिसंपन्नः पूर्णचंद्रांनिशामिव ॥१॥ आसनानियथान्यायमार्याणांविशतांतदा ॥ वस्त्रांगरागप्रभयाद्योतितासासभोत्तमा ॥२॥ सा विद्वज्जनसंपूर्णासभासुरुचिरातथा ॥ अदृश्यतघनापायेपूर्णचंद्रेवशर्वरी ॥३॥ राज्ञस्तुप्रकृतीः सर्वाः ससंप्रेक्ष्यचधर्मवित् ॥ इदंपुरोहितोवाक्यंभरतंमृदुचाब्रवीत् ॥४॥ तातराजादशरथः स्वर्गतोधर्ममाचरन् ॥ धनधान्यवतींस्फीतांप्रदायपृथिवींतव ॥५॥ रामस्तथासत्यवृत्तिः सतांधर्ममनुस्मरन् ॥ नाजहात्पितुरादेशंशशीज्योत्स्नामिवोदितः ॥६॥ पित्राभ्रात्राचतेदत्तंराज्यंनिहतकंटकं ॥ तद्भुंक्ष्वमुदितामात्यःक्षिप्रमेवाभिषेचय ॥७॥ उदीच्याश्चप्रतीच्याश्चदाक्षिणात्याश्चकेवलाः ॥ कोट्यापरांताः सामुद्रारत्नान्युपहरंतुते ॥८॥

वनवासदानातथा ॥७॥ उदीच्यादयस्तत्तद्दिशिप्रत्येकसिंहासना
धीश्वराः येचकेवलाः सिंहासनरहिताः चात्मीयाः अपरांताः द्वीपवासिनः सामुद्राः पोतवणिजः कोट्यासंख्या
तानिरत्नानिहरंतु कोट्योपरांताइतिपाठांतरं कोट्योरत्नानिअनेककोटिसंख्यरत्नानियद्वापरांतास्तत्तद्दि

गोरथैः शकटैरित्यर्थः ॥२६॥ सज्जं गमनाय सन्नद्धं· गुरुः वसिस्टः ॥२७॥ २८॥ गुरुं रामं प्रसादयिष्यन् निव
र्त्तये ॥२९॥ बलस्य योगाय बलसंमेलनाय· बलप्रधानान् आज्ञापये तिशेषः ॥३०॥ संपरिपूर्णकामस्त

तेहयै र्गोरथैः शीघ्रैः स्यन्दनैश्च मनोजवैः ॥ सह योधैर्बलाध्यक्षा बलं सर्वमचोदयन् ॥२६॥ स
ज्जं तु तद्बलं दृष्ट्वा भरतो गुरुसन्निधौ ॥ रथं मे त्वरयस्वेति सुमंत्रं पार्श्वतोऽब्रवीत् ॥२७॥ भरतस्य
तु तस्याज्ञां परिगृह्य प्रहर्षितः ॥ रथं गृहीत्वोपययौ युक्तं परमवाजिभिः ॥२८॥ स राघवः सत्यधृ
तिः प्रतापवान् ब्रुवन् सुयुक्तं दृढसत्यविक्रमः ॥ गुरुं महारण्यगतं यशस्विनं प्रसादयिष्यन् भ
रतोऽब्रवीत्तदा ॥२९॥ तूर्णं त्वमुत्थाय सुमंत्र गच्छ बलस्य योगाय बलप्रधानान् ॥ आनेतुमि
च्छामि हि तं वनस्थं प्रसाद्य रामं जगतो हिताय ॥३०॥ स सूतपुत्रो भरतेन सम्यगाज्ञापितः
संपरिपूर्णकामः ॥ शशास सर्वान्प्रकृतिप्रधानान् बलस्य मुख्यांश्च सुहृज्जनं च ॥३१॥ ततः स
मुत्थाय कुले कुले ते राजन्यवैश्या वृषलाश्च विप्राः ॥ अयूयुजन्नुष्ट्ररथान् खरांश्च नागा
न्हयांश्चैव कुलप्रसूतान् ॥३२॥ इत्यार्षे श्रीरा· अयो॰ द्व्यशीतितमः सर्गः ॥८२॥

स्यापि रामदर्शने उत्कटेच्छत्वात् ॥३१॥ कुले कुले गृहे गृहे· कुलं जनपदे गृहे· कुलप्रसूतान् उत्तम
न् ॥३२॥ इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके अयोध्याकांडे द्व्यशीतितमः सर्गः ॥८२॥

मद्येकविवाक्यंतद्वाक्यमिति॥१७॥सर्वथास्वस्य राज्यचिंतानास्तीतिप्रतिपादकंपुनर्भरतवाक्यं·यदित्विति
१८॥आर्यास्त्रैवर्णिकास्तेचतेमिश्राः पूज्यास्तेषांयुष्माकंसमक्षमित्यन्वयः॥१९॥विष्टयो भृतिं विनाकर्म

तद्वाक्यंधर्मसंयुक्तंश्रुत्वासर्वेसभासदः॥हर्षान्मुमुचुरश्रुणिरामेनिहितचेतसः॥१७॥यदित्वार्ये
नशक्ष्यामिविनिवर्तयितुंवनात्॥वनेतत्रैववत्स्यामियथार्योलक्ष्मणस्तथा॥१८॥सर्वोपायंतुव
र्तिष्ये विनिवर्तयितुंबलात्॥समक्षमार्यमिश्राणांसाधूनांगुणवर्तिनां॥१९॥विष्टिकर्मांतिकाःस
र्वेमार्गशोधकदक्षकाः॥प्रस्थापितामयापूर्वंयात्राचममरोचते॥२०॥एवमुक्त्वातुधर्मात्माभ
रतोभ्रातृवत्सलः॥समीपस्थमुवाचेदंसुमंत्रंमंत्रकोविदं॥२१॥तूर्णमुत्थाययगच्छत्वंसुमंत्र
ममशासनात्॥यात्रामाज्ञापयक्षिप्रंबलंचैवसमानय॥२२॥एवमुक्तःसुमंत्रस्तुभरतेनम
हात्मना॥प्रहृष्टःसोदिशत्सर्वंयथासंदिष्टमिष्टवत्॥२३॥ताःप्रहृष्टाःप्रकृतयोबलाध्य
क्षाबलस्यच॥श्रुत्वायात्रांसमाज्ञप्तांराघवस्यनिवर्तने॥२४॥ततोयोधांगनाःसर्वाभर्तॄन्सर्वा
न्गृहेगृहे॥यात्रागमनमाज्ञायत्वरयंतिस्महर्षिताः॥२५॥

कराःकर्मांतिकाउक्ताः॥२०॥२१॥२२॥आदि
शत् आज्ञापयतिस्मइति·इष्टवत्इष्टार्हइष्टानुरूपइतियावत्॥२३॥निवर्तनेनिवर्तननिमित्तंब
लस्ययात्रांसमाज्ञप्तांश्रुत्वाप्रकृतयोबलाध्यक्षाश्चप्रहृष्टाइत्यन्वयः॥२४॥यात्रागमनं·रामयात्रार्थंगमनं॥२५

परिघज्ञानाः परिघ्वजमानाः नगरे चरंतीतिन्नागरिकाः चरंतीतिरक्‌ ॥१०॥ तत्रनगरे संमताः प्रसिद्धाः नैगमा
वणिजः प्रकृतयः अमात्याः ॥११॥ अणीविविच्याह मणिकारा इति शाणादौमणिशोधकाः सूत्रकर्म
विशेषज्ञास्तंतुवायाः शस्त्रोपजीविनः शस्त्रनिर्माणोपजीविनः ॥१२॥ मायूरकाः लीलामयूरग्राहि
णः ॥ इदमुपलक्षणं शुकादिग्राहिणां यद्वामयूरपिच्छैः छत्रादिव्यजनादिकारिणः ॥ क्राकचः कर

इत्येवं कथयंतस्ते संप्रहृष्टाः कथाः शुभाः ॥ परिघजानाश्चामोन्वयच्छुर्नागरिकास्तदा ॥१०॥
येचतत्रापरे सर्वे सम्मताये चनैगमाः ॥ रामं प्रतिययुर्हृष्टाः सर्वाः प्रकृतयः शुभाः ॥११॥ म
णिकाराश्चयेकेचित्कुंभकाराश्चशोभनाः ॥ सूत्रकर्मविशेषज्ञायेचशस्त्रोपजीविनः ॥१२॥
मायूरकाः क्राकचिकावेधकारोचकास्तथा ॥ दंतकाराः सुधाकारायेचगंधोपजीविनः ॥१३॥
सुवर्णकाराः प्रख्यातास्तथाकंबलकारकाः ॥ स्नापकोष्णोदकावैद्याधूपिकाशौंडिकास्तथा ॥१४॥

पत्रेतेनजीवंतितिक्राकचिकाः वेधकामणिमुक्तादिवेधकर्तारः रोचकाः काचकुप्पादिकर्त्तारः इति
कतकः दंतकाराः गजदंतादिभिः समुद्गकादिकर्तारः दंतलेखकाश्च सुधाकाराः सुधालेपकराः गं
धोपजीविनः ॥ गंधोपजीविनः गंधद्रव्यविक्रायकाः ॥१३॥ स्नापकाः उष्णोदकस्नापकाः उष्णोदकाः अंग
मर्दकाः ॥ उष्णोदकं समुल्लेवोढारस्नो इत्तनेषुच धूपिकाः धूपक्रिययाजीविनः शौंडिकाः मद्यकर्त

श्रीवाल्मीकीयरामायणे अयो० १०९

244

कल्यं प्रातःकाले ॥१॥२॥ यथाविधि कल्पितानि गजसंनद्धनोक्तविधिना कृतसन्नाहानि ॥३॥४॥ समारूढानि सादिभिरिति शेषः ॥५॥ कैकेयी च स्वकृतेः पुत्रप्रत्यहिततया जातत्वान्मया किं कृतमिति खिन्ना पुनः

ततः समुत्थितः काल्यमास्थाय स्पंदनोत्तमं ॥ प्रययौ भरतः शीघ्रं रामदर्शनकाम्यया ॥१॥
अग्रतः प्रययुस्तस्य सर्वे मंत्रिपुरोहिताः ॥ अधिरुह्य हयैर्युक्तान् रथान्सूर्यरथोपमान् ॥२॥
नवनागसहस्राणि कल्पितानि यथाविधि ॥ अन्वयुर्भरतं यांतमिक्ष्वाकुकुलनंदनं ॥३॥ षष्टी
रथसहस्राणि धन्विनो विविधायुधाः ॥ अन्वयुर्भरतं यांतं राजपुत्रं यशस्विनं ॥४॥ शतं
सहस्राण्यश्वानां समारूढानि राघवं ॥ अन्वयुर्भरतं यांतं राजपुत्रं यशस्विनं ॥५॥ कैके
यी च सुमित्रा च कौसल्या च यशस्विनी ॥ रामानयनसंतुष्टा ययुर्यानेन भास्वता ॥६॥ प्रया
ताश्चार्यसंघाता रामं द्रष्टुं सलक्ष्मणं ॥ तस्यैव च कथाश्चित्राः कुर्वाणा हृष्टमानसाः ॥७॥
मेघश्यामं महाबाहुं स्थिरसत्त्वं दृढव्रतं ॥ कदा द्रक्ष्यामहे रामं जगतः शोकनाशनं ॥८॥ दृष्ट एव
हि नः शोकमपनेष्यति राघवः ॥ तमः सर्वस्य लोकस्य समुद्यन्निव भास्करः ॥९॥ रामः

प्रकृतिमापन्ना हर्षेणाययौ । अतएव मध्यमत्वेपि आदौ न तद्दुःखरवः यानेनेत्येकवचनं प्रत्येकापेक्षया सौहार्दादिकयानेनैव तिसृणां गमनं ॥६॥ आर्यसंघाताः त्रैवर्णिकसमूहः ॥७॥८॥९॥

और्ध्वदेहनिमित्तार्थं एतच्छरीरपातोत्तरकालिकदेहभवसुखप्रयोजनायेत्यर्थः यद्वा।।तद्देहपाताद्
र्ध्वजातदेहो निमित्तं यस्य परलोकस्य स ऊर्ध्वदेहनिमित्तः परलोकः स्वार्थिकोऽ।।तदर्थमित्यर्थः मध्येमिलित
नद्यन्तरोऽ।।वमकुर्व्यागंगायास्तर्पणानपितस्वर्गलोकप्राप्तिकरत्वसूचितं॥२४॥स्वेनस्वेनकंदेन स्वस्वक
या॥२५॥गंगामनुः गंगोत्पत्तीकृत्येत्यर्थः परिवर्हेर्यात्रोपयुक्तपटवेश्माद्युपकरणाजातं विधानैर्वासव

दातुंचतावदिच्छामिस्वर्गतस्यमहीपतेः॥औार्ध्वदेहनिमित्तार्थमवतीर्योदकंनदीं॥२४॥तस्ये
वंब्रुवतोमात्यास्तथेत्युक्त्वासमाहिताः॥न्यवेशयंस्तांकंदेनस्वेनस्वेनपृथक्पृथक्॥२५॥नि
वेश्यगंगामनुतांमहानदींचमूंविधानैःपरिवर्हशोभिनीं॥उवासरामस्यतदामहात्मनोवि
चिंतमानोभरतोनिवर्तनं॥२६॥इत्यार्षेश्रीरा॰अयो॰अशीतितमःसर्गः॥८३॥ततोनिविष्टां
ध्वजिनींगंगामन्वाश्रितांनदीं॥निषादराजोदृष्ट्वैवज्ञातीन्सपरितोब्रवीत्॥१॥महतीयमितः
सेनासागराभाप्रदृश्यते॥नास्यांतमवगच्छामिमनस्यापिविचिंतयन्॥२॥यदातुखलुदुर्बुद्धि
र्भरतःस्वयमागतः॥सएषहिमहाकायःकोविदारध्वजोरथे॥३॥

वस्थाकल्पनैःरामस्यनिवर्तनंचिं
तमानचिंतयमानइत्यर्थः॥२६॥इतिश्रीअयोध्याकांडेअशीतितमःसर्गः॥८३॥गंगामनुआश्रितांनिवि
ष्टां॰कुचित्कार्येभिन्निवेशवतीं॥१॥इतःइहगंगातीरेनास्यांतमित्यर्थेसंधिर्षः॥२॥यदातुखलु॰यस्
स्माद्धेतोर्दुर्बुद्धिर्भरतःस्वयमागतस्ततोमहतीसेनाप्रदृश्यतइत्यन्वयःराममपीडार्थमवन्तइत्याशयेन
दुर्बुद्धितावादःभरतागमंचन्द्रमाहसद्यातिमहाकायःमहान्महा...भरतःकोविदारध्व

स्तुन्नवायाः सूच्यासीवनकर्तारः ग्रामेघोषेचवर्तमानामहत्तरः शैलूषाः नटाः कैवर्तकादाशाः कैवर्तकारवाइ
तिपाठेकारवाः कर्मारा॥१५॥गोरथैः शकटैः॥१६॥गोरोचनकुंकुमादिसंबंधस्तावर्णोमृष्टंसंपूर्णमनुलेपोनु

रजकास्तुन्नवायाश्चग्रामघोषमहत्तराः॥शैलूषाश्चसहस्त्रीभिर्यांतिकैवर्तकास्तथा॥१५॥समाहितावे
दविदोब्राह्मणावृत्तसंमताः॥गोरथैर्भरतंयांतमनुजग्मुःसहस्रशः॥१६॥सुवेशाः शुद्धवसनास्ता
म्रमृष्टानुलेपिनः॥सर्वेतेविमलैर्यानैःशनैर्भरतमन्वयुः॥१७॥प्रहृष्टमुदितासेनासान्वयात्कैकयी
सुतं॥भ्रातुरानयनेयांतंभरतंभ्रातृवत्सलं॥१८॥तेगत्वादूरमध्वानंरथयानाश्वकुंजरैः॥समासे
दुस्ततोगंगांशृंगवेरपुरंप्रति॥१९॥यत्ररामसखावीरोगुहोज्ञातिगणैर्वृतः॥निवसत्यप्रमादेन
देशंतंपरिपालयन्॥२०॥उपेत्यतीरंगंगायाश्चक्रवाकैरलंकृतं॥व्यवातिष्ठतसासेनाभरतस्या
नुयायिनी॥२१॥निरीक्ष्यानुत्थितांसेनांतांचगंगांशिवोदकां॥भरतःसचिवान्सर्वान्अब्रवीद्वा
क्यकोविदः॥२२॥निवेशयतमेसैन्यमभिप्रायेनसर्वतः विश्रांतःप्रतरिष्यामःश्वइमांसागरंगमां
॥२३॥

लेपनंयेषांते॥१७॥प्रहर्षःकायिकरोमांचादिरूपःमोदोमानसः॥१८॥शृंगिवेरपुरंप्रतिशृंगिवेरपुरइत्य
र्थः॥१९॥अप्रमादेनसावधानतया॥२०॥२१॥अनुत्थितांगमनेनुद्योगां॥२२॥अद्यविश्रांताःश्वः प्रत
रिष्यामइत्यभिप्रायेण मदभिप्रायज्ञापनेननिवेशयतेत्यर्थः॥२३॥ ॥

एवंस्थितेरपियुद्धेत्वरानकार्येत्याह॥ यदीति॥ यदिरामविषयेतुष्टस्तदेयंसेनास्वस्तिमतीतरिष्यति॥ अ
न्यथानौकासुस्थितत्वात्ताननिहन्मइतिभावः॥ यदादुष्टइतिपाठे दुष्टइतिच्छेदः॥९॥ अभिचक्रामदर्श
नार्थं॥१०॥११॥ स्थपतिःप्रभुः दंडकारण्येकुशलः निग्रहानुग्रहसमर्थः॥ चारैस्तत्रत्यवृत्तांतज्ञः॥१२॥

यदितुष्टस्तुभरतोरामस्येहभविष्यति॥ इयंस्वस्तिमतीसेनागंगामद्यतरिष्यति॥९॥ इ
त्युक्त्वोपायनंगृह्यमत्स्यमांसमधूनिच॥ अभिचक्रामभरतंनिषादाधिपतिर्गुहः॥१०॥ तमा
यांतंतुसंप्रेक्ष्यसूतपुत्रःप्रतापवान्॥ भरतायाचचक्षेथसमयज्ञोविनीतवान्॥११॥ एषज्ञाति
सहस्रेणस्थपतिःपरिवारितः॥ कुशलोदंडकारण्येवृद्धोभ्रातुश्चतेसखा॥१२॥ तस्मात्प
श्यतुकाकुत्स्थत्वांनिषादाधिपोगुहः॥ असंशयंविजानीतेयत्रतौरामलक्ष्मणौ॥१३॥ एत
तुवचनंश्रुत्वासुमंत्राद्भरतःशुभं॥ उवाचवचनंशीघ्रंगुहःपश्यतुमामिति॥१४॥ लब्ध्वा॥
नुज्ञांसंप्रहृष्टोज्ञातिभिःपरिवारितः॥ आगम्यभरतंप्रह्वोगुहोवचनमब्रवीत्॥१५॥ निष्कु
टश्चैवदेशोयंवंचिताश्चापितेवयं॥ निवेदयामतेसर्वंस्वकेदासगृहेवस॥१६॥

अपिचानेनप्रयोजनमस्तीत्याह॥ असंश्र असंशयमिति॥१३॥१४॥१५॥ अयंदेशोनिष्कुटःगृहारा
मंकल्पः वयंवंचिताः प्रस्थानसमयेऽप्रेषितनियोगनिदेशत्वात्॥ इयमुपचारोक्तिः॥ सर्वंरा
ज्यंतेनिवेदयाम॥ वयंत्वदीयाअतः स्वीयदासगृहेवस॥१६॥ राम

नन्वायातु भरतः किमस्माकमत आह बंधयिष्यतीति स्वामात्यैरिति शेषः वधिष्यति वा अनुततः पश्चाद्रा मं वधिष्यति इतिमन्ये इति शेषः ॥४॥ ननु रामवधेऽस्य किं फलमत आह संपन्नामिति संपूर्णामित्यर्थः सार्व कालिकीमिति यावत् तस्य राज्ञः रामस्य सुदुर्लभां नस्मिन् जीवति दुष्प्रापां अतो रामं हंतुं समधिगच्छति बुद्धिं प्राप्नोति ॥५॥ नन्वेवमपि तव का भीतिरत आह भर्तेत्यादि ॥ एवं च तत्पक्षपत्वादस्माकं भीतिरिति भावः अस्माभिश्च सखित्वादेव रामे यत्कर्तव्यमतो नास्माभिरेते गंगां तारयितव्याः अतो यूयं तस्य रामस्य अर्थकामाः

बंधयिष्यति वा पाशैरथवास्मान्वधिष्यति ॥ अनु दाशरथिं रामं पित्रा राज्याद्विवासितां ॥४॥ संप न्नां श्रियमन्विच्छंस्तस्य राज्ञः सुदुर्लभां ॥ भरतः कैकयीपुत्रो हंतुं समधिगच्छति ॥५॥ भर्ता चैव सखा चैव रामो दाशरथिर्मम ॥ तस्यार्थकामाः सन्नद्धा गंगानूपेऽत्र तिष्ठत ॥६॥ तिष्ठंतु सर्व दाशाश्च गंगामन्वाश्रिता नदीं ॥ बलयुक्ता नदीरक्ष्या मांसमूलफलाशनाः ॥७॥ नावां शतानां पं चानां कैवर्तानां शतं शतं ॥ सन्नद्धानां तथा यूनां तिष्ठंत्वित्यभ्यचोदयत् ॥८॥ राम

प्रयोजने वः सन्नद्धाः अत्र गंगानूपे मत्सन्निधौ तिष्ठत ॥६॥ सर्वे मामका दाशास्ते गंगां नदीमेवान्वा श्रिताः नदीरक्ष्याः नदीतरणमार्गविघ्नवंतः मांसमूलफलाशनाः एतद्भित्पातीरे आगंतुमशक्यतया ना वारोपितमांसाद्यशनाः बलवंतः संतस्तिष्ठंतु ॥७॥ बलवतामेवाह नावामिति पंचशतसंख्याकनावां प्रत्येकं सन्नद्धानां युद्धसन्नाहवतां यूनां युद्धार्हाणां कैवर्तानां शतं शतमारुह्य तिष्ठंत्वित्यभ्यचोदयत् ॥८॥

गहनगोचरः गहनंवनं गोचरोदेशोयस्यसः ॥ ५ ॥ दाशास्त्विति ॥ अतोगहनविषयानकाचिच्छंकेति भावः ॥ ६ ॥ अपितुअक्लिष्टकारिणोरामस्यविषयेदुष्टोदुष्टभावोनव्रजसिकच्चिन्रामद्रोहं कर्तुं नव्रजसिकच्चिदित्यर्थः ॥ ननुकातेदोषशंकातत्राह इयंतेइति ॥ रामसंदर्शनमात्रायगमनेणतावत्से

तस्यतद्वचनंश्रुत्वाराजपुत्रस्यधीमतः ॥ अब्रवीत्प्रांजलिर्भूत्वागुहोगहनगोचरः ॥ ५ ॥ दाशास्त्वनुगमिष्यंतिदेशज्ञाः सुसमाहिताः ॥ अहंचानुगमिष्यामिराजपुत्रमहाबलः ॥ ६ ॥ कच्चिन्नदुष्टोव्रजसिरामस्याक्लिष्टकर्मणः ॥ इयंतेमहतीसेनाशंकांजनयतीवमे ॥ ७ ॥ तमेवमभिभाषंतमाकाशइवनिर्मलः ॥ भरतःश्लक्ष्णयावाचागुहंवचनमब्रवीत् ॥ ८ ॥ माभूत्सकालोयत्कष्टंनमांशंकितुमर्हसि ॥ राघवः सहिमेभ्राताज्येष्ठः पितृसमोमम ॥ ९ ॥ तंनिवर्तयितुंयामिकाकुत्स्थंवनवासिनं ॥ बुद्धिरन्यानमेकार्यागुहसत्यंब्रवीमिते ॥ १० ॥ सतुसंहृष्टवदनः श्रुत्वाभरतभाषितं ॥ पुनरेवाब्रवीद्वाक्यंभरतंप्रतिहर्षितः ॥ ११ ॥ धन्यस्त्वंनत्वयातुल्यंपश्यामिजगतीतले ॥ अयत्नादागतंराज्यंयस्त्वंत्यक्तुमिहेच्छसि ॥ १२ ॥

नायाव्यर्थत्वान्ममसंदेहइतिभावः ॥ ७ ॥ आकाशइवेत्युपमयात्रैकालिकमलसंबंधाभावोदर्शितः ॥ ८ ॥ यत्यत्रकालेकष्टंत्वदाशंकितंरामद्रोहरूपंजायतेसकालोमाभूत् हियतोराघवोज्येष्ठोभ्रातापितृसमोतोमांशंकितुंनार्हसि ॥ ९ ॥ नदेवाह तमिति मेमयिमतेकार्येतिपाठांतरं ॥ १० ॥ ११ ॥ १२ ॥ ॥

वस्यं॰ नीवारश्यामाकादि॥१७॥स्वाशिनासुष्ठु भोजिता॰॥ वत्स्यनीत्याशंसे प्रार्थये वसत्वेनामिति पागंतरं॰
तत्राशंसे इतिपुनरुक्तं॥१८॥ इतिश्रीरामाभिरामेश्रीरामीयेरामायणे तिलके अयोध्याकांडेचतुरशीति
तमः सर्गः॥८४॥ एवमिति॰ हेत्वर्थसंहितं॰ हेत्वर्थाभ्यामुपपत्तिप्रयोजनाभ्यां संयुक्तं॥१॥ ऊर्जितः महान्

अस्तिमूलफलं चैतन्निषादैः स्वयमर्जितं॥ आर्द्रंशुष्कंतथामांसंवन्यंचोच्चावचं तथा॥१७॥
आशंसे स्वाशिनासेनावसत्वेनां विभावरीं॥ अर्चितोविविधैः कामैः श्वः ससैन्योगमिष्यसि॥१८॥
इत्यार्षे श्रीरामायणे अयोध्याकांडे चतुराशीतितमः सर्गः॥८४॥ एवमुक्तस्तु भरतो निषादाधिप
तिं गुहं॥ प्रत्युवाचमहाप्राज्ञो वाक्यं हेत्वर्थसंहितं॥१॥ ऊर्जितः खलु ते कामः कृतो मम गुरोः
सखे॥ यो मे त्वमीदृशीं सेनामभ्यर्चयितुमिच्छसि॥२॥ इत्युक्त्वा स महातेजा गुहं वचनमु
त्तमं॥ अब्रवीद्भरतः श्रीमान्पंथानंदर्शयन्पुनः॥३॥ कतरेण गमिष्यामि भरद्वाजाश्र
मं यथा॥ गहनोयंभृशं देशो गंगानूपोदुरत्ययः॥४॥

नेऽयंकामः कामना विषयो मत्सत्कारः म
मकृतः॥ एवं खलु कथं तत्राह॰॥ योमे इति॰॥ नवश्च इयैवसर्वं कृतमित्यर्थः॥२॥ पंथानंदर्शयन्॰ गं
तव्यपथि संमुखं गहस्तं कुर्वन् पुनः पुनरब्रवीदित्यन्वयः॥ आदरेण वारंवारं कथनं॰ गुहं वचनमु
त्तमं॰ निषादाधिपतिं पुनरितिद्वितीयचतुर्थपादौ पागंतरं॥३॥ कतरेण यथा गहनो दुष्प्रवेशः॥४॥

प्रमोहाएवानंतसत्वानिवर्त्पप्राणीनोयस्मिन्तेन। संतापः अंतर्बहिःकरणसंतापएवऔषधयोवेणावक्ष्व यस्मिन्मज्जतामगं कुर्वता सकरणग्राममात्मानमधोनयताएवंभूतेनदुःखरूपशैलेनक्रांतोभ दितिशेषः॥२०॥प्रकर्षेणमूढासंज्ञाचेतनायस्यसयथहतःयूथभ्रष्टः॥२१॥समाहितएकाग्रचित्तःस

प्रमोहानंतसत्वेनसंतापौषधिवेणुना॥ आक्रांतोदुःखशैलेनमज्जताकैकयीसुतः॥२०॥ वि निश्वसन्नेवभृशंदुर्मनास्ततःप्रमूढसंज्ञःपरमापदंगतः॥शमंनलेभेहृदयज्वरार्दितोन रर्षभोयूथहतोयथार्षभः॥२१॥गुहेनसार्धंभरतःसमागतोमहानुभावःसजनःसमाहितः सुदुर्मनास्तंभरतंतदापुनःशनैःसमाश्वासयदग्रजंप्रति॥२२॥इत्यार्षेश्रीरामायणेअ यो० पंचाशीतितमःसर्गः॥८५॥आचचक्षेथसद्भावंलक्ष्मणस्यमहात्मनः॥भरतायाप्र मेयायगुहोगहनगोचरः॥१॥तंजाग्रतंगुणैर्युक्तंवरचापेषुधारिणं॥भ्रातृगुप्त्यर्थमत्यंतमहंल क्ष्मणमब्रुवं॥२॥इयंतातसुखाशय्यात्वदर्थमुपकल्पिता॥प्रत्याश्वसिहिशेष्वास्यांसुखंराघव

जनःसपरिवारःगुहेनसार्धंसमागतोमिलितोभरतोग्रजंप्रतिसुदुर्मनाबभूवतादृशंतंभरतंगु हःपुनराश्वासयत्॥२२॥इतिश्रीरामाभिरामेश्रीरा०रा०ति०अ० पंचाशीतितमःसर्गः॥८५॥सद्भा वंजेष्ठानुवर्त्तनरूपंसाधुत्वं॥१॥तदेवाह तमिति भ्रातृगुप्त्यर्थंजाग्रतंविनिद्रं गुणैःसौशील्या दिगुणैःतत्रगुणैश्चयुक्तं॥२॥इयंतातेत्यादिरुक्तानुवादःपूर्वमेवव्याख्यातः॥३॥

चरिष्यतिप्रचरिष्यति॥१३॥नष्टप्रभोमंदीभूतरश्मिः॥१४॥गुहेनपरिरक्षितइतिपाठेपरित्द्दतचोरबाधइत्यर्थः॥१५॥
अनर्हस्य·दुखानर्हस्य·धर्मप्रेक्षस्यधर्मद्रष्टेः ताद्दशोवागगोचरः उपस्थितः प्राप्तः॥१६॥दहनः शोकाग्निः रा
घवंभरतंवनदाहकोग्निर्वनेदाहाग्निर्दावाग्निस्तेनसंतप्तंशुष्कंगूढोग्निः कोटरसंसक्तोग्निः॥१७॥स्वदंप्र

शाश्वतीःखलुनेकीर्तिर्लोकाननुचरिष्यति॥यस्त्वंकृच्छ्रगतंराममप्रत्यानयतुमिच्छसि॥१३॥एवंसंभा
षमाणस्यगुहस्यभरतंतदा॥बभौनष्टप्रभःसूर्योरजनीचाभ्यवर्तत॥१४॥संनिवेश्यसतांसेनांगुहे-
नपरितोषितः॥शत्रुघ्नेनसमंश्रीमाञ्छयनंपुनरागमत्॥१५॥रामचिंतामयःशोकोभरतस्यमहा
त्मनः॥उपस्थितोत्त्वनर्हस्यधर्मप्रेक्षस्यताद्दशः॥१६॥अंतर्दाहेनदहनःसंतापयतिराघवं
वनदाहाग्निसंतप्तंगूढोग्निरिवपादपं॥१७॥प्रस्तुतःसर्वगात्रेभ्यःस्वेदंशोकाग्निसंभवं॥य
थासूर्याग्निसंतप्तोहिमवान्प्रस्तुतोहिमं॥१८॥ध्याननिर्दरशैलेनविनिश्वसितधातुना॥दैन्य
पादपसंघेनशोकायासाधिशृंगिणा॥१९॥

स्रुतःकर्तरिनिष्ठागत्यर्थत्वात्॥१८॥दुःखेपर्वतरूपकं·रा
मविषयध्यानान्येवनिर्दरशैलाःविदारणरहितशिलासमूहायस्मिन्·॥निःशेषतोदीर्णशालासमूहायस्मि
न्नितिवा·विनिश्वसितमेवगैरिकादिधातुर्यस्मिन्·श्वाससंपर्केणभूषणानामन्यवर्णीजनानात्·दैन्यंकरण
नांस्वस्वविषयप्रवृत्तिवैमुख्यंसएवपादपसंघोयस्मिन्·शोकजाआयसाश्चितश्रांत्तयःताएवअधिशृंगधि

अतिक्रांतमतिक्रांतमनवाप्यमनोरथं ॥ राज्ये राम मम निक्षिप्य पिता मे विनशिष्यति ॥ १७ ॥ सिद्धार्थाः पितरं वृद्धं तस्मिन्काले ह्युपस्थिते ॥ प्रेतकार्येषु सर्वेषु संस्करिष्यंति भूमिपं ॥ १८ ॥ रम्यचत्वरसंस्थानां सुविभक्तमहापथां ॥ हर्म्यप्रासादसंपन्नां सर्वरत्नविभूषितां ॥ १९ ॥ गजाश्वरथसंबाधां तूर्यनादविनादितां ॥ सर्वकल्याणसंपूर्णां हृष्टपुष्टजनाकुलां ॥ २० ॥ आरामोद्यानसंपूर्णां समाजोत्सवशालिनीं ॥ सुखिता विचरिष्यंति राजधानीं पितुर्मम ॥ २१ ॥ अपि सत्यप्रतिज्ञेन सार्धं कुशलिना वयं ॥ निवृत्ते समये ह्यस्मिन् सुखिताः प्रविशेमहि ॥ २२ ॥ परिदेवयमानस्य तस्यैवं हि महात्मनः तिष्ठतो राजपुत्रस्य शर्वरी सात्यवर्तत ॥ २३ ॥ प्रभाते विमले सूर्ये कारयित्वा जटावुभौ ॥ अस्मिन् भागीरथीतीरे सुखं संतारितौ मया ॥ २४ ॥ जटाधरौ तौ द्रुमचीरवाससौ महाबलौ कुंजरयूथपोपमौ ॥ वरेषुधी चापधरौ परंतपौ व्यपेक्षमाणौ सह सीतया गतौ ॥ २५ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये अयोध्याकांडे षडशीतितमः सर्गः ॥ ८६ ॥ ॥ राम ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके अयोध्याकांडे षडशीतितमः सर्गः ॥ ८६ ॥

नस्य रामस्य ॥ ४ ॥ पंचविंशतिश्लोकाः ॥ अत्र सर्गे ॥ २५ ॥ श्रीजानकीवल्लभाय नमः ॥ श्रीरघुनाथ मां रक्ष

३ चितोयं जनः सर्वो दुःखानां त्वं सुखोचितः ॥ धर्मात्मन् स्तस्य गुप्त्यर्थं जागरिष्यामहे वयं ॥ ४ ॥ न हि रामा
त्प्रियतरो ममास्ति भुवि कश्चन ॥ नोत्सुकोस्तु ब्रवीम्येतदद्य सत्यं तवाग्रतः ॥ ५ ॥ अस्य प्रसादादाशंसे
लोकेस्मिन्सुमहद्यशः ॥ धर्मावाप्तिंच विपुलामर्थकामौ च केवलौ ॥ ६ ॥ सोहं प्रियसखं रामं शया
नं सह सीतया ॥ रक्षिष्यामि धनुष्पाणिः सर्वैः स्वैर्ज्ञातिभिः सह ॥ ७ ॥ न हि मे विदितं किंचिद्वनेस्मिंश्
श्चरतः सदा ॥ चतुरंगं ह्यपि बलं प्रसहेमवयं युधि ॥ ८ ॥ एवमस्माभिरुक्तेन लक्ष्मणेन महात्म
ना ॥ अनुनीता वयं सर्वे धर्ममेवानुपश्यता ॥ ९ ॥ कथं दाशरथौ भूमौ शयाने सह सीतया ॥ शक्या नि
द्रा मया लब्धुं जीवितानि सुखानि वा ॥ १० ॥ यो न देवासुरैः सर्वैः शक्यः प्रसहितुं युधि ॥ तं पश्य गुह
संविष्टं तृणेषु सह सीतया ॥ ११ ॥ महता तपसा लब्धो विविधैश्च परिश्रमैः ॥ एको दशरथस्यैष पुत्रः
सदृशलक्षणः ॥ १२ ॥ अस्मिन्प्रव्राजिते राजा न चिरं वर्तयिष्यति ॥ विधवा मेदिनी नूनं क्षिप्रमेव भ
विष्यति ॥ १३ ॥ विनद्य सुमहानादं श्रमेणोपरताः स्त्रियः ॥ निर्घोषो विरतो नूनमद्य राजनिवेशने
॥ १४ ॥ कौसल्या चैव राजा च तथैव जननी मम ॥ नाशंसे यदि ते सर्वे जीवेयुः शर्वरीमिमां ॥ १५ ॥
जीवेदपि च मे माता शत्रुघ्नस्यान्ववेक्षया ॥ दुःखिता या हि कौसल्या वीरसूर्विनशिष्यति ॥ १६ ॥

१०॥ अममर्त्यादः कारणांतरं पच्छति॰ कच्चिदिति॰ ॥ अप्रियं प्राणात्ययरूपं ॥ एकपुत्रा याममेति शेषः ॥ ११ ॥ १२
१३ ॥ मुहूर्त्तं संज्ञः सन् पश्चात्समाश्वस्येत्यर्थः परिसांत्वयन्त्वच्छं कितकिमपि नास्ति किंतु॰ तयोर्जटाधा
रणं श्रवणाज्जदुःखेन मूर्छितोस्मीत्यक्त्वा॰ त्वय्यः ॥ लक्ष्मणं वद्भरतस्यापि पूर्णां भ्रातृभक्तिं दर्शनेन

त्वां दृष्ट्वा पुत्रजीवामि रामे प्रव्राजिते गते ॥ वन्ने दशरथे राज्ञि नाथं एकस्त्वमद्य नः ॥ १० ॥
कच्चिन्न लक्ष्मणे पुत्र श्रुतं ते किंचिदप्रियं ॥ पुत्रेत्वाद्येकपुत्रायाः सहभार्ये वनं गते ॥ ११ ॥
स मुहूर्त्तं समाश्वस्य रुदन्नेव महायशाः ॥ कौसल्यां परिसांत्व्येदं गुहं वचनमब्रवीत् ॥ १२ ॥
भ्राता मे क्वावसद्रात्रिं क्व सीता क्व च लक्ष्मणः ॥ अस्वपच्छयने कस्मिन् किं भुक्त्वा गुह शंस
मे ॥ १३ ॥ सोब्रवीद्भरतं हृष्टो निषादाधिपतिर्गुहः ॥ यद्विधं प्रतिपेदे च रामे प्रियहिते ऽ
तिथौ ॥ १४ ॥ अन्नमुच्चावचं भक्ष्याः फलमूलानि चैव हि ॥ रामायाभ्यवहारार्थं बहुशो प
न्हतं मया ॥ १५ ॥ तत्सर्वं प्रत्यनुज्ञासीद्रामः सत्यपराक्रमः ॥ न हि तत्प्रत्यगृह्णात्स क्षत्रधर्ममम
नुस्मरन् ॥ १६ ॥

तुष्टः ॥ यद्विधं यादृशं व्यवहारं रामे प्रतिपदे कृतवान् ॥ तमब्रवीद्राम
कृतं च इत्यन्वयः ॥ १४ ॥ तमेवाह॰ अन्नमित्यादि ॥ १५ ॥ प्रत्यनुज्ञासीत्॰ मदनुग्रहार्थं केवलं मं
गीकृत्य पुनर्मत्स्यमेव दत्तवान्॰ क्षत्रधर्मं मप्रतिग्रहरूपं॰ ॥ न प्रत्यगृह्णात्॰ ॥ अभ्यवहारायनस्वी
कृतवान् ॥ १६ ॥

250

भृशमप्रियं जटाधारणरूपं यत्रतत्रैव । यत्रक्षणेतत्रैवक्षणेइत्यर्थः ध्यानंजगाम स्वाभिलषितकार्य
संकटंजातमितिचिंतांप्रापेत्यर्थः ॥१॥ सुकुमारत्वादिगुणेनजटादिकंधृतं । अतोनिवृत्तिर्दुर्लभेति

गुरुस्यवचनंश्रुत्वाभरतोभृशमप्रियं ॥ ध्यानंजगामतत्रैवयत्रतच्छुतमप्रियं ॥१॥ सुकुमारो
महासत्वः सिंहस्कंधोमहाभुजः ॥ पुंडरीकविशालाक्षः तरुणःप्रियदर्शनः ॥२॥ प्रत्याश्वस्य मु
हूर्त्तंतुकालंपरमदुर्मनाः ॥ ससादसहसातोत्रैर्हृदिविद्ध इवद्विपः ॥३॥ भरतंमूर्छितंदृष्ट्वा
विवर्णवदनोगुहः ॥ बभूवव्यथितस्तत्रभूमिकंपेयथाद्रुमः ॥४॥ तदवस्थंतुभरतंशत्रुघ्नो
नंतरस्थितः ॥ परिष्वज्यरुरोदोच्चैर्विसंज्ञःशोककर्शितः ॥५॥ ततः सर्वाः समापेतुर्मातरोभ
रतस्यताः ॥ उपवासकृशादीनाभर्तृव्यसनकर्शिताः ॥६॥ ताश्चतंपतितंभूमौ रुदंत्यः पर्य
वारयन् ॥ कौसल्यात्वनुसृत्यैनंदुर्मनाः परिषस्वजे ॥७॥ वत्सलास्वंयथावत्समुपगृह्य ।
तपस्विनी परिपप्रच्छभरतंरुदंतीशोकलालसा ॥८॥ पुत्रव्याधिनतेकच्चिच्छरीरंप्रतिबाधते
॥ अस्यराजकुलस्याद्यत्वदधीनंहिजीवितं ॥९॥

चिंताजगाम ॥१॥ ततोमुहूर्त्तंकालंपरमदुर्मनाः परम
खिन्नः प्रत्याश्वस्यपुनश्चसहसादुःखवेगेनससाद अवशोभूत् तोत्रैरंकुशैर्हृदिहृदयदेशे ॥३॥४॥
तदवस्थंअचेतनावस्थं अनंतरस्थितः समीपस्थितः ॥५॥६॥ अनुसृत्यसमीपंप्राप्य ॥७॥ स्ववत्सं
स्वपुत्रंयथातथोपगृह्य ॥८॥ व्याधिः पित्तप्रकोपादिलक्षणः भ्रमभ्रमर्क्षादिः ॥९॥

परिपालयं पर्यपालयं॥२४॥ इति श्री रामाभिरामे श्री रा॰ रा॰ ति॰ अयो॰ सप्ताशीतितमः सर्गः॥८७॥ तदि
ति॥१॥ इह भूमौ शार्वरी शयिता अधिकरणो निष्ठा॰ एतद्देशावच्छिन्नशयनाधिकरणं शार्वरीत्यर्थः॥
इदमस्य विमर्दितमंगानामिति शेषः विमर्दनाधिकरणमित्यर्थः॥२॥ उक्तविशेषेन दशरथेन हेतुना

ततस्त्वहं चोत्तमबाणचापभृत्स्थितोभवं तत्र स यत्र लक्ष्मणः॥ अतंद्रिभिर्ज्ञातिभिरात्तका
र्मुकं महेंद्रकल्पं परिपालयं तदा॥२४॥ इत्यार्षे श्रीरामायणे अयो॰ सप्ताशीतितमः सर्गः॥
॥८७॥ तच्छ्रुत्वा निपुणं सर्वं भरतः सह मंत्रिभिः॥ इंगुदीमूलमागम्य रामशय्यामवेक्षत॥१॥ अ
ब्रवीज्जननीः सर्वा इह तस्य महात्मनः॥ शार्वरी शयिता भूमाविदमस्य विमर्दितं॥२॥ महा
राजकुलीनेन महाभागेन धीमता॥ जातो दशरथेनोर्व्यां न रामः स्वप्तुमर्हति॥३॥ अजिनो
त्तरसंस्तीर्णे वरास्तरणसंचये॥ शयित्वा पुरुषव्याघ्रः कथं शेते महीतले॥४॥ प्रासादाग्र
विमानेषु वलभीषु च सर्वदा॥ हैमराजतभौमेषु वरास्तरणशालिषु॥५॥ ॥ ॥

जातो नोर्व्यां स्वप्तुमर्हति॥३॥ अजिनेन राजार्हकंदलीचर्मत्वादिमृगाजिनविशेषरूपेणोत्तरेणामेचो
त्तरच्छदेन संस्तीर्णानि चाजिनानि शीतोष्मयोरुष्मशीते॰ वरास्तरणानां कार्पासवस्त्ररत्नकंबला
द्यास्तरणानां समूहो यत्र पर्यंके॰ शीतकाले औष्म्यार्थं तद्वा तुल्यं॥४॥ प्रासादाग्रविमानेषु विमानाकारप्रा
सादाग्रगृहेषु॰ वलभीकूटागारं॰ हैमानि राजतानि च भौमानि भूतलानि येषु॰॥५॥ श्री रामचंद्र

तमेवधर्ममाह॥ नहीति॰ नन्वेवंभरद्वाजादिदत्तांगीकारः कथमितिचेन्न॥ मधुपर्कादिनाराजपूजायाब्राह्मणं
प्रतिविधानेनतद्दत्तांगीकारस्यस्वाभ्युदयफलकत्वेनचतस्ययुक्तत्वात्॥ गुहस्यनिषादत्वेनराजपूजा
नधिकारात्॰ अस्वदेशपत्वेनकरग्रहणायोग्यत्वाच्चतदीयानंगीकारइतिनदोषः यद्यपिगुहस्यतत्त्वज्ञत्वे

नत्वस्माभिः प्रतिग्राह्यंसखेदेयंतुसर्वदा॥ इतितेनवयंसर्वेअनुनीतामहात्मना॥१७॥ लक्ष्म
णेनयदानीतंपीतंवारिमहात्मना॥ औपवास्यंतदाकार्षीद्राघवः सहसीतया॥१८॥ ततस्तुज
लशेषेणलक्ष्मणोप्यकरोत्तदा॥ वाग्यतास्तेत्रयः संध्यांसमुपासंतसंहिताः॥१९॥ सौमित्रिस्तुत
तः पश्चादकरोत्स्वास्तरंशुभं॥ स्वयमानीयबर्हींषिक्षिप्रंराघवकारणात्॥२०॥ तस्मिन्समविश
द्रामः स्वास्तरेसहसीतया॥ प्रक्षाल्यचतयोःपादावपचक्रामलक्ष्मणः॥२१॥ एतत्तदिंगुदीमू
लमिदमेवचतत्तृणं॥ अस्मिन्रामश्चसीताचरात्रिंतांशयितावुभौ॥२२॥ नियम्यपृष्ठेतुतलांगु
लित्रवान्शरैः सुपूर्णाविषुधीपरंतपः महद्धनुःसज्यमुपोह्यलक्ष्मणोनिशामतिष्ठत्परितोस्य

नास्त्येवभगवत्पूजाधिकारस्तथापिव्रतस्थत्वात्तदभोजनमितितत्त्वं॥१७॥ औपवास्यमुपवासंस्वार्थेष्यञ्
॥१८॥ अकरोत्पानक्रियामितिशेषः त्रयःसुमंत्रेणसहिताः समाहितचित्ताः॥१९॥ ततःपश्चात्संध्यावंदनो
त्तरं॰ बर्हींषिदर्भान्॥ स्वास्तरंशयनं॥२०॥ अपचक्रामशयनप्रदेशाद्बहिर्दूरमितिशेषः॥२१॥२२॥ इषुधी
पृष्ठेबध्वातलकरतलयोरंगुलित्राणवान्॰ सज्यंधनुरुपोह्यधृत्वाअस्यपरितोभ्रमन्नतिष्ठत्॰ केवलंनिद्रा

१३ कनकबिंदवः भूषणावयव कनकशकलानीतिकतकः १४ ॥ १५ ॥ भर्तुः शय्या कोमला वा कठिना वा
स्त्रीणां सुखैव मन्येयतः सुकुमारीत्यादि १६ ॥ ममकृतं कैकेयीप्रवर्त्तेः स्वानुमतिराहित्येपि स्वकु

इयं शय्या मम भ्रातुरिदमावर्तितं शुभं ॥ स्थंडिले कठिने सर्वं गात्रैर्विमृदितं तृणैः ॥ १३ ॥
मन्ये साभरणा सुप्ता सीतास्मिं शयने शुभा ॥ तत्र तत्र हि दृश्यंते सक्ताः कनकबिंदवः ॥ १४ ॥
उत्तरीयमिहासक्तं सुव्यक्तं सीतया तदा ॥ तथा ह्येते प्रकाशंते सक्ताः कौशेयतंतवः ॥ १५ ॥
मन्ये भर्तुः सुखा शय्या येन बाला तपस्विनी ॥ सुकुमारी सती दुःखं न विजानाति मैथिली ॥ १६ ॥
हा हतोस्मि नृशंसोस्मि यत्सभार्यः कृते मम ॥ ईदृशीं राघवः शय्यामधिशेते ह्यनाथवत् ॥ १७ ॥
सार्वभौमकुले जातः सर्वलोकसुखावहः ॥ सर्वप्रियकरस्त्यक्त्वा राज्यं प्रियमनुत्तमं ॥ १८ ॥ क
थमिंदीवरश्यामो रक्ताक्षः प्रियदर्शनः ॥ सुखभागी न दुःखार्हः शयितो भुवि राघवः ॥ १९ ॥
धन्यः खलु महाभागो लक्ष्मणः शुभलक्षणः ॥ भ्रातरं विषमे काले यो राममनुवर्तते ॥ २० ॥ सि
द्धार्था खलु वैदेही पतिं यानुगता वनं ॥ वयं संशयिताः सर्वे हीनास्तेन महात्मना ॥ २१ ॥

द्विश्पजातत्वादितिभावः ॥ १७ ॥ १८ ॥ १९ ॥ विषमे काले संकटकाले ॥ २० ॥ या पतिं अनु अनुसृत्य
वनं गता सा सिद्धार्था । वयं संशयिताः ॥ रामसेवाविषयसंशयमापन्नाः कालांतरप्रार्थनीयसेव
त्वात् । इदानीमस्मत्सेवानुमतौ संशयादितिभावः ॥ २१ ॥ ॥ राम ॥

शुकसंघरुतेषु तद्गुतवत्सु ॥६॥ प्रासादवराणां प्रासादश्रेष्ठानां मध्ये वर्येषु श्रेष्ठे पुते पूषित्वा कथं भूमौ शेत इति संबंधः ॥७॥ वराभरणानां परिचारिकानूपुराद्याभरणानां निस्वनै गीतादिशब्दैः स्तुतिभिश्च प्रतिबोध्यमानः कथं भूमौ केवलशेत इति संबंधः ॥८॥९॥ इदं रामस्य भूशयनं लोके अत्र तत्पजनेषु तन्मध्ये तन्मुखात् श्रुतम

पुष्पसंचयचित्रेषु चंदनागरुगंधिषु ॥ पांडराभ्रप्रकाशेषु शुकसंघरुतेषु च ॥६॥ प्रासादवरवर्येषु शीतवत्सु सुगंधिषु ॥ उषित्वा मेरुकल्पेषु कृतकांचनभित्तिषु ॥७॥ गीतवादित्रनिर्घोषैर्वराभरणनिस्वनैः ॥ मृदंगवरशब्दैश्च सततं प्रतिबोधितः ॥८॥ बंदिभिर्वंदितः काले बहुभिः सूतमागधैः ॥ गाथाभिरनुरूपाभिस्स्तुतिभिश्च परंतपः ॥९॥ अश्रद्धेयमिदं लोके न सत्यं प्रतिभाति मा ॥ मुह्यते खलु मे भावः स्वप्नोयमिति मे मतिः ॥१०॥ ननूनं दैवतं किंचित्कालेन बलवत्तरं ॥ यत्र दाशरथी रामो भूमावेवमशेत सः ॥११॥ यस्मिन्विदेहराजस्य सुता च प्रियदर्शना ॥ दयिता शयिता भूमौ स्नुषा दशरथस्य च ॥१२॥

पि अश्रद्धेयमेव तदेव विवृणोति मामा स त्यं न प्रतिभाति तस्मात् एतद्विषये मे भावो ंतःकरणं मुह्यते मम मोह इत्यर्थः अथवा स्वप्नोयं भवितुमर्हतीति मतिः स्वप्नेह्यसंभावितमपि संभाव्यते ॥१०॥ कालेन कलतो बलवत्तरं किंचित्किमपि दैवतं नास्तीति नूनं मन्ये यत्र काले प्राप्ते सति रामोपि भूमावशेत ॥११॥ यस्मिन्काले दशरथस्य दयिता प्रिया स्नुषा भूमौ शयिता ततो न बलवत्किंचित् ॥१२॥ ॥ ॥ ॥

प्रसाद्येति प्रपत्स्यते· निवृत्तिविषयप्रसादमिति शेषः ॥ उपेक्षितुं नार्हति भक्तवत्सलत्वादिति भावः ॥ ३० ॥ इ
ति श्रीरामाभिरामे श्रीरामीये रामायणतिलके अयोध्याकांडे अष्टाशीतितमः सर्गः ॥ ८८ ॥ उष्यउषि

प्रसाद्यमानः शिरसा मया स्वयं बहुप्रकारं यदि न प्रपत्स्यते ॥ ततो नुवत्स्यामि चिराय राघ
वं वने चिरं नार्हति मामुपेक्षितुं ॥ ३० ॥ इत्यार्षे श्रीरामायणे अयोध्याकांडेऽष्टाशीतितमः सर्गः ॥
॥ ८८ ॥ उष्य रात्रिं तु तत्रैव गंगाकूले स राघवः ॥ काल्यमुत्थाय शत्रुघ्नमिदं वचनमब्रवीत् ॥ १ ॥
शत्रुघ्नोत्थाय किं शेषे निषादाधिपतिं गुहं ॥ शीघ्रमानय भद्रं ते तारयिष्यति वाहिनीं ॥ २ ॥
जागर्मि नाहं स्वपिमि तथैवार्यं विचिंतयन् ॥ इत्येवमब्रवीद्भ्राता शत्रुघ्नो विप्रचोदि
तः ॥ ३ ॥ इति संवदतोरेवमन्योन्यं नरसिंहयोः ॥ आगम्य प्रांजलिः काले गुहो वचनमब्रवीत् ॥
॥ ४ ॥ कच्चित्सुखं नदीतीरेऽवात्सीः काकुत्स्थ शर्वरीं ॥ कच्चिच्च सह सैन्यस्य तव नित्यमनामयं ॥ ५ ॥
गुहस्य तत्तु वचनं श्रुत्वा स्नेहादुदीरितं ॥ रामस्यानुवशो वाक्यं भरतोपीदमब्रवीत् ॥ ६ ॥
सुखा नः शर्वरी धीमन्पूजिताश्चापि ते वयं ॥ गंगां तु नौभिर्बह्वीभिर्दाशाः संतारयंतु नः ॥ ७ ॥

त्वाकाल्यं उषःकाले उषः पर्यायो काल्यकाल्यावुभावपीति ज्ञापयते ॥ १ ॥ २ ॥ आर्यं विचिंतयन्नहम
पि यथा त्वं तथैव जागर्मि न स्वपिमीत्येवमब्रवीत् अन्वयः ॥ ३ ॥ ४ ॥ शर्वरीमवात्सीः अत्यंतसंयोगे
द्वितीया ॥ ५ ॥ रामस्यानुवशो रामाधीनः ॥ ६ ॥ ते त्वया पूजिताः ॥ ७ ॥ ॥

253

अर्काणर्धाराणौरिव॰ अन्यापप्रवत्तिमन्या॥२२॥कश्चित्व्यादृशः॥२३॥अन्यसंवरणारक्षा॰ संवरणानांप्राका
राणामासमंताद्रक्षयाअन्यांहीनां॰॥अनावृत्तत्वंरक्षकाभावात्॥२४॥अप्रहृष्टंबलंयस्यां॰॥अतएवन्मू
नांक्षीणबलां॥नाभिमन्यंतेस्वीकर्तुंनेच्छंति॰॥अत्रतद्बाहुवीर्यरक्षितत्वंहेतुः॥२५॥अनस्तमेवराज्यादि

अकर्णधारापृथिवीअन्येवप्रतिभातिमे॥गतेदशरथेस्वर्गंरामेचारण्यमाश्रिते॥२२॥नचप्रा
र्थयतेकश्चिन्मनसापिवसुंधरां॥वनेनिवसतस्तस्यबाहुवीर्याभिरक्षितां॥२३॥अन्यसंवर
णारक्षामयंत्रितहयद्विपां॥अनावृतपुरद्वारांराजधानीमरक्षितां॥२४॥अप्रहृष्टबलांन्यू
नांविषमस्थामनावृतां॥शात्रवोनाभिमन्यंतेभक्ष्यान्विषकृतानिव॥२५॥अद्यप्रभृतिभूमौ
तुभाशयिष्येहंतृणेषुवा॥फलमूलाशिनोनित्यंजटाचीराणिधारयन्॥२६॥तस्याहमुत्तरं
कालंनिवत्स्यामिसुखंवने॥तत्प्रतिश्रुतमार्यस्यनैवमिथ्याभविष्यति॥२७॥वसंतंभ्रातुर
र्थाययशत्रुघ्नोमानुवत्स्यति॥लक्ष्मणेनसहायोध्यामार्योमेपालयिष्यति॥२८॥अभिषेक्ष्यं
तिकाकुत्स्थमयोध्यायांद्विजातयः॥अपिमेदेवताःकुर्युरिमंसत्यंमनोरथं॥२९॥

आनेष्यामियदिसव्रतभंगःकथंकार्यइतिवदेत् तदातत्प्रतिनिधितयाऽहंव्रतमनुष्ठास्यइत्या
ह॰॥अद्येत्यादि॥२६॥तस्यव्रतसंकल्पंस्वयंगृहीत्वातत्परिपालनार्थमुत्तरंकालंचतुर्दशवर्षपर्यं
तमहंवनेवत्स्यामि॰॥एवंसतिनार्यस्यतत्प्रतिश्रुतंतंमिथ्याभविष्यति॥२७॥वसंतमिति॥२८॥२९॥

आवासं उषिता वासं दीपयतां अग्निसात्कुर्वतां ॥ अयं सेनाधर्मः तीर्थं नद्यवतारं अवगाह्य ता महामह मिकया प्रविशतां भांडानि उपकरणानि ॥१५॥ आशुगाः शीघ्राः ॥१६॥ नारीणामित्यादौ तृतीयार्थे षष्ठी षष्ठीत्व विवक्षायां षष्ठी ॥ नारीभिः पूर्णा इत्याद्यर्थः ॥ यानानि रथशकटादीनि युग्यानि अश्वाश्वतर बलीवर्दाद्याः महाधनं बहुमूल्यं यद्वा महाधनं जीवाजीवरूपनानाप्रकारं ॥१७॥ तं ज

आवासमादीपयतां तीर्थं चाप्यवगाहतां ॥ भांडानि चाददानानां घोषस्तु दिवमास्पृशत् ॥१५॥ पताकिन्यस्तु ता नावः स्वयं दाशैरधिष्ठिताः ॥ वहंत्यो जनमारूढं तदा संपेतुराशुगाः ॥१६॥ नारीणामभिपूर्णास्तु काश्चित्काश्चित्तु वाजिनां ॥ काश्चित्तत्र वहंति स्म यानयुग्यं महाधनं ॥१७॥ तास्तु गत्वा परं तीरमवरोप्य च तं जनं ॥ निवृत्ताः कांडचित्राणि क्रियंते दाशबंधुभिः ॥१८॥ सवैजयंतास्तु गजा गजारोहैः प्रचोदिताः ॥ तरंतः स्म प्रकाशंते सपक्षा इव पर्वताः ॥१९॥ नावश्चारुरुहुस्त्वन्ये प्लवैस्तेरुस्तथा परे ॥ अन्ये कुंभघटैस्तेरुरन्ये तेरुश्च बाहुभिः ॥२०॥

नमवरोप्य निवृत्ता नावः समारुह्य दाशबंधुभिः क्रीडार्थं कांडचित्राणि कांडे जले चित्राणि चित्रगमनानि लघुत्वात् क्रियंते स्मेत्यर्थः कांडोऽस्त्री दंडबाणार्ववर्गावसरवारिषु इत्यमरः ॥१८॥ सवैजयंताः सध्वजाः ॥१९॥ प्लवाः वेणुतृणादिनिर्मिताः कुंभाः महांतः घटाः स्वल्पाः विपरीतं वा ॥२०॥

प्रतिप्रविश्यतेतो निवृत्तिपूर्वकंप्रविश्य॥८॥९॥नावांपंचशतानिसमानिन्युः॥१०॥अन्याःपंचशतनौकाभ्योन्याः
स्वस्तिकविज्ञेयाःस्वस्तिकाख्ययालोकप्रसिद्धाराजार्हनौभेदाःमहाघंटांधारयंतितामहाघंटाधराः
पताकास्ताधारयंतीत्यर्थःशोभमानाःस्वर्णादिभूषितचित्रैःशोभमानाःपताकिन्यःबह्वरित्रवंत्यःअरि

ततोगुहःसंत्वरिःश्रुत्वाभरतशासनं॥प्रतिप्रविश्यनगरंगं ज्ञातिज्ञानमब्रवीत्॥८॥उत्तिष्ठतप्रबु
ध्यध्वंभद्रमस्तुहिवःसदा॥नावःसमुपकर्षध्वंतारयिष्यामिवाहिनीं॥९॥तेतथोक्ताःसमुत्थायत्व।
रिताराजशासनात्॥पंचनावांशतान्येवसमानिन्युःसमंततः॥१०॥अन्यास्वस्तिकविज्ञेयाःमहा।
घंटाधराधराः॥शोभमानाःपताकिन्योयुक्तवाताःसुसंहताः॥११॥ततःस्वस्तिकविज्ञेयांपांडुकं
बलसंवृतां॥सनंदिघोषांकल्याणीगुहोनावमुपाहरत्॥१२॥तमारुरोहभरतःशत्रुघ्नश्चम
हाबलः॥कौसल्याचसुमित्राचयाश्चान्याराजयोषितः॥१३॥पुरोहितश्चतत्पूर्वंगुरवोब्राह्म।
णाश्चये॥अनंतरंराजदारास्तथैवशकटापणाः॥१४॥
त्रंनावाकर्षणदंडाःयुक्तवाहाःनौवहनना
विकवत्यःयुक्तवाताइतिपाठेयुक्तगतयःसुसंहताःदृढसंधिबंधाः॥११॥सनंदिघोषांउपरिप्रतिष्ठि
तमंगलवादित्रघोषसहितां-ततःइतरस्वस्तिकाभ्योविलक्षणांस्वस्तिकाख्यांपांडुकंबलोराजास्त
रणांकंबलःतद्वतीं-राजार्हांनावंगुहःस्वयमेवोपाहरत्॥१२॥१३॥तत्पूर्वंसमात्तकभरतारोहात्पूर्वं-अनं
तरंतेषांनासांचानंतरं॥राजदाराः-अत्रचरप्रभुस्त्रियःशकटानिआपणाःपण्यद्रव्याणिनौषुप्रासेपि

रा०टी०अ०

ततःसंदर्शने आश्रमप्रवेशानंतरमृषिदर्शनावसरेऽनुपुरोहितं पुरोहितस्य पश्चात् ॥३॥ शिष्यान्नृपति
अर्घ्यमानयतेतिब्रुवन् ॥४॥ अबुध्यत वसिष्ठेन सहागमनादिति भावः ॥५॥ ताभ्यां वसिष्ठभरताभ्यां
आनुपूर्व्यात् क्रमेणाप्रथमं ब्राह्मणस्य पश्चात्क्षत्रस्य कुले गृहे ॥६॥ वृत्तं अतीतं अत एव राजानं

ततः संदर्शने तस्य भरद्वाजस्य राघवः ॥ मंत्रिणस्तानवस्थाप्य जगामानुपुरोहितं ॥३॥ व
सिष्ठमथ दृष्ट्वैव भरद्वाजो महातपाः ॥ संचचालासनात्तूर्णं शिष्यानर्घ्यमिति ब्रुवन् ॥४॥
समागम्य वसिष्ठेन भरतेनाभिवादितः ॥ अबुध्यत महातेजाः सुतं दशरथस्य तं ॥५॥ ताभ्यामर्घ्यं
र्घ्यं च पाद्यं च दत्वा पश्चात्फलानि च ॥ आनुपूर्व्याच्च धर्मज्ञः पप्रच्छ कुशलं कुले ॥६॥ अयोध्या
यां बले कोशे मित्रेष्वपि च मंत्रिषु ॥ जानन्दशरथं वृत्तं न राजानमुदाहरत् ॥७॥ वसिष्ठो भ
रतश्चैनं पप्रच्छतुरनामयं ॥ शरीरेग्निषु वृक्षेषु मृगेष्वपि च पक्षिषु ॥८॥ तथेति तत्प्रतिज्ञाय
भरद्वाजो महायशाः ॥ भरतं प्रत्युवाचेदं राघवस्नेहबंधनात् ॥९॥ किमिहागमने कार्यं त
व राज्यं प्रशासतः ॥ एतदाचक्ष्व सर्वं मे न हि मे शुध्यते मनः ॥१०॥ ॥ ॥

दाहरत्तत्र राजकुशलं न पप्रच्छ वान् ॥७॥ शरीरादित्रयस्य यथायोगं तपःसाधनत्वाच्च दनामय
प्रश्नः मृगपक्षिणामभयावस्थानद्वारा धर्मसाधनत्वात् शिष्यवत् प्रियत्वाच्च तदनामयप्र
श्नः ॥८॥ यथेति प्रतिज्ञाय अनामयमित्युक्त्वा राघवो रामः ॥९॥ न शुध्यते न विश्वसिति ॥१०॥

मैत्रेमुहूर्त्ते-उदयात्ततीयेमुहूर्ते॥नाडीद्वयंमुहूर्तः रौद्रः सार्पस्तथामैत्रः पैत्रोवासवएवच-आप्योविश्व
स्तथाब्राह्मःप्राजेशेशाग्निरेवच-ऐंद्रोथ्यनिर्ऋतिश्चैववारुणार्यमसाधको॥एतेक्रमेणविज्ञेयामु
हूर्तादशपंचचेत्यक्तेः॥२१॥यथोपजोषं-यथासुखं॥आश्वासयित्वाविश्राम्य-निवेशयित्वाप्र

सापुण्यध्वजिनीगंगांदाशैः संतारितास्वयं॥मैत्रेमुहूर्त्तेप्रययौप्रयागवनमुत्तमं॥२१॥आ
श्वासयित्वाचमूंहुर्महात्मानिवेशयित्वाचयथोपजोषं॥द्रष्टुंभरद्वाजमृषिप्रवर्यमृत्वि
क्सदस्यैः भरतः प्रतस्थे॥२२॥सब्राह्मणस्याश्रममभ्युपेत्यमहात्मनोदेवपुरोहितस्य॥
ददर्शरम्योटजवृक्षदेशंमहद्वनंविप्रवरस्यरम्यं॥२३॥इत्यार्षेश्रीरामायणेवाल्मीकीये
अयोध्याकांडेएकोननवतितमः सर्गः॥८९॥भरद्वाजाश्रमंगत्वाक्रोशादेवनरर्षभः॥ज
नंसर्वमवस्थाप्यजगामसहमंत्रिभिः॥१॥पद्भ्यामेवसधर्मज्ञोन्यस्तशस्त्रपरिच्छदः॥व
सानोवाससीक्षौमेपुरोधायपुरोहितं॥२॥

यागवनेस्थापयित्वा॥२२॥देवपुरोहितस्य॥भरद्वा
जोत्युतथ्यभार्यायांममतायांबृहस्पतेर्जातइतिपुराणप्रसिद्धं तं चभर्तृभियात्यक्तुकामांममतांदेवा
ऊचुः-उतथ्यस्यक्षेत्रजत्वेनबृहस्पतेरौरसत्वेनद्वाजममुंभरेतितस्माद्भरद्वाजइतितस्यनाम॥२३॥
इतिश्रीअ० एकोननवतितमः सर्गः॥८९॥जगामइत्युमितिशेषः-अवस्थाप्य-आश्रमोपरोधनिव
त्तयेइतिशेषः॥१॥पद्भ्यामितिविनयप्रदर्शनार्थं॥२॥ ॥ राम ॥

तन्मेनेष्टं॰ तदेव विवृणोति॥ नाहमिति॰ एतेन मात्रकृतव्यापारेण न च तद्वचनमाददे अंगीकरोमि इदानीमपीति शेषः॥१६॥ अथ स्वागमनकारणमाह॰ अहं त्विति॰ प्रसादकः उपयातः प्रसादयितुमागत इत्यर्थः॥१७॥ एवंगतं एवंबुद्धिं च संप्रति कस्मिन्प्रदेशे॥१८॥ याचितो भरताय प्रसन्नो भवेति प्रार्थितः प्रसादान् प्रसादं प्राप्य॥१९॥ एतदुक्तरूपं वचः त्वयि युक्तं न वो चितं तदेव समर्थयइति॰ गुरु

वसिष्ठादिभिर्ऋत्विग्भिर्याचितो भगवांस्ततः॥ उवाच तं भरद्वाजः प्रसादाद्भरतं वचः॥१९॥
त्वय्येतत्पुरुषव्याघ्र युक्तं राघववंशजे॥ गुरुवृत्तिर्दमश्चैव साधूनां चानुयायिता॥२०॥
जाने चैतन्मनस्थं ते दृढीकरणमस्त्विति॥ अपृच्छं त्वां तवात्यर्थं कीर्तिं समभिवर्धयन्॥२१॥
जाने च रामं धर्मज्ञं ससीतं सहलक्ष्मणं॥ अयं वसति ते भ्राता चित्रकूटे महागिरौ॥२२॥ श्वस्तु गंतासि तं देशं वसाद्य सह मंत्रिभिः॥ एतं मे कुरु सुप्राज्ञ कामं कामार्थकोविद॥२३॥

256

इति॰ गुरुवृत्तिर्गुरुसेवा॰ यतो गुरुसेवादित्रयं राघववंशजे प्रायो दृष्टमिति शेषः यद्वा एतत्त्रयं त्वयि युक्तं इत्यन्वयः॥२०॥ दृढीकरणं अन्यथाभावान्निवृत्तिः बहुनामग्रे उक्तो ऽत्यर्थो नान्यथा कर्तुं शक्यते॰ मुख्यप्रयोजनमाह॰ कीर्तिं समभिवर्धयन्॰ असर्वज्ञजनं प्रतीति शेषः हेतौ शता॰ कीर्त्यभिवृद्धिहेतवे ऽपृच्छमित्यर्थः॥२१॥ अथ रामः क्वेति प्रश्नस्योत्तरमाह॰ जाने चेति॥२२॥ एतं अद्यवासरूपं॰ कामार्थकोविद वांछितार्थप्रदानसमर्थः॥२३॥ ॥ राम ॥

अक्लिष्टवासवीजमाह सुषुवेइति॥ कौसल्यायं सुषुवे चिरं चिरकालमुद्दिश्य प्रव्राजितः॥११॥ वनवासी भवेतिनि
युक्तः॥१२॥ इह वनेतस्य रामस्य तस्यानुजस्य लक्ष्मणस्य च पापं कर्तुमिहेच्छसीत्यन्वयः तत्रहेतुरकंटकं अ
सपत्नं॥१३॥ पर्यश्रुनयनः परिस्रुतनयनः संसज्जमानया स्खलंत्या॥१४॥ मामेवं पापप्रसक्तं॥ यदि भगवा

सुषुवेयममित्रघ्नं कौसल्यानंदवर्धनं॥ भ्रात्रा सह सभार्यो यश्चिरं प्रव्राजितो वनं॥११॥ नियुक्तः
स्त्रीनिमित्तेन पित्रा यो सौ महायशाः॥ वनवासी भवेतीह समाः किल चतुर्दश॥१२॥ कच्चिन्न तस्या
ऽपापस्य पापं कर्तुमिहेच्छसि॥ अकंटकं भोक्तुमना राज्यं तस्यानुजस्य च॥१३॥ एवमुक्तो भरद्वा
जं भरतः प्रत्युवाच ह॥ पर्यश्रुनयनो दुःखाद्वाचा संसज्जमानया॥१४॥ हतोस्मि यदि मामेवं भ
गवानभिमन्यते॥ मत्तो न दोषमाशंके मैवं मामनुशाधि हि॥१५॥ न चैतदिष्टं माता मे यदवोचन्मदं
तरे॥ नाहमेतेन तुष्टश्च न तद्वचनमाददे॥१६॥ अहं तु तं नरव्याघ्रमुपयातः प्रसादकः॥ प्रतिने
तुमयोध्यायां पादौ चास्याभिवंदितुं॥१७॥ तं मामेवंगतं मत्वा प्रसादं कर्तुमर्हसि॥ शंस मे भगव
न्रामः क्व संप्रति महीपतिः॥१८॥

न्सर्वज्ञो मन्यते तदाहतो स्मि व्यर्थजन्मास्मि॥ दोषं प्रव्राजन
दोषं मत्तो मदुपनिमित्ततो नेति अहमाशंके स्वानुभवतो जानामि अतो मामेवं मानुशाधि मैवं करोरित्वं ब्रुहि
१५॥ ननु कथमपालपः क्रियते अत आह मदंतरे मद्विषये यत्तु मया विनेति अर्थ इति तत्र अंतरे शात्पव्यय
स्यैव तदर्थत्वात् ममत्ववसरवाची अंतरशब्द इति न दोषः यन्मे माता नो चन्मदभिषेकरामवनवासादि

अत्रोत्तरमाह-भरत इति-भगवद्भयात् भगवदाश्रमपीडाप्रसंगभयादित्यर्थः ॥६॥ विषयेषु देशेषु परि
हर्तव्याः तदाश्रमवर्त्तिरक्षोकादिबाधाप्रसंगनिमित्तमनुपरोध्याः ॥७॥ तदेवाह वाजीत्यादि ॥८॥ प
रमर्षिणा-कृतभरतवचसा-समुपागमंसमीपानयनं ॥१०॥ पीत्वापः परिमृज्येति-हृदयंगमाभि

भरतः प्रत्युवाचेदं प्रांजलिस्तंतपोधनं ॥ नसैन्येनोपयातोस्मि भगवन् भगवद्भयात् ॥६॥
राज्ञा हि भगवन्नित्यं राजपुत्रेण वातथा ॥ यत्नतः परिहर्तव्या विषयेषु तपस्विनः ॥७॥ वा
जिमुख्यामनुष्याश्च मत्ताश्च वरवारणाः ॥ प्रच्छाद्य भगवन्भूमिं महतीमनुयांति मां ॥८॥
ते वृक्षानुदकंभूमिंमाश्रमेषूटजांस्तथा ॥ नहिंस्युरितिते नाहमेक एवागतस्ततः ॥९॥ आ
नीयतामितः सैनेत्याज्ञप्तः परमर्षिणा ॥ तथा तु चक्रे भरतः सेनायाः समुपागमं ॥१०॥ अ
ग्निशालां प्रविश्याथ पीत्वापः परिमृज्य च ॥ आतिथ्यस्य क्रियाहेतोर्विश्वकर्माणमाह्वयत्
॥११॥ आह्वये विश्वकर्माणमहंत्वष्टारमेव च ॥ आतिथ्यं कर्तुमिच्छामि तत्र मे संविधीयतां ॥१२॥
आह्वये लोकपालांस्त्रीन् देवान् शक्रपुरोगमान् ॥ आतिथ्यं कर्तुमिच्छामि तत्र मे संविधीयतां ॥१३॥

र्द्भिरोष्ठौ परिमृज्येत्स कृदाचम्येत्यर्थः करीत्याचम्य-आतिथ्यक्रियाहेतोः आतिथ्यसंपादननिमित्तं
विश्वकर्मा सष्टिकर्तृविशेषः ॥११॥ आह्वानप्रकारमाह-आह्वय इति-त्वष्टारं तक्षणादिव्यापारोपेतं वि
श्वकर्माणं-संविधीयतां-विश्वकर्मसाध्यं गृहादि सर्वं सिद्धं क्रियतां ॥१२॥ त्रीन्-यमवरुणकुबेरान्

257

प्रतीतरूपः प्रसिद्धयशाः रूपंयशस्याभिरूप्येवर्णे चैवनिरूपणोइतिकोशान्तदाश्रमेभरद्वाजाश्रमे ॥२४॥ इतिश्री
रामाभिरामेश्रीरामीयेरामायणतिलके अयो० नवतितमः सर्गः ॥९०॥ कृतबुद्धिंकृतनिश्चयं ॥ आतिथ्ये
नविशिष्टभोजनोपेतातिथिसत्काररूपहेतुनाफलमप्यद्दिनुः ॥१॥ वनेयदुपपद्यतेतेनातिथ्यंकृतंनन्वि

नतस्तथेत्येवमुदारदर्शनः प्रतीतरूपोभरतोब्रवीद्वचः ॥ चकारबुद्धिंचमहाश्रमेतदानि
शानिवासायनराधिपात्मजः ॥२४॥ इत्यार्षेश्रीरामायणे अयो० नवतितमः सर्गः ॥९०॥ कृतबु
द्धिंनिवासायतत्रैवसमुनिस्तदा ॥ भरतंकैकयीपुत्रमातिथ्येनन्यमंत्रयत् ॥१॥ अब्रवीद्भर
तस्त्वेनंनन्विदंभवताकृतं ॥ पाद्यमर्घ्यमथातिथ्यंवनेयदुपपद्यते ॥२॥ अथोवाचभरद्वाजो
भरतंप्रहसन्निव ॥ जानेत्वांप्रीतिसंयुक्तंतुष्येस्त्वंयेनकेनचित् ॥३॥ सेनायास्तुतथैवास्याः
कर्तुमिच्छामिभोजनं ॥ ममप्रीतिर्यथारूपात्वमर्होमनुजर्षभ ॥४॥ किमर्थंचापिनिक्षिप्यदूरे
बलमिहागतः ॥ कस्मान्नेहोपयातोसिसबलः पुरुषर्षभ ॥५॥

त्यब्रवीदित्यन्वयः ॥२॥ वनवासि
त्वेनदरिद्रत्वादेनदधिकातिथ्यकरणेऽसामर्थ्यमन्यतइत्याशयेनप्रहसन्निवेति ॥ येनकेनचिद
पितुष्येः तुष्टोभवेरितिमन्ये ॥ वन्येनाप्यातिथ्येनप्रीतियुक्तइतिजाने ॥३॥ अथापिसेनायाइत्यादिः मम
प्रीतिर्यथारूपाममेच्छायादृशीनथारूपांत्वांत्वमर्होसि अंगीकर्तुमितिशेषः ॥४॥ बलंदुरेनिक्षिप्यएका
की किमर्थमागतः अत्रसेना [illegible] स्यादिति ॥५॥ ॥

पादपच्युतानि वृक्षेभ्यः स्वयंजातानि ॥२०॥ शिक्षास्वरसमायुक्तं ॥ शिक्षाप्रतिपाद्यवर्णोच्चारणलक्षणोपेतं॰ तथा व्याकरणोपदिश्यमानप्रकृतिप्रत्ययस्वरोपेतं स्वरैः स्फष्टलक्षणां॰ एकः शब्दः सम्यक् ज्ञातः सुप्रयुक्तः ॥ स्वर्गे लोके कामधुग्भवतीत्युक्तेः ॥ समाधिनेजसस्तपोभिर्युक्तः एवं गुणोपेतमाह्वानवाक्यमब्रवीदित्यर्थः ॥ महर्षेस्तपोबलात् स्वर्गे कामधुक्त्वेन प्रसिद्धादपि वचनादिहैव सर्वं सिद्धमि

विचित्राणि च माल्यानि पादपच्युतानि च ॥ सुरादीनि च पेयानि मांसानि विविधानि च ॥२१॥ एवं समाधिना युक्तस्तेजसा प्रतिमेन च ॥ शिक्षास्वरसमायुक्तं सुव्रतश्चाब्रवीन्मुनिः ॥२२॥ मनसाध्यायतस्तस्य प्राङ्मुखस्य कृताञ्जलिः ॥ आजग्मुस्तानि सर्वाणि दैवतानि पृथक् पृथक् ॥२३॥ मलयं दर्दुरं चैव ततः स्वेदनुदोनिलः ॥ उपस्पृश्य ययौ युक्त्या सुप्रियात्मा सुखं शिवः ॥२४॥ ततोभ्यवर्षन्तघना दिव्याः कुसुमवृष्टयः ॥ देवदुन्दुभिघोषश्च दिक्षु सर्वासु शुश्रुवे ॥२५॥ प्रववुश्चोत्तमावाता ननृतुश्चाप्सरोगणाः ॥ प्रजगुर्देवगन्धर्वा वीणाः प्रमुमुचुः स्वरान् ॥२६॥

तिभावः ॥२२॥ मनस्य ध्यायतः मनसा ध्यानपूर्वककृताह्वानस्य॰ तानि आहूतानि ॥२३॥ मलयदर्दुरौ चंदनपर्वतौ॰ उपस्पृश्य स्पृष्ट्वा॰ युक्त्या यथोचितवत्याशैत्यमांद्यसौरभ्ययोगेन सुप्रियात्मा सुप्रियस्वरूपः अतएव शिवः सुखदः ईदृशो निलः सुखं ववौ ॥२४॥ घना मेघाः ॥२५॥ वीणा वाद्यमाना इति शेषः स्वरान् षड्जादीन् ॥२६॥ ॥

258.

तास्तेनदी आशगंगा॥१४॥तासांकृत्यमाह॥अन्याइति॥मैरेयंमद्यभेदः धात्रीधातकीप्रभृतिनिर्मितः सुरागौडीमाध्वीपैष्टी चेतित्रिविधासुनिष्ठतांसुनिष्पादितां॥ इक्षुकांडरसोपमंनद्वन्मधुरं॥१५॥हाहाः हूहूः छंदोवंशाद्युस्वपाठः॥१६॥१७॥सपरिच्छदाः सालंकाराः नृत्यगीतावाद्यपेक्षितपरिकरोपे

प्राक्स्रोतसश्चयानद्यस्तिर्यक्स्रोतसएवच॥पृथिव्यामंतरिक्षेचसमायांत्वद्यसर्वशः॥१४॥अन्याःस्रवंतुमैरेयंसुरामन्याःसुनिष्ठितां॥अपराश्चोदकंशीतंइक्षुकांडरसोपमं॥१५॥आह्वयेदेवगंधर्वान्विश्वावसुहहाहुहून्॥तथैवाप्सरसोदेवगंधर्वैश्चापिसर्वशः॥१६॥घृताचीमथविश्वाचीमिश्रकेशीमलंबुसां॥नागदत्तांचहेमांचसोमामद्रिकृतस्थलीं॥१७॥शक्रंयाश्चोपतिष्ठंतिब्रह्माणंयाश्चभामिनीः॥सर्वास्तुंबुरुणासार्धमाह्वयेसपरिच्छदाः॥१८॥वनंकुरुषुयद्दिव्यंवासोभूषणपत्रवत्॥दिव्यनारीफलंशश्वत्तत्कौबेरमिहैवतु॥१९॥इहमेभगवान्सोमोविधत्तामन्नमुत्तमं॥भक्ष्यंभोज्यंचचोष्यंचलेह्यंचविविधंबहु॥२०॥ ॥ ॥

ताश्च॥ब्रह्माणमितिपाठेवृहस्पतियाज्ञपतिष्ठंतीत्यनुकर्षइतिकनकः ताःसर्वाभामिनीराह्वयेदितिसंबंधः॥१८॥कुरुषुउत्तरकुरुषु॥यद्दिव्यंवनंचैत्ररथाख्यंदिव्यत्वोपपादकं॥वासोभूषणान्येवपत्राणियस्यतस्तानितद्दिव्यनार्यएवफलानियत्रतत्॥इहैवतुइहवनेएवागच्छतुइतिशेषः इहैतुवैइतिपाठांतरं॥नदेचता[illegible]दिरसोचवानां[illegible]॥१९॥२०॥ ॥

धौतत्वेनप्रक्षालितत्वेन निर्मलानिभाजनानियस्मिन् ॥३५॥३६ वेश्मसंविधिंवेश्मसंविधानं ३७ राजासनं सिंहासनं-राजवत्-राजयोग्यंतदभ्यवर्ततप्रदक्षिणीकृतवान् ॥३८ ननुतत्रोपविष्टइत्याह-आसनंपूजयामासेति-रामचंद्रीयमेतदितिबुध्वा-रामायप्रणाम्यआसनोपरिप्रतिष्ठितंरामंध्यात्वेति शेषः बालव्यजनमादायरामसेवाशेषतयेतिशेषः सचिवासनेसचिवार्थक्लृप्तासने-सिंहासनाधः स्तले-अत्रेदंबोध्यं-भरतेनवाचोक्तमपिराज्यानभिलाषंलोकानश्रद्दधुरतः क्रिययापिसर्वलोकप्र-

उपकल्पितसर्वान्नंधौत निर्मलभाजनं ॥ क्लृप्तसर्वासनंश्रीमत्स्वास्तीर्णशयनोत्तमं ३५ प्र विवेशमहाबाहुरनुज्ञातोमहर्षिणा ॥ वेश्मतद्रत्नसंपूर्णंभरतःकेकयीसुतः ३६ अनु जग्मुश्चतेसर्वेमंत्रिणःसपुरोहिताः बभूवुश्चमुदायुक्तास्तंदृष्ट्वावेश्मसंविधिं ॥ ३७ तत्र राजासनंदिव्यंव्यजनंछत्रमेवच ॥ भरतोमंत्रिभिःसार्धमभ्यवर्ततराजवत् ३८ आसनंपू जयामासरामायाभिप्रणम्यच ॥ बालव्यजनमादायन्यषीदत्साचिवासने ३९ ॥

त्यायनायमहर्षि णातपोबलेनापीदृशमातिथ्यकरणं-किंच ॥ युष्मादिभिःपूज्येवेयमपिक्रियाविस्मोरंशभूतभ रतनुग्रहयेइतितत्करणं ॥ किंचभरतंप्रतित्वंदुःखबुध्यागतोसिकिमितिप्रश्नेतस्यकृषीवसर्वज्ञत्वा सामर्थ्यादिशंकावारणायस्वसामर्थ्यदर्शनं-अपिच्चभगवदेकचित्तानांस्वर्गसुखमिहापिभवती तिभगवद्धामप्रीतिमाहात्म्यप्रदर्शयितुंतद्दर्शनेनचतेषांतत्राधिकांप्रीतिमुत्पादयितुंतथाक-

लयोन्नत्तगीतानुगततालप्रमाणं ॥२७॥ भरतस्येदं भरतं सैन्यं । विश्वकर्मणो विधानं ददर्श ॥२८॥ तदेव विधानं द
र्शयति बभूवेत्यादि । छन्नाबभूवेत्यनुकर्षः शाड्वलं कोमलतृणमत्र ॥२९॥ तस्मिन् पंचयोजनमिते देशे ।

सशब्दो यांच भूमिंच प्राणिनांश्रवणानिच ॥ विवेशोच्चावचः स्निग्धः समो लयगुणान्वितः ॥२७॥
तस्मिन्नेवंगते शब्दे दिव्ये श्रोत्रसुखे नृणां ॥ ददर्श भारतं सैन्यं विधानं विश्वकर्मणः ॥२८॥ बभूव हि
समा भूमिः समंतात्पंचयोजनं ॥ शाड्वलैर्बहुभिश्छन्ना नीलवैडूर्यसन्निभैः ॥२९॥ तस्मिन्बिल्वाः
कपित्थाश्च पनसा वीजपूरकाः ॥ आमलक्यो बभूवुश्च चूताश्च फलभूषिताः ॥३०॥ उत्तरेभ्यः
कुरुभ्यश्च वनं दिव्योपभोगवत् ॥ आजगाम नदी सौम्या तीरजैर्बहुभिर्वृता ॥३१॥ चतुःशालानि
शुभ्राणि शालाश्च गजवाजिनां ॥ हर्म्यप्रासादसंयुक्ततोरणानि शुभानिच ॥३२॥ सितमेघनिभं
चापि राजवेश्म सुतोरणं ॥ शुक्लमाल्यकृताकारं दिव्यगंधसमुक्षितं ॥३३॥ चतुरस्रमसंबाधं
शयनासनयानवत् ॥ दिव्यैः सर्वरसैर्युक्तं दिव्यभोजनवस्त्रवत् ॥३४॥

फलभूषणाः कपित्थाद
यो बभूवुरित्यन्वयः ॥३०॥ वनं चैत्ररथं । नदी जातावेकवचनं । तीरजैः वृक्षैः ॥३१॥ चतुःशालानि शुभ्रा
णि गृहाणि जातानीति शेषः । तथा गजादीनां शालाश्च जाताः ॥ तोरणानि पुरद्वाराणि ॥३२॥ सितमेघनि
भं सुधालेपेन शुक्लमाल्यैः कृत आकारो अलंकारो यस्य । दिव्यैर्गंधैर्गंधवज्जलैरुक्षितं सिक्तं ॥३३॥ यानं

विल्वा विल्ववृक्षाः मार्दंगिका मृदंगवादकरूपधराः एवं विभीतकाः शम्याख्यतालग्राहकाः वन्दीतालवि
शेषे च शम्येतालक्रियांतरे· शम्यायज्ञासुधेइति ॥४९॥ सरलो देववदारुविशेषः ॥५०॥ शिंशपादयो यो
स्त्रीलिंगशब्दवाच्या वृक्षाः लतामल्लिकामालत्यादयः मुनेस्तपोमाहात्म्याद्देवरत्नादीनां तत्त
द्रूपतापत्तिः पुनर्लतादिरूपप्रत्यापत्तिश्चेति मंतव्यं ॥५१॥ तत्र प्रमदारूपं धृत्वा किं कुर्युस्तदाह·

बिल्वा मार्दंगिका आसंछम्याग्राह बिभीतकाः ॥ अश्वत्था नर्तकाश्चासन्भरद्वाजस्य तेजसा
॥४९॥ ततः सरलतालाश्च तिलकाः समतालकाः ॥ प्रहृष्टास्तत्र संपेतुः कुब्जा भूत्वाथ वामनाः ॥५०॥
शिंशपामलकीजंब्वर्याश्चान्याः कानने लताः ॥ प्रमदाविग्रहं कृत्वा भरद्वाजाश्रमे वसन् ॥५१॥
सुरां सुरापाः पिबत पायसं च बुभुक्षिताः ॥ मांसानि च सुमेध्यानि भक्ष्यंतां यो यदिच्छति ॥५२॥
उच्छोद्य स्नापयंति स्म नदीतीरेषु वल्गुषु ॥ अप्येकमेकं पुरुषं प्रमदाः सप्त चाष्ट च ॥५३॥
संवाहंत्यः समापेतुर्नार्यो विपुललोचनाः ॥ परिमृज्य तदान्योन्यं पाययंति वरांगनाः ॥५४॥
हयान्गजान्खरानुष्ट्रांस्तथैव सुरभेः सुतान् ॥ अभोजयन्वाहनपास्तेषां भोज्यं यथाविधि ॥५५॥

260

२

सुरामिति· एवमूचुरिति शेषः ॥५२॥ उच्छोद्य उद्वर्त्तनं कृत्वा· एकमेकं पुरुषं· अत्रैकं बहुव्रीहिवदि
ति बहुव्रीहिवद्भावाभावश्चार्षः ॥५३॥ संवाहंत्यः पादसंवाहनादि कुर्वंत्यः परिमृज्य जलार्द्रमंगं व
स्त्रादिना परिमृज्य अलंकृत्य च पाययंति मध्वादिकमिति शेषः ॥५४॥ सुरभेः सुताः वृषभाः तेषां हय

आनुपूर्व्यान्वयथोच्चितोपवेशनप्रकारेण· प्रशास्ता शिबिररक्षकः॥४०॥४१॥उभयतः कूलंउभयोः कूलयोः
पांडुमृत्तिकालेपनाः सुधालिप्ताः ब्राह्मणस्यभरद्वाजस्य॥४२॥आगुरागतवत्यः॥४३॥सुवर्णमणिमुक्ते

आनुपूर्व्यान्निषेदुश्चसर्वेमंत्रिपुरोहिताः॥ततः सेनापतिः पश्चात्प्रशास्ताचन्यषीदत॥४०॥
ततस्तत्रमुहूर्त्तेननद्यः पायसकर्दमाः॥उपातिष्ठंतभरतंभरद्वाजस्यशासनात्॥४१॥आसामु
भयतः कूलंपांडुमृत्तिकलेपनाः॥रम्याश्चावसथादिव्याब्राह्मणस्यप्रसादजाः॥४२॥तेनैवच
मुहूर्तेनदिव्याभरणभूषिताः॥आगुर्विंशतिसाहस्राब्रह्मणाप्रहितास्त्रियः॥४३॥सुवर्णमणि
मुक्तेनप्रवालेनचशोभिताः॥आगुर्विंशतिसाहस्राःकुबेरप्रहितास्त्रियः॥४४॥याभिर्गृहीतपुरु
षः सोन्मादइवलक्ष्यते॥आगुर्विंशतिसाहस्रंनंदनादप्सरसोगणाः॥४५॥नारदस्तुंबुरुर्गोपः
प्रभयासूर्यवर्चसः॥एतेगंधर्वराजानोभरतस्याग्रतोजगुः॥४६॥अलंबुसामिश्रकेशीपुंडरी
काथवामना॥उपानृत्यंतभरतंभरद्वाजस्यशासनात्॥४७॥यानिमाल्यानिदेवेषुयानिचै
त्ररथेवने॥प्रयागेतान्यदृश्यंतभरद्वाजस्यतेजसा॥४८॥

नेतिसमाहारद्वंद्वः॥४४॥गृहीतो
दर्शनादिनात्मवशीकृतः सोन्मादः उद्भूतसंतोषसहितइत्यर्थः नंदनमिंद्रवनं॥४५॥नारदाद
योगंधर्वराजाः कांत्यासूर्यसमाययुः॥४६॥४७॥प्रयागेप्रयागदेशे॥४८॥ ॥

रामा-अ-
२६१

अभवज्जनो मतिः तत्नानामपि भद्वसौख्यवात्पुनराकांक्षाभृदित्यर्थः ॥ ६३ ॥ प्रेष्याः सेवकाः चेट्योदास्यः बल्ल
स्थाः सेनास्थाः अहतवाससः नूतनवस्त्रपरिधानाः ॥ ६४ ॥ अनेमुनिरदत्तादन्यंपदार्थंनाकल्पयन्नन्ना
भुंजन्नुत्पर्थः नान्योत्यन्नमकल्पयदितिपाठेहरिप्यर्थे । अन्योपिसेनानंतर्गतोपिमार्गस्थःप्रसंगा
त्तद्देशमागतः अन्यंऋषिकल्पितादन्यंपदार्थंनाकल्पयन्ननभुक्तवान्नित्यर्थः अनेनात्माधिक्यंसा

ततोभुक्तवतांतेषांतदन्नममृतोपमं ॥ दिव्यानुद्वीक्ष्यभक्ष्यांस्तानभवज्जनो मतिः ॥ ६३ ॥ प्रे
ष्याश्चेट्यश्चवध्वश्चबलस्थाश्चापिसर्वशः बभूवुस्तेभृशंप्रीताः सर्वेचाहतवाससः ॥ ६४
कुंजराश्चखरोष्ट्राश्चगोश्वाश्चमृगपक्षिणः ॥ बभूवुः सुभृतास्तत्रनान्योत्यन्नमकल्पयत् ॥ ६५ ॥
नाशुक्लवासास्तत्रासीत्क्षुधितोमलिनोपिवा रजसाध्वस्तकेशोवानरः कश्चिददृश्यत ॥ ६६ ॥ आ
जैश्चापिचवाराहैर्निष्ठानवरसंचयैः ॥ फलनिर्यूहसंसिद्धैः सूपैर्गंधरसान्वितैः ॥ ६७ ॥ पु
ष्पध्वजवतीः पूर्णाः शुक्लस्यान्नस्यचाभितः ॥ ददृशुर्विस्मितास्तत्रनरालोहीः सहस्रशः ॥ ६८

मग्नाःस्यश्चितं ॥ ६५ ॥ ६६ ॥ निष्ठानंव्यंजनंज्ञेयमितिहलायुधः आम्रादिफलसंबंधिकथितरस
सिद्धैरितिआजादिविशेषणं । गंधरसान्वितैरितिचवार्यापीडेक्काथरथेसेनिर्यूहोनागदंत
केद्रुतिवैजयंती एतैराजादिभिः पूर्णालोहीः स्वर्णरजतादिपात्रीर्ददृशुरित्यन्वयः लोहशब्दः
पंचलोहसाधारणः पात्राणांविशेषणंशोभार्थंकल्पितपुष्पध्वजयुक्ताः अभितः शुक्लस्यान्नस्यो

रा.अ.स.६८ - ६९।।रा.स.-६३ (margin, vertical)

261

राम
२६१

इक्ष्वाकुवरयोधानां वाहनानि चोदयंतः भक्षणाय प्रेरयंतः तानिक्ष्वादीन् भोजयंति स्म ॥ ५६ ॥ मत्ता मदकरद्रव्यसेवया प्रमत्ता मधुपानेन कार्याकार्यविवेकशून्याः मुदिताः स्रक्चंदनस्त्र्यादिभोगेन ॥ ५७ ॥ सैन्याः सेनासमवेताः उदीरयन् उदैरयन् ॥ ५८ ॥ तां वाचमाह नैवेति नगमिष्यामेत्यार्षः सल्लोपः भरतस्य कुश

इक्षूंश्च मधुलाजांश्च भोजयंति स्म वाहनान् ॥ इक्ष्वाकुवरयोधानां चोदयंतो महाबलाः ॥ ५६ ॥
नाश्वबंधोश्वमाजानन्नगजं कुंजरग्रहः ॥ मत्तप्रमत्तमुदिता सा चमूस्तत्र संबभौ ॥ ५७ ॥ तर्पिताः
सर्वकामैस्ते रक्तचंदनरूषिताः ॥ अप्सरोगणसंयुक्ताः सैन्या वाचमुदीरयन् ॥ ५८ ॥ नैवायो
ध्यां गमिष्यामो न गमिष्याम दंडकान् ॥ कुशलं भरतस्यास्तु रामस्यास्तु तथा सुखं ॥ ५९ ॥ इति
पादातयोधाश्च हस्त्यश्वारोहबंधकाः ॥ अनाथास्तं विधिं लब्ध्वा वाचमेतामुदीरयन् ॥ ६० ॥ सं
प्रहृष्टा विनेदुस्ते नरास्तत्र सहस्रशः ॥ भरतस्यानुयातारः स्वर्गोयमिति चाब्रुवन् ॥ ६१ ॥ नृत्यं
तश्च हसंतश्च गायंतश्चैव सैनिकाः ॥ समंतात्परिधावंते माल्योपेताः सहस्रशः ॥ ६३ ॥

लमस्तु यत्संगत्या भूमौ स्वर्गसुखलाभः ॥ ५९ ॥ हस्त्यश्वारोहास्तद्बंधकाश्च पादातरूपयोधाः चेन रथि
कसंग्रहः तं विधिं तादृशसत्कारं अनाथाः अपरतंत्रा इवेत्यर्थ इति कतकः ॥ अयाचका इत्यर्थ इत्यन्ये
वक्रणा मतिहर्षयुक्ततया कवेरपि वर्णनीयमयीभावात्पुनरुक्तिर्न दोषाय ॥ ६० ॥ विनादः प्रहृष्टाः

कल्कान् आमलकादीनां चूर्णकषायान्॰ सुरभिचूर्णानि कषायो थ सुरभौ लोध्र इति तेपि च चूर्णकषा॰ यानलदादि चूर्णकथितकषाया इति कतकः स्नानानि स्नानार्थानि उष्णोदकानि नदर्थान्यन्य द्रव्याणि च॰ सरितां तीर्थेषु स्नानघट्टेषु ७४ शुक्लान् निर्मलान्॰ अंशुमतः अग्रे कूर्चवतः दंतधावनानां अपामार्गादिकाष्ठानां संचयान्॰ चंदनकल्कान् घृष्टचंदनान्॰ समुद्गेषु संपुटेषु ददृशुरिति संबं

कल्कांश्चूर्णकषायांश्च स्नानानि विविधानि च। ददृशुर्भाजनस्थानि तीर्थेषु सरितां नराः
७४ शुक्लानंशुमतश्चापि दंतधावनसंचयान्। शुक्लांश्चंदनकल्कांश्च समुद्गेष्ववतिष्ठतः
७५ दर्पणान्परिमृष्टांश्च वाससां चापि संचयान्। पादुकोपानहं चैव युग्मान्यत्र सहस्रशः।
७६ आंजनीः कंकतान्कूर्चान्छत्राणि च धनूंषि च। मर्मत्राणानि चित्राणि शयनान्यासनानि
च ७७ प्रतिपानह्रदान्पूर्णान्खरोष्ट्रगजवाजिनां। अवगाह्यसुतीर्थांश्च ह्रदान्सोत्पल
पुष्करान् ७८

ध॰ ७५ पादुकोपानहं॰ पादुका दार्वादि निर्मिताः उपानह चर्मादिकृताः समाहारे टच् समासांतः
७६ आंजनीः अंजनयुक्तकरंडिकाः कंकतान् केशमार्जनानि॰ कूर्चान् श्मश्रुप्रसाधकान्॰ मर्मत्राणानि कवचानि ७७ भुक्तजरणार्थं यत्पीयते तत्प्रतिपानं॰ खरादीनामवगाहनयोग्यसुखावतारान्॰ पद्मोत्पलसहितान् ह्रदान्ददृशुरिति संबंधः ७८

वनपार्श्वेषु चैत्ररथवनवत्प्रतिभासमानवनप्रदेशेषु पंचयोजनमितेषु तत्रत्याः कूपाः पायसकर्दमा बभूवुः तत्रत्या गावश्च कामदुघा बभूवुः ॥६९॥ निषादादिबलतत्पर्यंतपमात्रेणैव संस्कार्याः प्रतप्ता स्तथा पिठरः कपालं तेषु संस्कृताः पक्वाः पैठरास्तैः मृगादिसंबंधिमांसचयैर्वृताः ॥७०॥ पात्रीणां अन्नाधाराणां स्थालीनां व्यंजनस्थालीनां पात्राणि भोजनपात्राणीति कतकः पात्राणां हस्तप्रक्षालनार्थं प्रयुक्तानां स्थालीनां क्वाइजलपानपात्राणामिति तीर्थः ॥७१॥ कुंभ्यः स्थाल्यः जलपानपात्रविशेषः करंभो मंथनपात्राणि यौवन

बभूवुर्वनपार्श्वेषु कूपाः पायसकर्दमाः ॥ ताश्च कामदुघा गावो द्रुमाश्चासन्मधुश्च्युतः ॥६९॥ वाप्यो मैरेयपूर्णाश्च मृष्टमांसचयैर्वृताः ॥ प्रतप्तपैठरैश्चापि मार्गमायूरकौक्कुटैः ॥७०॥ पात्रीणां च सहस्राणि स्थालीनां नियुतानि च ॥ न्यर्बुदानि च पात्राणि शातकुंभमयानि च ॥७१॥ स्थाल्यः कुंभ्यः करंभश्च दधिपूर्णाः सुसंस्कृताः यौवनस्थस्य गौरस्य कपित्थस्य सुगंधिनः ॥७२॥ ह्रदाः पूर्णा रसालस्य दध्नः श्वेतस्य चापरे ॥ बभूवुः पयसश्चान्ये शर्कराणां च संचयाः ॥७३॥

स्थस्य मथनोत्तरं यामा नरितस्य सुपक्वस्य च केशरादिसंबंधात् गौरस्य पीतवर्णस्य पीतो गौरो हरिद्राभः ॥ कपित्थस्य तक्रस्य सुगंधिनः नादृशाइव्य संयुक्तस्य ॥७२॥ ह्रदाः पूर्णा इति पूर्वान्वयि तथा रसालस्य तक्रविशेषस्य अपक्वतक्रं सव्योषं चतुर्जातगुडाईकं संजीरकं रसालं स्यान्मंजिका शिखरिण्यपीति वैजयंती तत्र मत्र निर्जलं व्योषं शुंठीमरिचपिप्पल्यः चतुर्जातं लवंगेलातजपत्रजं गुडः खंडशर्करा आर्द्रकं प्रसिद्धं तस्य च पूर्णा ह्रदाः श्वे

तस्य दध्नश्चापरे पयसोऽन्ये पूर्णा ह्रदाः इत्यनुषंगः शर्कराणां च संचयाः राशयः ॥७३॥

अस्मद्विषयेऽस्मदाश्रमे॥ सुखासुखा रूपा॰ आतिथ्यतेजनः समग्रः सम्यकृतातिकः अभ्यदितिशेष॰
अनेन हितपणावमहत्सर्वेऽसाधनंननुराज्यादीति॥ ऋषिणा बोधितो भरतः॥३॥ जनसम्मूढस्य बहु
त्वात्सर्वेषां स्वदर्शनेनकृतकृत्यत्वायान्निष्क्रांतमृषिमुवाच॥४॥ बलवदल्पंतं बलवात्सेनासहितः

कच्चिदत्रसुखारात्रिस्तवास्मद्विषयोगता॥ समग्रस्तेजनः कच्चिदातिथ्येशंसमेनघ॥३॥ त
मुवाचांजलिंकृत्वा भरतोभिप्रणम्यच॥ आश्रमादुपनिष्क्रांतमृषिमुत्तमतेजसं॥४॥ सुखोषि
तोस्मिभगवन्समग्रबलवाहनः॥ बलवत्तर्पितश्चाहंबलवान्भगवंस्त्वया॥५॥ अपेतक्लमसंतापाः
सुभिक्षाः सुप्रतिश्रयाः॥ अपिप्रेष्यानुपादायसर्वेस्मसुसुखोषिताः॥६॥ आमंत्रयेहंभगवन्का
मंत्वामृषिसत्तम॥ समीपंप्रस्थितंभ्रातुर्मैत्रेणेक्षस्वचक्षुषा॥७॥ आश्रमंतस्यधर्मज्ञधार्मिक
स्यमहात्मनः॥ आचक्ष्वकतमोमार्गः कियानितिचशंसमे॥८॥ इतिपृष्टस्तुभरतंभ्रातृदर्
र्शनलालसं॥ प्रत्युवाचमहातेजा भरद्वाजोमहातपाः॥९॥ भरतार्धतृतीयेषुयोजनेष्वजनेव
ने॥ चित्रकूटगिरिस्तत्ररम्यनिर्दरकाननः॥१०॥

॥५॥ क्लमोग्लानिः संतापोदेहोष्मा॰ अपिप्रेष्या
नुपादायप्रेष्यानप्यादायतैरपिसहेत्यर्थः सुभिक्षाः सुसमृद्धान्नपानाः सुप्रतिश्रयाः शोभनवासाः॥६॥
आमंत्रयेपृच्छामि॰ कामंअधिकंमैत्रेणास्निग्धेन॥७॥ तस्यरामस्यकियान्कियद्दूरदेशःकतमस्त
स्यमार्गइतिशंस॥८॥९॥ अर्धतृतीययोजनेषु॰ सार्धयोजनद्वयेतीतेइत्यर्थः निर्दराः विदीर्णाःप

आकाशेत्याद्यर्धपूर्वान्वयि। उपाधिविशेषान्नीलवर्णान्नित्यर्थः। सुखेनाप्लवः स्नानं येषु तान्। यवसंतरणां ७९

निर्वापार्थं भक्षणार्थं। स्वप्नकल्पं मर्त्यदुर्लभं। इगुत्पन्नविचित्रपदार्थत्वात्। ८०। ८१। ताः सर्वाश्चाप्सर

सः। ८२। अनुज्ञाप्य दत्तानुमतिकं कृत्वा। ८२। स्वप्नादिवदेतद्दृष्टिकृतमानित्यं मिथ्या नेति दर्शयति।

आकाशवर्णप्रतिमान्स्वच्छतोयान्सुखाप्लवान्। नीलवैडूर्यवर्णांश्च मृदून्यवससंचयान्। ७९।

निर्वापार्थं पशूनां ते ददृशुस्तत्र सर्वशः। विस्मयं तं मनुष्यास्ते स्वप्नकल्पं तदद्भुतं। ८०। दृष्ट्वा

तिथ्यं कृतं तावद्भरद्वाजमहर्षिणा। इत्येवं रममाणानां देवानामिव नंदने। ८१। भरद्वाजाश्र

मे रम्ये सा रात्रिर्व्यत्यवर्तत। प्रतिजग्मुश्च ताः सर्वाः गंधर्वाश्च यथागतं। ८२। भरद्वाजमनुज्ञाप्य

ताश्च सर्वा वरांगनाः। ८२। तथैव मत्ता मदिरोत्कटा नरास्तथैव दिव्यागरुचंदनोक्षिताः। तथै

व दिव्या विविधाः स्रगुत्तमाः पृथग्विकीर्णा मनुजैः प्रमर्दिताः। ८३। इत्यार्षे श्रीरामायणे अयो॰

एकनवतितमः सर्गः। ९१। ततस्तां रजनीमुष्य भरतः सपरिच्छदः। कृत्वातिथ्यो भरद्वाजं

कामादभिजगाम ह। १। तमृषिः पुरुषव्याघ्रं प्रेक्ष्य प्रांजलिमागतं। हुताग्निहोत्रो भरतं भरद्वा

जोऽभ्यभाषत। २।

तथैवेति। मत्ताः हृष्टाः मदिरया उत्कटाः मत्ताः मत्तेशौंडोत्कटत्त्वीवाः तथैव अनु

भवकालइव वर्त्तत इति शेषः। स्रगुत्तमाः उपभोगवशात्प्रकीर्णाः प्रमर्दिताश्च। ८३। इति श्री अयो॰

एकनवतितमः सर्गः। ९१। उष्य उषित्वा। सपरिच्छदः सपरिवारः कामान् रामप्राप्तिकामात्। १। २।

दीनमनाः अप्राप्तमनोरथत्वात् कैकेयीति विशेष्यं ॥१८॥ विशेषं तन्नामरूपं ॥१९॥ शोकानशनकर्षि
तां शोकवशप्राप्तानशनेन कृशीकृतां ॥२०॥ यां पश्यसि तां ब्रूहि इत्यन्वयः सिंहवद्विक्रांतगमनशीलं २१ धा

अदूराद्भरतस्यैव तस्थौ दीनमनास्तदा ॥ तत्र पप्रच्छ भरतं भरद्वाजो महामुनिः ॥१८॥ विशेषं
ज्ञातुमिच्छामि मातॄणां तव राघव ॥ एवमुक्तस्तु भरतो भरद्वाजेन धार्मिकः ॥१९॥ उवाच
प्रांजलिर्भूत्वा वाक्यं वचनकोविदः ॥ यामिमां भगवन्दीनां शोकानशनकर्शितां ॥२०॥ पि
तुर्हि महिषीं देवीं देवतामिव पश्यसि ॥ एषा तं पुरुषव्याघ्रं सिंहविक्रांतगामिनं ॥२१॥ कौ
सल्या सुषुवे रामं धातारमदितिर्यथा ॥ अस्या वामभुजं श्लिष्टा यासौ तिष्ठति दुर्मनाः ॥
॥२२॥ इयं सुमित्रा दुःखार्ता देवी राज्ञश्च मध्यमा ॥ कर्णिकारस्य शाखेव शीर्णपुष्पा वनां
तरे ॥२३॥ एतस्यास्तौ सुतौ देव्याः कुमारौ देववर्णिनौ ॥ उभौ लक्ष्मणशत्रुघ्नौ वीरौ सत्यपराक्र
मौ ॥२४॥ यस्याः कृते नरव्याघ्रौ जीवनाशमितो गतौ ॥ राजा पुत्रविहीनश्च स्वर्गं दशरथो
गतः ॥२५॥ क्रोधनामकृतप्रज्ञां दृप्तां सुभगमानिनीं ॥ ऐश्वर्यकामां कैकेयीमनार्यामार्यरूपि
णीं ॥२६॥ ममैतां मातरं विद्धि नृशंसां पापनिश्चयां ॥ यतो मूलं हि पश्यामि व्यसनं महदात्मनः ॥२७॥

तारं उपेंद्रं ॥२२॥ कर्णिकारो वृक्षविशेषः ॥२३॥ देववर्णिनौ देवतुल्यरूपौ ॥२४॥ यस्याः कैकेय्याः जीव
नाशं गतौ तादृशापदं प्राप्तौ ॥२५॥ दृप्तां गर्वितां अकृतप्रज्ञां अशिक्षितबुद्धिं आर्यरूपिणीं सती

वाल्मीकिरामायणे अयोध्याकांडे

मंदाकिनीनदाख्या काचिन्नदी चित्रकूटोत्तरपार्श्वं प्राप्य तिष्ठतीति शेषः ॥११॥ तस्याश्चानंतरं तत्परपारे चित्रकूटं पर्वतं तयोः रामलक्ष्मणयोः पर्णकुटी च इत्यपि। तत्र पर्वते तौ वसतः ध्रुवं निश्चयेन ॥१२॥ दक्षिणेनैव मार्गेण यमुनाया दक्षिणतीरमार्गेणैव गत्वा किंचिद्दूरं ततः पश्चात्सव्यं दक्षिणं तस्य मार्गस्य शा

उत्तरं पार्श्वमासाद्य तस्य मंदाकिनी नदी ॥ पुष्पितद्रुमसंछन्ना रम्यपुष्पितकानना ॥११॥ अनंतरं तत्सरितश्चित्रकूटं च पर्वतं ॥ तयोः पर्णकुटी तात तत्र तौ वसतो ध्रुवं ॥१२॥ दक्षिणेन च मार्गेण सव्यदक्षिणमेव च ॥ गजवाजिसमाकीर्णां वाहिनीं वाहिनीपते ॥१३॥ वाहयस्व महाभाग ततो द्रक्ष्यसि राघवं ॥ प्रयाणमिति च श्रुत्वा राजराजस्य योषितः ॥१४॥ हित्वा यानानि यानार्हा ब्राह्मणं पर्यवारयन् ॥ वेपमाना कृशा दीना सह देव्या सुमित्रया ॥१५॥ कौसल्या तत्र जग्राह कराभ्यां चरणौ मुनेः ॥ असमृद्धेन कामेन सर्वलोकस्य गर्हिता ॥१६॥ कैकेयी तत्र जग्राह चरणौ सव्यपत्रपा ॥ तं प्रदक्षिणमागम्य भगवंतं महामुनिं ॥१७॥

खामार्गयोः सव्यभागवर्तीयो दक्षिणदिगामी मार्गोऽस्ति तं मार्गं वाहिनीं वाहयस्व ॥ न त्वन्यं शाखामार्गं तस्याल्पत्वात्वनमार्गत्वाच्च ॥१३॥ राजराजस्य दशरथस्य ॥१४॥ ब्राह्मणं भरद्वाजं पर्यवारयन् नमस्कारार्थं स्त्रिय इति शेषः वेपमानत्वादिगुणविशिष्टा कौसल्या ॥१५॥ असमृद्धेन फलसमृद्धिरहितेन कामेन मनोरथेनोपलक्षिता इत्याभादि कैकेयी विशेषणं ॥१६॥ सव्यपत्रपा अत्र [illegible] लज्जा ॥१७॥ ॥

चंद्रार्कतरुणाभासांतरुणचंद्रार्कसदृशीं॰ क्वचिद्रागेस्फटिकादिनिर्मितां क्वचिद्रागेपद्मरागादिनिर्मितामितियावत्॰ नियुक्तांवाहकैरितिशेषः ३७ ३८ गंगायाः परवेलायांपश्चीमतीरेस्थितासेना

चंद्रार्कतरुणाभासांनियुक्तांशिबिकांशुभां। आस्थायप्रययौश्रीमान्भरतःसपरिच्छदः ३७

साप्रयातामहासेनागजवाजिसमाकुला। दक्षिणांदिशमावृत्यमहामेघइवोत्थितः ३८

वनानिचव्यतिक्रम्यजुष्टानिमृगपक्षिभिः गंगायाःपरवेलायांगिरिष्वथनदीष्वपि ३९

सासंप्रहृष्टद्विपवाजियूथावित्रासयंतीमृगपक्षिसंघान्। महद्वनंतत्प्रविगाहमाना रराजसेनाभरतस्यतत्र ४० इत्यार्षेश्रीरामायणेअयोध्याकांडेद्विनवतितमःसर्गः ९२

ततोमहत्यायायिन्याध्वजिन्यावनवासिनः। अर्दितायूथपामत्ताःसयूथाःसंप्रदुद्रुवुः १

ऋक्षाःपृषतमुख्याश्चरुरवश्चसमंततः। दृश्यंतेवनवाटेषुगिरिष्वपिनदीषुच २ ससंप्रतस्थेधर्मात्माप्रीतोदशरथात्मजः। वृतोमहत्यानादिन्यासेनयाचतुरंगया ३ सागरौघनिभासेनाभरतस्यमहात्मनः। महींसंछादयामासप्रावृषिद्यामिवांबुदः ४

गिरिषुनदीषुचवर्तमानवनान्यतिक्रम्यप्रयाताबभूवेतिशेषः ३९ सेति ४० इतिश्रीरामाभिरामेश्रीरामीयेरामायणतिलके अयोध्याकांडेद्विनवतितमःसर्गः ९२ यायिन्यागच्छंत्याःयूथपाःयूथनाथाः १ पृषताःसबिंदवोरुरवोऽबिंदवःअर्दितादृश्यंतइत्यर्थः २ नादिन्याघोषवत्या ३ ४

२८॥२९॥ दोषेण दुष्कृत्यकर्तृत्वेन॥ सुखोदर्कं देवानामृषीणां च सुखफलं॥३०॥ तदेवाह॥ देवानामित्यादि॥ भविष्यदिति शत्रंतं जानीहीति शेषः एवं देवादिकृतोयं मंथरा द्वारा कैकेय्या बुद्धिमोह इति भावः॥ स्रत

इत्युक्त्वा नरशार्दूलो बाष्पगद्गदया गिरा॥ विनिश्वस्य सतामात्तः क्रुद्धो नाग इव श्वसन्॥२८॥ भरद्वाजो महर्षिस्तं ब्रुवंतं भरतं तदा॥ प्रत्युवाच महाबुद्धिरिदं वचनमर्थवित्॥२९॥ न दोषेणाव गंतव्या कैकेयी भरत त्वया॥ रामप्रव्राजनं ते तत्सुखोदर्कं भविष्यति॥३०॥ देवानां दानवानां च ऋषीणां भावितात्मनां॥ हितमेव भविष्यद्धि रामप्रव्राजनादिह॥३१॥ अभिवाद्य तु संसिद्धः कृत्वा चैव प्रदक्षिणं॥ आमंत्र्य भरतः सैन्यं युज्यतामिति चाब्रवीत्॥३२॥ ततो वाजिरथान्युक्त्वा दिव्यान्हेमविभूषितान्॥ अध्यारोहत्प्रयाणार्थं बहून्बहुविधो जनः॥३३॥ गजकन्यागजाश्चैव हेमकक्ष्याः पताकिनः॥ जीमूता इव घर्मांते सघोषाः संप्रतस्थिरे॥३४॥ विविधान्यपि यानानि महांति च लघूनि च॥ प्रययुः सुमहार्हाणि पादैरपि पदातयः॥३५॥ अथ यान प्रवेकैस्तु कौसल्याप्रमुखाः स्त्रियः॥ रामदर्शनकांक्षिण्यः प्रययुर्मुदितास्तदा॥३६॥

एवं नैषा दोषभागिति बोध्यं देवादीनां सुखवदत्वात्॥३१॥ संसिद्धः प्राप्ताशीर्वादरूपानुग्रहः स्वमातृकृत्यस्य ज्ञानहितावहत्वं श्रुत्वा युज्यतां गमनाय संनह्यतां॥३२॥३३॥ गजकन्याः करेणवः सघोषाः घंटाघोषसहिताः॥३४॥ सुमहार्हाणि यानान्यारुह्य तद्योग्याः प्रययुः पदातयस्तु पादैरेव प्रययुः

अमीभटाः॥ मेघप्रकाशैः फलकैः॥ शस्त्रनिवारणचर्मभिरुपलक्षिताः॥ दाक्षिणात्यानराइव शिरः सुकुसु
मापीडान् कुसुमनिर्मितभूषणविशेषान् कुर्वंतिधारयंतीतितीर्थः॥ अमीवृक्षाः निबिडपत्रपत्रगुच्छ
त्वाशाभूयिष्ठतयामेघवदवभासमानैः॥ फलकैर्महास्कंधशाखाभिरुपलक्षिताः दाक्षिणात्याः
दक्षिणदिक्भवाः शशिप्रभान् सुरभीन् कुसुमापीडान् स्तबकशेखरान् कुर्वंतिदाक्षिणात्याः

कुर्वंतिकुसुमापीडान् शिरःसु सुरभीनमी॥ मेघप्रकाशैः फलकैः दाक्षिणात्यानरायथा
॥१३॥ निष्कूजमिवभूत्वेदंवनंघोरप्रदर्शनं॥ अयोध्येवजनाकीर्णा संप्रतिप्रतिभातिमे॥१४॥
खुरैरुदीरितोरेणुर्दिवंप्रच्छाद्यतिष्ठति॥ तंबहत्यनिलःशीघ्रंकुर्वन्निवममप्रियं॥१५॥
स्यंदनांस्तुरगोपेतान् सूतमुख्यैरधिष्ठितान्॥ एतान्संपततःशीघ्रंपश्यपश्यशत्रुघ्नकानने।
॥१६॥ एतान्वित्रासितान् पश्यबर्हिणःप्रियदर्शनान्॥ एतमापततःशैलमधिवासंपतत्रिणः
॥१७॥ अतिमात्रमयंदेशोमनोज्ञःप्रतिभातिमे॥ तापसानांनिवासोयंव्यक्तंस्वर्गपथोनघ॥१८॥

शशिप्रभानितिपाठइतिकतकः॥१३॥ इदंवनंपूर्वंनिष्कूजंजनशब्दरहितंअतएवघोरद
र्शनं॥ भूत्वासांप्रतंअस्मदागमनेजनाकीर्णायोध्येवभाति· पागतरेजनाकीर्णमिदंवनंअयो
ध्येवभाति॥१४॥ वहतिअपनयतिममप्रियंकुर्वन्निवचित्रकूटदर्शननिरोधनिवर्तकत्वात्
इतिभावः॥१५॥ संपततःगच्छतः॥१६॥ ॥१७॥ व्यक्तंस्पष्टं· स्वर्गपथः स्वर्गप्रदेशः॥१८॥

266

तस्मिन्कालेमार्गेगगमनकालेसामहो॥५॥मंत्रिणांमंत्रविदांवरंश्रेष्ठं॥६॥भरद्वाजोयंदेशंचित्रकूटंय
दृशमब्रवीत्यथाचास्माभिःश्रुतंतथैवास्यदेशस्यरूपंलक्ष्यते॥तस्माद्भ्रांतंदेशंप्राप्ताःस्म॥ खं

तुरंगैश्चैरवततावारणैश्चमहाबलैः॥अनालक्ष्याचिरंकालंतस्मिन्कालेबभूवसा॥५॥सगत्वा
दूरमध्वानंसंपरिश्रांतवाहनः॥उवाचवचनंश्रीमान्वसिष्ठंमंत्रिणांवरं॥६॥यादृशंलक्ष्य
तेरूपंयथाचैवमयाश्रुतं॥व्यक्तंप्राप्ताःस्मतंदेशंभरद्वाजोयमब्रवीत्॥७॥अयंगिरिश्चि
त्रकूटस्तथामंदाकिनीनदी॥एतत्प्रकाशतेदूरान्नीलमेघनिभंवनं॥८॥गिरेःसानूनि
रम्याणिचित्रकूटस्यसंप्रति॥वारणैरवमृद्यंतेमामकैःपर्वतोपमैः॥९॥मुंचंतिकुसुमान्ये
तेनगाःपर्वतसानुषु॥नीलाइवातपापायेतोयंनोयधराघनाः॥१०॥किन्नराचरितंदेशंप
श्यशत्रुघ्नपर्वते॥हयैःसमंतादाकीर्णंमकरैरिवसागरं॥११॥एतेमृगगणाभांतिशीघ्र
वेगाःप्रचोदिताः॥वायुप्रविद्धाःशरदिमेघजालाइवांवरे॥१२॥ ॥ ॥

दृसोविसर्गलोपः॥७॥प्राप्तिमेवविवृणोति॥अयमिति॥८॥अवमृद्यंतेपीड्यंते॥९॥अतएवैतेनगा
वृत्ताः॥गजानामाघातेनचलितशाखाः पर्वतसानुषुकुसुमानिमुंचंति॥१०॥११॥प्रचोदिताःसैनिकैः
वायुप्रविद्धाः वायुप्रेरिताःमेघजालाःमेघसमूहाःमेघराज्यइतिपाठांतरं॥१२॥ ॥

२६॥ अपिचयाचमृः भरतेनव्यवस्थिता· भरतेनव्यवस्थापितासावासायअग्रतोभूमिंनिरीक्षमाणा·॥ न
चिरेणाशीघ्रं॥ २७॥ इतिश्रीरामाभिरामेश्रीरामीयेरामायणतिलकेअयोध्याकांडेत्रिनवतितमःसर्गः
९३॥ अथकविस्तत्रस्थितरामवृत्तांतवर्णयति·॥ दीर्घेत्यादि· प्रियंसंतोषंआकांक्षन् इच्छन्·।

एवमुक्त्वाःततःसैन्यास्तत्रतस्थुःसमंततः॥ भरतोयत्रधूमाग्रंतत्रदृष्टिंसमादधत्॥ २६॥
व्यवस्थितायाभरतेनसाचमूर्निरीक्षमाणापिचभूमिमग्रतः॥ बभूवहृष्टानचिरेणजा
नकीप्रियस्परामस्पसमागमंतदा॥ २७॥ इत्यार्षेश्रीरामायणेअयो· त्रिनवतितमःसर्गः
॥ ९३॥ दीर्घकालोषितस्तस्मिन्गिरौगिरिवरप्रियः॥ वैदेह्याःप्रियमाकांक्षन्स्वंचचित्तंवि·
लोभयन्॥ १॥ अथदाशरथिश्चित्रंचित्रकूटमदर्शयत्॥ भार्याममरसंकाशःशचीमि
वपुरंदरः॥ २॥ नराज्यभ्रंशनंभद्रेनसुहृद्भिर्विनाभवः॥ मनोमेबाधतेदृष्ट्वारमणीयमि
मंगिरिं॥ ३॥ पश्येममचलंभद्रेनानाद्विजगणायुतं॥ शिखरैःखमिवोद्विद्धैर्धातुमद्भिर्विभू·
षितं॥ ४॥

स्वाग्रोधेनघोरंवनमागतायाश्चित्तखेदस्योपशमनीयतयाचित्रकुटरामणीयकदर्शनेन
तच्चित्तमुपलालयत· स्वंचचित्तंवनवासादिखिन्नं· तथाकुर्वन् चित्रकूटमदर्शीदित्यन्वयः
१॥ २॥ विनाभवःविनावस्थानंमेमनोनबाधतइत्यन्वयः· दृष्ट्वास्थितस्येतिशेषः॥ ३॥ खमिवो·
द्विद्धैः शीलितादिवत्कर्तरिनिष्ठा· खस्यवेधकैरित्यर्थः· अभ्रंलिहैरितियावत्॥ ४॥

पृषतानां स बिंदुत्वात्कुसुमैश्चित्रिता इवेत्यर्क्तिः॥१९॥साधु यथोचितं प्रतिष्ठंतां गच्छंतु॥गमनफलं विचिन्वंत्वित्यादिः॥२०॥धूमाग्रे धूमशिखा तेन वह्निमनुमातत्संपादकत्वेन राघवावनुमाय भरतमूचुः॥२१॥नामनुष्येवनदाहाद्यभावशिष्टतयाप्रत्यक्षं दृश्यमाने इति शेषः तस्मान्मनुष्यका

मृगा मृगीभिः सहिता बहवः पृषता वने॥मनोज्ञरूपा लक्ष्यंते कुसुमैरिव चित्रिताः॥१९॥साधु सैन्याः प्रतिष्ठंतां विचिन्वंतु च काननं॥यथा तौ पुरुषव्याघ्रौ दृश्येते रामलक्ष्मणौ॥२०॥भरतस्य वचः श्रुत्वा पुरुषाः शस्त्रपाणयः॥विविशुस्तद्वनं शूरा धूमाग्रं ददृशुस्ततः॥२१॥ते समालोक्य धूमाग्रमूचुर्भरतमागताः॥नामनुष्ये भवत्यग्निर्व्यक्तमत्रैव राघवौ॥२२॥अथ नात्र नरव्याघ्रौ राजपुत्रौ परंतपौ॥अन्ये रामोपमाः संति व्यक्तमत्र तपस्विनः॥२३॥तच्छ्रुत्वा भरतस्तेषां वचनं साधु संमतं॥सैन्यानुवाच सर्वांस्तानमित्रबलमर्दनः॥२४॥यत्ता भवंत स्तिष्ठंतु नेतो गंतव्यमग्रतः॥अहमेव गमिष्यामि सुमंत्रो धृतिरेव च॥२५॥

रणाकन्यनुपपत्त्या अत्रैव राघवाविति जानीमः॥२२॥राजभीत्या निश्चयेन तथा वक्तुमशक्नुवंतः पक्षांतरमाहुः अथेति॥यद्यत्र न तौ तदाप्यन्ये तपस्विनोऽत्र भविष्यंति तन्मुखात्तद्वासस्थानलाभो भविष्यतीति भावः॥२३॥साधु संमतं न्याय्यत्वात्संमतं॥तेषां वचनं श्रुत्वा तत्र प्रदेशे रामावस्थितिं निश्चित्य स सर्वान्सैन्यानुवाच॥२४॥वचनमाह॥यत्ता इति॥यत्ताः सावधानाः कोलाहलमकुर्वंतः धृतिरित्यशोकसंत्रिणो नामांतरं॥२५॥

जलप्रपातैः उच्चप्रदेशात्पतद्भिर्जलप्रवाहैः ॥ उद्भेदैः भुवमुद्भिद्य निर्गतैर्निर्घ्यंदैरल्पनिर्झरैः स्त्रवद्भिरित्यभयविशेषणंप्रवहद्भिरित्यर्थकं ॥ १३ ॥ गुहासमीरणः गुहाद्वारप्रवृत्तः समीरणः घ्राणतर्पणं कुर्वाण इति शेषः अभेत्यप्राप्य ॥ १४ ॥ शरदः संवत्सरान् ॥ १५ ॥ रतवान् रतिमान् रतिः

जलप्रपातैरुद्भेदैर्निष्यंदैश्च क्वचित्क्वचित् स्त्रवद्भिर्भात्ययं शैलः स्त्रवन्मद इव द्विपः ॥ १३ ॥
गुहासमीरणो गंधान्नानापुष्पभवान्वहन् ॥ घ्राणतर्पणमभ्येत कं नरं न प्रहर्षयेत् ॥ १४ ॥
यदीह शरदोनेकास्त्वया सार्धमनिंदिते ॥ लक्ष्मणेन च वत्स्यामि न मां शोकः प्रधक्ष्यति ॥ १५ ॥
बहुपुष्पफले रम्ये नानाद्विजगणायुते ॥ विचित्रशिखरे ह्यस्मिन्रतवानस्मि भामिनि ॥ १६ ॥
अनेन वनवासेन मम प्राप्तं फलद्वयं ॥ पितुश्चानृणता धर्मे भरतस्य प्रियं तथा ॥ १७ ॥ वैदेहि रमसे कच्चिच्चित्रकूटे मया सह ॥ पश्यंती विविधान्भावान्मनोवाक्कायसंमतान् ॥ १८ ॥

प्रीतिः ॥ १६ ॥ धर्मे सत्यपालनलक्षणे ॥ १७ ॥ मनोवाक्कायसंमतान् तत्तत्प्रियान् वर्णने वाक्प्रियता भावाः पदार्थाः संयतेति पाठे सम्यक् नियमितकरणत्रयेत्यर्थः संयताइति बहुवचनांत पाठो भवानित्यस्य विशेषणं लिंगव्यत्यय आर्षइतितीर्थः स्तत्र न किंचित्युक्तमर्थं पश्यामः ॥ १८ ॥

268

दतजं रुधिरं पीतवर्णा मांजिष्ठवर्णाश्च ॥५॥ पुष्पः पुष्परागः अर्कः स्फटिकः केतकानि केतकपुष्पाणि ज्योति-
र्नेत्रं रसः पारदरसः ॥६॥ द्वीपी महाव्याघ्रः तरक्षुः क्षुद्रव्याघ्रः अदुष्टैः तपस्विवैभवात् हिंसादिदोष-
रहितैः ॥७॥ असनः पीतसारः राजादनं प्रियालः धव अंकोल भव्या तिमिशाख्या विशेषाः ॥८॥ अरिष्टे

केचिद्रजतसंकाशाः केचित्तु तजसन्निभाः ॥ पीतमांजिष्ठवर्णाश्च केचिन्मणिवरप्रभाः ॥५॥
पुष्पार्ककेतकाभाश्च केचिज्ज्योतीरसप्रभाः ॥ विराजंते च तत्रैंद्र स्य देशा धातुविभूषिताः ॥६॥
नानामृगगणैर्द्वीपितरक्षुक्षुद्रगणैर्वृतः ॥ अदुष्टैर्भीत्यपयं शैलो बहुपक्षिसमाकुलः ॥७॥ आ-
म्रजंबूसनैर्लोध्रैः प्रियालैः पनसैरपि ॥ अंकोलैर्भव्यतिमिशैर्बिल्वतिंदुकवेणुभिः ॥८॥ का-
श्मर्यारिष्टवरणैर्मधूकैस्तिलकैरपि ॥ बदर्यामलकैर्नीपैर्वेत्रधन्वनबीजकैः ॥९॥ पु-
ष्पवद्भिः फलोपेतैर्लतावृक्षैर्मनोरमैः ॥ एवमादिभिराकीर्णः श्रियं पुष्यत्ययं गिरिः ॥१०॥
शैलप्रस्थेषु रम्येषु पश्यैमान्कामहर्षणान् ॥ किन्नरान्द्वंद्वशो भद्रे रममाणान्मनस्विनः ॥११॥
शाखावसक्तान् खड्गांश्च प्रवराणि वराणि च ॥ पश्य विद्याधरस्त्रीणां क्रीडोद्देशान्मनोरमा-
न् ॥१२॥

निवः धन्वन इंद्रयवः वीजकाः बीजप्रचुरफलविशेषाः दाडिमादयः ॥९॥ पुष्यति वर्धयति ॥१०॥
कामहर्षणान् देशानितिशेषः तत्र रममाणान् किन्नरान् पश्य ॥११॥ खड्गान् किन्नराणामिति शेषः
तथा विद्याधरीणां क्रीडादेशान् पश्य ॥ तासां शाखावसक्तान्यंबराणि च पश्य ॥१२॥

वस्वोकसाराकुवेरनगरी॰ नलिनी शक्रपुरी॰ वस्वोकसाराश्चा दस्यशक्रस्यनलिनीपुरी तिद्द रिः अ
नीत्यशोभतेइ त्तिशेषाणान्वयः २६ हे वनितेसीतेपरैः श्रेष्ठैः स्वैः स्वीयैर्नियमैः स्वह सतांपथिस्थि
तः सन् इमंकालंचतुर्दशबर्षमितं त्वयालक्ष्मणेनचसह विजहिवान् आप्तविहारोयदिमवि

वस्वोकसारांनलिनीं अतीत्यैवोत्तमान्कुरून् पर्वतश्चित्रकूटोसौ बहुमूलफलोदकः २६ इमं
तुकालंवनितेविजह्रिवांस्त्वयाचसीतेसहलक्ष्मणेन रतिंप्रपत्स्येकुलधर्मवर्धिनीं सतां
पथिस्वैर्नियमैः परैः स्थितः २७ इत्यार्षे श्रीरामायणे अयो॰ चतुर्नवतितमः सर्गः ९४॥
अथशैलाद्विनिष्क्रम्यमैथिलींकोसलेश्वरः अदर्शयच्छुभजलांरम्यांमंदाकिनींनदीं १
अब्रवीच्चवरारोहांचंद्रचारुनिभाननां विदेहराजस्यसुतांरामोराजीवलोचनः २ वि॰
चित्रपुलिनांरम्यांहंससारससेवितां कुसुमैरुपसंपन्नांपश्यमंदाकिनींनदीं ३ नाना
विधैस्तीररुहैर्वृतांपुष्पफलद्रुमैः राजंतीराजराजस्यनलिनीमिवसर्वतः ४

ष्यामितदाकुलधर्मवर्धनीः रतिंसौख्यंप्रपत्स्येप्राप्स्यामि २७ अष्टविंशतिश्लोकाअत्रेतिकतकः॥
इतिश्रीरामाभिरामेश्रीरामीयेरामायणतिलके अयोध्याकांडेचतुर्नवतितमः सर्गः ९४ अथनदी
प्रदर्शनेनोपलालयति॰ अथेति १ वरारोहांउत्तमस्त्रीं २ कुसुमैः पद्मादिभिः ३ पुष्पफलयुतै
द्रुमैस्तीरभवैः राजंतांशोभमानां॰ राजराजः कुवेरः तस्यनलिनीसौगंधिकाख्या ४

इदमेवनियमसहितंवनेवस्थानमेवआश्रमतंप्राहुः मोक्षसाधनंप्राहुः मे प्रपितामहामन्वादयःवनवासेप्रे
त्येतक्षरीरत्यागोत्तरंभवार्थीयभवः शिवो हिरण्यगर्भस्तद्वोकप्राप्तिरूपायार्थायप्रयोजनायाहुरिमे
केभवार्थीय· संसारक्लेशनिवृत्तयेइतिकतको व्याचष्टे॥१९॥अभिनइतिपदं॥२०॥अंचलेंइसंबध्यौष

इदमेवाश्रमंप्राहुराज्ञिराजर्षयः परे॥वनवासंभवार्थायप्रेत्यमेत्र पितामहाः॥१९॥शिलाःशैल
स्पशोभंते विशालाःशतशोभितः॥बहुलाबहुलैर्वर्णैर्नीलपीतसिताहृणैः॥२०॥निशिभात्यच
लेंद्रस्य हुताशनशिखाइव॥औषध्यः स्वप्रभालक्ष्म्याभ्राजमानाःसहस्रशः॥२१॥केचित्क्षयनि
भादेशाकेचिदुद्यानसन्निभाः॥केचिदेकशिलाभांतिपर्वतस्यास्यभामिनि॥२२॥भित्त्वेववसुधां
भातिचित्रकूटः समुत्थितः॥चित्रकूटस्यकूटोयं दृश्यतेसर्वतःशुभः॥२३॥कुष्ठस्थगरपुन्नाग
भूर्जपत्रोत्तरच्छदान्॥कामिनांस्वास्तरान्पश्यकुशेशयदलायुतान्॥२४॥मर्दिताश्चापविद्धा
श्चदृश्यंतेकमलस्रजः॥कामिभिर्वनितेपश्यफलानिविविधानिच॥२५॥

ध्यः स्वकांतिसंपदाशोभ
मानाः॥अग्निशिखाइवनिशिभांति॥२१॥क्षयनिभाः गृहसदृशाः।अतिनिबिडबहुपलाशवृक्षकत्वात्
उद्यानसन्निभाः चंपकमालत्यादिबाहुल्यात्· एकशिलाः अनेकजनावस्थानक्षमैकशिलायुक्ताः॥२२॥कू
टोग्रभागः॥२३॥कुष्ठमुत्पलमितितीर्थः स्थगरः पुत्रजीवकः भूर्जः भूर्जपत्रवृक्षः एतेषांपत्राण्येवोत्तरच्छ
दायेषांतान्कामिनांस्वस्तरान्·आस्तरणाणि·कुशेशयंपद्मंतद्दलैःसमंताद्युतानिपश्य॥२४॥फला

[illegible] ॥२५॥

तवदर्शनाच्चाधिकअधिकसुखावहं ॥१२॥१३॥ सखीवत्मंदाकिन्या इतिशेषः कमलपुष्करे रक्तसित
पद्मे। तानि अवमज्जंती मज्जंती ॥१४॥१५॥१६॥ उपस्पृशन् स्नानंकुर्वन् ॥१७॥ सुपुष्पितांसुपुष्पितवनां॥

दर्शनं चित्रकूटस्यमंदाकिन्याश्चशोभने॥ अधिकंपुरवासाच्चमन्येतवचदर्शनात् ॥१२॥ विधू
तकल्मषैः सिद्धैस्तपोदमशमान्वितैः॥ नित्यविक्षोभितजलांविगाहस्वमयासह ॥१३॥ सखीवच्च
विगाहस्वसीतेमंदाकिनींनदीं॥ कमलान्यवमज्जंतीपुष्कराणिचभामिनि ॥१४॥ त्वंपौरजनव
द्व्यालानयोध्यामिवपर्वतं॥ मन्यस्ववनितेनित्यंसरयूवदिमांनदीं ॥१५॥ लक्ष्मणश्चैवधर्मा
त्मामन्निदेशेव्यवस्थितः॥ त्वंचानुकूलावैदेहिप्रीतिंजनयथोमम ॥१६॥ उपस्पृशंस्त्रिषव
णंमधुमूलफलाशनः॥ नायोध्यायैनराज्यायस्पृहयेचत्वयासह ॥१७॥ इमांहिरम्यांगजयू
थलोडितांनिपीततोयांगजसिंहवानरैः॥ सुपुष्पितांपुष्पभरैरलंकृतांनसोस्तियःस्यान्नग
गःक्लमःसुखी ॥१८॥ इतीवरामोबहुसंगतंवचःप्रियासहायःसरितंप्रतिब्रुवन्॥ चचाररम्यं
नयनांजनप्रभंसचित्रकूटंरघुवंशवर्धनः ॥१९॥ इत्यार्षेश्रीरामायणेअयो॰ पंचनवतितमःसर्गः
॥९५॥

नामवगात्स्वयः॥ सुखीनस्यात्सनास्तीत्यन्वयः ॥१८॥ सरितंप्रति॰ सरितंवर्णयन्॥ नयनयोरंजन
वन्नीलप्रभं ॥१९॥ इतिश्रीरामाभिरामेश्रीरामीयेरामायणतिलकेअयोध्याकांडेपंचनवतितमःसर्गः ॥९५॥

तीर्थानि अवतारमार्गाः रतिं प्रीतिं ॥ ५ ॥ ६ ॥ उपतिष्ठंते मंत्रैरुपस्थानं कुर्वंते एते परे मुनयः प्रकाशंते जपपरा इति शेषः ॥ ७ ॥ अनृत्तइव नृत्तं कर्तुमुपक्रांता इव अत एव पुष्पांजलिकरणां पादपैः ॥ ८ ॥ माणिनिकाशं मुक्तानिकाशमुदकं यस्यास्तां ॥ ९ ॥ अंभसि पोप्लुयमानान् पुनः पुनः प्लवमानान् पुष्पसंचया

मृगयूथनिपीतानि कलुषांभांसि संप्रतं तीर्थानि रमणीयानि रतिं संजनयंतिमे ॥ ५ ॥ जटाजिनधराः कालेवल्कलोत्तरवाससः ॥ ऋषयस्त्ववगाहंते नदीं मंदाकिनीं प्रिये ॥ ६ ॥ आदित्यमुपतिष्ठंते नियमादूर्ध्वबाहवः ॥ एते परे विशालाक्षि मुनयः संशितव्रताः ॥ ७ ॥ मारुतोद्धूतशिखरैः प्रनृत्त इव पर्वतः ॥ पादपैः पुष्पपत्राणि सृजद्भिरभितो नदीं ॥ ८ ॥ क्वचिन्मणिनिकाशोदां क्वचित्पुलिनशालिनीं ॥ क्वचित्सिद्धजनाकीर्णां पश्य मंदाकिनीं नदीं ॥ ९ ॥ निर्धूतान्वायुना पश्य विततान्पुष्पसंचयान् ॥ पोप्लूयमानानपरान्पश्य त्वं तनुमध्यमे ॥ १० ॥ पश्यैतद्वल्गुवचसो रथांगाह्वयना द्विजाः ॥ अधिरोहंति कल्याणि निष्कूजंतः शुभा गिरः ॥ ११ ॥

न्पश्य ॥ पश्ये हा चल्लमध्यमे इति पाठः कृशत्वाच्चलना शक्तमध्यवती त्यर्थ इति कतकः ॥ १० ॥ रथांगाह्वयनाः ॥ चक्रवाकाः ॥ रथांगं तद्वाचकः शब्द आह्वयनं नाम येषामिति विग्रहः अधिरोहंति पुलिनानीति शेषः ॥ ११ ॥

नीसीतासुरसुतोपमा॥ हर्षयामास रामस्य मनो मनसिजार्पितं॥१७॥ स निर्घृष्यांगुलिं रामो धौतेमनः
शिलोच्चये॥ चकार तिलकं तस्या ललाटे रुचिरं तदा॥१८॥ बालार्कसमवर्णेन तेजसा गिरिधातु
ना॥ चकासे विनिविष्टेन ससंध्येव निशासिता॥१९॥ केसरस्य च पुष्पाणि करेणामृद्य राघवः
अलकं पूरयामास मैथिल्याः प्रीतमानसः॥२०॥ अभिरम्य तदा तस्यां शिलायां रघुनंदनः॥ अ
न्वीयमानो वैदेह्या देशमन्यं जगाम ह॥२१॥ विचरंती तदा सीता ददर्श हरियूथपं॥ वने बहु
मृगाकीर्णे वित्रस्ता राममाश्लिषत्॥२२॥ रामस्तां परिरभ्यांगीं परिरभ्य महाभुजः॥ सांत्वयामा
स वामोरुमवभर्त्स्याथ वानरं॥२३॥ मनःशिलायास्तिलकः सीतायाः सोथ वक्षसि॥ समदृ
श्यत संक्रांतो रामस्य विपुलौजसः॥२४॥ प्रजहास तदा सीता गते वानरपुंगवे॥ दृष्ट्वा भर्ता
रि संक्रांतमपांगं समनःशिलं॥२५॥ नातिदूरे त्वशोकानां प्रदीप्तमिव काननं॥ ददर्श पुष्प
स्तबकैः सर्जद्भिरिव वानरैः॥२६॥ वैदेही त्वब्रवीद्राममशोककुसुमार्थिनी॥ वयं तदभिग
च्छामो वनमिक्ष्वाकुनंदन॥२७॥ तस्याः प्रियेप्सितो रामो देव्या दिव्यार्थरूपया॥ सहितस्तद
शोकानां विशोकः प्रययौ वनं॥२८॥ तदाशोकवनं रामः सभार्योव्यचरत्तदा॥ गिरिपुत्र्यापि
नाकीव सह हैमवतं वनं॥२९॥ तावन्योन्यमशोकस्य पुष्पैः पल्लवधारिभिः॥ समलंचक्रतुरु
भौ कामिनौ नीललोहितौ॥३०॥ आबद्धवनमालौ तौ कृतापीडावतंसकौ॥ भार्यापती तावचलं
शोभयांचक्रतुर्भृशं॥३१॥ एवं स विविधान्देशान्दर्शयित्वा प्रियां प्रियः॥ आजगामाश्रमपदं

रामस्तु नलिनीं रम्यां चित्रकूटं च पर्वतं॥ उत्तरे तु गिरेः पादे चित्रकूटस्य राघवः॥१॥ ददर्श कंदरं रम्यं
शिलाधातुसमन्वितं॥ सुखप्रसेकैस्तरुभिः पुष्पभारावलंबिभिः॥२॥ संरक्तं च रहस्यं च मत्त
द्विजगणायुतं॥ तं दृष्ट्वा सर्वभूतानां मनोदृष्टिहरं वनं॥३॥ उवाच सीतां काकुत्स्थो वनदर्शन
विस्मितः॥ वैदेहि रमते चक्षुस्तवास्मिन् गिरिकंदरे॥४॥ परिश्रमविघातार्थं साधु तावदिहा
स्यतां॥ त्वदर्थमिह विन्यस्ता त्वियं श्लक्ष्णा समा शिला॥५॥ यस्याः पार्श्वे तरुः पुष्पैः प्रविष्ट इव के
सरैः॥ राघवेणैवमुक्ता सा सीता प्रकृतिदक्षिणा॥६॥ उवाच प्रणयस्निग्धमिदं श्लक्ष्णतरं वचः
अवश्यं कार्यं वचनं तव मे रघुनंदन॥७॥ बहुशो भ्रमितश्चाद्य तव चैवं मनोरथः॥ एवमुक्त्वा वरा
रोहा शिलां तामुपसर्पह॥८॥ सह भर्त्रानवद्यांगी रंतुकामा मनस्विनी॥ तामेवं ब्रुवतीं सीतां रामो
वचनमब्रवीत्॥९॥ रम्यं पश्यसि भूतार्थं वनं पुष्पितपादपं॥ पश्य देवि गिरौ रम्ये रम्यपुष्पाकि
तानिमान्॥१०॥ गजदंतक्षतान्वृक्षान् पश्य निर्यासवर्षिणः॥ झिल्लिका विरुतैर्दीर्घैः रुदतीव
समंततः॥११॥ पुत्रप्रियोऽसौ शकुनिः पुत्र पुत्रेति भाषते॥ मधुरां करुणां वाचं पुरेव जननी मम॥
१२॥ विहंगो भृंगराजोऽयं शालस्कंधसमाश्रितः॥ संगीतमिव कुर्वाणः कोकिलेनानुकूजति॥१३
अथवा बालकः शोके कोकिलानां विहंगमः॥ सुखबद्धमसंबद्धं तथा त्वेष प्रभाषते॥१४॥ एषा कु
सुमितां नूनं पुष्पभारानतां लतां॥ दृश्यते मामिवात्यर्थं श्रमाद्धि वित्वमाश्रिता॥१५॥ एवमुक्त्वा प्रिय
स्यांके मैथिली प्रियभाषिणी॥ भूयस्तरां त्वनिंद्यांगी समारोहत भामिनी॥१६॥ अंके तु परिवर्त्ते

णोः सामर्थ्यमस्त्कमे ॥ अस्त्रस्यास्य प्रभावेन शरणं न लभे क्वचित् ॥ ४८ ॥ तं काकमब्रवीद्रामः पादयोः
शिरसागतं ॥ सानुक्रोशतया धीमानिदं वचनमर्थवत् ॥ ४९ ॥ मया रोषपरीतेन सीताप्रियहि
तार्थिना ॥ अस्त्रमेतत्समाधाय त्वद्वधायाभिमंत्रितं ॥ ५० ॥ यत्तु मे चरणौ मूर्ध्नागतस्त्वं जीवि
तेप्सया ॥ अत्रास्य वेलात्वयि मे रक्ष्यो हि शरणागतः ॥ ५१ ॥ अमोघं क्रियतामस्त्रमेकमंगं परि
त्यज ॥ किमंगं शातयत्वेतु ने शरैषीकाब्रवीद्धि मे ॥ ५२ ॥ एतावद्धि मयाशक्यं तव कर्तुं प्रियं खग
एकांगहीनं त्वस्त्रेण जीवितं मरणाद्वरं ॥ ५३ ॥ एवमुक्तस्तु रामेण संप्रधार्य स वायसः ॥ अभ्य
गच्छद्द्वयोरस्त्राः स्यागमेकस्य पंडितः ॥ ५४ ॥ सोऽब्रवीद्राघवं काको नेत्रमेकं त्यजाम्यहं ॥ एकनेत्रो
पि जीवेहं त्वत्प्रसादान्नराधिपः ॥ ५५ ॥ रामानुज्ञानमस्त्रं तत्काकस्य नयने पतत् ॥ वैदेही विस्मि
तातत्र काकस्य नयने हृते ॥ ५६ ॥ निपत्य शिरसा काको जगामाश्रुयथेप्सितं ॥ लक्ष्मणानुचरो रा
मश्चकारानंतरक्रियाः ॥ ५७ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये अयोध्याकांडे सर्गः ॥ अयं सर्गः
प्रक्षिप्तः ॥

सुसंश्लिष्टमलंकृतं ॥ ३२ ॥ प्रत्यञ्जगामतं भ्रातालक्ष्मणो गुरुवत्सलः ॥ दर्शयन्विविधं धर्मं सौमित्रिः
सुकृतं तदा ॥ ३३ ॥ शुद्धबाणहतांस्तत्र मेध्यान्कृष्णमृगान्दश ॥ राशीकृतान्शुष्यमाणानन्यान्कांश्च
नकांश्चन ॥ ३४ ॥ तद्दृष्ट्वा कर्म सौमित्रेर्भ्राताप्रीतोभवत्तदा ॥ क्रियतां बलयश्चेति रामः सीतामथा
न्वशात् ॥ ३५ ॥ अग्रं प्रदाय भूतेभ्यः सीताथ वरवर्णिनी ॥ तयोरुपददद्भ्रात्रोर्मधुमांसं च तद्
शं ॥ ३६ ॥ तयोस्तृप्तिमथोत्पाद्य वीरयोः कृतशौचयोः ॥ विधिवज्जानकी पश्चाच्चक्रे सा प्राणधा
रणं ॥ ३७ ॥ शिष्टं मांसं निरूप्यं यत्कोपणायावकल्पितं ॥ तद्रामवचनात्सीता काकेभ्यः पर्यरक्षत
३८ ॥ तद्ददर्श तदा भर्ता काकेनायासितां दृढं ॥ यस्याहारान्तरचरः कामचारी विहंगमः ॥ ३९ ॥
काकेनारोप्यमानां तां सा समोहं तदातुरं ॥ साचुकोपानवद्यांगी भर्तृप्रणयदर्पिता ॥ ४० ॥ इतश्चेत
श्चरतां काकोवारयंती पुनः पुनः ॥ पक्षतुंडनखाग्रैश्च कोपयामास कोपनां ॥ ४१ ॥ तस्याः प्रस्फुरमा
णोष्ठं भ्रूकुटीपुटसूचितं ॥ मुखमालोक्य कौकुत्स्थस्तं काकं प्रत्यषेधयत् ॥ ४२ ॥ सधृष्टमानो
विहगो रामवाक्यमचिंतयन् ॥ सीतामभिपपातैव ततश्चुक्रोध राघवः ॥ ४३ ॥ सोभिमंत्र्या
शरेषीकामैषीकास्त्रेण वीर्यवान् ॥ काकं तमभिसंधाय ससर्ज पुरुषर्षभः ॥ ४४ ॥ सतेनाभि
द्रुतः काकस्त्रींल्लोकान्पर्यगात्ततः ॥ देवैर्दत्तवरः पक्षी हारांतरचरो लघुः ॥ ४५ ॥ यत्र यत्रागमः
त्काकस्तत्र तत्र ददर्श ह ॥ इषीकाभूतमाकाशं सरामं पुनरागमत् ॥ ४६ ॥ समूर्ध्नान्यपतत्काको
राघवस्य महात्मनः ॥ सीतायास्तत्र पश्यंत्या मानुषीमीरयन्गिरं ॥ ४७ ॥ प्रसादं कुरु मे राम प्रा

यत्सहसा मृगाः प्रद्रुताः दिशस्तत्प्रकारणं तथा सिंहैर्वित्रासिता नि गजयूथानि वा अथ तैर्वित्रासि
ताम हिषा वा दिशः प्रद्रुतास्तत्कारणं च पश्य वा शब्दो चार्थे ८ तत्कारणमुन्नयन्स्वयमाह राजा
वेति राजादिर्मृगयामटते ज्ञातुमर्हसि अन्यद्वा श्वापदं दुष्टजंतुः वनं क्षोभयतीति शेषः ९ १०

गजयूथानि वारण्ये महिषा वा महावने॥ वित्रासिता मृगाः सिंहैः सहसा प्रद्रुता दिशः ८
राजा वा राजपुत्रो वा मृगयामटते वने॥ अन्यद्वा श्वापदं किंचित्सौमित्रे ज्ञातुमर्हसि ९॥
सद्दुश्चरो गिरिश्चायं पक्षिणामपि लक्ष्मण॥ सर्वमेतद्यथातत्त्वमभिज्ञातुमिहार्हसि १०॥
स लक्ष्मणः संत्वरितः सालमारुह्य पुष्पितं॥ प्रेक्षमाणो दिशः सर्वाः पूर्वां दिशमवैक्षत॥ ११॥
उदङ्मुखः प्रेक्षमाणो ददर्श महतीं चमूं॥ गजाश्वरथसंबाधां यत्तैर्युक्तां पदातिभिः १२॥
तामश्वरथसंपूर्णां रथध्वजविभूषितां॥ शशंस सेनां रामाय वचनं चेदमब्रवीत् ॥ १३॥
अग्निं संशमयत्वार्यः सीता च भजतां गुहां॥ सज्जं कुरुष्व चापं च शरांश्च कवचं तथा॥ १४॥
तं रामः पुरुषव्याघ्रो लक्ष्मणं प्रत्युवाच ह॥ अंगावेक्षस्व सौमित्रे कस्येमां मन्यसे चमूं १५॥

साल्लोवृक्षः ११ यत्तैः सज्जैः १२ सेनां शशंस सेनाकृतशब्दकारणमुक्तवान् १३ अग्निं संशम
यंतु परसेनादर्शनजक्षोभकालिकोयंव्यापारः सर्वजनसिद्धः गुहां अंतर्गृहं शरांश्च गृहाणेति शे
षः १४ तं युद्धसन्नाहवादिनं रामो विमृश्यकारित्वादाह अंगेति यामिमां चमूं भयहेतुं मन्यसे

मांसेन छंदयन् मांसविशेषप्रदर्शनेन लालयन् सांत्वयन्· गिरिनिम्नगां मंदाकिनीं॥१॥ नेनन्वालनप्रकार माह॥ इदमिति· एवमित्यस्पष्टुव निशेषः॥२॥ आसतः गिरिप्रदेशे आसीनस्य॥ उपयायिनः रामस

तां नदा दर्शयित्वा तु मैथिलीं॥ गिरिनिम्नगां॥ निषसाद गिरिप्रस्थे सीतां मांसेन छंदयन्॥१॥ इदं मेध्यमिदं स्वादु निष्टप्तमिदमग्निना॥ एवमास्ते स धर्मात्मा सीतया सह राघवः॥२॥ तथा तत्रासतस्तस्य भरतस्योपयायिनः॥ सैन्यरेणुश्च शब्दश्च प्रादुरास्तां नभस्पृशौ॥३॥ एतस्मिन्नंतरे त्रस्ताः शब्देन महता ततः॥ अर्दिता यूथपा मत्तास्स यूथा द्रुदुवुर्दिशः॥४॥ स तं सैन्यसमुद्भूतं शब्दं शुश्राव राघवः॥ तांश्च विप्रद्रुतान् सर्वान् यूथपानन्ववैक्षत॥५॥ तांश्च विप्रद्रुतान् दृष्ट्वा तं च श्रुत्वा महास्वनं॥ उवाच रामः सौमित्रिं लक्ष्मणं दीप्ततेजसं॥ हंत लक्ष्मण पश्येह सुमित्रा सुप्रजास्त्वया॥ भीमस्तनितगंभीरं तुमुलः श्रूयते स्वनः॥७॥

सीपे आगच्छतः भरतस्य सैन्यरेणुः· सैन्यशब्दश्च प्रादुरास्तां प्रादुर्बभूवतुः॥३॥ एतस्मिन्नंतरे सेनाशब्दप्रवृत्तिसमये॥४॥ स राघवो रामः सैन्यसमुद्भूतं तदुत्पादितं॥५॥ स निस्वनमिति पाठे स इति पदं॥६॥ भीमं भयंकरं यत्स्तनितं मेघशब्दः॥ तद्वत् गंभीरं यथा भवति तथा· यो

वाल्मीकिरामायणटीका अयो० स० ९६

संखेयुद्धे॰ मयापश्येदित्युत्तरेण॥ न्वयः मधमास्कंदनं संख्यं समीकं सांपरायिकं॥२५॥ सानुबंधांस
कुंडा॥२६॥ कलुषेण पापेन कैकेयी रूपेण॥ असत्कारं कैकेयीकृतं॥२७॥२८॥२९॥३०॥ भरतलक्ष्मण
योः समतया रामोपकरणत्वाल्लक्ष्मणस्य भरतविषयेण विवादः रामस्य तत्र भयोरपि स्वोपकर

एतस्मिन्निहते कृत्स्नामनुशाधि वसुंधरां॥ अद्य पुत्रं हतं संख्ये कैकेयी राज्यकामुका॥२५
मया पश्येत्सुदुःखार्ता हस्तिभिन्नमिव द्रुमं॥ कैकेयीं च वधिष्यामि सानुबंधां सबांधवां॥२६
कलुषेणाद्य महता मेदिनी परिमुच्यतां॥ अद्येमं संयतं क्रोधमसत्कारं च मानद॥२७॥ मोक्ष्या
मि शत्रुसैन्येषु कक्षेष्विव हुताशनं॥ अद्यैव चित्रकूटस्य काननं निशितैः शरैः॥२८॥ छिंदञ्छ
त्रुशरीराणि करिष्ये शोणितोक्षितं॥ शरैर्निर्भिन्नहृदयान्कुंजरांस्तुरगांस्तथा॥२९॥ श्वा
पदाः परिकर्षंतु नरांश्च निहतान्मया॥ शराणां धनुषश्चाहमनृणोस्मिन्महावने॥३०॥ स
सैन्यं भरतं हत्वा भविष्यामि न संशयः॥३१॥ इत्यार्षे श्रीरा॰ अयो॰ षण्णवतितमः सर्गः॥९६॥
सुसंरब्धं तु भरतं लक्ष्मणं क्रोधमूर्छितं॥ रामस्तु परिसांत्व्याथ वचनं चेदमब्रवीत्॥१॥

एवान्यत्र क्वापि क्रोधइतितत्त्वमत्र॥३१॥ इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके अयोध्या
कांडे षण्णवतितमः सर्गः॥९६॥ अथ तत्क्रोधमपनयति॰ भगवान्सर्वभूतभावज्ञस्तदा
गमनप्रयोजनकथनेन॰ भरतं प्रति सुसंरब्धं अत्यंतयुद्धोद्योगवंतं॥१॥ ॥

274

रुषितः क्रुद्धः ॥१६॥ अभिषेचनं राज्ये प्राप्य संपन्नं अकंटकं ॥१७॥ तद्विन्हमाह एष इति । यएष वृक्षो महान्सं
प्रकाशते तत्समीपे नंलक्ष्मीकल्परथे कोविदारध्वजो विराजते ॥१८॥ भजंति एतद्देशमागच्छंति । सादि

एवमुक्तस्तु रामेण लक्ष्मणो वाक्यमब्रवीत् ॥ दिधक्षन्निव तां सेनां रुषितः पावको यथा ॥१६॥
संपन्नं राज्यमिच्छंस्तु व्यक्तं प्राप्याभिषेचनं ॥ आवां हंतुं समभ्येति कैकेय्या भरतः सुतः ॥१७॥ एष
वै सुमहांछ्रीमान्विटपी संप्रकाशते ॥ विराजत्युज्ज्वलस्कंधः कोविदारध्वजो रथे ॥१८॥ भजंत्ये
ते यथाकाममश्वानारुह्य शीघ्रगान् ॥ एते भ्राजंति संहृष्टा गजानारुह्य सादिनः ॥१९॥ गृही
तधनुषावावां गिरिं वीर श्रयावहे ॥ अथ वेहैव तिष्ठावः सन्नद्धावुद्यतायुधौ ॥२०॥ अपि
नौ वशमागच्छेत्कोविदारध्वजो रणे ॥ अपि द्रक्ष्यामि भरतं यत्कृते व्यसनं महत् ॥२१॥ त्वया रा
घव संप्राप्तं सीतया च मया तथा ॥ यन्निमित्तं भवान्राज्याच्च्युतो राघव शाश्वतात् ॥२२॥ संप्रा
प्तोयमरिर्वीर भरतो वध्य एव हि ॥ भरतस्य वधे दोषं नाहं पश्यामि राघव ॥२३॥ पूर्वापकारिणं
हत्वा न ह्यधर्मेण युज्यते ॥ पूर्वापकारी भरतस्त्यागेधर्मश्च राघव ॥२४॥

२

नोगृहीत सादि चि
न्हा गजारोहाः ॥१९॥ अतो गृहीतधनुषावितिः ॥२०॥ अपि नौ वशमागच्छेदिति कामप्रवेदने लिङ् ।
महद्व्यसनं त्वया प्राप्तमित्यन्तरेणान्वयः ॥२१॥ यन्निमित्तं यस्माद्धेतोः ॥२२॥ वध्यत्वे अयमेव हेतुः
॥२३॥ त्यागे वधे ॥२४॥

रुष्यतद्विषयरोषंकृत्वेत्यर्थः प्रसाद्यत्वदत्तंराज्यंमयाप्राप्तंतन्मयारामायदीयते· अतोनतेसत्यभ्रं
शदोषइतितदनुमन्यस्वेतिप्रसाद्य॥१२॥ यथैषभरतस्तथाएतत्कर्तृकमस्मद्दर्शनयोग्यत्वं· प्राप्त
कालंउचितं॥१३॥ कृतपूर्वंयत् अद्यभरतंशंकसेईदृशंवाभयंभयजनकंवाक्यंकृतपूर्वंउक्त

अंबांचकेकयींरुष्यभरतश्चाप्रियंवदन्॥ प्रसाद्यपितरंश्रीमान्राज्यंमेदातुमागतः॥१२॥
प्राप्तकालंयथैषोऽस्मान्भरतोद्रष्टुमर्हति॥ अस्मासुमनसाप्येषनाहितंकिंचिदाचरेत्॥१३॥
विप्रियंकृतपूर्वंतेभरतेनकदानुकिं॥ ईदृशंवाभयंतेद्यभरतंयद्विशंकसे॥१४॥ नहिते
निष्ठुरंवाच्योभरतोनाप्रियंवचः॥ अहंह्यप्रियमुक्तःस्यांभरतस्याप्रियेकृते॥१५॥ कथंनुपु
त्राः पितरंहन्युःकस्यांचिदापदि॥ भ्रातावाभ्रातरंहन्यात्सौमित्रेप्राणमात्मनः॥१६॥ यदि
राज्यस्यहेतोस्त्वमिमांवाचंप्रभाषसे॥ वक्ष्यामिभरतंदृष्ट्वाराज्यमस्मैप्रदीयतां॥१७॥ उच्यमा
नोहिभरतोमयालक्ष्मणतद्वचः॥ राज्यमस्मैप्रयच्छेतिबाढमित्येवमंस्यते॥१८॥

पूर्वंवायदद्यभ
रतंशंकसेइत्यन्वयः॥१४॥ अतःनेत्वयाभरतोऽप्रियंनिष्ठुरंनवाच्यः यतोभरतस्याप्रियेअप्रिय
वचनेकृतेउक्ते अहमप्रियमुक्तः स्यांत्वया॥१५॥ आत्मनःप्राणंप्राणसमंभ्रातरमित्यन्वयः॥१६॥ इमां
वाचंभरतवधविषयां· प्रदीयतामितिवक्ष्यामीत्यन्वयः॥१७॥ ननुत्वदुक्तेपिसनदद्यात्तत्राह· उच्यमा
नइति· प्रयच्छेत्युच्यमानइत्यर्थः राज्यलिप्साचेत्तदेवदापयिष्यामिकिंभ्रातृवधेनेत्याशयः॥१८

अत्रभरतविषये ॥२॥ पितुःसत्यपालयिष्यामीतिप्रतिज्ञायसापवादेनपित्राभरतायदत्तंरामोप्रहतवानि
त्येवंरूपापवादसहितेन ॥३॥ त्वयेनाशेरुतइतिशेषः ॥४॥ एतदुक्तार्थजातमुद्दिश्यप्रतिशृणोमिप्रतिजाने

किमत्रधनुषाकार्यमसिनावासचर्मणा ॥ महाबलेमहोत्साहेभरतेस्वयमागते ॥२॥ पितुःसत्यं
प्रतिश्रुत्यहत्वाभरतमाहवे ॥ किंकरिष्यामिराज्येनसापवादेनलक्ष्मण ॥३॥ यद्द्रव्यंबांधवानां
वामित्राणांवाक्षयेभवेत् ॥ नाहंतत्प्रतिगृह्णीयांभक्ष्यान्विषकृतानिव ॥४॥ धर्ममर्थंचकामंचपृ
थिवींचापिलक्ष्मण ॥ इच्छामिभवतामर्थेएतत्प्रतिशृणोमिते ॥५॥ भ्रातॄणांसंग्रहार्थंचसुखार्थं
चापिलक्ष्मण ॥ राज्यमप्यहमिच्छेसत्येनायुधमालभे ॥६॥ नेयंममहीसौम्यदुर्लभासागराम्बरा
नहीच्छेयमधर्मेणशक्रत्वमपिलक्ष्मण ॥७॥ यद्विनाभरतंत्वांचशत्रुघ्नंवापिमानद ॥ भवेन्म
मसुखंकिंचिद्भस्मतत्कुरुतांशिखी ॥८॥ मन्येहमागतोयोध्यांभरतोभ्रातृवत्सलः ॥ ममप्रा
णैःप्रियतरःकुलधर्ममनुस्मरन् ॥९॥ श्रुत्वाप्रव्राजितंमांहिजटावल्कलधारिणम् ॥ जा
नक्यासहितंवीरत्वयाचपुरुषोत्तम ॥१०॥ स्नेहेनाक्रान्तहृदयःशोकेनाकुलितेंद्रियः ॥ द्रष्टु
मभ्यागतोह्येषभरतोनान्यथागतः ॥११॥

॥५॥ तमेवार्थंशपथेनदृढइति· भ्रातॄणामितिसंग्रहा
र्थंसम्यक्पालनार्थं· ॥ अतएवतेषांसुखार्थंच ॥६॥ दुर्लभेतिनापितुसुलभेवकिंतुनानेच्छामिशक्र
त्वमपिनेच्छेयं· इमांमहीमेवनेच्छामिइतिनित्यर्थः ॥७॥ मन्येहमितिद्रष्टुमभ्यागतइतिमन्येइत्यन्व

रामा॰ अ॰
२७६

रहच्छत्रविषये॥२६॥इतीवइत्येव॰सौमित्रिंवृक्षाग्रस्थितं॰॥अथवृक्षावरोहणमाज्ञापयति॰व
क्षादिति॰मद्वचःकुरुशंकांविहायमद्वचसासालावरोहणंकुर्वित्यर्थः॥२७॥अवतीर्येति॰राम
स्येत्यादिः॥२८॥रामाश्रमस्यसंमर्दोनभवेदितिसंदिष्टाआज्ञप्ता सेनाशैलस्यसमंतादूरभा

नतुपश्यामितच्छत्रंपांडरंलोकविश्रुतं॥पितुर्दिव्यंमहाभागसंशयोभवतीहमे॥२६॥
वृक्षाग्रादवरोहत्वंकुरुलक्ष्मणमद्वचः॥इतीवरामोधर्मात्मासौमित्रिंतमुवाचह॥२७॥
अवतीर्यतुसालाग्रात्तस्मात्ससमितिंजयः॥लक्ष्मणःप्रांजलिर्भूत्वातस्थौरामस्यपार्श्व
तः॥२८॥भरतेनाथसंदिष्टासंमर्दोनभवेदिति॥समंतात्तस्यशैलस्यसेनावासमकल्प
यत॥२९॥अध्यर्धमिक्ष्वाकुचमूर्योजनंपर्वतस्यह॥पार्श्वेन्यविशदावृत्यगजवाजिन
राकुला॥३०॥साचित्रकूटेभरतेनसेनाधर्मंपुरस्कृत्यविधूयदर्पं॥प्रसादनार्थंरघुनं
दनस्यविरोचतेनीतिमताप्रणीता॥३१॥इत्यार्षेश्रीरामायणेवाल्मीकीयेअयोध्या
कांडेसप्तनवतितमःसर्गः॥९७॥निवेश्यसेनांतुविभुःपद्भ्यांपादवतांवरः॥अभिगं
तुंसकाकुत्स्थमियेषगुरुवर्तकं॥१॥

गेवासमकल्पयत॥२९॥अध्यर्धंसार्धंयोजनं॥३०॥धर्मं
पुरस्कृत्य॰दर्पंविधूयःप्रणीनाशिक्षितासेना॥३१॥इतिश्रीरामाभिरामेश्रीरामीयेरामायण
तिलकेअयोध्याकांडेसप्तनवतितमःसर्गः॥९७॥पादवतांचरप्राणिनां॰वरःश्रेष्ठोविभुर्भ

२७८

रामा॰ टी॰ अयोध्याकाण्ड
राम
२७६

लज्जया गात्राणि प्रविवेशेव ॥ अत्यंतसंकुचितो भूदित्यर्थः तस्य रामस्य हितेरतः ॥१९॥ एवमनुचिंतनोक्तिज लज्जा परिहारायोचितं वाक्यमाह ॥ तदिति· भरतप्रसंगस्कत्वदाशयपरिज्ञानायैवकेवलमुपन्यस्त इ त्याशयः ॥२०॥ एवं पितृप्रसंगो लक्ष्मणस्य व्रीडापरिहारमूलइति ज्ञात्वा तदेव अनुकुर्वन्नाह ॥ व्रीडितं

तथोक्तो धर्मशीलेन भ्रात्रा तस्य हितेरतः ॥ लक्ष्मणः प्रविवेशेव स्वानि गात्राणि लज्जया ॥१९॥ तद्वा क्यं लक्ष्मणः श्रुत्वा व्रीडितः प्रत्युवाच ह ॥ त्वां मन्ये द्रष्टुमायातः पिता द[illegible]शरथः स्वयं ॥२०॥ व्री डितं लक्ष्मणं दृष्ट्वा राघवः प्रत्युवाच ह ॥ एष मन्ये महाबाहुरिहास्मान्द्रष्टुमागतः ॥२१॥ अथवा नौ ध्रुवं मन्ये मन्यमानः सुखोचितौ ॥ वनवासमनुध्याय गृहाय प्रतिनेष्यते ॥२२॥ इमां चाप्ये ष वैदेहीमत्यंतसुखसेविनीं ॥ पिता मे राघव श्रीमान्वनादादाय यास्यति ॥२३॥ एतौ तौ संप्र काशेते गोत्रवंतौ मनोरमौ ॥ वायुवेगसमौ वीरौ जवनौ तुरगोत्तमौ ॥२४॥ स एष सुमहाकायः कंपते वाहिनीमुखे ॥ नागः शत्रुंजयो नाम वृद्धस्तातस्य धीमतः ॥२५॥

मिति· एषः लक्ष्मणः प्र स्तावितः पिता ॥२१॥ नौ सुखोचितौ मन्यमानः वनवासं अनुध्याय कष्टं विचिंत्य ॥२२॥ इमां सीतां ॥२३॥ गो त्रवंतौ प्रशस्तनामानौ प्रशस्तकुलौ वा । गात्रवंतौ इति पाठे प्रशस्तशरीरौ· जवनौ वेगवंतौ ॥२४॥ पि तुरागमनचिह्नांतरमाह· ॥ स एष इति· कंपते चलति· ॥ आगच्छतीत्यर्थः शत्रुंजयो रामेण सुय ज्ञाय दत्तात्पूर्व एव· अतएव तातस्य शत्रुंजय इत्युक्तं ॥२५॥ ॥

११ गिरिराजसमः हिमवत्सदृशः १२ कृतकार्यं कृतार्थं स्थावरत्वमोचकरामपादरजोव्याप्तत्वयेति भावः दुर्गं दुष्प्रवेशं व्यालाः सर्पाः १३।१४ मध्येनेत्येनवतंतद्योगेतानीतिद्वितीयाद्रुमजालानांमध्येइत्यर्थः १५ अग्रेर्ध्वजंधूमंरामाश्रमगतस्यांतिइतिपाठे तदाश्रमगतस्यसालस्यांतेउपरिविद्धं उच्छ्रि

कृतकृत्यामहाभागवैदेही जनकात्मजा भर्तारंसागरांतायाः पृथिव्यायानुगच्छति ११ सुशुभश्चित्रकूटोसौ गिरिराजसमोगिरिः यस्मिन्वसतिकाकुत्स्थः कुबेरइवनंदने १२ कृतकार्यमिदंदुर्गंवनंव्यालनिषेवितं यदध्यास्तेमहाराजोरामःशस्त्रभृतांवरः १३ एवमुक्त्वा महातेजाभरतःपुरुषर्षभः पद्भ्यामेवमहातेजाः प्रविवेशमहद्वनं १४ सतानिद्रुमजालानि जातानिगिरिसानुषु पुष्पिताग्राणि मध्येनजगामवदतांवरः १५ सगिरेश्चित्रकूटस्यसालमारुह्यसत्वरं रामाश्रमगतस्याग्नेर्ददर्शध्वजमुच्छ्रितं १६ तंदृष्ट्वाभरतःश्रीमान्मुमोदसहबांधवः अत्ररामइतिज्ञात्वागतःपारमिवांभसः १७ सचित्रकूटेतुगिरौनिशाम्यरामाश्रमंपुण्यजनोपपन्नं गुहेनसार्धंत्वरितोजगामपुनर्निवेश्यैवचमूंमहात्मा १८ इत्यार्षेश्रीरा॰अ॰अष्टनवतितमःसर्गः ९८

तं॰ ध्वजंकोविदारध्वजंदृष्ट्वेत्यर्थः धूमदर्शनस्यपूर्वमेवजातत्वेनतस्यानिर्णायकत्वादितिकतकः १६ तंध्वजं १७ पुण्यजनास्तपस्विनः पुनर्निवेश्य अन्वेषणानियोजितामपिचमूंस्थापयित्वा गुहेनेति प्रधानजनोपलक्षणं १८ इतिश्रीराम

२७७

यथोद्देशं अमुकस्यामुकदिशि वास इति स्वाम्युपदिष्टप्रदेशमनतिक्रम्य निविष्टे सैन्ये इत्यर्थः विनीतव
त् विनीतार्हं ॥२॥ लुब्धाः निषादाः एभिः आप्तैर्गुरुभक्त्यै ॥३॥ ज्ञातिसहस्रेण परिवृत्त इत्यन्वयः ॥४॥ चरि

निविष्टमात्रे सैन्ये तु यथोद्देशं विनीतवत् । भरतो भ्रातरं वाक्यं शत्रुघ्नमिदमब्रवीत् ॥२॥ क्षिप्रं वन
मिदं सौम्य नरसंघैः समन्ततः । लुब्धैश्च सहितैरेभिस्त्वमन्वेषितुमर्हसि ॥३॥ गुहो ज्ञातिसहस्रेण शर
ह
चापासिपाणिना । समन्वेषतु काकुत्स्थावस्मिन् परिवृतः स्वयं ॥४॥ अमात्यैः सह पौरैश्च गु
रुभिश्च द्विजातिभिः । सह सर्वं चरिष्यामि पद्भ्यां परिवृतः स्वयं ॥५॥ यावन्न रामं द्रक्ष्यामि लक्ष्
मणं वा महाबलं । वैदेहीं वा महाभागां न मे शांतिर्भविष्यति ॥६॥ यावन्न चंद्रसंकाशं त
द्रक्ष्यामि शुभाननं । भ्रातुः पद्मविशालाक्षं न मे शांतिर्भविष्यति ॥७॥ सिद्धार्थः खलु सौमि
त्रिर्यश्चंद्रविमलोपमं । मुखं पश्यति रामस्य राजीवाक्षं महाद्युतिं ॥८॥ यावन्न चरणौ भ्रा
तुः पार्थिवव्यंजनान्वितौ । शिरसा प्रतिग्रहीष्यामि न मे शांतिर्भविष्यति ॥९॥ यावन्न राज्ये रा
ज्यार्हः पितृपैतामहे स्थितः । अभिषिक्तो जलक्लिन्नो न मे शांतिर्भविष्यति ॥१०॥

ष्यामि ॥ अहम
न्वेषयनिति शेषः ॥ पौरैः सहवर्तमानैरमात्यैर्द्विजातिभिः सहवर्तमानैर्गुरुभिश्च परिवृत्तः ॥५॥६॥
शुभाननमिति कर्मधारयः शांतिर्दुःखशांतिः ॥७॥ चंद्रविमलोपमं विमलचंद्रसदृशं ॥८॥ पार्थिवव्यं
जनैः रेखाध्वजकुलशातपत्रादि तावन्मे न शांतिरित्यन्वयः ॥९॥ ॥१०॥ ॥

रामा-अ॰
२७८

शीतकारणात्तच्छीतनिवृत्तिकारणात् तद्रूपप्रयोजनात् मृगादीनां करीषैः कृतान्संचयान्ददर्श चै
त्रशुक्लदशम्यां प्रस्थानेन तत्र काले वैशाखां नमपररात्रेशीतस्य जायमानत्वात् ७ एवमेतान् पदा
र्थान् पश्यन् गच्छन्नेव शत्रुघ्नमब्रवीत् ॥८॥ मंदाकिनीश्चेतइति आश्रमइतिशेषः ९ यतश्चैवं बद्धानि
चीराणि तस्मात् विकाले मार्गस्यास्य दर्शनायोग्यकाले जलाहरणाद्यर्थं गंतुमिच्छता लक्ष्मणेना

स
ददर्श भवनेतस्मिन्महतः चयान्कृतान् ॥ मृगाणांमहिषाणांच करीषैः शीतकारणात् ॥ ७
गच्छन्नेवमहाबाहुर्द्युतिमान्भरतस्तदा ॥ शत्रुघ्नं चाब्रवीद्धृष्टस्तानमात्यांश्च सर्वशः ॥ ८ ॥
मन्ये प्राप्ताः स्म तं देशं भरद्वाजो यमब्रवीत् ॥ नातिदूरेहिमन्येहं नदीं मंदाकिनीमतः ॥ ९ उ
च्चैर्बद्धानि चीराणि लक्ष्मणेन भवेदयं ॥ अभिज्ञानकृतः पंथा विकाले गंतुमिच्छता ॥ १० ॥ इ
दं चोदात्तदंतानां कुंजराणां तरस्विनां ॥ शैलपार्श्वे परिक्रांतमन्योन्यमभिगर्जतां ॥ ११ यमेवा
धातुमिच्छंति तापसाः सततं वने ॥ तस्यासौ दृश्यते धूमः संकुलः कृष्णवर्त्मनः ॥ १२ अत्राहं
पुरुषव्याघ्रं गुरुसत्कारकारिणं ॥ आर्यं द्रक्ष्यामि संहृष्टं महर्षिमिव राघवं ॥ १३ ॥

भिज्ञानकृतः कृताभिज्ञानः आश्रमपंथाः अयमेव भवेत् ॥ १० अभिज्ञानकरणाकारणं वनमार्गदर्श
यति इतश्चेति इदं चेति पाठांतरं उदात्तदंतानां महादंतानां परिक्रांतं परिक्रमणं पर्यटनं स्था
नं गमनमार्गइति यावत् तत्र गमननिवृत्त्यर्थं चेदमभिज्ञानकरणमिति भावः ॥ ११ तापसा वने यमा

२७८

राम
२७८

रामायणटीकायां श्रीरामाभिरामीयां अयोध्याकाण्डे सर्गः ९३ ॥

निविष्टायामिति शत्रुघ्नमितिप्रतियोगेद्वितीया शत्रुघ्नस्यरामाश्रमप्रत्यासत्तिचिह्नानिदर्शयन्नित्यर्थः ॥१॥
आनयेति संदिश्यस्वयंत्वरितः सन्नग्रेजगाम ननुमातृः प्रतीक्ष्यस्थितइत्यर्थः ॥२॥ रामदर्शनजस्तर्षः
रामदर्शनमुद्दिश्यजनितोभिलाषः सभरतवत्तस्यचशत्रुघ्नस्यसुमंत्रस्यच अतः शत्रुघ्नभरतमनुधावं
तं अदूरात्तत्समीपंयथाभवतितथान्वपद्यत अन्वधावत् ॥३॥ तापसानामालयैः सहसंस्थितां यद्वा

निविष्टायांतुसेनायामुत्सुकोभरतस्ततः ॥ जगामभ्रातरंद्रष्टुंशत्रुघ्नमनुदर्शयन् ॥१॥ ऋषिंव
सिष्ठंसंदिश्यमातॄर्मेशीघ्रमानय ॥ इतित्वरितमग्रेसजगामगुरुवत्सलः ॥२॥ सुमंत्रस्त्वपिश
त्रुघ्नमदूरादन्ववर्तत ॥ रामदर्शनजस्तर्षोभरतस्येवतस्यच ॥३॥ गच्छन्नेवाथभरतस्तापसाल
यसंस्थितां ॥ भ्रातुःपर्णकुटींश्रीमानुटजंचददर्शह ॥४॥ शालायास्त्वग्रतस्तस्याददर्शभरत
स्तदा ॥ काष्ठानिचावभग्नानिपुष्पाण्यपचितानिच ॥५॥ सलक्ष्मणस्यरामस्यददर्शाश्रममे
युषः ॥ कृतंवृक्षेष्वभिज्ञानंकुशचीरैःक्वचित्क्वचित् ॥६॥

तापसालयसमानसंस्थानां पर्णकुटीं
पर्णप्राधान्येननिर्मितांकुटींशालांइयंदर्शनार्थमागततपस्व्यादिसंव्यवहारप्रयोजना उटजबहिस्था
उटजं सभिन्निकवाटंदारुबद्धं गृहं सीतानिवेशार्थंकृतं ॥४॥ तस्याः शालायाः पर्णकुटीसंज्ञायाः अव
भग्नानिहोमार्थं अपचितानिबल्यर्थंसंपादितानि ॥५॥ एउषः आङ् पूर्वादिणः क्वसुः कुशैर्वल्कलै
श्च मार्गपरिज्ञानार्थंकृतं अभिज्ञानंचिह्नंददर्श ॥६॥ ॥ राम ॥

महारजतवासोभ्यां स्वर्णमयकोशाभ्यां चर्मफलकं ॥२२॥ कांचनभूषितैर्गोधांगुलित्रैरुपलक्षिताम् ॥ तिशोषः सिंहगुहामिव पर्णशालां ददर्शेत्यन्वयः ॥२३॥ प्रागुदक्प्रवणां ईशानभागेनिम्नां ॥२४॥ नि

महारजतवासोभ्यामसिभ्यांच विराजितां रुक्मबिंदुविचित्राभ्यां चर्मभ्यां चापिशोभि तां ॥२२॥ गोधांगुलित्रैरासक्तैः चित्रकांचनभूषितैः अरिसंघैरनाधृष्यामृगैः सिंहगुहामिव ॥२३॥ प्रागुदक्प्रवणां वेदिं विशालांदीप्तपावकां ददर्श भरतस्तत्र पुण्यां रामनिवेशने ॥२४॥ निरीक्ष्य स मुहूर्त्तंतु ददर्श भरतो गुरुं उटजे राममासीनं जटामंडलधारिणं ॥२५॥ कृष्णाजिनधरंतु चीरवल्कलवाससं ददर्श राममासीनमभितः पावकोपमं ॥२६॥ सिंहस्कंधं महाबाहुं पुंडरीकनिभेक्षणं पृथिव्याः सागरांताया भर्त्तारं धर्मचारिणं ॥२७॥ उपविष्टं महाबाहुं ब्रह्माणमिवशाश्वतं स्थंडिलेदर्भसंस्तीर्णे सीतया लक्ष्मणेन च ॥२८॥ तंदृष्ट्वा भरतः श्रीमान्दुःखमोहपरिप्लुतः ॥ अभ्यधावत धर्मात्मा भरतः केकयीसुतः ॥२९॥

रीक्ष्येति अग्निमिति शेषः गुरुं रामं ददर्श कृष्णाजिनेत्याद्युच्यमानविशेषणं रामं ॥२५॥ अभितः समीपे ददर्श ॥२६॥ ॥२७॥ शाश्वतं ब्रह्माणं हिरण्यगर्भं ॥२८॥ अभ्यधावत धावन्निवत्वरयाजगाम अत्र भरतस्यैवकर्तृत्वेऽपि पौनरुक्त्यमयीभावेनातिहर्षविवशत्वादत्र प्रकरणे द्विरुक्तिर्नदोषाय ॥२९॥

सराघवःभरतःमंदाकिनीमनुचित्रकूटंप्राप्तइत्यन्वयः तंजनममात्यादिजनं।१४।वीरासनेयोगिनामासने
१५।१६। इतिलोकेनसमाकृष्टः निंदितोयस्मात् अतोमेजन्मधिक् सोहमेनदपयशःपरिहारायरामंप्रसा
दयन् रामप्रसादहेतवेतस्यरामस्यपादेषुपूजायांबहुवचनं सीतायालक्ष्मणस्यचपादयोःपतिष्या

अथगत्वामुहूर्त्तंतुचित्रकूटंसराघवः॥मंदाकिनीमनुप्राप्तःतंजनंचेदमब्रवीत्॥१४॥जगतां
पुरुषव्याघ्रआस्तेवीरासनेरतः॥जनेंद्रोनिर्जनंप्राप्यधिङ्मेजन्मसजीवितं॥१५॥मत्कृतेव्यसनं
प्राप्तोलोकनाथोमहाद्युतिः॥सर्वान्कामान्परित्यज्यवनेवसतिराघवः॥१६॥इतिलोकसमा
कृष्टःपादेष्वद्यप्रसादयन्॥रामंतस्यपतिष्यामिसीतायालक्ष्मणस्यच॥१७॥एवंसविल
पंस्तस्मिन्वनेदशरथात्मजः॥ददर्शमहतींपुण्यांपर्णशालांमनोरमां॥१८॥सालतालाश्वक
र्णानांपर्णैर्बहुभिरावृतां॥विशालांमृदुविस्तीर्णांकुशैर्वेदिमिवाध्वरे॥१९॥शक्रायुधनिका
शैश्चकार्मुकैर्भारसाधनैः॥रुक्मपृष्ठैर्महासारैःशोभितांशत्रुबाधकैः॥२०॥अर्करश्मिप्रती
काशैर्घोरैस्तूणगतैःशरैः॥शोभितांदीप्तवदनैःसर्पैर्भोगवतीमिव॥२१॥

मिस्वापराधप्रसादना
यकनीयः स्वपिषणामोत्नोकप्रसिद्धइतिकतकः अन्यस्तुश्रद्धाजाश्चात् सीतायाश्चपुनःपुनरि
तिपाठंकल्पयति।१७॥१८॥सालाः वटपलाशादिदृढविशालपर्णवंतोवृक्षाः अश्वकर्णावृक्षवि
शेषः।१९॥भारसाधनैः अतिगुरुकार्यसाधनैः सारोबलेस्थिरांशेच।२०॥भोगवतीनागलोकः।२१

ततएवपुनर्नोवाच ॥ ३५ ॥ ततः बाष्पावरुद्धकंठत्वात् ॥ ३९ ॥ ४० ॥ राजसुतौरामलक्ष्मणौ ॥ ४१ ॥ अश्रूण्येवमुं
चन् प्रविहायहर्षंपूर्वंतद्दर्शनजसंतोषः पश्चात्तद्दुःखदर्शनजदुःखादश्रुपातश्च ॥ ४२ ॥ इतिश्री
रामाभिरामेश्रीरामीयेरामायणतिलकेअयोध्याकांडेएकोनशततमः सर्गः ॥ ९९ ॥ जटिलमिति

दुःखाभितप्तोभरतोराजपुत्रोमहाबलः ॥ उक्त्वार्येतिसकृद्दीनंपुनर्नोवाचकिंचन ॥ ३९ ॥ बाष्पैः
पिहितकंठश्चप्रेक्ष्यरामंयशस्विनं ॥ आर्येत्येवाभिसंक्रुश्यव्याहर्तुंनाशकत्ततः ॥ ३९ ॥ शत्रुघ्न
श्चापिरामस्यववंदेचरणौरुदन् ॥ तावुभौचसमालिंग्यरामोप्यश्रूण्यवर्तयत् ॥ ४० ॥ ततः सुमं
त्रेणगुहेनचैवसमीयतराजसुतावरण्ये ॥ दिवाकरश्चैवनिशाकरश्चयथांबरेशुक्रबृह
स्पतिभ्यां ॥ ४१ ॥ तान्पार्थिवान्वारणयूथपार्हान्समागतांस्तत्रमहत्यरण्ये ॥ वनौकसस्तेभिस
मीक्ष्यसर्वेत्वश्रूण्यमुंचन्प्रविहायहर्षं ॥ ४२ ॥ इत्यार्षेश्रीरा॰अयो॰नवनवतितमःसर्गः ॥
९९ ॥ जटिलंचीरवसनंप्रांजलिंपतितंभुवि ॥ ददर्शरामोदुर्दर्शंयुगांतेभास्करंयथा ॥ १ ॥ क
थंचिदभिविज्ञायविवर्णवदनंकृशं ॥ भ्रातरंभरतंरामः [illegible]परिजग्राहपाणिना ॥ २ ॥

अद्यप्रभृतिभूमौतुशयिष्येजटाचीराणिधारयन्नित्यस्याशीतितमेभरतोक्तेर्भरतस्यजटिलत्वंयद्य
पिनवतितमेसर्गेवसानोवाससीक्षौमेइतिभरद्वाजदर्शनवेलायांश्रूयतेतथापिगुहग्रामेप्रतिज्ञा
तस्यभरद्वाजाश्रमनिर्गमनानंतरंधारणमितिनविरोधः युगांतेभास्करंयथेतिभुविपतितमितिशेष

दृष्ट्वैव दर्शनमात्रेणैवार्तः खिन्नः सन् तां चार्तिं धैर्याद्धारयितुमशक्नुवन् अतएव बाष्पसंदिग्धवर्णया गिरा वागिन्द्रियेण वचनमब्रुवन् नव्यक्तं वदन् विललाप ३० विलापप्रकारमाह संसदीति ३१ बहुसहस्र

दृष्ट्वैवं विललापार्तो बाष्पसंदिग्धया गिरा ॥ अशक्नुवन्वारयितुं धैर्याद्वचनमब्रुवन् ३० यः संसदि प्रकृतिभिर्भवेद्युक्त उपासितुं ॥ वन्यैर्मृगैरुपासीनः सोयमास्ते ममाग्रजः ३१ वासोभिर्बहुसाहस्रैर्यो महात्मा पुरोचितः ॥ मृगाजिने सोयमिह प्रवस्ते धर्ममाचरन् ३२ अधारयद्यो विविधाश्चित्राः सुमनसः सदा सोयं जटाभारमिमं सहते राघवः कथं ३३ यस्य यज्ञैर्यथादिष्टैर्युक्तो धर्मस्य संचयः ॥ शरीरक्लेशसंभूतं स धर्मं परिमार्गते ३४ चंदनेन महार्हेण यस्यांगमुपसेवितं ॥ मलेन तस्यांगमिदं कथमार्यस्य सेव्यते ३५ मन्निमित्तमिदं दुःखं प्राप्तो रामः सुखोचितः ॥ धिग्जीवितं नृशंसस्य मम लोकविगर्हितं ३६ इत्येवं विलपन्दीनः प्रस्विन्नमुखपंकजः ॥ पादावप्राप्य रामस्य पपात भरतो रुदन् ३७ ॥

द्रव्यमूल्यैर्वासोभिरलंकर्तुं यः पुरे उचितः समृगाजिने अंतरीयोत्तरीयरूपे मृगचर्मणि प्रवस्ते धर्मं पितृवचनपरिपालनरूपं ३२ ३३ यथादिष्टैः यथाविहितैः ऋत्विक्क्लेशसाध्यैर्यस्य धर्मसंचयो युक्तः स स्वशरीरक्लेशेन संभृतमुत्पन्नं धर्मं मार्गते ३४ मलेन दंडेवत्रिवर्णाप्लवमात्रान्नलस्थितिरंगो ३५ ३६ पादावप्राप्येति दुःखातिशयवशात् ३७ ॥ राम

धर्मनिश्चितः धर्मेनिश्चितोनिश्चयोयस्यसः ॥८॥ उपाध्यायोवसिष्ठः ॥९॥ नंदतिमद्वनवासः त्वराज्यलाभाभ्यामितिव्यंग्यं ॥१०॥ कुलपुत्रोमहाकुलप्रसूतः तेपुरोहितः तावकसकरणहितकृत्यानुष्ठाता एतेनवसिष्ठपुत्रः ॥ कश्चिदुक्तः ॥११॥ विधिज्ञःसकलहोमविधिज्ञः युक्तोनियुक्तः ॥ कालेहोमका

कच्चिद्दशरथोराजा कुशलीसत्यसंगरः ॥ राजसूयाश्वमेधानामाहर्ताधर्मनिश्चितः ॥८॥
सकच्चिद्ब्राह्मणोविद्वान्धर्मनित्योमहाद्युतिः ॥ इक्ष्वाकूणामुपाध्यायोयथावत्तातपूज्यते ॥९॥ नातकच्चिच्चकौसल्यासुमित्राचप्रजावती ॥ सुखिनीकच्चिदार्याचदेवीनंदतिकैकयी ॥१०॥ कच्चिद्विनयसंपन्नःकुलपुत्रोबहुश्रुतः ॥ अनसूयुरनुद्रष्टासत्कृतस्तेपुरोहितः ॥११॥ कच्चिदग्निषुतेयुक्तोविधिज्ञोमतिमानृजुः ॥ हुतंचहोष्यमाणंचकालेवेदयतेसदा ॥१२॥ कच्चिद्देवान्पितॄन्भृत्यान्गुरून्पितृसमानपि ॥ वृद्धांश्चतातवैद्यांश्च
ब्राह्मणांश्चाभिमन्यसे ॥१३॥

ले॰ वेदयतेहुतंहोष्यमाणंचाग्निं ॥१२॥ वैद्याः विद्यासुसर्वासुनिपुणास्तान्ब्राह्मणानभिमन्यसेबहुमन्यसे॰ ब्राह्मणासामान्यविषयः प्रश्नोग्रेभविष्यति॰ ॥ यद्वावैद्यान्चिकित्साप्रवीणान्ब्राह्मणानित्यर्थः ॥ अप्रतोन्येषोमेध्योयोभिभिषज्यतीतिश्रुत्युक्तानिंदातुशास्त्रानभिज्ञचिकित्साप्रवृत्तपरा॰ शास्त्राभिज्ञस्यमैषज्यंमहत्नेपुण्यायतज्जीविकापरोवानिषेधइतिदिक् ॥१३॥

पर्यपृछत्समाहित इति पाठे समाहितः कुशलप्रश्नद्वारा धर्मबोधने सावधानचित्तः॥३॥ हे तात ते पिता क्वाभू
त्. इह परत्र वेत्यर्थः कुत एवं संशयस्तत्राह नहीति. जीवतस्तस्य सेवां हित्वेति शेषः॥ नार्हसि मदसन्नि
धौ तैव च पितृशुश्रूषा अवश्यकर्तव्यत्वादिति भावः॥४॥ दूरात् मातामहदेशात्. चिरस्यागतं भरतं पश्यामि॥
बतेति हर्षे. दुष्प्रतीकमिति भरतविशेषणं च व॰ न विशेषणं च आयेकार्श्य ववर्णादिना दुर्ज्ञेयाकारः वन

आघ्राय रामस्तं मूर्ध्नि परिष्वज्य च राघवं॥ अंके भरतमारोप्य पर्यपृछत सादरं॥३॥ क्व नु तेऽभूत्पिता
तात यदरण्यं त्वमागतः॥ न हि त्वं जीवतस्तस्य वनमागंतुमर्हसि॥४॥ चिरस्य बत पश्यामि दूरा
द्भरतमागतं॥ दुःप्रतीकमरण्येऽस्मिन् किं तात वनमागतः॥५॥ कच्चिन्नु धरते तात राजा यत्त्वमिहा
गतः॥ कच्चिन्न दीनः सहसा राजा लोकांतरं गतः॥६॥ कच्चित्सौम्य न ते राज्यं भ्रष्टं बालस्य शाश्वतं। क
च्चिच्छुश्रूषसे तात पितुः सत्यपराक्रम॥७॥

मपि भीषणा तया. तथा ईदृशं वनं किमागत किमागम
नप्रयोजनं ईदृशारण्ये इत्यर्थः अरण्यं गजाद्युपभोग्यं तद्भिन्नं वनं मालाद्युतं मनुष्यभोग्यं॥५॥ अथ भ
रतागमनं राजाज्ञया वा स्यात्. राजमरणोदुःखाद्वा तत्राद्यमुपन्यस्यति. कच्चिन्नु इति. धरते प्राणान्धा
रयति. अथवा लोकांतरं गतः यत्त्वमिहागत इत्यनुकर्षः॥६॥ अंत्यमेन पक्षमवलंब्याह. न ते राज्यं भ्र
ष्टमिति. मत्प्रभोरत्ययात् प्राप्तभ्रंशाशंकं॥ अनिश्चयात्द्वाक प्रतारणाय वा पुनर्जीवनपक्षमवलंब्याह.
कच्चिच्छुश्रूषस इति॥७॥

येत्वदीया मंत्रास्त्वया मात्यैश्चापरिकीर्त्तिता अपियुक्त्याऽर्थायत्पातर्कैस्तत्साध्यैरनुमानैर्वा॰ यद्वातर्का
स्तत्कारणानुमायकाः युक्तयः साक्षात्तदनुमायिकाः परैर्नबुध्यंते किल॰ किंच परकृतं मंत्रितं त्वया
त्वदमात्यैर्वा बुध्यते किल ॥ २१ ॥ सहस्रैस्त्वेकोपि विशेषः पंडितपरिग्रहे हेतुमाह॰ पंडितइति॰ अ

कच्चिन्नतर्कैर्युक्त्या वायेचाप्यपरिकीर्त्तिताः ॥ त्वयावातववामात्यैर्बुध्यतेतात मंत्रितं ॥ २१ ॥ क
च्चित्सहस्रैर्मूर्खाणामेकमिच्छसिपंडितं ॥ पंडितोह्यर्थकृच्छ्रेषु कुर्यान्निश्श्रेयसंमहत् ॥ २२ ॥ स
हस्राण्यपिमूर्खाणां यद्युपास्तेमहीपतिः ॥ अथवाप्ययुतान्येवनास्तितेषुसहायता ॥ २३ ॥ एको
प्यमात्योमेधावीशूरोदक्षो विचक्षणः ॥ राजानंराजपुत्रंवाप्रापयेन्महतींश्रियं ॥ २४ ॥ कच्चिन्मु
ख्यामहत्स्वेवमध्यमेषुचमध्यमाः ॥ जघन्याश्चजघन्येषुभृत्यास्तेतातयोजिताः ॥ २५ ॥ अमा
त्यानुपधातीतान्पितृपैतामहान्शुचीन् ॥ श्रेष्ठाञ्छ्रेष्ठेषुकच्चित्त्वंनियोजयसिकर्मसु ॥ २६ ॥
कच्चिन्नोग्रेणदंडेनभृशमुद्वेजिताःप्रजाः ॥ राष्ट्रेतवानुजानंतिमंत्रिणः कैकयीसुत ॥ २७ ॥

र्थकृच्छ्रेषु अर्थसंकटेषु॰ निश्श्रेयसंकार्यान् अव्यभिचरितनिस्तारोपायबोधनेनेनिशेषः ॥ २२ ॥ सहा
यता॰ सहायकार्यंतमता ॥ २३ ॥ विचक्षणोभ्यस्तनीतिशास्त्रः ॥ २४ ॥ मुख्यामहांतः ॥ २५ ॥ उपधाउत्कोचस्त
मतीतानन्तदग्राहिणः यद्वोपाधिप्रयुक्तसं॰ श्रयरहितान्॰ अतएवपितृपैतामहान् शुचान्बाह्यां
तरेंद्रियशुद्धान्॰ ॥ २६ ॥ उद्वेजिताःप्रजामंत्रिणश्चराष्ट्रेतव त्वांनानुजानंतिनावमन्यंते ॥ २७ ॥

इषुरमंत्रो बाणप्रयोगः अस्त्रं समंत्रः सः वरशब्द उभयसंबद्ध अर्थशास्त्रं राजनीतिशास्त्रं तत्र विशारदं पंडि
तं सुधन्वानं तन्नामानं उपाध्यायं धनुर्वेदाचार्यं ॥१४॥१५॥ मंत्रिधुरैः मंत्रिश्रेष्ठैः शास्त्रको विदैः नीतिशास्त्रज्ञैः
सुसंवृतः सुतरां गुप्तः ॥१६॥ अर्थनैपुणमर्थप्राप्त्युपायं ॥१७॥ नैकः एकेन मंत्रे क्रियमाणे स्वकार्याभिनि

इष्वस्त्रवरसंपन्नमर्थशास्त्रविशारदं ॥ सुधन्वानमुपाध्यायं कच्चित्त्वं तात मन्यसे ॥१४॥ कच्चिदा
त्मसमाः शूराः श्रुतवंतो जितेंद्रियाः ॥ कुलीनाश्चेंगितज्ञाश्च कृतास्ते तात मंत्रिणः ॥१५॥ मंत्रो वि
जयमूलं हि राज्ञां भवति राघव ॥ सुसंवृत्तो मंत्रिधुरैरमात्यैः शास्त्रकोविदैः ॥१६॥ कच्चिन्निद्रा
वशं नैषि कच्चित्काले वबुध्यसे ॥ कच्चिच्चापररात्रेषु चिंतयस्यर्थनैपुणं ॥१७॥ कच्चिन्मंत्रयसे नैकः
कच्चिन्न बहुभिः सह ॥ कच्चित्ते मंत्रितो मंत्रो राष्ट्रं न परिधावति ॥१८॥ कच्चिदर्थं विनिश्चित्य लघु
मूलं महोदयं ॥ क्षिप्रमारभसे कर्तुं न दीर्घयसि राघव ॥१९॥ कच्चित्तु सुकृतान्येव कृतरूपाणि
वा पुनः ॥ विदुस्ते सर्वकार्याणि न कर्तव्यानि पार्थिवाः ॥२०॥

वेशन गुणागुणयोर्याथार्थ्यग्रह
णं ॥ न सिध्यति बहुभिर्मंत्रणे प्रथममेकमल्पमेव न घटेत मंत्रभेदश्च भवेदिति भावः राष्ट्रं न परि
धावति लोकैर्न ज्ञायत इत्यर्थः ॥१८॥ लघुमूलमल्पयत्नसाध्यं महोदयं महाफलं न दीर्घयसि
न विलंबयसि ॥१९॥ पार्थिवाः सामंताः ते मंत्रितानि सर्वकार्याणि सुकृतानि निष्पन्नान्येव कृतरू
पाणि कृतकल्पानि वा विंदंति न कर्तव्यानि भावित्वेनेत्यर्थः ॥२०॥ ॥

मुख्याः गणमुख्याः दृष्टापदानाः दृष्टं द्वित्रिवारानुभूतं अपदानं ॥ पूर्ववृत्तं पौरुषं येषां ते ॥ विक्रान्ताः शूराः ॥३१॥ भक्तं दैनंदिनयान्नं वेतनं प्रतिमासे देयं ॥३२॥ भृताः भृतिजीविनो भृत्याः ॥३३॥ कुल

बलवंतश्च कच्चित्ते मुख्या युद्धविशारदाः ॥ दृष्टापदाना विक्रांतास्त्वया सत्कृत्य मानिताः ॥३१॥ कच्चिद्बलस्य भक्तं च वेतनं च यथोचितं ॥ संप्राप्तकालं दातव्यं ददासि न विलंबसे ॥३२॥ कालातिक्रमणाच्चैव भक्तवेतनयोर्भृताः ॥ भर्तुरप्यतिकुप्यंति सोऽनर्थः सुमहान्कृतः ॥३३॥ कच्चित्सर्वेऽनुरक्तास्त्वां कुलपुत्राः प्रधानतः ॥ कच्चित्प्राणांस्तवार्थेषु संत्यजंति समाहिताः ॥३४॥ कच्चिज्जानपदो विद्वान्दक्षिणः प्रतिभानवान् ॥ यथोक्तवादी दूतस्ते कृतो भरत पंडितः ॥३५॥

पुत्राः ज्ञातयः प्रधानतः प्रधानाः ॥३४॥ प्रतिभानवान् उत्पन्नमतिः ॥ यथोक्तवादी यथोक्तसंदेशप्रतिसंदेशवक्ता ॥ पंडितः परिच्छेत्ता ॥ दूतं चैव प्रकुर्वीत सर्वशास्त्रविशारदं ॥ इङ्गिताकारचेष्टाज्ञं शुचिं दक्षं कुलोद्भवमिति मनोः ॥३५॥

याजकाः किंचित्पापानुसंधानेन पतितमिव त्वामयाज्योयमिति मत्वा नावजानंति किल॰ तत्र दृष्टांतः उग्रे
त्यादि॰ स्त्रियः कुलस्त्रियः उग्रास्य हीनजातीयस्त्रीप्रतिग्रहीतारं तां च कामयमानं तस्यामत्यंतासक्तं यथा
वजानंतीत्यर्थ इति कतकः उग्रप्रतीतिपाठः उग्रेण कर्मणा बलात्कारादिना प्रतिग्रहीतारं कामयानं का
मुकं स्त्रिय इव याजकाः पतितमिव च नावजानंति प्रजा इति शेषः प्रजातिक्रमणासुग्रकरग्रहणाच्चत्व
यि नास्ति कश्चिदिति भाव इति तीर्थः परे तु उग्रप्रतिग्रहीता॰ ॥ उग्रः शिवस्तत्प्रतिग्रहीतारमल्पपुंस्त्वे

कच्चित्त्वां नावजानंति याजकाः पतितं यथा ॥ उग्रप्रतिग्रहीतारं कामयानमिव स्त्रियः ॥२८॥ उ
पायकुशलं वैद्यं भृत्यसंदूषणे रतं ॥ शूरमैश्वर्यकामं च यो न हंति स हन्यते ॥२९॥ कच्चिद्धृष्ट
श्च शूरश्च धृतिमान्मतिमां शुचिः ॥ कुलीनश्चानुरक्तश्च दक्षः सेनापतिः कृतः ॥३०॥

तत्प्रतिग्रहीतुरीदृशावस्थता याः कर्मविपाकशास्त्रे उक्तेरित्याहुः ॥२८॥ उपायकुशलं॰ सामाद्युपायच
तुरं॰ वैद्यं विद्याविदं राजनीतिशास्त्रज्ञं॰ भृत्यसंदूषणे रतं येन केनापि हेतुना आप्तभृत्यविघटने रतं
शूरं मरणनिर्भयं॰ ऐश्वर्यकामं राज्याभिलाषिणं॰ यो न हंति स वध्यते हन्यत इत्यर्थ इति तीर्थः ॥ उपा
यकुशलं राज्ञः सकाशादर्थग्रहणार्थं व्याधिवर्धनोपायकुशलं वैद्यं भिषजं॰ स्वामिसंदूषणे र
तं भृत्यं सेवकं च॰ राजानमपच्छिद्यानेदैश्वर्यकामं शूरं सेवकरूपं प्रभुं च यो न हंति स राजा तैरेव भिष
जादिभिर्हन्यत इत्यर्थ इति कतकः आह ॥२९॥ शूरः परयोधाभिभवनसमर्थः धृतिमान् विपदि प्रशस्तधै

द्वितीयश्लोकाद्यर्थानां त्यागे हेतुमाह धर्मेत्यादि । मुख्येषु मुख्यप्रमाणभूतेषु आन्वीक्षिकीं तर्कविद्यां शुष्क
तर्कविद्याजनितां बुद्धिमवलम्ब्य निरर्थं निष्प्रयोजनं वदंति । यथात्मनो ज्ञानाश्रयत्वं ईशो जगन्निमित्त
कारणं नित्यज्ञानादिगुणकश्चेत्यादिश्रुतिविरुद्धवादाभिप्रायमिदं ॥३९॥ सत्यनामामयोध्येत्यन्वर्थ
नामां ॥४०॥ आर्यैरुक्तैस्त्रैवर्णिकैः ॥४१॥ समुदितां प्रसिद्धां स्फीतां समृद्धां ॥४२॥ चैत्यशतैः अश्वमेधान्त

धर्मशास्त्रेषु मुख्येषु विद्यमानेषु दुर्बुधाः ॥ बुद्धिमान्वीक्षिकीं प्राप्य निरर्थं प्रवदंति ते ॥३९॥ वीरैरध्युषि
तां पूर्वमस्माकं तात पूर्वकैः ॥ सत्यनामां दृढद्वारां हस्त्यश्वरथसंकुलां ॥४०॥ ब्राह्मणैः क्षत्रियैर्वैश्यैः
स्वकर्मनिरतैः सदा ॥ जितेंद्रियैर्महोत्साहैर्वृतामार्यैः सहस्रशः ॥४१॥ प्रासादैर्विविधाकारैर्वृतां
वैद्यजनाकुलां ॥ कच्चित्समुदितां स्फीतामयोध्यां परिरक्षसे ॥४२॥ कच्चिच्चैत्यशतैर्जुष्टः सुनिविष्ट
जनाकुलः ॥ देवस्थानैः प्रपाभिश्च तटाकैश्चोपशोभितः ॥४३॥ प्रहृष्टनरनारीकः समाजोत्सव
शोभितः ॥ सुकृष्टसीमा पशुमान् हिंसाभिरभिवर्जितः ॥४४॥ अदेवमातृको रम्यः श्वापदैः परिव
र्जितः ॥ परित्यक्तो भयैः सर्वैः खनिभिश्चोपशोभितः ॥४५॥

यागानेकचयनप्रदेशैः क्वचिच्चैत्यशतैरिति
पाठः सुनिविष्टैः सुप्रतिष्ठितैर्जनैराकुलो निविडः ॥४३॥ प्रभिन्ननरनारीक इति पाठे प्रभेदः संतोषः सुकृ
ष्टाः सीमाः तत्क्षेत्रप्रांतदेशाः पशवश्च यस्मिन्स तथा ॥४४॥ अदेवमातृक इति नदीमातृक इत्यर्थः न
द्यंबुजीवनो देशो नदीमातृक उच्यते । वृष्टिनिष्पाद्यसस्यस्तु विज्ञेयो देवमातृक इति । खनिः स्वर्णरत्न

कच्चिदष्टादशेति· तानिच·मंत्रि१ पुरोहित२ युवराज३ सेनापतिः४ दौवारिकः५ अंतःपुराधिकृ
तः६ बंधनागाराधिकृतः७ धनाध्यक्षः८ राजाज्ञयाआज्ञाप्येषुवक्ता९ प्राड्विवाकसंज्ञोव्यवहारप्र
ष्टा१० धर्मासनाधिकृतः११ व्यवहारनिर्णेतासभ्याख्यः१२ सेनायाजीवितभृतिदानाध्यक्षः१३
कर्मांतिकवेतनग्राहिणः१४ नगराध्यक्षः१५ राष्ट्रांतपालः अयमेवाऽटविकः१६ दुष्टानांदंडनाधि
कारी१७ जलगिरिवनदुर्गस्थलपालाः१८ एतान्येवस्वपक्षेमंत्रिपुरोहितयुवराजान्हित्वाचपं

कच्चिदष्टादशान्येषुस्वपक्षेदशपंचच त्रिभिस्त्रिभिरविज्ञातैर्वेत्सितीर्थानिचारणैः ३६ कच्चि
द्व्यपास्तानहितान्प्रतियातांश्चसर्वदा दुर्बलाननवज्ञायवर्तसेरिपुसूदन ३७ कच्चिन्नलोकाय
तिकान्ब्राह्मणांस्तातसेवसे अनर्थकुशलाह्येतेबालाःपंडितमानिनः ३८

चदश· एकैकस्मिन्वि
षयेत्रिभिस्त्रिभिरविज्ञातैः परस्परमिन्नैरश्चाविज्ञातैः एतान्यष्टादशतीर्थानिवेत्सि· कच्चित्तयोर्जल
वनादेश्चमंत्र्याद्यष्टादशस्वपि· पुण्यक्षेत्रेतथापात्रेतीर्थस्यादर्शनेषपीति स्वदेशेप्येतेष्वोयतोव्यव
हारःप्रवर्त्ततेनचेतिविचारणीयंपरदेशेचेतिभावः ३६ व्यपास्तान्निष्काशितान्प्रतियातान्पुन
रागतान्· दुर्बलान्दुर्बलानपि· अनवज्ञायेति·दुर्बलोपमहितःकिमस्माकंकरिष्यतीत्युपेक्षांनकरोषि
कच्चिन् ३७ लोकायतिकान्·चार्वाकमतानुसारिणःप्रत्यक्षमात्रप्रमाणकान्· अपरेलोकायतिकाः शुष्कत
र्कवाददक्षाः ब्राह्मणत्वेपितदपरिग्रहहेतुमाह· अनर्थेति· परलोकतत्साधनाभावरूपानार्थप्रतिपाद

कर्मांताः कर्मकराः अविशंकया निर्भयेन त्वया ते प्रत्यक्षा न किल वा अथवा सर्वे नेउत्सृष्टाः परित्यक्तदर्शनाः न
अत्र कर्मकरविषये मध्यमेव नातिदर्शनादर्शनयोर्मध्यरीत्या करणमेव कारणमर्थप्राप्तिकारणं ॥ ५२ ॥ ५३
आयो धनागमः ॥ व्ययो भोगबलस्ताद्यर्थत्यागः अपात्रेषु नटगायकादिषु ॥ ५४ ॥ अभ्यागतोऽतिथिर्येः
कच्चित् ॥ व्ययः आयान्न्यूनइतिशेषः ॥ ५५ ॥ आर्यः साधुः शुद्धात्मापि सन् अपकर्मणास्तेयागम्याग

कच्चिन्न सर्वे कर्मांताः प्रत्यक्षास्तेऽविशंकया ॥ सर्वे वा पुनरुत्सृष्टा मध्यमेवात्र कारणं ॥ ५२ ॥ क
च्चिद्दुर्गाणि सर्वाणि धनधान्यायुधोदकैः ॥ यंत्रैश्च परिपूर्णानि तथा शिल्पिधनुर्धरैः ॥ ५३ ॥ आय
स्ते विपुलः कच्चित्कच्चिदल्पतरो व्ययः ॥ अपात्रेषु न ते कच्चित्कोशो गच्छति राघव ॥ ५४ ॥ देव
तार्थे च पित्रर्थे ब्राह्मणाभ्यागतेषु च ॥ योधेषु मित्रवर्गेषु कच्चिद्गच्छति ते व्ययः ॥ ५५ ॥ कच्चि
दार्योऽपि शुद्धात्मा क्षारितश्चापकर्मणा ॥ अदृष्टः शास्त्रकुशलैर्न लोभाद्बध्यते शुचिः ॥ ५६ ॥ गृ
हीतश्चैव पृष्टश्च काले दृष्टः सकारणः ॥ कच्चिन्न मुच्यते चोरो धनलोभान्नरर्षभ ॥ ५७ ॥

मनादिदोषेण क्षारितोऽभिशस्तः शास्त्रकुशलैर्धर्मशास्त्रकुशलैरदृष्ट एवानिर्णीतदोष एव लोभात्
धनलोभात्कुचिरपि न वध्यते न दंड्यते कच्चित् ॥ ५६ ॥ गृहीतः पालकैर्धनः स्वामिना वा सकारणो दृ
दृष्टः चोरत्वेन ग्रहणकारणीयुक्तो दृष्टः पृष्टः प्रश्नेनापि निश्चितचौर्यः धनलोभान्चोरेणोपात्तो
चतयादीयमानधनलोभात्पालकैर्न मुच्यते कच्चित् ॥ ५७ ॥ राम

सचसुखंवसतिकच्चिदित्यर्थः ॥ ४६ ॥ कृषिगोरक्षजीविनोवैश्याः वार्ताकृषिगोरक्षवाणिज्यकर्मेयंवार्तेत्यमरात्तं-
तत्रसांप्रतंवर्ततेइतिशेषः लोकोजीवलोकः कृष्यादौस्थितःसुखमेधतेकच्चित् ॥ ४७ ॥ गुप्तिपरिहारैः गुप्ति
रिक्षणापणपरीहारोनिरुपरिहारःतैस्तेषांकृष्यादिजीविनांभरणंकृतंकच्चिदितितीर्थः गुप्तपरिहारै
रितिपाठः गुप्त्यर्थंनियुक्तैराजमनुष्यैः क्रियमाणानस्करायनर्थपरिहारैस्तत्त्वयाभरणंकृतंकच्चिदि

विवर्जितोनरैःपापैःमसपूर्वैःसुरक्षितः ॥ कच्चिज्जनपदःस्फीतःसुखंवसतिराघव ॥ ४६ ॥ कच्चित्ते
दयिताःसर्वेकृषिगोरक्षजीविनः ॥ वार्तायांसांप्रतंतातलोकोयंसुखमेधते ॥ ४७ ॥ तेषांगुप्तिप
रीहारैःकच्चित्तेभरणंकृतं ॥ रक्षाहिराज्ञाधर्मेणसर्वेविषयवासिनः ॥ ४८ ॥ कच्चित्स्त्रियःसांत्व
यसेकच्चितास्तेसुरक्षिताः ॥ कच्चिन्नश्रद्धास्यासांकच्चिद्गुह्यंनभाषसे ॥ ४९ ॥ कच्चिन्नागवनंगु
प्तंकच्चित्तेसंतिधेनुकाः ॥ कच्चिन्नगणिकाश्वानांकुंजराणांचतप्यसि ॥ ५० ॥ कच्चिद्दर्शयसेनि
त्यंमानुषाणांविभूषितं ॥ उत्थायोत्थायपूर्वाह्णेराजपुत्रमहापथे ॥ ५१ ॥

तिकतकः ॥ ४८ ॥ ताःस्त्रि
यःसुरक्षितास्त्वयेत्यर्थः ॥ नश्रद्धास्यासामितिवचनादिकंवास्तवमितिशेषः गुह्यंअप्रकाशप्रवृत्त
तमितिसेतिमत्वानभाषसेकच्चित् ॥ ४९ ॥ नागवनंगजोत्पत्तिस्थानभूतंवनं धेनुकाधेनवःस्वार्थेकः गणि
काःकरिण्यःवेश्याकरिणीगणिकाकरिण्यादिसंपादनविषयेतप्तिंनानोषिकच्चित् ॥ ५० ॥ भूषितंस
भायांस्थित्वात्मानमितिशेषः तथामहापथेवात्मानंदर्शयसे ॥ ५१ ॥ ॥

कच्चिदर्थेनेति· धर्मार्जनयोग्यपूर्वाह्णेर्थार्जनेन धर्मबाधः। तथा तद्योग्यमध्याह्ने धर्मार्जनेन तद्बाधः प्रीतिलो
भेन कामेन विषयसंतोषलोभरूपेण कामेन नद्रुभयकालसेवितेन तयोर्बाध इतिनीर्थः अर्थप्राप्तिरूपे
ण हेतुनाधर्मं नबाधसे धर्मं हित्वार्थेन गच्छसीत्यर्थः धर्मेण धर्मप्राप्तिहेतुना अर्थं कुटुंबनिर्वाहापे
क्षितमर्थं नबाधसे। उभयमपि विषयसंतोषलोभेन गणिकाद्यासक्त्या बाधसे नेत्यर्थ इति कतकः ६२

कच्चिदर्थेन वा धर्मं अर्थं धर्मेण वा पुनः। उभौ वा प्रीतिलोभेन कामेन न विबाधसे ६२ क
च्चिदर्थं च कामं च धर्मं च जयतां वर। विभज्य काले कालज्ञ सर्वान्वरद सेवसे ६३ कच्चि
त्ते ब्राह्मणाः शर्म सर्वशास्त्रार्थकोविदः। आशंसते महाप्राज्ञ पौरजानपदैः सह ६४ नास्ति
क्यमनृतं क्रोधं प्रमादं दीर्घसूत्रतां। अदर्शनं ज्ञानवतामालस्यं पंचवृत्तितां ६५ एकचिं
तनमर्थानामनर्थज्ञैश्च मंत्रिणं। निश्चितानामनारंभं मंत्रस्यापरिरक्षणं ६६

विभज्य सेवसे काले पूर्वाह्णेन दुत्तरकालसार्धयामोत्तररात्रिरूपे क्रमेण धर्मार्थकामसेवाकाले ६३
शर्म सुखमाशंसते प्रार्थयंते ६४ प्रमादोनवधानता· दीर्घसूत्रत्वं चिरक्रियः तद्भावः अवश्यकर्त
व्यस्य विचारादिना कालविलंबनं· ज्ञानवतां विदुषामदर्शनं। आलस्यं नित्यकृत्यालस्यं· पंचवृत्तिता·
चक्षुरादिपंचेंद्रियपरवशता ६५ अर्थानां राज्यप्रयोजनामेकेन चिंतनं· अनर्थज्ञैर्विपरीतदर्शिभिः

आढ्यस्य धनिकस्य दुर्गतस्य दरिद्रस्य च व्यसने विवादरूपसंकटे राजकीयैक निवर्त्ये प्राप्ते तव आमात्याः विरागाः संतः विगतधनरागाः संतः अर्थं तयोर्व्यवहारं पश्यंति कच्चित् ॥ ५५ ॥ मिथ्याभिशस्तानां राज्ञा विचार्य निवर्तितमिथ्याभियोगानां प्रजानां यान्यश्रूणि पतंति पदन्यासानीति पाठांतरं तदा जायंते इति शेषः ॥ आर्थं

व्यसने कच्चिदाढ्यस्य दुर्बलस्य च राघव ॥ अर्थं विरागाः पश्यंति तव आमात्या बहुश्रुताः ॥ ५८ ॥
यानि मिथ्याभिशस्तानां पतंत्यश्रूणि राघव ॥ तानि पुत्रपशून् घ्नंति प्रीत्यर्थमनुशासतः ॥ ५९ ॥
कच्चिद् वृद्धांश्च बालांश्च वैद्यान्मुख्यांश्च राघव ॥ दानेन मनसा वाचा त्रिभिरेतैर्बुभूषसे ॥ ६० ॥
कच्चिद् गुरूंश्च वृद्धांश्च तापसान्देवतातिथीन् ॥ चैत्यांश्च सर्वान्सिद्धार्थान्ब्राह्मणांश्च नमस्यसि ॥ ६१ ॥

नपुंसकत्वं तानि प्रीत्यर्थं राज्यभोगजप्रीतिमात्रार्थं राज्यमनुशासतो राज्ञः पुत्रादीन् घ्नंति ॥ ५९ ॥ वैद्याः भिषजः दानमभिमतवस्तु ततः मनः स्नेहयुतं वाक् सांत्वयुता एतैस्त्रिभिः प्रत्येकं बुभूषसे प्राप्तुमिच्छसि वशीकर्तुमिच्छसि संभावयितुमिच्छसि वा कच्चित् ॥ ६० ॥ चैत्यान् चतुष्पथस्थमहावृक्षान् देवतावासभूतान् सिद्धार्थान् विद्यावततपोभिः कृतार्थितजन्मनो ब्राह्मणान् ॥ ६१ ॥

रामा·अ·
२८१·

इंद्रियाणांजयंजयोपायंसचयोगाभ्यासएव॥ षाड्गुण्यंषड्गुणाः संधिर्नोविग्रहोयानमासनंद्वैधमाश्र
यइति॥ द्वैधंशत्रुवर्गाणामुपजापः दैवमानुषंदैवंमानुषंच। व्यसनमित्यर्थः॥ हुताशनोजलंव्याधिर्दु
र्भिक्षंमरकस्तथेत्येतद्दैवं॥ मरकेमरणनिमित्तमार्यादि॥ मानुषंतु॥ आयुक्तकेभ्यश्चोरेभ्यः परेभ्योराज
वल्लभात्॥ पृथिवीपतिलोभाच्चव्यसनंमानुषंत्विदमिति॥ आयुक्तकाअधिकारिणः॥ कृत्यंतु॥ अलब्ध
वेतनोलुब्धोमानीचाप्यवमानितः॥ क्रुद्धश्चकोपितोकस्मात्तथाभीतश्चभीषितः भेद्याः॥ शत्रोरनुचत्वा
रोन्यकृत्यमिदंस्मृतं॥ विंशतिवर्गास्तु॥ असंधेयोविग्राह्यएवसचबालो॥१॥ वृद्धो॥२॥ दीर्घरोगी
॥३॥ तथाज्ञातिबहिष्कृतः॥४॥ भीरुको॥५॥ भीरुजनको॥६॥ लुब्धो॥७॥ लुब्धजनस्तथा॥८॥ विरक्तप्रकृति
॥९॥ श्चैवविषयेष्वतिसक्तिमान्॥१०॥ अनेकचित्तमंत्र॥११॥ श्चदेवब्राह्मणनिंदकः॥१२॥ दैवोपहतक
॥१३॥ श्चैवदैवचिंतकएवच॥१४॥ दुर्भिक्षव्यसनोपेतः॥१५॥ बलव्यसनसंयुतः॥१६॥ अदेशस्थो॥१७॥ बहुरि
पुः॥१८॥ युक्तोऽकालेनयश्चसः॥१९॥ सत्यधर्मारतश्चैव॥२०॥ विंशतिः पुरुषाश्चमी॥ एतैः संधिंनकुर्वी
तविग्रहीस्यात्तुकेवलमिति॥ कृत्यकास्तु॥ राज्यस्त्रीस्थानदेशानांज्ञातिधनयोश्चयस्यापहारस्ते
षट्॥ मदमानदेशपीडावंतस्त्रयः ज्ञानार्थशक्तिधर्माणांयेषांविद्यातस्तेचत्वारः दैवचिंतकः॥१४॥
रिपुमित्रावमंतरौ॥१६॥ बंधुविनाशनंयस्य॥१७॥ लोकानुग्रहरहितः॥१८॥ दूषितमंडलः॥१९॥ एका
र्थाभिनिवेशित्वंयस्य॥२०॥ एतेविग्राह्याएवेत्याहुः॥ प्रकृतयश्चमंडलंचप्रकृतिमंडलंप्रकृतिव
र्गस्तु॥ अमात्योराष्ट्रंदुर्गाणिकोशोदंडश्चपंचमः एताः प्रकृतयस्त्वङ्गं विजिगीषोरुदाहृताइति॥
मंडलंद्वादशराजमंडलंतत्रविजिगीषुर्मध्ये॥ अरिर्मित्रमरेर्मित्रंमित्रामित्रमतः परं॥ मित्रारिमित्रंचावि

२०७

रामः
२८१

मंगलस्यादौप्रातःकालेअप्रयोगमननुष्ठानंसर्वतःप्रत्युत्थानंसर्वदिगवस्थितरिपूद्देशेनयुगपद्दंडयात्राभि
त्यर्थइतितीर्थः कंचनप्रत्युत्थानायोग्यंपुरुषमुद्दिश्यापिप्रभावमुक्त्वाचापल्यादासनात्त्वलनमित्यर्थइ
तिकतकः ॥६७॥ दशवर्गादीन्बुद्ध्वायथावदनुमन्यसे तेषुत्याज्यांशमुपादेयांशंचज्ञात्वानुजानासीति
तृतीयस्थेनसंबंधः दशवर्गस्तु मृगयाक्षौ ॥२॥ दिवास्वापः ३ परिवाद ॥४॥ स्त्रियोमदः ॥५॥ तौर्यत्रिकं ॥९॥
वृथाट्याच ॥१०॥ कामजोदशकोगणइतिमनूक्तः तौर्यत्रिकं ॥ नृत्यगीतवाद्यं वृथाट्यावृथापर्यटनं पंचवर्गस्तु

मंगलाद्यप्रयोगंचप्रत्युत्थानंचसर्वतः॥ कच्चित्त्वंवर्जयस्येतान्राजदोषांश्चतुर्दश ॥६७॥ दशपंच
चचतुर्वर्गान्सप्तवर्गंचतत्त्वतः॥ अष्टवर्गंत्रिवर्गंचविद्यास्तिस्रश्चराघव ॥६८॥ इंद्रियाणांजयं
बुध्वाषाड्गुण्यंदैवमानुषं॥ कृत्यंविंशतिवर्गंचतथाप्रकृतिमंडलं ॥६९॥

औदकंपार्वतंवार्क्षमैरिणं
धान्वनंतथा इति दुर्गंपंचविधं पंचवर्गः उदात्तः इरिणंसर्वसस्यशून्यप्रदेशः तत्संबंधिदुर्गमैरिणं
तस्यापिपरैर्गंतुमशक्यत्वात् धान्वनं उदकाल्पदुर्गंभवति चतुर्वर्गस्तु सामदानंचभेदश्चदंडश्चेतिच
तुर्गुणः सप्तवर्गस्तु स्वाम्यमात्यश्चराष्ट्रंचदुर्गकोशौबलंसुहृत् परस्परोपकारीदंराज्यंसप्तांगमुच्य
ते ॥ अष्टवर्गस्तु पैशुन्यंसाहसंद्रोहमीर्ष्यासूयार्थदूषणं वाग्दंडयोश्चपारुष्यंक्रोधजोपिगणोऽष्टक
इति कृषिर्वाणिज्यंदुर्गंसेतुःकुंजरबंधनंखन्याकरकरादानंशून्यनिवेशनानि अष्टवर्गइतिनीतिः त्रिवर्गो
धर्मार्थकामाः उत्साहप्रभुमंत्रशक्तित्रयंवातिस्रोविद्याः त्रयीवार्तादंडनीतिः त्रयीवेदत्रयी वार्ता

यथोद्दिष्टं नीतिशास्त्रोक्तमंत्रविचारमार्गमनतिक्रम्येत्यर्थः यथोद्दिष्टैरिति पाठे मंत्रिलक्षणलक्षितैरित्य
र्थः ॥ व्यस्तैरेकैकशः एवं हि तत्तन्मनः परिज्ञानं भवति त्रिभिश्चतुर्भिरित्यनेन बहुभिर्नैकेनेति सूचि
तं ७१ ॥ वेदाः सफलास्तद्धि हितकर्मप्रवृत्त्या क्रिया राजकार्याणि तत्तदुद्देश्यफलयुक्तानि· यद्वा क्रि

मंत्रिभिस्त्वं यथोद्दिष्टं चतुर्भिस्त्रिभिरेव वा ॥ कच्चित्समस्तैर्व्यस्तैश्च मंत्रं मंत्रयसे बुध ॥ ७१ ॥
कच्चित्ते सफला वेदाः कच्चित्ते सफलाः क्रियाः ॥ कच्चित्ते सफला दाराः कच्चित्ते सफलं श्रुतं ७२
कच्चिदेषैव ते बुद्धिर्यथोक्ता मम राघव ॥ आयुष्या च यशस्या च कामधर्मार्थसंहिता ७३ ॥ यां वृ
त्तिं वर्तते तातो यां च नः प्रपितामहाः ॥ तां वृत्तिं वर्तसे कच्चिद्या च सत्पथगा शुभा ॥ ७४ ॥ कच्चि
त्स्वादुकृतं भोज्यमेको नाश्नासि राघव ॥ कच्चिदाशंसमानेभ्यो मित्रेभ्यः संप्रयच्छसि ॥ ७५ ॥
राजा तु धर्मेण हि पालयित्वा महीपतिर्दंडधरः प्रजानां ॥ अवाप्य कृत्स्नां वसुधां यथावदितश्च्यु
तः स्वर्गमुपैति विद्वान् ॥ ७६ ॥ इत्यार्षे श्रीरा॰ अयो॰ शततमः सर्गः ॥ १०० ॥

यासंपादितधनादी
नि क्रियाः तेषां सफलत्वं च दानभोगाभ्यां - दाराणां सफलत्वं धर्मरतिप्रजाभिः श्रुतसाफल्यं विनी
तत्वं ७२ ॥ उक्ता एषा बुद्धिर्यथा मम तथैव तवापि वर्तते कच्चित् · कच्चिदेषैवेति पाठांतरं ७३ ॥ स
त्पथगा शिष्टानुष्ठानमार्गा ॥ ७४ ॥ स्वादुकृतं स्वादुतया कृतं सिद्धं· आशंसमानेभ्यः स्नेहवद्भ्यः प्र
तयेच्छद्भ्यः मित्रेभ्यः स्निग्धेभ्यः ७५ ॥ महीपतिः राजा क्षत्रियः इतश्च्युतः एतद्देहलोकाभ्यां ७६ ॥

पुरःसरः पार्ष्णिग्राहस्ततः पश्चादाक्रंदस्तदनंतरं आसारावनयोश्चैव विजिगीषोस्तत्पश्चात् आसारौ पार्ष्णि
ग्राहासारा क्रंदासारावितिः आसारपश्चभागस्थौ मध्यमोदासिनावितिः अरेश्च विजिगीषोश्च मध्य
मो भूम्यनंतरः अनुग्रहे संहतयोर्व्यस्तयोर्निग्रहे प्रभुरितिः मंडलाद् बहिरेतेषामुदासीनो बलाधिकः
अनुग्रहे संहतानां व्यस्तानां च वधे प्रभुरिति ६९ मिति यात्रा यानं तच्च पंचविधं विगृह्य संधाय यत
धा संभूयाथ प्रसंगतः उपेक्ष्य चेति निपुणैर्यानं पंचविधं स्मृतं बलवत्तया पार्ष्णिग्राहादिभिर्विगृह्य
अन्यत्र शत्रौ यानं विगृह्य यानं १ तैः संधायान्यत्र यानं संधाय यानं २ सामंतैः सह यानं संभूय

यात्रा दंडविधानं च द्वियोनी संधिविग्रहौ कच्चिदेतान्महाप्राज्ञ यथावदनुमन्यसे ७०

यानं ३ अन्योद्देशेन यात्रा प्रसंगमुत्पाद्यान्यं प्रति यानं प्रसंग यानं ४ बलवत्तया शत्रुमुपेक्ष्यान्यस्य
मित्रेषु यानमुपेक्ष्य यानं ५ दंडविधानं दंडः सेना तद्विधानं व्यूहरचना दंडो धर्मो मानभेदेत्कु
टमदसैन्ययोः द्वियोनी संधिविग्रहावितिः संधिविग्रहयानेत्यादि षट्गुणानां मध्ये संधिविग्र
हो द्वयोर्योनीनत्र द्वैधीभावसमाश्रयौ संधियोनिको यानासने विग्रहयोनिके इति भेदः तत्र
द्वैधीभावो नाम बलिनो द्विषतो मध्ये वाचात्मानं समर्पयन् द्वैधीभावेन वर्तेत काकाक्षिवदलक्षि
तमितिः अरिभिः पीड्यमानस्य बलवदाश्रयणं समाश्रयः कालप्रतीक्षया तूष्णीमवस्थानमासनं ७०

रामा॰अ॰ २८६

एवंपितृमरणोऽकृतेतदुचितकल्पेकृतेततःपरंयद्धृकृष्यंतत्संक्षेपेणाधुनैवब्रूतेभरतःतस्यमेइतिकैकेयीपुत्रत्वात्प्राप्तापवादस्यराज्येनराज्यनिमित्तं॥८॥यस्मान्मातरोवयंचसर्वेत्वत्प्रसादनार्थमागताः ९
यतश्चत्वमानुपूर्व्याज्येष्ठत्वलक्षणयायुक्तःयतश्चात्मनित्वयिअभिषेचनंयुक्तंतस्माद्धर्मेणराज्यं

तस्यमेदासभूतस्यप्रसादंकर्तुमर्हसि॥अभिषिंचस्वचाद्यैवराज्येनमघवानिव८इमाः
प्रकृतयःसर्वाविधवामातरश्चयाः॥त्वत्सकाशमनुप्राप्ताः२प्रसादंकर्तुमर्हसि९॥तथा
नुपूर्व्यायुक्तश्चयुक्तंचात्मनिमानद॥राज्यंप्राप्नुहिधर्मेणसकामान्सुहृदःकुरु१०भवत्व
विधवाभूमिःसमग्रापतिनात्वया॥शशिनाविमलेनेवशारदीरजनीयथा११॥भिश्चस
चिवैःसार्धंशिरसायाचितोमया॥भ्रातुःशिष्यस्यदासस्यप्रसादंकर्तुमर्हसि॥१२॥तदिदं
शाश्वतंपित्र्यंसर्वंसचिवमंडलं॥पूजितंपुरुषव्याघ्रनातिक्रमितुमर्हसि॥१३॥एवमु
क्त्वामहाबाहुःसबाष्पःकैकयीसुतः॥रामस्यशिरसापादौजग्राहभरतःपुनः१४तंमत्त
मिवमातंगंनिश्वसंतंपुनःपुनः॥भ्रातरंभरतंरामःपरिष्वज्येदमब्रवीत्१५॥

२७७

प्राप्नुहि॥१०॥रजनीयथातादृशीभूमिःशशिनेवत्वयायुताऽविधवाभवतुइत्यन्वयःपतिनेत्या
र्षं॰विमलेनेतिपाठांतरं॥११॥१२॥शाश्वतंपरंपराप्राप्तं॰सचिवमंडलंतत्प्रार्थनं॰पूर्वंसदापूजि
तंसफलंकृतंतदिदानीमतिक्रमितुंनार्हसि॥१३॥१४॥मत्तमथाप्यकस्मात्प्राप्तदुःखेननिश्वसं

राम २८६

एवंकच्चित्प्रश्नानंतरस्वस्यराजत्वाभावंसूचयितुंतदुत्तरमप्रयच्छंतंभरतंप्रतिरामेणागमनप्रयोजन
प्रश्नःनंत्विति· समाज्ञाय· कुशलप्रश्नव्याजेनसर्वधर्मान्ज्ञापयित्वा· यद्वाप्राप्तराज्यपरित्यागेनज
टादिधारणेनगुरौस्वस्मिन्भक्तियुतंज्ञात्वा॥१॥यस्मात्वमिमंदेशंचीरजटाजिनीभूत्वाआगतोसितस्मा
देवंरूपेणागमनकिंकारणकमितित्वयाप्रस्पष्टंवक्तव्यात्तच्छ्रोतुमहमिच्छेयं॥२॥एतस्यैवश्लोकस्यव्याख्या

तंतुरामःसमाज्ञायभ्रातरंगुरुवत्सलं॥लक्ष्मणेनसहभ्रात्राप्रष्टुंसमुपचक्रमे॥१॥किमेतदिच्छे
यमहंश्रोतुंप्रव्याहृतंत्वया॥यस्मात्त्वमागतोदेशमिमंचीरजटाजिनी॥२॥यन्निमित्तमिमंदेशं
कृष्णाजिनजटाधरः॥हित्वाराज्यंप्रविष्टस्त्वंतत्सर्वंवक्तुमर्हसि॥३॥इत्युक्तःकैकयीपुत्रःका
कुत्स्थेनमहात्मना॥प्रगृह्यबलवद्भूयःप्रांजलिर्वाक्यमब्रवीत्॥४॥आर्यतातःपरित्यज्यकृ
त्वाकर्मसुदुष्करं॥गतःस्वर्गंमहाबाहुःपुत्रशोकाभिपीडितः॥५॥स्त्रियानियुक्तःकैकेय्याममम
मात्रापरंतप॥चकारसामहत्पापमिदमात्मयशोहरं॥६॥साराज्यफलमप्राप्यविधवाशोकक
र्षिता॥पतिष्यतिमहाघोरेनरकेजननीमम॥७॥

ने·यदिति॥३॥प्रगृह्यबलवत्यथातथाशो
कंनिगृह्येत्यर्थः॥४॥पूर्वंपृष्टमेवार्थंकृच्छ्रेणभ्रात्पितेत्येवंरूपंभंगंपतनरेणपुनःपृष्टंज्ञात्वातदुत्तरमा
ह·आर्येति·परित्यज्यअस्मान्सर्वान्इमंचलोकमितिशेषः आर्यंपरित्येतिपाठे·विवास्येत्यर्थः सु
दुष्करंकर्मज्येष्ठार्हराज्यंकनिष्ठसात्कृत्वा॥५॥ममममात्राकैकेय्यानियुक्तइतिपूर्वश्लोका·न्वयि·सा

त्वयाराज्यंप्राप्तव्यं॰ ॥मयादंडकेवस्तव्यं॥२३॥एवंरूपंविभागं॰ लोकसन्निधौ॰ मंत्रिपुरोहितादिजनसन्नि
धौउक्त्वातान्नेवंविभागंकुरुतेतिव्यादिश्यपचआज्ञाप्यचदिवंगतइत्यन्वयः॥२४॥यथाभागंपितृक
ल्पितंचतुर्दशवर्षपर्यंतं॰ ॥अनेनतदनंतरमहंमोक्ष्यामीतिसूचितं॰ ।मात्रापिचतुर्दशवर्षपर्यंतंवन
वासएववृत्तः॥नतुसर्वथामेराज्यत्यागःपित्रापितावदेवानुमतमितिभावः।२५॥पितामहात्माब्रह्म
णानुल्यः॥अव्ययंसर्वलोकेश्वरत्वंब्रह्मत्वं॰ पित्रनुमतमितिशेषःनहितमित्यन्वयःननुपित्

त्वयाराज्यमयोध्यायांप्राप्तव्यंलोकसत्कृतं॥वस्तव्यंदंडकारण्येमयावल्कलवाससा॥२३॥
एवमुक्त्वामहाराजोविभागंलोकसन्निधौ॥व्यादिश्यचमहाराजोदिवंदशरथोगतः॥२४॥स
चप्रमाणंधर्मात्माराजालोकगुरुस्तव॥पित्रादत्तंयथाभागमुपभोक्तुंत्वमर्हसि॥२५॥यदब्र
वीन्मांनरलोकसत्कृतःपितामहात्माविबुधाधिपोपमः॥तदेवमन्येपरमात्मनोहितंनसर्व।
लोकेश्वरभावमव्ययं॥२६॥इत्यार्षेश्रीरा॰ अयो॰ एकोत्तरशततमःसर्गः॥१०१॥

मरणश्रवणोत्तरंशोकमुत्सृज्याभिषेकप्रत्याख्यानमेवकुतइतिचेत्तत्राह॰ भरतस्याभिषेककरण
प्रत्याशावारणाय कैकेय्यालोकानांचान्यथासंभावनावारणायशोककालेपिधैर्यमवलंब्यतत्कार
णंशोककालेप्येवंधैर्यंकर्तव्यमितिलोकोपदेशायेति॰ ।ममप्रतिभाति॰ तीर्थस्तु॰ पूर्वंनस्वर्गंगतः
मृतकल्पःविधवास्तत्कल्पाइत्यर्थे मत्वामरणनिश्चयाभावेनराज्यस्वीकारायैवराजानंमृतकल्पंवदतीतिबुध्या॥

पापंपित्राज्ञाभंगरूपं ॥१६॥ बाल्यादज्ञानात् ॥१७॥ कथंकेकेयीगर्हणमज्ञानमूलंतत्राह॰ कामकारइति॰ स्व
च्छंदाचरणमित्यर्थः स्वेच्छयानियोजनमितियावत्॰ गुरूणांपित्रादीनांउपपन्नेषुसंमतेषु दारेषुपुत्रे
षुचकामकारोविधीयतइतिसंबंधः ॥१८॥ ततः किमतआह॰ भार्यापुत्राः शिष्याश्चलोकेसाधुभिर्य

कुलीनः सत्वसंपन्नः तेजस्वीचरितव्रतः ॥ राज्यहेतोः कथंपापमाचरेन्मद्विधोजनः ॥१६॥
नदोषंत्वयिपश्यामिसूक्ष्ममप्यरिसूदन ॥ नचापिजननींबाल्यात्त्वंविगर्हितुमर्हसि ॥१७॥
कामकारोमहाप्राज्ञगुरूणांसर्वदानघ ॥ उपपन्नेषुदारेषुपुत्रेषुचविधीयते ॥१८॥ वयम
स्ययथालोकेसंख्याताःसौम्यसाधुभिः ॥ भार्याःपुत्राश्चशिष्याश्चत्वमपिज्ञातुमर्हसि ॥१९॥
वनेवाचीरवसनंसौम्यकृष्णाजिनांबरं ॥ राज्येवापिमहाराजोमांवासयितुमीश्वरः ॥२०॥
यावत्पितरिधर्मज्ञगौरवंलोकसत्कृते ॥ तावद्धर्मकृतांश्रेष्ठ जननत्यामपिगौरवं ॥२१॥ ए
ताभ्यांधर्मशीलाभ्यांवनंगच्छेतिराघव ॥ मातापितृभ्यामुक्तोहंकथमन्यत्समाचरे ॥२२॥

ष्याःसमाख्याताइच्छाविनियोगार्हतयातथास्यराज्ञोवयंसर्वेइति॰ त्वमपिज्ञातुमर्हसि ॥१९॥ प्रकृ
तेकिंतत्राह॰ वनेइत्यादि ॥२०॥ प्रकृतमंबागर्हाभावमुपसंहरति ॥ यावदिति॰ तावत् तावत्परि
माणकमित्यर्थः अतःकैकेय्याअप्यस्मन्नियोजनेतथैवाधिकारइतिभावः ॥२१॥ समाचरेसमाचरि
ष्यामि ॥२२॥

त्क्रमपि राजमरणं॰ रामेण विषयांतरोत्तरदानादश्रुतमिव मत्वा पुनस्तदेवाह केकयस्थेइति॰ सतां मतः सद्भिः पूज्यमानः ॥ ५ ॥ ६ ॥ कृतोदकाविति॰ कृतसपिंडीकरणानसर्वक्लृप्तौ ॥ ७ ॥ नहिं किंकृतकरणेनेत्यत आह प्रियेणेति॰ भवान्प्रियो ज्येष्ठत्वादितिभावः ॥ ८ ॥ प्रकारांतरेणापि प्रियत्वमेवोपपाद

केकयस्थे च मयि तु त्वयि चारण्यमाश्रिते ॥ धीमान्स्वर्गगतो राजा यायजूकः सतां मतः ॥ ५ ॥
निष्क्रांतमात्रे भवति सहसीते सलक्ष्मणे ॥ दुःखशोकाभिभूतस्तु राजा त्रिदिवमभ्यगात् ॥ ६ ॥
उत्तिष्ठ पुरुषव्याघ्र क्रियतामुदकं पितुः ॥ अहं चायं च शत्रुघ्नः पूर्वमेव कृतोदकौ ॥ ७ ॥ प्रियेण किल दत्तं हि पितृलोकेषु राघव ॥ अक्षय्यं भवतीत्याहुर्भवांश्चैव पितुः प्रियः ॥ ८ ॥ त्वामेव शोचंस्तव दर्शनेप्सुस्त्वय्येव सक्तामनिवर्त्य बुद्धिं ॥ त्वया विहीनस्तव शोकरुग्णस्त्वां संस्मरन्नेव गतः पिता ते ॥ ९ ॥ इत्यार्षे श्रीरामायणे अयोध्याकांडे द्व्युत्तरशततमः सर्गः ॥ १०२ ॥
तां श्रुत्वा करुणां वाचं पितुर्मरणसंहितां ॥ राघवो भरतेनोक्तां बभूव गतचेतनः ॥ १ ॥ तं तु वज्रमिवोत्सृष्टमाहवे दानवारिणा ॥ वाग्वज्रं भरतेनोक्तममनोज्ञं परंतपः ॥ २ ॥

यति॰ त्वामेवेति॰ ॥ त्वच्छोकरुग्णादित्यनेन त्वच्छोक एव तदवसादहेतुरिति दर्शितं ॥ ९ ॥ इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके अयोध्याकांडे द्व्युत्तरशततमः सर्गः ॥ १०२ ॥ करुणां शोकवहां ॥ १ ॥ तं भरतोक्तं ॥ वाग्वज्रं रणे इंद्रोत्सृष्टवज्रतुल्यं श्रुत्वा ॥ २ ॥

शोकाकरणपूर्वकमभिषेकप्रत्याख्यानंकृतवान् स्ववाक्ये दिवंगतइत्यत्राप्येवमेवेत्याह कृतकृत्यः गतः
स्वर्गइतिभरतेनोक्तेपितृमरणोचितसर्वकार्यकरणोवृत्तेभरतस्तस्यमेइत्याद्युक्तवान् कविस्तुसंक्षेपेण
दावुक्त्वाग्रेविस्तरेणवदतीतिप्रायः कवेःस्वभावइत्याह॥२६॥ इतिश्रीअयोध्याकांडेएकोत्तरशततमः
सर्गः॥१०१॥ अथभरतःपितृवृत्तांतप्रश्नोत्तरमुक्त्वाकांश्चित्प्रश्नोत्तरमाह रामस्येति धर्मात्त्‌राज्यायो
ग्यत्वेनराजधर्मोइत्याद्दिहीनस्यत्वत्पक्षराज्यधर्मोमेक्वोपयुक्तःअनुपनीततयागवत्‌ आनोऽनवस

रामस्यवचनंश्रुत्वाभरतःप्रत्युवाचह॥ किंमेधर्माद्विहीनस्यराजधर्मःकरिष्यति॥१॥ शाश्व
तोयंसदाधर्मःस्थितोस्मासुनरर्षभ ज्येष्ठे पुत्रेस्थितेराजानकनीयान्भवेन्नृप॥२॥ ससमृद्धांम
यासार्धमयोध्यांगच्छराघव॥ अभिषेचयचात्मानंकुलस्यास्यभवायनः॥३॥ राजानंमानुषं
प्राहुर्देवत्वेसंमतोमम॥ यस्यधर्मार्थसहितंवृत्तमाहुरमानुषं॥४॥

रदुस्थोयंमयिकश्चिदादि
प्रश्नइतिभावः॥१॥ कुतस्तेअक्तधर्माभावोऽनआह शाश्वतइति शाश्वतःकुलक्रमादागतः अस्मा
सुअस्मत्पूर्वेषुसदासर्वदायथेतिपाठेयथाशास्त्रंस्थितःप्रतिष्ठितः अयंकस्तत्राह ज्येष्ठइति ए
वंचकनीयस्त्वान्मेनराजत्वमितिभावः॥२॥ यदेवमतःसइति गच्छआगच्छभवायअभ्युदयाय॥३॥
ननुदेवत्वप्रापकंतपोविहायकिंमेराज्येनतत्राह राजानमिति सर्वेजनायद्यपिराजानंमानुषंप्रा
हुस्तथापिममसदेवत्वेसंमतःनत्वहंतुमाह यस्येति अमानुषंमनुष्येऽसंभावितमित्यर्थः॥४॥

सुवृत्तंशोभननियोगाचरणं॰ कुतःपुरुषात् ॥१३॥१४॥ अभेत्यअभिमुखोभूत्वा॰ स्वर्गतिरूपंदुःखं ॥१५॥१६॥ क्रिय
तामितिअब्रुवन् ॥१७॥१८॥१९॥ इंगुदीपिण्याकं॰ तपस्विभोज्यतापसतरुफलपिण्याकं॰ अनिःसारितनैल

पुराभेद्यसुवृत्तंमां पितायान्याह सांत्वयन् ॥ वाक्यानि तानिश्रोष्यामि कुतःकर्णसुखान्यहं ॥१३॥ एव
मुक्त्वाथभरतोभार्यामभ्येत्य राघवः ॥ उवाचशोकसंतप्तः पूर्णचंद्रनिभाननां ॥१४॥ सीतेमृतस्तेश्व॰
श्रुरः पितृहीनोसिलक्ष्मण ॥ भरतोदुःखमाचष्टे स्वर्गतिं पृथिवीपतेः ॥१५॥ ततो बहुगुणं तेषां बा
ष्पंनेत्रेष्वजायत ॥ तथाब्रुवति काकुत्स्थे कुमाराणां यशस्विनां ॥१६॥ ततस्तेभ्रातरः सर्वेभृश
माश्वास्यदुःखितं ॥ अब्रुवन्जगतीभर्तुः क्रियतामुदकंपितुः ॥१७॥ सासीतास्वर्गतंश्रुत्वाश्व
श्रुरं तं महान्रृपं ॥ नेत्राभ्यामश्रुपूर्णाभ्यां नशशाकेक्षितुंप्रियं ॥१८॥ सांत्वयित्वातु तां रामो रुदंतीं
जनकात्मजां ॥ उवाचलक्ष्मणं तत्र दुःखितो दुःखितंवचः ॥१९॥ आनयेंगुदिपिण्याकं चीरमाह
रचोत्तरं ॥ जलक्रियार्थंतातस्य गमिष्यामि महात्मनः ॥२०॥ सीता पुरस्तात्व्रजतु त्वमेनामभि
तोव्रज ॥ अहं पश्चाद्गमिष्यामि गतिर्ह्येषासुदारुणा ॥२१॥ ॥ राम ॥ ॥

पिष्टाच्चूर्णीकृतमिंगुदावीजमत्र पिण्याकत्वेनोपचर्यते॰ निःसारितसारस्यतस्यनिषिद्धत्वात्॰उ
त्तरंमुत्तमंनवीनंचीरं ॥२०॥ अभितःपश्चात्एषागतिःसुदारुणादारुणशोकात्मिकी॰ तदुक्तं॰ सर्वे
कनिष्ठप्रथमाइतरेतुस्त्रियोग्रतइतिअशौचस्नानप्रकरणे ॥२१॥ राम

बाहुप्रगृह्यअतिशिथिलीकृत्वाउच्छ्रित्यवा निष्पीड्यवा भुविपपातभरतादिदर्शनेनहर्षात्पुष्पितांगद्रुमसादृश्यं

३॥४॥सिषिचुः मोहशांतयेसर्वगात्राणिजलेनसिषिचुः॥५॥कृपणांभाषितुंलोकानुसारेणविलपितुमित्यर्थः॥६॥७॥

प्रगृह्यरामोबाहुर्वैपुष्पितांगइवद्रुमः॥वनेपरशुनाकृत्तस्तथाभुविपपातह॥३॥तथाहिपतितंरा

मंजगत्यांजगतीपतिं॥कूलघातपरिश्रांतंप्रसुप्तमिवकुंजरं॥४॥भ्रातरस्तेमहेष्वासंसर्वतःशो

ककर्षितं॥रुदंतःसहवैदेह्यासिषिचुःसलिलेनवै॥५॥सतुसंज्ञांपुनर्लब्ध्वानेत्राभ्यामस्रमुत्सृ

जन्॥उपक्रामतकाकुत्स्थःकृपणंबहुभाषितुं॥६॥सरामःस्वर्गतंश्रुत्वापितरंपृथिवीपतिं॥

उवाचभरतंवाक्यंधर्मात्माधर्मसंहितं॥७॥किंकरिष्याम्ययोध्यायांतातेदिष्टांगतिंगते॥कस्तां

राजवराद्धीनामयोध्यांपालयिष्यति॥८॥किंनुतस्यमयाकार्यंदुर्जातेनमहात्मनः॥योमृतो

ममशोकेनसमयानचसंस्कृतः॥९॥अहोभरतसिद्धार्थोयेनराजात्वयानघ॥शत्रुघ्नेनच

सर्वेषुप्रेतकृत्येषुसत्कृतः॥१०॥निःप्रधानामनेकाग्रांनरेंद्रेणविनाकृतां॥निवृत्तवनवासो

पिनायोध्यांगंतुमुत्सहे॥११॥समाप्तवनवासंमामयोध्यायांपरंतप॥कोनुशासिष्यतिपुनस्तातेलो

कांतरंगते॥१२॥

दिष्टांगतिंदैवकल्पितांगतिंस्वसुकृतानिसृष्टांवा॥८॥दुर्जातेनवृथाजन्मना॥९॥सत्कृतःसंस्कारकर्म

णापूजितः॥१०॥निःप्रधानांप्रधानहीनां अतएवानेकाग्रांबहुनायकां अत्रोभयत्रहेतुर्नरेंद्रेणविनाकृ

तामिति॥११॥अनुशासिष्यतिहिताहितविषयप्रवृत्तिनिवृत्तीकारयिष्यति॥१२॥

प्रत्युत्तीर्यतीरमागत्य निर्वापं चकार पिंडं ददौ॥ नच यदा कदाचित्पितुर्मरणे श्रवणो पुत्रस्य दशाहाशौच तायाः स्मृतिषु उक्तत्वेन कथं कृतक्रियस्य पितुः प्रथमदिन एव पिंडदान मिति वाच्यं॥ तस्याः स्मृतेः क्षत्रियेतर विषयत्वात्॥ कलिविषयत्वाद्वा न दोषः॥ २८॥ ऐंगुदं इंगुदी बीजसं बंधि बदरैः बदरफलैः॥ २९॥ न

ततो मंदाकिनी तीरं प्रत्युत्तीर्य सराघवः॥ पितुश्चकार तेजस्वी निर्वापं भ्रातृभिः सह॥ २८॥
ऐंगुदं बदरैर्मिश्रं पिण्याकं दर्भसंस्तरे॥ न्यस्य रामः सुदुःखार्त्तो रुदन्वचनमब्रवीत्॥ २९॥
इदं भुंक्ष्व महाराज प्रीतो यदशना वयं॥ यदन्नः पुरुषो भवति तदन्नास्तस्य देवताः॥ ३०॥
ततस्तेनैव मार्गेण प्रत्युत्तीर्य सरित्तटात्॥ आरुरोह नरव्याघ्रो रम्यसानुं महीधरं॥ ३१॥
ततः पर्णकुटीद्वारमासाद्य जगतीपतिः॥ परिजग्राह पाणिभ्यामुभौ भरतलक्ष्मणौ॥ ३२॥
तेषां तु रुदतां शब्दात्प्रतिशब्दोभवद्गिरौ॥ भ्रातॄणां सह वैदेह्या सिंहानां नर्दतामिव॥ ३३॥
महाबलानां रुदतां कुर्वतामुदकं पितुः॥ विज्ञाय तुमुलं शब्दं त्रस्ता भरतसैनिकाः॥ ३४॥

नु राज्ञे कथं पिण्याकपिंडदानं॥ तत्राह॥ यदशना इत्यस्य तदशना त्वस्मत्पितर इति शेषः॥ तत्र सामान्येनार्थांतरन्यासमाह॥ यदन्न इति॥ ३०॥ प्रत्युत्तीर्य परावृत्य॥ ३१॥ ३२॥ प्रतिशब्दः प्रतिध्वनिः॥ प्रतिश्रुत्त्वेति पाठेप्ययमेवार्थः॥ ३३॥ त्रस्ताः का विपत्प्रादुरभूदिति भीताः॥ ३४॥

नित्यानुगः कुलक्रमागतानुचरः विदितात्माज्ञातात्मस्वरूपः तेषांकुमाराणां ॥ २२ ॥ अवतारयत् अवता
रयत् ॥ २३ ॥ तेसीतादयः ॥ २४ ॥ अकर्दमंतीर्थं अवतारमार्गं ततएतद्भवत्वित्यक्त्वार्यसिषिचुर्ददुः नैतत्त्व
तत्पितुर्नामगोत्ररूपोपलक्षणं बोधं संबोधनेप्लुतकरणादसंधिः केचित्तुतनेत्यक्त्वोनामाद्युच्चारण

ततोनित्यानुगस्तेषांविदितात्मामहामतिः ॥ मृदुर्दांतश्चकांतश्चरामेचदृढभक्तिमान् ॥ २२ ॥ सु
मंत्रस्तैर्नृपसुतैः सार्धमाश्वास्यराघवं ॥ अवतारयदालभ्यनदींमंदाकिनींशिवां ॥ २३ ॥ तेसु
तीर्थांततः कृच्छ्रादुपगम्ययशस्विनः ॥ नदींमंदाकिनींरम्यांसदापुष्पितकानना ॥ २४ ॥ शीघ्र
स्रोतः समासाद्यतीर्थंशिवमकर्दमं ॥ सिषिचुस्तूदकंराज्ञेततएतद्भवत्विति ॥ २५ ॥ प्रगृह्य
तुमहीपालेजलपूरितमंजलिं ॥ दिशंयाम्यामभिमुखोरुदन्वचनमब्रवीत् ॥ २६ ॥ एत
त्तेराजशार्दूलविमलंतोयमक्षयं ॥ पितृलोकगतस्याद्यमद्दत्तमुपतिष्ठतु ॥ २७ ॥ ॥

स्यनप्रयोजनमस्मादेवाचारादित्याहुः ॥ २५ ॥ एतदेवविवरणोतिः प्रगृह्येति ॥ याम्यांदक्षिणां ॥ यत्त्वाधुनिक
निबंधेषुसुमंत्रुनाम्नालिखितंवचनंक्षत्रियाणांसुदर्भ्नुखजलदानबोधकंतन्निर्मूलं ॥ एतदाचारवि
रोधात् ॥ निकृष्टक्षत्रियपरंवा ॥ रुदन्नित्यनेनपित्रादिविषयेरोदनेननिषेधइतिसूचितं ॥ २६ ॥ २७ ॥

४४।४५।४६।पर्यष्वजतपरिष्वंगयोग्यानीतिशेषः।४७।तदेवाह सतत्रेति।४८।अनुविनादयन्प्र
तिध्वनयन्।४९।अत्रकतकसंख्यारीत्याश्लोकद्वयंगतं।इतिश्रीरामाभिरामेश्रीरामीयेरामायण

तेनशब्देनवित्रस्तैः आकाशंपक्षिभिर्वृतं।मनुष्यैरावृताभूमिरुभयंप्रबभौतदा।४४।तत
स्तंपुरुषव्याघ्रंयशस्विनमकल्मषं।आसीनंस्थंडिलेरामंददर्शसहसाजनः।४५।विग
र्हमाणाःकैकेयींमंथरासहितामपि।अभिगम्यजनोरामंबाष्पपूर्णमुखोभवत्।४६।ता
न्नरान्बाष्पपूर्णाक्षान्समीक्ष्याथसुदुःखितान्।पर्यष्वजतधर्मज्ञःपितृवन्मातृवच्चसः।४७।
सतत्रकांश्चित्परिषस्वजेनरांश्चराश्चके चित्तुतमभ्यवादयत्।चकारसर्वान्सवयस्य
बांधवान्यथार्हमासाद्यतदानृपात्मजः।४८।ततःसतेषांरुदतांमहात्मनांभुवंचखंचा
नुविनादयन्स्वनः।गुहागिरीणांचदिशश्चसंततंमृदंगघोषप्रतिमोविशुश्रुवे।४९।इ
त्यार्षेश्रीरा॰अयो॰त्र्युत्तरशततमःसर्गः।१०३।वसिष्ठःपुरतःकृत्वादारान्दशरथ
स्य च।अभिचक्रामतंदेशंरामदर्शनतर्षितः।१।राजपत्न्यश्चगच्छंत्योमंदंमंदाकिनींप्रति
ददृशुस्तत्रतत्तीर्थंरामलक्ष्मणसेवितं।२।कौसल्याबाष्पपूर्णेनमुखेनपरिशुष्यता।सुमि
त्रामब्रवीद्दीनांयाश्चान्याराजयोषितः।३।

तिलके अयोध्याकांडे त्र्युत्तरशततमःसर्गः।१०३

दशरथस्यदारानित्यन्वयः।तर्षितःसाभिलाषः।१।तीर्थमवतारमार्गं।२।३।

ततोनिश्चित्याब्रुवन्नइति ॥३५॥ स्वनमभिमुखाः स्वनोत्पत्तिदिशमभिमुखाः यथास्थानं यथोचितं ॥ प्रधावि-
तास्त्वरितागच्छंतिस्म ॥३६॥ कैस्तत्राह हयैरित्यादि सुकुमाराइति पूर्वान्वयि अन्येतेभ्योभिन्नाः ॥३७॥ अ

अब्रुवंश्चापिरामेणभरतः संगतोध्रुवं ॥ तेषामेवमहांछब्दः शोचतांपितरंमृतं ॥३५॥ अथवाहृ-
न्परित्यज्यतेसर्वेप्रमुखाःस्वनं ॥ अप्येकमनसोजग्मुर्यथास्थानंप्रधाविताः ॥३६॥ हयैरन्ये
गजैरन्येरथैरन्येस्वलंकृतैः ॥ सुकुमारास्तथैवान्येपद्भिरेवनराययुः ॥३७॥ अचिरप्रोषितं
रामंचिरविप्रोषितंयथा ॥ द्रष्टुकामोजनःसर्वोजगामसहसाऽऽश्रमं ॥३८॥ भ्रातॄणांत्वरितास्ते
तुद्रष्टुकामाःसमागमं ॥ ययुर्बहुविधैर्यानैःखुरनेमिसमाकुलैः ॥३९॥ साभूमिर्बहुभिर्या-
नैःरथनेमिसमाहता ॥ मुमोचतुमुलंशब्दंद्यौरिवाभ्रसमागमे ॥४०॥ तेनवित्रासितानागाःक-
रेणुपरिवारिताः ॥ आवासयंतोगंधेनजग्मुरन्यद्वनंततः ॥४१॥ वराहमृगसिंहाश्चमहिषाः
समरास्तथा ॥ व्याघ्रगोकर्णगवयावित्रेसुःपृषतैःसह ॥४२॥ रथाह्वहंसानत्यूहाःप्लवाःकार-
ण्डवापरे ॥ तथापुंस्कोकिलाःक्रौंचाविसंज्ञाभेजिरेदिशः ॥४३॥

आश्रममितिपदं ॥३८॥ खुरसमाकुल-
यानान्पश्वादयः नेमिसमाकुलानिरथशकटादीनि ॥३९॥ समाहता अभिहताआक्रांतेतियावत् ॥४०॥
तेनशब्देनगंधेनआवासयंतःमदगंधेनदिङ्मुखानिसुरभीकुर्वतः ॥४१॥ गोकर्णसमरौमृगविशेषौ ॥४२॥
रथांह्वः चक्रवाकः नत्यूहोजलकुक्कुटः प्लवाः बकविशेषाः ॥४३॥ ॥

न्यस्तंरामेण ॥८॥ स्त्रियः पत्नीविशेषाः ॥९॥ १० ॥ औपयिकं उचितं न भवतीतिमन्ये । तत्रहेतुभुक्तभोगस्येति भुक्ताभोगायेनतस्य ॥ ११ ॥ चतुरंतांचतुःसमुद्रावसानां ॥ १२ ॥ क्षोदंपिष्टं ॥ १३ ॥ नस्फोटतिस्फुटतिनविशीर्यते

दक्षिणाग्रेषुदर्भेषुसाददर्शमहीतले ॥ पितुरिंगुदिपिण्याकं न्यस्तमायतलोचना ॥ ८ ॥ तंभूमौ पितुरार्त्तेनन्यस्तंधर्मेणवीक्ष्यसा ॥ उवाचदेवीकौसल्यासर्वादशरथस्त्रियः ॥ ९ ॥ इदमिक्ष्वाकुनाथस्यराघवस्यमहात्मनः ॥ राघवेणपितुर्दत्तंपश्यतैतद्यथाविधि ॥ १० ॥ तस्यदेवसमानस्यपार्थिवस्यमहात्मनः ॥ नैतदौपयिकंमन्येभुक्तभोगस्यभोजनं ॥ ११ ॥ चतुरंतांमहींभुक्त्वा महेंद्रसदृशोभुवि ॥ कथमिंगुदिपिण्याकंसभुंक्तेवसुधाधिपः ॥ १२ ॥ अतोदुःखतरंलोके न किंचित्प्रतिभातिमे ॥ यत्ररामःपितुर्दद्यादिंगुदीक्षोदमृद्धिमान् ॥ १३ ॥ रामेणेंगुदिपिण्याकं पितुर्दत्तंसमीक्ष्यमे ॥ कथंदुःखेनहृदयंनस्फोटतिसहस्रधा ॥ १४ ॥ श्रुतिस्तुखल्वियं सत्यालौकिकीप्रतिभातिमे ॥ यदन्नःपुरुषोभवतितदन्नास्तस्यदेवताः ॥ १५ ॥ एवमार्तांसपत्न्यस्ताजग्मुराश्वास्यतांतदा ॥ ददृशुश्चाश्रमेरामंस्वर्गच्युतमिवामरं ॥ १६ ॥ तंभोगैःसंपरित्यक्तंरामंसंप्रेक्ष्यमातरः ॥ आर्तामुमुचुरश्रूणिसस्वरंशोककर्षिताः ॥ १७ ॥ तासांरामःसमुत्थायजग्राहचरणाञ्छुभान् ॥ मातृणांमनुजव्याघ्रःसर्वासांसत्यसंगरः ॥ १८ ॥

भवति ॥ १४ ॥ श्रुतिरि त्याद्याश्वासनप्रकारः सत्यासत्यार्थालौकिकीलोकविदिता-लोकप्रसिद्धा ॥ १५ ॥ एवंश्रुतिस्त्वित्यादिप्रकारेण ॥ १

येतत्प्रसिद्धारामाद यो निर्विषयीकृतारात्प्रान्निष्काशितास्तेषां वने वसतां प्राक्कालनं बहुव्रीहिरयं प्रथम
परिग्रहवत् तीर्थं पुण्यतीर्थं गंगायमुनापरपारभवं इदमेव ॥ प्राक्केवलमिति पाठश्चाधुनिककल्पितः ॥ ना
पितश्चार्थसामंजस्यमिति कतकः ॥ तत्रापि यद्यपि प्राक् परिगृहीतमिति शेषः प्राक् परिगृहीतं तीर्थं जलान्यन्ना
दि व्यवहारोपयोगी मार्गः इदमेवेति केवलं निश्चितमित्यर्थो वक्तुं शक्यः केवलं निश्चिते त्वक्षीबं वाच्यवच्चे
कं कृत्स्नयोरिति ॥ ४ ॥ ५ ॥ जघन्यं हीनमपि जलाहरणादिकं ते पुत्रैः कृतवानथाप्यसौ न गर्हितः कुतस्तत्रा

इदं तेषामनाथानां क्लिष्टमक्लिष्टकर्मणां ॥ वने प्राक्कालनं तीर्थं ये ते निर्विषयीकृताः ॥ ४ ॥ इतः सु
मित्रे पुत्रस्ते सदा जलमतंद्रितः ॥ स्वयं हरति सौमित्रिर्मम पुत्रस्य कारणात् ॥ ५ ॥ जघन्यमपि ते पु
त्रः कृतवान्न तु गर्हितः ॥ भ्रातुर्यदर्थरहितं सर्वं तद्गर्हितं गुणैः ॥ ६ ॥ अद्यायमपि ते पुत्रः क्लेशानाम
तथोचितः ॥ नीचानर्थसमाचारं सज्जं कर्म प्रमुंचतु ॥ ७ ॥

हः गुणौ ज्येष्ठत्वसौभ्रात्रधार्मिकत्वादिभिर्वि
शिष्टस्य भ्रातुर्यदर्थरहितं प्रयोजनरहितं तदेव गर्हितं भवति तीर्थस्तु भ्रातुर्यदर्थसहितं तन्न
गुणैः प्रयोजनैः विहितं कल्पितं तत्सर्वं गुणफलकमित्यर्थः सहितं विहितमिति पाठं चाह ॥ ६ ॥ क्लेशाना
मनुभूयमानानां तथायथानुभवमुचितो नेत्यतथोचितः यस्ते पुत्रो नीचार्हो योनर्थो दुःखजनकः स
माचारोनुष्ठानं यस्मिन् तत्तथा सज्जं प्रसक्तं यथोक्तं कर्म मुंचतु रामस्य प्रत्यावर्तयिष्यमाणत्वा
दिति भावः एकः शत्रुघ्नस्तु भरतसंगादेतत्कर्म न करोत्ययमपि मुंचत्वितिश्चापरे थं ॥ ७ ॥

२८॥ तत इति वसिष्ठ रामोपवेशनानंतरं जघन्यं जघनभागं पश्चभागमाश्रितः सन् उपोपविवेश बभूवे त्यन्वयः ॥२९॥ उपोपविष्ट इत्यादि जनाभिप्रायानुभाषणं ॥३०॥ किमिति किंसाधुवदिष्यतीति यो॥

पुरोहितस्याग्निसमस्य तस्य वै बृहस्पतेरिंद्र इवामराधिपः॥ प्रगृह्य पादौ सुसमृद्धतेजसः सहैव तेनोपविवेश राघवः॥२८॥ ततो जघन्यं सहितैः स्वमंत्रिभिः पुरप्रधानैश्च तथैव सैनिकैः॥ जनेन धर्मज्ञतमेन धर्मवानुपोपविष्टो भरतस्तदाग्रजं॥२९॥ उपोपविष्टस्तु तदा अतिवीर्यवान् तपस्विवेशेन समीक्ष्य राघवं॥ श्रिया ज्वलंतं भरतः कृतांजलिर्यथा महेंद्रः प्रयतः प्रजापतिं॥३०॥ किमेष वाक्यं भरतोद्य राघवं प्रणम्य सत्कृत्य च साधु वक्ष्यति॥ इतीव तस्यार्यजनस्य तत्त्वतो बभूव कौतूहलमुत्तमं तदा॥३१॥ स राघवः सत्यधृतिश्च लक्ष्मणो महानुभावो भरतश्च धार्मिकः॥ वृताः सुहृद्भिश्च विरेजिरेध्वरे यथा सदस्यैः सहिता स्त्रयोग्नयः॥३२॥ इत्यार्षे श्रीरामायणे अयोध्याकांडे चतुरोत्तरशततमः सर्गः॥१०४॥ ततः पुरुषसिंहानां वृतानां तैः सुहृद्गणैः॥ शोचतामेव रजनी दुःखेन व्यत्यवर्तत॥१॥

जना॥३१॥ त्रयोग्नयः शत्रुघ्नस्याप्राधान्येन परिहरणात्॥३२॥ इति श्री रामाभिरामे श्री रामीये रामायणतिलके अयोध्याकांडे चतुरोत्तरशततमः सर्गः॥१०४॥ पूर्वसर्गांतोक्तरीत्या सुहृद्गणावृतत्वं शोचतां पितृमरणदुःखेन॥१॥

296

पश्चात्पश्चप्रदेशात् पश्चंतु चरमं तननो ॥ १९ ॥ आसक्तं भावेनिष्ठा स्नेहहासंशोपेतं ॥ २० ॥ ववृत्तिरे वर्तितवत्यः ॥ २१ ॥ उपसंगत्यस्पृष्ट्वा ॥ २२ ॥ वनेत्यादि वनवासकृतदीनत्ववनीमितियावत् ॥ २३ ॥ २४ ॥ परिक्लिष्टं परिम्

ताः पाणिभिः सुखस्पर्शैर्मृदंगुलितलैः शुभैः ॥ प्रममार्जूरजः पश्चाद्रामस्यायतलोचनाः ॥ १९ ॥ सौमित्रिरपिताः सर्वामातॄः संप्रेक्ष्य दुःखितः ॥ अभ्यवादयदासक्तं शनैरामादनंतरं ॥ २० ॥ यथारामे तथातस्मिन्सर्वाववृतिरे स्त्रियः ॥ वृत्तिंदशरथाज्जातेलक्ष्मणेशुभलक्षणे ॥ २१ ॥ सीतापिचरणांस्तासांउपसंगत्यदुःखिता ॥ श्वश्रूणामश्रुपूर्णाक्षीसंबभूवाग्रतःस्थिता ॥ २२ ॥ तांपरिष्वज्यदुःखार्तामातादुहितरंयथा ॥ वनवासकृतांदीनांकौसल्यावाक्यमब्रवीत् ॥ २३ ॥ वैदेहराजन्यसुतास्नुषादशरथस्यच ॥ रामपत्नीकथंदुःखंसंप्राप्ताविजनेवने ॥ २४ ॥ पद्ममातपसंतप्तंपरिक्लिष्टमिवोत्पलं ॥ कांचनंरजसाध्वस्तंक्लिष्टंचेंदुमिवांबुदैः ॥ २५ ॥ सुखंतेप्रेक्ष्यमांशोकोदहत्यग्निरिवाश्रयं ॥ भृशंमनसिवैदेहिव्यसनारणिसंभवः ॥ २६ ॥ ब्रुवंत्यामेवमातोयांजनन्यांभरताग्रजः ॥ पादावासाद्यजग्राहवसिष्ठस्यसराघवः ॥ २७ ॥

दितं उत्पलंरक्तोत्पलंध्वस्तंसमभिभूतं ॥ २५ ॥ तेमुखंप्रेक्ष्यस्थितामितिशेषः मनसिसंक्रांतो व्यसनारणिसंभवःशोकः अग्निराश्रयंगृहमिवकाष्ठानिवमामांदहति आशयमितिपाठेपि आशेत्योगृहमेव आशय्यतेत्रेतिव्युत्पत्तेः ॥ २६ ॥ र

लोकस्त्वामर्थं दशरथेनोत्पाद्य वर्धितः सकलगुणसंपन्नो यदि लोकस्त्राणं न करिष्यसि तदा व्यर्थस्तत्प्रायास इत्यमुमर्थमुपमानप्रदर्शनमुखेनाह ॥ यथा त्विति ॥ यथा वृक्षः फलार्थिना पुंसा रोपितः कृतबीजावापोनंतरं शनैर्वर्धितः तत्र वृद्ध्यतिशयमाह ॥ ह्रस्वकेन वामनेन दुरारोहो ताणवस्कूट स्कंधो महाद्रुमो यः पुष्पितो भूत्वा यदा फलानि न दर्शयति तदा सः तदारोपकः पुमान्यस्य फलस्य हेतोः सद्द्रुमः प्रभावितः उत्पादितः स

यथा तु रोपितो वृक्षः पुरुषेण विवर्धितः ॥ ह्रस्वकेन दुरारोहो रूढस्कंधो महाद्रुमः ८ स यदा पुष्पितो भूत्वा फलानि न विदर्शयेत् ॥ स तां नानुभवेत्प्रीतिं यस्य हेतोः प्ररोपितः ९ एषोपमा महाबाहो तदर्थं वेत्तुमर्हसि ॥ यत्र त्वमस्मान्वृषभो भर्ता भृत्यान्न शाधि हि १० श्रेणयस्त्वां महाराज पश्यंत्वग्र्याश्च सर्वशः ॥ प्रतपंतमिवादित्यं राज्ये स्थितमरिंदमं ११ तथानुयाने काकुत्स्थ मत्ता नर्दंतु कुंजराः ॥ अंतःपुरगता नार्यो नंदंतु सुसमाहिताः १२ तस्य साध्वनुमन्यंत नागरा विविधा जनाः ॥ भरतस्य वचः श्रुत्वा रामं प्रत्यनुयाचतः ॥ १३ ॥

तां प्रीतिं स्वाभिमतफलप्राप्तिजां प्रीतिं नानुभवेत् ॥ तथा त्वमिति ॥ एषोपमा त्वयि भवति यत्र स्त्राणकाले वृषभः श्रेष्ठस्त्वं भर्ता पालनसमर्थोऽस्मान्भृत्यान्न शाधि न शिक्षयसि अतस्तदर्थं तस्या उपमायाः अर्थं राजप्रयासानर्थक्यरूपं वेत्तुमर्हसि ॥ ८ ॥ ९ ॥ १० ॥ श्रेणयो नानाजातीयसंघाः अग्र्याः प्रधानाः ॥ ११ ॥ १२ ॥ तस्य वचः ॥ साध्विति तद्वचनमन्यंतेति योजना ॥ अन्वमन्यंते त्यर्थः ॥ १३ ॥ ॥

२९७

मंदाकिन्यांतत्तीरेहुतंप्रातरौपासनहोमंजप्यंगायत्रीजपं·द्वारमितिपाठेउटजद्वारमित्यर्थः इतिकेचित्तत्र
उत्तरसर्गेमंदाकिनीतीरेराममुवाचेत्यक्तेः तस्माद्राममितिपाठः रामाधिष्ठितनदीतीरमित्यर्थउचितः॥२।३॥
माताकैकेयीप्रथमंराज्ञाराज्यदानेनसांत्विताकृताश्वासा·अनंतरंतयाममेदंराज्यंदत्तंतद्राज्यंअकंटकंउक्त
प्रकारेणपितृवचनस्यापिपरिपालनात्प्रत्यूहरहितं॥४॥जलागमेवर्षाकालेंबुवेगेनभिन्नःसेतुरिव·इदंमह

रजन्यांसुप्रभातायांभ्रातरस्तेसुहृद्वृताः॥मंदाकिन्यांहुतंजप्यंकृत्वाराममुपागमन्॥२॥तूष्णींतेसमुपासी
नानकश्चित्किंचिदब्रवीत्॥भरतस्तुसुहृन्मध्येरामंवचनमब्रवीत्॥३॥सांत्विताममिकामाता
दत्तंराज्यमिदंमम॥तद्ददामितवैवाहंभुंक्ष्वराज्यमकंटकं॥४॥महतेवांबुवेगेनभिन्नःसेतुर्जला
गमे॥दुरावरंत्वदन्येनराज्यखंडमिदंमहत्॥५॥गतिंखरइवाश्वस्यतार्क्ष्यस्येवपतत्रिणः॥अनुगं
तुंनशक्तिर्मेगतिंतवमहीपते॥६॥सुजीवंनित्यशस्तस्ययःपरैरुपजीव्यते॥राममतेनतुदुर्जीवंयः
परानुपजीवति॥७॥

दयोध्यादेशीयंराज्यखंडंभरतखंडाख्यंराज्यं·त्वदन्येनदुरावरंआवरितुमशक्यं॥५॥
ननुत्वयावीरेणासुरक्षमेतत्तत्राह·गतमिति·अश्वगतिमनुगंतुंखरोयथानशक्तः·तार्क्ष्यगत्यनुगमनेपथेत
रपक्षिणोऽशक्तास्तथातवगतिंत्वदीयांराज्यपालनशक्तिमनुगंतुंमेनशक्तिः इवशब्दोयथार्थेनिपाताना
मनेकार्थत्वात्॥६॥यःपरैर्नित्यशउपजीव्यतेतस्यसुजीवंशोभनंजीवनमित्यर्थः भावेघञंतंक्लीबमपिक्वचि
त्·घञजयाःपुंसीतितुप्रायिकमितिबोध्या·तस्येत्यर्थेतेनेत्यार्षं।दुर्जीवंदुःखंजीवनंतस्मात्त्वराज्यंकर

वामिकोवितामितभावः॥७॥

गच्छंतीति शत्रंतं· अंशवो किरणाः· अशायेइति पाठे जलाशयेइत्यर्थः ॥२०॥ यदेवमतस्त्वमात्मानं
प्रत्यनुशोच मृत्युर्दुर्वार आयाति· कामेगतिरिहामुत्रेतिचिंत्य· अन्यं राजानं तदेवशोच्यत्वमाह·
आयुरिति· ॥ आयुस्तु यस्य यस्य कस्यापि हीयत इत्यर्थः ॥२१॥ तदेवाह· सहेति· मृत्युः सह व्रजति
सह निषीदति सह गत्वा सह निवर्तते· ॥ अंतर्यामिणा एवं मृत्युरूपत्वात्· अतोऽपरिहार्य इति भावः

अहोरात्राणि गच्छंति सर्वेषां प्राणिनामिह ॥ आयूंषि क्षपयंत्याशु ग्रीष्मे जलमिवांशवः ॥२०
आत्मानमनुशोच त्वं किमन्यमनुशोचसि ॥ आयुस्ते हीयते यस्य स्थितस्याथ गतस्य च ॥२१
सहैव मृत्युर्व्रजति सह मृत्युर्निषीदति ॥ गत्वा सुदीर्घमध्वानं सह मृत्युर्निवर्तते ॥२२ गात्रे
षु वलयः प्राप्ताः श्वेताश्चैव शिरोरुहाः· जरया पुरुषो जीर्णः किं हि कृत्वा प्रभावयेत् ॥२३॥ नं
दंत्युदित आदित्ये नंदंत्यस्तमितेऽहनि ॥ आत्मनो नावबुध्यंते मनुष्या जीवितक्षयं ॥२४ हृष्यंत्य
तुमुखं दृष्ट्वा नवं नवमिवागतं ॥ ऋतूनां परिवर्तेन प्राणिनां प्राणसंक्षयः ॥२५॥ ॥

२२ वलयो जराकृताः किं हि कृत्वा किं बलं प्राप्य प्रभावयेत्· यद्वा किं कृत्वा कमुपायं कृत्वा तत्सर्वपरि
हारे समर्थो भवेदित्यर्थः ॥२३॥ आयुःक्षयकारकत्वेनानिष्टसाधने रव्युदयादौ इष्टसाधनत्वबुध्याऽतिमू
ढा मनुष्या इत्याह नंदंतीति ॥२४॥ नवं नवमिव इतः प्रागप्राप्तमिव· ऋतुमुखं ऋतुप्रारंभ· परिवर्तः पुनः
पुनः प्राप्तिः तद्दृष्ट्वा हृष्यंति न जानंति तत्परिवर्तेन प्राणिनां प्राणनाशयतीत्यन्वयः· आत्मसुखमिति

दुःखितंप्रेक्ष्यदुःखैनैवंवक्ष्यमाणालोच्य कृतात्मा शिक्षितबुद्धिः आत्मवान्धीरः ॥१४॥ आश्वासनप्रकारो नात्मनइति ॥ आत्मनोजीवस्यकामकारः स्वेच्छयायत्किंचित्प्रवर्तनसामर्थ्यंन नास्तिहियतोयंपुरुषोनीश्वरः ईश्वरवत्स्वातंत्र्यरहितः ॥ तस्मादेनमितश्चास्माद्देहाद्वालोकाद्वइतरतः परस्माद्देहाद्वालोकाच्च कृतांतः कालोंतर्यामिरूपः कर्मानुरूपंकर्षतीति एवंचममवनवासेन राजानापिकेकेयीकारणं किंतुदे

तमेवंदुःखितंप्रेक्ष्यविलपंतंयशस्विनं ॥ रामःकृतात्माभरतंसमाश्वासयदात्मवान् ॥१४॥ नात्मनःकामकारोस्तिपुरुषोयमनीश्वरः ॥ इतश्चेतरतश्चैनंकृतांतःपरिकर्षति ॥१५॥ सर्वेक्षयांतानिचयाःपतनांताःसमुच्छ्रयाः ॥ संयोगाविप्रयोगांतामरणांतंचजीवितं ॥१६॥ यथाफलानांपक्वानांनान्यत्रपतनाद्भयं ॥ एवंनरस्यजातस्यनान्यत्रमरणाद्भयं ॥१७॥ यथागारंदृढस्थूणंजीर्णंभूत्वोपसीदति ॥ तथावसीदंतिनराजरामृत्युवशंगताः ॥१८॥ अत्येतिरजनीयातुसानप्रतिनिवर्तते ॥ यात्येवयमुनापूर्णंसमुद्रमुदकार्णवं ॥१९॥

वादीनामदृष्टमित्यांतरोभावः ॥१५॥

इदानींराजमरणशोकावकाशोपिनास्तीत्याह सर्वेइति निचयाः संग्रहाः नाशांताः समुच्छ्रयाविद्यादिकृतमोन्नत्यंतस्मान्नश्वरत्वेननिश्चितेकःशोकइतिभावः ॥१६॥ यथाफलानांपतनमशक्यपरिहारंएवंमरणमपितथातस्मान्नृपस्यतस्यनशोच्यता ॥१७॥ नदेवदृष्टांतांतरेणोपपादयति यथेति ॥१८॥ अतीतरजन्यप्रतिनिवर्तोदृष्टांतो यमुनायात्येवनप्रतिनिवर्तनइत्यर्थः उदकार्णवमित्यत्रोदकपदमविवेकं ॥१

रामा॰ स्क॰ २९९

यदेवमतो॰ धर्मात्मेति॰ उपसंहरति॰ ॥ नस इति॰ ॥ सतांसत्कृतः सद्भिः पूज्यमानः ॥ ३२ ॥ ब्रह्मलोकविहारिणीं तल्लोके विहारार्हां देवीं मद्दिं देवसंबंधिनीं तपआदिसमृद्धिं ॥ ३३ ॥ कृतवानधीनात्मविद्यः तद्विधो यद्विधश्चासीति पाठेऽकृतवान्बुद्धिमत्तरश्च यद्विधोऽसि तद्विधो भवान्न शोचितुमर्हतीत्यर्थ इतितीर्थः

धर्मात्मा सुशुभैः कृत्स्नैः क्रतुभिश्चाप्तदक्षिणैः ॥ स न शोच्यः पिता तात स्वर्गतः सत्कृतः सतां ॥ ३२ ॥
स जीर्णं मानुषं देहं परित्यज्य पिता हि नः ॥ दैवीमृद्धिमनुप्राप्तो ब्रह्मलोकविहारिणीं ॥ ३३ ॥
तं तु नैवंविधः कश्चित्प्राज्ञः शोचितुमर्हति ॥ त्वद्विधो मद्विधश्चापि श्रुतवान्बुद्धिमत्तरः ॥ ३४ ॥
एते बहुविधाः शोका विलापरुदिते तदा ॥ वर्जनीया हि धीरेण सर्वावस्थासु धीमता ॥ ३५ ॥
स स्वस्थो भव मा शोको यात्वा चावस तां पुरीं ॥ तथा पित्रा नियुक्तोऽसि वशिना वदतां वर ॥ ३६ ॥
यत्राहमपि तेनैव नियुक्तः पुण्यकर्मणा ॥ तत्रैवाहं करिष्यामि पितुरार्यस्य शासनं ॥ ३७ ॥
न मया शासनं तस्य त्यक्तुं न्याय्यमरिंदम ॥ स त्वयापि सदा मान्यः स वै बंधुः स नः पिता ॥ ३८ ॥

ब्रह्मलोकं प्राप्तस्यात्यंतं शोकोऽनुचित इति भावः ॥ ३४ ॥ बहुविधा दशरथमरणमद्विवासनादि विषयभेदेन बहुप्रकाराः शोको मानसः विलापरुदिते तत्कार्ये ॥ ३५ ॥ स्वस्थः शोकरहितः मा शोकः ॥ त्वां परिभवत्विति शेषः यात्वागतां तां पुरीं मयोध्यामावास॰ कुतावंवियोगस्तत्राह तथेति॰ वशिना सत्यवशवता सत्याधीनत्ववना ॥ ३६ ॥ यत्र॰ यस्मिन्कृत्ये तत्रैव प्रवृत्तः सन्निति शेषः ॥ ३७ ॥ त्यागस्यान्याय्य

२९९

वा॰ रा॰ स॰ अ॰ १०५ रा॰ २९९

काष्ठं काष्ठं पोतं ह्दयं ॥२६॥ विनाभवः विप्रयोगः इति यावत् ॥२७॥ अत्र संसारे कश्चिदपि प्राणी यथाभावं यथाप्राप्तं स्वभावं मतिजनितलक्षणं न समतिवर्त्तते न लंघयति· तेन हेतुना प्रेतस्य संबंधसामान्येषु शोच्यं तमनुशोचनोऽस्य तस्मिन्नत्ययप्रेतभावनिवर्त्तने सामर्थ्यं नास्ति ॥२८॥ पूर्वगतिसमानगतित्वे दृष्टांतः यथेति· पुरतो गच्छंतं सार्थं पथि स्थितः पथिकः ॥२९॥ उक्तायां लोकस्थितेः प्रकृतोपयोगमाह· एवमिति· पि

यथा काष्ठं च काष्ठं च समेयातां महार्णवे ॥ समेत्य तु व्यपेयातां कालमासाद्य कंचन ॥२६॥ एवं भार्याश्च पुत्राश्च ज्ञातयश्च वसूनि च ॥ समेत्य व्यवधावंति ध्रुवो ह्येषां विनाभवः ॥२७॥ नात्र कश्चिद्यथाभावं प्राणी समतिवर्तते ॥ तेन तस्मिन्न सामर्थ्यं प्रेतस्यास्त्यनुशोचतः ॥२८॥ यथा हि सार्थं गच्छंतं ब्रूयात्कश्चित्पथि स्थितः ॥ अहमप्यागमिष्यामि पृष्ठतो भवतामिति ॥२९॥ एवं पूर्वैर्गतो मार्गः पितृपैतामहो ध्रुवः ॥ तमापन्नः कथं शोचेद्यस्य नास्ति व्यतिक्रमः ॥३०॥ वयसः पतमानस्य स्रोतसो वानिवर्त्तिनः ॥ आत्मा सुखे नियोक्तव्यः सुखभाजः प्रजाः स्मृताः ॥३१॥

तृपैतामहैः वृद्धैराश्रितः पितृपैतामहैरित्यर्थः पितृपैतामह इति पाठे तत्संबंधी मार्ग इत्यर्थः ध्रुवः अवश्यं प्राप्यः यस्य मार्गस्य व्यतिक्रमो लंघनं नास्ति· तमापन्नः स्वयमपि तं प्राप्तः पित्रादीन् कथं शोचेत् ॥३०॥ स्रोतसो वा· गंगादिप्रवाहस्येव अनिवर्तिनः प्रत्यावर्तनरहितस्य पतमानस्य गच्छतो वयसः नाशं दृष्ट्वेति शेषः आत्मा सुखे तत्साधने धर्मे नियोक्तव्यः कुतः यतः प्रजाः सुखभाजः सुखसाधना

रामायण अयोध्या० स० १०५ पत्रं ३९

वृद्धानां संमतोपि धर्मविषये राम वदेव वर्तितव्यमिति दृष्टांतमतोपि लोकमर्यादामनुसरत्वं तान्वृद्धान्संशयन्संशयास्पदधर्मान् पृच्छसि ॥ एवं च सर्वज्ञात्मकामत्वात् तव न दुःखं इति भावः ॥ ३ ॥ यथा मतस्तथाजीवन् अस्य यथाजीवंस्तथा मत इति वाक्यशेष आर्थिको बोध्यः यथा मतस्य क्तदेह ॥ आत्मादेहपुत्रादिभिरसंबद्धः तथाजीवन्नपि तैरसंबद्धः नित्यशुचिसुखचिदात्मनो नित्याशुचिदुःखजडेन देहेन तदीयैश्चासंबंधात् यथा च जीवन्स्वकर्मानुरूपं संसरति तथा मतोपि स्वकर्मानुरूपं परत्र किं

नत्वां प्रव्यथयेद्दुःखं प्रीतिर्वा न प्रहर्षयेत् ॥ संमतश्चापि वृद्धानां तांश्च पृच्छसि संशयान् ॥ ३ ॥ यथा मतस्तथा जीवन्यथासति तथा सति ॥ यस्यैष बुद्धिलाभः स्यात्परितप्येत केन सः ॥ ४ ॥
परावरज्ञो यश्च स्याद्यथा त्वं मनुजाधिप ॥ स एवं व्यसनं प्राप्य न विषीदितुमर्हति ॥ ५ ॥

च यथाजीवन्सर्वैः संबंधः ॥ तथा मतोपि सर्वात्मत्वादस्य किं च यथाऽसति अविद्यमानेन रागो जायते तथा सति विद्यमानेपि रागो न युक्तः ॥ यथा वासति साधौ द्वेषो न युक्तस्तथाऽसति असाधावपि द्वेषो न युक्तः किं च यथाऽसति प्रपंचे नुरागः तथा सति ब्रह्मणि युक्तः किं च सति ब्रह्मणि तन्निष्ठितस्य यथा न बंधो मुक्तिश्च भवति तथा लोकसंग्रहार्थमसन्निष्ठस्यापि न बंधो मुक्तिश्च भवति ॥ यस्य ॥ ४ ॥त्वा दृशस्य एष उक्तार्थविषयको बुद्धिलाभः स्यात्स राजयोगी केन परितप्येत न केनापि हेतुनेत्यर्थः ॥ ४ ॥ परावरज्ञः सप्रपंचात्मतत्वज्ञः विषीदितुमित्यार्षं विशत्तुमित्यर्थः ॥ ५ ॥ ॥

300

कर्मणान्दुश्चिन्तव्यापारेण ॥ ३९ ॥ नरेणन्पेणेतिपाठः क्षत्रियेणेत्यर्थइतिकतकः परलोकंजिगीषताधार्मिकत्वादिस्वभाववताभवितव्यं ॥ ४० ॥ नपितुर्वृत्तंशुभंनिशाम्यपर्यालोच्यतेनसउत्तमांगतिंगतइतिज्ञात्वात्वंस्वभावेन धार्मिकत्वादिलक्षणेनोपलक्षितः ॥ आत्मानंआत्मनः परलोकहितंमनुतिष्ठचिंतय

तद्वचः पितुरेवाहंसंमतंधर्मचारिणां ॥ कर्मणापालयिष्यामिवनवासेनराघव ॥ ३९ ॥ धार्मिकेणानृशंसेननरेणगुरुवर्तिना ॥ भवितव्यंनरव्याघ्रपरलोकंजिगीषता ॥ ४० ॥ आत्मानमनुतिष्ठत्वंस्वभावेननरर्षभ ॥ निशाम्यतुशुभंवृत्तंपितुर्दशरथस्यनः ॥ ४१ ॥ इत्येवमुक्त्वावचनंमहात्मापितुर्निदेशप्रतिपालनार्थं ॥ यवीयसंभ्रातरमर्थवच्चप्रभुर्मुहूर्त्ताद्विररामरामः ॥ ४२ ॥ इत्यार्षेश्रीरामायणेवाल्मीकीये अयोध्याकांडेपंचोत्तरशततमः सर्गः ॥ १०५ ॥ एवमुक्त्वातुविरतेरामेवचनमर्थवत् ॥ ततोमंदाकिनीतीरेरामंप्रकृतिवत्सलं ॥ १ ॥ उवाचभरतश्चित्रंधार्मिकोधार्मिकंवचः ॥ कोहिस्या[illegible]दीदृशोलोकेयादृशस्त्वमरिंदम ॥ २ ॥

त्यर्थः ॥ ४१ ॥ ४२ ॥ इतिश्रीरामाभिरामेश्रीरामीयेरामायणतिलके अयोध्याकांडेपंचोत्तरशततमः सर्गः १०५ ॥ अथभरतः क्षत्रधर्मावष्टंभेनरामप्रत्यावृत्तिंप्रार्थयते एवमुक्त्वेति ॥ १ ॥ चित्रं उक्तियुक्तिविशेषोपन्नत्वाल्लोकस्यविस्मयजनकं कोहिस्यात् नकोपीत्यर्थः यादृशोयादृशमाहात्म्यवान् ॥ २ ॥

रामा॰ अ॰
३०१

एवंगुरुत्वादिहेतुभिर्यद्यप्यहं न परिगर्ह्यस्तथापि वस्तुतो गर्ह्य एवेत्याह॰ कोहीति॰ कोहि धर्म वित्॰ धर्मार्थयोर्हीनं ताभ्यां हीनं कामप्रधानं १२ अन्तकाले मतिकाले मुत्स्यंति॰ विपरीतबुद्धिं प्राप्नुवंति॰ पुराकृतिः पुरातनी गाथा प्रत्यक्षीसत्या १३ क्रोधात्॰ विषमद्यैव पास्यामीत्यक्तिसूचितात्॰ कैकेयी क्रोधा

कोहि धर्मार्थयोर्हीनमीदृशं कर्मकिल्बिषं। स्त्रियाप्रियचिकीर्षुः सन्कुर्याद्धर्मज्ञधर्मवित्
॥१२॥ अन्तकाले हि भूतानि मुत्स्यंतीतिपुराकृतिः। राज्ञैवं कुर्वता लोके प्रत्यक्षा सा कृतिः कृता
॥१३॥ साध्वर्थमभिसंधाय क्रोधान्मोहाच्च साहसात्। तातस्य यदतिक्रांतं प्रत्याहरतु तद्भवान्।
॥१४॥ पितुर्हि समतिक्रांतं पुत्रो यः साधु मन्यते। तदपत्यं मतं लोके विपरीतमतोन्यथा॥१५

त्॰ तत्क्रोध भयादिति यावत्॰ मोहात् कैकेयी विषयात्॰ साहसात् अविमृश्य कारित्वात्॰ तातस्य यदतिक्रांतं॰ भावेनिष्ठा॰ ज्येष्ठाभिषेकत्यागरूपं साध्वर्थानुष्ठानं तत्साध्वर्थमभिसंधाय राज्ञोक्तार्थं युक्ततमस्य साधुत्वमिति विचार्यप्रत्याहरतु निवर्तयतु १४ तदेवोपपादयति॰ पितुर्हीति॰ अतिक्रांतमतिक्रमस्तं साधुमन्यते॰ तद्वैपरीत्याचरणे न साधु यथा तथा संपादयतितदपत्यं मतं॰ अपतनहेतुत्वादपत्यशब्दवाच्यम्॥१५॥

रामा॰
३०१

अमरईश्वरः सयथाशुद्धसत्वोपाधिस्तद्वत्शुद्धसत्वप्रधानः॥ अत्रोपमशब्दप्रयोगो लोकप्रतारणाय सत्वो
पाधिरीश्वरस्त्वमेवेतिभावः सर्वज्ञः सर्वविषयकज्ञानरूपोपाधिवृत्तिमान् सर्वदर्शी सर्वसाक्षी॥ बुद्धि
मान् सर्वबुद्धिप्रवर्तकोंतर्यामीतियावत्॥६॥ भवाभवकोविदं॥ भूतानामुत्पत्तिनाशज्ञं॥ आसा
दयितुमवसादयितुं॥ एवंचत्वामेवंविधंयद्यपिदुःखेनपीडयतितथापिमादृशापीडयत्येवेति॥

अमरोपमसत्वस्त्वंमहात्मासत्यसंगरः॥ सर्वज्ञः सर्वदर्शी चबुद्धिमांश्चासिराघव॥६॥ नत्वा
मेवंगुणैर्युक्तंप्रभवाभवकोविदं॥ अविषह्यतमंदुःखमासादयितुमर्हति॥७॥ प्रोषितेम
यियत्पापंमात्रामत्कारणात्कृतं॥ क्षुद्रयातदनिष्टंमेप्रसीदतुभवान्मम॥८॥ धर्मबंधेनब
द्धोस्मितेनेमानेहमातरं॥ हन्मितीव्रेणदंडेनदंडार्हांपापकारिणीं॥९॥ कथंदशरथाज्जा
तः शुभाभिजनकर्मणः॥ जानन्धर्ममधर्मंचकुर्यांकर्मजुगुप्सितं॥१०॥ गुरुः क्रियावान्वृद्ध
श्चराजाप्रेतः पितेतिच॥ तातंनपरिगर्हेहंदैवतंचेतिसंसदि॥११॥

स्वस्थोभवमाशोकइत्यस्यो
त्तरमेतत्पर्यंतं॥७॥ मत्कारणान्मंद्राज्यनिमित्ततः मेऽनिष्टंमदसंमतमेव॥ अतोभवान्प्रसीदतुम
द्दत्तराज्यंपरिगृह्णात्वितियावत्॥८॥ धर्मबंधेनधर्मरूपेणबंधनेन॥ इहईदृशापराधविषयेइमांमा
तरंतर्यामिणस्त्वद्द्वेषिणीं अतएवदंडार्हां॥९॥१०॥ मातृवत्पितापिमान्योप्यकारीत्याह॥ गुरुरिति॥॥
क्रियावान् कृतश्रेष्ठक्रतुः प्रेतः सन्दैवतंश्राद्धादौ॥११॥ ॥ राम ॥

उचितो नाल्पमपि सुखो धर्म इति भावः॥१९॥ तस्यासुखत्वमेव दर्शयति कश्चेति प्रत्यक्षं प्रत्यक्ष
सुखसाधनं धर्मं प्रजापालनरूपमुत्सृज्य संशयस्यमप्रत्यत्वात्॥ को हि तद्वेदयद्यमुष्मिन् लो
केस्ति वा न वेति श्रुत्याभिनीयमानसंदेहास्पदं अलक्षणं असुखलक्षणं॥ आयतिस्थ मुत्तरक्षय
प्राप्यं॥ अनिश्चितं अनित्यानुष्ठानं॥ न हि प्रजापालनवत् क्षत्रियस्य नित्यप्राप्तोयं धर्मः॥ नित्यत्वे
तु इहितदशरथादेः पातित्यप्रसंगः तेन क्षत्रबंधुः क्षत्राणां बंधुरिति समासेन क्षत्रियकुलसंमत इ
त्यर्थः॥ निंदायां बंधुच प्रत्ययात् तस्य निंद्यक्षत्रियादिवाचीति कतकः कश्चरेत् न कोपीत्यर्थः॥ अ
न्ये तु क्षत्रबंधुरपि निंद्यक्षत्रियोपि राज्यानर्होपीदृशं धर्मं न वीच्यं राज्याधिकारीत्यर्थमाहुः॥२०
ननु शरीरक्लेशसाध्यधर्माणां तरंगस्तत्राह॥ अथेति पक्षांतरे थेति शब्दः॥२१॥ न नूत्तमत्वेन न
ऋतत्वात दाश्रमकरणं युक्तमत आह॥ चतुर्णामिति॥ सर्वेषां गृहस्थपाल्यत्वादिति भावः॥२२

302

अपत्यमस्ति॰ अन्वर्थापत्यमस्ति॰ माभवान्दुष्कृतंपितुरनुमन्यतामितिशेषः तदेवाह॰ अपीति॰ यत्तत्कृ
तंदशरथकृतंकर्मतदपि॰ धर्ममतिक्रम्यप्रवृत्तं॰ अतएवलोकेधीरैर्विगर्हितं॰ अतस्तदनुमननम
नुचितमितिपितवचसःपरिपाल्यत्वेप्युक्तंधर्मवदभिषेकवचनमेवपरिपालयेतिव्यंग्यं॥१६॥सर्वा

तदपत्यंभवानस्तुमाभवान्दुष्कृतंपितुः॥अपियत्तत्कृतंकर्मलोकेधीरविगर्हितं॥१६॥
कैकेयींमांचतातंचसुहृदोबांधवांश्चनः॥पौरजानपदान्सर्वान्त्रातुसर्वमिदंभवान्॥१७॥
क्वचारण्यंक्वचक्षात्रंक्वजटाःक्वचपालनं॥ईदृशंव्याहतंकर्मनभवान्कर्तुमर्हसि॥१८॥एष
हिप्रथमोधर्मःक्षत्रियस्याभिषेचनं॥येनशक्यंमहाप्राज्ञप्रजानांपरिपालनं॥१९॥कश्च
प्रत्यक्षमुत्सृज्यसंशयस्थमलक्षणं॥आयतिस्थंचरेद्धर्मंक्षत्रबंधुरनिश्चितं॥२०॥अथ
क्लेशजमेवत्वंधर्मंचरितुमिच्छसि॥धर्मेणचतुरोवर्णान्पालयन्क्लेशमाप्नुहि॥२१॥चतुर्णा
माश्रमाणांहिगार्हस्थ्यंश्रेष्ठमुत्तमं॥आहुर्धर्मज्ञधर्मज्ञास्तंकथंत्यक्तुमिच्छसि॥२२॥

न्त्रातुंइदंसर्वमत्युक्तंभवानत्रनुमन्यतामितिशेषः॥१७॥पित्रुक्तवनवासस्यगर्हितत्वमेवाह॰
क्वचेति॥१८॥ननुवानप्रस्थाश्रमःक्षत्रियस्याप्यस्ति॰ तत्राह॰ एषहीति॰ येनाभिषेचनेन॰ पाल
नंतद्रूपधर्मसंपादनंप्रथम आद्योधर्मइत्यर्थः॥एवंचसत्याश्रमोराज्यपरिपालनोत्तरंवार्धके

अाक्रोशं निंदां तत्रभवंतं पूज्यं ॥३०॥ त्वा त्वां मयि बांधवेषु च करुणां कुर्विति संबंधः ॥३१॥ एष्यतः कृत्वा
तिरस्कृत्य· मत्प्रार्थनामिति शेषः इतोपि वनमेव· जनसंबाधभयेनास्माद्वनादपि वनांतरमित्यर्थः
३२॥ नाम्यता ग्लायता· गमनाय अयोध्यां प्रतीति शेषः ॥३३॥ तत्स्थैर्यं पितृवचनस्थितिस्थैर्यं· दुःखहृ

आक्रोशं मम मातुश्च प्रमृज्य पुरुषर्षभ ॥ अद्य तत्रभवंतं च पितरं रक्ष किल्बिषात् ॥३०॥ शिर
सा त्वाभियाचेहं कुरुष्व करुणां मयि ॥ बांधवेषु च सर्वेषु भूतेष्विव महेश्वरः ॥३१॥ अथ वाप
ष्ठतः कृत्वा वनमेव भवानितः ॥ गमिष्यति गमिष्यामि भवता सार्धमप्यहं ॥३२॥ तथाभिरामो
भरतेन नाम्यता प्रसाद्यमानः शिरसा महीपतिः ॥ न चैव चक्रे गमनाय सत्ववान्मतिं पितुस्त
द्वचने प्रतिष्ठितः ॥३३॥ तदद्भुतं स्थैर्यमवेक्ष्य राघवे समं जनो हर्षमवाप दुःखितः ॥ न यात्ययो
ध्यामिति दुःखितोभवत्स्थिरप्रतिज्ञत्वमवेक्ष्य हर्षितः ॥३४॥ तमृत्विजो नैगमयूथवल्लभास्त
था विसंज्ञाश्रुकलाश्च मातरः ॥ तथा ब्रुवाणं भरतं प्रतुष्टुवुः प्रणम्य रामं च ययाचिरे सह ३५
इत्यार्षे श्रीरामायणे अयोध्याकांडे षडुत्तरशततमः सर्गः ॥१०६॥

र्षयोर्युगपत्प्रवृत्तौ निमित्तं
स्वयमेव व्याकरोति कविर्नयातीति ॥३४॥ नैगमाः पुरे भवाः निगमो निश्चये वेदे पुरे पथि वणिक्प
थेइति· तद्यूथवल्लभास्तद्गणमुख्याः· विसंज्ञा विचित्ताश्च ता अश्रुकलाः अश्रुप्रचुराश्च ३५ इ
ति श्री अयोध्याकांडे षडुत्तरशततमः सर्गः ॥१०६॥

अतेन विद्यया बालोऽवरः जन्मना तत्त्वं पाद्येन स्थानेन कनिष्ठभ्रातृत्वेन च बालः ॥२३॥ हीनो बुद्धिगुणः सत्त्वंय
स्य सः तेन हीनसत्त्वगुणाइत्यर्थः हीनस्थानेन चोपलक्षितः अत एव बालः त्वया विनावर्तयितुं जीवितु
मपि नोत्सहे किं पुनाराज्यं पालयितुमित्यर्थः ॥२४॥२५॥ सह संभूय मंत्रविदिति संबोधनं ॥२६॥ पाल

अतेन बालः स्थानेन जन्मना भवतोप्यहं ॥ स कथं पालयिष्यामि भूमिं भवति तिष्ठति ॥२३॥ ही
न बुद्धिगुणो बालो हीनः स्थानेन चाप्यहं ॥ भवता च विनाभूतो न वर्तयितुमुत्सहे ॥२४॥ इदं नि
खिलमप्यग्र्यं राज्यं पित्र्यमकंटकं ॥ अनुशाधि स्वधर्मेण धर्मज्ञः सह बांधवैः ॥२५॥ इहैव त्वाभि
षिंचंतु सर्वाः प्रकृतयः सह ॥ ऋत्विजः स वसिष्ठाश्च मंत्रविन्मंत्रकोविदाः ॥२६॥ अभिषिक्तस्त्व
मस्माभिरयोध्यां पालने व्रज ॥ विजित्य तरसा लोकान्मरुद्भिरिव वासवः ॥२७॥ ऋणानि त्रीण्यपा
कुर्वन्दुर्हृदः साधु निर्दहन् ॥ सुहृदस्तर्पयन्कामैस्त्वमेवात्रानुशाधि मां ॥२८॥ अद्यार्य मुदिताः संतु
सुहृदस्तेभिषेचने ॥ अद्य भीताः पलायंतु दुष्प्रदास्ते दिशो दश ॥२९॥

नेराज्यपरिपालननिमित्तं
तरसा बलेन लोकान्शत्रुल्लोकान् मरुद्भिरिवास्माभिः सह वासव इव त्वं विजित्य तां पालयेति शेषः
२७ ऋणानीति जायमानो वै ब्राह्मणस्त्रिभिर्ऋणवान्जायते इति श्रुतौ ब्राह्मणपदमुपलक्ष
णमिति भावः अत्रायोध्यां स्थित्वेति शेषः ॥२८॥ दुष्प्रदाः दुःखप्रदाः ॥२९॥ ॥

सव मे २

अत्र दंडकारण्ये वने चतुर्दश वर्षाणि वरदानिकं ॥ वरदाननिमित्तकं ॥ वासं नियुक्तः तं प्रति प्रेरित इत्यर्थः
अत्रायमप्यर्थः देवेभ्यो मद्दत्तवरदाननिमित्तकं अंतर्यामिणा तथा प्रेरणात् ॥ अत एवात्र दंडकारण्ये
एतत्प्रसंगे नैव तत्प्रयोजननिष्पत्तेरिति ॥ ७ ॥ ननु वने रक्ष आदिभ्यो नानादुःखसंभावनेत्यतो प्रतिद्वंद्व इ
ति समाधिकबलशत्रुहीनः सर्वेपि मत्तो हीनबला एवेति न तद्भयावकाश इति व्यंग्योर्थः ॥ आपा

तेन पित्राहमप्यत्र नियुक्तः पुरुषर्षभ ॥ चतुर्दश वने वासं वर्षाणि वरदानिकं ॥ ७ ॥ सोहं व
नमिदं प्राप्तो निर्जनं लक्ष्मणान्वितः ॥ सीतया चाप्रतिद्वंद्वः सत्यवादे स्थितः पितुः ॥ ८ ॥ भवान
पि तथेत्येव पितरं सत्यवादिनं ॥ कर्तुमर्हसि राजेंद्र क्षिप्रमेवाभिषेचनात् ॥ ९ ॥ ऋणान्मोचय
राजानं मत्कृते भरत प्रभुं ॥ पितरं त्राहि धर्मज्ञ मातरं चाभिनंदय ॥ १० ॥ श्रूयते धीमता तात
श्रुतिर्गीता यशस्विना ॥ गयेन यजमानेन गयेष्वेव पितॄन्प्रति ॥ ११ ॥ राम ॥

तत्स्त्व अप्रतिद्वंद्वः स्पर्धारहित इति ॥ ८ ॥ तथेत्येव तथैवेति पितृनियुक्त एवेति ॥ आर्हसीत्या
र्षः ॥ अर्हतीति पाठांतरं ॥ अत एव संबोधनं ॥ राजेंद्रेति ॥ ९ ॥ ऋणात् कैकेयीसंबंधिऋणात् ॥ मत्कृ
ते मत्प्रीत्यर्थं ॥ त्राहीत्यार्षं ॥ अभिनंदय ॥ न तु निंदय तत्कृतस्यार्थस्य बहूपकारकत्वादिति व्यंग्यं
१० ॥ स्वोक्तस्यावश्यकत्वे संमतिमाह ॥ श्रूयत इति ॥ गयेषु गयाप्रदेशेषु ॥ यजमानेन यागं कुर्व
ता पितॄन्प्रति ॥ पितृप्रीतिमुद्दिश्य ॥ ११ ॥

रामो राजनियोगपालनमेव परमो धर्मो॥ बहूनां सुखसाधनत्वादित्याशयेन वददित्याह॥ पुनरिति॥१॥ इदं उक्तं वाक्यं उपपन्नं युक्तिमत्॥ तत्र हेतुर्जात इत्यादि॥२॥ इदानीं त्वया राज्यस्य॥ मया वनवासस्य चाकरणे राज्ञः प्रतिज्ञाहानिकृतो महानधर्म इत्याह॥ पुरेति॥ तव पुत्रां जनिष्यते तस्मै राज्यं दास्यामीति प्रतिज्ञातवानित्यर्थः॥३॥ ननु॥ स्त्रीषु नर्म विवाहे च वृत्त्यर्थे प्राणसंकटे गोब्राह्मणार्थे हिंसायां नानृतं स्याज्जुगुप्सि

पुनरेवं ब्रुवाणं तं भरतं लक्ष्मणाग्रजः॥ प्रत्युवाच ततः श्रीमान् ज्ञातिमध्ये सुसत्कृतः॥१॥ उपपन्नमिदं वाक्यं यस्त्वमेवमभाषथाः॥ जातः पुत्रो दशरथात्कैकेय्यां राजसत्तमात्॥२॥ पुरा भ्रातः पिता नः स मातरं ते समुद्वहन्॥ मातामहे समाश्रौषीद्राज्यशुल्कमनुत्तमम्॥३॥ देवासुरे च संग्रामे जनन्यै तव पार्थिवः॥ संप्रहृष्टो ददौ राजा वरमाराधितः प्रभुः॥४॥ ततः सा संप्रतिश्राव्य तव माता यशस्विनी॥ अयाचत नरश्रेष्ठं द्वौ वरौ वरवर्णिनी॥५॥ तव राज्यं नरव्याघ्र मम प्रव्राजनं तथा॥ तच्च राजा तथा तस्यै नियुक्तः प्रददौ वरम्॥६॥

तमिति स्मृतेः कौसल्यायां विद्यमानायां कैकेयीविवाहस्य नर्मविवाहत्वात्तत्प्रतिज्ञाहानिर्न दोषायेत्यत आह॥ देवासुरे चेति॥ देवासुरे तत्संबंधिनि॥ एवं च उपकारप्रत्युपकाररूपत्वादेतदनृते महान्दोष इति भावः॥४॥ ततो हेतोः संप्रतिसंश्राव्य प्रतिज्ञां कारयित्वा॥५॥ याचनप्रकारमाह॥ तवेति॥ नियुक्तः वरबलेन नियोजितः तद्वरं तद्रूपवरं॥६॥

सौमित्रिर्लक्ष्मणः च राम विधौ लोट् संपादयामेत्यर्थः ॥ १९ ॥ इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके अ
योध्याकांडे सप्ताधिकशततमः सर्गः ॥ १०७ ॥ भरताश्वासनं कुर्वंतं रामं धर्मापेतं धर्ममार्गविरुद्धं लोका
यतिकमतावलंबनमितियावत् वच उवाचेत्यन्वयः ॥ १ ॥ साधुसम्यग्युक्तिमदिदं वच इति पूर्वान्वये

शत्रुघ्नस्त्वतुल्यमतिस्त्वते सहायः सौमित्रिर्मम विदितः प्रधानमित्रं ॥ चत्वारस्तनयवरा
वयं नरेंद्र सत्यस्थं भरत चराम माविषीद ॥ १९ ॥ इत्यार्षे श्रीरा॰ अयो॰ सप्तोत्तरशततमः
सर्गः ॥ १०७ ॥ आश्वासयंतं भरतं जाबालिर्ब्राह्मणोत्तमः ॥ उवाच रामं धर्मज्ञं धर्मापेतमिदं व
चः ॥ १ ॥ साधु राघव माभूत्ते बुद्धिरेवं निरर्थिका ॥ प्राकृतस्य नरस्येव त्वार्यबुद्धेस्तपस्विनः
॥ २ ॥ कः कस्य पुरुषो बंधुः किमाप्यं कस्य केनचित् ॥ एको हि जायते जंतुरेक एव विनश्यति ॥ ३ ॥
तस्मान्माता पिता चेति राम सज्जेत यो नरः ॥ उन्मत्त इव स ज्ञेयो नास्ति कश्चिद्धि कस्यचित् ॥
॥ ४ ॥ यथा ग्रामांतरं गच्छन्नरः कश्चिद्बहिर्वसेत् ॥ उत्सृज्य च तमावासं प्रतिष्ठेतापरेहनि ॥ ५ ॥

305

तत्र इदं शब्दार्थो राघवेत्यादि प्राकृतस्य पामरस्य नरस्येव निरर्थिका एवं बुद्धिः पितृवचः पालनी
यमित्येवं रूपा आर्यबुद्धेस्तपस्विनस्ते माभूत् ॥ २ ॥ कुतो माभूदित्यत्र पितापुत्रसंबंधस्यैव मिथ्या
त्वादित्याह क इति कस्य पुरुषस्य केनचित्संबंधात् किमाप्यं किं प्राप्यं न किमपीत्यर्थः संबंधा
भावादितिभावः संबंधाभावे हेतुमाह एको हीति ॥ ३ ॥ यः सज्जेत स उन्मत्त इव ज्ञेयः ॥ ४ ॥ ५ ॥

तांश्रुतिमाह पुन्नाम्न इति॥ पुरिति नरकनाम त्रायते इति कः प्रत्ययः व्युत्पत्त्यंतरमाह पितॄनिति॰ पितॄन् पातीत्यर्थे पुत्रस्य पृषोदरादित्वात्साधुत्वं पितॄन् उद्दिश्य कृतेष्टापूर्तादिना स्वर्लोकप्रापणेन तेषां रक्षणमित्याहुः॥१२

पुन्नाम्नो नरकाद्यस्मात्पितरं त्रायते सुतः॥ तस्मात्पुत्र इति प्रोक्तः पितॄन्यः पाति सर्वतः॥१२॥ एष्टव्या बहवः पुत्रा गुणवंतो बहुश्रुताः॥ तेषां वै समवेतानामपि कश्चिद्गयां व्रजेत्॥१३॥ एवं राजर्षयः सर्वे प्रतीता रघुनंदन॥ तस्मात्त्राहि नरश्रेष्ठ पितरं नरकात्प्रभो॥१४॥ अयोध्यां गच्छ भरत प्रकृतीरुपरंजय॥ शत्रुघ्नसहितो वीर सह सर्वैर्द्विजातिभिः॥१५॥ प्रवेक्ष्ये दंडकारण्यमहमप्यविलंबयन्॥ आभ्यां तु सहितो वीर वैदेह्या लक्ष्मणेन च॥१६॥ त्वं राजा भरत भव स्वयं नराणां वन्यानामहमपि राजराण्मृगाणां॥ गच्छ त्वं पुरवरमद्य संप्रहृष्टः संहृष्टस्त्वहमपि दंडकान्प्रवेक्ष्ये॥१७॥ छायां ते दिनकरभाः प्रबाधमानं वर्षत्रं भरत करोतु मूर्ध्नि शीतां॥ एतेषामहमपि काननद्रुमाणां छायां तामतिशयिनीं शनैः श्रयिष्ये॥१८॥ राम

गयां पितृस्वर्गसाधनं यथा गयाद्येत्र॰ एषा च पितॄणां परलोकसाधनं पुत्रेण वश्यं कार्यमित्यर्थे संमतिः॥१३॥ एवं पितृपरलोकसाधनं॥१४॥१५॥१६॥ वन्यानामिति॰ अनेन भाविवानरराजाधिपत्यादिसूचितं॥१७॥ दिनकरभा इति द्वितीयाबहुवचनं॰ वर्षत्रं छत्रं॰ शीतां छायामित्यन्वयः॥१८॥

बीजमात्रं निमित्तकारणमात्रं॰ मात्रपदेनोपादानत्वव्यावृत्तिः तर्ह्युपादानं किं तत्राह॰ ऋतुमन्मात्रेति ऋतुमत्यामात्रे तत्प्रसिद्धं षुवद्भावः यत्तादृशपामात्रगर्भे धृतं संयुक्तं परस्परमिलितं शुक्रं शोणितं च तदिह लोके पुरुषस्य पुरुषशरीरस्य जन्मनि उपादानकारणं भवतीत्यर्थः एवं च शुक्रशोणितयोगात् आरूढं पंचभूतसमूह एव पुरुषश्चेतनो न तस्य केनचित् संबंध इत्याशयः ११ गत इति॰ यत्र येषु गंतव्यं तत्र तेषु गतो लयं प्राप्तः त्वमपि तथैव लयं प्राप्स्यसीति स्थिरस्य कस्यचिदभावात् कः केन संबंध इति भावः उ

बीजमात्रं पिता जंतोः शुक्रं शोणितमेव च ॥ संयुक्तमृतुमन्मात्रा पुरुषस्येह जन्म तत् ॥ ११ ॥
गतः स नृपतिस्तत्र गंतव्यं यत्र तेन वै ॥ प्रवृत्तिरेषा भूतानां त्वं तु मिथ्या विहन्यसे ॥ १२ ॥ अ
र्थधर्मपरा ये ये तांस्तान् शोचामि नेतरान् ॥ ते हि दुःखमिह प्राप्य विनाशं प्रेत्य लेभिरे ॥ १३ ॥

क्ता एषा भूतसमूहरूपस्य तेषु लयप्राप्तिरूपा प्रवृत्तिर्मर्त्यानां स्वभावप्राप्तेति शेषः अतस्त्वं मिथ्या विहन्यसे राज्यरूपात्पुरुषार्थादिति शेषः १२ नन्वर्थं विद्यातेपि धर्मो मे भविष्यतीत्यत्राह॰ अर्थेत्या दि॰ अर्थं प्रत्यक्षसिद्धपुरुषार्थं प्राप्तेतं परित्यज्य ये ये आस्तिका धर्मपरास्तांस्तान् शोचामि॰ धर्मफलभोक्तुरभावादिति भावः तदेवाह॰ ते हीति॰ प्रेत्यांतसमये प्राप्य विनाशं भेजिरे न त्वत्रोपार्जितधर्मस्य तत्रावस्थितिरस्ति॰ प्राप्य विनाशं प्रतिपेदिरे इति पाठांतरं १३ ॥ ॥

306

आवासमात्रं पांथानामिव अतो नात्र सज्जनाः सज्जंते॥ ६॥ पित्र्यं राज्यमित्यास्ति कमतावलं विरामाभिप्रा
येणोक्तिः कापथं वनमार्गं आस्तिक सेव्यं मार्गं च॥ ७॥ एकवेणीधरत्वं विरहिणीत्वद्योतकं त्वात्वां॥ ८॥ ९॥ उक्तं
संबंधाभावमुपसंहरति नतेइति मिथ्यापितृवचनाभिनिवेशं मुक्त्वा राज्यं कुर्वेति यदुच्यते तत्कुरु

एवमेव मनुष्याणां पिता माता गृहं वसु॥ आवासमात्रं काकुत्स्थ सज्जंते नात्र सज्जनाः॥ ६॥
पित्र्यं राज्यं समुत्सृज्य स नार्हसि नरोत्तम॥ आस्थातुं कापथं दुःखं विषमं बहुकंटकं॥ ७॥ स
मृद्धायामयोध्यायामात्मानमभिषेचय॥ एकवेणीधरा हि त्वा नगरी संप्रतीक्षते॥ ८॥ राज
भोगाननुभवन्महार्हान्पार्थिवात्मज॥ विहर त्वमयोध्यायां यथा शक्रस्त्रिविष्टपे॥ ९॥
न ते कश्चिद्दशरथस्त्वं च तस्य न कश्चन॥ अन्यो राजा त्वमन्यस्तु तस्मात्कुरु यदुच्यते॥ १०॥

अन्यः त्वज्जनकादन्यः संप्रति राजा एवं च तएण भंगवादे नान्यत्वं गृह्णाशयतयोक्तं न न्वेवमपि तत्सं
तानानि विष्टतया कश्चित्संबंधो भवेत् अन्यथा पितरं विना पि पुत्रोत्पत्तिः स्यात् इति चेन्न तावता
पि निमित्तकारणत्वमेव नो पादानत्वं तेन यत्कालित्वादेरिव तवापि तेन न कश्चित्संबंध इत्याशयः॥ १०॥

रामा॰ अ॰
३०१

सतां प्रत्यक्षसिद्धस्यैव सत्यत्वं वदतां नाएव हि साधवो न तु शब्दप्रमाणकादेः सत्यत्वं वदंतद्गतिभावः भिन्नेप
देवासत्वं नामुक्तामित्यर्थो वा॰ सर्वल्लोकनिदर्शिनी सर्वलोकसंमतामित्यर्थः ॥१८॥ इति श्रीरामाभिरामे श्री
रामीये रामायणतिलके अयोध्याकांडे अष्टोत्तरशततमः सर्गः ॥१०८॥ तदेतत्खंडयति॰ रामः जाबा
लेरिति॰ सत्यपराक्रमः सत्यप्रधानः पराक्रमो यस्य सः सत्यात्मना वर इति पाठे सत्यस्वभावानां श्रेष्ठ
इत्यर्थः ॥ विप्रतिपन्नया॰ बाबात्सुक्तार्थे प्रतिपत्तिरहितया वुध्यायुक्तः सन्॰ स्वत्या वेदलक्षणसुवं

सतां बुद्धिपुरस्कृत्य सर्वलोकनिदर्शिनी ॥ राज्यं स त्वनिगृह्णीष भरतेन प्रसादितः ॥१९॥ इत्या
र्षे श्रीरामायणे वाल्मीकीये अयोध्याकांडे अष्टोत्तरशततमः सर्गः ॥१०८॥ जाबालेस्तु वचः
श्रुत्वा रामः सत्यपराक्रमः ॥ उवाच परया सूक्त्या बुध्या विप्रतिपन्नया ॥१॥ भवान्मे प्रियः
कामार्थं वचनं यदिहोक्तवान् ॥ अकार्यं कार्यसंकाशमपथ्यं पथ्यसन्निभं ॥२॥ निर्मर्यादस्तु
पुरुषः पापाचारसमन्वितः ॥ मानं न लभते सत्सु भिन्नचारित्रदर्शनः ॥३॥

(30)

चनात्त्वं बचेनो वा
च ॥१॥ प्रियकामार्थे॰ प्रीतिहेतुकामभोगसंपादनार्थे॰ ॥ अकार्यं परमार्थतः कर्तुमनर्हं॰ कार्यसंका
शं प्रमाणाभासयुक्तत्वात्॰ ॥ अपथ्यं दुःखोदर्कं ॥२॥ निर्मर्यादः उत्पथवर्ती॰ भिन्नचारित्रदर्शनः सा
धुसंमतचारित्रप्रतिपादकशास्त्राद्धि परीतव्यवहारप्रतिपादकलोकायतिकादिशास्त्रप्रसक्तः
सत्सु मानं पूजां न लभते ॥३॥

राम॰
३०१

नन्वेवंश्राद्धाद्याचारासंगतिस्तत्राह॰ तदादियत्पितृदेवत्यंश्राद्धकर्म इतितत्रप्रसृतः प्रवृत्तोयंजनः त
स्यान्नस्यस्वभोगसाधनस्यउपद्रवंनाशंकेवलंकरोति॰ पश्यविचारय॰ तामेवविचार्यायुक्तिमाह॰ मृतोहि
ति॥१४॥ननुतैरत्राभोजनेपितदुद्देशेनदत्तंलोकांतरेतमुपतिष्ठतीत्यतमर्थ॰ भोक्तृभावेनदुषितमपियुक्तं
तरेणादुषयति॰॥यदीति॰॥प्रवसतामुद्दिश्यकृत्वाश्राद्धंदद्यात्प्राप्तकालेत्लिङ्‌तद्दानमेवोचितमित्यर्थः॥ननु
तत्पथ्यशनंतस्मैदीयमानंपथ्यशनंपथ्यशनंपाथेयंन्याय्यंभवेत्॰ भारवहैनैनदुःखदत्वादितिभावः॥एते

त्रयस्काःपितृदेवत्यमितप्ययंप्रसृतोजनः॥अन्नस्योपद्रवंपश्यमृतोहिकिमशिष्यति॥१४॥यदिभु
क्तमिहान्येनदेहमन्यस्यगच्छति॥दद्यात्प्रवसतांश्राद्धंनतत्पथ्यशनंभवेत्॥१५॥दानसंवनना
त्येतेग्रंथामेधाविभिःकृताः॥यजस्वदेहिदीक्षस्वतपस्तप्यस्वसंत्यज॥१६॥सनास्तिपरमित्ये
तत्कुरुबुद्धिंमहामते॥प्रत्यक्षंयनदातिष्ठपरोक्षंपृष्ठतःकुरु॥१७॥

नैवन्यायेनदेवार्थदानमपिव्यर्थ
मित्युपपादितं॥१५॥एवंवैदिकाचारंप्रदुष्यतत्प्रतिपादकागमाप्रामाण्यमाह॰ दानेति॰॥यजस्वदेवपूजांकु
रु॰ देहिअन्नादिदानं॰ दीक्षस्वयागार्थं॰ तपश्चांद्रायणादिसंत्यज॰ प्रव्रजेत्येवंपरावेदादयोग्रंथाःदानसं
वननाःदानायवशीकरणोपायभूताःमेधाविभिःवार्तादिनाजीवनेक्लेशंपश्यद्भिःपामरप्रतारणायानाया
सेनधनग्रहणायकृताःअतोनतेप्रमाणमितिभावः॥१६॥परंएहिकात्परंपरलोकप्रयोजनंकिंचिद्धर्मो
ख्यंनास्तीतिबुद्धिंकुरु॰॥परोक्षंअनुमानशब्दादिगम्यंपृष्ठतःकुरुत्यज॥१७॥ ॥

किंच· त्वदुपदिष्टमार्गेतिष्ठन्नहं· प्रथमतः कामवृत्तोयथेष्टचारी स्यां तदनु अयं कृत्स्नोलोकस्तथा समु
पवर्तते· समुपवर्ततेत्यर्थः। एवंनिर्बंधेकारणमाह॥ यद्वृत्ता इति॥९॥ तस्मात्त्वदुपदिष्टस्य मार्गस्य
सर्वलोकनाशकत्वेनशास्त्रीयमार्गालंबनमेवोचितमित्याह॥ सत्यमिति· आनृशंसंभूतानुकंपा·
प्रधानंसनातनं· अनादिशास्त्रसिद्धंराजवृत्तंच सत्यमेव सत्यवचनमेव मुख्योराजाचारइत्य

कामवृत्तोन्वयंलोकः कृत्स्नः समुपवर्तते॥ यद्वृत्ताः संतिराजानस्तद्वृत्ताः संति हि प्रजाः॥९॥
सत्यमेवानृशंसंच राजवृत्तंसनातनम्॥ तस्मात्सत्यात्मकंराज्यं सत्येलोकः प्रतिष्ठितः॥१०॥
ऋषयश्चैवदेवाश्च सत्यमेव हि मेनिरे॥ सत्यवादी हि लोकेस्मिन्परंगच्छति चाक्षयम्॥११॥
उद्विजंते यथा सर्पान्नरादनृतवादिनः॥ धर्मः सत्यपरो लोके मूलं सर्वस्य चोच्यते॥१२॥

र्थः। यतोराजवृत्तंसत्यात्मकं· तस्मात्तेषांराज्यमपिसत्यात्मकं सत्यैकप्रतिष्ठितं· नकेवलंरा
ज्यमेवापितुसर्वोपिलोकः सत्येप्रतिष्ठितः॥१०॥ सत्यमेव हि मेनिरे· सत्यलोकांतसकललोक
प्रदमितिशेषः· परमक्षयंब्रह्मलोकं॥११॥ अनृतवादिनोनरात्तथोद्विजंते· यथासर्पात्· सत्यंपरं
श्रेष्ठंयस्यसः धर्मः सर्वस्यमूलमुच्यते॥१२॥

इदानीं वेदोक्ताचारणवपुंसामिहामुत्रसंमानहेतुरित्याह। कुलीनमिति। पुरुषमानिनं अवीरमिति यावत्। चारित्रं वेदानुमताचारः संपन्नः सन् कुलीनत्वादिख्यातिख्यापयति। असंपन्नश्चाकुलीनत्वादिति भावः ॥ ४ ॥ किंच। त्वत्संमताचारांगीकारे सर्वथानर्थप्राप्तिरेवेत्याह। अनार्य इत्यादि। आर्यसंस्थानस्तत्सदृशः शुचिः अशुचिरिव भासमान इति शेषः। लक्षणवत्। लक्षणायुक्तवज्जासमानो भवति। त्वदुक्ताचारव्यवहर्तेति शेषः। यदि अहं त्वदुपदिष्टं। लोकसंकरकारकमधर्ममार्गं धर्मवेषेण युक्तोभिपत्स्ये तदा विधिविवर्जितां क्रत्व

कुलीनमकुलीनं वा वीरं पुरुषमानिनं ॥ चारित्रमेव व्याख्याति शुचिं वा यदि वाशुचिं ॥ ४ ॥ अनार्यस्त्वार्यसंस्थानः शौचाद्धीनस्तथाशुचिः ॥ लक्षण्यवदलक्षण्यो दुःशीलः शीलवानिव ॥ ५ ॥ अधर्मं धर्मवेषेण यद्यहं लोकसंकरं ॥ अभिपत्स्ये शुभं हित्वा क्रियां विधिविवर्जितां ॥ ६ ॥ कश्चेतयानः पुरुषः कार्याकार्यविचक्षणः ॥ बहुमन्येत मां लोके दुर्वृत्तं लोकदूषणं ॥ ७ ॥ कस्य यास्याम्यहं वृत्तं केन वा स्वर्गमाप्नुयां ॥ अनया वर्तमानोहं वृत्त्या हीनप्रतिज्ञया ॥ ८ ॥

युक्तविधानरहितां क्रियां कृत्वा तत एव शुभं हित्वाऽशुभं प्राप्नुयामिति शेषः ॥ ६ ॥ तामेवाशुभप्राप्तिं दर्शयति। कश्चेतयान इति। चेतनः इत्यर्थः। लोकदूषणं परलोकदूषणमार्गालंबिनं ॥ ७ ॥ अनया त्वदुपदिष्टया वृत्त्या हीना सत्यपरिपालनविषयिणी प्रतिज्ञा यस्य तथा वर्तमानः केन साधनेन स्वर्गमाप्नुयां न केनापि किं चेदं त्वदुपदिष्टं वृत्तं कस्य किंसंबंधि अहं यास्यामि। मत्पित्रादिषु न कस्यापि। पित्रादिवृत्तानुसरणमेव न च येनास्य पितरो याता इति

रामा॰ अ
३०९

सोऽहं उक्तरीत्या एवं विवेकवानित्यर्थः ॥ ननु स्त्रीवशतया पितृकृते नियोगे किमियता निर्बंधनेन तत्रा
ह सत्येति । यतो मे पिता सत्यप्रतिज्ञः स्वप्रतिज्ञानसत्यांगीकारवान् समयी सदाचारवान् । अतस्ते
न सत्येन सत्यपरिपालनेन हेतुना सत्यमेव मां प्रतिकृतं उक्तमित्यर्थः ॥ १६ ॥ अतो लोभाद्राज्यस्य मोहाद्वा

सोऽहं पितुर्निदेशं तु किमर्थं नानुपालये ॥ सत्यप्रतिश्रवः सत्यं सत्येन समयीकृतं ॥ १६ ॥
नैव लोभान्न मोहाद्वा न चाज्ञानात्तमोन्वितः ॥ सेतुं सत्यस्य भेत्स्यामि गुरोः सत्यप्रतिश्रवः ॥ १७ ॥
असत्यसंधस्य सतश्चलस्यास्थिरचेतसः ॥ नैव देवा न पितरः प्रतीछंतीति नः श्रुतं ॥ १८ ॥

309

दुक्तस्य विस्मरणात् । प्रतिज्ञात्यागे दोषस्याज्ञानाद्वा । त्वदुक्तवाक्यात् शास्त्रादावश्रद्धारूपतमोयुक्तो
वा पूर्वं सत्यप्रतिश्रवः शपथपूर्वकं कृतप्रतिज्ञः सन्नैव भेत्स्यामि न च भेत्स्यामीति त्रिवारोक्त्यास
र्वथा दार्ढ्यं सूचितं ॥ १७ ॥ एवं सत्ये दृढस्थितौ हेतुमाह । असत्यसंधस्य प्रतिज्ञाविषयसत्यहीनस्य च
लस्य चंचलस्वभावस्य । तस्यैव विवरणमस्थिरेत्यादि ईदृशस्य सतः एतैर्गुणैर्युक्तस्य देवादयो हव्य
कव्यादि न गृह्णंतीति नः श्रुतं ॥ १८ ॥

राम
३०९

लोके ईश्वरः सत्यमेव सत्यपदवाच्य इति प्रसिद्ध इत्यर्थः तया सद्भिराश्रितो धर्मः सत्ये सत्यपदवाच्ये ईश्वरे प्रति
ष्ठिताः आदौ तस्यैव धर्मो परे उक्तत्वादित्यर्थः सत्ये पद्मा प्रतिष्ठितेति पाठांतरं पद्मा लक्ष्मीः सत्यमूलानि सर्वाणी
त्यनेन जगदुपादानप्रवर्तकत्वेन सर्वाधिष्ठानत्वेन च तत्सिद्धी दर्शिताः तस्यैव तत्त्वे हेतुमाह सत्यात्परं प
दं नास्ति अनेन तदितरस्य सर्वस्य मिथ्यात्वमायैव जगदुपादानकारणमभिन्न चेतनत्वं च दर्शितं एतेन चेतनान
नधिष्ठितानि मायैव जगदुपादानकारणमिति निरस्तं ॥ चेतनाधिष्ठानं विना तत्परिणामासंभवात् तस्याः
परिणामित्वेन मिथ्यात्वेन च तनाधिष्ठानत्वासंभवाच्च १३ ॥ एवं नास्तिकं प्रति ईश्वरं प्रसाध्य वेदप्रामाण्यं सा

सत्यमेवेश्वरो लोके सत्ये धर्मः सदाश्रितः ॥ सत्यमूलानि सर्वाणि सत्यान्नास्ति परं पदं १३ दत्तमि
ष्टं हुतं चैव तप्तानि च तपांसि च ॥ देवाः सत्यप्रतिष्ठानास्तस्मात्सत्यपरो भवेत् १४ ॥ एकः पालय
ते लोकमेकः पालयते कुलं ॥ मज्जत्येको हि निरये एकः स्वर्गे महीयते १५ ॥

धयति दत्तमित्यादि द
त्तादीनि प्रतिपादयंतो वेदाः सत्यप्रतिष्ठानाः सत्यादीश्वरात् श्वासप्रश्वासवत् आविर्भूता इति वक्तृ
दोषशंकाकलंकराहित्येन तत्प्रतिपादितदानादीनां फलसंवाददर्शनेन च सर्वत्र प्रामाण्यशंकारहि
ताः किंतु स्वतः प्रमाणभूता एवेति भावः तस्मात्सत्यस्येश्वरवाचकवाच्यत्वेन तदभेदात् सत्यपरः सत्य
पालनतत्परो भवेदित्यर्थः ॥ १४ ॥ वेदोक्तधर्माधर्मफलस्य प्रत्यक्षमनुभूयमानत्वेन तत्प्रामाण्यं प्रसिद्धमित्या
ह एक इति लोके राज्यं कुलं स्वकुलमात्रं एतेन पालनसाधनधर्मफलतारतम्यस्य वेदोक्तस्यानुभवो

अथसत्यस्यसर्वार्थसाधनत्वमाह भूमिरिति॰प्रार्थयंतीतिसत्यवंतमितिशेषः समनुवर्त्तते इतिशिष्ट इतिशेषः यदेवंततःसत्यमेवभजेतेत्यर्थः॥२२॥यद्वान् अवधार्ययुक्तत्वेननिश्चित्यमांप्रतियुक्तिरेव करः करणांयेषांतैर्वाक्यैरिदंभद्रंराज्यंहनिश्चयेनकुरुघस्वीकुरुषेति॰अश्रेष्ठमिवाहतदना र्यमन्याय्यमेवस्यात्॥२३॥अनार्यत्वमेवदर्शयन्॰राज्यंत्वंप्रतिगृह्णीष्वभरतेनप्रसादितइत्यस्योत्त

भूमिःकीर्तिर्यशोलक्ष्मीःपुरुषंप्रार्थयंतिहि॥सत्यंसमनुवर्त्तंतेसत्यमेवभजेततः॥२२॥श्रेष्ठं त्वनार्यमेवस्याद्यद्भवानवधार्यमां॥आहयुक्तिकरैर्वाक्यैरिदंभद्रंकुरुष्वह॥२३॥कथंत्वहं प्रतिज्ञायवनवासमिमंगुरोः॥भरतस्यकरिष्यामिवचोहित्वागुरोर्वचः॥२४॥स्थिरामयाप्र तिज्ञातोप्रतिज्ञागुरुसन्निधौ॥प्रहृष्टमनसादेवीकैकेयीचाभवत्तदा॥२५॥वनवासंवसन्ने वंशुचिर्नियतभोजनः॥मूलपुष्पफलैःपुण्यैःपितॄन्देवांश्चतर्पयन्॥२६॥संतुष्टपंचवर्गो हंलोकयात्रांप्रवाहये॥अकुहःश्रद्दधानःसन्कार्याकार्यविचक्षणः॥२७॥

रमाह॰कथमिति॰गुरोः पुरतइमंगुर्वाज्ञप्तं॥२४॥कैकेयीचेति॰एवंचतस्याहर्षदस्यपुनरहर्षदत्वमत्यंतमनुचितमिति भावः॥२५॥तर्पयन्प्रतिज्ञांपालयिष्यामीतिशेषः॥२६॥संतुष्टपंचवर्गःमूलादिभिस्तुष्टपंचेंद्रियव र्गः॰लोकयात्रांपितृवचनपालनव्यवहारंप्रवाहये॰प्रवाहरूपेणप्रवर्तयामीत्यर्थः॥अकुहः॰अ कपटशीलःश्रद्दधानआस्तिकः॥२७॥

प्रत्यगात्मनोजीवात्तुद्दिश्य प्रवृत्तमित्यर्थे प्रत्यगात्ममित्यार्षत्वात्साधुः इमं सत्यं सत्यपालनरूपं धर्मं· अहं ध्रुवं स
र्वधर्मेषु सुखं पश्यामि· अयं भारः वनवासे जटावल्कलादिभारः सत्यपालनरूपो वा पूर्वैः सत्पुरुषैराचीर्णस्त
दर्थमप्यभिनंद्यते आद्रियते ॥१९॥ ननु स्वधर्मो राज्यपालनमेव किमिति नाभिनंद्यते तत्राह क्षात्रमिति· धर्म
सहितं धर्मवत्प्रतिभासमानं· वस्तुतोऽधर्मं क्षुद्रादिभिः सेवितमीदृशं क्षात्रधर्मं पित्राज्ञाभंगेन राज्यकरण
रूपं अहं त्यक्ष्ये ननु न्याय्यं क्षात्रं धर्ममिति भावः ॥२०॥ अस्य पापस्य शरीरसाध्यत्वेपि कायिकवाचिकमान

प्रत्यगात्ममिमं धर्मं सत्यं पश्याम्यहं ध्रुवं ॥ भारः सत्पुरुषैश्चीर्णस्तदर्थमभिनंद्यते ॥१९॥ क्षात्रं ध
र्ममहं त्यक्ष्ये ह्यधर्मं धर्मसंहितं ॥ क्षुद्रैर्नृशंसैर्लुब्धैश्च सेवितं पापकर्मभिः ॥२०॥ कायेन कुरुते
पापं मनसा संप्रधार्य तत् ॥ अनृतं जिह्वया चाह त्रिविधं कर्म पातकं ॥२१॥

सिकसकलपापप्रस
क्तिरित्याह· कायेनेति· आदौ मनसा एवं कर्म करिष्य इति तत्पापं संप्रधार्य ततो जिह्वया अनृतं धर्मजनकं
ततो भिन्नमनृतं तत्कर्म कर्तव्यत्वेन जिह्वया तत्सहायभूतेषु पुरुषेषु आह ततः कायेन कुरुते तेनः पापक
र्मक्रियारूपं पापं त्रिविधं कायिकवाचिकमानसिकरूपं त्रिविधजनकमित्यर्थः तेन कायिकं पापं बहु
दुःखजनकमिति भावः कलौ तु पापसंकल्पादितो न दोष इत्युक्तं भागवते· नानुद्वेष्टि कलिं सम्राट् सा
रंग इव सारभुक्· कुशलान्याशु सिध्यंति नेतराणि कृतानि यत्· सम्राट् परीक्षित् सारमाह· कुशलानि पु
ण्यानि आशु संकल्पमात्रात्सिध्यंति· यथा मानसपूजा· इतराणि पापानि न· संकल्पमात्रान्न फलंतिय

अतो निंदामीति॰ अनयानुपदोक्तया एवंविधया अत्यंतैकप्रमाणवादिचार्वाकमतानुसारिणा चरंतं लोकनाशायाटंतं अत एव नास्तिकत्वादिगुणयुक्तं विषमस्थबुद्धिं अवैदिकदुर्मार्गप्रतिष्ठितबुद्धिं त्वा॰ यो मे पिताऽगृह्णात् याजकत्वेनांगीकृतवान्॰ तत्पितुः कर्म निंदामि ॥३३॥ बौद्धादयो राज्ञश्चोरवद्दंड्या इत्याह॰ यथा हीति॰ बुद्धो बुद्धमतानुसारी॰ तथा चोरवद्दंड्य इति हि प्रसिद्धं॰ ॥ नास्तिकं चार्वाकं तथाग

निंदाम्यहं कर्म कृतं पितुस्तद्यस्त्वामगृह्णाद्विषमस्थबुद्धिं ॥ बुध्यानयैवंविधया चरंतं
सुनास्तिकं धर्मपथादपेतं ॥३३॥ यथा हि चोरः स तथा हि बुद्धस्तथागतं नास्तिकमत्र विद्धि ॥ तस्माद्धि यः शक्यतमः प्रजानां स नास्तिके नाभिमुखो बुधः स्यात् ॥३४॥

तं तत्सदृशं चोरवद्दंड्यं विद्धि नास्तिकविशेषस्तथागतस्तमपि चोरवद्दंड्यमिति शेषः इत्यन्ये॰ वेदप्रामाण्यापहर्तृत्वेन तेषामपि चोरत्वात्॰ ॥ हि निश्चयेन तस्मात् प्रजानामनुग्रहाय राज्ञा चोरवदेव दंडयितुं शक्यतमो यः ॥ स चोरवदेव दंड्यः ॥ दंडायोग्ये तु बुधो ब्राह्मणो नास्तिके ऽभिमुखो न स्यात्॰ तत्संभाषणादि न कुर्वीतेत्यर्थः ॥ तुल्यन्यायात्॰ दंडासमर्थो ब्राह्मणोऽपि तद्विमुखः स्यादिति सूचितं ॥३४

शुभकरणे हेतुरग्निरित्यादि· यच्छुभंकर्मकर्तव्यंतेषां शुभकर्मणां तत्तल्लोकप्राप्तिः फलमितिभावः॥२८॥
शतमिति· अनेनपूर्वोक्तंसमर्थं अतीतानागतशक्रादीनांतत्तत्फलानुभवेनतत्तद्देहभागप्रामा
ण्यंदर्शितंच॥२९॥ नास्तिकवाक्यहेतुंनास्तिपरोलोकइतिवचनोपपादकं॥ यदिमुक्तमिहान्येने
त्याद्युक्तशुष्कतर्करूपं· अमर्षमाणं जाबालमितिशेषः॥ तस्यजाबालस्य॥ अनेननास्तिकवत्त

कर्मभूमिमिमांप्राप्यकर्तव्यंकर्मयच्छुभं॥ अग्निर्वायुश्चसोमश्चकर्मणांफलभागिनः॥२८॥
शतंक्रतूनामाहृत्यदेवराट्त्रिदिवंगतः॥ तपांस्युग्राणि चास्थायदिवंप्राप्तामहर्षयः॥२९॥ अ
मर्षमाणःपुनरुग्रतेजानिशम्यतन्नास्तिकवाक्यहेतुं॥ अथाब्रवीत्तंनृपतेस्तनूजोविगर्ह
माणोवचनानितस्य॥३०॥ सत्यंचधर्मंचपराक्रमंचभूतानुकंपांप्रियवादितांच॥ द्विजाति
देवातिथिपूजनंचपंथानमाहुस्त्रिदिवस्यसंतः॥३१॥ तेनैवमाज्ञाययथावदर्थमेकोदयंसं
प्रतिपद्यविप्राः॥ धर्मंचरंतः सकलंयथावत्कांक्षंतिलोकागममप्रमत्ताः॥३२॥

योब्राह्मणं अपिराज्ञोऽवश्यंवाग्दंडेनदंड्याइतिसूचितं॥३०॥ पराक्रमः चौर्यायणादितपः यतइमा
नित्रिदिवस्यपंथानमाहुः संतः॥३१॥ यतश्चनेनसद्वचनेनैवमर्थीएकोदयंमुख्यफलवंतंयथावदा
ज्ञायश्रुत्वाप्रतिपद्यश्रुत्यनुकूलतर्कैर्निर्णीयतंधर्ममप्रमत्ताः॥ सावधानायथावत् चरंतः लोकागमं

सचापिकालः लौकिकव्यवहारप्रयोजन इत्यर्थः॥ तत्प्रयोजनमाह-निवर्तनार्थमिति- निवर्तनरूपं प्रयोजनमुद्दि
श्यकारणं त्वदीयास्तिकत्वाद्यतिशयस्य लोके निसिद्धिसंपादनरूपकारणात् नास्तिकवागुक्ताः तादृ
शीवाणीं श्रुत्वा क्रुद्धस्य तवप्रसादनार्थंचैतत् नतास्तिकानामित्यादि उदीरितं॥ ३९॥ इति श्रीरामाभिरामेश्री
रा॰ रा॰ ति॰ अयो॰ नवोत्तरशततमः सर्गः॥ १०९॥ अथवसिष्ठो भगवतो जाबालिविषयकोपनाटनंश

सचापिकालोयमुपागतः शनैर्यथामयानास्तिकवागुदीरिता॥ निवर्तनार्थंतवरामकारणात्प्र
सादनार्थंचमयैतदीरितं॥ ३९॥ इत्यार्षे श्रीरामायणे अयोध्याकांडे नवोत्तरशततमः सर्गः॥ १०९॥
क्रुद्धमाज्ञायरामंतुवसिष्ठः प्रत्युवाचह॥ जाबालिरपिजानीते लोकस्यास्यगतागतिं॥ १॥ निवर्त
यितुकामस्तु त्वामेतद्वाक्यमब्रवीत्॥ इमांलोकसमुत्पत्तिं लोकनाथनिबोधमे॥ २॥ सर्वंसलिलमे
वासीत्पृथिवीतत्रनिर्मिता॥ ततः समभवद्ब्रह्मास्वयंभूर्दैवतैः सह॥ ३॥

३१२

मयित्तुं अभिषेकस्वीका
रतयाब्रह्माणमारभ्यज्येष्ठाभिषेकरूपंकुलाचारंकथयति- क्रुद्धमित्यादि- गतागतिं- परलोकग
मनंततः पुनरिहागतिंच अनेन नास्तिकतामूलं जाबालेर्नो॥ १॥ लोकनाथेत्यनेन लोकनाथावता
रत्वंध्वनयति॥ २॥ सर्वमिति- पूर्वाह्णांतेपत्स्तं सर्वंजगत् परात्मादौ सलिलमेवसलिलविग्रह
हिरण्यगर्भात्मनावस्थितमभूत् तत्रसलिलांतः पृथिवी निर्मिताः सलिलरूपेण भगवतास्वे
च्छयाब्रह्माविराड्रूपः दैवतैः सह अग्निर्वाग्भूत्वामुखंप्राविदित्याद्युपदिष्टरीत्या॥ ३॥

अथवेदोक्तधर्मे शिष्टाचारंप्रमाणयति॥ यतःत्वत्तोन्येइतिशेषः त्वदन्येद्विजाजनाः पूर्वतरेश्रेष्ठाश्चार्षमिदं यदाइतिपाठेनाध्याहारापेक्षातस्यैवयतइत्यर्थकत्वात् बहुनिशुभानिचक्रुः इमंलोकंपरंचलोकंजित्वाऐहिकामुष्मिकफलकामनांत्यक्त्वापिवेदोक्तोयंधर्मइत्येतावतैवकर्माणिचक्रुरितितात्पर्यंतस्माद्येद्विजाः स्वस्तिअहिंसासत्यादिकंकृतंतपोदानपरोपकारादिःहुतंयज्ञादिकुर्वतेवेदप्रामाण्यादेव॥३५॥ तथाधर्मेरताः

त्वत्तोजनाः पूर्वतरेद्विजाश्चशुभानिकर्माणिबहूनिचक्रुः॥ छित्वासदेमंचपरंचलोकंतस्माद्विजाः स्वस्तिकृतंहुतंच॥३५॥ धर्मेरताःसत्पुरुषैःसमेतास्तेजस्विनोदानगुणप्रधानाः अहिंसकावीतमलाश्चलोकेभवंतिपूज्यामुनयःप्रधानाः॥३६॥ इतिब्रुवंतंवचनंसदोषंरामंमहात्मानमदीनसत्वं॥ उवाचपथ्यंपुनरास्तिकंचसत्यंवचःसानुनयंचविप्रः॥३७॥ ननास्तिकानांवचनंब्रवीम्यहंनास्तिकोहंनचनास्तिकिंचन॥ समीक्ष्यकालंपुनरास्तिकोभवंभवेयकालेपुनरेवनास्तिकः॥३८॥

निष्ठावंतोयेतेप्रधानाःश्रेष्ठाःमुनयोवसिष्ठादयाऋषयपूज्याभवंतिलोकेनत्वादृशाइत्यर्थः॥३६॥ इतिधिक्कृतोजाबालिःस्वविषयकोपशमनायाहइतीतिःपथ्यंपरमार्थं॥३७॥ तदेवाहनेतिःकिंचनपरलोकादिनास्तिइतिनःकिंतुअस्त्येवंकालेःपारलौकिकव्यवहारकालेःकालेलौकिकव्यवहारकाले एवंचसर्वमतज्ञेनकालविशेषेन्यथाव्यवहारेपिनतस्यानास्तिकत्वंभवतीतिभावः॥३८॥

११ स त्रिशंकुः सत्यवचनात्स्वीयात् भगवतो विश्वामित्रस्य सत्यप्रतिज्ञानाच्च ॥१२॥ धुंधुमाराद्युवनाश्व इ
ति· त्रिशंकुसुतो युवनाश्व इत्यन्यत्र श्रूयमाणं कल्पांतरविषयं· यद्वान्यत्र त्रिशंकुसुत इत्यस्य तत्पौ
त्र इत्यर्थः ॥१३॥ पुत्रौ द्वाविति· तत्र ध्रुवसंधिर्ज्येष्ठः तत्पुत्रावलंबनेनाग्रेयोध्याराजपरंपरावचनेन

अनरण्यान्महाराज पृथू राजा बभूव ह ॥ तस्मात्पृथोर्महातेजास्त्रिशंकुरुदपद्यत ॥११॥ स
सत्यवचनाद्वीरो सशरीरो दिवं गतः ॥ त्रिशंकोरभवत्सूनुर्धुंधुमारो महायशाः ॥१२॥ धुंधुमारा
न्महातेजा युवनाश्वो व्यजायत ॥ युवनाश्वसुतः श्रीमान्मांधाता समपद्यत ॥१३॥ मांधातुस्तु महा
तेजाः सुसंधिरुदपद्यत ॥ सुसंधेरपि पुत्रौ द्वौ ध्रुवसंधिः प्रसेनजित् ॥१४॥ यशस्वी ध्रुवसंधेस्तु
भरतो रिपुसूदनः ॥ भरतात्तु महाबाहोरसितो नाम जायत ॥१५॥ यस्यैते प्रतिराजान उदपद्यं
त शत्रवः ॥ हैहयास्तालजंघाश्च शूराश्च शशबिंदवः ॥१६॥ तांस्तु सर्वान्प्रतिव्यूह्य युद्धे रा
जा प्रवासितः ॥ स च शैलवरे रम्ये बभूवाभिरतो मुनिः ॥१७॥ द्वे चास्य भार्ये गर्भिण्यौ बभूवतु
रिति श्रुतिः ॥ तत्र चैका महाभागा भार्गवं देववर्चसं ॥१८॥

ज्येष्ठस्यैवाभिषेक इति सूचितं ॥१४॥१५॥
यस्य असितस्य एते प्रतिशत्रव उदपद्यंत सोभवदित्यन्वयः ॥१६॥ तान् हैहयादिचतुर्विधशत्रू
न् युद्धे स्वसैन्यप्रतिव्यूह्यावस्थितोपि शत्रुबाहुल्यात्तज्जयोशक्य इति बुध्वा प्रवासितः संजात
प्रवासो बभूव· शत्रुजयोद्देशेन हिमवद्गिरिं तपसे जगामेत्यन्वयः ॥१७॥ इति श्रुतिः प्रसिद्धिः ॥१८॥

ततः सः त्रिमूर्तेर्विराजो विश्वात्मकोंशो वराहरूपो भूत्वा वसुंधरां प्रोज्जहार तस्यैव विराजो रजःप्रधानः सृष्टि
व्यापारवानंशो ब्रह्माइतिव्यवह्रियमाणः सर्वं जगत् पुत्रैः सह निजानुग्रहप्राप्तसृष्ट्यादिशक्तिमद्भिर्दक्षादि
भिः सह असृजत ॥ ४ ॥ नन्वसावेव सर्वादिर्नेत्याह ॥ आकाशप्रभव इति ॥ आकाशपदेन कारणोपाधिकं ब्र

स वराहस्ततो भूत्वा प्रोज्जहार वसुंधरां ॥ असृजच्च जगत्सर्वं सह पुत्रैः कृतात्मभिः ॥ ४ ॥ आकाशप्र
भवो ब्रह्मा शाश्वतो नित्य अव्ययः ॥ तस्मान्मरीचिः संजज्ञे मरीचेः कश्यपसुतः ॥ ५ ॥ विवस्वान्कश्य
पाज्जज्ञे मनुर्वैवस्वतः स्वयं ॥ स तु प्रजापतिः पूर्वमिक्ष्वाकुस्तु मनोः सुतः ॥ ६ ॥ यस्येयं प्रथमं दत्ता स
मृद्धा मनुना मही ॥ तमिक्ष्वाकुमयोध्यायां राजानं विद्धि पूर्वकं ॥ ७ ॥ इक्ष्वाकोस्तु सुतः श्रीमान्कुक्षिरि
त्येव विश्रुतः ॥ कुक्षेरथात्मजो वीर विकुक्षिरुपपद्यत ॥ ८ ॥ विकुक्षेस्तु महातेजा बाणः पुत्रः प्रता
पवान् ॥ बाणस्य च महाबाहुः अनरण्यो महातपाः ॥ ९ ॥ नानावृष्टिर्बभूवास्मिन्न दुर्भिक्षः सतां वरे
अनरण्ये महाराजे तस्करो वापि कश्चन ॥ १० ॥

हेश्वरारव्यं ब्रह्मेति त्रिमूर्तेर्ग्रहणं ॥ अस्मिन् शा
श्वतत्वनित्यत्वाव्ययत्वान्यापेक्षकानि तस्माद्धिराजो ब्रह्मणः ॥ ५ ॥ तत्र मन्वन्तरामानसी सृष्टिः मनोः
देत्रैः इक्ष्वाकुः ॥ ६ ॥ तस्य प्रसादात्क्षत्रियत्वात् ॥ समृद्धा चतुःसमुद्रवसना मही सर्वाभूर्दत्ता पित्रा म
नुनेति शेषः ॥ ७ ॥ विश्रुतः प्रसिद्धः ॥ ८ ॥ ९ ॥ स तां वरे श्रेष्ठे अस्मिन् अनरण्ये राज्यं कुर्वता नानावृष्टि
र्नेनन्म्लोवादुर्भिक्षः ॥ १० ॥

रामा-अ· कल्माषपादपुत्रः शंखणनामा· यः शंखणस्तु तत्प्रसिद्धं वीर्यपराक्रमं· युद्धे प्राप्यदैवात्सहसैन्यो
३१४ व्यनीनशत्तनष्टोऽभूत्स्वार्थेणिरितिकतकः तीर्थस्तु· यःशंखणः तद्वीर्यं वसिष्ठवीर्यं आसाद्य·

कल्माषपादपुत्रोऽभूच्छंखणस्त्विति निःश्रुतं॥ यस्तु तद्वीर्यमासाद्य सहसैन्योव्यनीनशत्
॥२९॥ शंखणस्य तु पुत्रोऽभूच्छूरः श्रीमान्सुदर्शनः॥ सुदर्शनस्याग्निवर्णा अग्निवर्णस्य शी
घ्रगः॥३०॥ शीघ्रगस्य मरुः पुत्रो मरोः पुत्रः प्रशुश्रवः॥ प्रशुश्रवस्य पुत्रोऽभूदंवरीषो महामतिः
॥३१॥ अंबरीषस्य पुत्रोऽभून्नहुषः सत्यविक्रमः॥ नहुषस्य च नाभागः पुत्रः परमधार्मिकः॥३२॥
अजश्च सुव्रतश्चैव नाभागस्य सुतावुभौ॥ अजस्य चैव धर्मात्मा राजा दशरथः सुतः॥३३॥ तस्य
ज्येष्ठोऽसि दायादो राम इत्यभिविश्रुतः॥ तद्गृहाण स्वकं राज्यमवेक्षस्व जगन्नृप॥३४॥ इ
क्ष्वाकूणां हि सर्वेषां राजा भवति पूर्वजः॥ पूर्वजेनावरः पुत्रो ज्येष्ठो राजाभिषिच्यते॥३५॥

314

तत्शापात्राक्षसत्वं प्राप्य· कल्माषपादो राक्षसभावेन स्वसैन्यं स्वपुत्रं शंखणं च भक्षितवानिति
कथ्येत्याह॥२९॥३०॥३१॥३२॥ अजोनाभागज्येष्ठपुत्रः॥३३॥ दायादः सुतः दायादो सुतबांधवौ· तत्त
स्मात्स्वकं राज्यं गृहाण॥३४॥ पूर्वजे विद्यमानेऽवरः कनिष्ठो नाभिषिच्यते· अपितु ज्येष्ठ एवाभिषिच्यते॥३५

राम
३१४

१८ तत्र चेत्यादि बालकांडे व्याख्यातप्रायं ॥१९॥२०॥२१॥२२॥ तेनैव सह जात इति शेषः २३ अखानयत् स्वपु

ववंदे पद्मपत्राक्षी कांक्षिणी पुत्रमुत्तमं ॥ एका गर्भविनाशाय सपत्न्यै गरलं ददौ ॥१८॥ भार्गवश्च्यवनो नाम हिमवंतमुपाश्रितः ॥ तमृषिं साभ्युपागम्य कालिंदी त्वभ्यवादयत् ॥१९॥ स तामभ्यवदत् प्रीतो वरेप्सुं पुत्रजन्मनि ॥ पुत्रस्ते भविता देवि महात्मा लोकविश्रुतः ॥२०॥ धार्मिकश्च सुभीमश्च वंशकर्त्तारिसूदनः ॥ श्रुत्वा प्रदक्षिणं कृत्वा मुनिं तमनुमान्य च ॥२१॥ पद्मपत्रसमानाक्षं पद्मगर्भसमप्रभं ॥ ततः सा गृहमागम्य पत्नी पुत्रमजायत ॥२२॥ सपत्न्या तु गरस्तस्यै दत्तो गर्भजिघांसया गरेण सह तेनैव तस्मात्स सगरोभवत् ॥२३॥ स राजा सगरो नाम यः समुद्रमखानयत् ॥ इष्ट्वा पर्वणि वेगेन त्रासयान इमाः प्रजाः ॥२४॥ असमंजस्तु पुत्रोभूत् सगरस्येति नः श्रुतं ॥ जीवन्नेव स पित्रा तु निरस्तः पापकर्मकृत् ॥२५॥ अंशुमानपि पुत्रोभूदसमंजस्य वीर्यवान् ॥ दिलीपोंशुमतः पुत्रो दिलीपस्य भगीरथः ॥२६॥ भगीरथात्ककुत्स्थश्च काकुत्स्था येन तु स्मृताः ॥ ककुत्स्थस्य तु पुत्रोभूद्रघुर्येन तु राघवः ॥२७॥ रघोस्तु पुत्रस्तेजस्वी प्रवृद्धः पुरुषादकः ॥ कल्माषपादः सौदास इत्येवं प्रथितो भुवि ॥२८॥

त्रैरिति शेषः इष्ट्वा दीक्षितो भूत्वा वेगेन खनन वेगेन त्रासयान उद्वेजयन् ॥२४॥२५॥२६॥ येन कूटस्थेन ककुत्स्थेन येन रघुणा राघवपदवाच्याः ॥२७॥ रघोः पुत्रः प्रवृद्धादि

परिषदः त्वत्संबंधिनः अमात्याः ज्ञातयो बांधवाः नृपाः सेवकनृपाः एषु स्ता रूपं धर्मं चरन्ननुतिष्ठन्नित्यर्थः ५
मातुः शुश्रूषणे वचनकरणे च अतिवर्तितुं नार्हसीत्यर्थः पितुः शतगुणं माता गौरवेणातिरिच्यत इति
स्मृतेरित्याशयः ६ आत्मानं त्वां प्रतिराज्यप्रत्यर्पणपूर्वं प्रतिनिवृत्तिं याचमानस्य वचः कुर्वन्नित्यर्थः

इमा हि ते परिषदो ज्ञातयश्च नृपास्तथा॥ एषु तात चरन्धर्मं नातिवर्तेः सतां गतिं ५ वृद्धाया
धर्मशीलाया मातुर्नार्हस्यवर्तितुं॥ अस्या हि वचनं कुर्वन्नातिवर्तेः सतां गतिं ६ भरतस्य व
चः कुर्वन्याचमानस्य राघव॥ आत्मानं नातिवर्तेस्त्वं सत्यधर्मपराक्रम ७ एवं मधुरमु
क्तः स गुरुणा राघवः स्वयं॥ प्रत्युवाच समासीनं वसिष्ठं पुरुषर्षभः ८ यन्मातापितरौ वृ
त्तं तनये कुरुतः सदा॥ न सुप्रतिकरं तत्तु मात्रा च यत्कृतं॥ ९ यथाशक्तिप्रदानेन स्वापनो
च्छादनेन च॥ नित्यं च प्रियवादेन तथा संवर्धनेन च॥ १०॥ राम ॥

पित्रा२

७ ८ मातापितरौ यद्वृत्तं तनये कुरुतः यादृशं पुत्रस्योपकारं कुरुतः ताभ्यां कृतमुपकाररूपं
वस्तु यत्तन्न सुप्रतिकरं अशक्यप्रत्युपकारमित्यर्थः ९ तदेवाह यथाशक्तिप्रदानेन बाल्ल
स्य जीवनार्थपदार्थभोजनशक्त्यनुरोधतः क्षीरान्नादिप्रदानेन उच्छादनं उद्वर्तनं तिलपिष्टा
दिना संवर्धनं क्रीडनं एतैर्यत्ताभ्यां कृतं तन्न सुप्रतिकरमित्यन्वयः १० ॥

कुलधर्मं कुलक्रमागतं ज्येष्ठाभिषेकधर्मं विहंतुं नार्हसि प्रभूतरत्नां प्रभूतावांतरदेशां ॥ ३६ ॥ इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके अयोध्याकांडे दशाधिकशततमः सर्गः ॥ ११० ॥ मनुमारभ्य त्वत्पर्यंतं ज्येष्ठेनैव राज्यं पाल्यते इति न्यायेन निवर्त्यमानस्यापि तदनंगीकारमालोच्यापि तद्वचनादपि मद्वचनं गरी

सराघवाणां कुलधर्ममात्मनः सनातनं नाद्य विहंतुमर्हसि प्रभूतरत्नामनुशाधि मेदिनीं प्रभूतराष्ट्रां पितृवन्महायशाः ॥ ३६ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये अयोध्याकांडे दशोत्तरशततमः सर्गः ॥ ११० ॥ वसिष्ठः स तदा राममुक्त्वा राजपुरोहितः अब्रवीद्धर्मसंयुक्तं पुनरेवापरं वचः ॥ १ ॥ पुरुषस्येह जातस्य भवंति गुरवः सदा आचार्यश्चैव काकुत्स्थ पिता माता च राघव ॥ २ ॥ पिता ह्येनं जनयति पुरुषं पुरुषर्षभ प्रज्ञां ददाति चाचार्यस्तस्मात्स गुरुरुच्यते ॥ ३ ॥ स तेहं पितुराचार्यस्तव चैव परंतप मम त्वं वचनं कुर्वन्नातिवर्तेः सतां गतिं ॥ ४ ॥

यद्इति वाक्यमुपक्रमते वसिष्ठ इति ॥ १ ॥ गुरवः उपास्याः ॥ २ ॥ जनयति शरीरमात्रेण प्रज्ञां ददाति उपनयनसंस्कारपूर्वं वेदविषयां प्रज्ञां ददाति तस्मादाचार्य एव गुरुः समवाये गुरुरुच्यते तदुक्तमापस्तंबेन आचार्यः श्रेष्ठो गुरूणां स हि विद्यातस्तं जनयति तच्छ्रेष्ठं जन्म शरीरमेव मातापितरौ जनयतः शीयत्स्वभावं सर्वयोनिसुलभं प्राकृतं मलजं शरीरमिति ॥ ३ ॥ नातिवर्तेः नातिवर्तेथाः स इ निभ्रंशो न भवतीत्यर्थः ॥ ४ ॥

किंकुर्वाणं किमन्यायं कुर्वाणं ॥ १६ ॥ ब्राह्मण॰ धनादिना विजित इति शेषः एकपार्श्वेनेति॰ ॥ प्रत्युपवेशाध
र्मो पलक्षणं॰ ॥ अनेनक्षत्रियाणामेतत्करणे प्रायश्चित्तमिति सूचितं ॥ १७ ॥ तस्मादुत्तिष्ठति ॥ १८ ॥ आसी
न एव प्रत्युपविष्ट एव॰ नानुशासथ॰ ॥ नानुशिष्ठेत्यर्थः इति उवाचेत्यन्वयः ॥ १९ ॥ काकुत्स्थ रामं प्रति रा
घवो भवान्भरतः सम्यग्वदतीति जानीमः ॥ एषोपि महाभागो रामः पितुर्वचसि तिष्ठति॰ तदपि सम्य

तमुवाच महातेजा रामो राजर्षिसत्तमः ॥ किं मां भरत कुर्वाणं तात प्रत्युपवेक्ष्यसे ॥ १६ ॥ ब्राह्म
णो ह्येकपार्श्वेन नरान्रोद्धुमिहार्हति ॥ नतु मूर्द्धाभिषिक्तानां विधिः प्रत्युपवेशने ॥ १७ ॥ उ
त्तिष्ठ नरशार्दूल हित्वैतद्दारुणं व्रतं ॥ पुरवर्यमितः क्षिप्रमयोध्यां याहि राघव ॥ १८ ॥ आसी
नस्त्वेव भरतः पौरजानपदं जनं ॥ उवाच सर्वतः प्रेक्ष्य किमार्यं नानुशासथ ॥ १९ ॥ ते तदोचुर्म
हात्मानं पौरजानपदाजनाः ॥ काकुत्स्थमभिजानीमः सम्यग्वदति राघवः ॥ २० ॥ एषोपि हि म
हाभागः पितुर्वचसि तिष्ठति ॥ अत एव न शक्ताः स्म व्यावर्तयितुमंजसा ॥ २१ ॥ तेषामाज्ञाय
वचनं रामो वचनमब्रवीत् ॥ एवं निबोध वचनं सुहृदां धर्मचक्षुषां ॥ २२ ॥

गेव यदेवमत एवेत्य
र्थः अत्र भगवतास्वव्यावर्तन निश्चयेनागतानामपि पौरादीनामंतर्यामि विधया स्वानुकूलवचन
प्रयोगः कारितः भरतस्य तु यशः ख्यापनाय ज्येष्ठेक निष्ठे नैवं वर्तितव्यमिति लोकव्यवहार बोधना
य च तथा प्रवर्तनमिति प्रतिभाति ॥ २० ॥ २१ ॥ रामो वचनमब्रवीदिति भरतं प्रतीति शेषः धर्मचक्षुषां

316

जनयिता उत्पादकः पितानतुगौणः पितायदाज्ञापयत्वनवासरूपं एवंचभवदाज्ञातः पूर्वंतेनाज्ञादान
त्मयाचावश्यमितिप्रतिज्ञानात् भवदाज्ञयापितदन्यथाकरणमधुनात्यंतमनुचितमितिभावः ॥११॥
प्रत्यनंतरंसमीपवर्तिनं ॥१२॥ अयंप्रत्युपवेक्ष्यामि ॥ आर्यमुद्दिश्यप्रत्युपवेशनकर्मकरिष्येइत्यर्थः
तच्चोपरोद्धव्यस्यगृहद्वारसमीपेकुशेषु यावत्कार्यसिद्धिनिराहारतया ॥ अवगुंठिताऽननस्यण

सहिराजादशरथोपिताजनयितामम ॥ आज्ञापयन्मांयत्तस्यनतन्मिथ्याभविष्यति ॥११॥ एव
मुक्तेतुरामेणभरतःप्रत्यनंतरं ॥ उवाचविपुलोरस्कः सूतंपरमदुर्मनाः ॥१२॥ इहतुस्थंडिले
शीघ्रंकुशानास्तरसारथे ॥ आर्यंप्रत्युपवेक्ष्यामियावन्मेसंप्रसीदति ॥१३॥ निराहारोनि
रालोकोधनहीनोयथाद्विजः ॥ शयेपुरस्ताच्छालायांयावन्मांप्रतियास्यति ॥१४॥ सतुराम
मवेक्षंतंसुमंत्रंप्रेक्ष्यदुर्मनाः ॥ कुशोत्तरमुपस्थाप्यभूमावेवास्थितःस्वयं ॥१५॥

कपार्श्वेनैवपार्श्वांतरपरिवृत्तिराहित्येनशयनमितिं ॥१३॥ एत्तदुत्तरं निराहारइत्यादिपद्यंप्रक्षिप्तमिति
कतकस्वरसः धनहीनः अधमर्णाधनहीनःकृतोद्विजः उत्तमर्णोयथास्वधनग्रहणायाधमर्णद्वारि
शेतेतद्वद्हंशये यावन्मांमद्वचनमंगीकृत्यप्रतियास्यति अयोध्यामित्यर्थस्तस्य ॥१४॥ सतुभरतःराम
मवेक्षंतं प्रतीक्षमाणं सुमंत्रेप्रेक्ष्यतदनुरोधात्कुशानयनेविलंबमानमितियावत् कुशोत्तरंकुशा
स्तरणं स्वयमेवोपस्थाप्यआस्तीर्यभूमावेवास्थितः प्रत्युपवेशनमनुष्ठितवानित्यर्थः ॥१५॥

अत्र भरते सर्वमेव कल्याणं राज्यपरिपालनादिरूपं संभवयामीति शेषः ॥ ३० ॥ ३१ ॥ तद्वचनं कैकेयीवच
नं मोचयानेन मोचयमानेन एवं मदुक्तकरणेन त्वमपि पितरमनतान्मोचयेति ध्वनिः ॥ ३२ ॥ इति श्री
रामाभिरामे श्रीरामीये रामायणतिलके अयोध्याकांडे दशाधिकशततमः सर्गः ॥ १११ ॥ भ्रातभ्यामि

जानामि भरतं त्वां तं गुरुसत्कारकारिणं ॥ सर्वमेवात्र कल्याणं सत्यसंधे महात्मनि ॥ ३० ॥ अने
न धर्मशीलेन वनात्प्रत्यागतः पुनः ॥ भ्रात्रा सह भविष्यामि पृथिव्याः पतिरुत्तमः ॥ ३१ ॥ वृतो राजा
हि कैकेय्या मया तद्वचनं कृतं ॥ अनृतान्मोचयानेन पितरं तं महीपतिं ॥ ३२ ॥ इत्यार्षे श्री
रामायणे अयोध्याकांडे एकादशोत्तरशतमः सर्गः ॥ १११ ॥ तमप्रतिमतेजोभ्यां भ्रातृभ्यां रोमह
र्षणं ॥ विस्मिताः संगमं प्रेक्ष्य समुपेता महर्षयः ॥ १ ॥ अंतर्हितास्तु मुनिगणाः स्थिताश्च परमर्षयः
तौ भ्रातरौ महाभागौ काकुत्स्थौ प्रशशंसिरे ॥ २ ॥ सदार्यौ राजपुत्रौ द्वौ धर्मज्ञौ धर्मविक्रमौ
श्रुत्वा वयं हि संभाषामुभयोः स्पृहयामहे ॥ ३ ॥

त्यार्षीतती याभ्रात्रोः संगममित्यर्थः संगमं प्रे
क्ष्य विस्मिताइत्यन्वयः समुपेताः स्वार्थ रावणवधसंपत्तये तत्रस्थले समवेता महर्षयो नारदाद्याः
१ ॥ अंतर्हिताः तयोः संगमं द्रष्टुमागताः अदृश्यरूपा आकाशस्थाः ॥ २ धर्मविक्रमौ धर्ममार्गवर्त्तिनौ
उभयोः संभाषां संभाषणं श्रुत्वोभाभ्यां स्पृहयामहे प्रीता भवामः यद्वा तादृशसंभाषणं श्रोतुं पुनः
पुनर्वांछामहे इति ॥ ३ ॥ ॥ राम ॥ राम ॥ राम ॥

उभयं त्वद्विषयं मद्विषयं च वचनं श्रुत्वा संपश्य विचारय विचारेण पि कर्तव्यं निश्चेतुमशक्तश्चेन्मयोक्तं कुरु इति शेषः तत्स्वोक्तमाह उत्तिष्ठेति क्षत्रियाविहितप्रवेशनप्रायश्चित्तमाह मां च स्पृश तथोदकं उदकस्पर्शश्चाचमनार्थः ॥२३॥ परिषदः सभ्याः ॥२४॥ न याचे न याचितवान् ॥ नानुशासामि नानुशिष्टवान् शब्दः नानुजानामि वनवासायेति शेषः नाभिजानामीति पाठे वनवासोऽप्युक्तमिति शेषः ॥२५॥ अहमेव प्रतिनिधिः

एतच्चैवोभयं श्रुत्वा सम्यक्संपश्य राघव ॥ उत्तिष्ठ त्वं महाबाहो मां च स्पृश तथोदकं ॥२३॥ अथोत्थाय जलं स्पृष्ट्वा भरतो वाक्यमब्रवीत् ॥ शृण्वंतु मे परिषदो मंत्रिणः शृणुयुस्तथा ॥२४॥ न याचे पितरं राज्यं नानुशासामि मातरं ॥ एवं परमधर्मज्ञं नानुजानामि राघवं ॥२५॥ यदि त्ववश्यं वस्तव्यं कर्तव्यं च पितुर्वचः ॥ अहमेव निवत्स्यामि चतुर्दश वने समाः ॥२६॥ धर्मात्मा तस्य सत्येन भ्रातुर्वाक्येन विस्मितः ॥ उवाच रामः संप्रेक्ष्य पौरजानपदं जनं ॥२७॥ विक्रीतमाहितं क्रीतं यत्पित्रा जीवता मम ॥ न तल्लोपयितुं शक्यं मयावा भरतेन वा ॥२८॥ उपाधिर्न मया कार्यो वनवासे जुगुप्सितः ॥ युक्तमुक्तं च कैकेय्या पित्रा मे सुकृतं कृतं ॥२९॥

घित्वेनेति शेषः ॥२६॥ तस्य भ्रातुः भरतस्य ॥२७॥ यज्जीवता पित्रा विक्रीतं मूल्यं गृहीत्वा दत्तं आहितं आधिरूपेणान्यस्तं क्रीतं मूल्यं दत्वा गृहीतं एवं चेदं राज्यं कैकेय्यै आधिरूपेण दत्तं विक्रीतं चेति भावः ॥२८॥ उपाधिः प्रतिनिधिः जुगुप्सितत्वं च स्वस्य तत्समर्थत्वात् असमर्थैर्हि कर्तरि स विहितः उक्तौ कृतौ च युक्तत्वं वरस्य रूपकरणात् याकरणार्थत्वात् बहुप्रकारकत्वात् ख्यातस्तस्याः मातुस्तस्य पितुश्च वचनमवश्यमेव कार्यमिति शेषः। अयुक्तवादित्वे हि

अथ कालकं नास्वस्य रत्तणा शक्तिं दर्शयति· रक्षितुमिति·। कोऽसहायः रक्तान् अनुरक्तान् ॥११॥ हियतस्त्वामे
वप्रतीक्षंते ॥१२॥ अतइदंराज्यंप्रतिपद्यस्वीकृत्यकस्मिंश्चित्स्थापयहि· हिवाकाल्ल्कारो॥ हि यतः सः त्वद्
त्तराज्योलोकपालनेशक्तिमान्भवति· शक्तिमानसीतिपाठे· अयंमदीयइतिस्वीकारमात्रेणलोक

रक्षितुंसुमहद्राज्यमहमेकस्तु नोत्सहे॥ पौरजानपदांश्चापिरक्तान्रंजयितुंतदा॥११॥ ज्ञातयश्चा
पियोधांश्चमित्राणिसुहृदश्चनः॥ त्वामेवहिप्रतीक्षंतेपर्जन्यमिवकर्षकाः॥१२॥ इदंराज्यंमहा
प्राज्ञस्थापयप्रतिपद्यहि॥ शक्तिमान्सहिकाकुत्स्थलोकस्यपरिपालने॥१३॥ एवमुक्त्वापत
द्भ्रातुःपादयोर्भरतस्तदा॥ भृशंसंप्रार्थयामासरामवेतिप्रियंवदन्॥१४॥ तमंकेभ्रातरंकृ
त्वारामोवचनमब्रवीत्॥ श्यामंनलिनपत्राक्षंमत्तहंसस्वरः स्वयं॥१५॥ आगतात्वामियंबुद्धिः
स्वजावैनयिकीचया॥ भृशमुत्सहसेतातरक्षितुंपृथिवीमपि॥१६॥ अमात्यैश्चसुहृद्भिश्च
बुद्धिमद्भिश्चमंत्रिभिः॥ सर्वकार्याणिसंमंत्र्यमहांत्यपिहिकारय॥१७॥

स्यसमस्तस्यपालनेश
क्तिमानसि· रामस्यराज्यमित्येतावल्लोकपरिपालनेपेक्षितंसहायतयेत्यर्थः॥१३॥ एवमुक्तप्रकारं॥१४॥
स्वयमंकेकृत्वेत्यन्वयः॥१५॥ इयंबुद्धिर्मदनवासाविरोधिनीस्वीयत्वेनांगीकृत्यस्थापनविषया· आग
ताजानासास्वजास्वाभाविकीगुरुसेवयाप्राप्तायोविनयःशिक्षातज्जन्याच· इतरातुसर्वादुखेतिभावः· अथ
यात्वयास्वस्याशक्तिरुक्तापालनेसानास्त्येवेत्याह· भृशमिति॥१६॥ अमात्याः प्रधानमंत्रिणः· मंत्रिणउपमं

संगत्तालोकमतं प्राप्ताः ॥४॥ पितरं यद्यवेक्षसे पितुः सुखं यदीक्षसि इत्यर्थः ॥५॥ सदानरणां सतां स्वकृतसमीचीनानुष्ठानेनाश्रासर्वतोऽनणामित्यर्थः अनृणत्वात् रामप्रतिज्ञये तिशेषः यदि रामइदानीं विपरीतं कुर्यात् प्रतिनिधिद्वारा वानुतिष्ठेत्तदा तेपितुः स्वर्गाद्भ्रंश एवेतिध्वनिः ॥६॥७॥ अभ्यपूजयत् सम्यक्त्मां धर्म

ततस्त्वृषिगणाः क्षिप्रं दशग्रीववधैषिणः ॥ भरतं राजशार्दूलमित्यूचुः संगतावचः ॥८॥ कुले जातम हाप्राज्ञमहावृत्तमहायशः ग्राह्यं रामस्य वाक्यं ते पितरं यद्यवेक्षसे ॥९॥ सदानृणमिमं रामं वय मिच्छामहे पितुः ॥ अनृणत्वाच्च कैकेय्याः स्वर्गं दशरथो गतः ॥६॥ एतावदुक्त्वा वचनं गंधर्वाः स महर्षयः ॥ राजर्षयश्चैव तथा सर्वे स्वां स्वां गतिं गताः ॥७॥ ह्लादितस्तेन वाक्येन शुशुभे शुभदर्शनः रामः संहृष्टवदनस्तानृषीनभ्यपूजयत् ॥८॥ त्रस्तगात्रस्तु भरतः स वाचा सज्जमानया कृतांजलिरिदं वाक्यं राघवं पुनरब्रवीत् ॥९॥ राम धर्ममिमं प्रेक्ष्य कुलधर्मानुसंततं कर्तुमर्हसि काकुत्स्थ मम मातुश्च याचनां ॥१०॥

नो रक्षितवंत इत्यर्थः ऋणवानित्यर्थः ॥८॥ त्रस्तगात्रइति गत गात्रः स्रस्तगात्रः इति पाठांतरं ॥९॥ राम इमं धर्मं ज्येष्ठस्य राज्यमित्येवं रूपं कुलधर्मं वुध्या ऽनुसंततं संबद्धं धर्मम् अथ प्रेक्ष्य कालधर्मीश्च संततमिति पाठे धर्ममुक्तं । अथ अथवा कालधर्मान् कालकृतस्वशक्तिमान्द्यस्तदभावत्वलक्षणान्प्रेक्ष्य विचार्य मम मातुः कौसल्यायाश्च याचनां कर्तुमर्हसि ॥१०॥

सरामः पादुके ऽधिरुत्य व्यवमुच्य पुनस्ततो बहृत्य भरताय प्रायच्छत् एतेन प्रतिनिधिदानद्वारा राज्यरक्षा नियोगकृतः प्रतिपद्य स्थापयेति चिरं भरत प्रार्थनं च साधितं ॥ अधिरोहणेन शक्तिविशेषस्य तत्र स्थापनं यद्दर्शनेन सर्वज्ञत्वसंपत्तिबोध्यं तदुक्तं पाद्मे ज्ञात्वा तदा ज्ञाताभ्यां च भरतः क्षितिमन्वशादिति तां भ्यां पादुकाभ्यां तद्दर्शनमात्रेणेदृशो विषये भगवत एवमाज्ञेति ज्ञात्वा तथा व्यवहारमकरोदित्यर्थः

सोधिरुत्य नरव्याघ्रः पादुके व्यवमुच्य च ॥ प्रायच्छत्सुमहातेजा भरताय महात्मने ॥ २२ ॥ स पादुके संप्रणम्य रामं वचनमब्रवीत् ॥ चतुर्दश हि वर्षाणि जटाचीरधरो ह्यहं ॥ २३ ॥ फलमूलाशनो वीर भवेयं रघुनंदन ॥ तवागमनमाकांक्षन्वसन्वै नगराद्बहिः ॥ २४ ॥ तव पादुकयोर्न्यस्य राज्यतंत्रं परंतप ॥ चतुर्दशे हि संपूर्णे वर्षेहनि रघूत्तम ॥ २५ ॥ न द्रक्ष्यामि यदि त्वां तु प्रवेक्ष्यामि हुताशनं ॥ तथेति च प्रतिज्ञाय तं परिष्वज्य सादरं ॥ २६ ॥ शत्रुघ्नं च परिष्वज्य वचनं चेदमब्रवीत् ॥ मातरं रक्ष कैकेयीं मा रोषं कुरु तां प्रति ॥ २७ ॥

भरतस्तु पांचजन्याऽवतारत्वादाद्यादितसार्वज्ञ्यपद्वत्यनेन सूचितं ॥ भगवत्स्पर्शेनाचेतनेपि सर्वज्ञदानशक्तिमत्त्वमिति भगवन्माहात्म्यातिशयद्वारा रामस्येश्वरत्वं च सूचितं ॥ २२ ॥ जटाचीरधर इत्यादिना राज्यकृतभोगाभावः सूचितः ॥ २३ ॥ २४ ॥ राज्यतंत्रं राज्यव्यापारं न्यस्य त्वद्बुद्ध्या विनिवेद्य चतुर्दशे वर्षे संपूर्णे पंचदशवर्षाद्यदिवसे यदि त्वां न द्रक्ष्यामि तदाग्निं प्रवेक्ष्यामि ॥ २५ ॥ २६ ॥ २७ ॥

अथ मात्रया च नयापि इदानीं परावृत्तिरशक्येत्याह· लक्ष्मीरित्यादि· पितुः प्रतिज्ञां न त्यजेयमिति शेषः ॥१८॥ कामा
त्· त्वद्गतस्नेहात्· लोभात्· ॥ त्वद्व्याजेन राज्यकरणलोभात्· तुभ्यं मात्रा तव मात्रा· षष्ठ्यर्थे आर्षी चतुर्थी ॥ यदि
दं कृतं तत्तु वा निष्टमपि· अनिष्टमिति· मनसि न कर्तव्यमदाज्ञयेति शेषः ॥ अतस्तस्यां मातृवदेव वर्त्तित
व्यं· शुश्रूषितव्यं· तदर्हमिति निवृत्ति कामात् देवानामिच्छातः ॥ लोभाद्वा लोभादेव तेषां देवलोकराज्य

लक्ष्मीश्चन्द्रादपेयाद्वा हिमवान्वा हिमं त्यजेत् ॥ अतीयात्सागरो वेलां न प्रतिज्ञामहं पितुः ॥१८॥
कामाद्वा तात लोभाद्वा मात्रा तुभ्यमिदं कृतं ॥ न तन्मनसि कर्तव्यं वर्त्तितव्यं च मातृवत् ॥१९॥
एवं ब्रुवाणं भरतः कौसल्यासुतमब्रवीत् ॥ तेजसादित्यसंकाशं प्रतिपच्चंद्रदर्शनं ॥२०॥ अधि
रोहार्य पादाभ्यां पादुके हेमभूषिते ॥ एते हि सर्वलोकस्य योगक्षेमं विधास्यतः ॥२१॥

लोभात्· तव मात्रा दैवैरेवमंथराद्वारा इदं कृतं कारितमिति गूढोर्थः शेषं प्राग्वत् ॥१९॥ प्रतिपच्चंद्रद
र्शनमित्यनेन तद्वदादरणीयदर्शनत्वं वर्धिष्णुत्वं चिरमदर्शनं च सूचितम् ॥२०॥ एते [illegible] उटजसन्नि
हिते ॥ अधिरोहेत्यनेन भद्रासनस्थानीयपादुकयोः प्रतिनिधिभूतयोरारोहणेन राज्यप्रतिपत्ति
कारिता· एषा च प्रार्थना वसिष्ठनियोगानंतरं बोध्या· भरद्वाजं प्रति· एते प्रयच्छ संतुष्टः पादुके
हेमभूषिते इति वसिष्ठोक्तित्वेन वक्ष्यमाणत्वात्· प्रतिनिधित्वमेवाह· एते हीत्यादिना ॥२१॥

रामा॰ अ॰
३२०

मंदाकिनी चित्रकूटोत्तरपार्श्ववर्त्तिनी· प्रदक्षिणमिति· उत्तरपार्श्वस्थां मंदाकिनीं प्राप्य प्राङ्मुखतया गमनात्सिद्धं· तस्य प्रदक्षिणकरणं ॥३॥ पार्श्वेन उत्तरपार्श्वेन ॥४॥ यत्र यमुनादक्षिणकूले अतएव चित्रकूटस्यादुरात्· अनेन यमुनादक्षिणतटे षिक्कचित् भरद्वाजाश्रम इति ज्ञायते· ॥ अतएवाग्रे भर

मंदाकिनीं नदीं रम्यां प्राङ्मुखास्ते ययुस्तदा ॥ प्रदक्षिणं च कुर्वाणाश्चित्रकूटं महागिरिं ॥३॥ पश्यन् धातुसहस्राणि रम्याणि विविधानि च ॥ प्रययौ तस्य पार्श्वेनससैन्यो भरतस्तदा ॥४॥ अदूराच्चित्रकूटस्य ददर्श भरतस्तदा ॥ आश्रमं यत्र स मुनिर्भरद्वाजः कृतालयः ॥५॥ स तमाश्रममागम्य [illegible] भरद्वाजस्य बुद्धिमान् ॥ अवतीर्य रथात्पादौ ववंदे कुलनंदनः ॥६॥ ततो हृष्टो भरद्वाजो भरतं वाक्यमब्रवीत् ॥ अपि कृत्यं कृतं तात रामेण च समागतं ॥७॥ एवमुक्तः स तु ततो भरद्वाजेन धीमता ॥ प्रत्युवाच भरद्वाजं भरतो धर्मवत्सलः ॥८॥ स याच्यमानो गुरुणा मया च दृढविक्रमः ॥ राघवः परप्रीतो वसिष्ठं वाक्यमब्रवीत् ॥९॥

नौ

द्वाजामंत्रणोत्तरं· तत स्तेय मुनातीर्त्वैति वक्ष्यति· संप्रति तत्र स्थितिस्तु रामभरतयोः संवादं शिष्यद्वारा श्रुत इति श्रोतुमिति बोध्यं ॥५॥६॥ कृत्यं कर्तव्यं कृतमपि अपिः प्रश्ने· कृत्यमेवाह· रामेण चेति ॥७॥८॥ गुरुणा वसिष्ठेन मया च· परमप्रीतः सत्यपरिपालनविषय इति शेषः ॥९॥ राम

राम
३२०

३२०

शप्तोसिरोषाकरणायेतिशेषः॥२८॥संपरिगत्यशिरसेतिशेषः उत्तमनागमूर्धनिराजोपवाह्यगजमस्तके॥त
त्कालाभिषिक्तराजाधिरोहणाधियेतिशेषः सर्वलोकप्रख्यापनार्थमेतत्॥२९॥३०॥सर्वाः सकैकेयीः अनेन
कैकेय्यादोषराहित्यंसूचितं॥रुदन् रुदन्निव॥३१॥इतिश्रीरामाभिरामेश्रीरामीयेरामायणतिलकेत्र

मयाचसीतयाचैवशप्तोसिरघुनंदन॥इत्युक्त्वाश्रुपरीताक्षोभ्रातरंविससर्जह॥२८॥सपादुके
तेभरतःस्वलंकृतेमहोज्वले संपरिगृह्यधर्मवित्॥प्रदक्षिणंचैवचकारराघवंचकारचैवोत्त
मनागमूर्धनि॥२९॥अथानुपूर्व्यात्प्रतिपूज्यतंजनंगुरूंश्चमंत्रीन्प्रकृतीस्तथानुजौ॥व्यसर्जय
द्राघववंशवर्धनःस्थितःस्वधर्मेहिमवानिवाचलः॥३०॥तंमातरोबाष्पगृहीतकंठ्योदुःखे
ननामंत्रयितुंहिशेकुः सत्वेवमातॄरभिवाद्यसर्वारुदन्कुटींस्वांप्रविवेशरामः॥३१॥इत्यार्षे
श्रीरा॰ अयो॰ द्वादशाधिकशततमःसर्गः॥११२॥ततः सशिरसिकृत्वानुपादुकेभरतस्तदा
आरुरोहरथंहृष्टः शत्रुघ्नसहितस्तदा॥१॥वसिष्ठोवामदेवश्चजाबालिश्चदृढव्रतः॥अग्र
तःप्रययुःसर्वेमंत्रिणोमंत्रपूजिताः॥२॥

योः॰ द्वादशाधिकशततमःसर्गः॥११२॥ततइति॥पूर्वंसर्व
लोकज्ञानायगजमस्तकेस्थापयित्वापुनःसादरंततआदायस्वमस्तकेकृत्वेत्यर्थः॥यद्वाशिरसीत्य
स्यगजशिरसीत्येवार्थः॥१॥मंत्रेगाढकार्यविचारेनिश्चितत्वेनपूजिताइत्यर्थः॥२॥ राम

उक्त्वा कांउक्तरीत्येति शेषः आमंत्रयितुमारेभे आमंत्रणं कृतवान् ॥१८॥१९॥२०॥ यमुनां तीर्त्वा गंगां ददृ
शुरिति ॥ यमुनां तीर्त्वा तस्मिन्नेव दिने भरद्वाजं दृष्ट्वा गंगां ददृशुरित्यर्थः ॥ इति कश्चित् ॥ तन्नु पूर्वोक्तरीत्या
र्षत्रि

तमृषिं तु महाप्राज्ञमुक्त्वा वाक्यं कृतांजलिः ॥ आमंत्रयितुमारेभे चरणावुपगृह्य च ॥१८॥ ततः प्रद
क्षिणं कृत्वा भरद्वाजं पुनः पुनः ॥ भरतस्तु ययौ श्रीमानयोध्यां सह मंत्रिभिः ॥१९॥ यानैश्च शक
टैश्चैव हयैर्नागैश्च सा चमूः ॥ पुनर्निवृत्ता विस्तीर्णा भरतस्यानुयायिनी ॥२०॥ ततस्ते यमु
नां दिव्यां नदीं तीर्त्वोर्मिमालिनीं ॥ ददृशुस्तां पुनः सर्वे गंगां शिवजलां नदीं ॥२१॥ तां रम्यज
लसंपूर्णां संतीर्य सह बांधवः ॥ शृंगवेरपुरं रम्यं प्रविवेश ससैनिकः ॥२२॥ शृंगवेरपुराद्भू
यः अयोध्यां संददर्श ह ॥ अयोध्यां तु तदा दृष्ट्वा पित्रा भ्रात्रा विवर्जितां ॥२३॥ भरतो दुःखसं
तप्तः सारथिं चेदमब्रवीत् ॥ सारथे पश्य विध्वस्ता अयोध्या न प्रकाशते ॥ निराकारा निरा
नंदा दीना प्रतिहतस्वना ॥२४॥ इत्यार्षे श्रीरामायणे अयोध्याकांडे त्रयोदशाधिकशततमः स
र्गः ॥११३॥ स्निग्धगंभीरघोषेण स्यंदनेनोपयान्प्रभुः अयोध्यां भरतः क्षिप्रं प्रविवेश महायशाः ॥१॥

सामंजस्याद्वेयं जलस्य शिवत्वं रम्यत्वं च दर्शनमात्रेण सकलपापहं तत्त्वं मधुरत्वं च ॥२१॥२२॥ शृंगवेर
पुरादिति निर्गत्येति शेषः ॥२३॥ विध्वस्ता विध्वस्तशोभा निराकारा निरलंकारा ॥२४॥ इति त्रयोदशाधिक

याकैकेयीनिमित्तंममपितुःप्रतिज्ञा-चतुर्दशवर्षाणि रामेणवनेवस्तव्यमिति-तामेवपितुःप्रतिज्ञांपाल-
यिष्यामीतिसंबंधः॥१०॥एवमुक्तः रामेणेतिशेषः॥११॥प्रयच्छप्रतिनिधित्वेनेतिविशेषः॥अप्राप्तप्राप्ति

पितुःप्रतिज्ञांतामेवपालयिष्यामितत्त्वतः॥चतुर्दशहि वर्षाणियाप्रतिज्ञापितुर्मम॥१०॥एव
मुक्तोमहाप्राज्ञोवसिष्ठःप्रत्युवाचह॥वाक्यज्ञोवाक्यकुशलंराघववचनंब्रवीत्॥११॥एतेप्र
यच्छसंतुष्टः पादुकेहेमभूषिते॥अयोध्यायांमहाप्राज्ञयोगक्षेमकरोभव॥१२॥एवमुक्तो
वसिष्ठेनराघवः प्राङ्मुखःस्थितः॥पादुकेहेमविकृतेममराज्यायतेददौ॥१३॥निवृत्तोहमा
नुज्ञातोरामेणसुमहात्मना॥अयोध्यामेवगच्छामिगृहीत्वापादुकेशुभे॥१४॥एतच्छ्रुत्वाशु
भंवाक्यंभरतस्यमहात्मनः॥भरद्वाजःशुभतरंमुनिर्वाक्यमुदाहरत्॥१५॥नैतच्चित्रंनर
व्याघ्रशीलवृत्तविदांवरे॥यदार्यंत्वयितिष्ठेत्तुनिम्नोत्सृष्टमिवोदकं॥१६॥अनृणःसम
हाबाहुःपितादशरथस्तव॥यस्यत्वमीदृशःपुत्रोधर्मात्माधर्मवत्सलः॥१७॥

योगःप्राप्तस्यप
रिपालनंक्षेमःतत्करोभवेति-एतद्वाराभरतेसार्वज्ञ्यसंपादनेनेतिशेषः॥१२॥हेमविकृतेहेम्नाविचि
त्रतयाकृतेममराज्यायममराज्यरक्षार्थंत्वनुग्रहार्थमित्यर्थः॥१३॥१४॥१५॥यदार्यःशोभनचरित्रं
त्वयितिष्ठेदितियत्तत्वत्सृष्टमुदकंनिम्नेतिष्ठेदितिवन्नचित्रं निम्नेतिलुप्तसप्तम्यंतं॥१६॥१७

यज्ञायुधैः स्रुगादिभिः अभिरूपैः प्रशस्तैः सुत्या कालेयागकाले निर्वृत्ते समाप्ते सति ॥ ८ ॥ गोष्ठेव्रजं तत्र स्थि-
तां गोवृषेण अरण्यगवा वृषभेण ॥ यद्वा गवां प्रियेण वृषभेण त्यक्तां अत एवार्त्तां तत्रोत्सुकां नवतृणम
रंतीमभक्षयंतीं गवां तरुणवृषाणां पत्नीमिव स्थितां गवां पंक्तिमिवेति पाठांतरं ॥ पत्नीमित्यस्य पंक्ति
मित्यर्थं तीर्थं आह न द्विंत्यं ॥ ९ ॥ प्रभाकराद्यैः पद्मरागाद्यैः स्फटिकाद्यैरिति कतकोक्तं तु न युक्तं ॥ १० ॥

त्यक्तां यज्ञायुधैः सर्वैरभिरूपैश्च याजकैः ॥ सुत्याकाले सुनिर्वृत्ते वेदिं गतरवामिव ॥ ८ ॥ गो
ष्ठमध्ये स्थितामार्त्तां सचरंतीं नवं तृणं ॥ गोवृषेण परित्यक्तां गवां पत्नीमिवोत्सुकां ॥ ९ ॥
प्रभाकराद्यैः सुस्निग्धैः प्रज्वलद्भिरिवोत्तमैः ॥ वियुक्तां मणिभिर्जात्यैर्नवां मुक्तावलीमि
व ॥ १० ॥ सहसाचरितां स्थानान्महीं पुण्यक्षयोद्गतां ॥ संवृतद्युतिविस्तारां तारामिव दिवश्च्यु
तां ॥ ११ ॥ पुष्पनद्धां वसंतांते मत्तभ्रमरशालिनीं ॥ द्रुतदावाग्निविप्लुष्टां क्लांतां वनलतामिव
॥ १२ ॥ संमूढनिगमां सर्वां संक्षिप्तविपणापणां ॥ प्रच्छन्नशशिनक्षत्रां द्यामिवांबुधरैर्युतां ॥ १३ ॥

स्थानात्सहसाचरितां चलितां पुण्यक्षये तिलुप्तसत्सम्पतं पुण्यक्षये सति महीं प्राप्तां संवृतो द्युतिवि
स्तारो यस्यास्तां ॥ ११ ॥ द्रुतदावाग्निविप्लुष्टां वेगवद्दावाग्निनाव्याप्तां ॥ १२ ॥ संमूढाः शोकाकुलचि
त्ता निगमा वणिजो यस्यां यद्वा संमूढो जनसंचाररहितो निगमः पंथा यस्यां ॥ निगमो निश्चये वे
दे पुरे पथि वणिक्पथे संक्षिप्ता विपणापणाः ॥ पण्यवीथ्यो यस्यां ॥ १३ ॥ ॥

विडालादिभिश्चरितां तत्संचारवतीं । आसमंताल्लीनानि निश्चलानि लग्नानि नराणां वारणानि कपाटानि यस्यां
तां । तिमिरेणालक्ष्यतां प्राप्तां अत एव कालीं तत एवाप्रकाशां निशामिव स्थिताम् अयोध्यां प्रविवेशेत्यन्वयः ॥२॥ राहु
शत्रोश्चंद्रस्य प्रियया दिव्यैश्वर्येणायुक्तां अत एव प्रज्वलितप्रभां अभ्युदितेन ग्रहेण राहुणा पीडितभर्तृकां अत
एवैकाम् असहायां रोहिणीमिव स्थितां ॥३॥ आतपवशाद्दत्तोष्मं क्वथं कलुषं च सलिलं यस्यास्तां । झषो मत्स्यविशेषः

विडालोलूकचरितामालीननरवारणां ॥ तिमिराभ्याहतां कालीमप्रकाशां निशामिव ॥२॥ राहुशत्रोः
प्रियां पत्नीं श्रिया प्रज्वलितप्रभां ॥ ग्रहेणाभ्युदितेनैकां रोहिणीमिव पीडितां ॥३॥ ईषदुष्णक्वथसलि
लां घर्मोत्तप्तविहंगमां ॥ लीनमीनझषग्राहां कृशां गिरिनदीमिव ॥४॥ विधूमामिव हेमाभां शिखाम
ग्नेः समुत्थितां ॥ हविरभ्युक्षितां पश्चाच्छिखां विप्रलयं गतां ॥५॥ विध्वस्तकवचारुग्णगजवाजिरथ
ध्वजां ॥ हतप्रवीरामापन्नां चमूमिव महाहवे ॥६॥ सफेनां सस्वनां भूत्वा सागरस्य समुत्थितां ॥ प्रशां
तमारुतोद्धूतां जलोर्मिमिव निस्वनां ॥७॥

क्वथेत्यार्षं ॥४॥ विधूमाम् अत एव हेमाभां । अग्नेः समुत्थितां शि
खामिव । पूर्वं रामस्थितिसमये जाज्वल्यमानरूपतया स्थितां । पश्चाद्रामविवासनकाले हविरभ्युक्षितां प
योहोमीयपयःसिक्तां अत एव विप्रलयं गतां शिखामिव स्थितां । अध्वराग्नेः समुत्थितामिति पाठो बहुसं
मतः तत्राप्ययमर्थः प्राग्वदेव शिखामित्यस्य चावृत्तिः ॥५॥६॥ समुत्थितां प्रबलमारुतेन समुत्थितां अत एव सफे
नां सस्वनामूर्मिमिव भूत्वा तत्सदृशं रूपं प्राप्य पश्चात्प्रशांतमारुतेनोद्धूतां कंपितां मत एव निस्वनां सा

२२।२३। मम भ्रात्रा सदेति शेषः। २४। आर्जुनी शारदी शुक्लपक्षसंबंधिनी वा सा सा सारा वेगवद्वृष्टिधारा सहिता महोत्सवद्ववग्रीष्मे बुद्बुदद्रवच। २५। उन्नतगामिभिः संतोषादुद्धतगामिभिः। २६।२७।२८। सुरैरुत्क्रुष्टं तशोकमभास्करदिनमिव एवं हि श्रूयते पुरा देवासुरेयुद्धे सुरैर्देवा पराजिताराहुणा च भानुः पीत

नेदानीं श्रूयते पुर्यामस्यां रामे विवासिते। चंदनागरुगंधांश्च महार्हांश्च नवस्रजः। २२। गते रामे हि तरुणाः संतप्ता नोपभुंजते। बहिर्यात्रां न गच्छंति चित्रमाल्यधरा नराः। २३। नोत्सवाः संप्रवर्तंते रामशोकार्दिते पुरे। सा हि नूनं मम भ्रात्रा पुरस्यास्य द्युतिर्गता। २४। नहि राजत्ययोध्येयं सासारेवार्जुनी क्षपा। कदा नु खलु मे भ्राता महोत्सव इवागतः। २५। जनयिष्यत्ययोध्यायां हर्षं ग्रीष्म इवांबुदः। तरुणैश्चारुवेषैश्च नरैरुन्नतगामिभिः। २६। संपतद्भिरयोध्यायां नाभिभांति महापथाः। इति ब्रुवन्सारथिना दुःखितो भरतस्तदा। २७। अयोध्यां संप्रविश्यैव विवेश वसतिं पितुः। तेन हीनां नरेंद्रेण सिंहहीनां गुहामिव। २८। तदा तदंतःपुरमुज्झितप्रभं सुरैरिवोत्कृष्टमभास्करं दिनं। निरीक्ष्य सर्वत्र विभक्तमात्मवान्मुमोच बाष्पं भरतः सुदुःखितः। २९। इत्यार्षे श्रीरा॰ अ॰ चतुर्दशोत्तरशततमः सर्गः। ११४।

तदा दिवा रात्रविभागरहिते काले स्वस्वलोकात् ब्रह्मलोकं गतैर्देवैः प्रार्थितस्य ब्रह्मणो नियोगादत्रिः सप्तरात्रं सूर्याधिपत्यं चकारेति तीर्थः देवैरुत्कृष्टं भास्करहीनं दिनं कविकल्पितमत्रोपमानमिति कतकः विभक्तं विगत

क्षीणयानोत्तमैः क्षीणमद्यैः भग्नैश्शरावैः संवृत्तं हतशौंडां हतमद्यपां ।१४। वृक्णा भूमितलां भिन्नचत्वरां भिन्नपात्रैर्यु
क्तां भग्नां भग्नस्तंभां उपयुक्तोदकां ससमाप्तोदकां ॥१५॥ विपुलां विशालां विततां धनुष्यानततां युक्तपाशां धनुष्को

क्षीणयानोत्तमैर्भग्नैः शरावैरभिसंवृतां ॥ हतशौंडामिव ध्वस्तां पानभूमिमसंस्कृतां ॥१४॥ वृक्णभू
मितलां निम्नां वृक्णपात्रैः समावृतां ॥ उपयुक्तोदकां भग्नां प्रपां निपतितामिव ॥१५॥ विपुलां वित
तां चैव युक्तपाशां तरस्विनां ॥ भूमौ बाणैर्विनिर्वृत्तां पतितां ज्यामिवायुधात् ॥१६॥ सहसा युद्ध
शौंडेन हयारोहेण वाहितां ॥ निहतां प्रतिसैन्येन वडवामिव पातितां ॥१७॥ भरतस्तु रथस्थः
सन् श्रीमान् दशरथात्मजः ॥ वाहयंतं रथश्रेष्ठं सारथिं वाक्यमब्रवीत् ॥१८॥ किन्नु खल्वद्य गंभी
रो मूर्छितो न निशाम्यते ॥ यथापुरमयोध्यायां गीतवादित्रनिस्वनः ॥१९॥ वारुणीमदगंधश्च
माल्यगंधश्च मूर्छितः ॥ चंदनागरुगंधश्च न प्रवाति समंततः ॥२०॥ यानप्रवरघोषश्च सु
स्निग्धहयनिस्वनः ॥ प्रमत्तगजनादश्च महांश्च रथनिस्वनः ॥२१॥

योर्ज्याबंधनार्थपाशयु
क्तां तरस्विनां बाणैर्विनिकृत्तां छिन्नां आयुधाद्धनुषः पतितां ।१६। सहसा बलात्कारेण वाहितां प्र
धावितां प्रतिसैन्येन निहतामत एव पातितां ।१७।१८। यथापुरं यथापूर्वं न निशाम्यते खलु अत्र
किं कुर्म इति योजना ॥१९॥ मदकरो गंधः मूर्छितो व्याप्तः ॥२०॥ २१॥

राम

तदनाकुतं भरतेनाकृतात्स्नानमपि ॥११॥१२॥१३॥ एतदयोध्याराज्यं मम भ्रात्रा संन्यासवत् समीचीनवस्तुनिक्षेप
वन्मयि दत्तं स्थापितं कालांतरे ग्रहणाय विश्वस्तपुरुषे रक्षणार्थं वस्तुस्थापनं न्यासो निक्षेप इति च न्या
सस्यापि राज्यस्य रक्षणं भगवत्पादुकाधीनमेव न मदधीनमित्याह योगेत्यादि ॥ इत्युवाचेति पूर्वेणा
न्वयः ॥१४॥ पादुके संन्यासं पादुकात्मकं सद्वस्तुन्यासं वेदाः प्रमाणमिति वत्साधु शिरसा कृत्वा प्रणा

बलं च तदनाकुतं गजाश्वरथसंकुलं ॥ प्रययौ भरते याते सर्वे च पुरवासिनः ॥११॥ रथस्थः स
तु धर्मात्मा भरतो भ्रातृवत्सलः ॥ नंदिग्रामं ययौ तूर्णं शिरस्यादाय पादुके ॥१२॥ भरतस्तु ततः क्षि
प्रं नंदिग्रामं प्रविश्य सः ॥ अवतीर्य रथात्तूर्णं गुरूनिदमभाषत ॥१३॥ एतद्राज्यं मम भ्रात्रा द
त्तं संन्यासमुत्तमं ॥ योगक्षेमवहे चेमे पादुके हेमभूषिते ॥१४॥ भरतः शिरसा कृत्वा संन्यासं
पादुके ततः ॥ अब्रवीद्दुःखसंतप्तः सर्वं प्रकृतिमंडलं ॥१५॥ छत्रं धारयत क्षिप्रमार्यपा
दाविमौ मतौ ॥ आभ्यां राज्ये स्थितो धर्मः पादुकाभ्यां गुरोर्मम ॥१६॥

म्येति यावत् ॥१५॥ इमौ
पादुकारूपौ आर्यपादाविति पादशब्दः पूजावाची विधेयाभिप्रायेणा चेमावितिपुल्लिंगनिर्देशः
श्रीतं हि यत्साप्रकृतिर्जलस्येति तत्परमपूज्यरामभावनाविषये इमे पादुके इत्यर्थः राज्ये प्र
क्षितो मम गुरोर्धर्मव्यवहारो अनयोरेव स्थितो त आभ्यां पादुकाभ्यां छत्रं धारयत एतत्संनि
धानादेव तत्तद्व्यवहारधर्मव्यवहारांश ज्ञानं ममेति भावः ॥१६॥ राम

ततइति।१।अत्रअयोध्यायांतेनसहागमनंवारितंराघवंविनादुःखंपितृभ्रातृवियोगजंदुःखमितियावत् २ तदेव

ततोनिक्षिप्यमातृस्ताअयोध्यायांदृढव्रतः।भरतःशोकसंतप्तोगुरूनिदमथाब्रवीत्।१।नंदिग्रामंगमिष्यामिसर्वानामंत्रयेऽद्यवः।तत्रदुःखमिदंसर्वंसहिष्येराघवंविना।२।गतश्चाहोदिवंराजावनस्थःसगुरुर्मम।रामंप्रतीक्षेराज्यायसहिराजामहायशाः।३।एतच्छ्रुत्वाशुभंवाक्यंभरतस्यमहात्मनः।अब्रुवन्मंत्रिणःसर्वेवसिष्ठश्चपुरोहितः।४।सुभृशंश्लाघनीयंचयदुक्तंभरतत्वया।वचनंभ्रातृवात्सल्यादनुरूपंतवैवतत्।५।नित्यंतेबंधुलुब्धस्यतिष्ठतोभ्रातृसौहृदे।मार्गमार्यंप्रपन्नस्यनानुमन्येतकःपुमान्।६।मंत्रिणांवचनंश्रुत्वायथाभिलषितंप्रियं।अब्रवीत्सारथिंवाक्यंरथोमेयुज्यतामिति।७।प्रहृष्टवदनःसर्वामातॄःसमभिभाष्यच।आरुरोहरथंश्रीमान्शत्रुघ्नेनसमन्वितः।८।आरुह्यतुरथंक्षिप्रंशत्रुघ्नभरतावुभौ।ययतुःपरमप्रीतौवृतौमंत्रपुरोहितैः।९।अग्रतोगुरवःसर्वेवसिष्ठप्रमुखाद्विजाः।प्रययुःप्राङ्मुखाःसर्वेनंदिग्रामोयतोभवेत्।१०।

ह॰ गतश्चेति।३।४।५।बंधुलुब्धस्यबंधुजनपरिपालनेऽधिकस्पृहावतःआर्यंश्रेष्ठंनानुमन्येतत्वद्वचनमितिशेषः।६।यथाभिलषितंस्वाभिलषितमनतिक्रम्यप्रवृत्तं।७।८।९।नंदिग्रामोयतोभवेत्-येनमार्गेणसंप्राप्तोभवेत्तेनययुः।१०।

सोद्वेगंसभयं· औत्सुक्यंआश्रमांतरगमनौत्सुक्यं॥१॥पुरस्तात्पूर्वंयेतापसाः चित्रकूटस्य आश्रमे संधि
रार्थः राममाश्रित्यनिरताः नितरांरताः सानंदाः स्तांश्चुत्सुकान् लक्षयत् ॥अत्रेदंबोध्यं· चैत्रशुक्लदशम्यांपु
ष्येरामवनप्रस्थानं· ततःपूर्णिमायां मर्धरात्रेदशरथमरणं॥ततःपक्षेणभरतागमनमयोध्यायां॥तत
और्ध्वदेहिकेनपक्षोगतः॥एवंवैशाखेगतंज्येष्ठेभरतस्यचित्रकूटप्रस्थानं॥अग्रेवर्षासन्निहितेति
कार्तिकांतेचित्रकूटेवासोरामस्य·।नदनंतरंतापसौत्सुक्यलक्षणं· ननुभरतनिवृत्यनंतरमेवेतदि
ति·॥अनाएवपाये·॥भरतस्यायोध्यांप्रतिनिवृत्यनंतरमुक्तं।राघवश्चित्रकूटाद्दौसानुजोरमतस्त्रिया·

प्रतियातेतुभरतेवसन्रामस्तदावने॥लक्षयामाससोद्वेगमथौत्सुक्यंतपस्विनां॥१॥
येतत्रचित्रकूटस्यपुरस्तात्तापसाश्रमे॥राममाश्रित्यनिरतास्तानालक्षयदुत्सुकान्॥२॥

कदाचिदंकेवैदेह्यानिद्राणेरघुनंदने॥ऐंद्रः काकः॥समागम्यजानकीवीक्ष्यकामुकः विददारनखै
स्तीक्ष्णैः॥पीनोन्नतपयोधरं·॥तंदृष्ट्वाराघवः क्रुद्धः कुशंजग्राहपाणिना·।ब्राह्मेणास्त्रेणसंयोज्यचि
क्षेपध्वांक्षमारणे·॥तंदृष्ट्वाघोरसंकाशंज्वलत्कालानलोपमं·॥दृष्ट्वाकाकःप्रदुद्रावविनिनदन्दारु
णस्वनं·वायसस्त्रिषुलोकेषुबभ्रामभयपीडितः यत्रयत्रययौकाकः शरणार्थीचवायसःतत्रत
त्रतदस्त्रंतुप्रविवेशभयानकं·ब्रह्माणमिंद्ंरुद्ंमांशरणार्थीजगामसः तंदृष्ट्वावायसंभीतंदेव
तानररक्षिमं·नशक्तास्मवयंत्रातुंराघवास्त्राद्भयंकरात्·इत्यब्रूममहादेवि·अन्यथास्त्रंदहेद्वनः

अयंराज्यरूपःसंन्यासोनिक्षेपोनिक्षिप्तःराघवागमनंप्रतितावत्पर्यंतं ।१७। संयोजयित्वाचरणयोः पादुके ।१८। समा
गतोमिलितःनिवेद्यप्रत्यर्प्य गुरुवर्त्तितां गुरूचितशुश्रूषां ।१९।२०। अवसत्धीरःधीमान् ।२१। बालव्यजने
नसहितंछत्रंसभरतःसर्वंशासनंताभ्यांनिवेदयन् उक्तविशेषणंछत्रंस्वयमेवधारयामास ।२२। आर्य

भ्रात्रातुमयिसंन्यासोनिक्षिप्तःसौहृदादयं ।तमिमंपालयिष्यामिराघवागमनंप्रति ।१७। क्षिप्रंसं
योजयित्वातुराघवस्यपुनःस्वयं ।चरणौतौतुरामस्यद्रक्ष्यामिसहपादुकौ ।१८। ततोनिक्षि
प्तभारोहंराघवेणसमागतः ।निवेद्यगुरवेराज्यंभजिष्येगुरुवर्त्तितां ।१९। राघवायचसंन्यासं
दत्वेमेवरपादुके ।राज्यंचेदमयोध्यांचधूतपापोभवाम्यहं ।२०। सवल्कलजटाधारीमुनि
वेषधरःप्रभुः ।नंदिग्रामेवसद्वीरःससैन्योभरतस्तदा ।२१। सवालव्यजनंछत्रंधारयामाससस
स्वयं ।भरतःशासनंसर्वंपादुकाभ्यांनिवेदयन् ।२२। ततस्तुभरतःश्रीमानभिषिच्यार्यपादु
स
के ।तदधीनस्तदाराज्यंकारयामाससर्वदा ।२३। तदाहियत्कार्यमुपैतिकिंचिदुपायनंचोपहृतं
महार्हं ।सपादुकाभ्यांप्रथमंनिवेद्यचकारपश्चाद्भरतोयथावत् ।२४। इत्यार्षेश्रीरामायणेआ
यो०पंचदशाधिकशततमःसर्गः ।११५।

पादुकेभिषिच्यतयोराज्याभिषेकंकृत्वा· तदधीनःपादु
काधीनः ।२४। यत्कार्यंराज्यविषयंआयद्यथावत्कोशागारस्थमुपायनंचकारप्रजान्यायकार्यंचय
थावत्शास्त्रनतिक्रमेणचकार ।२४। इतिपंचदशोत्तरशततमःसर्गः ।११५। ॥

रामा॰ अ॰
३२६

मयिपूर्ववत्तंपूर्वंराजवत्तेनदृश्यतेकश्चित् । विकृतंवादृश्यतेकश्चित् । येनतपस्विनोविक्रियंते ॥ इदंतपस्वि
विक्रियारूपंकिंचित्कारणंकिंभवतीतितन्निवेदयतुभवानितिशेषः ॥५॥ अवरजस्यलक्ष्मणस्य । नानुरूपं
चरितं । अयुक्ताचरणंप्रमादाज्ज्ञातंकिंचिदृषिभिर्नदृष्टंकश्चित् ॥६॥ वःशुश्रूषमाणाअर्घ्यपाद्यादिना

नकच्चिद्भगवन्किंचित्पूर्ववृत्तमिदंमयि ॥ दृश्यतेविकृतंयेनविक्रियंतेतपस्विनः ॥५॥ प्र
मादाच्चरितंकिंचित्कच्चिन्नावरजस्यमे ॥ लक्ष्मणस्यर्षिभिर्दृष्टंनानुरूपंमहात्मनः ॥६॥ कच्चि
च्छुश्रूषमाणावःशुश्रूषणपरामयि ॥ प्रमदाभ्युचितांवृत्तिंसीतायुक्तांनवर्तते ॥७॥ अथर्षि
र्जरयावृद्धस्तपसाचजरांगतः ॥ वेपमानइवोवाचरामंभूतदयापरं ॥८॥ कुतःकल्याणस
त्वायाःकल्याणाभिरतेःसदा ॥ चलनंतातवैदेह्यास्तपस्विषुविशेषतः ॥९॥ त्वन्निमित्तमिदं
तावत्तापसान्प्रतिवर्तते ॥ रक्षोभ्यस्तेनसंविग्नाःकथयंतिमिथःकथाः ॥१०॥ रावणावरजः
कश्चित्खरोनामेहराक्षसः ॥ उत्पाद्यतापसान्सर्वान्जनस्थाननिवासिनः ॥११॥

326

युष्मान्सेवमानाअधुनामच्छुश्रूषानुरोधात्प्रमदोचितांयुष्मासुयुक्तांवृत्तिंशुश्रूषाविषयांसी
तानवर्त्ततेकच्चित् ॥७॥ तपसाचवृद्धइत्यनुकर्षः वेपमानइव । कथंवारामोमंस्यतइतिकंपः ॥ राम
जरयावाकंपः ॥ इवइवार्थे ॥८॥ सत्वस्वभावः ॥९॥ त्वन्निमित्तत्वतोहेतोः ॥ इदंभयंरक्षोभ्यःसमा ३२६
गतमितिभावः ॥१०॥ कथंतत्राह । रावणेति । उत्पाद्यसंपीड्य ॥११॥ राम

पुनश्चागाद्दिविं काकोदययाविधिराहतं · भोभोबलिभुजांश्रेष्ठ तमेवशरणंव्रज · स एव रक्षकः श्रीशःश
रणागतवत्सलः इत्युक्तः सोथबलिभुक् ब्रह्मणा रघुनंदनं · उपेत्य सहसाभूमौ निपपातभयातुरः प्राण
संशयमापन्नं दृष्ट्वासीतातुवायसं · त्राहि त्राहीति भर्तारमुवाच दययाविभुं · तच्छिरः पादयोस्तस्य युयु
जे चाथ जानकीतमुत्थाप्य करेणाथ कृपापीयूषसागरं · ररक्षासौ निजास्त्रायतदेकाक्षि ददौ नदा · वाय
सोपि मुहुर्नत्वा सीतायै राघवाय च · स्वर्लोकं प्रययौ तद्धै राघवेणाभिपालितः ततो रामो महातेजा वै

नयनैर्भ्रुकुटीभिश्च रामं निर्दिश्य शंकिताः ॥ अन्योन्यमुपजल्पंतः शनैश्चक्रुर्मिथः कथाः ॥३॥
तेषामौत्सुक्यमालक्ष्य रामस्त्वात्मनिशंकितः ॥ कृतांजलिरुवाचेदमृषिं कुलपतिं ततः ॥४॥

दत्यालक्ष्मणेनच · उवासचित्रकूटाद्रौ स्तूयमानो महर्षिभिरिति ॥२॥ कथमलक्षयत त्राह · नयनैरित्या
दिनिर्दिश्य प्रदर्श्य · शंकिताः रामः किमेस्यतइतिभीताः नदनादिभिः प्रदर्श्यान्योन्यमुपजल्पंतः आव्हयं
तः शनैरुपांशु कथाश्चक्रुः अयं राम इह सस्त्रीक आस्ते राक्षसाश्चैनं द्वेषेणेह संचरंतोऽस्मान् बा
धतेऽतोन्यत्र गंतव्यमित्येवंरूपा कथाश्चक्रुः ॥३॥ शंकत अशंकतेत्यर्थः एतदाश्रमत्यागकारणमा
त्मनिस्वदोषमशंकतेत्यर्थः अतएव कृतांजलिः सन्कुलपतिं ऋषिसंघस्वामिनमाश्रमस्वामि
नं · वा कुलमन्वयसंघातगृहोत्पत्त्याश्रमेषु च ॥४॥ ॥ राम ॥

रामा॰ अ॰
३२७

शारीरीमुपद्विंसांप्राणवियोगरूपां पुरादर्शयंति दर्शयिष्यति अतइममाश्रमंत्यक्ष्यामः १९ अश्वस्य
नविद्यतेश्वः संचयोयस्यतस्यमहर्षेः पषोदरादित्वात्सुध्यु एतेनरक्षोभयविवारणानमत्वंतस्यदर्शितं
२० पुराप्रवर्तनेप्रवर्तयिष्यति अतस्त्वमनित्यप्रयुक्तस्यापिसदासावधानस्यापिरक्षोनिग्रहेसमर्थ
स्यापि सकलत्रस्यापिदेहुगर्भमेनत् इहाश्रमेसंदेहः संदेहवानेववासः अर्शआद्यच्दुःखोदुः

तत्पुराराममशारीरीमुपद्विंसांतपस्विषु दर्शयंतिद्विदुस्तेत्यक्ष्यामेइममाश्रमं १९ बहुम्
लफलंचित्रमविदूरादितोवनं अश्वस्याश्रममेवाहंश्रयिष्येसगणः पुनः २० खरस्त्वय्य
पिचायुक्तंपुरारामप्रवर्तते सहास्माभिरितोगच्छयदिबुद्धिःप्रवर्तते २१ सकलत्रस्यसं
देहोनित्यंयुक्तस्यराघव समर्थस्यापिहिसतोवासोदुःखमिहाद्यते २२ इत्युक्तवंतंरामस्तं
राजपुत्रस्तपस्विनं नशशाकोत्तरैर्वाक्यैरवबद्धुंसमुत्सुकं २३ अभिनंद्यसमाधायसमा
धायचराघवं सजगामाश्रमंत्यक्त्वाकुलैःकुलपतिःसह २४

स्वि॰ १
॥२

खजनकः अतस्त्वाप्यत्र
वस्थानमनुचितमितिव्यंग्यमतस्त्वमपिसहास्माभिरितोगच्छेत्यन्वयः २१ २२ अवबद्धुं अहंर
क्षांसिनिवारयिष्यामि मामेवेत्यादिवचनैर्निवारयितुंनशशाक॰ तत्रहेतुः समुत्सुकमि
ति कार्यशेषस्यस्वीयान्यदेशगमनसाध्यत्वाच्च २३ अभिनंद्यस्तुत्वा समाधायस्ववियोगखि
न्नंसमाश्वास्य कुलैर्ऋषिसंघैः २४

राम॰
३२७

जितकाशीजिताहवःजितभयोवा· त्वांचनमृष्यते· पीडयतुमिच्छति॥१२॥ विप्रकुर्वंतिअपकुर्वंति॥१३॥ त
मकारंदर्शयंति· दर्शयंतीति· बीभत्सैर्जुगुप्सितवेषैः रूपै रात्मानंदर्शयंतीत्यन्वयः॥१४॥ अप्रशस्तैः
पापजनकै रशुचिभिः पदार्थैः स्तापसान्संप्रयुज्य विप्रकुर्वंति·॥ अपरानतिमृदून्प्रतिघ्नंत्यपिपीडयं

ध्वस्यश्चजितकाशीचनृशंसः पुरुषादकः॥ अवलिप्तश्चपापश्चत्वांचतातनमृष्यते॥१२॥ त्वय
दाप्रभृतित्यस्मिन्नाश्रमेतातवर्तसे॥ तदाप्रभृतिरक्षांसि विप्रकुर्वंतितापसान्॥१३॥ दर्शयंति
हि बीभत्सैः क्रूरैर्भीषणकैरपि॥ नानारूपैर्विरूपैश्चरूपैरसुखदर्शनैः॥१४॥ अप्रशस्तैरशु
चिभिः संप्रयुज्यचतापसान्॥ प्रतिघ्नंत्यपरान्क्षिप्रमनार्याः पुरतःस्थितान्॥१५॥ तेषुतेष्वाश्र
मस्थानेष्वबुद्धमवलीयच॥ रमंतेतापसांस्तत्रनाशयंतोल्पचेतसः॥१६॥ अवक्षिपंतिस्रुग्भां
डानग्नीन्सिंचंतिवारिणा॥ कलशांश्चप्रमर्दंतिहवनेसमुपस्थिते॥१७॥ तैर्दुरात्मभिराविष्टा
नाश्रमान्प्रजिघांसवः॥ गमनायान्यदेशस्यचोदयंत्यृषयोद्यमां॥१८॥

त्यपि॥१५॥ अबुद्धं।
अविदितंयथाभवतितथानिद्रादौ अवलीयचनिर्भयमाश्लिष्यचतदालिंगनेनाल्पचेतसोवि
चेतसस्तापसान्नाशयंतोरमंते॥१६॥ स्रुग्भांडान् स्रुगादियज्ञसंभारान् अवक्षिपंति· अवस्कंदयंति
कलशानुदकपात्राणिप्रमर्दंभंगः हवनेहोमकर्मणि· समुपस्थितेप्रवृत्ते॥१७॥ प्रजिघांसवःपरि
त्यक्तुमिच्छवः। मिथोमिलिताः॥१८॥

राजधानीतोनिर्गतायाः सेनाया निवासस्थानं स्कंधावारः तस्य भरतस्य तेन पुरतो दृश्यमानेन अनेन स्मत्पुवे
धकमुक्तं उपमर्दः भूमेरशुचिता ॥३॥४॥ स रामः तमत्रिं ॥ तमपि जगत्काराणाम पि रामं लोकव्यवहारानुस
रणेन पुत्रवत् अंगीचकार आलिंगनमूर्ध्राघ्राणादिभिः ॥५॥ स्वयमादिश्य विज्ञाप्याप्य सर्वमातिथ्यं सु

स्कंधावारनिवेशेनतेनतस्यमहात्मनः ॥ हयहस्तिकरीषैश्च उपमर्दः कृतोभृशं ॥३॥ तस्मा
दन्यत्रगच्छामिइतिसंचिंत्यराघवः ॥ प्रातिष्ठतसवैदेह्यालक्ष्मणेनचसंगतः ॥४॥ सोत्रेराश्रम
मासाद्यतंववंदेमहायशाः ॥ तंचस्मभगवानत्रिः पुत्रवत्प्रत्यपद्यत ॥५॥ स्वयमातिथ्यमा
दिश्यसर्वमस्यसुसत्कृतं ॥ सौमित्रिंचमहाभागंसीतांचसमसांत्वयत् ॥६॥ पत्नींचतम
नुप्राप्तांवृद्धामामंत्र्यसत्कृतां ॥ सांत्वयामासधर्मज्ञः सर्वभूतहितेरतः ॥७॥ अनसूयांमहा
भागांतापसींधर्मचारिणीं ॥ प्रतिगृह्णीष्ववैदेहीमब्रवीदृषिसत्तमः ॥८॥ रामायचाचचक्षेतां
तापसींधर्मचारिणीं ॥ दशवर्षाण्यनावृष्ट्यादग्धेलोकेनिरंतरं ॥९॥

सत्कृतं कृत्वा समसांत्वयत्
प्रीतियुक्तेन वक्त्रेण अपश्यत् ॥६॥ तं देशमनुप्राप्तां वृद्धां पत्नीं अनसूया नाम्नीं तापसीत्वादिगु
णायुक्तां वा वासत्कृतां सर्वैः सत्कृता वा ॥ आमंत्र्य संबोध्य सांत्वयामास ॥ प्रीत्या सीतां दर्शयामास
अनंतर वैदेही प्रतिगृह्णीष्वेत्यब्रवीदित्यर्थः ॥७॥८॥ तामाचचक्षेत हे भवंक थितवान् तदेव दर्शय

रामस्तस्माद्देशादपर्यंतं ऋषिगणमनुगमनात् अनुव्रजनेन संसाध्य प्रस्थाप्य कुलपतिमृषिमभिवाद्य सम्यक् प्रीतैस्तैरनुमतः कृतानुमतिक उपदिष्टार्थः स्वतः संदेहाद त्रावस्थानमनुचितमिति कृतोपदेश पुण्यं स्वनिलयं वासायोपसंपेदे ॥ २५ ॥ तमपि न जहौ सीता राम णार्थमितिभावः आर्षं ऋषिसंबंधि च रितं वृत्तं यस्य तादृशे राघवे धृतगुणाः निश्चित निजरक्षासामर्थ्य गुणाः केचित्तामसाः सततं निरंतरं र

राम: संसाध्य ऋषिगणमनुगमनाद्देशात्तस्मात् कुलपतिमभिवाद्य ऋषिं ॥ सम्यक् प्रीतैस्तैरनुम त उपदिष्टार्थः पुण्यं वासाय स्वनिलयमुपसंपेदे ॥ २५ ॥ आश्रमं ऋषिविरहितं प्रभुः क्षणमपि न जहौ स राघवः राघवं हि सततमनुगतास्तापसाश्चार्षचरिते धृतगुणाः ॥ २६ ॥ इत्यार्षे श्रीरा मायणे अयोध्याकांडे षोडशोत्तरशततमः सर्गः ११६ ॥ राघवस्त्वपयातेषु सर्वेष्वनुविचिं तयन् ॥ न तत्रारोचयद्वासं कारणैर्बहुभिस्तदा ॥ १ ॥ इह मे भरतो दृष्टो मातरश्च सनागराः सा च मे स्मृतिरन्वेति तान्नित्यमनुशोचतः ॥ २ ॥

घवमनुगता हि अनुगता एव नाश्रमांतरं जग्मुः ॥ २६ ॥ इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके अयोध्याकांडे षोडशोत्तरशततमः सर्गः ॥ ११६ ॥ अनुवि चिंतयन् वक्ष्यमाणलक्षणमुपाधिं ॥ १ ॥ तमेवाह इहेति मे मया संबंधसामान्ये षष्ठी सा मे स्मृतिमां नि त्यमनुशोचतस्तानन्वेति विषयीकरोति एवं च तादृशतत्स्मरणेन ममापि शोकोवर्धत इति भावः ॥ २

तामनसूयेत्यन्वर्थनामां ॥ अभिगम्यामक्रोधनत्वात् १६ ॥ १७ ॥ शिथिलांमस्थिसंधिबंधां॰ वलितां संजातव
लिं॰ वृद्धामितिसर्वोपपादकं विशेषणं ॥ प्रवातेकदलीमिववेपमानांगीं स्थितां ॥ १८ ॥ समुदाहरत् अभिवा
दनांगत्वेनेतिशेषः १९ अनामयमितितपस्विनां स्वायत्तकुशलतया रोगप्रश्न एवोचित इतिभावः २० ध

अनसूयेतियाल्लोके कर्मभिः ख्यातिमागता ॥ तांशीघ्रमभिगच्छत्वमभिगम्यां तपस्विनीं ॥ १६ ॥ सीता
त्वेतद्वचः श्रुत्वा राघवस्य यशस्विनी ॥ तामत्रिपत्नीं धर्मज्ञामभिचक्राम [illegible] मैथिली ॥ १७ ॥ शि
थिलां वलितां वृद्धां जरापांडुरमूर्धजां ॥ सततं वेपमानांगीं प्रवाते कदलीमिव ॥ १८ ॥ तां तु सीता
महाभागामनसूयां पतिव्रतां ॥ अभ्यवादयदव्यग्रा स्वं नाम समुदाहरत् ॥ १९ ॥ अभिवाद्य च वैदे
ही तापसीं तां दमान्वितां ॥ बद्धांजलिपुटा हृष्टा पर्यपृच्छदनामयं ॥ २० ॥ ततः सीतां महाभागां दृ
ष्ट्वा तां धर्मचारिणीं ॥ सांत्वयंत्यब्रवीद्दृष्ट्या दिष्ट्या धर्ममवेक्षसे ॥ २१ ॥ त्यक्त्वा ज्ञातिजनं सीते मा
नमृद्धिं च मानिनि ॥ अवरुद्धं वने रामं दिष्ट्या त्वमनुगच्छसि ॥ २२ ॥ नगरस्थो वनस्थो वा शुभो वा
यदि वाशुभः ॥ यासां स्त्रीणां प्रियो भर्ता तासां लोका महोदयाः ॥ २३ ॥ दुःशीलः कामवृत्तो वा धनैर्वा
परिवर्जितः ॥ स्त्रीणामार्यस्वभावानां परमं दैवतं पतिः ॥ २४ ॥

र्मचारिणीं॰ भर्तृसमानधर्मचारिणीं॰
दिष्ट्यादैवयोगेन २१ मानं॰ राजसुताहं कथं वनं गच्छेयमित्येवंरूपं॰ वने अवरुद्धं वनवासे पित्रा
नियुक्तं २२ शुभोनुकूलः अशुभः प्रतिकूलः प्रियः लौकिकालौकिकनिमित्ततोऽप्रियत्वानासंपद २३

फलमूले ऋषीणां जीवनायेति शेषः॥ जान्हवी गंगा च पवर्तिनादशवर्षमनावृष्ट्यामूमेर्निर्जलत्वात् तेषां स्नानार्थं मंत्रसिद्ध्यै वै भवेनावाहितां स्वाश्रमे इति शेषः॥१०॥ अनसूयाव्रतैः तत्कृतैर्व्रतैः प्रत्यूहाः ऋषीणां तपोविघ्नाः॥११॥ देवकार्यमिति। मांडव्य ऋषिणा प्रातर्विधवा भवेति कस्यांचिदृषिपत्न्यामनसूयासख्यां शप्तायां प्रातरेवमाभूदिति तया प्रतिशापे दत्ते तत्प्रतिशापेन व्याकुलैर्देवैः प्रार्थितानसूया दशरात्रावधिकालं

यया मूलफले सृष्टे जान्हवी च प्रवर्तिता॥ उग्रेण तपसा युक्ता नियमैश्चाप्यलंकृता॥१०॥ दशवर्षसहस्राणि यया तप्तं महत्तपः॥ अनसूयाव्रतैस्तात प्रत्यूहाश्च निबर्हिताः॥११॥ देवकार्यनिमित्तं च यया संत्वरमाणया॥ दशरात्रं कृता रात्रिः सेयं मातेव तेनघ॥१२॥ तामिमां सर्वभूतानां नमस्कार्यां तपस्विनीं॥ अभिगच्छतु वैदेही वृद्धामक्रोधनां सदा॥१३॥ एवं ब्रुवाणं तमृषिं तथेत्युक्त्वा स राघवः॥ सीतामालोक्य धर्मज्ञामिदं वचनमब्रवीत्॥१४॥ राजपुत्रि श्रुतं त्वेतन्मुनेरस्य समीरितं॥ श्रेयोर्थमात्मनः शीघ्रमभिगच्छ तपस्विनीं॥१५॥

एकरात्रित्वेन कृत्वा देवकार्यं कृतवती सख्या वैधव्यं च परिहृतवती इति गाथेति कतकः सेयं माते व ते पूज्येति शेषः॥१२॥ अभिगच्छतु दर्शनार्थमिति शेषः ननु वैदेह्या अल्पवयस्त्वेन व्यवहारानभिज्ञत्वात् क्वचिद्व्यवहारे स्खलनेनानर्थः स्यादत आह अक्रोधनां सदेति॥१३॥१४॥ अस्य मुनेः समीरितं वचनं यतः श्रुतमत आत्मनः श्रेयोर्थमित्यादि॥१५

रामा॰अ॰
३३०

अनुभाषसे शिक्षयसि॰ नार्यागुरुः पतिरिति॰ यथाभवत्योपदिष्टं एतद्विदितं एतद्विषयकं ज्ञानं ममापि २
तदेवदर्शयति यद्यपीति॰ एषभर्तायद्यप्यनार्यैः पूज्यश्च स्निग्धहीनः वृत्तिवर्जितः जीवनरहितो दरिद्र अभ
वेत् तथापि मया मद्विधया॰ अत्र भर्तरि अद्वैधं प्रकारद्वयरहितं यथाभवति तथा वर्तव्यं वर्तितव्यं प्री
तिप्रकारेणैव वर्तितव्यमित्यर्थः ३ गुणश्लाघ्यत्वादिविशिष्टेसावरन्ति रितिकिं पुनर्वक्तव्यं॰ मातृवत्
पितृवत्प्रियः मयीतिशेषः प्रियः प्रीतिमान् ममेति वाशेषः प्रीतिविषयइत्यर्थः मातृवर्तीप्रितप्रिय

नैतदाश्चर्यमार्यायां यन्मां त्वमनुभाषसे विदितं तु ममाप्येतद्यथा नार्याः पतिर्गुरुः २ यद्य
प्येष भवेद्भर्ता अनार्यो वृत्तिवर्जितः अद्वैधमत्र वर्तव्यं तथाप्येष मया भवेत् ३ किं पुन
र्यो गुणश्लाघ्यः सानुक्रोशो जितेन्द्रियः स्थिरानुरागो धर्मात्मा मातृवत्पितृवत्प्रियः ४
यां वृत्तिं वर्तते रामः कौसल्यायां महाबलः तामेव नृपनारीणां अन्यासामपि वर्तते ५ स
कृद्दृष्टास्वपि स्त्रीषु नृपेण नृपवत्सलः मातृवद्वर्तते वीरो मानमुत्सृज्य धर्मवित् ६

330

इतिपाठे॰ मातृवर्ती मातृसेवारतः पितुः प्रीतिविषयइत्यर्थइतितीर्थः ४ अन्यासामपिनृपनारी
णां सुमित्रादीनां विषयेपीत्यर्थः तथा अन्यासामपिविषये मदतिरिक्तस्त्रीमात्र विषयेपितामे
व वृत्तिं कुरुतेइत्यर्थः नृपनारीणामित्यनेनैव सुमित्रादीनां लाभादित्यन्ये ५ नृपेण दशरथेन
मानं अहं महाप्रभुरित्यभिमानेत्यक्त्वेत्यर्थः अन्यमते उक्तार्थे सत्यत्वप्रत्यायनायैतदुक्तिरितिबोध्यं ६

राम
३३०

अनोविशिष्टंभर्तुर्विशिष्टं बांधवमिष्टबंधुं सर्वत्रयोग्यंपद्गामुत्रचेष्टसाधनतयाभजनयोग्यं तपःकृ
तंभावेनिष्ठा तपोनुष्ठानमितियावत् ॥२५॥ याःकामवक्तव्यहृदयाः कामाधीनहृदयाः गत्याधीतौ
तुवक्तव्यौ ॥ भर्तृनाथाः ॥ भर्तृणांनाथभूतास्तत्रियंत्र्यः यद्वाभर्तृन्भोगार्थंनाथंतेयाचंते ना रंतिस्वे

नातोविशिष्टंपश्यामिबांधवंविमृशंत्यहं ॥ सर्वत्रयोग्यंवैदेहितपःकृतमिवाव्ययं ॥२५॥ नत्वेव
मवगच्छंतिगुणदोषमसत्स्त्रियः ॥ कामवक्तव्यहृदयाभर्तृनाथाश्चरंतियाः ॥२६॥ प्राप्नुवंत्यय
शश्चैवधर्मभ्रंशंचमैथिलि ॥ अकार्यवशमापन्नाः स्त्रियोयाः खलुतद्विधाः ॥२७॥ त्वद्विधा
स्तुगुणैर्युक्तादृष्टलोकपरावराः ॥ स्त्रियःस्वर्गेचरिष्यंतियथापुण्यकृतस्तथा ॥२८॥ तदेवमे
तंत्वमनुव्रतासतीपतिप्रधानासमयानुवर्तिनी ॥ भवस्वभर्तुःसहधर्मचारिणीयशश्चध
र्मंचततःसमाप्स्यसि ॥२९॥ इत्यार्षेश्रीरामायणेवाल्मीकीयेअयोध्याकांडेसप्तदशोत्तर
शततमःसर्गः ॥११७॥ सात्वेवमुक्तावैदेहीत्वनसूयानसूयया ॥ प्रतिपूज्यवचोमंदंप्रवक्तु
मुपचक्रमे ॥१॥

कृत्याद्भूतस्ततोयांति ॥२६॥ नद्विधाः उक्तनिकृष्टगुणवत्यः ॥२७॥ दृष्टोलोकःपरोवर
श्चयाभिस्ताः ॥२८॥ समयश्चाचारः ॥२९॥ इतिश्रीरामाभिरामेश्रीरामीयेरामायणतिलकेअयोध्याकांडे
सप्तदशाधिकशततमःसर्गः ॥११७॥ अनसूयाअसूयारहिताः अनसूययाअन्वर्थतन्नाम्न्या वचः
अनसूयाद्यः ॥१॥

राम॰ अ॰
३३१

तद्बलं संश्रित्य आश्रित्य छंदये वरं वृणीष्वेति प्रार्थयामि ॥ १४ ॥ १५ ॥ विस्मिता जाताश्चर्या अहो तपसो माहात्म्यं यन्ममापि वरदाने सामर्थ्यं मंद विस्मया मंदस्मिता कृतं भवत्या अनुग्रहेणैव सर्वं मे पूर्णं न किंचित्कर्तव्यमस्तीति भावः ॥ १६ ॥ तया लोभरहितत्वात् प्रहर्षे लोभराहित्यजे स्वनिष्ठे तेत्वद्विषये ॥ १७ ॥ अं

नियमैर्विविधैराप्तं तपो हि महदास्ति मे ॥ तत्संश्रित्य बलं सीते छंदये त्वां शुचिव्रते ॥ १४ ॥
उपपन्नं च युक्तं च वचनं तव मैथिलि ॥ प्रीता चास्म्युपचितां सीते करवाणि प्रियं च किं ॥ १५ ॥
तस्यास्तद्वचनं श्रुत्वा विस्मिता मंदविस्मया ॥ कृतमित्यब्रवीत्सीता तपोबलसमन्वितां ॥ १६ ॥ सा त्वेवमुक्ता धर्मज्ञा तया प्रीतितरा भवत् ॥ सफलं च प्रहर्षं ते हंत सीते करोम्यहं ॥ १७ ॥ इदं दिव्यं वरं माल्यं वस्त्रमाभरणानि च ॥ अंगरागं च वैदेहि महार्हमनुलेपनं ॥ १८ ॥
मया दत्तमिदं सीते तव गात्राणि शोभयेत् ॥ अनुरूपमसंक्लिष्टं नित्यमेव भविष्यति ॥ १९ ॥
अंगरागेण दिव्येन लिप्तांगी जनकात्मजे ॥ शोभयिष्यसि भर्तारं यथा श्रीर्विष्णुमव्ययं ॥ २० ॥

331

गरागः उद्वर्तनेनांगानि रंजयतीत्यंगरागः केसरचंदनादिजः अनुलेपनं तु कर्पूरागरुकस्तूरीकंकोलैर्यक्षकर्दम इत्यभिप्रकारो दिव्यगंधद्रव्यकल्कः इति तीर्थः कतकस्तु अंगरागं अंगरंजनकं अनुलेपनं दिव्यगंधद्रव्यकल्कमित्यर्थ इत्याह इदमेव युक्तं ॥ १८ ॥ शोभयेत् शोभयिष्यति अनुरूपं त्वदेकोचितं नित्यमेवासंक्लिष्टं उपभोगेपि अशुचित्वमर्दितत्वादिदोषरहितं भविष्यति ॥ १९ ॥ शोभ

राम
३३१

वा॰ रा॰ ति॰ २०

यन्मेश्वश्वासमाहितंत्वदुक्तार्थकमेववाक्यं शिक्षितंतन्मेहृदिस्थिरंवर्तते ७ तदपिमेधृतं मात्रनुशा
सनमपिमेन्दहृतमेवास्ति ८ यन्वस्वैः आत्मीयैः बंधुवर्गैः पतिशुश्रूषणादिप्रकारैर्बोधितमर्थजातंतच्च
मेनविस्मृतंतुइत्यर्थः ९ सावित्रीसत्यवतःपत्नीः तथावर्त्तिःसावित्रीसमानवर्तितंत्वं अनसूयायाते

आगच्छंत्याश्चविजनंवनमेवंभयावहं समाहितंहिमेश्वश्वाहृदयेयत्स्थिरंमम ७ पाणि
प्रदानकालेचयत्पुरात्वाग्निसन्निधौ अनुशिष्टंजनन्यामेवाक्यंतदपिमेधृतं ८ नविस्मृतंतुमे
सर्वंवाक्यैः स्वैर्धर्मचारिणि पतिशुश्रूषणान्नार्यास्तपोनान्यद्विधीयते ९ सावित्रीपतिशु
श्रूषांकृत्वास्वर्गेमहीयते तथावर्त्तिश्चयातात्वंपतिशुश्रूषयादिवं १० वरिष्ठासर्वनारी
णामेषाचदिविदेवता रोहिणीनविनाचंद्रंमुहूर्त्तमपिदृश्यते ११ एवंविधाश्चप्रवरास्त्रि
योभर्तृदृढव्रताः देवलोकेमहीयंतेपुण्येनस्वेनकर्मणा १२ ततोनसूयासंहृष्टाश्रुत्वो
क्तंसीतयावचः शिरस्याघ्रायचोवाचमैथिलींहर्षयंत्पुन १३

त्फक्तिः पातिव्रत्यमहिम्ना
स्वर्गस्यहस्तगतत्वात् इत्तिीर्थः तपोर्थमिहवर्तमानापिपतिसेवयामर्त्यंतरेणदिवंयातेत्यर्थइति
कतकः १० रोहिणीविनाचंद्रंमुहूर्त्तमपिनदृश्यते पूर्वकृतपतिशुश्रूषावशादेवंपतिसाहित्यं
प्राप्तमितिभावः ११ प्रवराःस्त्रियोरुंधत्यादयः १२ हर्षयंत्पुनहर्षयत्यपीत्यर्थः उतापर्यविकल्पयोः १३

मुष्टिविक्षेपतत्परः॥ याजाताओषधयोदेवेभ्यइत्यादिमंत्रोक्तप्रकारेण षष्ठिमुष्टिविकरणतत्परइतितीर्थः॥ नि
म्नोन्नतसमीकरणायमृत्तिकामुष्टिविक्षेपतत्परइतिकतकः॥२९॥अत्रचोत्तरार्थे॥३०॥प्रतिमामानुषीप्रति
मयास्वरूपेणमानुषी मनुष्यवान्तुल्यावागंतरिक्षेउक्तांवाचमाह एवमिति एतत्ममेयंतनये
त्येतत् एवमर्थवदेवयतोहिनरपतेधर्मेणन्यायेनराघात्वत्क्षेत्रजातत्वात्तवतनयैव॥३१॥मामवाप्य

समीदृष्ट्वानरपतिर्मुष्टिविक्षेपतत्परः॥ पांसुगुंठितसर्वांगीविस्मितोजनकोभवत्॥२९॥अन
पत्येनचस्नेहादंकमारोप्यचस्वयं॥ ममेयंतनयेत्युक्त्वास्नेहोमयिनिपातितः॥३०॥अंतरि
क्षेचवागुक्ताप्रतिमामानुषीकिल॥ एवमेतन्नरपतेधर्मेणतनयातव॥३१॥ततःप्रहृष्टोधर्मा
त्मापितामेमिथिलाधिपः॥ अवाप्तोविपुलामृद्धिमामवाप्यनराधिपः॥३२॥दत्त्वाचास्मीष्टव
द्देव्यैज्येष्ठायैपुण्यकर्मणे॥ तयासंभाविताचास्मिस्निग्धयामातृसौहृदात्॥३३॥पतिसंयोग
सुलभंवयोदृष्ट्वातुमेपिता॥ चिंतामभ्यगमद्दीनोवित्तनाशादिवाधनः॥३४॥

यत्तन्ममेरितिशेषः
मह्याभोक्तरंतस्यमहतीसमृद्धिर्जातेतिभावः॥३२॥ इष्टवद्देव्यैइष्टायैदेव्यैराज्ञ्यैइष्टमितिभावेक्त
इष्टमिक्तान्तइत्यैविषयतासंबंधेनेति अंतरार्थः आर्षवासाधुत्वमुक्तार्थे· यद्वासंतानेक्तावत्यैदेव्यै
इत्यर्थः॥ पुण्यकर्मणेइतिदेवीविशेषणं· तृतीयांतः॥ पाठःक्वचित्॥ संभाविता संवर्धिता॥३३॥पति
संयोगसुलभंपाणिग्रहणंचितं॥३४॥

क्षत्रियत्वात्प्रतिग्रहानधिकारेणाप्रीतिदानमित्युक्तं । लक्ष्म्युद्देशेनब्राह्मणादिभ्योदत्तमक्षयंचेत्‌ साक्षाल्ल
क्ष्म्येप्रीत्यादत्तंतथेतिकिंवक्तव्यमितिदेवैतद्दानमनसूयायाइतिबोध्यं ॥२१॥ श्लिष्टांजलिपुटारचि

सावस्त्रमंगरागंचभूषणानिस्रजस्तथा ॥ मैथिलीप्रतिजग्राहप्रीतिदानमनुत्तमं ॥२१॥ प्रतिग
ह्यचतत्सीताप्रतिदानंयशस्विनी ॥ श्लिष्टांजलिपुटाधीरासमुपास्ततपोधनां ॥२२॥ तथासी
तामुपासीनामनसूयादृढव्रता ॥ वचनंप्रसुमारेभेकथांकांचिदनुप्रियां ॥२३॥ स्वयंवरेकि॰
लप्राप्तात्वमनेनयशस्विना ॥ राघवेणेतिमेसीतेकथाश्रुतिमुपागता ॥२४॥ तांकथांश्रोतुमि
च्छामिविस्तरेणचमैथिलि ॥ यथाभूतंचकार्त्स्न्येनतन्मेत्वंवक्तुमर्हसि ॥२५॥ एवमुक्तातुसासी
तातापसींधर्मचारिणीं ॥ श्रूयतामितिचोक्त्वावैकथयामासतांकथां ॥२६॥ मिथिलाधिपतिर्वी
रोजनकोनामधर्मवित्‌ ॥ क्षत्रकर्मण्यभिरतोन्यायतःशास्तिमेदिनीं ॥२७॥ तस्यलांगलहस्त॰
स्यकृषतःक्षेत्रमंडलं ॥ अहंकिलोत्थिताभित्वाजगतीनृपतेःसुता ॥२८॥

तांजलिपुटा ॥२२॥ अ
नु अनंतरंप्रियांकांचित्कथांश्रोतुकामावचनंप्रसुमारेभे ॥२३॥ अनेनरामेणाश्रुतिंममश्रोत्रपथं ॥२४॥
विस्तरेणचविस्तरेणैव ॥२५॥२६॥२७॥ क्षेत्रमंडलं॰ यज्ञयोग्यक्षेत्रंचयनप्रकरणेषड्गवेनकृषतीतिश्रु
ते॰ कृषतस्तस्यपुरःजगतींभुवंभित्वोत्थिताएतावन्मात्रेणाहंनृपतेर्जनकस्यसुता ॥२८॥

नशंशयइतिपित्राप्याद्दतमितिपूर्वेणासंबंधः ॥४२॥ तोलनेचालनेअभिवाद्यनमस्कृत्य ॥४३॥४४॥४५॥ इमौध
नुर्दर्शनकांक्षिणौ । अतोरामायदैविकं देवदत्तंधनुर्दर्शयेति । विश्वामित्रःपितरंप्रोवाचेतिसंबंधः ॥४६॥४७॥

इदंचधनुरुद्यम्यसज्जंयःकुरुतेनरः तस्यमेदुहिताभार्याभविष्यतिनसंशयः ॥४२॥ तच्चदृष्ट्वा
धनुःश्रेष्ठंगौरवाद्गिरिसन्निभं ॥ अभिवाद्यनृपाजग्मुःअशक्तास्तस्यतोलने ॥४३॥ सुदीर्घस्यतुका
लस्यराघवोयंमहाद्युतिः ॥ विश्वामित्रेणसहितोयज्ञंद्रष्टुंसमागतः ॥४४॥ लक्ष्मणेनसहभ्रात्रारा
मःसत्यपराक्रमः ॥ विश्वामित्रस्तुधर्मात्माममपित्रासुपूजितः ॥४५॥ प्रोवाचपितरंतत्रराघवौरा
मलक्ष्मणौ ॥ सुतौदशरथस्येमौधनुर्दर्शनकांक्षिणौ ॥४६॥ इत्युक्तस्तेनविप्रेणतद्धनुःसमुपानयत्
तद्धनुर्दर्शयामासराजपुत्रायदैविकं ॥४७॥ निमिषांतरमात्रेणतदानम्यसवीर्यवान् ॥ ज्यांसमारो
प्यझटितिपूरयामाससवीर्यवान् ॥४८॥ तेनापूरयतावेगान्मध्येभग्नंद्विधाधनुः तस्यशब्दोभवद्भी
मःपतितस्याशनेर्यथा ॥४९॥ ततोहंतत्ररामायपित्रासत्याभिसंधिना ॥ उद्यतादातुमुद्यम्यजलभा
जनमुत्तमं ॥५०॥ दीयमानांनतुतदाप्रतिजग्राहराघवः ॥ अविज्ञायपितुश्छंदमयोध्याधिपतेःप्र
भो ॥५१॥ ततःश्वशुरमामंत्र्यवृद्धंदशरथंनृपं ॥ ममपित्रात्वहंदत्तारामायविदितात्मने ॥५२॥

333

पूरयामाससज्जंकृत्वाकृष्टवान् ॥४८॥४९॥ उत्तमंजलभाजनमुद्यम्यपित्राहंरामायदातुमुद्यतेइतिसं
बंधः ॥५०॥ छंदमभिप्रायं ॥५१॥५२॥

सदृशादपकृष्टाच्च वरवर्गजनात् कन्यायाः पितेंद्रसमोपि भुवि स्थितो लोके प्रधर्षणामसंमानादिरूपक्लेशमा
प्नोति किमुताधिकादिति शेषः ॥३५॥ अदूरस्थां निकटप्राप्तां धर्षणां कन्यानिमित्ततिरस्क्रियां आत्मनि
संदृश्य संभाव्य ऋवः पोतः ॥३६॥ सदृशं कुलविद्यादिना अभिरूपं वयःसौंदर्यादिना वरमिति शेषः ॥३७

सदृशाच्चापकृष्टाच्च लोके कन्यापिता जनात् ॥ प्रधर्षणामवाप्नोति शक्रेणापि समो भुवि ॥३५॥
तां धर्षणामदूरस्थां संदृश्यात्मनि पार्थिवः ॥ चिंतार्णवगतः पारं नाससादाप्लवो यथा ॥३६॥ अयोनि
जां हि मां ज्ञात्वा नाध्यगच्छत्स चिंतयन् ॥ सदृशं चानुरूपं च महीपालः पतिं मम ॥३७॥ तस्य बुद्धिरि
यं जाता चिंतयानस्य संततं ॥ स्वयंवरं तनूजायाः करिष्यामीति धर्मतः ॥३८॥ महायज्ञे तदा त
स्य वरुणेन महात्मना ॥ दत्तं धनुर्वरं प्रीत्या तूणी चाक्षय्यसायकौ ॥३९॥ असंचाल्यं मनुष्यैश्च य
त्नेनापि च गौरवात् ॥ तद्वशाद्दत्तं धनुर्वरं प्रीत्या तूणी चाक्षय्यसायकौ ॥३९॥ असंचाल्यं मनुष्यै
श्च यत्नेनापि च गौरवात् ॥ तन्न शक्ता नमयितुं स्वप्नेष्वपि नराधिपाः ॥४०॥ तद्धनुः प्राप्य मे पित्रा
व्याहृतं सत्यवादिना ॥ समवाये नरेंद्राणां पूर्वमामंत्र्य पार्थिवान् ॥४१॥

॥३८॥ महायज्ञे दत्तयज्ञे
तस्य मत्पितृपूर्वजस्य देवरातस्य तदा शत्रुजयसमर्थधनुस्त्राभायतपः करणकाले दत्तयज्ञे हि
शिवेन पीडिता देवाः शिवं संप्रार्थ्य धनुर्याचितवंतः स च देवेभ्यो दत्त्वोक्तवान् ॥ इदं देवरातायदीयतामि
ति ततो देवैर्वरुणद्वारा देवरातायदत्तं यद्वा व्रियते सर्वदेवैरिति व्युत्पत्त्या वरुणः शिव एव ॥३९॥

चंद्रोदयश्यतेइत्यनेनकार्तिकपुत्तरंप्रादिपदियारात्रिसूचितं ॥९॥ अनुचरीभवस्वअनुवुर्भव ॥१०॥ अलंकुरु आत्मानमितिशेषः प्रीतिंजनय अलंकृतदिव्यस्वस्वरूपानुभावनेनेतिशेषः ॥११॥१२॥१३॥ सर्वंन्यवेदयदित्यसै

संप्रवृत्तानिशासीत्तेनक्षत्रसमलंकृता ज्योत्स्नाप्रावरणश्चंद्रोदृश्यतेभ्युदितोंबरे ॥९॥ गम्यता मनुजानामिरामस्यानुचरीभव ॥ कथयंत्याहिमधुरंत्वयाहमपितोषिता ॥१०॥ अलंकुरुचताव त्वंप्रत्यक्षंममैथिलि प्रीतिंजनयमेवत्सेदिव्यालंकारशोभिनि ॥११॥ सातदासमलंकृत्यसीतासुरसुतोपमा ॥ प्रणम्यशिरसापादौरामंत्वभिमुखीययौ ॥१२॥ तथातुभूषितांसीतांददर्शवदतांवरः ॥ राघवः प्रीतिदानेनतपस्विन्याजहर्षच ॥१३॥ न्यवेदयत्ततः सर्वंसीतारामायमैथिली ॥ प्रीतिदानंतपस्विन्यावसनाभरणस्रजां ॥१४॥ प्रहृष्टस्त्वभवद्रामोलक्ष्मणश्चमहारथः मैथिल्याःसत्क्रियांदृष्ट्वामानुषेषुसुदुर्लभां ॥१५॥ ततःसशर्वरींप्रीतःपुण्यांशशिनिभाननां अर्चितस्तापसैःसर्वैरुवासरघुनंदनः ॥१६॥ तस्यांरात्र्यांव्यतीतायामभिषिच्यहुताग्निकान् आपृच्छेतांनरव्याघ्रौतापसान्वनगोचरान् ॥१७॥ तावूचुस्तेवनचरास्तापसाधर्मचारिणः॥ वनस्यतस्यसंचारंराक्षसैःसमभिप्लुतम् ॥१८॥

वप्रपंचःप्रीतिदानमित्यादिअत्रकर्मणिल्युट् ॥१४॥ मानुषेषुमनुष्यलोकेषु ॥१५॥ पुण्यांअनसूयययापुण्ययाकृतालंकारांसीतांदृष्ट्वाशर्वरीमुवास ॥१६॥ आपृच्छेतांवनांतरगमनार्थमितिशेषः ॥१७॥ संचारंदेशंवद्भिराषीसमभिप्लुतंसम्यगुपद्रुतं ॥१८॥

५३ ५४ इति श्रीरामाभिरामे श्रीरा० रा० ति० अयो० अष्टादशाधिकशततमः सर्गः ११८ अनसूयेति १ स्वयंवरं वृत्तं स्वयंवरो वृत्तः अर्धर्चादिः स्वयंवरः २ उपोत्य समीपं प्राप्य ३ दिवसं व्याप्य आहारार्थं परितः कीर्णानां

ममचैवानुजा साध्वी ऊर्मिला शुभदर्शना भार्यार्थे लक्ष्मणस्यापि दत्ता पित्रा मम स्वयं ५३ एवं दत्तास्मि रामाय तथा तस्मिन्स्वयंवरे अनुरक्तास्मि धर्मेण पतिं वीर्यवतां वरं ५४ इत्यार्षे श्रीरा० अयो० अष्टादशाधिकशततमः सर्गः ११८ अनसूया तु धर्मज्ञा श्रुत्वा तां महतीं कथां पर्यष्वजत बाहुभ्यां शिरस्याघ्राय मैथिलीं १ व्यक्ताक्षरपदं चित्रं भाषितं मधुरं त्वया यथा स्वयंवरं वृत्तं तत्सर्वं च श्रुतं मया २ रमेऽहं कथया ते तु दृढं मधुरभाषिणि रविरस्तं गतः श्रीमानुपोह्य रजनीं शुभां ३ दिवसं परिकीर्णानामाहारार्थं पतत्रिणां संध्याकाले निलीनानां निद्रार्थं श्रूयते ध्वनिः ४ एते चाप्यभिषेकार्द्रा मुनयः कलशोद्यताः सहिता उपवर्तन्ते सलिलाप्लुतवल्कलाः ५ अग्निहोत्रे च ऋषिणा हुते च विधिपूर्वकं कपोताङ्गारुणो धूमो दृश्यते पवनोद्धतः ६ अल्पपर्णा हि तरवो घनीभूताः समंततः विप्रकृष्टेन्द्रियेदेशे न प्रकाशन्ति वै दिशः ७ रजनीचरसत्त्वानि प्रचरन्ति समन्ततः तपोवनमृगा ह्येते वेदितीर्थेषु शेरते ८

चरतां निलीनानां निलीयमानानां ४ कलशोद्यताः उद्यतकलशाः सहिताः परस्परं मिलिताः ५ कपोताङ्गवत् पारावतवद् अरुणः मेचकः श्यामे रक्ते अरुणोऽर्के च ६ अल्पपर्णाः अपि तरवस्तमसाऽव्यक्तपर्णान्तरत्वात् घनीभूता इव विप्रकृष्टेन्द्रियदेशे इंद्रियविप्रकृष्टे दूरदेशे इत्यर्थः न प्रकाशन्ति न

व्यालाहिंस्रपशवः सर्पोहिंस्रः पशुर्व्याल इत्यमरः ॥ १९ ॥ उञ्छिष्टमसुचिं नमत्तमसावधानं तान्रक्षो व्याला- न् ॥ २० ॥ तमेयुक्तं ॥ २१ ॥ इतीरितः एवमुपदिष्टमार्गः ॥ कृतस्वस्त्ययनः कृतमंगलाशीर्वादः ॥ २२ ॥ इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके अयोध्याकांडे एकोनविंशाधिकशततमः सर्गः ॥ ११९ ॥

रक्षांसि पुरुषादानि नानारूपाणि राघव ॥ वसंत्यस्मिन्महारण्ये व्यालाश्च रुधिराशनाः ॥ १९ ॥
उच्छिष्टं वा प्रमत्तं वा तापसं ब्रह्मचारिणं ॥ अदंत्यस्मिन्महारण्ये तान्निवारय राघव ॥ २० ॥
एष पंथा महर्षीणां फलान्याहरतां वने ॥ अनेन तु वनं दुर्गं गंतुं राघव ते क्षमं ॥ २१ ॥ इती- रितः प्रांजलिभिस्तपस्विभिर्द्विजैः कृतस्वस्त्ययनः परंतपः ॥ वनं सभार्यः प्रविवेश रा- घवः सलक्ष्मणः सूर्य इवाभ्रमंडलं ॥ २२ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये अयोध्याकां- डे एकोनविंशाधिकशततमः सर्गः ॥ ११९ ॥ इत्ययोध्याकांडं संपूर्णमस्तु ॥ ॥

335

अंतर्यामी न वैकामी कामानिष्टजनप्रियान् ॥ राति विश्वंभरो रामो रातिवर्गनिजप्रदः ॥ १ ॥
संवत् ॥ १८४९ ॥ मार्गशिषकृष्णपक्षे ॥ ३ ॥ गुरुवारे ॥ ग्रंथसंख्या ॥ ४३५० ॥ टीका ॥ ५३५० ॥

वाल्मीकरामायणअयोध्याकांडसंपूर्णमस्तु पत्र ३३५